UNIVERSAL LIBRARY

OU_184309

UNIVERSAL LIBRARY

OUP—390—29-4-72—10,000.

OSMANIA UNIVERSITY LIBRARY

Call No. S81 R16P Accession No. PG 8597

Author

Title परिचयोत्तरशास्त्रीयं वाल्मीकीय रामायणम् . 1944

This book should be returned on or before the date last marked below.

श्रीदयानन्दमहाविद्यालय-संस्कृतग्रन्थमाला,

सा च

श्रीदयानन्दब्राह्ममहाविद्यालयाचार्यपदप्रतिष्ठितपूर्वेण श्रीदयानन्द-
महाविद्यालयीयानुसन्धानविभागस्य श्रीविश्वेश्वरा-
नन्दवैदिकशोधसंस्थानस्य च संचालकेन

सता

विश्वबन्धु-शास्त्रिणा

बहुभिर्विद्वद्भिः संगत्य
संपादिता

अयं च तस्याम्

एकोनविंशो ग्रन्थः

लाभपुरम्
२००० वि०

MEHARCHAND MUNSHIRAM
SANSKRIT & HINDI BOOK-SELLER
Nai Sarak DELHI.

The D.A.-V. College Sanskrit Series

EDITED

in conjunction with other scholars

by

VISHVA-BANDHU SHASTRI, M.A., M.O.L.,
Director, D.A.-V. College Research Department
and the Vishveshvarānanda Vedic Research Institute,
formerly, Principal, Dayānanda Brāhma Mahāvidyālaya.

Volume Nineteen

LAHORE
1944.

The D.A.-V. College Sanskrit Series, No. 19.

RĀMĀYANA

OF

VĀLMĪKI

(in its North-Western Recension)

YUDDHA-KĀṆḌA

Critically edited for the first time from original manuscripts

BY

VISHVA-BANDHU SHASTRI

with the assistance of

PITAMBARA-DATTA SHASTRI

LAHORE

1944.

श्रीदयानन्दमहाविद्यालय-संस्कृतग्रन्थमाला, सं० १६

अप्रकाशितचरं

पश्चिमोत्तरशाखीयं

वाल्मीकीय-रामायणम्

तत्र चैतत्

युद्ध-काण्डम्

विश्वबन्धु-शास्त्रिणा

पीताम्बरदत्त-शास्त्रिणः

साहाय्येन

नानादर्शपुस्तकाधारेण संशोध्य

संपादितम्

लाभपुरम्

२००० वि०

Published
by
The D.A.-V. College
Research Department,
LAHORE.

CHECKED 1965

(*All rights reserved*)

First Impression, 500 Copies.

PRICE : RS. 7-8-0.

Printed at
The Bombay Machine Press,
Lahore, (pages 3-346)
and
The V. V. R. Institute Press,
Lahore,
(pages i-vi and 1, 2 and 347-606.)

FOREWORD

Out of the ten manuscripts, namely, फ, अ, म, भ, रा१, रा२, ल१, ल२, प्र and ब utilised in this edition of the text of Yuddha-Kāṇḍa of Vālmīki's Rāmāyaṇa in its North-Western recension, the seven, namely, भ, रा१, रा२, ल१, ल२, प्र and ब have already been introduced in presenting the text-editions of the previous Kāṇḍas. The remaining ones, namely, फ, अ and म being distinct from their namesakes used in some of the previous Kāṇḍas, may be briefly noticed here:—

I. फ–1. Lal-Chand Library, D. A.-V. College, Lahore, No. 3035; 2. folios 203, $11\frac{1}{4}'' \times 5''$; 3. 12 lines to a page with 39 syllables to a line, altogether making 5133 Granthas; 4. Old, Indian paper; 5. Old Devanāgarī script; 6. ब=च, वे=घे, ई=इ; 7. Marginal lining in black ink; 8. Margins with corrections; 9. Top-signatures रा. लं; 10. Sarga-ends marked red but not enumerated except the final number 108; 11. Yellow pigment used for deletion; 12. Hails from Fatehpur (U. P.); 13. Colophons promiscuously describe this Kāṇḍa as आभ्युदयिकपर्वन् of युद्धकाण्ड or युद्धपर्वन् of सुन्दरकाण्ड.

II. अ– 1. Lal-Chand Library, D. A.-V. College, Lahore, No. 3078; 2. Folios 103, $13\frac{3}{4}'' \times 6\frac{1}{2}''$; 3. 16 lines per page, 54 syllables per line, 5562 Granthas in all; 4. Indian paper; 5. Modern Devanāgarī script; 6. Correct, with clear margins; 7. Sarga-ends numbered and marked red; 111 Sargas in all; 8. Hails from Alwar (Rajputana); 9. Commences ॐ स्वस्ति सिद्धं......ॐ नारायणं नमस्कृत्य......जयमुदीरयेत् । 10. Colophon describes this Kāṇḍa as आभ्युदयिक (?क°) of युद्ध°, consisting of 205 Sargas containing 8500 Ślokas and 72 topics and mentions Rāmalāla Miśra of Kotkā in Alwar as the scribe.

III. म– 1. Lal-Chand Library, D. A.-V. College, Lahore, No. 4544; 2 Folios 163 (134-145 missing), $13\frac{1}{4}'' \times 6\frac{1}{4}''$; 3. 12 to 14 lines per page, 40 syllables per line, 5300 Granthas in all; 4. Indian paper; 5. Devanāgarī script with य=ज, इ=ई, उ=ऊ, ब=च, ष=ख, ख=ष, स=श, श=स and ण=न ; 5. Ślokas and Sargas not numbered; 6. Marginal lines in black and red ink; Sarga-ends marked red, yellow pigment used for deletion and a lotus with 12

petals painted in tri-colour in the beginning as well as at the end; 7. Top-signatures राम राम; 8. Colophons describe this Kāṇḍa as युद्ध° or आभ्युदयिक° of सुन्दर°, being the second of the two Kāṇḍas with उत्तर॰ referred to as the third one and this composite सुन्दर° mentioned as consisting of 205 Sargas with 8825 Ślokas (=9535 Granthas) and 72 topics and Vālmīki mentioned as the author of रामायण, also called चतुर्विंशतिसहस्रसंहिता, upto the end of the composite सुन्दर° only and the scribe, Vairāgī Udho Dāsa mentioned as having copied the text in Saṁvat 1810 at Girī in the domain of Mahārāja Śrī Rau Khusyāla Singha.

The details of the editorial technique followed in this volume as in the previous ones having already been explained in the Introduction to the Sundara-Kāṇḍa volume, need not be repeated here. It has, however, to be mentioned that the desirability of issuing entire Yuddha-Kāṇḍa in one handy volume has been responsible for the orthographic aberrations and syntactical mislections being excluded from the Critical Apparatus attached to the present text-edition. The same consideration coupled with the extreme difficulty experienced in the supply of paper has also necessitated further extension of the process of typographical compactness in that the measure of printed matter on a page had to be substantially increased, even though at the cost of uniformity, after 346 pages had already been printed off. It is interesting to calculate that in the absence of these editorial and typographical devices, the present bulk of 606 pages would have swelled to over 1300 pages.

While main editorial assistance in this Volume has been rendered by Shri Pitambara Datta Shastri, Shri Shiva Prasada Shastri and Shri Ratna Chandra Shastri have helped in making the press-copy and in correcting the proofs. I am grateful to these gentlemen for this co-operation. I, also, very much appreciate the help rendered by the Vishveshvarananda Vedic Research Institute Press in the matter of expediting the publication of the volume.

Lahore, **Vishva-Bandhu Shastri**
February 16, 1944

अथ

पश्चिमोत्तरशाखीये

वाल्मीकीय-रामायणे

युद्ध-काण्डम्

[वं-१]= [प्रथमः सर्गः] =[दा-२८]

स[1]-सैन्ये [2]सागरं तीर्णे [3]रामे दशरथाऽऽत्म-जे ।[4]
१] अमा[5]त्यौ रावण[6]ः श्री-मान् अब्रवीच् छुक-सारणौ ॥१॥ [१
सम्-[7]अग्रं दुस्-तरं तीर्णं[8] [9]सागरं वा[10]नरं बलम् ।
२] अ-[11]भूतपूर्वो रामेण सेतुर् बद्धश् च सागरे ॥२॥ [२
अ-श्रद्धेयम् इदं कर्म कृतं रामेण सार[12]णं । [N
४] [13]सागरे सेतु-बन्धेन सं-क्षु[14]ब्धम् इव मे मनः ॥३॥
[15]अ-वश्यम् अभिसं-ख्येयं तन् मया वानरं बलम् । [३
५] ततः पश्चाद् वि-धास्यामि श्रुत्वा तस्य प्रति-क्रियाम्[16]॥४॥ [N
[17]अतो भवन्तौ तत् सैन्यम् प्र-विश्याऽनुप-लक्षितौ । [४पू
६] वानरीं तनुम् आ-स्थाय परिसं-ख्यातुम् अर्हथः ॥५॥ [N
ब[18]लं यात्रा-विधानं च योधानां च[19] विनिश्-चयम् । [N
७] परि-माणं च वीर्यं च ये च मु[20]ख्याः प्लवं-गमाः ॥६॥ [४उ
मन्त्रिणो ये च रामस्य ये च सुग्रीव-मन्त्रिणः[21] ।
८] ये [22]पूर्वम् [23]अभि-वर्तन्ते ये च शूराः प्लवं-गमाः ॥७॥ [९
स च सेतुर् यथा बद्धः सागरे वरुणा[24]ऽऽलये ।

---

१. रा$_1$-सबले । २. ल$_2$ म-सागरे । ३. म-रामं । ४. भ-१२-शत्तमसर्गस्य २७-शश्लोकं यावत्त्रुटितः पाठः । ५. फ म-आमात्यौ । ६. म-राघवः ॥ ७. म-समुद्रं । ८. रा$_1$-सागरं । ल$_1$ ल$_2$ ब श्र प्र-दुर्धरं । ९. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-दुस्तरं । १०. ल$_1$ ल$_2$ ब श्र प्र-सागरं । ११. ल$_1$ प्र-अनन्यपूर्वं ॥ १२. ल$_1$-सागरे । १३. ल$_1$-त्रुटितः पाठः । १४. ल$_1$ ल$_2$ प्र ब श्र-संशून्यम् ॥ १५. रा$_1$-अवश्यं चैव सं० । ल$_1$ ल$_2$ श्र प्र फ म-अकथ्यमानं संख्येयं । १६. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ म-नास्ति ॥ १७. ल$_1$ ल$_2$ ब श्र प्र-भवन्तौ वानरं ॥ १८. रा$_1$-बलं तेषां वि० । ल$_1$ल$_2$ ब श्र प्र-बलं योधवि० । म-अलं वीर्याभिधानं । १९. म-चापि नि० । २०. प्र-शूराः ॥ २१. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ म-०वमाश्रिताः । २२. फ-पृष्ठम् । २३. ल$_1$-इति व० । ल$_2$ब श्र प्र-अति व० ॥ २४. रा$_1$ म-मकरालये ।

९] नि-वेशश् च यथा तेषां वानरराणां वनौकसाम् । [६
कश् च सेना-पतिम् तेषाम् उत्-साहः कीदृशम् तथा ॥८॥ [८पू
१०] व्यव-सायं च रामस्य वीर्यं प्र-हरणानि च ।
११पू] लक्ष्मणस्य च सौमित्रेस् तत्त्व-तो ज्ञातुम् अर्हथः ॥९॥ [७
एतज् ज्ञात्वा यथा-तत्त्वं शीघ्रम् आ-गन्तुम् अर्हथः । [८उ
१२] इति तौ च समा-दिष्टौ राक्षसौ शुक-सारणौ ॥१०॥ [९पू
तथेति प्रति-पद्याऽऽशु जग्मतुर् यत्र तद् बलम् । [N
१३] तौ ज्ञात्वा मायया छन्नौ राक्षसेन्द्रस्य मन्त्रिणौ । [N
हरि-रूप-धरौ भूत्वा प्र-विश्याऽवेक्षतां बलम् ॥११॥ [९उ
१४] ततस् तद् वानरं सैन्यम् अ-चिन्त्यं लोम-हर्षणम् ।
सं-ख्यातुं नाऽधि-गच्छेतां राक्षसौ शुक-सारणौ ॥१२॥ [१०
१५] तिष्ठन्तौ पर्वताऽग्रेषु निर्-झरेषु गुहासु च ।
सम्-उद्रस्य च तीरेषु वनेषूऽप-वनेषु च । [११
१६] ददृशाते स्थितु-बलं प्लव-मानं सहस्र-शः ॥१३॥ [N
तद् अ-क्षयम् अ-पर्यन्तम् दुर्-ज्ञेयं वानरं बलम् ।
१७] सारणश् च शुकश् चैव सं-ख्यातुं नाऽधि-जग्मतुः ॥१४॥ [N

---

१. रा१फ-निवासश । २. ल१ ल२ब अ प्र-गतायुषाम् । रा२फ-महावने । म-तरस्विनाम् । ३. ल१-यश् । ४. रा१-वानरराणां दुरात्मनाम् । ल२-चोत्साहः की० । रा१ फ-वानरराणां गतायुषाम् । ५. म-नास्ति ॥ ६. रा१-रामस्य व्यवसायं च रूपं । ७. ल१ ल२ ब अ प्र-तत्त्वं च । ८. अतः परमधिकः पाठः-रा२-राघवस्य च सौमित्रेर्वानरराणां तथैव च ॥ ९. रा१-बलं । रा२ फ-एवं । १०. ल१ रा२-इति प्रतिस० । फ-तथेति स० ॥ ११. ल१ ल२ ब अ प्र म-नास्ति । १२. रा२ फ-कपिरूप० । १३. ल१ ल२ ब अ प्र रा२ फ-वीरौ । १४. रा१ फ-०श्यानुपलक्षितौ ॥ १५. रा१-तौ ॥ म-तु । १६. रा१-यतस्तौ । ल१ ल२ ब अ प्र-यदा तौ ॥ १७. ल१ ल२ ब अ प्र-समुद्रसानुतो० ॥ १८. रा१-अपारं हि । १९. रा१ ल१ ल२ ब अ प्र-दुर्जयं । २०. रा२ फ-" तिष्ठन्तौ " इत्यारभ्य " बलम् " इत्यन्तः पाठो व्यत्यासेनैकादशश्लोकाऽनन्तरं पठितः ॥

एक-पृष्ठं महाऽरण्यं[1] कृतं तैः हरि-यूथपैः ।
१८] राक्षसौ तौ महा-वीर्यौ सं-ख्यातुं नाऽध्य्[2]-अशक्नुताम्[2]॥१५॥[N
तरमाणं च तीर्णं[3] चं तरिष्यच् चाऽपि[4] संघ-शः ।
१९] [5]नि-विष्टं विशमानं[6] च भीमम् अ-क्षयम् अ-व्ययम्॥१६॥ [१२
२०पू] तौ ददर्श महा-मायौ[7] प्रति-च्छन्नौ वि-भीषणः । [१३पू
ग्राहयित्वा महा-तेजा वानरैर् वारणोपमैः[8] । [N
२१] आ-चचक्षेऽथ रामाय तान् उभौ शुक-सारणौ ॥१७॥[9] [१३उ
२२उ] तौ दृष्ट्वा व्यथितौ घोरौ[10] निर्-आशौ जीवितं[11] मति[11][12] । [१५पू
२५पू] अब्रवीत् प्र-हसन् रामः सर्व-भूत-हिते रतः ॥१८॥ [१७उ
बलं सर्वम् इदं दृष्ट्वा हरि-सैन्यं समन्त-तः ।[13]
३१] सं-ख्याय च पुरीं लङ्कां यथेष्टं ग[14]न्तुम् अर्हथः ॥१९॥ [N
वधाऽर्हौ वां प्र-मुञ्चामि क्षणेऽस्मिन् रजनी-चरौ । [N
३२] वक्तव्यो राक्षसेन्द्रो वां यथोक्तं वचनं मम ॥२०॥ [२२उ
यद् बलं त्वम् उपाऽऽश्रित्य सीताम् आ-हृतवान् असि[15] ।
३३] तद्[16] दर्शय यथा-कामं स[17]-सैन्यः सह-बान्धवैः(?:)॥२१॥[२३

---

१. ल$_2$-महापुण्यं । २. रा$_1$-नैव शक्यत. ॥ ३. रा$_2$-सागरं । ४. ल$_1$ ल$_2$ ब श्र प्र-वानराणां च । रा$_2$ फ-वर्तमानं च । ५. प्र-विनष्टं । ६. रा$_2$-वर्तमानं ॥ ७. रा$_1$-महावीर्यौ । ८. ल$_1$ ल$_2$ ब श्र प्र-वानरोपमौ । ९. अतः परमधिकः पाठः—रा$_2$-लंकायाः समनुप्राप्तौ वरौ परपुरंजय ॥ १०. रा$_1$-वीरौ । ११. रा$_1$-जीवितस्य च । ल$_1$ ल$_2$ ब श्र प्र म-जीविते तदा । १२. अतः परमधिकः पाठः-रा$_1$-कृत्वा तावंजली दूतौ वचनं चेदमूचतुः । आवामिहागतौ सौम्य रावणप्रेषितावुभौ । परिज्ञातं बलं कृत्स्नं तवेदं रघुनन्दन । तयोस्तद्वचनं श्रुत्वा रामो दशरथात्मजः ॥ १३. अतः परमधिकः पाठः—रा$_1$-ममेदं वानरं सैन्यं परिज्ञातुं त्वमर्हसि । कुरु कार्यं यथोक्तं हि छन्दतः प्रतिगम्यताम् । १४. ल$_1$ ल$_2$ ब श्र प्र म-प्रतिगम्यते ॥ १५. रा$_1$ ल$_1$-अपि जिहीर्षसे । ब श्र-अपजिहीर्षसि । प्र-उपजिहीर्षसे । १६. ल$_1$-पूर्वं दर्शय । रा$_2$-तं द० । १७. रा$_1$-स्वः ससैन्यः सबांधवः ॥

श्वो-भूते नगरीं लङ्कां स-[2]प्राकारां स-तोरणाम् ।
३४] स-राक्षस-बलां पश्य शरैर् वि-ध्वंसितां मया ॥२२॥ [२४
घोरं [3]कोपं प्र-मो[4]क्ष्यामि स-सैन्ये त्वयि रा[5]वण ।
३५] सं-क्रुद्धो वज्र-भिद् वज्रं दानवेष्व् इव वासवः ॥२३॥ [२५
३६उ] इति प्रतिसमा-दिष्टौ राक्षसौ शुक-सारणौ ।
आ-गम्य नगरीं लङ्काम् अब्रूतां राक्षसेश्वरम् ॥२४॥ [२६
३७] विभीषण-गृहीतौ तौ वधाऽर्हौ राक्षसां[6]ऽधि-पम् ।
दृष्ट्वा धर्माऽऽत्मना मुक्तौ रामेणां[7]ऽमित-तेजसा ॥२५॥ [२७
३८] एक-स्थान-गता [8]यत्र चत्वारः पुरुषर्षभाः ।
लोक-पालोपमा वीराः कृ[9]ताऽस्त्रा दृढ-विक्रमाः ॥२६॥ [२८
३९] रामो दा[10]शरथिः श्री-मान् लक्ष्मणश् च वि-भीषणः ।
[11]सु-ग्रीवश् च महा-तेजा महेन्द्र-सम-विक्रमः ॥२७॥ [२९
४०] एते शक्ताः पुरीं लङ्कां स-प्राकारां स-तोरणाम् ।[12]
उत्-पाट्य सं-क्रा[13]मयितुं सर्वे तिष्ठ[14]न्तु वानराः ॥२८॥ [३०
४१] यादृशी श्रीर् हि रामस्य [15]वीर्यं प्र-हरणानि च ।
हनिष्यति पुरीं लङ्काम् एकस् तिष्ठन्तु ते त्रयः ॥२९॥ [३१
४२] राम-लक्ष्मण-गुप्ता सा सु-ग्रीवेण च वाहिनी ।
मन्यामहे सुदुर्-धर्षा सेन्द्रैर् अपि सुराऽसुरैः ॥३०॥ [३२
४३] व्यक्तं सेतुर्[16] तथा बद्धो दश-योजन-विस्तृतः ।
शत-योजनम् [17]आ-या(?य)तस् तीर्णा सेना च सागरम् । [३३
४४] नि-विष्टा दक्षिणे तीरे सम्-उद्रस्य नदी-पतेः ॥३१॥

---

१. म-त्रः कल्ये । २. ल$_2$ब अ-सप्रासादां ॥ ३. ल$_1$-रूपं । ४. ल$_2$ब प्र-विमो० । ५. रा$_1$-राघवं ॥ ६. रा$_1$-राक्षसेश्वरम् । ७. प्र-रावणस्यामि० ॥ ८. म-०गतास्तत्र । ९. म-कृतवि० ॥ १०. ल$_1$ ल$_2$ ब अ प्र-दशरथाज्जातो । ११. रा$_2$ फ-राजा जयति सुग्रीवो । १२. म-नास्ति । १३. रा$_1$-भ्रमितुं शक्ताः । १४. रा$_1$-तिष्ठन्ति ॥ १५. ल$_1$ ल$_2$ ब अ प्र-महेन्द्रसमविक्रम ॥ १६. म-सेतुर्यथा । १७. रा$_1$ रा$_2$ फ म-आयामस् ॥

तीर्णस्य तरमाणस्य बलस्याऽन्तो न विद्यते । [३४
४५उ] राजन् गुप्तस्य रामेण लोक-पालोपमेन हि ॥३२॥ [N
प्रहृष्ट-योधा ध्वजिनी वनौकसाम्
महाऽऽत्मनां सम्प्रति युद्धम् इच्छताम् ।
अलं वि-रोधेन शमो वि-धीयताम्
४६] प्र-दीयतां दाशरथाय मैथिली ॥३३॥ [३५

इत्यार्षे रामायणे युद्ध-काण्डे दूताऽऽगमनं नाम प्रथमः सर्गः ॥१॥

[वं-२]= [द्वितीयः सर्गः] =[दा-२६]

तद् वचः पथ्यम् अ-क्लीबम् सारणेन तु भाषितम् ।
१] नि-शम्य रावणो वाक्यं पर्य्-अभाषत सारणम् ॥१॥ [१
यदि माम् अभि-युञ्जीरन् देव-गन्धर्व-दानवाः ।
२] नैव सीतां प्र-यच्छेयं सर्व-लोक-भयाद् अपि ॥२॥ [२
त्वं तु सौम्य परि-त्रस्तस् तां दृष्ट्वा हरि-वाहिनीम् ।
३] प्रति-दानं च सीताया मन्यसे साधु निर्-जितः ॥३॥
को हि नाम सं-पन्नो मां सम्-अरे जेतुम् उत्-सहेत् । [३
४] स्थातुं किं तु मुहूर्तं वा सम्-अरे जेतुम् उद्-यतः ॥४॥ [N
५पू] इत्य् उक्त्वा परम-क्रुद्ध उत्थि(द्-स्थि)तःपरमाऽऽसनात् ।
आ-रुरोह ततः श्री-मान् प्रासादं हिम-पाण्डुरम् ॥५॥

---

१. रा$_1$ल$_1$ ब प्र रा$_2$फ म-लोकनाथोप० ॥ २. रा$_1$-प्रकृष्टरूपा। ३. रा$_1$फ-संयति। ल$_1$ल$_2$ब श्र प्र-मानद। ४. प्र-मानम् ॥ ५. ल$_2$-०र्षे श्रीरामा०। रा$_2$-इत्यार्षे लं०। फ-इ···र्षे···मा···णे । ६. रा$_1$ल$_2$ब श्र प्र म-लंकाकाण्डे। फ-सुन्दरकाण्डे। ७. ल$_1$-चारणप्रवेशो । ल$_2$ ब श्र प्र फ म-चारप्रवेशो । रा$_2$-त्रुटितः पाठः ॥ ८ रा$_1$-सुभा० । ९. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ म-प्रत्यभा० ॥ १०. श्र-यदा। ११. म-नास्ति ॥ १२. ल$_1$ब श्र रा$_2$-तु। १३. रा$_1$-समर्थं। १४. ल$_1$ल$_2$ ब श्र प्र-रणे क्षणमपि। रा$_2$ फ-क्षणं ह्यपि रणे। म-क्षणं ह्यपि किमु। १५. ल$_1$ ल$_2$ब प्र रा$_2$ म-समर्थौ। १६. ल$_1$ ल$_2$ब प्र-किं तु बाधितुं। श्र-त्रुटितः पाठः ॥ १७. म-प्रोत्थितः । १८. म-हेमगोपुरम् ॥

६] बाहु-तोल-समुत्सेधं रावणोऽथ दिदृक्षया । [४
दीप्यमानः स्व-वपुषा वसु-धाम् अव-लोकयन् ॥६॥ [N
७] ताभ्यां चराभ्यां सहितः स ददर्श बलं महत् ।
८पू] पर्वतांश् च सम्-उद्रं च सं-वृतं वानरर्षभैः ॥७॥ [५
तद् अ-पारम् अ-संख्येयं वानराणां महद् बलम् ।
९] नि-शम्य रावणो राजा सारणं पर्य्-अपृच्छत ॥८॥ [६
एषां के वानराः शूराः के मुख्याः के महा-बलाः ।
१०] के पूर्वम् अभि-वर्तन्ते के महोत्साह-सम्मताः ॥९॥ [७उ
देवाऽन्वयाश् च के चाऽत्र के मानुष-बले स्थिताः । [N
११] येषां शृणोति सु-ग्रीवः के महा-यूथ-यूथपाः ।
क्षिप्रम् आ-चक्ष्व मे वीर ये प्र-धानाः प्लवं-गमाः ॥१०॥ [८
१२] श्रुत्वा तद् राक्षसेन्द्रस्य वचनं परि-पृच्छतः ।
आ-ख्यातुम् उप-चक्राम प्राज्ञो मुख्यान् प्लवं-गमान् ॥११॥ [९
१३] एष योऽभि-मुखं लङ्कां नदंस् तिष्ठति वानरः ।
यूथ-पानां सहस्राणां शतेन परि-वारितः ॥१२॥ [१०
१४] यस्य घोषेण महता स-प्राकारा स-तोरणा ।
सर्वा प्र-कम्पते लङ्का स-शैल-वन-कानना ॥१३॥ [११
१५] सर्व-शाखा-मृगेन्द्रस्य सु-ग्रीवस्य महाऽऽत्मनः ।
वेलाऽग्रे तिष्ठते शूरो नलो नामैष यूथ-पः ॥१४॥ [१२

---

१. म-बहुमासस० । २ प्र-०मानस्तु व० । ३. रा$_{१}$ रा$_{२}$ फ म-नास्ति ॥ ४. रा$_{१}$-पर्यपृच्छत सारणम् ॥ ५. म-के वा ॥ ६. ल$_{१}$ ल$_{२}$ ब श्र प्र-पूर्वान् । ७. ल$_{२}$ ब श्र प्र-अतिव० ॥ ८. प्र-देवानुगाश । ९. ल$_{१}$ ल$_{२}$ ब श्र प्र रा$_{२}$ फ-केषां । १०. ल$_{१}$ ल$_{२}$ ब श्र प्र-महारथ० ॥ ११. ल$_{२}$ ब श्र प्र म-राज्ञो । रा$_{२}$-त्रुटितः पाठः । १२. रा$_{१}$-नास्ति ॥ १३. ल$_{२}$ ब श्र-पश्य । १४. रा$_{१}$ ल$_{१}$ रा$_{२}$ फ म-लङ्का । १५. रा$_{१}$ ल$_{२}$-सर्वा कम्पतीव । रा$_{२}$ फ-प्रवेपते सर्वा । म-पुरी कम्पतीव ॥ १६. ल$_{१}$ ब श्र-०महेन्द्रस्य । १७. ल$_{१}$-तथात्मनः । ब-त्रुटितः पाठः । १८. रा$_{१}$-बलात्प्रति० । १९. ल$_{२}$-वीरो । २०. ब-अत आरभ्य सर्गसमाप्तिं यावत्त्रुटितः पाठः ॥

१६] [1]एतेन सेतुर् [1]बद्धोऽयं विश्वकर्म-सुतेन वै । [N
१७पू] सम्-उद्रेण [2]स्तुतश् चैव महाऽऽत्मा [3]वानरर्षभः । [N
२८उ] एष कोटी-सहस्राणां सहस्रं [4]सम्प्र-कर्षते ||१५||[२६उ
१७उ] बाहू प्र-[5]गृह्य यो लङ्कां [5]पार्थयन्न् इव तिष्ठति[6] ।
१८उ] लङ्काम् अभि-मुखः कोपाद् [7]अभीऽऽक्ष्णं च वि-जृम्भते १६||[१३
आ-स्फोटयति सं-रब्धो [8]लाङ्गूलं च पदे पदे ।
१९] यस्य लाङ्गूल-शब्देन [9]स्वनन्तीऽव दिशो दश ||१७|| [१४उ
एष वानर-राजेन सु-ग्रीवेणाऽभि-षेचितः । [१५पू
२०] वीरः पद्म-सहस्रेण [10]वृतः शङ्कु-शतेन च । [N
युव-राजोऽङ्ग-दो नाम त्वाम् आ-ह्वयति सं-युगे ||१८|| [१५उ
२१] ये तु वि-ष्टभ्य गात्राणि [11]नृत्यन्ति च हसन्ति च[11] ।
उत्था (द्-स्था)य च वि-जृम्भन्ते क्रोधेन हरि-पुङ्गवाः[12] १९|| [२०
२२] एते दुष्प्र-[13]सहा राजन् घोराः शब्देन [13]वानराः ।
[14]अष्टौ [14]शत-सहस्राणि दश-[15]कोटी-शतानि च ||२०|| [२१
२३] यं पुरस्-कृत्य गच्छन्ति [16]वीराश् [17]च वन-चारिणः । [२२पू
सु-तनुर् नाम [18]यूथेशः सर्व-वानर-यूथपः । [N
२४] एष [19]ह्य् [19]उद्-यच्छते लङ्कां स्वेनाऽनीकेन मर्दितुम् ||२१||[२२उ

---

१. ल$_{१}$प्र-येन सेतुर्निबद्धोयं । ल$_{२}$ अ-सेतुश्चानेन बद्धोयं । २. रा$_{२}$-कृतश । ३. रा$_{१}$-वानरोत्तमः । ४. ल$_{२}$अ प्र-अपकर्षति । रा$_{२}$फ-परिकर्षति ॥ ५. रा$_{१}$रा$_{२}$फ-पद्भ्यां यो मही लिखति वीर्यवान् । ६. अतः परमधिकः पाठः-ल$_{१}$ ल$_{२}$ अ प्र म-गिरिशृङ्ग-प्रतीकाशः पद्मकिंजल्कसन्निभः । यः पुलिंदां नदीं रम्यां गिरिं पर्येति वानरः ॥ ७. रा$_{१}$ ल$_{१}$-अभीतश् ॥ ८. ल$_{१}$ल$_{२}$अ रा$_{२}$फ म-स्फोटयत्यभिसं० । ९. रा$_{२}$-स्वनन्ति च ॥ १०. ल$_{२}$अ-युतः । म-त्रुटितः पाठः ॥ ११. ल$_{१}$-त्रुटितः पाठः । म-दशकोटिशतानि च । १२. म-नास्ति ॥ १३. ल$_{१}$-त्रुटितः पाठः । १४. रा$_{२}$फ-दशकोटिस० । १५. रा$_{१}$-दशनल्वश०॥ १६. रा$_{२}$फ-धीराः । १७. रा$_{१}$-शब्देन वानराः । ल$_{१}$ ल$_{२}$ब अ-चन्दनबाहवः । रा$_{२}$ फ-प्रवरवानराः । १८. प्र-युथेशः । १९. रा$_{१}$ रा$_{२}$-चाशंसते । ल$_{१}$ प्र अ-युध्यमते । म-त्याशंसते ॥

श्वेतो रजत-सङ्काशश्[1] चपलो . दीर्घ-केसरः ।
२५] बुद्धि-मान् वानरः शूरस् त्रिषु लोकेषु वि-श्रुतः[2] ॥२२॥ [२३
तूर्णं[3] सु-ग्रीवम् आ-गत्य पुनर् गच्छति वानरः ।
२६] वि-भजन् वानराऽनीकं स्व-बलानि प्र-हर्षयन् ॥२३॥ [२४
यो नदीं गो-मतीं रम्यां रम्यं पर्य्-एति पर्वतम् ।
२७] नाम्ना सं-कोपनं नाम नाना-द्विज-युतं गिरिम् । [२५
२८पू] तत्र राज्यं प्र-शास्त्य् एष कु-मुदो नाम यूथ-पः ॥२४॥ [२६पू
यस्य वाला बहु-व्यामा दीर्घ-लाङ्गूलम् आ-श्रिताः ।
३०] ताम्रा नीलो[4]ऽसिताः श्वेताः प्र-कीर्णा घोर-कर्मणः[5] ॥२५॥[२७
अ[6]-दीनो रोषणश् चण्डः सं-ग्रामम् अभि-काङ्क्षति[7] । [२८पू
३१] वेग-वान् नाम लङ्केश सु-ग्रीवस्य सखा बली ॥२६॥ N
कोटी-शत-सहस्राणां सहस्रेणाऽभिसं-वृतः[8] । [N
३२] एषोऽप्य्[9] आ-शंसते लङ्कां स्वेनाऽनीकेन मर्दितुम् ॥२७॥ [२८उ
यस् त्व् एष सिंह-सङ्काशः कपिलो दीर्घ-केसरः ।
३३] नि-भृतः प्रेक्षते[10] लङ्काम् अभि-गर्जन् पुनः पुनः ॥२८॥ [२९
एष कृष्णं[11] गिरिं सह्यं पर्वतं च सु-दर्शनम् ।
३४] राजन् सततम् अध्य्-आस्ते रम्भो नामैष यूथ-पः ॥२९॥ [३०
३५पू] त्रिंशच् छत-सहस्राणि वानराणां शतानि च । [३१पू
N] एनं[12] हरि[13]-सहस्राणां त्रिंशच् च हरि-यूथ-पाः । [N
३५उ] परि-वार्याऽनु-गच्छन्ति लङ्काम् अर्दितुम् ओजसा ॥३०॥[14] [३१उ
यश्[15] च कर्णौ वि-वृणुते जृम्भते च पुनः पुनः ।

---

१. रा$_{1}$-०संकाशः सबलो । २. प्र-नित्यशः ॥ ३. ल$_{1}$प्र-पुरः । अ-पुनः ॥ ४. रा$_{1}$-नीलसिताः श्वेताः । ल$_{1}$ल$_{2}$अ-नीलासितश्वेताः । म-नीलास्तदा दीर्घाः । ५. म-घोरदर्शनः ॥ ६. ल$_{2}$प्र-अदांतो । ७. प्र-अपकर्षति ॥ ८. रा$_{2}$-०णाभिकांक्षितः । ९. रा$_{1}$-एषैवाशंसते । ल$_{1}$रा$_{2}$-एषोभ्याशं० । अ प्र फ-एषोथाशं० ॥ १०. रा$_{1}$ प्र-प्रेष्यते ॥ ११. ल$_{1}$ ल$_{2}$ अ-कृत्स्नं ॥ १२. रा$_{1}$-राजन् । रा$_{2}$-एतत् । १३. रा$_{2}$ फ-शतस० । १४. ल$_{1}$ ल$_{2}$ अ प्र म-नास्ति ॥ १५. रा$_{2}$ फ म-यस्तु ।

३६] न च सं-हरते दृष्टिं न च यूथाद् वि-धावति[1] ॥३१॥ [३२
[2]महा-भये वीत[3]-भयो रम्यं साल्वै[4] (?ल्वं) स[5] पर्वतम् ।
३७] राजन् सततम् अध्य्-आस्ते हरो[6] ना[6]मैष यूथ-पः॥[7]३२॥ [३४
एतस्य[8] बलिनः सर्वे वि-हारा नाम वानराः ।
३८] राजन् शत-सहस्राणि चत्वारिंशच् छतानि च । [३५
एषोऽप्य् आ-शंसते लङ्कां स्वेनाऽनीकेन मर्दितुम् ॥३३॥ [N
३९] यस् तु मेघ इवाऽऽका[9]शे बहु धां[10] वृ(?व) ति तिष्ठति।
मध्ये वानर-कोटीनां सुराणाम् इव वासवः ॥३४॥ [३६
४०] भेरीणाम् इव सं-नादो यत्रैष श्रूयते महान् ।
४१.पू] घोरः[11] शाखा[12]-मृगेन्द्रो[12]ऽयं सं-ग्रामम् अभि-काङ्क्षति[13] ॥३५॥[14] [३७
[15]एष पर्वतम् अध्य्-आस्ते पारि-यात्रम् अन्-उत्तमम् ।
४२] युद्धे दुष्प्र-[16]मदो राजन् पनसो नाम यूथ-पः ॥३६॥ [३८
[17]एनं शत-सहस्राणां शताऽर्धं पर्युपाऽऽसते ।
४३] यूथ[18]-पा यूथप-श्रेष्ठं येषां यूथानि भाग-शः ॥३७॥ [३९
यस् तु भीमाम्[19] अधि-ष्ठाय चमूं तिष्ठति शोभयन् ।
४४] स्थितस् तीरे सम्-उद्रस्य द्वितीय इव सागरः ॥३८॥ [४०
एष मन्दर-सङ्काशो वि-नतो नाम यूथ-पः ।
४५] [20]चरन् पिबति पर्णासां नदीनाम् उत्-तमां नदीम् ॥३९॥ [४१

---

१. रा$_2$-यूथान्धावति हर्षयन् । २. ल$_1$ ल$_2$ अ प्र-नास्ति ॥ ३. म-महाभयो महावेगो । ४. रा$_1$-पार्श्वे । ५. रा$_1$ रा$_2$ म-च । ६. रा$_1$-हनुमानेष । प्र-रंभो ना० । ७. ल$_1$ ल$_2$ अ-नास्ति ॥ ८. रा$_2$ म-एतेभ्यः ॥ ९. रा$_1$ ल$_2$ अ प्र म-०काशं । १० रा$_1$ ल$_1$ ल$_2$ अ प्र रा$_2$ फ-बहुधावृत्य ॥ ११. ल$_1$ ल$_2$ अ प्र रा$_2$ फ म-घोषः । १२. ल$_1$ अ प्र रा$_2$ फ-०गेन्द्राणां । म-शाखामहेन्द्राणा । १३. ल$_1$ ल$_2$ प्र रा$_2$ फ म-०कांक्षतां । १४. अतः परमधिकः पाठः—ल$_1$ ल$_2$ अ म-एष पर्वतसंकाशः वलयः क्रोधनो हरिः ॥ १५. ल$_1$ ल$_2$ अ म-रम्यं । १६. ल$_1$ ल$_2$ प्र रा$_2$ म-दुष्प्रसहो ॥ १७. अ प्र-एवं । १८. रा$_1$-प्रथमा ॥ १९. ल$_1$ ल$_2$ अ प्र-श्रीमान् ॥ २०. प्र-चिरं ॥

४६उ] षष्टिः[1] शत-सहस्राणां बलम्(?लं) अ(?य)स्य वनौकसाम् । [४२

४७उ] युद्धायाऽऽह्वयते[2] त्वाम्[3] एष[3] क्रथनो[4] नाम यूथ-पः[5] ॥४०॥

यस् तु गैरिक-वर्णाऽऽभं[6] वपुः[7] पुष्यति वीर्य-वान्[7] । [४४पू

४८] गवयो नाम तेजस्वी[8] क्रुद्धस् त्वाम् अभि-काङ्क्षति[9] ॥४१॥

४९पू] एनं[10] शत-सहस्राणां सप्ततिः[11] पर्युपाऽऽसते । [४५

N] यूथ-पा यूथप-श्रेष्ठम् अनु-यान्ति महा-बलम्[12] ॥४२॥ [४६उ

इमे महा-राज महा-पराऽऽक्रमाः

कपि-प्रवीरास् तव[13] ये तु कीर्तिताः[13] ।

विवृद्ध-दर्पा[14] बलिनः[15] सुदुर्-जया[15]

५०] रणे सम्-अग्रैर्[16] अपि[16] देव-दानवैः ॥४३॥ [N

तद् वानरं सैन्यम् उद्-ईक्ष्य[17] भीमम्[18]

बलं च वीर्यं च सम्-ईक्ष्य तेषाम् ।

श्रुत्वा च सं-ख्यां च ततः स राजा

५१] विषण्ण-रूपोऽभवद्[19] अल्प-बुद्धिः ॥४४॥ [N

इत्यार्षे[20] रामायणे युद्ध-काण्डे[21] वानराऽनीक-दर्शनं[22] नाम

द्वितीयः सर्गः ॥२॥

---

१. अ रा२-षष्ठी । फ-षष्टि । २. ल१ ल२ अ-युद्धेनाह्वयते । ३. ल२- ह्येष । रा२ फ-वीर । ४. ल१ ल२ अ-क्रोधनो । ५. ल१ फ-वानरः ॥ ६. ल१ ल२ अ प्र-०वर्णाभो । रा२ फ-गैरिकसंकाशं । ७. ल१ ल२ अ प्र-वपुषा चास्तिवी० । ८. रा१ प्र फ म-मेधावी । ९. ल१-त्रुटितः पाठः । ल२ अ प्र रा२ फ म-अभिवर्तते ॥ १०. रा२-शतं ॥ ११. रा१-वानराः । रा२ फ-सप्तभिः । १२. म-बलाबलम् ॥ १३. रा१-तु मया प्रकी० । १४. म-०व्रकोपा । १५. रा२-बलिनश्च दु० । १६. रा१-समर्था ह्यपि ॥ १७. ल२-अवीक्ष्य । १८. रा१-भीमः । १९. रा२ फ-विवर्णरूपो० ॥ २०. ल१-इति । २१. रा१ अ प्र म-लंकाकाण्डे । फ-सुन्दरकाण्डे । २२. रा१-वानरसैन्यवर्णनं । अ प्र रा२ फ म-अनीकदर्शनं ॥

हन्त ते सम्प्र-वक्ष्यामि प्रेक्ष[1]माणस्व यूथ-पान् ।[2]
१] राघवाऽर्थे पराऽऽक्रान्ता ये न रक्षन्ति जीवितम् ॥१॥ [१
२पू] दीर्घा[3] यस्य बहु-व्यामा वाला लाङ्गूलम् आ-श्रिताः ।
N] ताम्रा नीलाः सिताः श्वेता[4] हरिता[5] घोर-कर्मणः । [२
३पू] विप्र-कीर्णाः प्र-काशन्ते सूर्यस्येव मरीचयः ॥२॥
पृथिव्यां वि-श्रुतः शूरो द[6]ध्य्-आस इति यूथ-पः । [३
४] यं पृष्ठ-तोऽनु-गच्छन्ति शत-शो हरि-यूथपाः ।
N] द्रुमान् उद्-यम्य सहसा साल-ताल-शिलाऽऽयुधाः ॥३॥ [४
एष कोटि-सहस्रेण वानराणां महौ[7]जसाम् ।
५] आ-काङ्क्षते त्वां सं-ग्रामे जेतुं पर-पुरञ्जय ॥४॥ [५
नीलान् इव महा-मे[8]घान् यांस् [9]त्वं पश्यसि पृष्ठ-तः ।
६] असिताऽञ्जन-सङ्काशान् युद्धे सत्य-पराऽऽक्रमान् ॥५॥ [६पू
नख-दंष्ट्राऽऽयुधान् वीरां[10]न् तीव्र-कोपा[11]न् भयाऽऽवहान् । [N
७] अ-संख्येयान् अ-निर्देश्यान् स्थितान् सागर-रोधसि ॥६॥ [६उ
पर्वतेषु च [12]सर्वेषु नदीषु वि-पुला[13]सु [14]च ।
८] एते समभि-वर्तन्ते राजन् ऋक्षाः सुदुर्-जयाः ॥७॥ [७
एषां मध्ये स्थितो राजा भीमो[15] भीम-पराऽऽक्रमः ।

---

१. म–प्रेषमाणो हि यू०। २. ब-सर्गसमाप्तिं यावत्त्रुटितः पाठः॥ ३ अ रा₁ रा₂ फ-ऊर्ध्वा । ४. म-रक्ताः । ५. रा₁ प्र-प्रकीर्णा । फ म-कम्पिता ॥ ६. रा₁ दधिवक्त्रेति ॥ ७. ल₁ ल₂ अ-तरस्विनां ॥ ८. म-मेघानिव महाघोरान् । ९. म-तु ॥ १०. रा₁-तीव्रान् । ११. ल₁-तान् कोपाद् भ० । ल₂ अ प्र-ताम्रान् कोपाद् भ० । म-तीव्रकोपमहाबलान् ॥ १२. रा₁ फ-ये केचित् । १३. ल₁ ल₂ अ प्र-च कृतालयाः । १४. ख₁ ल₂ अ-सहस्रशः ॥ १५. ख₁ ल₂ अ प्र रा₂ फ म-भीमाक्षो भीमदर्शनः ॥

९] पर्जन्य इव जीमूतैः सम्-अन्तात् परि-[1]वारितः ॥८॥ [८
ऋक्ष-वन्तं गिरि-श्रेष्ठम् अध्य्-आस्ते नर्मदां पिबन् ।
१०] सर्वर्क्षाणाम् अधि-पतिर् धूम्रो नामैष यूथ-पः ॥९॥[2] [९
यवीयांस् तस्य तु भ्राता पश्यैतं पर्वतो[3]पमम् ।[2]
११] भ्रात्रा समानं रूपेण वि-[4]शिष्टं तु [5]पराऽऽक्रमे ॥[6]१०॥ [१०
एष वै जाम्ब-वान् नाम महा-यूथप-यूथपः ।[6]
N] प्र-शान्तो गुरु-वर्त्ती च सम्-अरे चाऽपरा-जितः ॥११॥ [११
N] एतेन साह्यं सु-महत् कृतं शक्रस्य धी-मता ।
दे(?दै)वाऽसुरे जाम्ब-वता लब्धाश् च शत-शो वराः॥१२॥[१२
१४] आ-रुह्य पर्वताऽग्राणि क्षिपन्ति वि-[7]पुलाः शिलाः ।
वृक्षांश् च विविधाऽऽकारान् न मृत्योर् उद्-विजन्ति च॥[8]१३[१३
१५] राक्षसानां च सदृशाः पिशाचानां बलोपमाः । [१४पू
१६पू] अग्राऽनीकेषु तिष्ठन्ति बलिनो भीम-विक्रमाः ।
N] अस्य [9]सैन्येषु[10] बहवो वि-चरन्त्य् अ-मितौ[11]जसः ॥१४॥ [N
N] यं त्व् एनम् अभिसं-रब्धं प्लवमानं प्लवं-[12]गमम् । [N
प्रेक्षन्ते वानराः सर्वे स्थितं यूथप-यूथपम् ॥१५॥ [१६उ
१८] एष राजन् सहस्राऽक्षम् उपाऽऽस्ते त्व् अमृताऽर्थिनम् । [१६पू
N] बल-वान् वीर्य-वान् भीमो हरिः पद्म-नि[13]भाऽऽननः ॥१६॥ [N
२१उ] यः स्थितं योजने शैलं गच्छन् पार्श्वेन सेवते ।
ऊर्ध्वं तथैव कायेन गच्छन् प्राऽऽप्नोति योजनम् । [१७
२२] यस्मान् न परमं भूतं चतुष्पाद् इह दृश्यते ॥१७॥ [१८पू

---

१. अ-परिघोपमम् ॥ २. अ-नास्ति ॥ ३. रा१ रा२-पर्वतोत्तमम् । ४. म-प्रविष्टं । ५. रा२-०क्रमैः । ६. ल२-नास्ति ॥ ७. रा१-बहुलाः । ८. म-अतः परं १९-श्लोकान्तः पाठो नास्ति ॥ ९. रा१-तथैव च । १०. प्र रा२ फ-सन्यस्य । ११. रा२ फ म-अग्नितेजसः ॥ १२. प्र रा२ फ म-अवस्थितम् ॥ १३. रा२-०निभेक्षणः ॥

२३उ] येन युद्धं म[1]हज् जातं पुरा वै शक्र-हस्तिनः ।
२४पू] परा-जयं च न प्राऽऽप्तो महाऽऽत्मा स च यूथ-पः । [१९
२३पू] श्रुतः स मादनो नाम वानराणां पिता-महः ॥१८॥ [१८उ
१९उ] यम् एनम् अम्बुदाऽऽकारं गर्जन्तम् इव तोय-दम् ।
सैन्यं नि-वेशयानं च जृम्भन्तं च प्र-पश्यसि ॥१९॥ [N
२०] एष वानर-मुख्यानां पद्म-कोटिं प्र-कर्षति ।
२१पू] इन्द्र-जानुर् इति ख्यातश् चण्डः स[2]मर-दुर्जयः ॥२०॥ [N
२४उ] यो [3]राजा पर्वते द्रोणे बहु-किन्नर-सेविते । [२२उ
यस्य वि-क्रममाणस्य शक्रस्येव पराऽऽक्रमः ॥२१॥
२५] एष गन्धर्व-कन्यायाम् उत्-पन्नः कृष्ण-वर्त्मनः । [२०
तदा देवाऽसुरे युद्धे साग्र-[4]कारी शत-क्रतोः ॥२२॥ [२१
२६] यस्य वै[5]श्रवणो राजा [6]जम्बूम् [6]उपनि-षेवते । [२२पू
विहार-[7]शीलो वर-दो भ्राता ते राक्षसेश्वरः(?र)॥२३॥[२३
२७] एष हैमवतो राजा बल-वान् वानरर्षभः । [N
N] सेना-पतिर् दुष्प्र-कम्पो नीलो नामैष वा[8]नरः ॥२४॥
२८उ] वृतः कोटी-सहस्रेण हरीणां [9]समुप-स्थितः ।
एषोऽप्य[10]यम् आ-शंसते लङ्कां स्वेनाऽनीकेन मर्दितुम् ॥२५॥ [२४
२९] यो गङ्गाम् अनुपर्य्-एति [11]त्रासयन् गज-यूथपान् ।
३०पू] हस्तिनां वानराणां च पूर्व-वैरम् अनु-स्मरन् ॥२६॥ [२५
एष यूथ-पतिर् नेता गजो गिरि-गुहाऽऽशयः । [२६पू
३१] हिरण्य-वाहिनीं मुख्यां नदीं हैमवतीम् अनु ॥२७॥

---

१. म-त्रुटितः पाठः ॥ २. रा$_2$-परमकोपनः । म-परमदुर्जयः ॥ ३. रा$_1$ ल$_1$ ल$_2$ अ प्र-राजन् ॥ ४. रा$_2$ फ-०काले ॥ ५. रा$_1$ ल$_1$ अ-वैवस्वतो । ६. रा$_2$ फ-यमेनं परिषेवते । ७. प्र-विहारशूरो ॥ ८. म-यूथपः ॥ ९. प्र-समुपास्थितः । १०. रा$_2$-एष वाशं० । फ-एष वै शंसते । म-एष व्याशं० ॥ ११. रा$_2$-भ्रमयन् । फ$_2$- भ्रामयन् ॥

उशीर-बीजम् आ-साद्य पर्वतं मन्दरोपमम् ।
३२] रमते वानर-श्रेष्ठो दिवि शक्र इव स्वयम् ॥२८॥ [२७
शतं[1] शत-सहस्राणां सहस्रम् अभि[2]-वर्तते । [२८पू
३३] एष दुर्-धर्षणो राजन्[3] प्र-माथी नाम यूथ-पः ॥२९॥
वातेनेवोद्-धूतं मेघं यम् एनम् अनु-पश्यसि । [३०
३४] वि-वर्तमानं[4] बहु-शो यत्रैतद् बहुलं रजः ॥[5]३०॥ [३१उ
एते सु-बहवो घोरा गो-लाङ्गूला[6] महा-बलाः ।[5]
३५] शतं शत-सहस्राणां कोटि-कोटि-शतं[7] यथा[9] ॥३१॥[8] [३२
एतं समनु-गच्छन्ति[10] गवाऽक्षं नाम यूथ-पम् ।[8]
३६] एषोऽप्य् आ-शंसते लङ्कां स्वेनाऽनीकेन मर्दितुम् । [३३
N] वाहिनी चाऽस्य वि-पुलां[11] लङ्काम् इच्छति मर्दितुम्[12] ॥३२॥ [N
भ्रमराऽऽचरिता यत्र सर्व-काम-फल-द्रुमाः ।
३७] यां[13](?यं) सूर्य-तुल्य-वर्णाऽऽभम् अनुपर्ये(?य)ति(?न्ति) पर्वतम्(?ताः)
प्र-भया यस्य दृश्यन्ते काञ्चना मृग-पक्षिणः ।
३८] यस्य प्र-स्थं महाऽऽत्मानो न त्यजन्ति महर्षयः ॥३४॥ [३५
तत्रैष राजन् रमते[14] रम्ये काञ्चन-पर्वते ।
३९] मुख्यो वानर-मुख्यानां केसरी नाम यूथ-पः । [३७
N] एषोऽप्य् आ-शंसते लङ्कां स्वेनाऽनीकेन मर्दितुम् ॥३५॥ [N
राजन् षष्टि-सहस्राणि रम्याः काञ्चन-पर्वताः ।
४०] तेषां मध्ये गिरि-श्रेष्ठस् त्वम् इवाऽनघ रक्षसाम् ॥३६॥ [३८
तत्रैते कपिल-श्वेतास् ताम्राऽऽस्या मधु-पिङ्गलाः ।

---

१. रा$_1$ ल$_2$ प्र फ-एवं । ल$_1$ श्र रा$_2$-एनं । २. ल$_2$ रा$_2$-अतिव० । ३. प्र-राजा ॥ ४. फ-वर्तमानं च । ५. म-नास्ति ॥ ६. प्र-लांगूलाश्च । ७. म-कोटीकोटीशतानि च । ८. ल$_2$-नास्ति ॥ ९. रा$_1$-एवं । १०. रा$_2$-समुपतिष्ठंति । फ-समनुतिष्ठंति । म-समुपसंगम्य । ११. रा$_2$-बहुला । १२. प्र-नास्ति ॥ १३. रा$_1$ प्र रा$_2$ म-यः ॥ १४. ल$_2$ म-भ्रमते ॥

४१] नि-वसन्ति गिरि-श्रेष्ठे तीक्ष्ण-दंष्ट्रा नखाऽऽयुधाः॥३७॥ [३९
सिंहा इव महा-दंष्ट्रा[1] व्याघ्रा इव दुरा-सदाः । [४०पू
४२] आशीविष-सम-स्पर्शा घोर-रूपाः प्लवं-गमाः ॥३८॥ [N
४३उ] तत्रैष नित्यम्[2] अ-चले[3] भास्करं[3] ह्य् उप[3]-तिष्ठते ।
N] अर्कस्य गतिम् अन्व्-इच्छन् नि-धानं[4] च महा-कपिः॥३९॥ [N
४४उ] यो वि-शालाम् उपाऽऽमृद्गात् सं-ग्रामे[5] हस्ति[5]-वानरे ।
ताराया जनको वीरः सु-षेणो नाम वीर्य-वान् ॥४०॥ [N
४५] नि-खर्वेण वृतः श्री-मान् हरीणां[6] वात-रंहसाम् ।
काम-रूपी महा-वीर्यः[7] सं-हर्षः[8] समरोद्-धतः[9] ॥४१॥ [N
४६] राजन् पृथिव्यां[10] वि-ख्यातो नाम्ना शत-बलिश् च[11] यः[11] । [४४पू
४७पू] वृतः कोटी-सहस्रैस् तु लङ्कां प्राऽर्थयते हरिः ॥४२॥ [४५उ
उल्का-मुखश् च ऋषभः शरभो गन्ध-मादनः ।
४८] एकैक एषां[12] योधानां कोटीभिर् दशभिर् वृतः ॥४३॥[13] [४६
तथाऽन्ये[14] वानर[15]-श्रेष्ठा विन्ध्य-पर्वत-वासिनः ।[13]
४९] न शक्यन्ते तु सं-ख्यातुं बहु-त्वाल् लघु-विक्रमाः॥४४॥[४७
एते महा-राज महाऽनु-भावा
महा-बलाश् चाऽ[16]प्रतिमाश् च युद्धे । [४८पू

---

१. रा$_2$ फ म-चतुर्दंष्ट्रा ॥ २. रा$_1$ ल$_1$ ल$_2$ अ प्र-नित्यसंबद्धे । ३. रा$_1$ ल$_1$ ल$_2$ अ प्र-भास्करेऽभ्युपतिष्ठते । रा$_2$ फ-भास्करोऽप्युपतिष्ठति । ४. रा$_1$ ल$_1$ ल$_2$ अ फ म-निधनं ॥ ५. म-संग्रामेष्वनिवर्तते ॥ ६. प्र-योधानां । ७. रा$_1$-महावीर्यात् । ८. रा$_1$ ल$_1$ ल$_2$ अ प्र फ-संहर्षात् । ९. प्र-समरोद्यतः ॥ १०. रा$_1$ ल$_1$ ल$_2$ अ प्र-यः पृथिव्यां तु । ११. रा$_2$ फ-०बलिस्तु सः ॥ १२. रा$_1$ ल$_1$ ल$_2$ अ प्र फ-एष । १३. म-नास्ति ॥ १४. रा$_1$ ल$_1$ ल$_2$ अ प्र फ-तथा ये । १५. रा$_1$ ल$_2$ अ-वानराः श्रेष्ठाः ॥ १६. म-त्रुटितः पाठः ॥

शाखा-मृगाः पर्वत-सन्निकाशाः
५०] प्र-कीर्तिता मुख्य-तमाः पृथिव्याम् ॥४५॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे सारण-वाक्य नाम तृतीयः सर्गः ॥३॥

[वं - ४]= [चतुर्थः सर्गः] =[दा - २८]

सारणस्याऽन्तरं दृष्ट्वा राक्षसस्य महा-बलः ।
१] बलम् आ-लो[४]कमानं च शुको रावणम् अब्रवीत् ॥१॥ [१
स्थितान् पश्यसि यान् एतान् मत्तान् इव महा-द्विपान् ।
२] न्यग्-रोधान् इव गाङ्गे[५]यान् शा[६]लान् हैमवतान् इव ॥२॥ [२
एते दुष्प्र-सहा राजन् बलिनः काम-रूपिणः ।
३] दैत्य-दानव-सङ्काशा युद्धे देव-पराऽऽक्रमाः ॥३॥ [३
एषां कोटी-सहस्राणि नव पञ्च च सप्त च ।
४] नव शङ्कु-सहस्राणि दशाऽर्बुद-शतानि च ॥४॥ [४
एते सुग्रीव-सचिवाः किष्किन्धा-निलयाः शुभाः ।
५] हरयो देव-गन्धर्वैर् उत्-पन्ना दानवैस् तथा ॥५॥ [५
यौ तु पश्यसि तिष्ठन्तौ कुमारौ देव-रूपिणौ ।
६] मैन्दश् च द्वि-विदश् चै[७]तौ नैतयोर् विद्यते समः ॥६॥ [६
ब्रह्मणा समनु-ज्ञाताव् अमृत-प्राशिनाव् उभौ ।
७] आ-शंसेते पुरीं लङ्काम् ए[८]तौ मर्दितुम् ओजसा ॥७॥ [७
या[९]व् एताव् एतयोः पार्श्वे स्थितौ पर्वत-सन्निभौ ।
८] सु-मुखो वि-मुखश्-चैव मृत्यु-पुत्रौ पितुः समौ ॥८॥

---

१. रा१ ल२-०र्षे श्रीरामा० । अ-इत्यार्षेरा० । फ-इ···र्षे···मा···णे । म-त्रुटितः पाठः । २. अ प्र रा२-लंकाकाण्डे । म-लंकापर्वणि । ३. रा२-सैन्यवर्णनं रावणवाक्यं ॥ ४. रा१-आलोक्यमानं ॥ ५. रा१ ल१ अ प्र म-तुंगाग्रान् । ६. रा१ ल१ ल२ ब-सालान् ॥ ७. प्र-चैव । रा२ फ-चोभौ ॥ ८. प्र-लङ्कां कोटिभिर्दशभिर्वृतौ । फ-एतौ मर्दितुं स्वेन तेजसा ॥ ९. म-यावेतयोः स्थितौ पार्श्वे राजन् ॥

प्रेक्षन्तौ नगरीं लङ्कां[1] कोटीभिर् दशभिर् वृतौ । [८
९] आ-शंसेते पुरीम् एतौ मर्दितुं स्वेन तेजसा ॥९॥ [७उ
१०पू] यं तु पश्यसि तिष्ठन्तं प्र-भिन्नम्[2] इव कुञ्जरम् । [९पू
N] वातेनेवोद्-धतं तूलं[3] यस्य रूपं महाऽऽत्मनः । [N
१०उ] यो बलात् क्षोभयेत् क्रुद्धः सम्-उद्रम् अपि वेग[4]-वान् ॥१०॥ [९उ
एष[5] धर्षितवाल् लङ्कां पूर्वं सीतां च दृष्टवान् ।
११] एनं पश्य पुरा दृष्टं कपिं प्रत्या-गतं पुनः ॥११॥ [१०
ज्येष्ठः[6] केसरिणः पुत्रो वाताज्[7] जात[7] इति श्रुतिः[8] ।
१२] हनू-मान् इति वि-ख्यातो लङ्घितो येन सागरः ॥१२॥ [११
काम-रूप-धरश्[9] चैव काम-गश् चैवं[10] वानरः ।
१३] अ-निवार्या गतिश् चाऽस्य[11] यथाऽनिलं[12]-गतिस् तथा ॥१३॥ [१२
उद्-यन्तं भास्करं बालो दृष्ट्वो[13]त्था(द्-स्था)य पुरा कपिः[13] ।
१४] त्रि-योजन-सहस्राऽन्तम् अध्वानं समभि-प्लुतः ॥१४॥ [१३
आदित्यम् आ-हरिष्यामि नभसः परि-पश्यतः[14] ।
१५] इति निश्-चित्य मनसा किलैष बल-दर्पितः ॥१५॥ [१४
अन्-आधृष्यतमं भानुम् अपि[15] देवर्षिदानवैः[15] ।
१६] अन्-आसाद्यैव पतितो भास्करोदयने गिरौ ॥१६॥ [१५
पतितस्य कपेर् एको[16] हनुर् एव शिला-तले ।
१७] किञ्-चिद् भग्नो दृढ-हनुर् हनु-मान् एष तेन[17] च[17] ॥१७॥ [१६
इत्य् एवाऽऽगम-योगेन मयैष[18] विदितो हरिः ।

---

१. ल१-रम्यां ॥ २. म-प्रसन्नम् । ३. रा१ ल१ ल२ ब-मूलं । ४. रा२ फ-तेजसा ॥ ५. रा२-एको ॥ ६. म-क्षेत्रे । ७. ल१ ब अ-वातजात । ८. रा२ फ-श्रुतः ॥ ९. रा२ फ-०रूपी बली । १०. म-चापि । ११. प्र रा२ फ म-चैव । १२. रा२ फ-यथानलसस्वस् ॥ १३. प्र-०य महाकपिः । रा२ फ-दृष्ट्वोत्पतितः किल । म-दृष्ट्वा योयं पु० ॥ १४. रा२ फ म-परियास्यति ॥ १५. रा१ ल१ ल२ ब अ-सदेवऋषि वानरैः ॥ १६. रा२ फ-अस्य । १७. रा२ फ-वानरः ॥ १८. रा२ फ-य एष ।

१८] नाऽस्य शक्यं बलं वीर्यं[1] प्र-भावश् चोप-लक्षितुम् । [१७
आ-शंसन्त्य्[2] एष चैवैको[3] लङ्कां मर्दितुम् ओजसा ॥१८॥ [१८पू

१९] यस् त्व् अस्याऽनन्तरः श्यामः[4][5] पद्म-पत्र-निभेक्षणः ।
इक्ष्वाकूणाम् अति-रथो लोके विश्रुत-पौरुषः ॥१९॥ [१९

२०] यस्मिन् सना-तनो[6] धर्मो यो धर्मे[7] नाऽति-वर्तते ।
यो ब्रह्माऽस्त्रं च[8] दैवं च वेत्ति वेद-विदां वरः ॥२०॥ [२०

२१] अस्त्र-ग्रामः[9] स-संहारो यस्मिन्न्[10] एवं प्र-तिष्ठितः[11] । [N
यो भिन्द्याद्[12] गगनं बाणैर् वसुं[13]-धाम् अपि दारयेत् ॥२१॥

२२] यस्य मृत्योर्[14] इवै क्रोधः शक्रस्येव परा-क्रमः । [२१
यस्य भार्या जन-स्थानात् सीता नाम हृता[15] त्वया ।

२३] सोऽयं दाशरथी रामो योद्धुं त्वाम् अभि-वर्तते ॥२२॥ [२२
योऽस्यैव[16] दक्षिणे पार्श्वे शुद्ध-जाम्बूनद-प्रभः ।

२४] विशाल-वक्षास् ताम्राऽक्षो नील-कुञ्चित-मूर्धजः ॥२३॥ [२३
एषोऽस्य लक्ष्मणो नाम भ्राता प्राण-समो हितः ।

२५] वेद-वेदाऽङ्ग[17]-कुशलः सर्वाऽस्त्र-विधि-पारगः ॥२४॥ [२४
अ-मर्षी दुर्-जयो जेता वि-क्रान्तः समरे[18] बली ।

२६] रामस्य दक्षिणो बाहुर् नित्यं प्राणो बहिश्-चरः ॥२५॥ [२५
नित्यं सङ्ग्राम-शीलश् च नित्यम् उत्तम-कार्मुकः । [N

२७] न ह्य् एष राघवस्याऽर्थे जीवितं परि-रक्षति ।

---

१. रा$_2$ फ म-रूपं । २. म-अयं सैन्येषु । ३. रा$_2$ फ-एवैको ॥ ४. रा$_1$ ल$_2$ अ म-भीमः । रा$_2$ फ-शूरः । ५. रा$_2$ फ-श्यामः पद्मनि० । म-श्यामः पद्मदलेक्षणः ॥ ६. रा$_2$ फ-०तना धर्मा । ७. रा$_2$ फ-धर्मान् । ८. रा$_1$ ब-चैव ॥ ९. प्र-०ग्रामस्य सं० । १०. ल$_1$-यस्मिन्नेष । रा$_2$ फ ब-यस्मिन्वीरे । ११. प्र-प्रतिष्ठति । १२. रा$_1$ ल$_2$ ब अ-भिन्दन् । प्र-अभिनद् । १३. रा$_1$ ल$_1$ ल$_2$ ब अ- वसुधां च निवर्तयेत् । प्र-वसुधां च निवर्तते ॥ १४. रा$_2$ फ-मृत्योः समः । १५. रा$_2$ फ म-प्रमथिता ॥ १६. रा$_2$ फ-यश्चैष ॥ १७. रा$_2$ फ म-नये युद्धे च कुशलः ॥ १८. रा ल$_1$-समरी ॥

ऐषोऽप्य्[1] आ-शंसते युद्धे नि-हन्तुं सर्व-राक्षसान् ॥२६॥ [२६
२८] यस् तु सैन्यम्[2] असौ पार्श्वे रामस्याऽऽश्रित्य[3] तिष्ठति ।
रक्षो-गण-वृतो भ्राता तवैष[4] स विभीषणः ॥२७॥ [२७
२९] श्री-मता राज-राजेन[5] लङ्कायाम् अभि-षेचितः ।
त्वाम् एव प्रतिसं-रब्धो राम-साचिव्यम्[6] आ-गतः ॥२८॥ [२८

३०] यथा चैष[7] तथा प्राप्तश् चाऽऽगमो वानरेषु वै ।[8]
प्रजा-पतेः किल पुरा वाताऽऽविद्धं रजस् तदा ।
३१] वामेक्षणेऽपतत् तेन स्पृष्ट्वा किम् इदम् ऐक्षत ॥२९॥ [N
वामेनाऽऽदाय हस्तेन क्षिप्तं दूरं पपात तत् ।
३२] मनसा चिन्तितं[9] तेन किम् अस्मात् प्र-भविष्णुषु ॥३०॥ [N
तत्राऽपि तरसा भासा फेन-बुद्बुद-सप्रभा ।
३३] उत्थि(द्-स्थि)ता विग्रह-वती नारी कमल-लोचना ॥३१॥ [N
चन्द्र-बिम्बाऽऽनना बाला विद्युत्-तरल-लोचना ।
३४] न[10] देवी न च गन्धर्वी नाऽसुरी न च पन्न-गी ॥३२॥ [N
तादृग्-रूपवतीं सृष्टां[11] स्वयम् एव स्वयं-भुवा ।
३५] लोक-पालास् ततो[12] दृष्ट्वा तं देशं समुपाऽऽगताः ॥३३॥ [N
रविस् तत्राऽब्रवीद् वाक्यम् उप-सृत्य प्रजा-पतिम् ।
३६] कस्यैषा केन कार्येण सं-प्राप्तेह शुभाऽऽनना ॥३४॥ [N
पुरीं भोग-वतीं त्यक्त्वा नाग-कन्या किम् आ-गता ।
३७] सिद्धिर् बुद्धिस् तथा लक्ष्मीः प्र-भा पुष्टिः सरस्वती ।
३८पू] असौ रूपम् अव-ष्टभ्य चोत्थि(द्-स्थि)ता जगतां ततः॥३५॥ [N

---

१. रा$_{2}$ म-एकोप्याशं० । रा$_{1}$ ल$_{1}$ ल$_{2}$ ब श्र प्र-एषो ह्याशं० ॥ २. म-मध्यम् । ३. रा$_{2}$-०स्याश्रित्य । ४. रा$_{2}$ फ-तवैवैष ॥ ५. रा$_{1}$-तव राज्येन । ६. म-०सान्निध्यम् ॥ ७. ल$_{2}$-च । ८. रा$_{2}$ फ म-अत आरभ्य ४५-शश्लोकं यावत्पाठो नास्ति ॥ ९. प्र-चिन्त्यते ॥ १०. प्र-नव देवी न ॥ ११. रा$_{1}$ ल$_{1}$ ल$_{2}$ श्र प्र-दृष्टा । १२. ल$_{1}$-तु ते ॥

ततो वै रजसा जाता(?तां)स्निग्ध-साऽञ्जन[1]-सप्रभा(?भां)।
३९] भास्करो भास्कराऽऽभां ताम् उप-गूह्य ततो[2] गतः[3] ॥३६॥ [N
कदा-चिद् वीऽऽक्ष्य तां कन्यां रूप-यौवन-दर्पिताम् ।
४०] स्थितां मन्दर-पृष्ठेषु रविर् वचनम् अब्रवीत् ॥३७॥ [N
मत्-तेजसा महा-वीर्यस् त्वम् अ-धृष्यश् च महा-रणे ।
४१] देव-दानव-यक्षाणां पन्न-गानां स-रक्षसाम् ।
अ-वध्यस् त्रि-दशानां च तव पुत्रो भविष्यति ॥३८॥ [N
४२] वरेण छन्दयित्वा ताम् अगमत् सद्म एव सः ।
रविणा बाल-भावात् तु बालेत्वं परि-कीर्तिता ॥३९॥ [N
४३] अथ काले तदाऽऽसीनां शक्रः सुर-गणाऽन्वितः ।
वि-चरन् समयाऽऽविष्टः ? सर्वर्तु-कुसुमोत्करे ॥४०॥ [N
४४] स दृष्ट्वा चारु-सर्वाऽङ्गीं परं वि-स्मयम् आ-गतः ।
का त्वं भवसि रुद्राणां यक्षाणाम् इति चाऽब्रवीत् ।
४५] मनो हरसि मे भीरु काले कान्त-तरा ह्य् असि ॥४१॥ [N
स तु भावेन दिव्येन पाणिना तां मनो-रमाम् ।
४६] उप-स्पृश्य जलं(?जल) शीतं वचनं चेदम् अब्रवीत् ॥४२॥ [N
वानरौ दिव्य-रूपौ ते सर्वाऽस्त्रौ कामरूपिणौ[4] ।
४७] उत्-पत्स्येते महा-भागौ वि-षादं मा गमिष्यसि ।
यम-जातौ महा-भागौ वाली सु-ग्रीव एव च ॥४३॥ [N
४८] किष्किन्धा नाम तु पुरी कान्ता पुष्प-फलैर् युता ।
तत्र राज्यं करिष्येते सर्व-वानर-पुङ्गवौ ॥४४॥ [N
४९] इक्ष्वाकु-कुल-सम्भूतो रामो नाम महा-यशाः ।
विष्णुर् मानुष-रूपोऽसौ तस्यैकः सख्यम् एष्यति ॥४५॥ [N

१. अ प्र-स्निग्धामञ्जनचक्षुषा । २. ब अ प्र-ततस्ततः । ३. रा१ ल२-नास्ति ॥ ४. प्र-सूर्यरूपिणौ ॥

५०] यं[1] तु पश्यसि तिष्ठन्तं लक्ष्मणात् सम्-अनन्तरम् ।[2]
सर्व-शाखामृगेन्द्राणां भर्तारम् अ-पराजितम् ॥४६॥ [N
५१] तेजसा यशसा बुद्ध्या बलेनाऽभि-जनेन च ।
यः कपीन् अभिसं-धत्ते हिम-वान् इव पर्वतान् ॥४७॥ [N
५२] किष्किन्धां यः समध्य्-आस्ते गुहां वानर-सङ्कुलाम् । [N
दुर्[3]-गां पर्वत-दुर्ग-स्थां[3] कामरूपी महा-बलः ॥४८॥ [३१उ
५३] अस्यैका[4] काञ्चनी माला शोभते शत-पुष्करा ।
कान्ता देव-मनुष्याणां यत्र लक्ष्मीः प्रति-ष्ठिता ॥४९॥ [३२
५४] एषा[4] माला च तारा[4] च कपि-राज्यं च शाश्वतम्[5] ।
५५पू] रामेण वालिनं हत्वा सु-ग्रीवे प्रति-पादितम् ॥५०॥ [३३
शतं शत-सहस्राणां कोटिम्[6] आहुर् मनीषिणः[7] ।
५६] शतं कोटि-सहस्राणां शङ्कुर् इत्य् अभि-धीयते ॥५१॥[8] [३४
शतं शङ्कु-सहस्राणां वृन्दम् आहुर् मनीषिणः ।[8]
५७] शतं वृन्द[9]-सहस्राणां महा-वृन्दम् इहोच्यते[10] ॥५२॥ [३५
महावृन्द-सहस्राणां[11] शतं[11] पद्मम् इति स्मृतम्[11] ।
५८] शतं[12] पद्म-सहस्राणां[12] महा-पद्मम् इहोच्यते[13] ॥५३॥[14] [३६
५९उ] एष कोटि-सहस्रेण तथा[15] शङ्कु[15]-शतेन च ।
एष वृन्द-सहस्रेण महावृन्द-शतेन च ॥५४॥ [३७
६०] एष पद्म-सहस्रेण महापद्म-शतेन च ।
एष सैन्येन सर्वेण सु[16]-संपन्नेन पार्थिवः[17] ॥५५॥ [३८

---

१. फ-यदि । २. म-नास्ति ॥ ३. रा$_1$ल$_1$ल$_2$ ब श्र प्र-सुवेलदुर्गमध्यस्थः ॥ ४. प्र-एतामालंव्य तारां । ५. रा$_2$ फ-सर्वशः ॥ ६. श्र-नास्तिः । ७. ल$_1$ ब म-नास्ति ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-नास्ति । ९. ल$_1$- शत-वृन्द स० । १०. श्र-नास्ति ॥ ११. रा$_1$ ल$_1$ श्र ब-शतपद्ममिति श्रुतिः । प्र-नास्ति । १२. प्र-नास्ति । १३. रा$_1$ फ-इति श्रुतिः । १४. प्र म-नास्ति ॥ १५. म-महापद्मश० ॥ १६. ल$_1$-समुत्पन्नेन । १७. रा$_1$ फ-०व ॥

सु-ग्रीवो वानरेन्द्रस् त्वां सम्प्र-हाराऽर्थम् ऐष्यते । [४३उ
६१] यद् अत्राऽनन्तरं कार्यं तद् भवान् कर्तुम्[२] अर्हति[३] ॥५६॥ [N
इमां महा-राज समी-ईक्ष्य वाहिनीं
समुन्-नतां प्रज्वलित-ग्रहोपमाम् ।
तथा प्र-यत्नः परमो वि-धीयताम्
६२] यथा जयः स्यान् न परा-जयः कं-चित्[६] ॥५७॥ [४४

इत्यार्षे रामायणे युद्ध-काण्डे शुक-वाक्यं नाम चतुर्थः सर्गः ॥४॥

[वं-५]= [पञ्चमः सर्गः] =[दा-२१]

शुकेन च समा-ख्यातां दृष्ट्वा तां हरि-वाहिनीम् ।
१] समीप-स्थं च रामस्य भ्रातरं स्वं वि-भीषणम् ॥१॥ [१
लक्ष्मणं च महा-वीर्यं भुजं रामस्य दक्षिणम् ।
२] सर्व-वानर-राजानं सु-ग्रीवं चाऽपराजितम् ॥२॥ [२
ईषद् आगत-सन्त्रासो जात-क्रोधश् च रावणः ।
३] भर्त्सयामास तेजस्वी वाक्योऽन्ते शुक-सारणौ ॥३॥ [५
N] तावं उवाच दश-ग्रीवो[११] मन्युना[१२] सम्प्र-पूरितः[१३] । [N
रोष-गद्गदया वाचा सं-रंधस्[१४] तर्जयन्न् इव ॥४॥ [६उ

---

१. रा₂ फ म-उद्यतः । २. रा₁ ल₁ ल₂ ब श्र प्र-त्वं तु । ३. म-एतत्ते सर्वमाख्यातं यथावदभिप्रेक्षतः ॥ ४. रा₁ ल₁ ल₂ ब श्र प्र-महावरूथिनीम् । ५. रा₁फ-रणे । ६. म-नास्ति ॥ ७. ल₂ब श्र प्र-लंकाकाण्डे । फ-सुन्दरकाण्डे । म-त्रुटितः पाठः । ८. फ-लंकावाक्यं । म-शुकोक्तं ॥ ९. रा₂ फ म-कथान्ते ॥ १०. रा₁ ल₂ फ-तान् । ११. ल₁ ब श्र प्र-गतश्रीको । १२. रा₁ ल₁ ल₂ ब श्र प्र-मनसा । १३. रा₁ ल₁ ल₂ ब श्र प्र म-संप्रकम्पितः । १४. प्र-स रक्षस् ॥

४] मां तावत् सदृशं नाम सचिवैर् उप-जीविभिः ।
वि-प्रियं नृ-पतिं वक्तुं निग्रहाऽनुग्रहे प्रभुम् ॥५॥ [७

५] रिपूणां प्रति-कूलानां युद्धाऽर्थम् अभि-वर्तताम् ।
उभाभ्यामसदृशा (?शं) वां वक्तुं अ-प्रस्तुतं ततः ॥६॥ [८

६] आचार्या गुरवो वृद्धा वृथा वां पर्युपाऽऽसिताः ।
यत् सारं राज-शास्त्राणाम् अनु-जीव्य न गृह्यते ॥७॥

७] गृहीतश् चाऽप्य् अ-विज्ञातो भारः शास्त्रस्य वां वृथा । [९
ईदृशैः सचिवैर् युक्तो मूर्खैर् दिष्ट्या ध्रिये ह्य् अहम् ॥८॥ [१०

८] किं वां मृत्यु-भयं नास्ति माम् उक्त्वा परुषं वचः ।
यस्य वै(?मे) शासने(?तो) जिह्वा प्र-यच्छति शुभाऽशुभम् ॥९ [११

९] अप्य् एवं दहनं स्पृष्ट्वा वने तिष्ठन्ति पाद-पाः ।
राज-दोष-परामृष्टा न तिष्ठन्त्य् अप-राधिनः ॥१०॥ [१२

१०] हन्याम् अहम् इमौ पापौ शत्रु-पक्ष-प्रशंसकौ ।
यदि पूर्वोप-कारो मे न क्रोधम् उप-शमयेत् ॥११॥ [१३

११] अद्य वैवस्वतं देवं पश्येतां प्रेषितौ मया । [N
गच्छतं भोः सुदुर्-वृत्तौ सन्नि-कर्षाद् इतो मम ॥१२॥ [१४ पू

---

१. रा२ फ-न चैतत् । २. ब-सचिवं । ३. म-नास्ति । ४. रा१ ल१ ल२ ब अ रा२ म-नृपतिर् । ५. रा१ ल१ ल२ ब अ रा२म-प्रभुः ॥ ६. रा१ ल१ ल२ ब अ प्र-सदृशाभ्यां च । रा२ फ म-सदृश नाम । ७. रा२ फ-अच्युतं स्तव । ८. प्र-यथा । ९. म-तेवामुपा० । १०. म-सारे राजशस्त्राणामनु जीवन्ति गृह्य च ॥ ११. रा२-भावः । १२. रा१ ल१ ल२ ब प्र-शस्त्रस्य वां । रा२-शास्त्रवतां । १३. रा१ ल१ ल२ ब अ प्र-मा जिहीर्षीः । १४. रा१ ल१ ल२ ब अ प्र-प्रियो । रा२फ-प्रियैर् । १५. म-दृढं ॥ १६. रा१अ-परमं । १७. रा२फ-वदतो ॥ १८. रा१ ल१ ल२ ब अ प्र-अज्ञवद् । म-अथैव । १९. रा१ ल१ ब फ-दृष्ट्वा । २०. फ-०प्रशंसनैः । २१. म-य्यर्थोपराधो । २२. म-उपनाशयेत् ॥ २३. म-नास्ति । २४. रा२ फ-ध्वंसेतां लघु दुर० । म-ध्वंसेतां सुदुर्धर्षौ । २५. अ-नास्ति ॥

१.२] उभौ न द्रष्टुम् इच्छामि युवां विप्रिय-वादिनौ । [N
न युवां हन्तुम् इच्छामि स्मरन्न् उप-कृतानि वाम् । [१.४३
१.३] हताव् एव कृत-घ्नौ वै[1] मम स्नेह-पराङ्मुखौ ॥१.४॥ [१.५
१.४३] तेनैवम्[2] उक्तौ स-व्रीडाव् उभौ तौ[3] शुक-सारणौ ।
रावणं जय-शब्देन प्रति-पूज्याऽभिनिः-सृतौ ॥१.५॥ [१.६
१.५] अब्रवीत् तु समीप-स्थं दश-ग्रीवो महोदरम् ।
उप-तिष्ठन्तु[4] मे शीघ्रं चारा अति[5]-विचक्षणाः ॥१.६॥ [१.७
१.६] ततश् चाराश् च त्वरिताः[6] प्राऽऽप्ताः पार्थिव-शासनात् ।
उप-स्थिताः प्राऽञ्जलयो वर्धयित्वा जयाऽऽशिषा ॥१.७॥ [१.८
१.७] तान् अब्रवीत् ततो वाक्यं रावणो राक्षसाऽधिपः ।
चारान् प्रत्ययिनः[7] शूरान् भक्तान् विगत-साध्वसान्[8] ॥१.८॥ [१.९
१.८] छन्ना गच्छत रामस्य व्यव-सायं[9] परीऽऽक्षितुम् ।
मन्त्रे केऽभ्यन्तरास्[10] तस्य प्रीतिं केन सदा गतः ॥१.९॥ [२०
१.९] क्व वसत्य् अद्य रजनीं कतरेणैष्यते पथा ।
वि-ज्ञाय नि-पुणं सर्वम् आ-गन्तव्यं[11] विशेष-तः[11] ॥२०॥ [२१
२०] चारेण विदितः[12] शत्रुः पण्डितैर् वसुधाऽधिपैः ।
युद्धे तुल्येन[13] यत्नेन समा[14]-साद्य निर्-अस्यते ॥२१॥ [२२
२१] चारास् तु ते तथेत्य् उक्त्वा प्र[15]-हृष्टं राक्षसेश्वरम्[15] ।
N] शार्दूलं पुर-तः कृत्वा हृष्टाश् चक्रुः प्र-दक्षिणम् ।[16] [२३

---

१. रा$_2$ फ-यौ । म-त्तौ । २. अ-नास्ति ॥ ३. अ-नास्ति: ॥ ४. म-उपस्थाप्यंतु । ५. रा$_2$ फ-इति वि० । म-इव वि० ॥ ६. ल$_2$-चाराश्च चत्वारः । फ-चाराः सत्व० ॥ ७. रा$_2$ अ-प्रति···नः । ८. अ-०गतचेतनान् ॥ ९. प्र रा$_2$-०सायान् । १०. प्र-केनुचरास ॥ ११. म-आगन्तव्यमशेषतः ॥ १२. ल$_1$ ब-सहितः । ल$_2$-व्यहतः । म-तु हतः । १३. रा$_2$-युद्धे स्वल्पेन । फ म-युद्धेष्वल्पेन । १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-समाश्वास्य ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-प्रहृष्टे राक्षसेश्वरे । १६. रा$_2$ फ म-नास्ति ॥

कृत्वा प्र-दक्षिणं जग्मुर् यत्र रामः स-लक्ष्मणः ॥२२॥ [२४उ
२२] ते[1] सु-वेलस्य शैलस्य समीपे राम-लक्ष्मणौ । [२५पू
आ-सेदुर् हरि-सैन्येन सं-वृतौ स-विभीषणौ ॥२३॥ [N
२३] प्र-च्छन्नांश् चरतम्[2] तत्र[2] तान् ददर्श वि-भीषणः । [२५उ
२४पू] वि-ज्ञाय व (? वं) चनं तेषां[3] स चक्रे राक्षसेश्वरः ॥२४॥[4] [N
N] ते दृष्ट्वा वानर-बलं राक्षसा वानराऽर्दिताः ।[4] [N
२४उ] वि-षेदुर्[5] भय-सन्त्रस्ता नि-गृहीता[6] यद्-ऋच्छया ॥२५॥ [२७
वानरैर् अर्दितास् ते तु वि-क्रान्तैर् लघु-विक्रमाः[7] ।
२५] पुनर् लङ्काम् अनुप्राऽऽप्ताः श्वसन्तो नष्ट-चेतसः ॥२६॥ [२९
ततो दश-ग्रीवम् उप-स्थिताः पुनश्
चरा बहिर् नित्य-चरा निशा-चराः ।
गिरेः सु-वेलस्य समीप-वर्तिनं[8]
N] न्य्-अवेदयन् भीम-बलं च तद्[9] बलम् ॥२७॥ [३०

इत्यार्षे रामायणे युद्ध-काण्डे[10] चाराऽनु-प्रेषणं[11] नाम
पञ्चमः सर्गः ॥५॥

---

१. रा१ ल२ अ प्र-गत्वा वेलस्य शै० । ल१ ब-गत्वा सुवेलशै० । म-ते तु वे० ॥ २. रा१ ल१ ल२ ब अ प्र-चरतश्चात्र । ३. प्र-चैषां । ४. रा२ फ म-नास्ति ॥ ५. रा१ ल२ अ प्र-निषेदुर् भय० । रा२ फ म-विभीषणेन सन्त्रस्ता । ६. म-ते गृहीत्वा ॥ ७. प्र रा२ फ म-०विक्रमैः ॥ ८. रा२ फ-०पवासिनं । ९. फ-तद्बुत् ॥ १०. ल२ ब अ प्र-लंकाकाण्डे । रा२ म-लंकापर्वणि । ११. ल२ म-चारानुप्रवेशनं ॥

वीऽऽक्षमाणं वि-षण्णं तु शार्दूलं शोक-कर्षितम् ।
१] [1]भयाज् जडी-कृतैर् अङ्गैः श्वसन्तम् इव पन्न-गम् ॥१॥ [N
उवाच प्र-हसन्न् एव रावणो भीम-दर्शनः ।
२] अ-यथावच् च ते वर्णो दीनश् चाऽसि निशा-चर ।
नाऽसि [2]कच्-चिद् अ-मित्राणां क्रुद्धानां [3]वशम् आ-[3]गतः॥२॥ [N
३] इति तेनाऽनु-[4]पृष्टस् तु वचो मन्दम् उद्-ईरयन् ।
N] महा-राक्षस-शार्दूलं शार्दूलो वाक्यम् अब्रवीत् ॥३॥ [N
४उ] न ते [5]वारयितुं शक्या राजन् वानर-पुङ्गवाः । [५उ
वि-क्रान्ता बल-वन्तश् च राघवेण च रक्षिताः ॥४॥
५] [6]नापि सं-[6]भाषितुं शक्याः सं-[7]प्रश्नोऽपि न [7]लभ्यते । [६
सर्व-तो दृश्यते पन्था वानरैः पर्वतोपमैः ॥५॥[8]
६] प्रविष्ट-मात्रो ज्ञातोऽहं बले तस्मिन्न् अ-[9]वारितः । [७
[10]तथा गृहीतो बलिभिर् बहु-धा वि-प्र-[11]कर्षितः ॥६॥
७] जानुभिर् मुष्टिभिर् दन्तैस् तलैश् [12]चाऽभि-हतो भृशम् । [८
वि-प्र-णीतोऽस्मि [13]बलिभिर् हरिभिस् [13]तैर् अ-मर्षणैः ॥७॥
८] परि-णीय च सर्व-त्र [14]नीतोऽहं राम-संसदि । [९
रुधिराऽऽप्लुत-सर्वाऽङ्गो वि-ह्वलश् चाऽजितेन्द्रियः ॥८॥

---

१. म-तैर्जर्जरीकृतैर् ॥ २. प्र-किंचिद् । ३. म-च निशाचर ॥ ४. रा१ ल१ ल२ ब श्र प्र-०नुशिष्टस् ॥ ५. रा१ ल१ ल२ ब श्र फ-वार० ॥ ६. ल१ ल२ ब श्र प्र फ-नापि संभावितुं । रा२-न संभावयितुं । ७. श्र-राजन् वानर-पुंगवाः । ८. फ-नास्ति ॥ ९. रा२ म-अवारिते । १०. रा२ फ-ततो । ११. रा२ फ-सम्प्रधर्षितः ॥ १२. रा२ म-चापि हतो । १३. प्र रा२ फ म-हरिभिर्बलवद्भिर् ॥ १४. ब रा२ फ म-भीतोह ॥

९] हरिभिर् वध्यमानश् च याचमानः[1] कृताऽञ्जलिः । [१.१०
राघवेण परि-त्रातो[2] जीवन्न् एवं[3] यद्-ऋच्छया ॥[4]९॥ [१.११
१०] एष[4] वृक्ष-शिलाभिश् च[4] पूरयित्वा महाऽर्णवम् ।
द्वारम् आ-वृत्य लङ्कायाः[4] रामस् तिष्ठति साऽऽयुधः[4] ॥१.०॥ [१.१२
११] गारुडं व्य्-ऊहम्[5] आ-स्थाय वानरैर् बहुभिर् वृतः ।[6]
मां[6] वि-सृज्य महा-तेजा[6] लङ्काम् एवोप-वर्तते ॥१.१॥ [१.१३
१२] पुरी-प्राकारम् आ-यातः क्षिप्रम् एक-तरं कुरु ।
सीतां वा सम्प्र-यच्छाऽऽशु युद्धं वा संवि-धीयताम् ॥१.२॥ [१.१४
१३] स[6] रुषाऽथोत्-पपातैव[6] तच् छ्रुत्वा राक्षसाऽधिपः ।
शार्दूलं सु-महद् वाक्यम् अथोवाच स रावणः ॥१.३॥ [१.१५
१४] यदि मां प्रति योत्स्यन्ते देव-गन्धर्व-दानवाः ।
नैव सीतां प्र-यच्छामि सर्व-लोक-भयाद्[7] अपि ॥१.४॥ [१.१६
१५] एवम् उक्त्वा महा-तेजा रावणः पुनर् अब्रवीत् ।
चरिता[8] भवता सेना शूराः के तत्र वानराः ॥१.५॥ [१.१७
१६] कीदृशाः कति वा सौम्य वानरा ये[9] दुरा-सदाः ।
N] केऽस्य[10] पुत्राश्[11] च पौत्राश् च त्वं समा-ख्याहि[12] राक्षस ॥१.६॥ [१.१८
१७उ] तद्[13] अत्र प्रवि-धास्यामो[14] ज्ञात्वा[15] तेषां[16] बलाऽबलम् ।
अ-वश्यं बल-संख्यानं कर्तव्यं युद्ध-लिप्सुना ॥१.७॥ [१.१९
१८] अथैवम् उक्तः शार्दूलो रावणेनोत्-तमश्[17] चरः[17] ।

---

१. म-नास्ति । २. प्र-परिज्ञातो । ३. श्र-इव । ४. म-नास्ति ॥ ५. फ-यूथम् ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-मनसैवोपपन्नार्थं ॥ ७. रा$_2$ फ-०कक्षयाद् ॥ ८. फ-चारिता भविता ॥ ९. रा$_2$ फ-ते । १०. म-तेषां । ११. रा$_2$ फ-पुत्राः प्रपौत्राश् । १२. रा$_2$ फ-तत्त्वमाख्याहि ॥ १३. रा$_2$ फ-तथात्र । १४. रा$_2$ फ-प्रतियोत्स्यामो । म-प्रतिपत्स्यामो । १५. प्र-ज्ञातं । १६. रा$_1$ ल$_1$ ब श्र प्र-चैव ॥ १७. म-०नोत्तरस्वनः ।

इदं वचनम् आ-रेभे वक्तुं रावण-संसदि ॥१८॥ [२०
१९] ऋक्ष-राजस्य पुत्रोऽत्र राजन्[1] राज्ञां सुदुर्-जयः । [२१पू
२०पू] पितामह-सुतश् चाऽत्र जाम्ब-वान् इति वि-श्रुतः ॥१९॥ [N
सहस्रांऽशु-सुतः श्री-मान् सु-ग्रीवो वानरेश्वरः ।
N] राक्षसानाम्[2] अ-भावाय स-बलः समुप-स्थितः ॥२०॥[3] [N
२२उ] सु-षेणश् चाऽत्र धर्माऽऽत्मा पुत्रो धर्मस्य वीर्य-वान् ।
सौम्यैः[4] सोमाऽऽत्मजश् चाऽत्र[5] राजन्[6] दधि-मुखो हरिः २१ [२३
२३] सु-मुखो वि-मुखश् चैव वेग-दर्शी च वानरः ।
२४पू] मृत्युर् वानर-रूपेण तनुम्[7] एषां प्र-वेशितः । [२४
N] स्वयं-भुवा महा-राज मृत्योः पुत्राश् च ते स्मृताः[8] ॥२२॥ [N
पुत्रो हुताऽशनस्याऽत्र नीलः सेना-पतिः स्वयम् ।
N] अ-निलस्य च पुत्रोऽत्र हनु-मान् इति वि-श्रुतः ॥२३॥ [२५
N] नप्ता शक्रस्य दुर्-धर्षो बल-वान् अङ्ग-दो युवा[9] ।
२४उ] मैन्दश् च द्वि-विदश् चैव वीरौ ताव् अश्विनोः[10] सुतौ ॥२४॥[२६
पुत्रा विवस्वतश्[11] चाऽत्र पञ्च[12] कालाऽन्तकोपमाः ।
२५] गजो गवाऽक्षो गवयः[13] शरभो[13] गन्ध-मादनः । ॥२५॥ [२७
श्वेतो ज्योतिर्-मुखश्[14] चाऽत्र भास्करस्याऽऽत्म-जाव्[15] उभौ[15] ।
२६] वरुणस्याऽऽत्म-जश् चाऽत्र हेम-कूटः प्रताप-वान्[15] ॥२६॥ [३३

---

१. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र म-राजा ॥ २. म-वानराणां महाबाहुः । ३. अतः परमधिकः पाठः —रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-अंगदो युवराजश्च तारापुत्रः शतक्रतोः । कदनं यस्य पुत्रेण कृतमेकेन रक्षसाम् ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र म-हस्तः । ५. म-चापि । ६. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-राजा ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब श्र-तनुमेकां । फ-तनुर्मायां । ८. ब-सम्मताः ॥ ९. म-बली । १०. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-अश्विनीसुतौ ॥ ११. प्र-वैवस्वताश् । रा$_2$ फ म-वैवस्वताश् । १२. रा$_1$ ल$_1$ ल$_2$ ब श्र-कालान्तकयमोपमाः । रा$_2$ फ म-पंच कालानलो० । १३. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र म-शरभो ऋषभो ॥ १४. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-ज्योतिसुतश् । १५. फ-नास्ति ॥

विश्वकर्म-सुतश् चाऽत्रे नलो नाम महा-कपिः । [३४पू
N] येन सेतुर् महान् बद्धः सागरे वरुणाऽऽलये ॥२७॥ [N
२७उ] दश वानर-कोट्योऽत्र शूराणां युद्ध-काङ्क्षिणाम् ।
श्री-मतां देव-पुत्राणां शेषान् नाऽऽख्यातुम् उत्-सहे ॥२८॥ [२८
२८] पुत्रो दश-रथस्याऽत्र सिंह-संहननो युवा ।
२९पू] दूषणो नि-हतो येन खरश् च त्रि-शिरास् तथा ॥२९॥ [२९
वाली च नि-हतो येन कबन्धश् च महा-बलः । [N
३०पू] वि-राधश् चैव दुर्-धर्षो राक्षसोऽनन्त-विक्रमः ॥३०॥[3]
२९उ] नाऽस्ति रामस्य सदृशो वि-क्रमेण तु कश्-चन । [३०
३०उ] वक्तुं न शक्यो रामस्य वि-क्रमे(?म-)सदृशो भुवि ॥३१॥
जनस्थान-गता येन वन-स्था राक्षसा हताः । [३१
N] एष त्वां सम्-अरे योद्धुम् उद्-यतः सु-महाबलः ॥३२॥ [N
लक्ष्मणश् चाऽपि धर्माऽऽत्मा मातङ्गानाम् इवर्षभः ।
३१] यस्य बाण-पथं प्राऽऽप्य न जीवेद्[11] अपि वासवः ॥३३॥ [३२
राक्षसानां वरिष्ठश् च तत्र[12] भ्राता वि-भीषणः ।
३२] परि-गृह्य पुरीं लङ्कां राघवस्य हिते रतः ॥३४॥[13] [३५
इति सर्वं समा-ख्यातं तवेदं द्विषतां बलम् ।
३३] सु-वेलेऽधि-ष्ठितं[14] शैले शेषे कार्ये भवान् गतिः ॥३५॥ [३६

इत्यार्षे रामायणे युद्ध-काण्डे[15] चार-प्रत्यागमनं[16] नाम

षष्ठः सर्गः ॥६॥

---

१. फ-नास्ति ॥ २. रा$_2$ फ म-शेषं ॥ ३. म-नास्ति ॥ ४. प्र-च । ५. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-विक्रमो ॥ ६. म-ये च । ७. ल$_1$ ल$_2$ ब-वसता । ८. रा$_2$ फ-सैष त्वां···जेतुं । ९. रा$_2$ फ म-सगणो बली ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-चात्र । रा$_2$ फ म-चैव । ११. म-जीवेत्पुरुषो बली ॥ १२. ब-तथा । १३. म-नास्ति ॥ १४. म-०ले राघवः ॥ १५. ब श्र प्र-लकाकाण्डे । रा$_2$-नास्ति । म-लंकापर्वणि । १६. ल$_2$-चारप्रत्यागमं । रा$_2$-चारप्रत्यागमो । फ-चारप्रत्यागमनो । १७. रा$_2$-नास्ति ॥

ततस् तम् अक्षोभ्य-बलं राक्षसाऽधिपतिं[1] चराः ।[2]
N] सु-वेले राघवं शैले नि-विष्टं प्रत्य्-अवेदयन् ॥१॥ [१
चारेभ्यो रावणः श्रुत्वा प्राऽऽप्तं रामं महा-बलम् ।
१] जाताऽऽयासो[3]ऽभवत् किं-चित् सचिवांश् चेदम् अब्रवीत् २ [२
श्री-मन्तो मन्त्रिणोऽभ्य्-आशे ममाऽऽयान्तु समा-हिताः ।
N] आ-सन्नो मन्त्र-कालो[4] हि[5] सम्प्राऽऽप्ता रिपवो मम ॥३॥ [३
तस्य तच् छासनं श्रुत्वा मन्त्रिणोऽभ्या-गता द्रुतम् । [४पू
२] शिरसा तं प्र-णम्याऽथ तस्थुः प्राऽञ्जलयोऽग्र-तः ॥४॥ [N
ततः स मन्त्रयामास सचिवैस् सह रावणः । [४उ
N] मन्त्रयित्वा च दुर्-धर्षः क्षमं यत् सम्-अनन्तरम् ।
४उ] वि-सर्जयित्वा सचिवान् आ-विवेश स्वम् आ-लयम् ॥५॥ [५
ततो राक्षसम् आ-नाय्य विद्युज्-जिह्वं महा-बलम् ।
५] मायाविनं महा-घोरम् अब्रवीद् राक्षसाऽधिपः ॥[6]६॥[6] [६
६उ] मोहयिष्यामहे सीतां मायया जनकाऽऽत्मजाम् । [७उ
माया-मयं राम-शिरो गृहीत्वा राक्षस[7] क्षणात् ।[8]
७] मां त्वं समनु-तिष्ठथा महच् च स-शरं धनुः ॥७॥ [८
९पू] तस्मै[9] तुष्टोऽभवद् राजा प्र-ददाव् अथ भूषणम् ।[10]
८पू] एवम् उक्तस् तथेत्य् आह विद्युज्-जिह्वो निशा-चरैः[11] ॥८॥[12] [९

---

१. रा$_2$ फ-लंकाधिपतये । २. म-नास्ति ॥ ३. प्र रा$_2$ फ-जातत्रासो० ॥ ४. रा$_2$ फ-०कालोऽयं ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-महाघोर प्रविश्याथ न्यवसद् यत्र मैथिली । ६. अतः परमधिकः पाठः—रा$_1$ल$_1$ल$_2$ब अ प्र म-विद्युज्जिह्वं तदानीं स प्राब्रवीद् राक्षसेश्वरः ॥ ७. रा$_2$ फ-राक्षसाऽद्भुतं । ८. म-नास्ति ॥ ९. फ-समुपति० । १०. अतः परमधिकः पाठः—रा$_2$ फ-संप्रहृष्टो विवेशाथ अशोकवनिकां शुभां । ११. रा$_2$ फ-महाबलः । १२. म-नास्ति ॥

ततो दीनाम् अ-दीनाऽङ्गीं ददर्श धनदाऽनुजः । [११पू
१०] [1]चिन्तयन्तीं स्व-[1]भर्तारम् अशोक-वनिकां गताम् ।
उपाऽऽस्यमाना घोराभी राक्षसीभिर् अदूर-तः ॥९॥ [१२
११] उप-सृत्य ततः सीतां [3]प्र-हर्षं नाम पूरयन्[3] ।[2]
इदं च वचनं हृष्ट उवाच जनकाऽऽत्मजाम् । [१६
१२] अधो-मुखीं स्थितां बालाम् उर्द्धं[4]-आसीनां पराङ्-मुखीम् १० [११उ
सान्त्वयमाना मया भद्रे मां[5] मेति प्रति-[5]जल्पसि ।
१५] खर-हन्ता स ते भर्ता राघवः सम्-अरे हतः ॥११॥ [१७
छिन्नं ते सर्व-था मूलं दर्पस् ते नि-हतो मया ।
१६] व्य्-असनेनाऽऽत्मनः सीते [6]मम भार्या भवि[6]ष्यसि ॥१२॥ [१८
N] अल्प-पुण्ये निवृत्ताऽर्थे मूढे पण्डित-मानिनि ।[6]
१८उ] [6]शृणु भर्तुर् वधं सी[6]ते घोरं वृत्र-वधं यथा ॥१३॥ [२०
उपाऽऽगतः समुद्राऽन्ते मां हन्तुं किल राघवः ।
१९] वानरेन्द्र-प्रणीतेन बलेन महता वृतः ॥१४॥ [२१
सन्नि-विष्टः सम्-उद्रस्य तीरम् आ-साद्य दक्षिणम् ।
२०] बलेन महता रामो व्रजत्य् अस्तं दिवा-करे ॥१५॥ [२२
अथाऽ[7]ध्वनि परि-श्रान्तम् अर्ध-रात्रे स्थितं बलम् ।
२१] सुख-सुप्तं समा-साद्य चारितं प्रथमं चरैः ॥१६॥ [२३
तत् प्रहस्त-प्रणीतेन बलेन महता मम ।
२२] बलम् अभ्या-हतं रात्रौ यत्र राजा स राघवः ॥१७॥ [२४
[8]पट्टिशाः परि-[8]घाश् चैव गदा [9]दण्डा महाऽऽ[10]यसाः ।

---

१. प्र रा₂ फ-भर्तारमनुध्यायन्तीं। २. म-नास्ति ॥ ३. रा₂ फ-हृष्टेनांतरात्मना। ४. रा₁ ल₁ ल₂ अ-उपासीनां । रा₂ फ म-उपविष्टां ॥ ५. प्र-मा मामिति प्रज० । रा₂ फ म-यमाश्रित्य प्रज० ॥ ६. म-नास्ति ॥ ७. म-यथाध्वनः ॥ ८. रा₂ फ-०शान् परिघांश् । ९. रा₂ फ-०दण्डान् । १०. रा₂-महाजवान् ॥

२३] बाण-जालानि शूलानि भास्वराः कूट-मुद्गराः ॥१८॥ [२५
N] शक्ती(?)श् च तोमराश् चित्रां(?त्रा)श् चर्माणि मुसुलानि च ।
उद्-यम्योद्-यम्य रक्षोभिर् वानरेषु नि-पातिताः ॥१९॥ [२६
२५] अथ सुप्तस्य रामस्य प्र-हस्तेन प्र-माथिना ।
अ-सकृत् कृत-हस्तेन शिरश् छिन्नं महाऽसिना ॥२०॥ [२७
२६] उत्-पतंस् तोडितः पृष्ठे नि-पतंश् च यद्-ऋच्छया ।
२७पू] दिशं वि-प्र-द्रुतः पूर्वां लक्ष्मणः प्लव-गैः सह ॥२१॥ [२८
सु-ग्रीवो ग्रीवया शान्तो भग्नया प्लवगाऽधिपः ।
२८] निरस्त-हनुर् आ-काशे हनु-मान् राक्षसैर् हतः ॥२२॥ [२९
इन्द्रजानु-सुजानुभ्यां जानुभ्यां पातितो भुवि ।
२९] पट्टिशैर् बहु-धा छिन्नः पतितः पाद-पो यथा ॥२३॥ [३०
मैन्दश् च द्वि-विदश् चोभौ नि-हतौ वानरौ रणे ।
३०] प्र-ध्वंसन्तौ नदन्तौ च रुधिरौघ-परिप्लुतौ ॥२४॥ [३१पू
युधि वि-क्रम्य पुत्रेण मम शक्र-जिता किल ।[11] [N
३१] असिनाऽभ्या-हतश्[12] छिन्नः प्रकीर्ण-सुमहाबलः । [३१उ
वि-चेष्टते[13] च मेदिन्यां पनसः पनसो[14] यथा ॥२५॥ [३२
३२] नाराचैर् बहुभिर् भिन्नः शेते[15] दधि-मुखः पुरा ।
कु-मुदः[16] कुमुदाऽऽकारो नि-कुञ्जः सायकैः कृतः ॥२६॥ [३३
३३] अङ्ग-दो बहुभिर् भिन्नः [18]शूलैः शेषैश् च राक्षसैः ।[17]
पतितो रुधिरोद्गारी मृतो नि-पतितोऽङ्ग-दः ॥२७॥ [३४

---

१. रा$_2$ फ-०रान् कूटमुद्गरान् ॥ २. रा$_2$ फ-चक्राणि । ३. रा$_2$ फ-वानराश्च ॥ ४. ल$_1$ ब रा$_2$-महात्मना ॥ ५. रा$_1$-उत्पतन् खण्डितः । ६. म-च विद्रुतः ॥ ७. प्र-भृतोसौ ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-निहतो । ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-बहुभिश् ॥ १०. रा$_2$ फ-निस्वनन्तौ ॥ ११. म-नास्ति । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-०ना व्याहतश् । फ-०ना निहतश् । म-०ना च हतश् । १३. रा$_2$ फ म-अभितिष्ठति । १४ म-पन्नगो ॥ १५. म-शूरैर् । १६. रा$_2$ फ-कुमुदश्च महातेजा । १७. म-नास्ति ॥ १८. रा$_2$ फ-शूलैरासाद्य । १९. रा$_2$ फ म-क्षितौ ॥

३४] हयैर् अन्यैस्(?न्ये) तथा नागै रथैश् चक्रैस् तथा परे ।
शयाना मृदितास् तत्र [1]कपयः कुलिशैर् [1]अपि ॥२८॥ [३५

३५] प्र-[2]हृताश् [2]चाऽपरे तत्र हन्यमाना जघन्य-तः ।
अनु-प्रपन्ना रक्षोभिः सिंहैर् इव महा-[3]द्विपाः ॥२९॥[4] [३६

३६] सागरे पतिताः केचिद् गगनं केचिद् आ-श्रिताः ।
ऋक्षा वृक्षान् समा-रुह्य वानरैर् व्यति-मिश्रिताः ॥३०॥ [३७

३७] सागरस्य [5]तु तीरेषु सागरोपवनेषु च ।
पिङ्गाऽक्षास् ते विरूपाऽक्षैर् बहुभिर् बहवो हताः ॥३१॥ [३८

३८] एवं तेऽभि-हतो भर्ता स-सैन्यो मम [6]सैनिकैः ।
प्र-[7]म्लानं [7]च रजो-ध्वस्तम् इदं तस्याऽऽहृतं शिरः ॥३२॥ [३९

३९] ततः परम-दुर्धर्षो [9]रावणो राक्षसेश्वरः ।
[8]शृण्वन्त्यास् तत्र [8]वैदेह्या राक्षसीर् इदम् अब्रवीत् ॥३३॥ [४०

४०] राक्षसं घोर-कर्माणं विद्युज्-जिह्वं प्र-वेशय(?थ) ।
तेन तद् राघव-शिरः सं-ग्रामात् स्वयम् आ-हृतम् ॥३४॥ [४१

४१] एवम् उक्तास् तु राक्षस्यो [10]रावणेन दुर्-[10]आत्मना ।[10]
N] निर्-जग्मुस् त्वरिताः शीघ्रं विद्युज्जिह्व-निवेशनम् ॥३५॥[11] [N

४२उ] विद्यु[12]ज्-जिह्वो गृहीत्वाऽथ शिर[12]स् तत् स-शराऽऽसनम् ।[13]
[14]प्र-णामं शिरसा [14]कृत्वा रावणस्याऽग्र-तः स्थितः ॥३६॥ [४२

४३] तम् अब्रवीत् ततो राजा रावणो राक्षसं स्थितम् ।
[15]विद्यु[15]ज्-जिह्वं समा-लोक्य समीपे परि-वर्तिनम् ॥३७॥ [४३

---

१. रा$_2$ फ-प्रचारा गोगणैरिव । म-प्राकारैर्गोगणैरिव ॥ २. रा$_2$ फ-असिभिस्त्वपरे । ३. रा$_1$ ल$_2$-०द्विपः । ४. प्र-नास्ति ॥ ५. ल$_2$ रा$_2$ फ म-च ॥ ६. प्र रा$_2$ फ म-सेनया । ७. रा$_2$ फ म-प्रस्रताक्षं ॥ ८. रा$_2$ फ-शृण्वन्त्यां तत्र वैदेह्यां ॥ ९. अ-नास्ति । १०. रा$_2$ फ म-नास्ति । ११. अ रा$_2$ फ म-नास्ति ॥ १२. रा$_2$ फ-०जिह्वस्ततो गृह्य सशिरस् । १३. अ म-नास्ति । १४. अ-नास्ति ॥ १५. रा$_2$ फ-महाजिह्वं ॥

४४] अग्र-तः कुरु सीतायाः शीघ्रं दाशरथेः शिरः ।
अव-स्थां पश्चिमां भर्तुः कृपणा साधु पश्यतु ॥३८॥ [४४
४५] एवम् उक्तं[1] तु[1] तद् रक्षस् तच् छिरः प्रिय-दर्शनम् ।
पुरो[2] नि-क्षिप्य सीतायाः क्षिप्रम् अन्तर् अधीयत ॥३९॥ [४५
४६] रावणश् चाऽपि चिक्षेप भास्वरं[3] कार्मुकं[3] तदा ।
त्रिषु लोकेषु वि-ख्यातं रामस्यैतद् इति ब्रुवन् ॥४०॥ [४६
तद्[4] रक्षसा तेन[4] शिरः स-कार्मुकं
वि-शीर्यमाणं[5] स-शरं मही-तले ।
नि-वेद्य तस्याः सम्-अरे हतं पतिं
N] ततोऽब्रवीत् तां भव मे वशाऽनुगा ॥४१॥ [४८
स रावणश् चारु-दतीं पति-व्रतां
निर्-ईक्ष्य भर्तुर् व्य्-असने चिकीर्षिताम् ।
उवाच सीतां किम् अवेक्ष्यम् अस्ति ते
४८] भवस्व भार्या मम मत्त-काशिनि ॥४२॥ [N

इत्यार्षे रामायणे युद्ध[6]-काण्डे माया-शिरो-दर्शन नाम सप्तमः सर्गः ॥७॥

[वं-८]= [अष्टमः सर्गः] =[दा-३२]

१पू] सा सीता तच् छिरो दृष्ट्वा तच् च कार्मुकम् उत्-तमम् ।[7] [१पू
२पू] नयने मुख-कर्णं[8] च पत्युस् तत् सदृशं शनैः ॥१॥ [२पू
N] मुखम् इन्दु-प्रभं सौम्यं भर्तुः कमल-लोचनम् । [N

---

१. प्र-उक्तश्च । २. रा₁ ल₁ ल₂ ब श्र प्र-उपनि० ॥ ३. प्र-स शरं भास्वरं ॥ ४. रा₁ ल₁ ल₂ ब श्र-स र० । प्र म-स विद्युज्जिह्वेन । ५. रा₂ फ-विकीर्य० ॥ ६. ब श्र प्र-लंकाकाण्डे । म-लंकापर्वणि ॥ ७. अतः परमधिकः पाठः-रा₁ ल₁ ल₂ ब श्र प्र-सुग्रीवप्रतिसंसर्गमाख्यातं च हनूमता । ८. रा₁ ल₁ ल₂ श्र प्र रा₂ फ म-मुखवर्णं ॥

२उ] केशान् केशाऽन्त-देशं च तं च चूडा-मणिं शुभम् । [२उ
N] सु[1]-श्लिष्टांश् च सु-समांश् चैव पाण्डरान्[2] दशनांस् तथा ॥२॥ [N
एतैः सर्वैर् अभि-ज्ञानैर् अभि-ज्ञाय सु-दुःखिता ।
३] वि-जगर्हाऽथ कैकेयीं क्रोशन्ती कुररी यथा ॥३॥ [३
स-कामा खलु कैकेयी ममाऽऽर्या सा[3] भविष्यति ।
४] कुलम् उत्-सादितं सर्वं यया[4] कलह-शीलया ॥४॥ [४
आर्यायाः किं नु कैकेय्याः कृतं रामेण वि-प्रियम् ।
५] यद् गृहाच् चीरं-संवीतो राघवो[5] विप्र[6]-वासितः ॥५॥ [५पू
एवम् उक्त्वा (?क्त्वा) तु वैदेही वेपमाना तपस्विनी ।
६] जगाम जगतीं बाला छिन्नेव[7] कदली यथा ॥६॥ [६
सा मुहूर्तात् समुत्था(द्-स्था)य प्रति-लभ्य च चेतनाम् ।
७] तच् छिरः समुपाऽऽघ्राय[8] वि-ललापाऽऽयतेक्षणा ॥७॥ [७
हा हताऽस्मि महा-बाहो वीर-व्रतम् अनु-व्रता ।
८] इयं ते पश्चिमाऽवस्था मम हेतोर् उप-स्थिता ॥८॥ [८
९पू] प्रथमं[9] मरणं नार्याः पत्युः[10] पुंग्यम् इति स्मृतम् ।
मयि[11] कस्मात् त्वम् अ-वृत्तायां[11] कालेनाऽसि नि-पातितः ॥९॥ [९
१०] दुःखाद् दुःखं प्र-पन्नाया मानायाः शोक-सागरे । [१०पू
राक्षसैर् वीर सं-सक्तो हतस् त्वं मम कारणात् । [९उ
११] योऽपि माम् उद्-यतस् त्रातुं सोऽपि त्वं[12] किल पातितः १०[१०उ
हा श्वश्रूर् मम कौसल्या[13] त्वया वत्सेन राघव ।

---

१. रा$_{1}$ ल$_{1}$ ब अ-श्रेष्ठांश्च सुरा० । ल$_{2}$-श्रेष्ठांश्चैव समांश् । २. रा$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ म- पांडुरान् ॥ ३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-चं । ४. रा$_{1}$ ल$_{1}$-यथा ॥ ५. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ म-बीरसंभूतो । ६. म-०वोऽयं विवासितः ॥ ७. रा$_{2}$ फ-कृंतेव ॥ ८. रा$_{2}$ फ-समुपादाय ॥ ९. म-प्रमाणं । १०. प्र-नश्चात्पत्युर् । ११. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ-जीवंत्यां मयि कस्मात्त्वं ॥ १२. अ-नास्ति ॥ १३. रा$_{2}$ फ म-कौशल्ये ।

१२] वत्सेनेव विना धेनुर् वि-वशा[1] वत्सला कृता ॥११॥ [११
आ-दिष्टं दीर्घम् आयुस् ते यैर् अचिन्त्य-पराक्रम ।
१३] अनृ-ऋतं वचनं तेषाम् अल्पाऽऽयुर् असि[2] राघव ॥१२॥[3] [१२
अ-दृष्टं मृत्युम् आ-पन्नः कस्मात्[4] त्वं नय-शास्त्र[4]-वित् ।
१४] व्य्-[4]असनानाम् उपाय[4]-ज्ञः कुशलः परि-[5]वर्जने ॥१३॥ [१४
१५पू] अथ-वा [6]वञ्च्यते प्र-ज्ञा प्राज्ञस्याऽपि समन्त[7]-तः ।
१६पू] पचत्य् एव महान् कालो भूतानि प्र-[8]भुर् [8]अ-व्ययः ॥१४॥ [१३
१७उ] [9]उप-शेषे महा-बाहो मां[10] वि-हाय सु-दुःखिताम् ।
१८पू] प्रियाम् इव प्रियां [14]नारीं [11]पृथिवीं पृथिवीऽऽश्वरः ॥१५॥ [१६
१९उ] स[12] तया त्वं [12]परि-ष्वज्य रौद्र्या सु-नृशंसया ।
१७पू] काल-रात्र्या समा-छिद्य नीतः कमल-लोचन ॥१६॥ [१५
क्व गतस् त्वं महा-बाहो मां वि-हाय त[13]पस्विनीम् ।
N] हू (?हृ) ता[14]म् इव रणे भूमिं बलिना पार्थिवर्षभः ॥१७॥ [N
१८उ] सुखोचितं शरीरं ते सु-रूपम् [15]अपि राघव । [N
अर्चितं स[16]र्व-दा यत् तद् गन्ध-माल्याऽनुलेपनैः ।
१९] इदं तव शरीरं तु क्षिप्र-क्षीर्णं मही-तले ॥१८॥ [१७
आर्येण ननु पित्रा त्वम् आर्य प्रा(?आ) यै (? यैश्)च राजभिः।
२०] पुण्य-वद्भिः[17] क्रिया-वद्भिर्[17] नूनं स्वर्गे समा-गतः ॥१९॥ [१८
दिवि नक्षत्र-भूतं च[18] त[19]था क्रतु-कृत-पू[19]र्वम् ।

१. रा२ फ म-विवत्सा ॥ २. प्र-अपि । म-इति । ३. अ-नास्ति ॥ ४. अ-नास्ति । ५. म-परिवर्तने ॥ ६. रा२ फ म-नश्यते । ७. रा२ फ म-सततस्तव । ८. रा२ ब प्र-प्रभवोव्ययः ॥ ९. ल२-उपदेशे । १०. रा२ फ म-शुभां । ११. रा१-पृथिव्यां ॥ १२. फ म-तया त्वं संपरि० । १३. अ-सुदुःखितां । १४. रा१ ल१ ल२ ब अ प्र-प्रियां ॥ १५. रा२ फ-तव । १६. रा२ फ म-सततं ॥ १७. रा१ ल१ ल२ ब अ प्र-०द्भिस् तूर्णं ॥ १८. म-त्वां । १९. प्र-तथा सर्वक्रतुपूर्वम् । रा२ फ म-महाक्रतु० ।

२१] पुण्यं राजर्षि-वंश-स्त्वम् आत्मनः समवेक्षसे ॥२०॥ [१९
कि मां न प्रेक्षसे राजन् किं च मां नाऽभि-भाषसे ।[1]
२२] बालां बालस्य सम्प्राऽऽ[2]प्तां स-[1]वर्णां सह-चारिणीम् ॥२१॥[२०
सं-श्रुतं गृह्णता पाणिं भजिष्यामीऽति यत् त्वया ।
२३] स्म[3]रं तन्[3] मम काकुत्स्थ नय माम् अपि दुःखिताम् ॥२२॥ [२१
कस्मान् मां त्वं वि-हायैको गतो मति-मतां वर ।
२४] अस्माल् लोकात् परं लोकं दुःखिताम् इह [4]धार्मिक ॥२३॥ [२२
चन्दना[5]ऽगुरु-दिग्धं [6]यत् परि-ष्वक्तं पुरा [6]मया ।
२५] क्रव्याऽद्भिस् तच् छरीरं ते नूनं [7]हि परि-कृ[7]ष्यते ॥२४॥ [२३
अग्निष्टोमाऽऽदिभिर् यज्ञैर् इष्टवान् आप्त-दक्षिणैः ।
२६] अग्नि-हो[8]त्रेण सं[9]त्-कारम् अर्हस् त्वं नोप-लप्स्यसे ॥२५॥ [२४
प्र-व्रज्याम् उप-पन्नानां त्रयाणाम् एकम् आ-गतम् ।
२७] [10]परि-प्रक्ष्यति कौसल्या लक्ष्मणं शोक-[11]लालसम् ॥२६॥ [२५
तस्याः सम्परि-पृच्छन्त्या हरणं मम रक्षसा ।
२८] तत्र चाऽऽख्यास्यते वीर सौप्तिके राक्षसैर् वधम् ॥२७॥ [२६
सा त्वां वि[12]नि-हि(?ह)तं श्रु[12]त्वा मां तथा राक्षसैर् हृताम् ।
२९] हृ[13]दयेन वि[13]-दीर्णेन कौस[14]ल्या न भवि[14]ष्यति ॥२८॥ [२७
मम हेतोर् अन्-आर्यायास् त्वं हतः पार्थिवाऽऽत्मज ।[15]
N] राम सागरम् उत्-तीर्य भवान् किं नि-हतो निशि ॥२९॥[16] [२८

---

१. म-नास्ति । २. प्र-संत्रासां ॥ ३. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-संस्मरन् ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-त्यक्त्वा मां मन्दभागिनीं ॥ ५. म-कल्याणरुचिरं । ६. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-ते कस्माद्विपरिवर्तते । ७. प्र रा$_2$ फ म-विपरिकृष्यते ॥ ८. म-०होत्रादि । ९. प्र फ म-संस्कारम् ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-एकं प्रक्ष्यति । ११. म-०लालसा ॥ १२. रा$_2$ फ म-श्रुत्वा हतं पुत्रं । १३. रा$_2$ फ-हृदयेनावदानेन । १४. म-न भविष्यति वत्सला ॥ १५. प्र-नास्ति । १६. रा$_2$ फ म-नास्ति ॥

साधु घातय मां शीघ्रं रामस्योपरि रावण ।
३०] स्व-प्रियस्य प्रियां भार्यां[1] कुरु कल्याणम् उत्-तमम् ॥३०॥ [३१
शिरस्य् अस्मिंश् छिरो धेहि काये कायं नि-वेशय ।
३१] रावणाऽनु-गमिष्यामि गतिं भर्तुर् महाऽऽत्मनः ॥३१॥ [३२
मुहूर्तम् अपि नेच्छामि जीवितुं पाप-जीवितम् । [३३पू
३२] समा-नय त्वं पतिना कुरु कल्याणम् उत्-तमम् ॥३२॥ [N
श्रुतं मया वेद-विदां ब्राह्मणानां पितुर् गृहे ।
३३] यासां स्त्रीणां प्रियो भर्ता तासां लोका[2] महोदयाः॥३३॥ [३३
क्षमा यस्मिन् दया त्यागः सत्यं धर्मः कृतज्ञ-ता ।
३४] अ-हिंसा चैव भूतानां तम् ऋते का गतिर् मम ॥३४॥ [३४
इति सा दुःख-सन्तप्ता वि-ललापाऽऽयतेक्षणा ।
३५] भर्तुः शिरो धनुश् चैव सम्प्रेक्ष्य जनकाऽऽत्मजा ॥३५॥ [३५
एवं वि-लप्यमानायां सीतायां तत्र रावणम् ।
३६] अभि-चक्राम भर्तारं बलाऽध्यक्षः कृताऽञ्जलिः ॥३६॥ [३६
एतस्मिन्न् अन्तरे द्वाः-स्थो रावणाय न्य्-अवेदयत् ।
३७] कार्यम् आत्ययिकं घोरं सं-ज्ञया भ्रान्त-लोचनः[3] ॥३७॥ [N
वि-जयस्वाऽऽर्य-पुत्रेति सोऽभि-भाष्य प्र-णम्य च ।
३८] आ-चचक्षे तदा कृत्यं[4] राक्षसेन्द्राय वि-स्मितः ॥३८॥ [३७
अमात्यः संहितः[5] सर्वैः प्र-हस्तस् त्वाम् उप-स्थितः । [३८पू
३९] किं-चिद् आत्ययिकं कार्यम् आ-चिख्यासुर्[6] इहाऽऽगतः ३९ [३९उ
४०पू] एवम् उक्तस् ततस् तेन[7] रावणो[8] गृहम् अभ्य्-अगात् ।[9] [N

---

१. अ रा₂ फ-सुप्रि० ॥ २. रा₁ ल₁ ल₂ ब प्र रा₂-लोके महोदयः । अ-लोको महोदयः ॥ ३. रा₁ ब म-भ्रान्तचेतनः ॥ ४. रा₁ ल₁ ल₂ ब अ-क्षन्ता ॥ ५. ल₂ म-सहितैः । ६. प्र-त्वाजिज्ञासुर् ॥ ७. रा₂ फ म-तस्माद् । ८. ल₁-०णो गृहमागतः । रा₂ फ म-निर्जगाम महाबलः ॥ ९. प्र-नास्ति । अतः परमधिकः पाठः—रा₂ फ म-स ददर्शाथ प्रहस्तं च ददर्श दूरतः स्थितं । सर्वैः समेत्य रक्षोभिर्मन्त्रिभिः कृतनिश्चयः ॥

सभां प्र-विश्य वि-दधे विदित्वा राम-विक्रमम ॥४०॥ [४१उ
४२] अन्तर्-धानं तु तच् छीर्षं तच् च कार्मुकम् उत्-तमम् ।
जगाम राक्षसे तस्मिन् निष्-क्रान्ते सम्-अनन्तरम् ॥४१॥ [४२
४३] राक्षसेन्द्रस् तु भवनात् [1]स्वयं निष्-क्रम्य [1]सं-त्वरः ।
स मन्त्रयामास तदा मन्त्रं तैर् मन्त्रिभिः सह ॥ [2]४२॥ [४३
४४पू] अति-दूरान् स्थितान् ह्य् अस्य बलाऽध्यक्षान् हितैषिणः ।
४५पू] अब्रवीत् तान् नि-शाम्यैव रावणो राक्षसेश्वरः ॥४३॥ [2] [४४
४४उ] शीघ्रं भेरी-निनादेन [3]स्फुट-कोलाहलेन मे[3] ।
४५उ] समा-[4]नयध्वं सैन्यानि वि-[5]मर्षो न क्षमो हि [5]नः ॥४४॥ [४५
[6]बलाऽधिपास् ते बल-योगम् आत्मनः
ततस् तथेति प्रति-गृह्य तद् वचः ।
[7]समा-हिता भर्तृ-[8]हिताय नैर्ऋता
N] जयाय [9]घोषान् परि-[9]गृह्य धि-ष्ठिताः ॥४५ [४६

इत्यार्षे रामायणे युद्ध-[10]काण्डे सीता [11]सम्मोहनं नामाऽष्टमः सर्गः ॥८॥

[वं-९]= [नवमः सर्गः] =[दा-३३]

तां [12]त्व् [13]एवं मोहितां दृष्ट्वा सरमा नाम राक्षसी ।
१] आ-ससादाऽ[14]र्थं वैदेहीं प्रियां [15]सम्प्रयिनीं सखीम् ॥१॥ [१

---

१. फ-निष्क्रम्य कृतसत्वरः । २. रा$_1$-नास्ति ॥ ३. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र रा$_2$-परं कौतूहलेन च । ४. प्र-०नयित्वा । ५. म-वेगेन महता भृशं ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-बलांघ्रिया । ७. फ-समास्थिता । म-समागता । ८. म-भर्तृवधाय । ९. फ-योधाः परिवार्य । म-योधान् प्रतिगृह्य ॥ १०. ब प्र-लंकाकाण्डे । रा$_2$-नास्ति । म-लंकापर्वणि । ११. प्र रा$_2$ फ-०हनो ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र फ-चैव । १३. रा$_2$ फ म-ज्ञात्वा । १४. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र म-०दाशु । १५. रा$_2$-प्राणसमां ॥

सा हि तत्र च कृता मित्रं सीतया रक्ष्यमाणया ।
२] राक्षसी रावणाऽऽदिष्टा साऽनुक्रोशा दृढ-व्रता ॥२॥ [३
सा ददर्श [२]सखीं सीतां सरमा नष्ट-चेतनाम् ।
३] [३]उपै-विश्योत्थि(दु-स्थि)तां ध्वस्तां बडवाम् इव पांसुभिः ॥३॥ [४
४पू] ताम् उवाच [४]तथा दृष्ट्वा सरमा प्रिय-वादिनी ।[५] [२उ
मा वि-षादं विशालाऽक्षि [६]कुरुष्व जनकाऽऽत्मजे ॥४॥
५] उक्ता यद् रावणेन त्वं [७]प्रत्यु-अयो यस् त्वया कृतः ।
[८]सखि स्नेहेन [९]ते भीरु मया [१०]सर्वं स्वयं श्रुतम् ॥५॥ [६
६] [११]लीनया गहने शून्ये भयम् उत्-सृज्य रावणात् ।
तव हेतोर् विशालाऽक्षि नहि मे जीवितं प्रियम् ॥६॥ [७
८] सं-भ्रान्तश् चोपनिष्-क्रान्तो [१२]यद् इतो राक्षसेश्वरः ।
तच् च मे विदितं सर्वम् उपनिष्-क्रम्य मैथिलि ॥७॥ [८
९] न [१३]शक्यं सौप्तिकं कर्तुं रामस्य विदिताऽऽत्मनः ।
वधश् च पुरुष-व्याघ्रे तस्मिन् नैवोप-पद्यते ॥८॥ [९
१०] [१४]ते च [१५]शूरा हरि-व्याघ्रा वि-क्रान्ताः पादपाऽऽयुधाः ।
पुरा देवेश्वरेणैव रामेण परि-पालिताः ॥९॥ [१०
११] दीर्घ-वृत्त-भुजः श्री-मान् महोरस्कः प्रताप-वान् ।

---

१. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-सा तदा तु ॥ २. प्र म-सतीं । ३. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-उपावृत्योद्धता ॥ ४. रा$_1$ ल$_1$ ल$_2$ प्र-तदा । रा$_2$ फ-ततो । ५. अतः परमधिकः पाठः—रा$_2$ फ-स्नेहवैक्लव्या वाचा सांत्वयित्वा प्रियां सखीं । ६. प्र फ-नास्नि । ७. रा$_2$ म-प्रत्युक्तं यत्त्वया सकृत् । ८. रा$_1$ ल$_1$ ल$_2$ ब श्र-सखीस्ने० । ९. रा$_1$ ल$_1$ ल$_2$ ब श्र-तत्सर्वं । म-यद्भीरु । १०. रा$_1$ ल$_1$ ल$_2$ ब श्र-भीरु प्रतिश्रुत । ११. रा$_1$ ल$_1$ ल$_2$ ब श्र- लीलया । १२. ल$_2$ रा$_2$-यदि ते ॥ १३. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-शक्ताः स्माप्रियं ॥ १४. रा$_2$-वानराः । १५. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-०पा यथा ॥

१२पू] धन्वी संहत-वृत्तोरुर् भर्ता ते भुवि वि-श्रुतः ॥१०॥ [११
N] अ-क्षय्यो रक्षिता नित्यम् आत्मनश् च बलस्य च ।
लक्ष्मणेन सह भ्रात्रा कुशली शास्त्र-तत्त्व-वित् ॥११॥ [१२
१३] हन्ता[2] पर-बलौघानां पौरुषे[3] धन्य-लक्षणः ।
न हतो राघवः सीते श्री-मान् शत्रु-निबर्हणः ॥१२॥ [१३
१४] अ-युक्ता बुद्धि-हीनेन सर्व-भूत-विरोधिना ।
इयं तेन नृ-शंसेन माया[4] मायाविना कृता ॥१३॥ [१४
१५] शोकस् ते वि-हतः[5] सद्यः कल्याणं त्वाम्[6] उप-स्थितम् ।
ध्रुवं ते भजते लक्ष्मीः प्रियं प्रीति-करं शृणु ॥१४॥ [१५
१६] सं-तीर्णः सागरं रामः सह वानर-सेनया ।
सन्नि-विष्टः समुद्रस्य तीरम् आ-साद्य दक्षिणम् ॥१५॥ [१६
१७] सं-हृष्टः परिपूर्णाऽर्थः काकुत्स्थः स[7] महा-बलः ।
सं-हितः[8] सागरोपाऽन्ते[9] राक्षसैर् उप-लक्षितः ॥१६॥ [१७
१८] तैस् तथा[10] प्रेक्षिता गुल्मैर् हरयस्[11] ते प्र-दक्षिणाः[12] ।
प्र-वृत्तिस् तैर् उपाऽऽनीता[13] श्वोऽभि-सारः[14] पुरस्य च ॥१७॥ [१८
१९] एतां[15] श्रुत्वा तु सु-श्रोणि प्र-वृत्तिं राक्षसाऽधिपः ।
एष मन्त्रयते सर्वैः सचिवैः सह रावणः ॥१८॥ [१९
२०] इति ब्रुवाणा सरमा मैथिलीं नष्ट-चेतनाम् ।
सर्वोद्-योगेन योधानां शब्दं[16] शुश्राव दारुणम् ॥१९॥ [२०

---

१. फ-अक्षतो ॥ २. रा₂ फ-भेत्ता च परसैन्यानां । ३. म-पुरुषो ॥ ४. म-मायया परिमोहिता ॥ ५. रा₁ ल₁ ल₂ ब श्र प्र फ म-विहितः । ६. रा₂ फ-त्वां समुपा० ॥ ७. प्र-सहलक्ष्मणः । रा₂ म-सुसमाहितः । ८. रा₁ ल₁ ब श्र प्र-सहितैः । रा₂-प्रहृतैः । ९. रा₂ फ-सागरान्तेषु ॥ १०. रा₂ फ-ततः । ११. रा₂-हरिदूताः । १२. रा₁ ल₁ ल₂ ब श्र प्र-०क्षिणैः । १३. म-ह्युपानीता । १४. रा₁ ल₁ ल₂ ब श्र प्र-सोभिहारपुरस्सरः ॥ १५. रा₁ ल₁ ल₂ श्र प्र-एतत्तु श्रुत्वा ॥ १६. म-सर्वं ॥

२१] ताडितायास् तथा भेर्याः श्रुत्वा प्रति-भयं स्वनम् ।
उवाच सरमा सीताम् इदं [1]मधुरया गिरा[2] ॥२०॥ [२१
२२] [3]सन्नाह-जननी ह्य् एषा भेरी वै भीम-नादिनी[6] ।[4]
एषा नदति गम्भीरं शृणु तोयद-[5]संनिभा ॥२१॥ [२२
२३] [7]कल्यन्ते मत्त-मातङ्गा युज्यन्ते रथ-वाजिनः । [२३पू
तत्र तत्र च सं-नद्धाः सं-पतन्ति[8] पदातयः ॥२२॥
२४] अनीकैः पूर्यते सर्वै राज-मार्गः समन्त-तः ।
वेग-वद्भिर् [9]महा-वेगैर् [10]महौघैर् इव सागरैः ॥२३॥ [२४
२५] शस्त्राणां च प्र-सन्नानां वर्मणां चर्मणां तथा ।
N] रथानां भूषितानां च भूषितानां च[11] रक्षसाम् ॥२४॥ [२५
प्र-भां वि-सृजतां पश्य नाना-वर्ण-समुच्छ्रि[12]ताम् ।
२६] वनं निर्-दहतो घर्मे यथा रूपं विभा-वसोः ॥२५॥ [२६
घण्टानां [13]चण्ड-निर्घोषं रथानां [14]शृणु निः-स्वनम् ।
२७पू] हयानां [15]हेषमाणानां शृणु तूर्य-स्वनं तथा ॥२६॥ [२७
उद्यताऽऽयुध-[16]शस्त्राणां [17]राक्षसेन्द्राऽनुयायिनाम् ।
२८] रक्षसां सं-भ्रमो ह्य् एष तुमुलो लोम-हर्षणः ॥२७॥ [२८
श्रीस् त्वां भजतु शोक-[18]घ्नी रक्षसां भयम् आ-गतम् । [२९
२९] रामात् कमल-पत्राऽक्षि दैत्यानाम् इव वासवात् ॥२८॥

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-नास्ति । २. रा$_1$ ल$_1$ ब अ प्र-मधुरवादिनी । ल$_2$-मधुरवादिनी ॥ ३. रा$_2$ फ-संमोह० । ४. अ-नास्ति । ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-०दनि:स्वनं । ६. म-नास्ति ॥ ७. रा$_2$ ब-काल्यन्ते । ८. प्र-समुद्यन्ति ॥ ९. ब-महाभागैर् । १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-मेघैरिव महार्णवः ॥ ११. प्र-तु ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र म-०समुत्थितां ॥ १३. फ-शृणु निर्घोष । १४. म-चैव । १५. रा$_2$-ह्रेष० ॥ १६. म-०धसत्त्वानां । १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-राममेवानु० ॥ १८. म-शोकघ्ना ॥

अव-जेतुं जित-क्रोधस् तान्[1] अचिन्त्य-पराक्रमः ।
३०] [2]अ-चिराद् विद्धि पूर्वेण[2] लङ्काम् अधि-गमिष्यति ॥२९॥ [३०
वि-क्रमिष्यति रक्षःसु भर्ता ते सह-लक्ष्मणः ।
३१] यथा शत्रुषु वि-क्रान्तो विष्णुना सह वासवः [3]॥३०॥ [३१
आ-गतस्य[4] हि[4] रामस्य क्षिप्रम् अङ्क-गतां[5] सखि[5] ।
३२] अहं द्रक्ष्यामि सिद्धाऽर्थां त्वां शत्रौ विनि-पातिते ॥३१॥ [३२
अश्रूण्य् आनन्द-जानि त्वं वर्तयिष्यसि शोभने ।
३३] समा-गम्याऽचिरेण त्वां नन्दयिष्यति राघवः । [३३
N] अ-वर्षाद् इव शुष्यन्तीं महा-मेघो वसुन्धराम् ॥३२॥ [N
अ-चिरान् मोक्ष्यसे सीते वि-पुलं बन्धनं[6] गता[6] ।
३४] वृत्ताम् एकां वहन्त्य्[7] अद्य[7] वेणीं तेन[8] शुभाऽऽनने ॥३३॥ [३४
३५उ] तस्य दृष्ट्वा मुखं देवि पूर्ण-चन्द्रम् इवोदितम् ।
३६पू] मोक्षसे[9] सहसा शोकं निर्-मोकम् इव पन्न-गी [10]॥३४॥ [३५
३७उ] रावणं सम्-अरे हत्वा न चिराद् इव[11] मैथिलि ।
त्वया सम्-अग्रं प्रियया राघवो लप्स्यते सुखम् ॥३५॥[10] [३६
समा-गता त्वं रामेण शोभिष्यसि[12] वराऽऽनने ।
३८] अवर्ष-शुष्केव पुरा नव-सस्या[13] वसुन्धरा[13] [14]॥३६॥ [३७
गिरि-वरम् अभि-तो वि-वर्तमानो
हय इव मण्डलम् आशु यः करोति ।
त्वम् इह शरणम् अभ्युपै(?पे) हि सीते

---

१. रा₂ फ म-त्वां । २. रा₂ फ-रावणं समरे हन्तुं ॥ ३. अतः परमधिकः पाठः—रा₁ ल₁ ल₂ ब श्र प्र-सुग्रीवसहितः श्रीमान् वानरैश्च महाबलैः ॥ ४. रा₂ फ म-आगतस्येह । ५. ल₁-०गतामपि ॥ ६. रा₂ फ म-जघने गतां । ७. रा₂ फ म-बहून्मासान् । ८. रा₂ फ म-रामः ॥ ९. रा₁ ल₁ ल₂ ब श्र प्र रा₂-मोक्ष्यते । १०. म-नास्ति ॥ ११. रा₁ ल₁ ल₂ ब श्र प्र-देवि ॥ १२. रा₂ प्र-भविष्यसि । १३. रा₂-नवसस्येव मेदिनी । १४. म-नास्ति ॥

३९] दिवस-करं प्रभवो[1]ऽप्ययं प्र-जानाम्[2] ॥३७॥ [३८

इत्यार्षे रामायणे[3] युद्ध[4]-काण्डे सरमा[5]-वाक्यं नाम नवमः सर्गः ॥९॥

[वं-१०]= **[दशमः सर्गः]** =[दा-३४]

अथ तां जात-सन्तापां तेन वाक्येन मोहिताम् ।
१] सरमा ह्लादयाञ्चक्रे पृथिवीं द्यौर् इवाऽम्भसा ॥१॥ [१
ततस् तस्या हितं भूयश्[6] चिकीर्षन्ती सखी व[6]चः ।
२] उवाच काले काल-ज्ञा स्मित-पूर्वाऽभिभाषिणी ॥२॥ [२
उत्-सहेयम् अहं गत्वा त्[7]वद् वाक्यम् असितेक्षणे ।
३] नि-वेद्य सकलं रामे प्रति-च्छन्ना नि-वर्तितुम् ॥३॥ [३
न हि[8] मे क्रममाणाया निरा-लम्बे वि-हायसि ।
४] सम्-अर्थो गतिम् [9]अन्व्-एतुं वायुर् [10]अप्य् अति-शीघ्र[10]गः ॥४॥[11] [४
एवं ब्रुवाणां तां सीता सरमाम् अब्रवीद् वचः ।
५] मधुरं श्लक्ष्णया वाचा पूर्व-शोकाऽवदीर्णया[12] ॥५॥ [५
[13]सम्-अर्था गगनं गन्तुम् अपि वा [14]त्वं रसा-तलम् ।
६] अव-गच्छामि कर्तव्यं [15]कर्तव्यं ते मद् अन्तरे ॥६॥ [६
स्निग्धा त्वम् अनु-रक्ता च भगिनीऽव सहोदरा ।
७] त्वं प्र-सन्ना मम हिता सं-शयो मे न विद्यते ॥७॥[16] [N

---

१. अ-प्रभयाप्ययं । रा$_2$ फ-०वाप्ययं । २. ल$_1$ ल$_2$ अ प्र फ-प्रज्ञानां ॥ ३. फ म- नास्ति । ४. ब अ प्र-लंकाकांडे । फ-लङ्कापर्वणि । ५. ब-सरसावा० ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-वाक्यं चिकीर्षन्ती सखीं तदा ॥ ७. रा$_1$ ल$_1$ ल$_2$ अ प्र-तद् ॥ ८. म-विक्रम० । ९. प्र-अन्वेष्टु । १०. प्र-अभ्येति शी० । फ-०शीघ्रतः । ११. अ-नास्ति ॥ १२. प्र-०वकीर्णया ॥ १३. प्र-सर्वथा । १४. रा$_1$ ल$_1$ ल$_2$ ब प्र-तं । १५. रा$_2$ फ-सर्वं यत् ॥ १६. रा$_2$ फ म-नास्ति ॥

मत्-प्रियं यदि कर्तव्यं यदि मैत्री स्थिरो[1] तव ।
८] [2]त्वत्-तोऽहं ज्ञातुम् इच्छामि किं करोति स रावणः ॥८॥ [७
स हि माया-बलो रौद्रो रावणः सर्व-रावणः ।
९] मां मोहयति दुष्टाऽऽत्मा पीत-मात्रेव वारुणी ॥९॥ [८
सं-तर्जयति मां नित्यं भर्त्सयत्य् अपि चाऽसकृत्[4] ।
१०] राक्षसीभिः सु-घोराभिर् यो मां रक्षति सर्व-शः[5] ॥१०॥ [९
उद्-विग्ना शङ्किता चाऽस्मि न च स्व-स्थं मनो मम ।[6]
११] यद् भयं प्राऽऽप्नवत्य्[7] उच्चैर् अशोक-वनिकां गता[8] ॥११॥
१२उ] एतम्[10] इच्छाम्य् अहं[10] त्वत्-तो वरं सत्य-प्रतिश्रवे ।
१३पू] लघु यद् रावणस्याऽहं सर्वं विद्यां वि-चेष्टितम् ॥१२॥ [N
१४पू] ताम् एवं वादिनीं सीतां सरमा वल्गु-वादिनी[11] ।
उवाच वचनं तस्याः श्रुत्वा सा वाक्य-विक्लवम्[12] ॥१३॥ [१२
१५] एष ते सख्य्[13] अभि-प्रायस्[13] तद् गच्छामि[14] जानकि ।
दृष्ट्वा[15] शत्रोर् अभि-प्रायम् उपाऽऽवर्ताम्य्[16] अहं पुनः[16] ॥१४॥ [१३
१६] एवम् उक्त्वा ततोऽभे(?भ्ये)त्य[17] समीपे[17] तस्य रक्षसः ।
शुश्राव[18] कथितं सर्वं रावणस्य स-मन्त्रिणः ॥१५॥ [१४
१७] सा श्रुत्वा निश्-चयं तस्य तस्मिन् काले दुर्-आत्मनः ।

---

१. रा१ ल१ ल२ ब श्र प्र म-स्थिता । २. रा२ फ- ततोहं ॥ ३. रा१ ल१ल२ ब-नास्ति ॥ ४. रा१-चाकृतं । ५. रा१ ल१ल२ ब श्र प्र म-नित्यशः ॥ ६. म-नास्ति । ७. प्र-च प्राप्नुवती । रा२फ म-मामनुप्राप्तं । ८. प्र रा२ फ म-गतां । ९. अतः परमधिकः पाठः—रा२ फ म-तदीप्सामि कथं तस्य निश्चयो वास्य यो भवेत् । निवेदयेथाः सर्वं मे यतो मे स्यादनुग्रहः । यं यं पश्याम्यहं किंचित्तं तं मन्येय रावणं ॥ १०. रा१ ल१ ल२ ब श्र प्र-तदिच्छामि परं । रा२-एतादिच्छा० ॥ ११. रा२ फ म-वल्गुभाषिणी । १२. रा१ ल१ ल२ ब श्र प्र-वाक्यविक्लवा ॥ १३. रा२ फ म-यद्यभि० । १४. रा१ ल१ ल२ ब श्र प्र-वक्ष्यामि । १५. रा१ ल१ल२ ब श्र प्र-दृष्ट्वा । १६. रा१ल१ल२ ब श्र प्र-०वर्ते पुनः पुनः ॥ १७. रा२ फ म-ततो गत्वा समीपं । १८. रा१ ल१ ल२ ब श्र प्र- श्रुत्वा च ॥

पुनर् अप्य्[1] आ[1]ऽगमत् क्षिप्रम् अशोक-वनिकां शुभाम् ॥१६॥ [१५
१८] सा[2] प्र-विश्य[2] ततस् तत्र समीत्य[3] (?ये) जनकाऽऽत्मजाम् ।
प्रतीऽऽक्षमाणां ताम् एव पद्म-हीनाम् इव श्रियम् ॥१७॥ [१६
१९] तां तु सीता पुनः प्राऽऽप्तां सरमां प्रिय-वादिनीम् ।
२०पू] परि-ष्वज्य च सु-स्निग्धं प्र-ददौ स्वयम् आसनम् ॥१८॥ [१७
इहाँ[4]ऽऽस्यतां सुखं सर्वम् आ-ख्याहि मम तत्त्व-तः ।
२१] क्रूरस्य निश्-चयं तस्य रावणस्य स-मन्त्रिणः ॥१९॥ [१८

को हि नाम महा-भागे मम पुण्य-विपर्यये ।
२२] अनु-रक्षति माम् अन्यस् त्यक्त्वा त्वां पुण्य-भाषिणीम् ॥२०॥[5] [N
सम्-अर्थः सर्व[6]लोके[6] को भद्रो वै शरणाऽर्थिनः ।
२३] त्वं तु निष्-कारणाद् देवि प्रीयसे[7] वर-वर्णिनि ॥२१॥ [N
त्वं तु युक्ताऽभिजानी(?ती)थाः(?या)शुक्ल-वासाश् च नित्य-दा ।
२४] सर्वेषां रक्षसां मध्ये गङ्गेव निर्-अपायिनी ॥२२॥ [N
कश् चि(?चो)द्-गच्छेद् द्रुतं चाऽस्य वचनस्याऽन्तम् आप्नुयात् ।
२५] सर्व-स्निग्धाम् ऋते त्वां तु तस्माद् आ-ख्याहि मा चिरम् २३ [N

एवम् उक्त्वा[8] तु सरमा सीतया तत्त्वम् उत्[9]-तमम् ।
२६] कथितुं सर्वम् आ-रेभे रावणस्य स-मन्त्रिणः ॥२४॥[10] [१९
२७उ] जनन्यां[11] राक्षसेन्द्रोऽसौ[12] मोक्षाऽर्थं तव याचितः ।
अ-विन्ध्येन[13] च वैदेहि मन्त्रि-मुख्येन यत्न[14]-तः ॥२५॥ [२०

१. रा$_2$ फ म-एवाग० ॥ २. रा$_2$ फ म-सम्प्रविष्टा । ३. ल$_1$ ब श्र-समेत्य । प्र-प्राविश्य । रा$_2$ फ म-ददर्श ॥ ४. रा$_2$ फ म-इहासीना ॥ ५. रा$_2$ फ म-नास्ति ॥ ६. ब-भिन्नाः—सकलो लोको । ७. प्र-प्रेयसी ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब-उक्त्वा । ९. ल$_1$-उत्तर । १०. रा$_2$ फ म-उपविष्टा तु सा तत्र विष्टरे स्वर्णभूषिते । वक्तुं विनिश्चय तस्य रावणस्योपचक्रमे ॥ ११. म-राजत्या । १२. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-०न्द्रो वै । फ म-०न्द्रोऽद्य । १३ रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-अवगम्य । १४. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-तत्त्वतः ॥

२८] दीयताम् अभि-सत्कृत्य कोसलेन्द्राय मैथिली ।
नि-दर्शनं ते[1] परमं जन-स्थाने महाऽद्भुतम्[2] ॥२६॥ [२१
२९] लङ्घनं च सम्-उद्रस्य दर्शनं चाऽस्य[3] रूपिणः ।
वधं च रक्षसां युद्धे कः कुर्यान्[4] मानवो भुवि ॥२७॥ [२२
३०] एवं स मन्त्रि-मुख्ये[5](?न) मात्रा च बहु-भाषितः[6] ।
न त्वाम् उत्-सहते त्यक्तुम् अर्थम् अर्थ-परो यथा ॥२८॥ [२३
३१] नोत्-सहेताऽहतो मोक्तुं युद्धे त्वाम् इति मैथिलि ।
साऽमात्यस्य नृ-शंसस्य निश्-चयोऽयं सु-निश्चलः[7] ॥२९॥ [२४
३२] एषा तस्य स्थिरा बुद्धिर् मृत्यु-भावाद् उप-स्थिता ।[8]
न तेन शक्यो[9] त्वं[10] मोक्तुम् अ-निरस्तेन सं-युगे ॥३०॥ [२५
३३] मा चिन्तां कुरु वैदेहि सर्व-था राघवः शरैः । [N
३४पू] नि-हत्य रावणं सीते त्वां प्रियाम् उप-लप्स्यते ॥३१॥ [२६पू
३५पू] एतस्मिन्न् अन्तरे शब्दो भेरी-शङ्ख-समाऽऽकुलः । [२७पू
N] उत्थि(द्-स्थि)तो वानर-बले हर्षेण च समन्व्-ईतः(?तम्)[11] । [N
३५उ] राघवस्याऽऽपतत्[12] सैन्यं कम्पयन् सर्व-राक्षसान् ॥३२॥ [२७उ

श्रुत्वा नू(?च) नं(?तं) वानर-सैन्य-नादं[13]
लङ्का-गता राक्षस-राज-भृत्याः ।
भ्रष्टौजसो दैन्य-परीत-चित्ताः[14]
३६] श्रेयो[15] न पश्यन्ति नृपस्य[16] देवि[17] ॥३३॥ [२८

ततो महा-वात-समीरितेन

१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र- च । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-महद्भयं॥ ३. रा$_2$ फ म-च स्वरूपिण: । ४. ल$_2$-नास्ति ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब प्र रा$_2$ फ म-०मुख्यैश्च । ६. ल$_2$ अ-नास्ति ॥ ७. रा$_2$ फ म-शुचिस्मिते । ८. अ-नास्ति॥ ९. म-शक्यते॥ १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-शान्तां ॥ ११. रा$_2$ फ-समुत्सुके । प्र म-समुत्सुकः। १२. रा$_1$ ल$_1$ ल$_2$ ब अ-राघवस्याग्रतः । प्र-०स्यागतं ॥ १३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-समाकुला राघवबाणभीता । १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-०तचेतसः। १५. रा$_1$ फ-शेषं । १६. रा$_2$ फ-दोषैः । १७. म-नास्ति ॥

घोरेण शब्देन समुच्-छ्रितेन[1] ।
वि-षादम् आऽगात् सकला महा-पुरी
३७] वनौकसां शब्दम् अ-मृष्यमाणा ॥३४॥ [N

इत्यार्षे रामायणे युद्ध[2]-काण्डे सरमा-वाक्यं[3] नाम दशमः सर्गः ॥१०॥

[वं-११]= [एकादशः सर्गः] =[दा-३५]

तेन शङ्ख-विमिश्रेण भेरी-शब्दाऽ[4]नुवादिना । [१.पू

N] राव(?घ)ण(?व)स्याऽऽगमत् सैन्यं नाना-प्रहरणाऽन्वितम्१ ।[5] [N
समा-गतं तु[6] तस्याऽथ राव(?घ)ण(?व)स्य महा-बलम् ।
N] अशोभत तदा सर्वं[7] स्तिमितः सागरो यथा ॥२॥[8] [N
N] सम्-आसीनस् तदा राजा दृष्ट्वा सैन्यम् अव-स्थितम् ।[5] [N

२उ] मुहूर्तं ध्यानम् आ-स्थाय सचिवान् अभ्युद्-ऐक्षत ॥३॥ [२उ
अथ तान् सचिवांस् तत्र सर्वान् आ-भाष्य रावणः ।
३] जगत् सं-नादयन् सर्वम् अब्रवीद् राक्षसेश्वरः ॥४॥ [३
तरणं सागरस्याऽस्य वि-क्रमं बल-संश्रयम् ।
४] यद् उक्त-वन्तो रामस्य भवन्तस् तन् मया श्रुतम् ॥५॥ [४
तीर्णश् च सागरं रामः सेतुना वानरैः सह ।
५] अ-मर्षी स-गणः सोऽयं साऽमात्यो न भविष्यति ॥६॥ [N
निर्-यान्तु राक्षसाः सर्वे निशिता[9]ऽऽयुध-पाणयः ।

---

१. रा₁ ल₁ ल₂ ब श्र म-समन्वितेन । फ म-समुत्थितेन ॥ २. ब श्र प्र-लंकाकाण्डे । म-लंकापर्वणि । ३. म-रावणाभिप्रायो ॥ ४. प्र-भेरीशंखानुनादिना । ५. रा₂ फ म-नास्ति ॥ ६. रा₁ ल₁ ल₂ ब श्र-तदा तस्य । ७. रा₁ ल₁ ल₂ ब श्र-सैन्यं ॥ ८. रा₁ ल₁ ल₂ ब श्र फ-०सगंम ॥ ९ म-विविधायुध० ।

६] नि-घ्नन्तु वानर[1]-बलं तौ चोभौ[2] राम-लक्ष्मणौ ॥७॥ [N
ततः प्राऽऽप्तः[3] सु-हृतैं स्निग्धो माल्य-वान् नाम राक्षसः ।
९] उवाच रावणं मन्त्री वृद्धाऽमात्यो बहु-श्रुतः ॥८॥ [६
विद्याऽविद्या[4]-विनीतो यो राजा राजन्[5] नयाऽनुगः ।
१०] प्र-शास्ति[6] चिरम्[7] ऐश्वर्यम् अरींश् च कुरुते वशे ॥९॥ [७
सं-दधानो हि कालेषु वि-ग्रहं चाऽरिभिः[8] सह ।
११] स्वपक्ष-वचनं कुर्वन् महद् ऐश्वर्यम् अश्नुते ॥१०॥ [८
हीयमानेन पर्य्-एष्यो राज्ञा सन्धिः समेन च ।
१२] न शत्रुर् अव-मन्तव्यो ज्यायान् कुर्वीत वि-ग्रहम् ॥११॥[9] [९
१३पू] तन् मह्यं रोचते सन्धिस् तव रामेण रावणः(?ण) । [१०पू
१४उ] वि-रोधं मां गमंस्[10] तेन सन्धिम् ते तेन रोचताम् ॥१२॥ [N
१३उ] यद्-अर्थम् अभि-युक्तोऽसौ साऽस्मै सीता प्र-दीयताम् ।[11] [१०उ
१४पू] तस्य देवर्षयः सर्वे गन्धर्वाश् च जयैषिणः ॥१३॥ [११पू
असृजद् भग-वान् पक्षौ द्वाव् एव हि पिता-महः ।
१५] सुराणाम् अ-सुराणां च धर्माऽधर्माव् ऋताऽनृतौ ॥१४॥ [१२
धर्मो[12] हि श्रूयते पक्षः सुराणां हि[13] महाऽऽत्मनाम्[13] ।
१६] अ-धर्मो रक्षसां पक्षः सुराणाम् एष निश्-चयः[15] ॥१५॥ [१३
१७उ] धर्मो[16] वै ग्रसतेऽधर्मं तत्र त्रेता प्र-वर्तते । [१४उ
स त्वया चरता लोके धर्मो विनि-कृतः पुरा ।
१८] अ-धर्मः प्र-गृहीतश् च[17] तेनाऽसि तमसाऽऽवृतः ॥१६॥ [१५

---

१. ब-राघवबलं । २. प्र-तावुभौ ॥ ३. रा१ ल२ श्र प्र-पुरः । ल१ ब-पुनः ॥ ४. रा२-विद्यास्वतिवि० । ५. म-राजन० । ६. रा२ फ म-स शास्ति । ७. म-स्थिरं ॥ ८. रा२ फ म-वारिभिः ॥ ९. अतः परमधिकः पाठः—रा१ ल१ ल२ ब श्र प्र-भवतश्चाप्यहं वेद्मि युद्धे सत्य-पराक्रमाव् । युद्धे नाम रिपोस् तन्त्रमित्युक्ता(?क्त)स्ते क्रियान्वितः ॥ १०. रा१ ल१ ल२ ब श्र प्र-अगमंस् ॥ ११. म-नास्ति ॥ १२. रा१ ल१ ल२ ब श्र-धर्मे । १३. ब श्र-एष निश्चयः । १४. फ-नास्ति । १५. श्र फ-नास्ति ॥ १६. फ म-अधर्मो । १७. म-०हीतेन ॥

१९पू] स प्र-सादाद् वि-वृद्धश् च धर्मो राम-व्यपाऽऽश्रयः ।
वि-वर्धयति तत् पक्षं स सुराणां शुभाऽऽवहः ॥१७॥ [१६
२०] विषयेषु प्र-सक्तेन यत्-किंचित्-कारिणा त्वया ।
ऋषीणाम् अग्नि-कल्पानाम् उद्[1]-वेगो जनितो महान् ॥१८॥ [१७
२१] ते सम्प्रति दुरा-धर्षाः प्र-दीप्ता इव पावकाः ।
तपसा भाविताऽऽत्मानो धर्मस्याऽनु-ग्रहे स्थिताः[2] ॥१९॥ [१८
२२] अ-विघ्नेन यजन्ते च यज्ञैः[3] स्वैः-स्वैर्[3] द्वि-जातयः ।
जुह्वत्य् अग्नींश् च विधि-वद् वेदांश् चोच्चैर् अधीयते[4] ॥२०॥ [१९
२३] अभि-भूय च रक्षांसि ब्रह्म-घोषो[5] नि-नोदयन् ।
दिशोऽपि[6] प्रथते सर्वाः स्तनयित्नुर् इवोष्ण[6]-गे ॥२१॥ [२०
२४] ऋषीणाम् अग्नि-शरणेष्व्[7] अग्निहोत्र-समुत्थि(द्-स्थि)तः[7] ।
आ[8]-दत्ते रक्षसां तेजो धर्मौघो[9] व्य्-आप्नुवञ्[10] जगत् ॥२२॥ [२१
२५] तेषु तेषु च देशेषु पुण्येषु सु-दृढव्रतैः ।
क्रियमाणं[11] तपस् तीव्रं सं-तापयति राक्षसान् ॥२३॥ [२२
२६] उत्-पातान् उत्थि(द्-स्थि)तान् दृष्ट्वा सु-घोरान् बहु-धा बहून्[12] ।
वि-नाशम् अनु-पश्यामि सर्वेषां रक्षसाम् अहम् ॥२४॥ [२५
२७] खराऽभिस्तनिता घोरा मेघा भृश[13]-भयंकराः ।
२८पू] शोणितेनाऽभि-वर्षन्ति लङ्काम् उष्णेन सर्व-तः ॥२५॥ [२६
३०पू] चरतां वाहनानां च प्र-पतन्त्य् अश्रु-बिन्दवः ।[14] [२७पू
N] अ-यथावच् च शोभन्ते न सङ्ग्रामाऽभिनन्दिनः ॥२६॥ [N

---

१. रा१-उद्योगो ॥ २. ब प्र रा२ फ म-रताः ॥ ३. रा२-यज्ञैस्तैस्तैर् । ४. म-उदीरयन् ॥ ५. रा१ प्र-०घोषोनुनाद० । ६. रा१ ल१ ल२ ब अ प्र-व्यथितास्सर्वास्तेन जिष्णुरिवोदितः ॥ ७. रा१ ल१ ल२ अ प्र-०शरणे ह्यग्निहोत्रसमन्वितः । ब-०शरणे साग्निहोत्रसमन्वितः । ८. ल२-आधत्ते । ९. रा२ फ म-धूमौघो । १०. रा१ ल१ ल२ ब अ प्र-व्याप्लुवज् ॥ ११. रा२ फ म-चीयमानं ॥ १२. रा२ फ म-उत्पातांश्चोद्गतान् दृष्ट्वा घोरान्बहुविधान् बहून् ॥ १३. रा२ फ म-प्रतिभयं० ॥ १४. रा२ फ म-नास्ति ॥

३०उ] [1]रजो-ध्वस्ता दिशः सर्वा[1] न प्र-भान्ति यथा पुरा । [२७उ
३१पू] [2]सर्वं नष्ट-श्रियं मन्ये सैन्यं[2] ते राक्षसेश्वरं[2] ॥२७॥ [N
३२उ] [2]विष्णुं रामम् अहं मन्ये[2] मानुषं देहम् आ-श्रितम्[3] ।
[4]न च मानुष-मात्रो[4] वै राघवो दृढ-विक्रमः ॥२८॥ [N
३३] येन बद्धः सम्-उद्रेऽस्मिन् [5]स सेतुः सु-महाऽद्भुतः[5] ।
३४पू] कुरुष्व नर-राजेन सन्धिं रामेण रावण ॥२९॥ [N
N] कुरुष्व वचनं मेऽर्थं[6] हितम् उक्तं निशा-चर ।
३४उ] सीता-कृते महा-प्राज्ञ महद् भयम् उप-स्थितम् ॥३०॥ [N
[7]तथेमानि नि-मित्तानि [8]लक्ष्यन्ते राक्षसाऽधिपं[8] । [N
N] चण्डा गोमायवो गृध्रा वाशन्ति च सु-भैरवम् ।
प्र-विश्य लङ्कां समये समवायांश् च कुर्वते ॥३१॥ [२८
३७] काली स्त्री पाण्डुरैर् दन्तैः प्र-हसत्य् अग्र-तः स्थिता ।
स्त्रियः स्वप्नेषु[9] मुह्यन्ति(?न्ती)गृहाणि प्रति-धावति[10] ॥३२॥ [२९
३८] रथ्यासु बालकैर् नित्यं कलहः परि-षज्यते[11] । [N
गृहेषु बलि-कर्माणि प्रेताः [12]पर्युप-भुञ्जते ॥३३॥
३९] खरा गोषु[13] प्र-जायन्ते[13] मूषका [14]न-कुलेषु च । [३०
मार्जारा द्वीपिभिः सार्धं सूकराश् च श्वभिः सह ।
४०] किं-नरा राक्षसांश्[15] चैव समेता मानुषैः सह[16] ॥३४॥ [३१
पाण्डुरा रक्त-पादाश् च विह-गाः काल-चोदिताः ।
४१] राक्षसानां वि-नाशाय कपोता गृह-चारिणः[16] ॥३५॥ [३२

---

१. रा₂ फ म-ध्वजा ध्वस्ता विवर्णाश्च । २. प्र-नास्ति ॥ ३. प्र-आ-स्थितं । ४. रा₂ फ-न स मानु० । म-स त्वमा० ॥ ५ रा₁ ल₁ ल₂ ब श्र प्र-सेतुः स महदद्भुतः ॥ ६. रा₁ ल₁ ल₂ श्र-मह्यं ॥ ७. प्र-तेषां यानि । ८. रा₂ फ म-लक्षये राक्षसेश्वर ॥ ९. प्र-भिन्नाः—मुष्णन्ति ॥ १०. रा₂ फ म-नास्ति ॥ ११. ल₂-परिष्वज्यते । प्र-प्रतिसज्यते । रा₂ फ म-परिकल्प्यते । १२. रा₁ ल₁ ल₂ ब श्र प्र-एवोपभुञ्जते ॥ १३. रा₁ ल₂ श्र-मेषेषु जा० । ल₁ ब प्र-मेषीषु जा० । १४. ल₁ ब प्र-नकुलीषु । १५. प्र-राक्षसैश् । १६. ब-नास्ति ॥

चीची कूँची[1] च वाशन्ति शारिका वेश्मसु स्थिताः । [३३
४२] पेतन्ति[2] व्यथिताश् चैव निर्-गताः[3] कलहैषिणः । [३४पू
N] मूषिकाश् चाऽपि रथ्यासु वि-भ्रब्धं प्र-सरन्ति च॥[4] ३६॥ [N
करालो वि-कटो मुण्डः पुरुषः कृष्ण-पिङ्गलः ।
४३] रक्षो-गृहाणि सर्वाणि कालेः[5] कालेऽन्ववेक्षते[6] ॥३७॥ [३५
अत्य्-उग्रं[7] हि प्र-वाशन्ति[8] द्वि-जा युद्धाऽभिनन्दिनः ।
४५] क्रव्याऽदा भक्षयिष्यन्ति मांसानि गज-वाजिनाम्॥३८॥ [३६
इदं वचस् तस्य[9] नि-वेद्य माल्य-वान्
निर्-ईक्ष्य रक्षोऽधिपतेः स्थितोऽग्र-न्तः ।
अनुत्-तमम् उत्तम-पौरुषो बली
४६] बभूव तूष्णीं समवेक्ष्य रावणम् ॥३९॥ [४१
स तद् वचो माल्य-वता[10] सु-भाषितं
दशाऽऽननो न प्र-शशंस मौर्ख्य-तः[11] ।
भृशं जगर्हैव[12] सुदुष्ट-मानसो[12]
N] मुमूर्षुर् अन्यच् च वचोऽभ्युद्-ईरयन्[13] ॥४०॥[14] [४२

इत्यार्षे रामायणे युद्ध-काण्डे[15] माल्यवद्-वाक्यं[16]
नामैकादशः सर्गः ॥११॥

---

१. रा$_2$ फ-कूचीति । २. रा$_2$-पचन्ति । ३. रा$_2$ फ म-निर्जिताः । ४. रा$_2$ फ म-नास्ति ॥ ५. फ-कानि । ६. रा$_2$-काले त्वन्वे॰ । म-काले ह्यवे॰ ॥ ७. ल$_1$-अभ्यग्रं । ८. रा$_2$ फ म-प्रपश्यन्ति ॥ ९. रा$_2$ फ म-तत्र ॥ १०. म-मान्यतयाभिभाषितं । ११. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-मूर्खवत् । १२. प्र-जगर्हे सुदृढबद्धमानसो । १३. रा$_1$ ल$_2$ श्र प्र-वचोभ्यधासीत् । १४. ल$_1$ ब-नास्ति ॥ १५. ल$_2$ ब प्र-लंकाकांडे । रा$_2$ म-लंकापर्वणि । १६. म-माल्यवद्वचो ॥

ततो माल्य-वतो वाक्यं हितम् उक्तं दशाऽऽननः ।
१] नाऽ[1]मर्षयत दुष्टाऽऽत्मा कालस्य वशम् आ-गतः ॥१॥ [१
स बद्ध्वा [2]भ्रुकुटीं वक्त्रे क्रोधस्य प्रति-लक्षणम् ।
२] अ-मर्षात् परिवृत्ताऽ[3]क्षो माल्य-वन्तम् अथाऽब्रवीत् ॥२॥ [२
हित-बुद्ध्या यद् अप्य् एतत् तत्-पौ[4]रुषम् इहो[5]च्यते ।
३] पर-पक्षं प्र-शस्यैव न तच् छ्रो[6]त्र-सुखं मम ॥३॥ [३
मानुषं कृपणं रामम् एकं शाखामृगाऽऽश्रयम् ।
४] सम्-अर्थं मन्यसे केन त्यक्तं पित्रा वनाऽऽ[7]लयम् ॥४॥ [४
रक्षसाम् ईश्वरं मां च देवतानां भयं-करम् ।
५] अ-हीनं मन्यसे केन हीनं मां [8]जं(?जा)तु विक्रमैः ॥५॥ [५
वीर-[9]द्वेषेण वा सन्धेः पक्ष-पातेन वा रिपोः ।
६] त्वयाऽहं परुषाण्य् उक्तः पर-[10]प्रोत्साहितेन [11]वा ॥६॥ [६
प्र-भवन्तं पद-स्थं हि [12]परुषं कोऽभि-[13]धास्यति ।
७] पण्डितः शास्त्र-तत्त्व-ज्ञो विना प्रोत्साहनाद् रिपोः ॥७॥ [७
आ-दाय च वनात् सीतां पद्म-हीनाम् इव श्रियम् ।
८] किम्-अर्थं प्रति-दास्यामि राघवाय भयाद् अहम्[14] ॥८॥ [८
वृतं वानर-कोटीभिः स-सुग्रीवं स-लक्ष्मणम् ।
९] पश्य कैश्-चिद् अहोभिस् [15]त्वं नि-हतं राघवं मया ॥९॥[16] [९

---

१. प्र-न मर्षयति ॥ २. रा$_2$-भ्रुकुटिं चक्रे । ३. रा$_1$ ल$_1$ ल$_2$ ब अ फ-०त्तास्यो । म-०त्तात्मा ॥ ४. प्र रा$_2$ फ म-परुषं । ५. प्र- तदिष्यते । ६. म-चैव सुखं ॥ ७. रा$_2$-वनाश्रयं ॥ ८. रा$_2$ फ म-सत्त्ववि० ॥ ९. प्र-वीरदोषेण । १०. प्र-यदन्नोत्सा० । ११. रा$_2$-च ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-पुरुषं । १३. ल$_1$ ल$_2$ ब अ प्र-को हि भ्राम्यति ॥ १४. रा$_2$ म-इव ॥ १५. रा$_2$-तं । १६. अ-नास्ति ॥

द्वन्द्वे यस्य न तिष्ठन्ति[1] देवता अपि सं-युगे ।
१०] रावणो मानुषं प्राऽऽप्य भयम् आ-हारयेत् कथम् ॥१०॥ [१०
द्वि-धा भज्येयम्[2] अप्य् एव[2] न नमेयं तु कर्हि-चित्[3] ।
११] एष सह-जो दोषः[4] स्व-भावो दुर्-अतिक्रमः ॥११॥ [११
१२पू] यदि तावत् सम्-उद्रस्य सेतुर् बद्धो यदृ-ऋच्छया ।
N] रामेण वि-स्मयः कोऽत्र यतस् ते भयम् आ-गतम् ॥१२॥ [१२
कामं राम[5] इहोत्-तीर्ण[5](?र्णः) सह वानर-सेनया ।
१३] प्रति-जानामि सत्यं[6] ते न जीवन् प्रति-यास्यति ॥१३॥ [१३
एवं ब्रुवाणं सं-रब्धं[7] क्रुद्धं वि-ज्ञाय रावणम् ।
१४] व्रीडितो माल्य-वांस् तूष्णीं तस्माद् देशाद् अपाऽक्रमत् ।१४। [१४
जयाऽऽशिषा च राजानं वर्धयित्वा वि-मृश्य च ।
१५] माल्य-वान् अभ्यनु-ज्ञातो जगाम स्वं नि-वेशनम् ॥१५॥ [१५
रावणस् तु सहाऽमात्यैर् मन्त्रयित्वा वि-मृश्य[8] च ।
१६] लङ्कायाम् अ-तुलां गुप्तिं कारयामास राक्षसैः[9] ॥१६॥ [१६
प्र-हस्तं चाऽऽदिदेशाऽथ पूर्व-द्वारेऽरि-मर्दनम् ।
१७] दक्षिणे तु[10] महा-वीर्यौ महापार्श्व-महोदरौ ॥१७॥ [१७
पश्चिमे तु तथा[11] द्वारे[11] पुत्रम् इन्द्र-जितं स्वयम् ।
१८] व्या-दिदेश महा-कायं[12] राक्षसैर् बहुभिर् वृतम् ॥१८॥ [१८
उत्-तरेऽपि च स द्वारे व्या-दिश्य शुक-सारणौ ।
१९] स्वयम् अत्र भविष्ये[13]ऽहम् इति तान् मन्त्रिणोऽब्रवीत् ॥१९॥ [१९
राक्षसं तु विरूपाऽक्षं महा-बल-पराक्रमम् ।

---

१. अ-किमर्थं प्रतितिष्ठन्ति ॥ २. रा$_1$ ल$_1$ ल$_2$ अ-भजेद्यमो वा मां । ३. रा$_2$ फ म-कस्यचित् । ४. रा$_1$ ल$_1$ ल$_2$ ब अ-द्वेषः ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-रामं । ६. रा$_2$ फ म-नत्सत्यं ॥ ७ रा$_1$ ल$_2$-सीतार्थं । ल$_1$ ब अ प्र-सेनास्थं । म-नर्जन्तं ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-विसृज्य । ९. रा$_1$ ल$_1$ ल$_2$ ब अ-रावणः ॥ १०. प्र-तौ ॥ ११. रा$_1$ प्र-महाद्वारे । १२. रा$_2$ फ म-महामायं ॥ १३. प्र म-भविष्यामि ॥

२०] मध्ये सं-स्थापयमास बहुभिः सह राक्षसैः ॥२०॥ [२०

एवं वि-धानं लङ्कायां कृत्वा राक्षस-पुङ्गवः ।

२१] मेने कृताऽर्थम् आत्मानं कृताऽन्त-वशम् आ-गतः ॥२१॥ [२१

वि-सर्जयामास ततः स मन्त्रिणो

वि-धानम् आ-ज्ञाप्य पुरस्य पुष्कलम् ।

जयाऽऽशिषा मन्त्रि-जनेन पूजितो

२२] जगाम सोऽन्तः-पुरम् ऋद्धि-मत् तदा ॥२२॥ [२२

इत्यार्षे रामायणे युद्ध-काण्डे लङ्का-विधानं नाम द्वादशः सर्गः ॥१२॥

[वं-१३]= ## [त्रयोदशः सर्गः] =[दा-३७]

नर-वानर-राजौ तु स च वायु-सुतः कपिः ।

१] जाम्ब-वान् ऋक्ष-राजश् च रावणाऽवरजस् तथा ॥१॥ [१

२पू] अङ्ग-दो द्वि-विदो मैन्दो लक्ष्मणो नील एव च ।[7] [२

N] अन्ये च वानर-श्रेष्ठाः शत-शोऽथ सहस्र-शः । [N

अमित्र-विषयं प्राऽऽप्ताः समम् एवाऽभ्य्-अमन्त्रयन् ॥२॥ [३उ

४] इयं सा लक्ष्यते लङ्का पुरी रावण-पालिता ।

५पू] मानुषाऽसुर-गन्धर्वैर् अ-मरैर् अपि दुर्-जया ॥३॥ [४

N] पुर्याम्(?र्या) एवं-विधायां(?यास्) तु मन्त्रयध्वं विनिर्-जये।

५उ] नित्यं संनि-हितो यत्र रावणो रंवयन् प्र-जाः ॥४॥ [५

६उ] तथा तेषु ब्रुवाणेषु रावणाऽवरजोऽब्रवीत् ।

वाक्यं हेत्वर्थ-संयुक्तं पुष्कलाऽर्थं वि-भीषणः ॥५॥ [६

---

१. फ-कृतार्थं मन्यसे च त्वं ॥ २. ल₂ अ-दुष्करं ॥ ३. फ-नास्ति । ४. ल₁ अ प्र-लंकाकाण्डे । म-लंकापर्वणि ॥ ५. रा₁ ल₁ ल₂ ब अ प्र-०राजानौ ॥ ६. रा₁ ल₁ ल₂-वानराः श्रेष्ठाः । ७. रा₂ फ-नास्ति ॥ ८. म-अमरैश्चापि ॥ ९. रा₂-०तो ह्यत्र । म-शापविहितोत्र । १०. फ- रजयन् ॥

८] अनलश् च हरश् चै[1]व सं-पातिः प्र-घसस् तथा ।
९उ] गत्वा लङ्काम् अमात्या मे पुरीं पुनर् इहाऽऽगताः ॥६॥ [७
भूत्वा शकुनयः सर्वे प्र-विष्टास् तां महा-पुरीम् ।
१०] वि-धानं वि-हितं यच् च दृष्ट्वा तत् समुप-स्थिताः ॥७॥ [८
सं-विधानं यद् आहुस् ते रावणस्य दुर्-आत्मनः ।
११] राजंस् तैः[2] कथितं सर्वं यथा-[3]तथ्यं तु तच् छृणु ॥८॥ [९
पूर्वं प्र-हस्तो बल-वान् द्वारम् आ-वृत्य तिष्ठति ।
१२] दक्षिणं तु महा-वीर्यौ महापार्श्व-महोदरौ ॥९॥ [१०
१३पू] इन्द्र-जित् पश्चिमं द्वारं राक्षसैर् बहुभिर् [4]वृतः ।

N] पट्टिशाऽसि-भुशुण्डीभिः शूल-मुद्गर-पाणिभिः ॥१०॥[5] [N
१३उ] नाना-प्रहरणैः शू[6]रैर् आ-स्थितो रावणाऽऽत्मजः । [११उ

१४] उत्-तरं नगर-द्वारं रावणः स्वयम् आ-स्थितः ॥११॥ [१२
विरूपाऽक्षस् तु महता शूल-शक्ति-धनुष्-मता ।
१५] बलेन राक्षसैः सा[7]र्धं मध्यमं गुल्मम् आ-श्रितः ॥१२॥[8] [१३
एताम् एवं-विधां गुप्तिं ले[9]ङ्कायां समुद्-ईक्ष्य ते ।
१६] [10]मामकाः सचिवाः सर्वे शीघ्रं पुनर् इहाऽऽगताः ॥१३॥ [१४
सहस्रं कुञ्जराणां च रथानाम् अ-युतं तथा ।
१७] हयानां चाऽयुतं तत्र साऽग्रा कोटी च रक्षसाम् ॥१४॥ [१५
वि-क्रान्ता लब्ध-ल[11]क्ष्याश् च सं-ग्रामेष्व् अ-निवर्तिनः ।
१८] इष्टा राक्षस-राजस्य नित्यम् एते निशा-चराः ॥१५॥ [१६
एकैकस्य तु युद्धाऽर्थं रा(?र)[12]क्षसां च विशां-पतेः ।
१९] परिवार-सहस्राणां सहस्रम् उप-तिष्ठते ॥१६॥ [१७

---

१. रा$_1$ ल$_1$ ल$_1$ ब श्र प्र-प्रस्रवस् ॥ २. रा$_1$ ल$_1$ ल$_2$ ब श्र म-ते । ३. रा$_2$ फ-०तत्त्वं ॥ ४. म-सह । ५. रा$_1$ ल$_1$ ल$_2$ ब श्र फ-नास्ति ॥ ६. प्र-सर्वैर् । ७. श्र प्र रा$_2$ फ-आस्थितः । ८. म-नास्ति ॥ ९. प्र-लंकायाः । १०. रा$_2$ फ-कामगाः ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र म-०लक्षाश् ॥ १२. रा$_2$ फ म-राक्षसस्य ॥

एतां प्र-वृत्तिं लङ्कायाम् अनु-प्रोच्य[1] वि-भीषणः । [१.८पू
२०] रामं कमल-पत्राऽक्षम् इदं पुनर् उवाच ह ॥१.७॥ [१९पू
कुबेरं तु[2] यदा राजन् रावणः प्रत्य्-अयुध्यत ।
२१] षष्टि[3]-शत-सहस्राणि[3] तदा निर्-यान्ति रक्षसाम् ॥१.८॥ [२०
परा-क्रमेण वीर्येण तेजसा[4] सत्त्व-गौरवात्[4] ।
२२] सदृशानि स्म सर्वाणि रावणस्य दुर्-आत्मनः ॥१.९॥ [२१
अत्रो[5]ऽमर्षो न कर्तव्यो रोषये त्वां[6] न भीषये[6] ।
२३] सम्[7]-अर्थो ह्य् असि वीर्येण[7] सुराणाम्[7] अपि शातने[7] ॥२०॥ [२२
तद् भवान् हरि-वीर्याणां[8] बलेन महताऽऽवृतः ।
२४] सं[9]-क्षोभ्य राक्षसीं[10] सेनां सं[11]-वधिष्यति रावणम्[12] ॥२१॥ [२३
रावणाऽवरजे वाक्यम् एवं ब्रुवति राघवः ।
२५] शत्रूणां प्रति-घाता[13]ऽर्थम् इदं[14] वचनम् अब्रवीत् ॥२२॥ [२४
कपीनाम् उग्र-वीर्याणां सहस्रैर् बहुभिर् वृतः । [२५उ
२६] नीलः प्र-हस्तं पूर्व[15]-गो राक्षसं[16] प्रति धावताम्[17] ॥२३॥ [N
अङ्ग-दो वालिनः पुत्रो बलेन महताऽऽवृतः ।
२७] दक्षिणे बाधतां[18] द्वारि महापार्श्व-महोदरौ ॥२४॥ [२६
हनु-मान् पश्चिमं द्वारं निर्-यातु पवनाऽऽत्मजः[19] ।
२८] इन्द्रजित्-प्रतियुद्धाऽर्थं वृतो वै वानरैः सह ॥२५॥ [२७

---

१. रा₁ ल₁ ल₂ ब प्र-०शोध्य । अ-०शोच्य ॥ २. म-त्व । ३. रा₁ ल₁ ल₂ ब अ-षष्टिः शतसहस्राणां ॥ ४. प्र-नास्ति ॥ ५. रा₂ फ म-अत्र मन्युर् । ६. फ-न विभीषये । ७. ल₁-०णामपि शांतये । ब- तेजसा सत्त्वगौरवात् ॥ ८. रा₂ फ म-०वीराणां । ९. रा₂ फ म-विक्षोभ्य । १०. प्र-महती । ११. रा₂ फ-तं वधि० ॥ १२. ल₁ ब-नास्ति ॥ १३. प्र-इव घा० । रा₂ फ-प्रतिवाधार्थं । १४. रा₂ फ-एवं ॥ १५. रा₁ ल₂ अ प्र-प्रवरं प्लवंगो । १६. रा₁ ल₂ अ प्र- राक्षसं प्रति ॥ १७. रा₂ फ म-धावतां ॥ १८. रा₂ फ म-निपीड्य । १९. रा₂ फ-निविशत्वप्रमेयात्मा कपिभिर्बहुभिः सह । म-नास्ति ॥

दैत्य-दानव-संघानाम् ऋषीणां च महाऽऽत्मनाम् ।
२९] विप्रकार[1]-प्रियः क्षुद्रो वरदान-बलाऽन्वितः ॥२६॥[2] [२८
परा-क्रमति यः सर्वाल् लोकान् सं-तापयन् प्र-जाः ।
३०] तस्य राक्षस-राजस्य रावणस्य वधे वृतः ॥२७॥ [२९
उत्-तरं नगर-द्वारम् अहं सौमित्रिणा सह ।
३१] नि-पीड्योप-निवे[3]क्ष्यामि स-बलो यत्र रावणः ॥२८॥[4] [३०
वानरेन्द्रस् तु बल-वान् ऋक्ष-राजस् तु जाम्ब-वान् ।
३२] राक्षसेन्द्राऽनुजश् चैव गुल्मे भवतु मध्यमे ॥२९॥ [३१
न चैव मानुषं रूपं कपिभिः कार्यम् आ-हवे ।
३३] [दृष्ट्वा न[5]श्येत वै[6] संज्ञा युद्धे वा मानुषे बले । ?] [३२
वानरो ह्य् एव नश् चिह्नं स्व-जनेऽस्मिन् भविष्यति ॥[7]३०॥ [३३
३४] वयं तु भवतां म[8]ध्ये सप्त योत्स्यामहे नराः ।
अहं चैव सह भ्रात्रा लक्ष्मणेनाऽमितौजसा ।
३५] आ[9]त्मनः पञ्चमश् चाऽयं[10] सखा मम वि-भीषणः ॥३१॥ [३४
सर्वकार्य-प्रसिद्ध्यर्थम् एवम् उक्त्वा वि-भीषणम् ।
३६] सुवेलाऽऽरोहणे बुद्धिं चकार ल[11]घु-विक्रमः ॥३२॥ [३५
त[12]तः स रामो महता बलेन
प्र-च्छाद्य सर्वां पृथिवीं महाऽऽत्मा ।
प्रहृष्ट-रूपोऽभि-जगाम लङ्कां

---

१. रा$_1$ ल$_1$ ब श्र प्र-विप्रकारी च यः । २. ल$_2$-नास्ति ॥ ३. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-०वेश्यामि । ४. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-तान्पुरद्वाःस्थिताञ्शक्तः समर्थः परिरक्षितुं । रामेणाधिष्ठितं चैतद्वरुणेनेव सागरं ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-नश्यति । ६. रा$_2$ म-पुरुषं संज्ञेयं वानरे । फ-पुरुषः संज्ञेय वानरे । ७. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र म-नास्ति ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-भवंतो मध्ये च । ९. प्र रा$_2$ फ-आत्मना। १०. प्र-पंचमोयं मे ॥ ११. प्र रा$_2$ फ म-मतिमांस्तदा ॥ १२. म-तेन ।

N] वि-भीषणं चार-विधौ नि-योज्य ॥३३॥[1] [३६

इत्यार्षे[2] रामायणे युद्ध-काण्डे[3] विभाग[4]-चिन्ता नाम त्रयोदशः सर्गः ॥१३॥

[वं-१४]= **[चतुर्दशः सर्गः]** =[दा-३८]

स तु कृत्वा सु-वेलस्य बुद्धिम् आ-रोहणं प्रति ।
१] लक्ष्मणाऽनुगतो[5] रामः सु-ग्रीवम् इदम् अब्रवीत् ॥१॥ [१
वि-भीषणं च धर्म-ज्ञम् अनु-रक्तं निशा-चरम् ।
२] मन्त्र-ज्ञं च कृत-ज्ञं च मधुरं श्लक्ष्णया गिरा ॥२॥ [२
सु-वेलं साधु शैलेन्द्रम् आशु[6] सानु-शतैश्[7] चितम् ।
३] अधि-रोहामहे सर्वे वत्स्यामोऽत्र निशाम् इमाम् ॥३॥ [३
लङ्काम् आ-लोकयिष्यामो नि-लयं रावणस्य च ।
४] येनात्म[8]-जीविताऽन्ताय हृता भार्या यशस्विनी ॥४॥ [४
येन धर्मो न वि-ज्ञातो न कुलं कुल-शालिना ।
६] राक्षस्या[9] नीचया बुद्ध्या येनैतद् गर्हितं कृतम् ॥५॥ [५
तस्माद् वि-वर्धते रोषः स्मृत्वैतं[10] पाप-राक्षसम् ।
७] यस्याऽप-चारान्[11] नीचस्य सर्वान् धक्ष्यामि[12] राक्षसान् । [६
बाणैर् वज्राऽशनि-प्रख्यैर् अ-सुरान् इव वासवः ॥६॥ [N
८] एकश्[13] च कुरुते पापं काल[14]-पाश-वशं गतः ।
नीचैस्[15] तस्याऽप-चारेण कुलं येन वि-नश्यति ॥७॥ [७
९] एवं सं-मन्त्र्य काकुत्स्थः सं-क्रुद्धो रावणं प्रति ।

---

१. ल₂-नास्ति ॥ २. फ म-नास्ति । ३. ब अ प्र-लंकाकांडे । म-लंकापर्वणि । ४. रा₂ फ-सैन्यप्रभागो । म-सैन्यविभागो ॥ ५. रा₂ फ म-०नुमतो ॥ ६. रा₂ फ म-इमं । ७. रा₂-सानुशतान्वितं । फ-सानुशतोच्छ्रितं ॥ ८. रा₂ फ म-येन मे जीवि० ॥ ९. प्र-रक्षसा ॥ १०. रा₁ ल₁ ल₂ अ-श्रुत्वैतं । ११. रा₂ म-०पराधान् । १२. रा₁ ल₁ ल₂ अ प्र-हन्यामि ॥ १३. रा₁ ल₁ ल₂ ब अ प्र-को हि तत्कुरुते । १४. रा₁, ल₁ ल₂ अ प्र-कालस्य वशमात्मनः । ब-कालस्य वशमागतः । म-कलहस्य वशं गतः । १५. रा₁ ल₁ ल₂ ब अ प्र-नीचस्यात्माप० ॥

शीघ्रं[1] सु-वेलम् आऽरोहद् वासाऽर्थं चित्र-काननम् ॥८॥ [८
१०] पृष्ठ-तो लक्ष्मणश्[2] चैनम्[2] अन्व्-अगच्छत् समा-हितः ।
स-शरं धनुर् उद्-यम्य सु-महद् वि-क्रमोपमम् ॥९॥
११] अन्वाऽरोहच् च सु-ग्रीवः साऽमात्यः स-विभीषणः । [९
हनु-मान् अङ्ग-दो नीलो मैन्दो द्वि-विद एव च ॥१०॥
१२] गजो गवाऽक्षो गवयः शरभो गन्ध-मादनः । [१०
१३पू] पैनसः[3] कु-मुदश् चैव पृथुश् च हरि-यूथपः ॥११॥ [११पू
१४उ] एते चाऽन्ये च बहवो वानराः शीघ्र-गामिनः[5] । [१२उ
अन्वाऽरोहन्[6] बलोदग्राश्[7] चालयन्तो[7] महा-शिलाः ॥१२॥ [N
१५] ततः सु-वेलम् आ-रुह्य रामस् तैर् वानरैः सह ।
नि-षसाद गिरेस् तस्य शृङ्गे सम-शिला-तले[8] ॥१३॥ [१४
१६] ततः कपि-गणाः सर्वे समा-वृत्य त्रि-योजनम् ।
आ-रोहन्ति सु[9]-वेलं तु प्लवन्तो[10] दक्षिणा-मुखाः ॥१४॥ [१५
१७] ते वायु-वेगाः प्लव-गास् तं गिरिं गिरि-चारिणः ।
अभ्याऽरोहन्त श-तशः सु-वेलं यत्र राघवः ॥१५॥ [१३
१८] ते त्व् अ-दीर्घेण कालेन गिरिम् आ-रुह्य सर्व-तः[11] ।
ददृशुः शिखरात्[12] तस्माद् वि-भक्ताम् इव खे पुरीम् ॥१६॥ [१६
१९] तां सु-वप्रां वरै[13]-द्वारां प्राकार-वर-शोभिताम् ।
२०उ] लङ्कां राक्षसैः पूर्णां ददृशुर् हरि-यूथपाः ॥१७॥ [१७
प्राकार-वलभी[14]-संस्थैस् तमो-नीलैर् निशा-चरैः ।
२२] ददृशुस् ते हरि-श्रेष्ठाः प्राकारम् अपरं[15] कृतम् ॥१८॥ [१८

---

१. रा$_2$ फ-रामः ॥ २. रा$_2$ फ म-लक्ष्मणस्त्वेनं ॥ ३. रा$_2$-पवनः । ४. प्र-नास्ति ॥ ५. रा$_2$ फ-शीघ्रविक्रमाः । ६. रा$_2$-अध्यारोहन् । ७. रा$_2$ फ म-इवोदग्राः शातयन्तो ॥ ८. रा$_2$ फ-०तटे ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-सुवेलस्य । १०. म-पतन्तो ॥ ११. फ-सर्वशः । १२. रा$_1$ ल$_1$ ल$_2$ ब-विवरात् ॥ १३. प्र-नवद्वारां ॥ १४. रा$_2$ फ म-प्राकारधरणीसं० । १५. रा$_1$ ल$_1$ ल$_2$ ब-परमं ॥

ते दृष्ट्वा वानराः सर्वे राक्षसान् युद्ध-काङ्क्षिणः ।
२३] ससृजुर् वि-पुलान् नादांस् तत्र रामस्य पश्यतः ॥१९॥ [१९
ततोऽस्तम् अगमत् सूर्यः सन्ध्यया प्रति-रंञ्जितः[1] ।
२४] पूर्ण-चन्द्र-प्रदीपा[2] च[2] क्षपा[3] समभि(?भ्य) वर्तत[4] ॥२०॥ [२०
स-चन्द्र-ग्रह-नक्षत्रं नभोऽदृश्यत सागरे ।
२५] द्वितीयम् इव चाऽऽकाशं स-चन्द्र-ग्रह-तारकम् ॥२१॥ [N
ततः स रामो हरि-वाहिनी-पतिर्
वि-भीषणश् चर्क्ष-पतिश् च जाम्ब-वान् ।
स-लक्ष्मणो यूथपै[5]-यूथ-संवृतः
N] सुवेल-पृष्ठे न्य्-अवसन्[6] यथा-सुखम् ॥२२॥ [२१

ततः सु-वेलस्य गिरेश् च वासं(?से)
शृङ्गे च तस्थौ स हित(?तैः) समेतः ।
सं-भ्राजयन् वै रजनी-मुखे(?खं) तं
N] प्र-भाभिर् ईड्याभिर् अतीऽव भाति ॥२३॥[7] [N
ततः प्र-भाते सचिवांस् तु राघवः
प्र-याणम् आ-ज्ञापयतेत्य् अभाषत ।
प्रवीऽऽक्षमाणस् त्व् अथ दक्षिणा-मुखस्
N] ततश् च लङ्कां ददृशे महा-पुरीम् ॥२४॥[8] N

इत्यार्षे[9] रामायणे युद्ध-काण्डे सु-वेलाऽऽरोहणं नाम चतुर्दशः सर्गः ॥१४॥

[वं – १५]= [पञ्चदशः सर्गः] =[दा – ३९]

ते रात्रिम् उषिताः[10] सर्वे सु-वेले हरि-यूथपाः ।
१] लङ्काया ददृशुर् दूराद् वनान्य् उप-वनानि च ॥१॥ [१

---

१. म-प्रतिरक्षितः । २. प्र-०प्रदीपेव । रा$_2$-०प्रतीपा च । ३. रा$_1$-क्षमा । ४. ल$_2$-०वर्तते । म-०वर्त्ततां ॥ ५. म-यूथपतिस्तु सं० । ६. रा$_1$ ल$_1$ ल$_2$ ब-न्यवसद् । प्र-त्ववसद् ॥ ७. रा$_2$ फ म-नास्ति ॥ ८. फ म-नास्ति । ९. अ प्र-लंकाकांडे । म-लंकापर्वणि ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-रात्रिसुखिताः ॥

सम-[1]भौमानि रम्याणि विशाला[2]ऽऽयतनानि च ।
२] दृष्टि-रम्याणि ते दृष्ट्वा बभूवुर् जात-विस्मयाः ॥२॥ [२
चम्पकाऽशोक-[3]वकुल-साल-ताल-वनाऽऽयुता ।
३] तमाल-वन-संच्छन्ना रक्त[4]मालक-संवृता ॥३॥ [३
हिन्ता[5]लैर् अर्जुनैः सर्जैः(?र्ज्जैः)सप्त-पर्णैश् च पुष्पितैः ।
४] तिलकैः कर्णिकारैश् च तथा पाटलिभिर् [6]द्रुमैः ॥४॥ [४
५पू] शुशुभे पर्वताऽग्रैश् च लता-परिकरैर् [7]घनैः ।
६पू] लङ्का-काननजैः [8]पुष्पैर् यथेन्द्रस्याऽमरावती ॥५॥ [५
५उ] विचित्र-कुसुमोपेतै रक्त-कोमल-पल्लवैः ।
६उ] शाद्-वलानि च नीलानि चित्रा[9]श् च वन-राजयः ॥६॥ [६
७उ] जालकं मञ्जरी-पुष्पं फलं किसलयानि च ।
[10]धारयन्ति [11]नगास् तत्र नरा इव वि-भूषणम् ॥७॥ [७
८] तच् चैत्र-रथ-संकाशं मनो-ज्ञं नन्दनोपमम् ।
वनं सर्व-[12]मृगं रम्यं शुशुभे षट्-पदाऽऽकुलम् ॥८॥ [८
९] [13]दात्यूहकैः पक्षि-[13]गणैर् नृत्यमानैश् च [14]बर्हिभिः ।
तथा पर-भृतैश् चैव शुशुभे तद् वनं महत् ॥९॥ [९
१०] तानि [15]मत्त-विहंगानि भ्रमराऽऽचरितानि च ।
कोकिला-कुल-षण्डानि विहंगाऽभि[16]रुतानि च ॥ [17]१०॥ [१०
११] भृङ्ग-राजाऽभिलीनानि कुररी-सेवितानि च ।[18]
काकोलूक-विघुष्टानि सारसाऽभिरुतानि च । [११

---

१. रा₁ ल₁ ल₂ ब अ प्र-समसौम्यानि । २. रा₂ फ म-०लान्यायतानि ॥ ३. रा₂ म-०कबहुलां शाल'''युतां । ४. प्र-०मालाभिसंयुतां ॥ ५. रा₂- हरिताlैर् ॥ ६. रा₂ फ-द्रुमैः । ७. म-नास्ति । ८. रा₂ फ म-फुल्लैर् ॥ ९. म-विचित्रा ॥ १०. रा₁ ल₁ ल₂ ब अ प्र-धारयंत्यङ्गनास् ॥ ११. प्र-तैश् । १२ रा₂ फ-सर्वर्तुगं ॥ १३. रा₁ ल₁ ल₂ ब अ प्र-दात्यूहकोयष्टिरुतैर् । १४. म-बर्हिणैः ॥ १५. अ प्र-तन्निमित्तवि० । १६. रा₁ ल₁ ल₂ प्र-०भिमतानि ॥ १७. ब-नास्ति ॥ १८. ब अ-नास्ति ।

१२] विविशुस् ते ततस् तानि हरयः[1] काम-रूपिणः[1] ॥१.११॥ [१२पू
१३] तेषां नि-वसतां तत्र वानराणां तरस्विनाम्[2] ।
पुष्प-संसर्ग-सुरभिर् ववौ प्राण[3]-सुखोऽनिलः ॥१.१२॥ [१.३
१४] तेषां नि-वेशस् तत्राऽऽसीत् प्रवि-भागैर् अनेक-शः । [N
अकम्पयंस् ते लङ्कां वै स्वैर् नादैर्[4] नदतां वराः ॥१.१३॥
१५] सर्वद्दिश् च महा-यूथैर्[5] मही चरण-पीडिता । [१.५उ
उत्-पपात रजश् चोर्ध्वं कपोताऽङ्गरुहोपमम्[6] ॥१.१४॥ [१.६
१६] अन्ये तु हरि-यूथानां[7] वि-क्रान्ता हरि-यूथपाः ।
सु-ग्रीवेणाऽभ्यनु-ज्ञाता लङ्कां जग्मुः पताकिनीम् ॥१.१५॥ [१.४
१७] वि-त्रासयन्तो वि-हगांस् त्रासयन्तो मृगांस्[8] तथा । [१.५पू
आ-स्फोटयन्तो खेलन्तः[9] सर्वे रण-समुत्सुकाः ।
१८] कम्पयन्तश् च लङ्काया वनान्य् उप-वनानि च ॥१.१६॥ [N
ऋक्षाः सिहा वराहाश् च महिषा भ्रमरा गिराः(?मृगाः) ।[10]
१९] तेषां शब्देन वि-त्रस्ता जग्मुर्[11] भीता[11] दिशो दश ॥१.१७॥ [१७
शिखरस् तु त्रि-कूटस्य प्रांऽशुर् एको नभः स्पृशन् ।
२०] समन्ताद्[12] द्रुम-संच्छन्नो महा-जलद[13]-सन्निभः ॥१.१८॥[15] [१८
श्वेतश् चोर्ध्वं च वि-स्तीर्णो विमलो[14]ऽऽदित्य-सन्निभः ।
२१] श्लक्ष्णः श्री-मान् महांश् चैव दुष्पाऽऽपः शकुनैर् अपि ॥१.१९॥
मनसाऽपि दुरा[16]-रोहः स शैलः किमु कर्मणा । [१९
२२] नि-विष्टा यस्य शिखरे लङ्का रावण-पालिता ॥२०॥ [२०पू
सा पुरी गो-पुरैश् चित्रैर् विविधैः[17]ऽऽकार-तोरणैः ।

---

१. रा₂ फ म-वनान्युपवनानि च ॥ २. प्र रा₂ फ-महौजसां । ३. फ-घ्राणसु० ॥ ४. रा₂फ म-नादैस्तैर् ॥ ५. रा₂ फ म-तथा यूथैर् । ६. प्र रा₂ फ म-कपोतारुणसन्निभं ॥ ७. प्र रा₂ फ म-हरिवीराणां ॥ ८. रा₂ म-मृगद्विपान् । फ-मृगद्विजान् । ९. रा₂-वल्गंतः । १०. रा₁ ल₁ ल₂ ब श्र प्र-नास्ति । ११. रा₁ ल₁ ल₂ ब श्र प्र-जग्मुस्तेपि ॥ १२ रा₂-राजतद्रुम० । १३. रा₂ फ-०महारजतसं० ॥ १४. म-०लादर्शस० ॥ १५. प्र-नास्ति ॥ १६. प्र-न चारोहः । १७. म-प्राकारैस्तोरणैरपि ।

२३] काञ्चनेन च जालेन राजतेन च शोभते ॥[1]२१॥ [२१

प्रासादैश् च वि-मानैश् च लङ्का परम-शोभिता ।

२४] घनैर् इव तपाऽपाये मध्यमं वैष्णवं पदम् ॥२२॥ [२२

यस्यां स्तम्भ-सहस्रेण प्रासादः सर्व-[2]काञ्चनः ।

२५] कैलास-शिखराऽऽकारो दृश्यते खम् इवोल्[3]-लि[3]खन् ॥२३॥ [२३

चैत्यैः[4] स राक्षसेन्द्रस्य रावणस्य दुर्-आत्मनः ।

२६] शतेन रक्षसां नित्यं यैः[5] सम्-अग्रेण र[5]क्ष्यते ॥२४॥ [२४

तां सम्-ऋद्धां [6]समृद्धाऽर्थो लक्ष्मी-वांल् लक्ष्मणाऽग्रजः ।

२८] रावणस्य पुरीं रामो ददर्श सह वानरैः ॥२५॥ [२७

तां रत्न-पूर्णां बहु-संविधानां ।

प्रासाद-मालाभिर् अलङ्कृतां च ।

पुरीं महा-यन्त्र-कपाटैः[7]-युक्तां

N] ददर्श रामः [8]सह [8]लक्ष्मणेन ॥२६॥ [२९

इत्यार्षे रामायणे युद्ध-[9]काण्डे लङ्का-[10]दर्शनं नाम पञ्चदशः सर्गः ॥१५॥

[वं-१६]= [षोडशः सर्गः] =[दा-४१]

अथ तत्र नि-मित्तानि [11]दृष्ट्वा लक्ष्मण-पूर्व[11]जः ।

१] [11]लक्ष्मणं सम्परि-ष्वज्य [12]ततो वचनम् [12]अब्रवीत् ॥१॥ [१

[परि-[13]प्रोक्षोदकं तूर्णं वनानि फलवन्ति च ।

२] [14]बलं च[14] प्रवि-भ[15]ज्येदं व्यू[15]-[16]ऊहे तिष्ठाम लक्ष्मण ॥२॥] [१०

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ-नास्ति॥ २. रा$_2$ फ-समलंकृतः । ३. फ-दृहोल्लि० । ४. रा$_1$ अ-दैत्यः ॥ ५. म-स यत्नेन च र० ॥ ६. रा$_1$ ल$_2$ ब अ प्र-०द्धार्थो ॥ ७. म-०कपाटगुल्मां । ८. रा$_2$फ म-सहितो बलेन ॥ ९. रा$_1$-सुन्दरकाण्डे । ब अ प्र रा$_2$-लंकाकाण्डे । म-नास्ति । १०. रा$_2$फ-लंकादर्शनो ॥ ११. प्र-नास्ति । १२. रा$_2$ फ ब-वचोवददतन्द्रितः ॥ १३ रा$_2$ फ-प्रविप्रा० । १४. ल$_2$-फलं च । ब-बलानि । १५. रा$_1$ ल$_1$ ल$_2$ ब अ-प्रविसृज्येदं । १६ रा$_2$-ब्रूहि ॥

लोक-क्षय-करं भीमं भयं पश्याम्य् उप-स्थितम् ।
३] नि-बर्हणं सु-वीराणां मृधे पश्यामि [1]रक्षसाम् ॥३॥ [११
वाता हि परुषा वान्ति कम्पते च वसुं-धरा ।
४] पर्वताऽग्राणि वेपन्ते नदन्ति धरणी-धराः ॥४॥ [१२
५पू] मेघाः क्रव्याद्-प्रतीकाशाः परुषाः परुष-स्वनाः ।
[2]क्रूरा वारि प्र-वर्षन्ति मिश्रं रुधिर-बिन्दुभिः ॥५॥ [१३
६] रक्त-चन्दन-सङ्काशाः [3]सन्ध्या-परम-दारुणाः ।[2]
ज्वलन्त्यो नि-पतन्त्य् [4]एव महोल्काः सूर्य-मण्डलात् ।[5] [N
N] आदित्य-पथम् आ-[6]वृत्य [7]जनयन्त्यो महद् भयम् ॥६॥
७उ] दीना दीन-[8]स्वना घोरास् [9]त्व् अ-प्रशस्ता मृग-द्विजाः ।[10] [१५
रजन्याम् अ-[11]प्रशस्तश् [12]च सं-तापयति चन्द्रमाः ।
८] [2]क्षिप्र-रक्तांऽशु-पर्यन्तो यथा लोकस्य सं-क्षये ॥७॥
ह्रस्वो रूक्षोऽप्रशस्तस्[13] [13]तु परि-वेषश्[14] च लोहितः । [१६
९] आदित्य-मण्डले [15]नीलः पश्य लक्ष्मण दृश्यते ॥८॥
चन्द्रमा न यथा-वच् च *नक्ष-त्राण्य् अभि-पद्यते ।[16]
१०] युगाऽन्त इव लोकानां पश्य लक्ष्मण दृश्यते ॥९॥ [१७
[17]कङ्काः श्येनास् तथा गृध्रा नीचैः परि-[18]चरन्ति [19]च ।

---

१. रा$_{2}$ फ म-प्रवीराणां मृधे वानरर० ॥ २. फ म-नास्ति ॥ ३. रा$_{2}$-मेघाः पर० । ४. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ-एषु । ५. अतः परमधिकः पाठः—रा$_{1}$ ल$_{1}$ल$_{2}$ ब अ रा$_{2}$ फ-ज्वलश्च निपतत्येतदादित्यादग्निमंडलं । म-नास्ति । ६. म-आविश्य । ७. रा$_{1}$ ल$_{1}$ल$_{2}$ ब अ प्र म-०यन्तो ॥ ८. प्र रा$_{2}$ फ म-०स्वरा । ९. म-नास्ति । १०. अतः परमधिकः पाठः—म-सैंहिकेयेन च तथा गृहीतौ चन्द्रभास्करौ । अपर्वणि त्रयोदश्यां सपरिवेषमण्डलौ ॥ वक्रमंगारकश्चक्रे विशाखासु सुभैरवं । अशरीरास्तथा वाचो श्रूयन्ते ह्यशुभावहाः । उभे सन्ध्ये च वाशंते क्रव्यादाश्च सुदारुणाः । ११. रा$_{1}$ल$_{1}$ल$_{2}$ ब-अप्रमत्तश् । १२. रा$_{2}$ फ म-कृष्णर० ॥ १३. प्र रा$_{2}$ फ म-प्रशस्तश्च । १४. रा$_{1}$-रविवेशश्च लो० । रा$_{2}$ फ-परिवेषः सुलो० । प्र-परिवेषस्तु लो० । म-परिवेषोस्य लो० । १५. म-लीनः ॥ १६. म-नास्ति ॥ १७. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र फ म-लंकां । १८. म-पतन्ति । १९. प्र-हि ।

११] शिवाश् चाऽप्य् अ-शिवा वाचः प्र-वदन्ति महा-स्वनाः।१०।[१८
तूर्णम् अद्य दुरा-धर्षां पुरीं रावण-पालिताम् ।
१३] अभि-यामो जवेनैव सर्व-तो हरिभिर् वृताः ॥११॥ [२०
इत्य् एवं तु वदन् वीरो लक्ष्मणं लक्ष्मणाऽग्रजः ।
१४] तस्माद् अव-ततारऽऽशु पर्वताऽग्रान् महा-बलः ॥१२॥ [२१
अव-तीर्य तु धर्माऽऽत्मा तस्माच् छैलात् स राघवः ।
१५] परैर् अ-धृष्यम् अ-क्षोभ्यं ददर्श बलम् आत्मनः ॥१३॥[2] [२२
ततस् तं व्य्-ऊह्य सु-ग्रीवः कपि-राजो महा-बलः[3] ।
१६] काल-ज्ञो राघवस्याऽऽज्ञां युद्धाऽऽकांक्षी भ्युद्-ऐक्षत[4] १४ [२३
ततः काले महा-बाहुर् बलेन महताऽऽवृतः ।
१७] प्र-तस्थे पुर-तो धन्वी लङ्काम् अभि-मुखः पुरीम् ॥१५॥ [२४
तं विभीषण-सुग्रीवौ हनु-मान् जाम्ब-वान् नलः ।
१८] ऋक्ष-राजोऽङ्ग-दो नीलो लक्ष्मणश् चाऽन्व्-अयुस् तदा १६[२५
ततः पश्चात् सु-महती पृतनार्क्षवनौकसाम् ।
१९] प्र-च्छाद्य महतीं भूमिं प्र-ययौ येन राघवः ॥१७॥ [२६
शैल-शृङ्गाणि शत-शः प्र-वृद्धांश् च मही-रुहान् ।
२०] जगृहुः कुञ्जर-प्रख्या वानरा बाहु-शालिनः ॥१८॥ [२७
ते त्व् अ-दीर्घेण कालेन राम-सुग्रीव-लक्ष्मणाः ।
२१] रावणस्य पुरीं लङ्काम् आ-सेदुः सुदुरा-सदाम् ॥१९॥ [२८
पताका-मालिनीं रम्याम् उद्यान-वन-शोभिताम् ।

---

१. ब-अभिरामो ॥ २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-नास्ति ॥ ३. अतः परमधिकः पाठः—रा$_2$ फ-व्यूह्य तद्वानरसैन्यं प्रायाल्लंकां पुरीं प्रति । बद्धगोधांगुलित्राणौ शरचापाऽसिधारिणौ ॥ दिव्यशस्त्रास्त्रसम्पन्नौ आबद्धकवचावुभौ । पुरस्कृत्य महावीर्यौ तावुभौ रामलक्ष्मणौ ॥ विभीषणेनानुगतौ प्रवरैश्च प्लवंगमैः । ततस्तु हेमपिंगानां पृतना सा वनौकसां ॥ समुद्रकल्पा महती लङ्कामभ्यपतत्तदा । म-नास्ति ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र म-नास्ति ॥ ५. म-उद्यानशतशो० ।

२२] चित्र-वप्रां सुदुष्प्राऽऽपाम् उच्च-प्राकार-तोरणाम् ।।[1]२०।। [२९
तां सुरैर्[2] अपि दुष्प्रेक्षां दृष्ट्वा राम-प्रचोदिताः ।
२३] यथा-निवेशं सम्प्रा[3]ऽऽप्य न्य्-[4]अवसन्त वनौकसः ।।२१।। [३०
दश-योजन-मात्रं तु [5]मण्डलं वानरं बलम् ।
२४] परि-[6]क्रम्य तदा लङ्कां युद्धायाऽभि-ससार ह ।।२२।। [N
[7]लङ्काया उ[7]त्-तरं द्वारं शैल-शृङ्गम् इवोन्-नतम् ।
२५] रामः सहाऽनुजो धन्वी जुगोप च रुरोध च ।।२३।। [३१
लङ्काम् उपनि-विष्टे [8]च रामे दशरथाऽऽत्मजे ।
२६] लक्ष्मणाऽनुचरे वीरे व्यथिताः सर्व-[9]राक्षसाः ।।२४।। [३२
नाऽन्यो रामाद् धि तद् द्वारं सम्-अर्थः परि-रक्षितुम् ।
२८] रावणाऽधिष्ठितं तद् धि वरुणेनेव सागरम् ।।२५।। [३३
राक्षसैः साऽऽयुधैर् उग्रैर् अभि-[10]गुप्तं समन्त-तः ।
२९] वीर्य-विक्रम-सम्पन्नैः पातालम् इव दानवैः ।।२६।। [३४
राक्षसैर् विविधाऽऽकारैः [11]शुशुभे सा महा-[11]पुरी[13] ।
३०] [12]संमस्तैर् बहुभिर् गुप्ता नागैर् भोग-वती यथा ।।२७।। [N
वि[13]न्य्-अस्तानि च यो[13]धानां बहूनि वि-विधानि च ।
३१] तस्याम् [14]आयुध-जातानि वि-चि[15]त्राणि [15]भृशं तदा ।।२८।। [३५
पूर्वं तु द्वारम् आऽ[16]रक्षन् नीलो हरि-चमूपतिः ।
३२] मैन्दश् च द्वि-विदश् च[17]ोभौ [18]श्वेतं गिरिम् इवोर-गौ ।।२९।। [३६

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ-नास्ति ॥ २. म-०निदेश । ३. प्र-संस्थाप्य । म-संपीड्य । ४. म-निवसन्तो ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ-मृद्नद्धै । ६. रा$_2$ म-परिक्षिप्य ॥ ७. रा$_2$ फ म-लंकायास्तूत्तर ॥ ८. रा$_2$ फ म-तु । ९. प्र-सर्वगर्हिताः । रा$_2$ फ म-सर्वनैर्ऋताः ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब-अभिक्षिप्तं ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-०भे सा महाचमूः । म-नास्ति । १२. रा$_2$ फ-समन्ताद् । १३. म-नास्ति ॥ १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-चायुध० । १५. रा$_2$ फ म-चित्राणि ददृशे ॥ १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-आगम्य । १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-चैव । १८. रा$_1$ ल$_1$ ल$_2$ ब अ-यथा । प्र-तथा ॥

अङ्ग-दो दक्षिणं द्वारं जगृहे[1] पृतनाऽन्वितः[2] ।
३३] ऋषभेण गवाऽक्षेण गजेन गवयेन च ॥३०॥ [३७
हनु-मान् पश्चिमं द्वारं ररक्ष बल-वान् कपिः ।
३४] प्र-घसश् च प्र-माथी च यत्राऽस्य सचिवाव् उभौ ॥३१॥ [३८
मध्यमे च स्वयं गुल्मे सु-ग्रीवः सम्-अतिष्ठत ।
३५] सह सर्वैः कपि-श्रेष्ठैः सुपर्ण-सम[3]-विक्रमैः ॥३२॥ [३९
वानराणां तु षट्-त्रिंशत् कोट्यस् तैः सह यूथ-पैः ।
३६] नि-पीड्योपनि-विष्टाश् च सु-ग्रीवो यत्र वानरः ॥३३॥ [४०
शासनाद् एव[4] रामस्य सु-ग्रीवः स-विभीषणः[5] ।
३७] द्वारे द्वारे प्लवं-गानां कोटीं कोटीं न्य्-अवेशयत् ॥३४॥ [४१
पश्चिमेन तु रामस्य सु-ग्रीवः सह-जाम्बवान्[6] ।
३८] अ-दूरे मध्यमे गुल्मे तस्थौ बहु-बलाऽऽवृतः[7] ॥३५॥ [४२
ते तु वानर-शार्दूलाः शार्दूला इव दंष्ट्रिणः[8] ।
३९] गृहीत्वा द्रुम-शैलांस् तु प्र-हृष्टा योद्धुम् उद्-यताः[9] ॥३६॥ [४३
सर्वे विकृत-लाङ्गूलाः सर्वे दन्त-नखाऽऽयुधाः ।
४०] सर्वे विकृत-वर्णाऽङ्गाः[10] सर्वे च विकृताऽऽननाः ॥३७॥ [४४
४१उ] दश-नाग-बलाः केचित् केचिद् दश-गुणोत्तराः ।
केचिन् नाग-सहस्रस्य बभूवुस् तुल्य-विक्रमाः ॥३८॥ [४५
४२] सन्ति मेघ-बलास् तत्र तथा वायु-बलोपमाः ।
अप्रमेय-बलाश् चाऽन्ये तत्राऽऽसन् हरि-यूथपाः ॥३९॥[11] [४६
४३] अद्भुतश्[12] च वि-चित्रश् च[13] तेषाम् आसीत् समा-गमः ।

---

१. रा२ फ-जग्राह । म-ररक्ष । २. रा२-०नावृतः । म-बलवान् कपिः ॥
३. रा२ फ म-०र्णश्वसनोपमैः ॥ ४. रा२ फ म-अथ । ५. ल१ म-नास्ति ॥
६. ल१-सहबान्धवः । ७. ब प्र रा२ फ म-०बलानुगः ॥ ८. रा१ ल१ ल२ ब श्र प्र-शृंगिणः । ९. प्र-आगताः । १०. म-नास्ति । ११. म-नास्ति ॥ १२. रा१ ल१ ल२ ब श्र-अत्यद्भुतश्चित्राश्च । रा२ फ-अद्भुतश्चैव चित्रश्च ।

तत्र वानर-सैन्यानां शलभानाम् इवोद्-गमः ॥४०॥ [४७
४४] प्रति-पूर्णम् इवाऽऽकाशं [1]प्र-च्छन्नेव च मेदिनी ।
लङ्कां प्रति नि-विष्टैश् च सं-पतद्भिश् च वानरैः ॥४१॥ [४८
४५] शतं शत-सहस्राणां पृथग् ऋक्ष-वनौकसाम् ।
लङ्का-द्वाराण्य् उपाऽऽजग्मुः शत-शैलम्[2] ते समन्त-तः ॥४२॥ [४९
४६] अन्ये चाऽन्येषु देशेषु संन्य्-अस्ताः सु-महाबलाः । [N
छादयन्तो गिरिं सर्वे सम्-अन्तात् ते वनौकसः [3]। [५०
४७] अयुतानां [4]सहस्रं च लङ्कां सम[5]भ्य्-अवर्तत ॥४३॥ [५१
वानरैर् बल-वद्भिश् च बभूव द्रुम-पाणिभिः ।
४८] सर्व-तः सं-वृता लङ्का दुष्प्र-वेशाऽपि वायुना ॥४४॥ [५२
राक्षसा वि-स्मयं जग्मुः [6]सहसैव नि-पीडि[6]ताः ।
५०] वानरैर् मे[7]घ-सङ्काशैः शक्र-तुल्य-पराक्रमैः ॥४५॥ [५३
सहस्रैर्[9] बहुभिश् चाऽत्र नील-मेघ-निभैस् तथा ।
५१] गिरि-संहननैश् चैवं वानरैर् आ-वृता दिशः ॥४६॥ [N
लङ्कायाम् [10]अभवच् छ[10]ब्दो मेघौ[11]घस्येव [12]पर्वते ।
४९] सागरस्येव भिन्नस्य यथा स्यात् सलि[13]ल-स्वनः ॥४७॥ [५४
निर्-ह्राद इव सं-जज्ञे [14]स बलौघ-स्वनो [14]महान् ।
५२] लङ्कायां शुश्रुवे शब्दः सागरस्येव भि[15]द्यतः ॥४८॥ [N
तेन शब्देन महता स-प्राकारा स-तोरणा ।

---

१. रा₂ फ म- संछ० ॥ २. रा₂ फ म-अन्ये जग्मुः ॥ ३. प्र-संछादितो गिरिः सर्वस्तैः समन्ताद् वनौकसैः । रा₂ फ-आछाद्यत गिरिः सर्वैस्तैः समन्ताद्व-नौकसैः । म-संछाद्य तं गिरिं स० । ४. फ-सहस्रैश् । ५. रा₁ ल₁ ल₂ ब ष्ठ-०भिवर्तते । म-अवाभ्यवर्तत ॥ ६. रा₂ फ म-सहसा विनिपी० । ७. श्र प्र-घोरसं० । ८. प्र रा₂ फ म-शक्रवीर्यप० ॥ ९. प्र रा₂ फ म-गिरिकूटप्रमाणैश् च ॥ १०. म-अभितः शब्दो । ११. रा₂ फ-महौघस्येव । १२. रा₂-वर्धतः । म-वर्षतः ॥ १३. रा₁ ल₁ ल₂ ब श्र प्र फ-सलिलश्च्युतः ॥ १४. रा₁ ल₁ ल₂ ब ष्ठ प्र-सबलो यत्र राघवः । १५. रा₂ फ म-मथ्यतः ॥

५३] लङ्का प्र-चलिता सर्वा रक्षसाम् आ-गतं भयम् ॥४९॥ [५५
राम-लक्ष्मण-गुप्ता सा सु-ग्रीवेण च वाहिनी ।[2]
५८] बभूव सुदुरौ-धर्षा सर्वैर् अपि सुराऽसुरैः ॥५०॥ [५६
राघवस् तन् नि-वेश्यैवं सैन्यं स्वं रक्षसां वधे ।
५९] सं-मन्त्र्य मन्त्रिभिः सार्धं निश्-चित्य च पुनः पुनः ॥५१॥
आनन्तर्यम् अभिप्रेप्सुः क्रम-योगस्य तत्त्व-वित् । [५७
६०] विभीषण-मते तिष्ठन् राज-धर्मम् अनु-स्मरन् ॥५२॥
अङ्ग-दं वालि-तनयं समा-हूयाऽब्रवीद् वचः । [५८
६१] गच्छ सौम्य दश-ग्रीवं ब्रूहि मद् वचनाद् इदम् ॥५३॥
लङ्घयित्वा पुरीं लङ्कां भयं त्यक्त्वा गत-व्यथः । [५९
६२] भ्रष्टैश्वर्यं गत-श्रीकं मुमूर्षुं नष्ट-चेतसम् ॥५४॥
ऋषीणां देवतानां च गन्धर्वाऽप्सरसां तथा । [६०
६३] नागानाम् अथ यक्षाणां राज्ञां च रजनी-चर ॥५५॥
यत् त्वयाऽपं-कृतं मोहाद् अव-लिप्तेन राक्षस । [६१
६४] नूनं तेऽद्य गतो दर्पः स्वयम्भु-वरदान-जः ॥५६॥
तस्य दण्ड-धरस् तेऽहं भार्या-हरण-कर्षितः ।
६५] दण्डं धारयितुं तीव्रं लङ्का-द्वारे व्यव-स्थितः ॥५७॥ [६२
पदवीं देवतानां च महर्षीणां च राक्षस ।
६६] राजर्षीणां च सर्वेषां गमिष्यामि युधि स्थितः ॥५८॥ [६३
छलेन येन मे सीता मायया राक्षसाऽधम ।
६७] माम् अति-क्रमयित्वा त्वं हृतवांस् तद् वि-दर्शय ॥५९॥ [६४
अ-राक्षसम् इमं लोकं कर्ताऽस्मि नि-शितैः शरैः ।
६८] [11]नो वा शरणम् अभ्य्-एषि माम् उपाऽऽदाय मैथिलीम् ६० [६५

१. रा$_2$ फ म-चागतं ॥ २. फ-नास्ति । ३. रा$_2$ फ म-दुर्धर्षतमा ॥
४. रा$_2$ फ म-०योगार्थत० । ५. रा$_2$ फ म-विभीषणस्यानुमते ॥ ६. फ-०पहृतं ॥
७. प्र-धारयति ॥ ८. ल$_1$ल$_2$ म-सीतां । ९. प्र-०साधिप । १०. रा$_2$-अपक्रा० ॥
११. रा$_2$ फ म-न चेच्छरणं ॥

लङ्कैश्वर्यं[1] परि-त्यज्य हृत-राज्यो हृताऽऽसनः ।
६९] रक्षस्व जीवितं मूढ मम निर्-यात्य मैथिलीम् ॥६१॥ [N
धर्माऽऽत्मा रक्षसां श्रेष्ठः सम्प्राऽऽप्तोऽयं वि-भीषणः ।
७०] लङ्कैश्वर्यं महद् धी-मान् मद्-गुप्तः पालयिष्यति ॥६२॥ [६६
न हि राज्यम् अ-धर्मेण भोक्तुं क्षणम् अपि त्वया ।
७१] शक्यं मूर्ख-सहायेन धृष्टेना[2]ऽविजिताऽऽत्मना ॥६३॥ [६७
युध्यस्व वा धृतिं कृत्वा शौर्यम् आ-लम्ब्य राक्षस ।
७२] मच्-छरैस् त्वं रणे शान्तस् ततः शान्तिर् भविष्यैति[3]॥६४॥[६८
यद्य् आ-विशसि लोकांस् त्रीन् पक्षी भूत्वा मनो-जवः ।
७३] मम चक्षुष्-पथं प्रा[4]ऽऽप्तो नहि जीवन् वि-मोक्ष्यसे ॥६५॥ [६९
ब्रवीमि त्वा हितं वाक्यं क्रियताम् और्ध्व-दैहिकम् ।
७४] सु-दृष्टः क्रियतां [5]लोको [6]जीवितं ते मयि स्थितम् ॥६६॥ [७०
इत्य् उक्तः स तु तारेयो रामेणाऽक्लिष्ट-कर्मणा ।
७५] जगामाऽऽकाशम् आ-विश्य मूर्ति-मान् इव हव्य-वाद्[7] ६७ [७१
सोऽभि-प्लुत्य मुहूर्तेन श्री-मद् रावण-मन्दिरम् ।
७६] ददर्शाऽऽसीनम् अन्त(?:)-स्थं[8] रावणं सचिवैः सह ॥६८॥ [७२
ततस् तस्याऽवि-दूरं[9] सन् नि-पत्यं[10] हरिर् आ-प्लुतः ।
७७] दीप्ताऽग्नि-सदृशस् तस्थाव् अङ्ग-दः काञ्चनाऽङ्गदः[11] ॥६९॥ [७३
तद् राम-वचनं सर्वं मन्युनाऽधिकम् उत्-तमम् ।
७८] साऽमात्यं श्रावयामास नि-वेद्याऽधिकम् आत्मना ॥७०॥ [७४
दूतोऽहं कोसलेन्द्रस्य रामस्याऽक्लिष्ट[12]-कर्मणः ।

---

१. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-लोकै° ॥ २. ल$_1$ ब-दृष्टेनाभिजि° । रा$_2$ फ म-दृस्ते-नावि° ॥ ३. ब-भविष्यसि ॥ ४. रा$_2$ फ म-प्राप्य ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब-लोके । ६ प्र-जीविते ते मयि स्थिते ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब-°राद् ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब श्र रा$_2$ फ-अस्वस्थं ॥ ९. ल$_1$ प्र रा$_2$ म-°विदूरे । १०. ल$_1$ रा$_2$ म-स नि° । प्र-हि नि° । ११. रा$_2$ फ म-कन-कांगदः ॥ १२. रा$_2$ म-°स्याक्लिष्टक° ।

७९] वालि-पुत्रोऽङ्ग-दो नाम यदि ते श्रोत्रम् आ-गतः ॥७१॥ [७५
आह त्वां राघवो रामः कौसल्याऽऽनन्द-वर्धनः ।
८०] स्वयं निर्-उगत्य[1] युध्यस्व नृ-शंस पुरुषाऽधम[2] ॥७२॥ [७६
हन्ताऽहं[3] त्वां[3] सहाऽमात्यं स-पुत्र-भ्रातृ-बान्धवम् ।
८१] निर्-उद्वेगास्[4] त्रयो लोका भविष्यन्ति हते त्वयि ॥७३॥ [७७
देव-दानव-यक्षाणां गन्धर्वोरगा-पक्षिणाम्[5] ।
८२] शल्यम् अद्योद्-धरिष्यामि मुनीनां चैव कण्टकम्[6] ॥७४॥ [७८
वि-भीषणस्य चैश्वर्यं भविष्यति हते त्वयि ।
८३] न चेत् सत्-कृत्य वैदेहीं प्रणि-पत्य प्र-दास्यसि[7] ॥७५॥ [७९
इत्य्[8] एवं[8] परुषं वाक्यं ब्रुवाणे हरि-पुङ्गवे ।
८४] अमर्ष-वशम् आ-पन्नो निशाचर-गणेश्वरः ॥७६॥ [८०
ततो रोषित[9]-ताम्राऽक्षः शशास सचिवांस् तदा[10] ।
८५] गृह्यताम् इति दुर्-मेधा वध्यताम् इति चाऽसकृत् ॥७७॥ [८१
ते शैल-शृङ्ग-वर्ष्माणम्[11] अग्निम् इद्धम् इवाऽङ्ग-दम् ।
८६] आ-ललम्बुस् ततो घोरांश्[12] चत्वारो[12] रजनी-चराः ॥७८॥ [८२
ग्राहयामास तारेयः स्वयम्[13] आत्मानम्[13] आत्मना ।
८७] बलं नि-दर्शयन्[14] वीरो निशाचर-गणे तदा ॥७९॥ [८३
स तान् बाहु-द्वये सक्तान् आ-दाय पत-गान् इव ।
८८] प्रासादं शैल-सङ्काशम् उत्-पपाताऽङ्ग-दस् तदा ॥८०॥ [८४
तेऽन्तरिक्षाद् विनिर्-धूतास् तस्य वेगेन राक्षसाः ।
८९] भूमौ नि-पतिताः सर्वे तदा निश्चेष्ट-चेतसः[15] ॥८१॥ [८५

---

१. रा$_2$ फ म-निपत्य युधि । २ रा$_2$ फ म-पुरुषो भव ॥ ३. रा$_1$ ल$_1$ ब श्र प्र-हर्ताहं० । ल$_2$ म-हत्वाहं० । रा$_2$-हतं हत्वा । ४. रा$_2$ फ म-निरुद्विग्नास् ॥ ५. प्र-०गरक्षसां । ६. रा$_2$ फ-संकटं ॥ ७. रा$_2$-०स्यति ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र फ म-भृत्यैवं ॥ ९. रा$_2$ फ म-रोषाभिता० । १०. प्र-तथा ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-०वर्षाणां । १२. प्र-घोराः श्रुत्वा ते ॥ १३. प्र-मुकुटं स्वयं । १४. फ-विदर्श० ॥ १५. रा$_2$-०ष्टजीविताः ॥

प्रासाद-शिखरं श्री-मद् अङ्ग-देन पराऽऽहतम् ।[1] [८६पू
९०] [2]तत् [2]पपात पदाऽऽ[3]क्रान्तं दश-ग्रीवस्य पश्यतः ॥८२॥ [८७पू
९१पू] भङ्क्त्वा प्रासाद-शिखरं नाम वि-श्राव्य चाऽऽत्मनः ।
९३पू] आ-स्फोटयामास तदा नि-[4]र्ददंश् [4]चक्रमे पुनः ।[5]॥८३॥ [८८
[वायु-वेगं समा-स्थाय रावणस्य ततोऽग्र-तः ।
N] जग्राह मुकुटं वीरः पादम् आ-स्थाय मस्तके ॥८४॥[6] [N
अङ्ग-देन पदाऽऽक्रान्तो रेजे सं-सदि रावणः ।
N] त्रिविक्रम-पदाऽऽक्रान्तो बले(?लिर्)वैरोचनिर् यथा८५[6]] [N
सकाशं कोसलेन्द्रस्य राघवस्य महाऽऽत्मनः ।
९४] सु-ग्रीवस्य च तत् सर्वं समा-[7]गत्य न्य्-अवेदयत् ॥८६॥[8] [N
रावणस् तु परं चक्रे क्रोधं [9]प्रासाद-धर्षितः ।[10]
९६] [10]वि-नाशम् आत्मनः शङ्क्य निश्वास-परमोऽभवत् ॥८७॥ [९०

अङ्ग-दः पुनर् आ-गत्य ववन्दे चरणौ ततः ।
N] सु-ग्रीवस्य च रामस्य लक्ष्मणस्य तथैव च ॥८८॥[11] [N
[12]अन्यान् अपि [12]महा-वीरान् अभि-वाद्य महा-बलः ।
N] मुकुटं [13]राक्षसेन्द्रस्य राघवाय न्य्-अवेदयत् ॥८९॥[14] [N
तं दृष्ट्वा मुकुटं रामो रत्न-सार-विभूषितम् ।
N] आ-बबन्ध महा-बाहू रावणाऽ[15]नुज-मस्तके ॥९०॥ [N
[15]साधु साधु महा-[15]बाहो यस्य ते बलम् ईदृशम् ।

१. रा$_2$ फ म-प्रासादस्य शिरः श्रीमानङ्गदस्तु यदाहनत् । २. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र म-उत्पपात । ३. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-तदाक्रान्तं । म-पदाक्रम्य ॥ ४. प्र-विनद्याच० । ५. म-नास्ति ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र म-नास्ति ॥ ७. श्र प्र-समागम्य । ८. रा$_2$ फ म-नास्ति ॥ ९. रा$_2$ फ-चवात्मधर्षणात् । १०. म-नास्ति ॥ ११. श्र म-नास्ति ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-अन्योन्यं ते महावीरा । १३. फ-रक्षोराजस्य ॥ १४. अत आरभ्य ९३—तम श्लोकपर्यन्त म-नास्ति ॥ १५. प्र-नास्ति ॥

N] प्र-हस्याऽङ्ग-दम् आ-भाष्य [1]पुपूजे च[1] वि-भीषणः ॥२१॥ [N
नैतत् कर्म करिष्यन्ति दे[2]वता न च[2] पन्न-गाः ।
N] दैत्य-दानव-रक्षांसि वर्ज्यैकं वालिनः सुतम् ॥२२॥ [N
[3]ददर्श वानरी सेना[3] भीषणं च वि-भीषणम् ।
N] मुकुटेन प्र-भासन्तं त्रि-कूटम् इव पर्व[4]तम् ॥२३॥ [N

रामस् तु बहुभिर् हृष्टैर् वि-नदद्भिः प्लवं-गमैः ।
N] वृतो रिपु-वधाऽऽकाङ्क्षी युद्धायैवाऽभ्य्-अवर्तत ॥२४॥ [९१
सु-षेणस् तु महा[5]-वीरो गिरि-कू[6]टोपमो ह[6]रिः ।
९८] बहुभिः सं-वृतस् तत्र वानरैः काम-रूपिभिः ॥२५॥ [९२
लङ्का-द्वाराणि सर्वाणि सुग्रीव-वचनात् कपिः ।
९९] पर्या[7]ऽक्रमत दु[7]र्-धर्षो नक्ष*-त्राणीऽव चन्द्रमाः ।[8] [९३
N] [र(?रं)भ[9]न् पर्य्-एति सं-हृष्टो हर्षयन् स महा-चमूम् ॥२६॥] [N
अक्षौहिणी-शतं तेषां समवेक्ष्य वनौकसाम् ।
१००] लङ्काम् उ[10]पनि-विष्टानां सागरं चाऽभि-वर्तताम्[11] ॥२७॥ [९४
राक्षसा वि-स्मयं जग्मुस् त्रासं जग्मुस् तथा परे ।
१०१] [12]अपरे समरोद्-ध[12]र्षा हर्षं[13] च[13]ाऽपि प्र-पे[13]दिरे ॥२८॥[11] [९५
तां[14] तु[14] सेनां निर्-ईक्ष्यैव कपीनां युद्ध-काङ्क्षिणाम्[15] ।
१०२] लङ्काम् उपनि-विष्टानां रा[16]घवः सं-जहर्ष ह[17] ॥२९॥ [N
कृत्स्नं हि कपिभिर् व्य्-आप्तं प्राकार-परिखाऽन्तरम्[17] ।

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ-पूजयित्वा। प्र-प्रपूज्य च॥ २. प्र-०ता नैव । रा$_2$ फ-देवा अपि न ॥ ३. रा$_2$ फ-ददृशुर्वानरा वीरा । ४. रा$_2$ फ-मन्दरं ॥ ५. रा$_1$-महान्वीरो । प्र रा$_2$ फ म-महावीर्यो । ६. प्र-०टोपमस्तदा ॥ ७. प्र-पर्याक्राम-दुराधर्षो । रा$_2$-पर्याक्रमदुराधर्षो । ८. फ म-नास्ति । ९. रा$_1$ अ-रंभा । ल$_1$ ल$_2$ ब प्र रा$_2$ फ-रंभः ॥ १०. रा$_2$- अभिनि० । ११. ल$_1$ ब-नास्ति ॥ १२. रा$_2$-अन्ये समरदुर्धर्षा । म-०रे समरे हर्षात्। १३. रा$_2$ फ म-चैवाभिपेदिरे ॥ १४. रा फ-तत्रं । १५. ब-नास्ति । १६. रा$_2$ फ-नैर्ऋताः संजहर्षिरे । १७. म-नास्ति ॥

१०३] ददृशू राक्षसाः सर्वे प्रासाद-वलभी-गताः[1] ॥१००॥ [२६
कृत्स्ना हि [2]कपिभिर् व्य्-आप्ता लङ्का रावण-पालिता ।
१०४] स्तिमिता चाऽप्रहृष्टा च [3]बभूव सुदुरा-सदा ॥१०१॥ [N
तस्मिन् महा-भीषणके [4]प्र-वृत्ते
कोलाहले राक्षस-राजधान्याम् ।
प्र-गृह्य रक्षांसि [5]महाऽऽयुधानि
१०५] युगाऽन्त-वाता इव संवि-चेरुः ॥१०२ [२८

इत्यार्षे रामायणे युद्ध-काण्डे लङ्कोपरोधो नाम षोडशः सर्गः ॥१६॥

[वं-१७]= [सप्तदशः सर्गः] =[दा-४२]

ततस् ते राक्षसास् त्रस्ता गत्वा रावण-मन्दिरम्[9] ।
१] न्य्-अवेदयन् पुरीं [10]रुद्धां रामेण सह वानरैः ॥१॥ [१
रुद्धां तु नगरीं श्रुत्वा जात-कोपो निशा-चरः ।
२] वि-धानं द्वि-गुणं कृत्वा [11]प्रासादं [12]चाऽध्य्-अरोहत ॥२॥ [२
स ददर्श वृतां [13]लङ्कां स-शैल-वन-काननाम् ।
३] अ-संख्येयैर् हरि-गणैः सर्व-तो युद्ध-काङ्क्षिभिः ॥३॥ [३
स दृष्ट्वा वानरैः [14]सर्वं काननं कपिली-कृतम् ।
४] कथं [15]क्षपयितव्यं स्याद् इति चिन्ता-परोऽभवत् ॥४॥ [४
स चिन्तयित्वा [16]सु-चिरं धैर्यम् आ-लम्ब्य रावणः ।

---

१. म-नास्ति ॥ २. रा१ ल१ ल२ ब श्र प्र-बलिभिर् । ३. रा२ फ-निशेव ॥ ४. म-तु वृत्ते । ५. रा१ ल१ ल२ ब श्र प्र-तदायु० ॥ ६. फ म-नास्ति । ७. ब श्र प्र-लंकाकाण्डे । रा२ म-लंकापर्वणि । ८. ल१-रा२ फ-लंकापरोधो । म-लंकाविरोधो ॥ ९. म-०मन्दिरे । १०. ल१-लंकां ॥ ११. ब फ-प्राकारं । १२. प्र फ-चाप्यरो० । म-व्यध्यरोहत ॥ १३. प्र-वीरैः ॥ १४. ल१ ल२ ब श्र प्र फ रा-सर्वैः । १५. रा१ ल१ ल२ ब श्र-क्षमयि० ॥ १६. ब-सचिवं ।

५] हरि-यूथानि रामं च ददर्शाऽऽयत-लोचनः ॥५॥ [९
प्रेक्षतो राक्षसेन्द्रस्य तान्य् अनीकानि भाग-शः ।
६] राघव-प्रिय-कामाऽर्थं लङ्काम् आ-रुरुहुस् तदा ॥६॥ [१३
ते ताम्र-वक्त्रा हेमाऽऽभा रामाऽर्थे त्यक्त-जीविताः ।
७] लङ्काम् एवाऽभ्य्-अधावन्त साल-ताल-शिलाऽऽयुधाः ७ [१४
ते द्रुमैः पुष्पिताऽग्रैस् तु मुष्टिभिश् च महा-बलाः ।
८] प्राकाराऽग्राण्य् अ-संख्यानि ममन्थुस् तोरणानि च ॥८॥ [१५
आ-प्लवन्तः प्लवन्तश् च गर्जन्तश् च प्लवं-गमाः ।
१२] लङ्काम् एवाऽभ्य्-अवर्तन्त महा-वारण-सन्निभाः ॥९॥ [१९
काञ्चनानि प्र-मृद्नन्तस् तोरणानि बली-मुखाः ।
११] कैलास-शिखराऽऽभानि गोपुराऽट्टालकानि च ॥१०॥ [१८
परि-खाः पूरयन्तश् च गम्भीर-विमलोदकाः ।
९] पांसुभिस् तृण-काष्ठैश् च पर्वताऽग्रैश् च वानराः ॥११॥ [१६
शत-साहस्र-यूथैश् च कोटि-यूथैश् च यूथ-पाः ।
१०] कोटि-शत-वृताश् चाऽन्ये लङ्काम् आ-रुरुहुस् तदा ॥१२॥ [१७
जयत्य् अति-बलो रामो लक्ष्मणश् च महा-बलः ।
१३] राजा जयति सु-ग्रीवो राघवेणाऽनु-पालितः ॥१३॥ [२०
इत्य् एवं घोषयन्तश् च गर्जन्तश् च प्लवं-गमाः ।
१४] अभ्य्-अधावन्त लङ्कायाः प्राकारं काम-रूपिणः ॥१४॥ [२१
१५पू] वीर-बाहुः सु-बाहुश् च नलश् च वन-गोचराः ।[13] [२२पू
N] पूर्व-द्वारम् अरुन्धन्त यूथ-पा यूथ-संवृताः ॥१५॥ [N

---

१. प्र-तु । रा$_2$ फ-तु । २. रा$_2$ फ-व्यस्तलोचनः ॥ ३. रा$_1$-स्वानीकानीव । ४. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-०वर्णा । ५. म-०अवर्तन्त ॥ ६. रा$_2$ फ-महाबलैः । ७. रा$_2$-०ग्राण्यग्रसंस्थानि । म-प्राकाराग्राणि सर्वाणि ॥ ८. ल$_2$-०भ्यधावन्त । ९. ल$_2$ प्र-महारावगस० । म-महाचारणस० ॥ १० ब-०लोदकैः । म-गंभीरं त्रि० ॥ ११. ल$_1$ ल$_2$ श्र प्र-चैव ॥ १२. फ-घोतयन्तश् ॥ १३. अतः परमधिकः पाठः—रा$_2$-एतस्मिन्नन्तरे चक्रुर्लंकाचारप्रवेशनं ॥

१७उ] पश्चिमं कु-मुदो द्वारं कोटिभिर् दशभिर् वृतः ।
१६उ] आ-वृत्य बल-वांस् तस्थौ वानराणां महौजसाम् ॥१६॥ [२३
१७पू] दक्षिणं द्वारम् आ-गम्य वीरः शत-बलिः कपिः ।
१८उ] आ-वृत्य बल-वांस् तस्थौ कोटिभिः सप्तभिर् वृतः ॥१७॥ [२५
उत्-तरं द्वारम् आ-[1]गत्य रामः सौमित्रिणा सह ।
१९] आ-वृत्य बल-वांस् तस्थौ सु-ग्रीवश् च महा-बलः ॥१८॥ [२७
गो-लाङ्गूलो [2]महा-कायो गवाऽक्षो भीम-दर्शनः ।
२०] वृतः कोट्या महा-तेजास् तस्थौ रामस्य पार्श्व-तः ॥१९॥ [२८
ऋक्षाणां भीम-वेगानां धूम्रः शत्रु-निबर्हणः ।
२१] तस्थौ राम-समीपे तु कोटिभिर् दशभिर् वृतः ॥२०[3]॥ [२९
२३उ] सं-नद्धस् तु महा-वीर्यो गदा-पाणिर् वि-भीषणः ।
२४पू] आज्ञा-प्रतीऽऽक्षो रामस्य तस्थौ पार्श्वे महा-बलः ॥२१ [३०
गजो गवाऽक्षो गवयः शरभो गन्ध-मादनः ।[4] [३१पू
२२] भीमो दधि-मुखश् चैव केसरी पनसस् तथा । [N
२३पू] एतस्मिन्न् अन्तरे चक्रुः स्कन्धावार-निवेशनम् ॥२२॥ [२२उ
२४उ] ततः कोप-परीऽताऽऽत्मा रावणो राक्षसोऽधिपः ।
निर्-याणं सर्व-सैन्यानां द्रुतम् आऽज्ञ[6]पयत् तदा ॥[5]२३॥ [३२
२५] निष्-पतन्ती तदा सेना युक्ता रावण-पालिता ।
सोमेनाऽऽपूर्यमाणस्य वेलेवे सरितां पतेः ॥२४॥ [३७
२६] एतस्मिन्न् अन्तरे रौद्रः सं-ग्रामः सम्-अपद्यत ।
रक्षसां वानराणां च वीराणां काम-रूपिणाम् ॥२५॥ [४१

---

१. रा१ ल१ ल२ ब श्र-आगम्य ॥ २. रा१ ल१ ल२ ब श्र प्र-महाराजो ॥ रा२-महाबाहोर् ॥ ३. म-नास्ति ॥ ४. रा१ ल१ ल२ ब श्र प्र म-नास्ति ॥ ५. म-नास्ति । ६. ल१ ल२ ब श्र प्र फ म-आज्ञापयत् ॥ ७. प्र-रावण-नोदिता । रा२ फ-रावणचोदिता ॥ ८. प्र-सा सेना पूर्य० । ९. प्र रा२ फ म-वेला इव महोदधेः ॥ १०. प्र-धीराणां । रा२ फ म-घोराणां ॥

२७] ते गदाभिः प्र-[1]वृत्ताभिः शक्ति-शूल-परश्वधैः[2] ।
निर्-जघ्नुर् वानरान् घोराः कथयन्तः स्वकान् रणे ॥२६॥ [४२
२८] तथा वृक्षैर् महा-[3]कायाः पर्वताऽग्रैश् च वानराः ।
नि-जघ्नुर् अथ रक्षांसि नखैर् दन्तैश् च वेगि[4]ताः ॥२७॥ [४४
२९] राक्षसास् त्व् अपरे घोराः प्राकार-स्था मही-गतान् ।
वानरान् भिण्डि-पालैश् च शक्तिभिश् च व्य्-[5]अदारयन् २८ [४५
३०] वानराश् चाऽपि सं-क्रुद्धा [6]राक्षसांस् तान् महा-[7]बलान् ।
प्राकारात् पातयामासुर् अभि-[8]जघ्नुश् च मुष्टिभिः ॥२९॥ [४६
३१] स सम्प्र-हारस् तुमुलो मांस-शोणित-कर्दमः ।
रक्षसां वानराणां च बभूवाऽद्भुत-दर्शनः ॥३०॥ [४७
वनौकसां तत्र तु सं[9]नि-नादो
लङ्का-गतानां च निशा-चराणाम् ।
प्रक्ष्वेडिताऽऽस्फोटित-[10]नादितानां
३२] द्वाभ्यां महद्भ्याम् इव सागराभ्याम् ॥३१॥ [४८

[11]इत्यार्षे [12]रामायणे [12]युद्ध-काण्डे प्रथम-[13]सम्प्रहारो नाम सप्तदशः सर्गः ॥१७॥

[वं-१८]= [अष्टादशः सर्गः] =[दा-४३]

युध्यतां तु [14]ततस् तेषां वानराणां महाऽऽत्मनाम् ।
१] रक्षसां च बभूवाऽथ बल-कोपः सु-दारुणः ॥१॥ [१

---

१. म-प्रदीप्ताभिः । २. म-नास्ति ॥ ३. रा२ फ-०कार्यैः । ४. ल२-वेगतः ॥ ५. रा२ प्र-विदारयन् ॥ ६. प्र रा२ फ-राक्षसांश्च । म-०सांस्तु । ७. प्र रा२ फ म-०बलाः । ८. म-०जग्मुश् ॥ ९. म-सुसन्नि० । १०. रा२ फ-०नर्दितानां । म-०मर्दितानां ॥ ११. ग २ फ म-नास्ति । १२ प्र-लंकाकाण्डे । रा२-लंकापर्वणि । म-युद्धपर्वणि । १३. रा१ ल१ ल२ ब-०संहारो । श्र-प्रहारो ॥ फ-०मप्रहारो ॥ १४. प्र म-तथा । रा२ फ-तदा ॥

ते[1] हयैः काञ्चनाऽऽपीडैर् गजैश् चाऽद्भुत-दर्शनैः[2] ।
२] रथैश् चाऽऽदित्य-सङ्काशैः कवचैश् च महा-प्रभैः[3] ॥२॥ [२
४उ] विनिर्-ययुर्[4] महा-नादैर्[5] नादयन्तो[6] मही-तलम् ।
५उ] राक्षसा भीम-कर्माणो रावणस्य जयैषिणः ॥३॥ [३
६उ] वानराणाम् अपि चमू रामस्य जयम् इच्छती[7] ।
अभ्य्-अधावत् तदा घोरा राक्षसानां वधं प्रति ॥४॥ [४
७] एतस्मिन्न् अन्तरे तेषाम् अन्योऽन्यम् अभि-धावताम् ।
रक्षसां वानराणां च द्वन्द्व-युद्धम् अवर्तत ॥५॥ [५
८] अङ्गदेनेन्द्र-जित् सार्धं वालि-पुत्रेण राक्षसः ।
अयुध्यत महा-तेजा वह्नि-मान् इव पर्वतः ॥६॥ [६
९] प्र-जङ्घेन[8] च सं-पातिर् वीरो दुर्-धर्षणेन च ।
जम्बु-मालिनम् आ-यस्तो[9] हनु-मान् अपि[10] वानरः ॥७॥ [७
१०] सं-गतः सु-महाक्रोधो राक्षसो रावणाऽनुजः ।[11]
सम्-अरे तीक्ष्ण-वेगेन मित्र-घ्नेन वि-भीषणः ॥८॥[12] [८
११] तपनेन नलः सार्धं राक्षसेन महा-बलः ।[13]
नि-कुम्भेन महा-तेजा नीलो हरिर् अयुध्यत ॥९॥ [९
१२] सु-ग्रीवो वानरेन्द्रस् तु प्र-घसेन समा-गतः ।
सं-गतः सम्-अरे श्री-मान् विरूपाऽक्षेण लक्ष्मणः ॥१०॥ [१०
१३] अग्नि-केतुश् च दुर्-धर्षो रश्मि-केतुश् च राक्षसः ।
सुप्त-घ्नो[14] यज्ञ-कोपश् च रामेण सह सं-गतः[15] ॥११॥ [११
१४] वज्र-मुष्टिश्[16] च मैन्देन द्वि-विदेनाऽशनि-प्रभः । [१२पू

१. ल$_2$-हेतयैः । म-तैर्हयैः । २. प्र-०तभूषणैः । ३. अ-महाबलैः ॥ ४. रा$_2$ फ-०जग्मुर् । ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ-०नादाः । ६. रा$_2$-छादयन्तो ॥ ७. म-इच्छता ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब-प्रजघ्नेन । ९. ल$_1$-आयातो । १०. म-इव ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब-नास्ति ॥ १२. प्र रा$_2$ फ म-संयुगे ॥ १३. प्र-वीर्यवान् । १४. रा$_2$ फ म-भिन्नाः-सुद्युम्नो । १५. रा$_2$-संगमः ॥ १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-वसुमुष्टिश् ।

१५उ] गजेनाऽऽदित्य-सङ्काशो वीरः प्र-तपनस् तथा ॥१२॥ [१३पू

महोदरः सु-षेणेन वानरेण च[1] सं-गतः ।

१६] अयुध्यत महा-बाहुः शक्रेण न-मुचिर् यथा ॥१३॥ [N

जाम्ब-वान् मकराऽक्षेण धूम्रः कुम्भेन सं-गतः ।

१७] नराऽन्तकेन[2] पनसः सं-गतो[3] रक्षसा हरिः[4] ॥१४॥ [N

देवाऽन्तको[5] गवाऽक्षेण त्रि-शिराः शरभेण[6] च ।

१८] रक्षसाऽकम्पनेनाऽऽजौ युयुधे[7] कु-मुदो हरिः ॥१५॥ [N

ऋषभो वानर-श्रेष्ठः सारणेन[8] समा-गतः ।

१९] अति-कायेन वि-नतो रम्भश् चैव समा-गतौ[9] ॥१६॥ [N

धूम्राऽक्षेण समा-सक्तः केसरी हनुमत्-पिता ।

२०] वेग-दर्शी शुकेनाऽऽजौ सम्प्र-हारम् अथाऽकरोत् ॥१७॥ [N

सं-क्रुद्धं तु महा-पार्श्वं युयुधे गन्ध-मादनः ।

२१] वीरः शत-बली[10] रक्षो विद्युज्-जिह्वम् अयोधयत् ॥१८॥ [N

वानराश् चाऽपरे घोरा राक्षसैर् अपरैः[11] सह ।

२२] द्वन्द्व-युद्धम् अकुर्वंस् ते बहवो बहुभिंस् तदा ॥१९॥ [१५

तत्राऽऽसीत् सु-महद्[12] युद्धं तुमुलं[13] रोम-हर्षणम्[13] ।

२३] रक्षसां वानराणां च वीराणां जयम् इच्छताम् ॥२०॥ [१६

हरि-राक्षस-देहेस् तु[14] प्र-वृद्धाः केश-शाद्वलाः ।

२४] शरीर-संघात-वहाः[15] सुस्रुवुः शोणिताऽऽपगाः ॥२१॥ [१७

तस्मिन् प्र-वृत्ते सं-ग्रामे रौद्रे भीरु-भयंकरे ।

---

१. ल१ ल२ ब श्र रा२ फ म-समागतः ॥ २. रा१ ल१ ल२ ब श्र प्र-नरकाक्षेण । ३. प्र रा२ फ म-ससक्तो । ४. प्र-हरः ॥ ५. रा१ ल१ ल२ ब रा२-देवकान्तो । ६. रा१ ल१ ल२ ब श्र प्र-रभसेन । ७. रा१ ल१ ल२ ब श्र प्र-संप्रहारमथाकरोत् । म-युयुत्सुः कुमदो ज्वलन् ॥ ८. रा१ ल१ ल२ ब फ-सागरेण ॥ ९. रा१ ल१ ल२ ब श्र प्र-समागतः ॥ १०. रा१ ल१ ल२ ब श्र प्र- ०बलो । ११. रा१ ल१ ल२ श्र-०भिः सह ॥ १२. म-तुमुलं । १३. श्र प्र रा२ फ-०लं लोमह० । म-नरवानररक्षसां ॥ १४. रा२ फ-०सदेहेभ्यः । म-०सदेहेषु । १५. रा२ फ-०संघनिवहाः ॥

२५] हरि-राक्षसयोर् युद्धं तुमुलं सम्-अपद्यत[1] ।
N] हरीणां युव-राजस्य राक्षसानां तथैव च ॥२२॥ [N
आ-जघानेन्द्र-जित् क्रुद्धो वज्रेणेव शत-क्रतुः ।
२६] अङ्ग-दं गदया घोरः स[2] तु शत्रु-विदारणः ॥२३॥ [१.८
तस्य काञ्चन-चित्राऽङ्गं रथं साऽश्वं स-सारथिम् ।
२७] जघान सम्-अरे श्री-मान् अङ्ग-दो दन्त[3]-कूबरम् ॥२४॥ [१.९
सं-पातिस् तु प्र-जङ्घेन त्रिभिर् बाणैर् वि-दारितः ।
२८] नि-जघानाऽश्व-कर्णेन प्र-जङ्घं तु महा-बलः ॥२५॥[4] [२०
अति-कायोऽति-बलवान् देव-दानव-दर्पहा ।
२९] रम्भं च वि-नतं चैव ताडयामास मार्गणैः ॥२६॥ [N
तौ शिला-वृक्ष-वर्षेण तस्य सैन्यं नि-जघ्नतुः ।
N] जलदाव् इव सं-रब्धौ वात-वृष्ट्या[5] गवां गणम् ॥२७॥ [N
महोदरः सु-संरब्धः सु-षेणं पञ्चभिः शितैः[6] ।
N] हृदि विव्याध नाराचैर् ललाटे च त्रिभिः शरैः ॥२८॥ [N
स तथाऽभि-हतस् तेन रक्षसा वानरोत्तमः ।
N] जघान शिलया तस्य रथं साऽश्वं स-सारथिम् ॥२९॥ [N
तौ जयाऽऽकांक्षिणौ दृप्तौ वीर्य-वन्तौ दुरा-सदौ ।
N] चक्रतुस् तुमुलं युद्धं स्व[7]-सैन्य-परिवारितौ ॥३०॥ [N
जाम्ब-वान् ऋक्ष-राजस् तु मकराऽक्षं खराऽऽत्मजम् ।
N] प्राऽहिणोद् वृक्षम् उत्-पाट्य तं स[8] चिच्छेद मार्गणैः ॥३१॥ [N
ततो निशा-चरः क्रुद्धो जाम्ब-वन्तं शितैः शरैः ।
N] हृदि बाह्वोर् ललाटे च विव्या-ध लघु[9]हस्त-वत् ॥३२॥ [N

---

१. प्र-संप्रपद्यत ॥ २. रा$_2$ फ-शत्रुसैन्यविदा० । म-शक्रसैन्यवि० ॥ ३. म-हतकूबरः ॥ ४. म-नास्ति ॥ ५. रा$_2$-अश्मवृष्ट्या । म-'वात०' इत्यारभ्य 'सुसंरब्धः' इत्यन्तः पाठो नास्ति ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब अ रा$_2$-शरैः ॥ ७. रा$_1$ ल$_1$ ब अ फ-सुसैन्य० ॥ ८. म-च ॥ ९. म-कृतह० ॥

स तथा[1]ऽभि-हतस् तेन क्षिप्र-हस्तेन यूथ-पः ।
N] व्य्-अश्व-सूत-रथं चक्रे नाऽति-कृच्छ्रात् खराऽऽत्मजम् ३३ [N
भृशं शत[2]-बलिर् विद्धो विद्युज्-जिह्वेन रक्षसा ।
N] नि-जघानाऽश्व-कर्णेन विद्युज्-जिह्वं स्तनाऽन्तरे ॥३४॥ [N
नि-घ्नन्तं राक्षसान् वीरान्[3] गजं[4] प्र-तपनो हरिर्[4] ।
N] शूलेन[5] जघ्निवान् पार्श्वे ननाद च महा-स्वनम् ॥३५॥ [N
स तु रोष-परीऽताऽङ्गः शाल-वृक्षेण राक्षसम् ।
N] नि-जघान गजो मत्तो दृप्तं व्याघ्रं यथा वने ॥३६॥ [N
कुम्भकर्णाऽऽत्मजं कुम्भं सम्-अरे सु[6]-व्यवस्थितम् ।
ग्रसन्तम् इव सैन्यानि दण्ड-हस्तम्[7] इवाऽन्त-कम्[7] ।
N] प्रा[8]ऽयोधयत सं-रब्धो धूम्रो वृक्ष-शिलाऽऽयुधः ॥३७॥ [N
तौ राक्षस-हरी वीरौ स्व-सैन्य-परिवारितौ ।
N] चक्राते प्रथमं[9] युद्धं बलि-शक्रौ यथा पुरा ॥३८॥ [N
देवाऽन्तको[10] गवाऽक्षं तु[11] हृदि विव्याध मार्गणैः ।
N] पञ्चभिः सु-महावेगैर् आ-कर्ण-प्रेषितैः शितैः[12] ॥३९॥ [N
स[13] तथा[13] ताडितस् तेन सं-क्रुद्धश् चलितेन्द्रियः ।
प्राऽह्हिणोच् छालम् उत्-पाट्य तं स चिच्छेद सप्तभिः ।[14]
N] पुनश् च नवभिर् वीरं विव्याध कृत[15]हस्त-वत् ॥४०॥ [N
अथाऽऽरुह्य[16] गिरेः शृङ्गं गवाऽक्षो वानरोत्तमः ।[14]
N] प्राऽहिणोत् तं समुद्-दिश्य तस्य[17] सैन्यं जघान तत्[17] ॥४१॥ [N

---

१. रा२-तदाभि० ॥ २. रा२-क्रुद्धः शतबलिर् ॥ ३. म-वीरो । ४. रा२ फ-गर्जम् प्रतपनो हरिः । ५. म-शूलेनाभ्याहनत् ॥ ६. म-समवस्थितं । ७. म-दण्डपाणिरिवान्तकः । ८. रा१-आयो० ॥ ९. फ म-तुमुलं ॥ १०. रा१ ल१ ल२ ब-देवकान्तो । ११. ब-तं । १२. ब रा२-शरैः ॥ १३. म- सर्वथा । १४. श्र-नास्ति । १५. ब-लघुह० ॥ १६. म-तथा गृह्य । १७. म-हृदि विव्याध मार्गणैः ॥

एवं तौ बलिनां श्रेष्ठौ युयुधाते परस्परम् ।
N] कृत-प्रतिकृते(?त-)[1] यत्नाद् अन्योऽन्य-वध-काङ्क्षिणौ ॥४२॥ [N
सारणेन[2] समा-हूत ऋषभो वानरोत्तमः ।
N] सारणं वृक्षम् उत्-पाट्य स[3] जघान[3] स्तनाऽन्तरे ॥४३॥ [N
स तेनाऽति-प्रहारेण व्या-घूर्णित इवाऽभवत् ।
N] अपाऽसर्पद् धनूंष्य्[4] अष्टौ[4] वि-षण्णश् चाऽभवत् क्षणात् ४४ [N
मेघाऽऽभं गजम् आ-रूढस् त्रि-शिराः शरभं हरिम् ।
N] तोमरेण समा-हत्य शिरसि प्राऽणुदद्[5] भृशम्[6] ॥४५॥ [N
स तु रोष-परीताऽङ्गः[7] सप्त-पर्णेन तं गजम् ।
N] जघानाऽति-बलश् चण्डः शरभो वा गजं वने ॥४६॥ [N
नराऽन्तकोऽथ[8] पनसं ताडयामास मार्गणैः ।
N] सोऽपि पादप-वर्षेण तं विव्याध प्लवं-गमः ॥४७॥ [N
अ-कम्पनेन कु-मुदः परि-घेण समा-हतः[9] ।
N] जानुभ्याम् अवनिं गत्वा नि-मेषात् पुनर् उत्थि(द्-स्थि)तः ४८ [N
सं-क्रुद्धो रोष-ताम्राऽक्षो[10] मुष्टिं तस्मिन्न्[11] अपातयत् ।
N] मुष्टि-प्रहाराऽभिहतो वि-चेता इव सोऽभवत् ॥४९॥ [N
अयोधयत[12] चाऽऽश्वस्तः[12] पुनर् एव प्लवं-गमम् ।
N] धूम्राऽक्षः शर-वर्षेण हनुमत्-पितरं हरिम् ॥५०॥ [N
स सैन्यं पूरयामास[13] धाराभिर् इव पर्वतम् ।
N] सोऽपि वृक्षैः शिलाभिश्[14] च स-सैन्यं तं समाऽर्दयत्[15] ॥५१॥ [N

---

१. म-०प्रतिहतं ॥ २. अ-सारसेन । ३. म-निज० ॥ ४. रा$_2$-धनुर्हस्तो ॥ ५. अ फ--प्राणद० । रा$_2$-प्रापनद्द्रुतं । ६. प्र-नास्ति ॥ ७. ल$_2$-०तात्मा ॥ ८. रा$_1$ ल$_1$ल$_2$ ब-नरकान्तोथ ॥ ९. प्र-समाहितः । रा$_2$-महाहतः ॥ १०. रा$_2$-रक्तता० । ११. प्र-०तस्मिन् त्वपा० ॥ १२. रा$_1$-अयोध्ययत चा० । म-अयोधयं स वित्रस्तः ॥ १३. म-सूदयामास । १४. रा$_1$-शिलामिश्रैः । १५. फ म-अयोधयत् ॥

महा-पार्श्वेन सं[1]-सक्तो यूथ-पो गन्ध-मादनः ।
N] चक्रे सु-तुमुलं युद्धं शिला-दन्त-नखाऽऽयुधः ॥५२॥ [N
वेग-दर्शी शुकेनाऽऽजौ मर्मण्य् अभि-हतः शरैः ।
N] उत्-तमं वेगम् आ-स्थाय रथं तस्य व्य्-अचूर्णयत् ॥५३॥ [N
राक्षसस् तपनो घोरो[2] नलं समभि (?भ्य) वर्तत[3] । [२३
३०] नलेन तु नलस् तस्य चक्षुषी[4] विन्य्-अपातयत्[5] ॥५४॥
भिन्न-गात्रः शरैस् तीक्ष्णैः क्षिप्र-हस्तेन रक्षसा[6] । [२४
३१] नि-जघानेन्द्र-वृक्षेण तपनं राक्षसं नलः ॥५५॥ [N
जम्बु-माली रथ-स्थस्[7] तु रथ-शक्त्या महा-बलः ।
३२] बिभेद सम्-अरे क्रुद्धो हनु-मन्तं स्तनाऽन्तरे ॥५६॥ [२१
तस्य तं रथम् आ-रुह्य[8] हनु-मान् कपि-कुञ्जरः ।
३३] प्र-ममाथ तलेनैव गिरिशृङ्गोपमं शिरः ॥५७॥ [२२
भिन्न-गात्रः शरैस्[9] तीक्ष्णैर् मित्र-घ्नेन[10] वि-भीषणः ।
३४] मित्र-घ्नं गदया वीरो नि-जघान स्तनोऽन्तरे ॥५८॥ [N
ग्रसन्तम् इव सैन्यानि प्र-घसं वानराऽधिपः ।[11]
३५] सु-ग्रीवः सप्त-पर्णेन नि-जघान ननाद च ॥५९॥ [२५
वर्षन्तं शर-वर्षाणि रात्तसं भीम-दर्शनम् ।
३६] नि-जघान विरूपाऽक्षं शरेणैकेन[12] लक्ष्मणः ॥६०॥ [२६
अग्नि-केतुश् च दुर्-धर्षो रश्मि-केतुश् च राक्षसः ।
३७] सुप्त[13]-घ्नो यज्ञ-कोपश् च रामं निर्-बिभिदुः[14] शरैः ॥६१॥ [२७
तेषां चतुर्णां रामस् तु शिरांसि सम्-अरे शितैः ।

---

१. रा$_2$-संरक्तो ॥ २. म-क्रोधो । ३. रा$_1$-०वर्तते । ४. रा$_2$-वक्षसि । ५. रा$_2$ फ-व्यत्यपातयत् ॥ ६. म-नास्ति ॥ ७. फ-रथस्थश्च ॥ ८. म-आस्थाय ॥ ९. रा$_2$-शतैस् । १०. म-लीनैर्मित्रघ्नो न । ११. म-नास्ति ॥ १२. प्र-शरेणैव च ॥ १३. रा$_1$ ल$_1$ ल$_2$ ब-सुतघ्नो । १४. रा$_2$-यज्ञकेतुश्च रामं विनिर्भिदुः ॥

३८] क्रुद्धश् चतुर्भिश् चिच्छेद शरैर् अग्नि-शिखोपमैः[1] ॥६२॥ [२८
वज्र-मुष्टिम् तु मैन्देन मुष्टिनाऽभि-हतो रणे ।
३९] पपात स-रथः साऽश्वः पुराऽद्रि[2]श्यत भू-तले ॥६३॥ [२९
वज्राऽशनि-सम-स्पर्शं द्वि-विदश् चाऽशनि-प्रभम् ।
N] जघान गिरि-शृङ्गेण मिषतां सर्व-रक्षसाम् ॥६४॥ [३३
नि-कुं[3]म्भः सैन्य-अरे नीलं नीला[4]ञ्जन-चय-प्रभम् ।
४०] बिभेद तरसा बाणैर् मेघं सूर्य इवांऽशुभिः ॥[4]६५॥ [३०
पुनः शर-शतेनैव क्षिप्र-हस्तो निशा-चरः ।[4]
४१] [4]बिभेद सम्-अरे [4]नीलं नि-कुम्भः प्र-जहास च ॥६६॥ [३१
तस्यै[5]वं रथ-चक्रेण नीलो वि-प्लाव्य चाऽऽ[6]हवे ।
४२] शिरश् चिच्छेद सं-यन्त[7]ः सोऽपतद् वि-ह्व[8]लो भुवि ॥६७॥ [३२
भल्लै[9]ः खड्गैर् गदाभिश् च शक्ति-तोमर-सायकैः ।
५३] अप-विद्धैश् च भग्नैश् च रथैः साङ्ग्रामिकैर् हयैः ॥६८॥ [४४
५४पू] नि-हतैः कुञ्जरैर् म[10]त्तैस् तथा वानर-राक्षसैः ।
५६पू] बभूवाऽऽयोधनं घोरं गोमायु-व्रज-सङ्कुल[11]म् ॥६९॥
५४उ] चक्राऽक्ष-युग-शस्त्रै[12]श् च भग्नैर् भू-तल[13]म् आ-श्रितैः । [४५
५६उ] कबन्धानि समुत्-पेतुस् तस्मिन् युद्धे सु-दारुणे ॥७०॥ [४६पू
वि-दार्यमाणा हरि-पुङ्ग[14]वैस् तदा
निशा-चराः शोणित-गन्ध-मोहिताः ।
पुनः सुसंर[15]ब्ध-तरा व्यव-स्थिता

---

१. ल$_1$ ब-अभिमुखोपमैः ॥ २. म-सुरद्रि इव । रा$_2$-त्रिपुरा इव ॥ ३. रा$_1$ ल$_1$ ल$_2$ अ-निकुंजस० । ४. म-नास्ति ॥ ५. रा$_1$-तस्य वै । ६. रा$_2$ फ म-विष्णुरिवाहवे । ७. रा$_2$-समरे । ८. रा$_1$ ल$_1$ ल$_2$ ब-विमलो । प्र-विपुलो ॥ ९. प्र-बलैः ॥ १०. प्र-दन्तैस् । ११. रा$_1$ ल$_1$ ब अ रा$_2$ म-०युवटसंकुलं । फ-०युवरसंकुलं ॥ १२. प्र-०गहस्तैश् । १३. रा$_2$-भूतितमा० ॥ १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-०पुंगवास् । १५. रा$_1$-सुसंरुद्धतरा । प्र-च संरब्धतरा ।

५९] दिवा-करस्याऽस्तमयाऽभिकाङ्क्षिणः ॥७१॥ [४७

इत्यार्षे रामायणे युद्धकाण्डे द्वन्द्व-युद्धं नामाऽष्टादशः सर्गः ॥१८॥

[वं-१९]= [एकोनविंशः सर्गः] =[दा-४४]

युध्यताम् एव तेषां तु तदा वानर-रक्षसाम् ।[३]
१] रविर् अस्तं गतो रात्रिः प्र-वृत्ता प्राण-हारिणी ॥१॥[४] [१
अन्योऽन्यं बद्ध[५]-वैराणां घोराणां जयम् इच्छताम् ।
२] सम्प्र-वृत्तं निशा-युद्धं तदा वानर-रक्षसाम् ॥२॥[४] [२
[६]राक्षसोऽसीऽति हरयो वानरोऽ[६]सीऽति राक्षसाः ।
३] अन्योऽन्यं सम्-अरे जघ्नुस् तस्मिंस् तमसि [७]दारुणे॥३॥[८] [३
एहि दारय भिन्[९]धीऽति वि-द्रावय वि-कर्षय ।
४] एवं सु-तुमुलः शब्दस् तस्मिंस् तमसि शुश्रुवे ॥४॥[१०] [४
कालाः काञ्चन-[११]संनाहास् तस्मिंस् तमसि [१२]राक्षसाः ।
५] सम्-अदृश्यन्त शैलेन्द्रा दीप्तौषधिधरा इव ॥५॥[१३] [५
ऋक्षास् तिमिर-संकाशास् तस्मिंस् तमसि भैरवे ।[१३] [N
६] परि-पेतुः सु-संक्रुद्धा भर्त्सयन्तो नि[१४]शा-चरान् ॥६॥
तस्मिंस् तमसि दुष्-पारे राक्ष[१५]सान् क्रोध-मूर्च्छितान् ।[१६] [६

---

१. फ म-नास्ति । २. ब प्र रा$_{२}$-लंकाकाण्डे । म-युद्धपर्वणि ॥ ३ म-नास्ति । ४. ल$_{१}$-नास्ति ॥ ५. रा$_{१}$-बुद्ध० ॥ ६. रा$_{१}$ ब प्र-०सोस्मीति ह... रोस्मीति । ७. ल$_{१}$ ल$_{२}$ अ-भैरवे । ८. अतः परमधिकः पाठः—रा$_{२}$-वानरा-न्राक्षसांश्चैव तस्मिंस्तमसि दारुणे ॥ ९.प्र रा$_{२}$ फ म-भिन्धि दारय एहीति । १०. ल$_{१}$-नास्ति ॥ ११. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब अ प्र-०संकाशास् । फ-सन्नादास् । १२. रा$_{१}$ ल$_{२}$ अ प्र म-भैरवे । १३. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब अ प्र-नास्ति । म-सम्प्रादृश्यन्त शैलेन्द्रा दीप्ता धातुनिशाचराः ॥ १४. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब अ प्र रा$_{२}$-निशाचराः ॥ १५. अ प्र-साः क्रोधमास्थिताः । रा$_{१}$ ल$_{१}$ ल$_{२}$ ब-०साः क्रोध-मूर्छिताः । १६. म-नास्ति ।

७] परि-पेतुः सु-संक्रुद्धा भक्षयन्तो वने-चराः [1]।।७।। [N
८पू] निन्युर् यम-क्षयं क्रुद्धा मुष्टिभिर् दशनैस् तथा ।[2] [N
हयांश् च काञ्चनाऽऽपीडान् ध्वजांश् चाऽऽभरणानि च ।
९] आ-प्लुत्य दशनैस् तीक्ष्णैर् नखैश् च नि-चकर्तिरे[3] ।।८।। [७
कुञ्जरान् कुञ्जराऽऽरोहान् पादातान्[4] रथिनो रथान्[5] ।
१०] आ-प्लुत्य वि-चकर्षुस् ते दशनैः क्रोध-मूर्च्छिताः ।।९।। [८
लक्ष्मणस्त्व्[6] अथ रामश् च[6] शरैर् अग्नि-शिखोपमैः ।
११पू] आ-दिश्याऽऽदिश्य रक्षांसि प्र-वराणि नि-जघ्नतुः ।।१०।। [९
तुरङ्ग-खुर-विध्वस्तं रथ-नेमि-समुद्धतम्[7] ।
१२] कण्ठान् अरौत्सीद् योधानां चक्षूंषि च मही-रजः[8] ।।११।। [१०
वर्तमाने तथा घोरे सं-ग्रामे लोम-हर्षणे ।
१३] लोहितौघा महाऽऽवर्ता नद्यो घोरा वि-सुस्रुवुः ।।१२।। [११
नादो[9] भेरी-मृदङ्गानां पणवानां च निः-स्वनः ।
१४] शङ्ख-वेणु-रवोन्मिश्रो[10] रक्षसां काम-रूपिणाम्[11] ।।१३।। [१२
हयानां स्वनमानानां राक्षसानां च निः-स्वनम्(?:)[11] ।[12]
१५] शस्त्राणां वानराणां च सं-बभूव सु-दारुणः ।।१४।। [१३
शस्त्र-पुष्पोपहारा सा तत्राऽऽसीद् युद्ध-मेदिनी ।
१६] दुर्-दर्शा दुर्वि-गाहा च शोणित-श्रा(स्रा)व-कर्दमा ।।१५।।[१५
सा बभूव निशा घोरा हरि-राक्षस-हारिणी ।
१८] काल-रात्रीऽव भूतानां सर्वेषां दुर्-अतिक्रमा ।।१६।। [१६

---

१. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब श्र प्र म-नास्ति ॥ २. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब श्र प्र फ म-नास्ति । अतः परमधिकः पाठः—रा$_{2}$-उत्पतंतश्च हरयो निपतंतश्च राक्षसाः । ३. फ म-विचकर्षिरे ॥ ४. रा$_{1}$ ल$_{2}$ ब श्र प्र म-पदा० । रा$_{2}$ फ-पताकान् । ५. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब श्र प्र म-हयान् ॥ ६. रा$_{2}$-०णश्च तथा रामः ॥ ७. रा$_{2}$-०समुत्थितं । फ-०समुद्गतं । ८. रा$_{2}$-महद्रजः ॥ ९. प्र-नाना । रा$_{2}$ फ-ततो । १०. प्र-०रवैर्मिश्रो । ११. म-नास्ति ॥ १२. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब श्र प्र-अत आरभ्य २६-शश्लोकपूर्वार्धं यावत्पाठो नास्ति ॥

ततस् ते राक्षसाः सर्वे तस्मिंस् तमसि दारुणे ।
१९] रामम् एवाऽभ्य्-अधावन्त सृजन्तः सायकान् बहून् ॥१७॥ [१७
तेषाम् आ-पततां शब्दः क्रुद्धानाम् अभि-गर्जताम् ।
२०] उद्-वृत्त[2] इव सर्वेषां सागराणां महा-स्वनः ॥१८॥ [१८
तेषां रामः शरैः षड्भिः षड्[3] बिभेद[3] निशा-चरान् ।
२१] निमिषाऽन्तर-मात्रेण शितैर् अग्नि-शिखोपमैः ॥१९॥ [१९
यम(?ज्ञ)-शत्रुं[4] च दुर्-धर्षं[4] महापार्श्व-महोदरौ ।
२२] वज्र-दण्डं[5](?ष्ट्रं)महा-कायं[5] तौ चोभौ शुक-सारणौ ॥२०॥ [२०
२३उ] ते तु रामेण तैर्[6] बाणैः सर्व-गात्रेषु ताडिताः ।
N] युद्धाद् अप-सृतास् त्रासाद् अव-शेषेण चाऽऽयुषः[7] ॥२१॥ [२१
ततः काञ्चन-चित्राऽङ्गैः सं-पतद्भिः सहस्र-शः । [N
२४] दिशश् चकार वि-मला वि-दिशश् च महा-बलः[8] ॥२२॥ [२२उ
ये त्व्[9] अन्ये[9] राक्षसा वीरा रामस्याऽभि-मुखे[10] स्थिताः ।
२५] ते वि-नष्टाः समा-साद्य पतङ्गा इव पावकम् ॥२३॥ [२३
ततः काञ्चन-चित्राऽङ्गैः शरैर् अग्नि-शिखोपमैः । [२२पू
२६] तत् तमो रात्रि-जं रामः किं-चिद् उत्-सारयंस् तदा[11] ॥२४॥ [N
तम् अन्ध-कारम् उत्-साद्य बाणैर् बाण-चरां[12] गतिम्[12] ।
२७] चक्षुर्-विषयम् आ-साद्य शरौघैः सम्-अवर्तयत् ॥२५॥ [N
आ-संपतद्भिर् वि-शिखै रुक्म-पुङ्खैः सहस्र-शः ।
N] बभूव रजनी चित्रा ख-द्योतैर् इव शारदी ॥२६॥ [२४
राक्षसानां महा-नादैर् वानराणां च गर्जितैः ।
२८] सा बभूव निशा घोरा भूयो घोर-तरा तदा[13] ॥२७॥ [२५

---

१. रा$_2$ म-क्षुद्राणाम् । २. रा$_2$-उद्वेलम् ॥ ३. म-षड्भिरेव ॥ ४. रा$_2$-रामशत्रू च दुर्धर्षौ । फ-रामशत्रून् दुर्धर्षो । ५. रा$_2$ फ-०दंष्ट्रो महाकायः ॥ ६. म-ते । ७. फ-वायुषः ॥ ८. म-महारथैः ॥ ९. म-युद्धे । १० म-०मुखं ॥ ११ म-नास्ति ॥ १२. रा$_2$-बाणवशं गतः ॥ १३. म-नास्ति ॥

भेरी-शब्देन महता प्र-वृद्धेन समन्त-तः ।[1]
३०] त्रिकूट(?टः)कन्दर-मुखैः प्रव्याऽहरद् इव स्थिताः(?तः)[2] २८ [२६
गो-लाङ्गूला महा-कायास् तमसस् तुल्य-वर्चसः ।
३१] सम्परि-ष्वज्य बाहुभ्याम् अखादन्त निशा-चरान् ॥२९॥[3] [२७
ततः क्रोध-समाविष्टः शर-वर्षेण रावणिः ।
३२] अङ्ग-दस्य चमूं घोरां नाशयामास सर्व-तः ॥३०॥ [N
ततः क्रोध-परीऽताऽऽत्मा युव-राजोऽङ्ग-दो बली ।
३३] शिलाम् उत्-पाटयामास बाहुभ्यां प्र-णदन् मुहुः ॥३१॥ [N
तां समुत्-क्षिप्य तेजस्वी छाद्यमानः शरोर्मिभिः ।
३४] रथं बभञ्ज वेगेन शिलया कपि-कुञ्जरः ॥३२॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे रात्रि-युद्धं नामैकोनविंशः सर्गः ॥१९॥

[वं-N]= **[विंशः सर्गः]** =[दा-४४]

वर्तमाने तथा रौद्रे[6] सं-ग्रामेऽति-भयङ्करे । [२९पू
अङ्ग-दो[7] वि-रथं वीरो[7] रावणिं समुपाऽद्रवत् ॥१॥ [N
इन्द्र-जित् तु रथं त्यक्त्वा हताऽश्वो[8] हत-सारथिः ।
अङ्ग-देन[9] सहाऽऽयस्तस् तत्रैवाऽन्तर् अधीयत ॥२॥ [२९उ-
स यज्ञ-वेद्यां विधि-वत् पावकं जुहुवेऽस्त्र-वित् ।
जुह्वतस् तस्य तत्राऽग्निं रक्त-[10]पीताऽम्बर-स्रजः ॥३॥ [N
आ-जहुस्[11] तत्र सं-भ्रान्ता राक्षसा यत्र रावणिः ।

---

१. म-नास्ति । २. म-चित्रकूटकन्दरप्रख्यैर्महाकायैर्महास्वनैः ॥ ३. रा₁ ल₁ ल₂ ब श्र प्र म-अत आरभ्य सर्गसमाप्तिं यावत्पाठो नास्ति ॥ ४. फ-नास्ति । ५. प्र रा₂ म-लंकाकांडे । ब-नास्ति ॥ ६. ल₁-युद्धे । श्र-घोरे । ७. म-०दोथ महावीरो ॥ ८. रा₁-हताश्वरथसा० । ९. म-अंगदं च समाहूय ॥ १०. म-रक्तोष्णीषावरश्रकुः ॥ ११. रा₁ ल₁ श्र प्र फ-आजुहुस् । रा₂-आजहंस् ॥

शस्त्राणि शत-पत्राणि सम्-इध्मोऽथ वि-भीतकान् ॥४॥ [N
लोहितानि च वासांसि स्रुचं[1] कार्ष्णाऽऽयसं तथा ।
सर्व-तोऽग्निं समा-स्तीर्य शत-पत्रैः स-तोमरैः ॥५॥ [N
छागस्याऽपि च कृष्णस्य कण्ठाज् जग्राह जीवतः[2] ।
शोणितं तच् च विधि-वत् स जुहाव रणोत्सुकः ॥६॥ [N
सकृद् एव सप्-ईद्धस्य[3] वि-धूमस्य महाऽर्चिषः ।
बभूवुः सु[4]-निमित्तानि वि-जयस्य प्र-दक्षिणम् ॥७॥ [N
प्रदक्षिणाऽऽवर्त्त-शिखस् तप्त[5]-हाटक-सन्निभः ।
हविस् तत् प्रति-जग्राह पावकः स्वयम् उत्थि(द्-स्थि)तः ॥८॥[6] [N
ततोऽग्नि-मध्याद् उत्-तस्थौ काञ्चन-स्यन्दनोत्तमः ।
चतुर्भिः काञ्चनाऽऽपीडैर् अश्वैर् युक्तः[8] प्र-भद्रकैः ।[7]
अन्तर्-धानं गतः श्री-मान् दीप्त-पावक-सन्निभः ॥९॥ [N
आ-रुरोह रथ-श्रेष्ठम् अन्तर्धान-चरं[9] शुभम् ।
अ-वध्यैर् वाजिभिर् युक्तं शस्त्रैश् च वि-विधैर् युतम् ॥१०॥ [N
समारोपित-नेपथ्यं[10] रथं शक्ति-समन्वितम् ।
जाज्वल्यमानं वपुषा तपनीय-विभूषितम् ॥११॥ [N
भल्लैश् चन्द्राऽर्ध-चन्द्रैश् च [11]तूर्णै वै समुप-स्थितः ।
जाम्बूनद-मयो नागस् तरुणाऽऽदित्य-सन्निभः ॥१२॥ [N
बभूवेन्द्र-जितः केतुर् वैडूर्य-समलङ्कृतः ।
हुत्वाऽग्निं राक्षसैर् मन्त्रैस् ततो वचनम् अब्रवीत् ॥१३॥ [N
अद्य हत्वा वधाऽर्हौ तौ मिथ्या-प्रव्रजितौ [12]वने ।

---

१. रा₂ फ म-स्रुव ॥ २. रा₂ फ म-जीवितम् ॥ ३. रा₁ ल₁ ल₂ ब अ-सधूमस्य । ४. रा₂ म-स्म नि० ॥ ५. रा₁ ल₁ ल₂ ब अ-तत्र हा० । ६. फ-नास्ति । ७. फ म-नास्ति । अतः परमधिकः पाठः—रा₁ ल₁ ल₂ ब अ प्र रा₂-हुत्वाग्निं तर्पयित्वा च दैत्यदानवराक्षसान् । वाचयित्वा ततः स्वस्ति प्रयुक्ताशीर्द्विजातिभिः ॥ ८. रा₂-युक्तैः ॥ ९. रा₂-रथ्यं ॥ १०. म-०र्द्धैवकैश् । ११. रा₂ फ-तूर्णीरैः समुपस्थितं । म-सर्वतः समलङ्कृतं । १२. प्र रा₂ फ म-रणे ।

जयं पित्रे प्र-दास्यामि रावणाय मनः-प्रियम् ॥१४॥ [N
अथ निर्-वानराम् उर्वीं हत-राघव-लक्ष्मणाम् ।
करिष्यामि ह्य् अ-सुग्रीवाम् इत्य् उक्त्वाऽन्तर्-अधीयत १५ ॥ [N
स ददर्श महा-वीर्यौ तौ[2] उभौ राम-लक्ष्मणौ ।[1]
क्षिपन्तौ शर-जालानि कपि-मध्ये व्यव-स्थितौ ॥१६॥ [N
स तु वैहायसं प्राऽऽप्य रथ-स्थौ (?स्थो) राम-लक्ष्मणौ ।
अ-चक्षुर्विषये तिष्ठन् विव्याध नि-शितैः शरैः ॥१७॥ [N
तौ तस्य[3] रथ-वेगेन परीऽतौ भ्रातराव् उभौ ।
गृहीत्वा धनुषी व्योम्नि घोरान मुमुचतुः शरान् ॥१८॥ [N
प्र-च्छादयन्तौ गगनं शर-जालैर् महा-बलौ ।
तं महाऽसुर-सङ्काशं न तौ पस्पृशतुः शरैः ॥१९॥ [N
स वि-धार्या[4]ऽन्ध-काराणि माया-बल-समन्वितः ।
दिशश् चाऽन्तर्-दधे[5] वीरो नीहार-तमसा[6]ऽऽवृतः ॥२०॥ [N
नैव ज्या-तल-निर्घोषो न[7] च[8] नेमि-रथ-स्वनः ।
शुश्रुवे चरतस् तस्य न च रूपं स्म दृश्यते ॥२१॥ [N
घनाऽन्धकार-तिमिरे[9] शिला-वर्षम् इवाऽद्भुतम् ।
शर-वर्षं महा-बाहुश् चचां(?का)ल(?र) शर-संवृतः[10] ॥२२॥ [N
राघवौ[11] सूर्य-सङ्काशैर् घोरैर् दत्त-वरैः[12] शरैः ।
बिभेद सम्-अरे क्रुद्धः सर्व-गात्रेषु रावणिः ॥२३॥ [N
तौ हन्यमानौ नाराचैर् धाराभिर् इव पर्वतौ ।
हेम-पुङ्खान् नर-व्याघ्रौ घोरान् मुमुचतुः[13] शरान् ॥२४॥ [N

---

१. म-नास्ति । २. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-०वीरौ रथस्थौ ॥ ३. म-महासुरसंकाशौ ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-विधूया० । ५. म-०दधन् । ६. रा$_2$ फ म-०रतिमिरावृताः । ७. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ म-नापि । ८. प्र म-नेमिखरस्वनः ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-०तिमिरं । १०. रा$_2$ म-नाराचशर० । प्र म-०ल शरसंहतः ॥ ११. रा$_1$ ल$_2$ ब श्र प्र-राघवं । १२. म-बहुतरैर्भृशं । १३. प्र-चक्रमतुः ॥

अन्तरिक्षे त्व्[1] अन्[1]-आसाद्य ते रिपुं कङ्क-वाससः ।
नि-पेतुर् उर्व्यां वि-शिखाः शतशो[2]ऽथ सहस्र[2]-शः ॥२५॥ [N
पन्न[3]-गैस् तु शरोद्भूतै[3] रावणिः प्र-हसन् रणे ।
अति-मात्रं शरौघेण ताडयामास[4] राघवौ[5] ॥२६॥ [N
तान् वि-धम्य[6] ततो भल्लैर् अनीकैर्[7] वि-चकर्षतु[7]ः[8] ।
राघवौ परमाऽऽयस्तौ ज्वलद्भिर् ज्वलनोपमौ ॥२७॥ [N
यतो यतो ददृशतुः शरान् आ-पततः शितान्[10] ।
ततस् ततो बाण-वर्षं राघवौ वि-ससर्जतुः ॥२८॥[9] [N
इन्द्र-जित् तु दिशः सर्वा रथेन वि-चरन् बली ।
विव्याध तौ दाशरथी लघु[11]-हस्तः शितैः शरैः ॥२९॥ [N
तौ तु विद्धौ महाऽऽत्मानौ रुक्म-पुङ्खैर् अ-जिह्मगैः ।
बभूवतुर् दाशरथी बन्धु[12]-जीवैर्[12] इवाऽऽवृतौ[13] ॥३०॥[13] [४०
नाऽस्य वेद गतिं कश्-चिन् न रूपं न धनुः-स्वनम् ।
न चाऽस्य लक्षणं कश्[14]-चित् सम्-अर्थश् चाऽऽप्तुम् आ-हवे[14] ३१N
तेन विद्धाश् च हरयो नि-हताश् च गताऽसवः ।
राघवाऽर्थे पराऽऽक्रान्ता धरण्याम् उप-शेरते ॥३२॥[15] [N
लक्ष्मणस्[16] तु सु-संक्रुद्धः क्रोधाद्[16] भ्रातरम् अब्रवीत् ।
ब्राह्मम्[17] अस्त्रं[17] प्र-योक्ष्यामि वधाऽर्थं सर्व-रक्षसाम् ॥३३॥ [N
तम् उवाच ततो रामो लक्ष्मणं शुभ-लक्षणम् ।
एकस्य रक्षसो हेतोः पृथिवीं हन्तुम् इच्छसि ॥३४॥ [N

---

१. म-तमासाद्य । २. रा₂ फ म-शराः शतस० ॥ ३. म-शरैस्तु पन्नगीभूते । ४. रा₂ फ म-पीड० । ५. प्र-रावणिः ॥ ६. म-निश्चित्य । ७. रा₂ फ म-अनेकैर्निचकर्ततुः । ८. म-त्वरया युक्तौ । ९. फ-नास्ति ॥ १०. प्र-शरान् ॥ ११. रा₂-लघुहस्तौ ॥ १२. रा₂ फ म-बंधुजीवस्त्रजोपमौ ॥ १३. प्र-नास्ति ॥ १४. रा₂ फ-किंचित्सूर्यस्येवाभ्रसंप्लवे । म-किंचित्सूर्यस्येवाभ्रमण्डले ॥ १५. म-नास्ति ॥ १६. प्र-०णस्त्वथ सं० । म-नास्ति । १७. अ-ब्रह्मणोस्त्रं ॥

अ-युध्यमानान् प्र-च्छन्नान् प्राऽञ्जलीञ् छरणाऽऽगतान् ।
पलायमानान् सुप्तांश् च न त्वं हन्तुम् इहाऽर्हसि ॥३५॥ [N
अस्यैव तु वधे बुद्धिं[1] करिष्यामो[2] नरर्षभ ।
आ-देक्ष्यामि[3] महा-वेगान् काम-गान् हरि-यूथपान् ॥३६॥ [N
तं एनं मायया छन्नं[4] क्षुद्रम्[5] अन्तर्-हितं भृशम् ।
राक्षसं नि-हनिष्यन्ति[6] प्रेक्ष्य वानर-यूथपाः ॥३७॥ [N
स एवम् उक्त्वा वचनं महा-यशा[7]
वधाय रौद्रस्य नृशंस-कारिणः ।
रघु-प्रवीरः प्लवगर्षभैर् वृतस्
तदा महाऽऽत्मा त्वरितं निर्-ऐक्षत ॥३८॥ [N

इत्यार्षे रामायणे[8] युद्ध-काण्डे[9] इन्द्रजिद्-युद्धं नाम विंशः सर्गः ॥२०॥

[वं – २०]= [एकविंशः सर्गः] =[दा – ४५]

स तस्य गतिम् अन्व्-इच्छन् राज-पुत्रः प्रताप-वान् ।
१] रामो[10] दिदेश बल-वान् दश वानर-यूथपान् ॥१॥ [१
जाम्ब-वन्तं सु-षेणं च[11] नीलं च प्लवगर्षभम् ।
२] अङ्ग-दं वालि-पुत्रं च मैन्दं च शरभं तथा ॥२॥ [२
द्वि-विदं च हनू-मन्तं गजं च सु-महाबलम्[12] ।
३] ऋषभं चर्षभ-स्कन्धम् आ-दिदेश रिपुं प्रति ॥३॥ [३

---

१. रा$_2$ फ म-यत्नं । २. म-करिष्यसि । ३. म-आदेश्यामो ॥ ४. रा$_2$-एनं मायाप्रतिछन्नं । ५. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-क्रुद्धं । ६. रा$_1$ ल$_1$ ल$_2$ श्र फ-निष्पतिष्यन्ति ॥ ७. म-महात्मा ॥ ८. फ म-नास्ति । ९. ब प्र रा$_2$-लंकाकांडे । रा$_2$ फ म- युद्धपर्वणि ॥ १०. रा$_1$ ल$_1$ ब-नास्ति ॥ ११.म-द्वौ सुषेणस्य दायादौ ॥ १२. रा$_2$-तु महा० ॥

ते[1] तु प्र-हृष्टा हरयो भीमान् उद्-यम्य पाद-पान् ।
४] आ-काशं विविशुः सर्वे मार्गमाणा यतो भयम् ॥४॥ [४
तेषां वेग-वतां वेगम् इषुभिर् वेगवत्-तरैः[2] ।
५] अस्त्र[3]-वित् परमाऽस्त्रेण यूथ-पांस्[4] तान्[5] अवारयत् ॥५॥ [५
ते भीम-वेगा हरयो नाराचैर् बहुभिः क्षताः ।
६] अन्ध-कारे न ददृशुर् मेघैः सूर्यम् इवाऽऽवृतम् ॥६॥ [६
तेन[6] वानर-शार्दूला राक्षसेन वि-पश्चिता ।
७] निर्-धूताः शर-वेगेन न्य्-अपतन्त मही-तले ॥७॥ [N
ततस्[7] तौ[8] राघवौ वीरौ सर्व-मर्माऽतिगैः शरैः ।
८] भृशम् आ-वेधयाञ्चक्रे रावणिः समिति-जयः ॥८॥ [७
निरन्तर-शरीरौ ताव् उभौ च भ्रातरौ कृतौ ।
९] क्रुद्धेनेन्द्र-जिता वीरौ पन्न-गैः शरतां गतैः ॥९॥ [८
तयोः क्षतज-मार्गेभ्यो सुस्राव रुधिरं बहु ।
१०] ताव् उभौ सम्प्र-काशेते पुष्पिताव् इव किं-शुकौ ॥१०॥ [९
ततः पर्यन्त-रक्ताऽक्षो[10] नीलाऽञ्जन-चयोपमः ।
११] रावणी राघवौ[11] वाक्यम् अन्तर्धान-गतोऽब्रवीत् ॥११॥ [१०
युध्यमानम् अ-लक्ष्यं मां शक्रोऽपि त्रि-दशेश्वरः[12] ।
१२] द्रष्टुम् आ-सादितुं वाँऽपि[13] न शक्तः किं पुनर् युवाम् ॥१२॥ [११
एवम् उक्त्वा तु धर्म-ज्ञौ भ्रातरौ राम-लक्ष्मणौ ।
१३] निर्-बिभेद शितैर् बाणैः शक्राऽशनि[14]-सम-प्रभैः[15] ॥१३॥ [१३

१. प्र-ततो ॥ २. रा१ श्र-बलवत्तरैः । ३. ब-शस्त्रवित् । ४. रा२ फ म-यूथपानां ॥ ५. प्र-तत्ते । रा२ फ म-ते तु ॥ ६. म-ततः स । ७. म-नास्ति ॥ ८. रा१ ल१ ल२ ब-०तां गतौ । प्र-पर्वमर्मातिगैः शरैः ॥ ९. रा२ म-प्रचकाशेते ॥ १०. रा१ ल१ ल२ ब श्र प्र-रक्ताक्षौ । ११. म-भ्रातरौ ॥ १२. ल२-त्रिदिवेश्वरः । १३. फ-वापि ॥ १४. रा२-चक्रस्पर्शसम० । १५. म-नास्ति ॥

१४उ] एतौ रोष-परीऽताऽऽत्मा नयामि यम-सादनम्[1] । [१२उ
भिन्नाऽञ्जन-चय-प्रख्यो[2] वि-स्फार्य वि-पुलं धनुः ।
१५] भूय एव शरान् घोरान् वि-ससर्ज तयोर् मृधे ॥१४॥ [१४
ततो मर्मसु मर्म-ज्ञो मज्जयन् नि-शितान् शरान् ।
१६] राम-लक्ष्मणयोर् वीरो ननाद च मुहुर् मुहुः ॥१५॥ [१५
स रामं लक्ष्मणं चैव घोरैर् दत्त-वरैः शरैः । [स०४४
N] बिभेद सम्-अरे क्रुद्धः सर्व-गात्रेषु रा[3]क्षसः ॥१६॥ [३८
अ-दृश्यः सर्व-भूता[4]नां कूट-योधी निशा-चरः ।
N] बबन्ध शर-बन्धेन ताव् उभौ राम-लक्ष्मणौ ॥१७॥ [३९
बद्धौ तु शर-बन्धेन निष्प्र[5]यत्न-भुजौ कृतौ ।[6] [स०४५
१८] निमेषाऽन्तर-मात्रेण न शक्तौ[7] तं निर्-ईक्षितुम्[8] ॥१८॥ [१६
तौ तु निर्भिन्न[10]-सर्वाऽङ्गौ शरतल्पाऽऽहितौ रणे[9] ।
१९] ध्वजाव् इव महेन्द्रस्य रज्जु-युक्तौ प्र-कम्पितौ[11] ॥१९॥ [१७
तौ सम्प्र-चलितौ वीराव् अर्दितौ मर्म-भेदिभिः[12] ।
२०] नि-पेततुर् महेष्वासौ जगत्यां जगती-पती ॥२०॥ [१८
तौ वीर-शयने तत्र शयानौ रुधिरोक्षितौ ।
२१] शर-वेष्टित-सर्वाऽङ्गाव् आर्तौ परम-पीडितौ ॥२१॥ [१९
नह्य् अ-विद्धं तयोर् गात्रे बभूवाऽन्त[13]रम् अण्व् अपि ।
२२] अ[14]-निर्विद्धं च नाऽध्वस्तम् अपि सूक्ष्मम् अ-जिह्मगैः २२ [२०
तौ तु वीरौ शरैर्[15] बद्धौ रक्षसा काम-रूपिणा ।[16]

---

१. म-नास्ति ॥ २. अ-०प्रख्यौ । ३. रा१-राघवः ॥ ४. रा२ फ म-सर्वयोधानां ॥ ५. प्र-निष्प्रयत्नौ भुजौ । अ रा२ म-निःप्रकम्पभुजौ । ६. फ-नास्ति । ७. प्र-शक्तस् । रा२ फ-शेकुस् । ८. म-चैव वीक्षितुम् ॥ ९. अ-नास्ति । १०. ब-विच्छिन्न० । ११. अ म-नास्ति ॥ १२. म-नास्ति । १३. प्र-०व क्षतम् । १४. रा२-नानिर्भिन्नं । ब-अनिरुद्धं । १५. रा१ अ प्र-शतैर् । १६. अतः परमधिकः पाठः—फ-शराचितशरीरौ तौ क्षितौ निपतितावुभौ । प्रकाशेतां महाबाहू द्रावितं सलिलं यथा ॥

२४] रक्तं सुस्रुवतुर् गात्राज् जलं प्रस्रवणाद्[१] इव ॥२३॥ [२१
पातितः[२] प्रथमं रामः शर[३]-तल्प-निपीडितः ।
२५] क्रोधाद् इन्द्र-जिता येन पुरा शक्रो[४]ऽपि निर्-जितः ॥२४॥ [२२
पुनश् च लक्ष्मणो वीरो निश्-चेष्टो धरणीं[५] गतः ।
N] पश्चात्[६] स राक्षसेन्द्रो(?न्द्रे)वै(?ण) बबन्धे[७] शर-पञ्जरे[८] ॥२५॥[९] [N
२६उ] नालीकैर् अर्ध-नालीकैर् भल्लैर् मुक्तैः[१०] सहस्र-शः ।
N] नाराचैर् वत्स-दन्तैश् च सित-दंष्ट्रैः[११] शरैः शितैः ॥२६॥ [२३
२७उ] स वीर-शयने[१२] शिश्ये[१३] दिव्यम् आ-दाय कार्मुकम् ।
छिन्न[१४]-मुष्टि-परीणाहं त्रिणतं[१५] रुक्म-वाजिनम्[१६] ॥२७॥ [२४
बाणपाताऽन्तरे रामः पतितं पुरुषर्षभम्[१७] ।
२८] शयानं लक्ष्मणं दृष्ट्वा निर्-आशो जीवितेऽभवत्[१८] ॥२८॥ [२५
बद्धौ[१९] तु वीरौ वि-वृतौ शयानौ
तौ[२०] वानराः सम्परि-वार्य सर्वे ।
सम्-आसते वायु-सुत-प्रधाना
N] वि-षादम् आर्ताः[२१] परमं च जग्मुः ॥२९॥ [२८

इत्यार्षे[२२] रामायणे युद्ध-काण्डे[२३] शर-बन्धो नामैकविंशः सर्गः ॥२१॥

---

१. फ-प्रस्रवणाद् ॥ २. रा₂-पतितः । ३. रा₁ ल₁ ल₂ अ प्र-शरतुल्यनिपी० । ब-शरतल्पं नि० । रा₂-शरतल्पेन पी० । ४. म-शक्रो विनिर्जितः ॥ ५. रा₁ ल₁ ल₂ ब अ प्र-धरणीतले । ६. रा₁ ल₁ ल₂ ब अ प्र-पुरः पश्चाद्राक्षसेन्द्रो । ७. रा₁ ल₁ ल₂ ब अ प्र-ववर्ष । ८. रा₁ ल₁ ल₂ ब अ प्र फ-०पञ्जरं । ९. म-नास्ति ॥ १०. म-वेतसपत्रकैः । ११. प्र रा₂ फ म-सिंह-दंष्ट्रैः ॥ १२. प्र- सुवीर० । १३. अ-श्रेष्ठो । म-दिव्ये । १४. रा₁ ल₁ ल₂ ब अ रा₂ फ-छन्नमु० । १५. रा₁ ल₁ ल₂ ब अ प्र-नृत्ययन् । म-त्रिनेत्रं । १६. रा₁-ऊरुवा० । १७. प्र-पुरुषर्षभः । १८. म-जीविते तदा ॥ १९. प्र-विबद्धौ तौ वीरनरौ । म-बद्धौ च वी० । २०. रा₂-ते । २१. प्र-अन्तः ॥ २२. फ म-नास्ति । २३. प्र-लंकाकांडे । म-युद्धपर्वणि ॥

ततो द्यां पृथिवीं चैव वीऽऽक्षमाणा[1] वनौकसः ।
१] ददृशुः स-हितौ बद्धौ भ्रातरौ राम-लक्ष्मणौ ॥१॥ [१
धर्षित्वोप-रते मेघे कृत-कर्मणि राक्षसे ।
२] आ-पपाताऽथ तं देशं सु-ग्रीवः स-विभीषणः ॥२॥ [२
अङ्ग-दो द्वि-विदो मैन्दः सु-षेणः कु-मुदो नलः ।
३] तूर्णं हनु-मता सार्धम् अ(?आ)गमन् यत्र राघवौ ॥३॥ [३
निश्-चेष्टौ मन्द-निः[2]श्वासौ शोणि[3]तौघ-परिप्लुतौ[3] ।
४] शर-जालो[4]ऽऽवृतौ स्तब्धौ शयानौ शरतल्प-गौ [3]॥४॥ [४
निः-श्वसन्तौ यथा नागौ निश्-चेष्टौ मन्द-विक्रमौ ।
५] रुधिर-स्राव-दिग्धाऽङ्गौ तापनीयाव् इव ध्वजौ ॥५॥[3] [५
तौ वीर-शयने वीरौ शयानौ मन्द-चेतसौ ।
६] यूथ-पैस् तैः परि-वृत्तौ बाष्प-व्याकुल-लोचनैः [5]॥६॥[3] [६
राघवौ पतितौ दृष्ट्वा बाण-जाल-समर्दितौ ।
७] बभूवुर् व्यथिताः सर्वे वानराः स-विभीषणाः ॥७॥ [७
अन्तरिक्षं निर्-ऐ[6]क्षन्त दिशः सर्वाश् च वानराः ।
८] न तु तं मायया छन्नम् अपश्यन् रावणिं रणे ॥८॥ [८
तं तु माया-[7]प्रतिच्छन्नं माययैव वि-भीषणः ।
९] वीऽऽक्षमाणो ददर्शाऽथ भ्रातुः पुत्रम् अव-स्थितम् ॥९॥[8] [९
तम् अप्रतिम-कर्माणं अ-प्रतिद्वन्द्वम् आ-हवे ।
१०] ददर्शाऽन्तर्-हितं वीरं नि-नदन्तं वि-भीषणः ॥१०॥ [१०
इन्द्र-जिव् त्व् आत्मनः कर्म तौ शयानौ निर्-ईक्ष्य च ।
११] उवाच परम-प्रीतो हर्षयन् सर्व-नैर्ऋतान् ॥११॥ [१२

---

१. रा$_1$ ल$_1$ल$_2$ प्र फ रा$_2$ म-वीक्ष्यमाणा ॥२. म-०निःस्वनौ । ३. म-नास्ति । ४. रा$_1$-०जालवृतौ । प्र रा$_2$ फ-०जालाचितौ ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-नास्ति ॥ ६. फ-निरीक्षंते ॥ ७. प्र-मायापरिच्छिन्नं । ८. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र म-नास्ति ॥

दूषणस्य नि-[1]हन्तारौ खरस्य च तथैव च ।
१२] [2]शातितौ मामकैर् बाणैर् भ्रातरौ राम-लक्ष्मणौ ॥१२॥ [१३
[3]नैतौ मोक्षयितुं शक्याव् [4]एतस्माद् इषु-[4]बन्धनात् ।
१३] [5]समस्तैश् [5]च समा-गम्य सर्षिसङ्घैः सुराऽसुरैः ॥१३॥ [१४
यत्-कृते चिन्तयानस्य शोकाऽऽर्तस्य पितुर् मम ।
१४] अ-[6]स्पृष्टे [6]शयने गात्रैर् [7]दीर्घ-यामाऽस्ति यामिनी ॥१४॥ [१५
कृत्स्नेयं नगरी लङ्का नदी वर्षास्व् इवाऽऽकुला ।
१५] सोऽयं शू[8]ल-करोऽन्-अर्थः सर्वेषां [9]नो [9]हतो मया ॥१५॥ [१६
स-लक्ष्मणस्य रामस्य सर्वेषां च वनौकसाम् ।
१६] वि-क्रमा निष्-फलाः सर्वे यथा शरदि तोय-दाः ॥१६॥ [१७
एवम् उक्त्वा तु तान् सर्वान् राक्षसान् परिपार्श्व-तः ।
१७] यूथ-पान् [10]अथ सर्वांस् तांस् ताडयामास राक्षसः ॥१७॥ [१८
तांस् ताडयित्वा बाणौघैस् त्रासयित्वा च वानरान् ।
१९] प्र-जहास [11]ततो मन्दं [11]मन्दं वचनम् अब्रवीत् ॥१८॥ [२४
शर-बन्धेन घोरेण मया बद्धौ चमू-मुखे ।
२०] स-हितौ भ्रातराव् एतौ नि-शामयत राक्षसाः ॥१९॥ [२५
एवम् [12]उक्तास् तु ते सर्वे राक्षसाः परिपार्श्व-तः ।
२१] परं वि-स्मयम् आ-[13]पन्नाः कर्मणा तेन [14]तोषिताः ॥२०॥ [२६
वि-नेदुश् च महा-नादान् सर्वे ते जलदोपमाः ।
२२] हतो राम इति ज्ञात्वा रावणिं [15]चाऽभ्य-[15]अपूजयन् ॥२१॥ [२७

---

१. रा₂ फ म-च हन्तारं । २. अ-पातितौ । रा₂ फ-सूदितौ । म-स्पन्दितौ ॥ ३ रा₁ ल₁ ल₂ ब-न तौ । ४. रा₁ ल₁ ल₂ ब अ प्र-एतौ तौ दृढबन्धनैः । ५. रा₂ फ म-सर्वैरपि ॥ ६. रा₂ फ म-अस्पृष्टश० । ७. प्र रा₂-दीर्घमायाति । म-त्रियामा याति ॥ ८. रा₂ म-मूलहरो० । फ-शूलहरो० । ९. रा₂ फ म-निहतो ॥ १०. प्र-तथा । रा₂ म-अपि ॥ ११. रा₂ फ म-महाहासं ततो ॥ १२. रा₁ ल₁ ल₂ ब-उक्त्वा । १३. म-आजग्मुः । १४. रा₁ ल₁ ल₂ ब अ प्र-दीपिताः ॥ १५. रा₂-चाप्यपू० ॥

निष्-प्रकम्पौ कृतौ दृष्ट्वा ताव् उभौ राम-लक्ष्मणौ ।
२३] वसु-धायां निर्-उच्छ्वासौ हताव् इत्य् अन्व्-अमन्यत[1] २२ [२८
ततः शीघ्रं पुरीं लङ्कां रावणिः समिति-जयः[2] ।
२४] प्र-विवेश महेष्वासो हर्षयन् सर्व-नैर्ऋतान्[3] ॥२३॥ [२९
राम-लक्ष्मणयोर् दृष्ट्वा शरीरम् इषुभिश् चितम् ।
२५] वानरेन्द्रस्य सं-जातं सु-ग्रीवस्य[4] महद् भयम् ॥२४॥ [३०
२६उ] तम् उवाच भय-त्रस्तं[5] वानरेन्द्रं वि-भीषणः ।
सबाष्प-वदनं दीनं क्रोध[6]-व्याकुल-लोचनम् ॥२५॥ [३१
२७] अलं त्रासेन सु-ग्रीव बाष्प-वेगो नि-गृह्यताम्[7] ।
एवं-प्रायाणि युद्धानि वि-जयो नाऽस्ति नैष्ठिकः ॥२६॥ [३२
२८] वि-जयो[8] भाग्य-तोऽस्माकं यदि वीर भविष्यति ।
अद्यैवं[9] तौ वि-मोक्ष्येते[10] भ्रातरौ राम-लक्ष्मणौ[11] ॥२७॥ [३३
२९] पर्यव-स्थापयाऽऽत्मानं सर्वान्[12] अप्य् अत्र वानरान् ।
सत्य-धर्माऽनुरक्तानां नाऽस्ति मृत्यु-कृतं भयम् ॥२८॥ [३४
३०] मोह-सन्ताप-संयुक्तं रामं प्रति महा-कपे ।
वि-मुच्यताम्[13] अयं त्रासः शूराणाम् एष निश्-चयः[14]॥२९॥ [N
३१] एवम् उक्त्वा ततस् तस्य जल-क्लिन्नेन पाणिना ।
सु-ग्रीवस्य शुभे नेत्रे प्र-ममार्ज वि-भीषणः ॥३०॥ [३५
३२] प्र-मृज्य वदनं तस्य कपि-राज्ञो महा-द्युतिः ।
अब्रवीत् काल-सम्प्राऽऽप्तम् अ-सम्भ्रान्तो वि-भीषणः[15]॥३१ [३७

---

१. रा$_1$ ल$_2$ ब श्र प्र-अनुमन्यत । रा$_2$-अभ्यमन्यत ॥ २. प्र रा$_2$-समर्तिजयः। ३. ल$_1$ ब-सर्वराक्षसान् ॥ ४. प्र-०वस्यागमद् ॥ ५. रा$_2$ फ म-परित्रस्तं। ६. ब-बाष्पव्याकुल० ॥ ७. रा$_2$-न गृह्यतां ॥ ८. रा$_2$-ममैषा भाग्यतास्मा० । फ-शंसेम भा० । ९. श्र-अद्यैवैतौ । प्र-मोहमेतौ । रा$_2$-मोहघातौ । फ-मोहान्मे तौ । १०. फ-विमुच्येते । ११. म-नास्ति ॥ १२. रा$_2$ फ-सनाथं मां च ॥ १३. श्र-विबुध्यतां । १४. फ म-निर्णयः ॥ १५. रा$_2$-नास्ति ॥

३३] अ-कालः कपि-राजेन्द्र वैक्लव्यम् अभि[1]-वर्तितुम् ।
अति-मोहो ह्य् अ-कालेषु व्य्-असनायोप-पद्यते ॥३२॥ [३८
३४] तस्माद् उत्-सृज्य वैक्लव्यं सर्व-कार्य-विनाशनम् ।
हितं राम-पुरोगानां सैन्यानाम् अनु-चिन्तय ॥३३॥ [३९
३५] अथवा रक्ष्यतां रामो यावत् संज्ञा-विपर्ययः ।
लब्ध-संज्ञौ तु काकुत्स्थौ भयं [2]नो व्यप-नेष्यतः ॥३४॥[3] [४०
३६] नैतत् किं-चिद् धि रामस्य न च रामो मुमूर्षति ।
न चैनं त्यजते लक्ष्मीर् दुर्-लभा या गताऽऽयुषाम् ॥३५॥ [४१
३७] तस्माद् आ-श्वासयाऽऽत्मानं मां समा-ज्ञापयस्व च ।
यावत् सर्वाण्य् अनीकानि पुनः सं-स्थापयाम्य् अहम् ।३६। [४२
३८] एते ह्य् उत्फुल्ल-नयनास् त्रासाद् आगत-साध्वसाः ।
[4]कर्णात् कर्ण(ं)-प्र[5]व्यथिता हरयो हरि-पुङ्गवे ॥३७॥ [४३
३९] मां तु दृष्ट्वा प्र-धावन्तम् अनीकेषु प्र-[6]हर्षकम् ।
[7]त्यक्ष्यन्ति हरयस् त्रासं सर्पा जीर्णाम् इव त्वचम् ॥३८॥ [४४
४०] एवम् उक्त्वा तु सु-ग्रीवं स्निग्धं [8]राम(?मे)-विभीषणः ।
४१.पू] चतुर्भिः सचिवैः सार्धम् अनुसं-[9]चरते बलम् ॥३९॥ [४५
४२उ] इन्द्र-जित् तु महा-[10]मायः सर्व-सैन्य-समन्वितः ।
प्र-विवेश पुरीं लङ्कां जीमूतम् इव भास्-करः ॥४०॥ [४६
४३] [11]तत्र रावणम् आ-सीनम् अभि-वाद्य कृताऽञ्जलिः ।
आ-चचक्षे प्रियं[12] पित्रे[12] नि-हतौ राम-लक्ष्मणौ ॥४१॥ [४७
४४] उत्-पपात ततो [13]हृष्टः पुत्रं च परि-षस्वजे ।

---

१. रा१ ल२ ब श्र फ-अतिव० ॥ २. रा२ फ-ते । ३. म-नास्ति ॥ ४. रा१ ल१ ल२ ब-कर्णात्...प्र० । रा२ फ-०र्णप्रकथिता ।५. ल१-नास्ति ॥ ६. रा१ल२-प्रकर्षकम् । ब-प्रकर्षणम् ॥७. म-त्यजंति ॥ ८. रा१ ल१ल२ ब श्र प्र रा२ फ-रामाद्विभीषणः । ९. प्र-अनुचिन्तयते ॥ १०. ब-महाकायः । रा२-०मायी ॥ ११. ल२-ततो । १२. रा१ ल१ ल२ ब श्र प्र म-प्रियः पुत्रो ॥ १३. रा२-दृष्ट्वा ।

रावणो रक्षसां मध्ये श्रुत्वा शत्रू नि-पातितौ ॥४२॥
मूर्ध्नि चैनम् उपा[1]ऽजिघ्रत् परि-तुष्टेन चेतसा । [४८
४९] पृष्टश्[2] चैवं ततस् तस्मै पित्रे सर्वं[3] न्य्-अवेदयत् ॥४३॥ [४९पू
स हर्ष-वेगाऽनुगताऽन्तरात्मा
श्रुत्वा गिरम् तस्य महा-रथस्य ।
जहौ ज्वरं दाशरथेः समुत्थं(द्-स्थं)
४६] प्र-हृष्टवांश् चाऽपि सुतं निर्-ऐक्षत[4] ॥४४॥ [५०

इत्यार्षे रामायणे युद्ध[5]-काण्डे शर-बन्ध[6]-निवेदनं नाम द्वाविंशः सर्गः ॥२२॥

[वं-२२]= [त्रयोविंशः सर्गः] =[दा-४७]

प्रति-प्रविष्टे लङ्कायां कृताऽर्थे रावणाऽऽत्मजे ।
१] ररक्षुः परि-वार्यैतौ राघवौ प्लवगर्षभाः ॥१॥ [१
हनु-मान् अङ्ग-दो नीलः सु-षेणः कु-मुदो नलः ।
२] गजो गवाऽक्षः पनसः सानु-प्रस्थो महा-हरिः ।
३पू] जाम्ब-वान् ऋषभश् चैव रम्भः शत-बलिः पृथुः ॥२॥ [२
४उ] व्यूढाऽनीकाश्[7] च यत्ताश्[8] च द्रुमान् आदाय सोऽश्मनः[9] ।
वीऽऽक्षमाणा[10] दिशः सर्वास् तिर्यग् ऊर्ध्वं च सर्व-तः[11] ।

---

१. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-उपाघ्राय । २. रा$_2$ फ म-प्रसन्नस्तु । ३. रा$_2$ फ म-तत्त्वं ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-निरीक्ष्य ॥ ५. ब रा$_2$-नास्ति । प्र-लंकाकांडे । म-युद्धपर्वणि । ६. रा$_1$-शरबन्धो नि० ॥ ७. रा$_1$ ल$_2$ ब प्र-व्यूढाः नीकाश्च । ८. रा$_1$ ल$_1$ ल$_2$ ब-यन्ताश्च । ९. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-चात्मनः । १०. रा$_1$ ल$_1$ श्र प्र रा$_2$ फ म-त्रीक्ष्यमाणा । ११. प्र रा$_2$ फ म-सर्वशः ॥

५] तृणेष्व् अपि वि-चेष्टत्सु राक्षसान् एव मेनिरे ॥३॥ [३
रावणश्[1] चाऽपि सं-हृष्टो वि-सृज्येन्द्र-जितं सुतम् । [४पू
६] प्रीत्या परमया युक्तः कृत-कर्माणम् उत्-तमम् ॥४॥ [N
गते तस्मिन् महा[2]-काये रावणस्य सुते तदा ।
७] स्व-गृहे चिन्तयामास रावणो लोक-रावणः ॥५॥ [N
कृतम् इन्द्र-जिता कर्म दुष्-करं यत् सुरैर् अपि ।
८] सीता श्रुत्वा भृशं तच् च दीना त्यक्ष्यति[3] जीवितम् ॥६॥ [N
अथवा स्त्री-स्वभावेन चापल्य-वश-मोहिता ।
९] यथा-कामं ममाऽद्याऽऽशु वि-वशा वशम् एष्यति ॥७॥ [N
अत्रोपायो[4] ममाऽयं च यथा-वत् परि-चिन्तितः ।
१०] राक्षस्यः सहसा श्रुत्वा सीतायाः परि-रक्षणे ॥८॥ [N
व्या-पृता या ममाऽऽदेशे स-ततं मे वशाऽनुगाः ।
११] हर्षेण महता युक्ता भविष्यन्ति विशेष-तः ॥९॥ [N
अथ वृद्धाम् उपाय-ज्ञां सर्व-भावाऽनुशङ्किनीम् ।
१२] आ-नयामास तां राजा राक्षसीनां महत्-तमाम् ॥१०॥ [N
राक्षसी त्रि-जटा नाम शासनात् तम् उप-स्थिता ।
१३] ताम् उवाच ततो दृष्ट्वा राक्षसीं राक्षसेश्वरः ॥११॥ [५
हताव् इन्द्र-जिता शंस वैदेह्या राम-लक्ष्मणौ ।
१४] पुष्पकं तु समा-रोप्य दर्शयस्व रणाऽजिरम् ॥१२॥ [६
यम् आ-श्रयम् अव-ष्टभ्य सीता मां नोप-तिष्ठते[13] ।
१५] सोऽस्या भर्ता सह भ्रात्रा निर्-अस्तो रण-मूर्धनि ॥१३॥ [७

---

१. रा₂ म-रावणस्त्वपि ॥ २. ल₂-०कार्ये ॥ ३. प्र-त्यजति ॥ ४. रा₂-अद्योपायो । ५. रा₁ ल₁ ल₂ ब श्र-यथावच्च । ६. रा₁-मया यः । ल₁ ल₂ ब श्र-यथायं ॥ ७. रा₁-सहसा ॥ ८. म-प्राहिणोद् ॥ ९. रा₂-वैदेह्यै । १०. म-च ॥ ११. रा₁ ल₁ ल₂ ब श्र प्र-०यमुपष्टभ्य । १२. ल₁-सा । १३. रा₁ ल₁ ल₂ ब श्र म-०तिष्ठति ।

निर्-[1]अपेक्षा निर्-[2]उद्विग्ना निर्वि-[3]शङ्का च मैथिली ।
१६] माम् उप-स्थास्यते सीता सर्वाऽऽभरण-भूषिता ॥१४॥ [८
अद्य काल-[4]वशाद् आशां नि-वृत्तां राम-सम्भवाम् ।
१७] सम्[5]-अवेक्ष्य च[6] मां सीता[7] समुप[8]-स्थास्यतेऽबला ॥१५॥ [९
तस्य तद् वचनं श्रुत्वा राक्षसस्य[9] दुर्-आत्मनः ।
१८] राक्षस्यस् त्रि-जटाऽऽद्यास् तु प्र-जग्मुर् यत्र पुष्पकम् १६ [१०
ततः पुष्पकम् आ-दाय राक्षस्यस् त्वरितास् तदा ।
१९] अशोक-वनिका-संस्थां मैथिलीं समुपाऽगमन् ॥१७॥ [११
ताम् आ-गत्य तु राक्षस्यो भर्तृ-शोक-पराजिताम् ।
२०] वि-मानं पुष्पकं सीतां शनैर् आऽरोपयन् शुभाम् ॥१८॥ [१२
ततः सीतां समा-रोप्य त्रि-जटां चैव राक्षसीम् । [१३पू
२१] रावणोऽकारयल् लङ्कां पताका-ध्वज-मालिनीम् ॥१९॥
घोषयामास च तदा लङ्कायां राक्षसेश्वरः ।
२२] हताव् इन्द्र-जिता सं-ख्ये ताव् उभौ राम-लक्ष्मणौ ॥२०॥ [१४
वि-मानेन तु सा सीता तदा त्रि-जटया सह ।
२३] ददर्श वानराणां तु[10] स्कन्धाऽऽवार-निवेशनम् ॥२१॥ [१५
प्रहृष्ट-[11]वदनांश् चैव राक्षसान् भीम-[12]दर्शनान् ।
२४] वानरांश् च सु-दुःखाऽऽर्तान् राम-लक्ष्मण-पार्श्व-तः ॥२२॥ [१६
ततः सीता ददर्शोभौ शयानौ शर-विक्षतौ ।
२५] लक्ष्मणं चैव रामं च वि-संज्ञौ[13] अति-पीडितौ ॥२३॥ [१७

---

१. प्र रा$_2$ फ म-निर्विशंका । २. म-निरुद्योगा । ३. प्र रा$_2$ फ म-निरपेक्षा ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ-०वशादाशा निवृत्ता रामसम्भवा । रा$_2$-कालवतीमाशां निक्त्तां राम० । ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ-समवीक्ष्य । ६. प्र रा$_2$ फ म-सा । ७. रा$_2$-भीता । ८. रा$_2$ फ म-ममोप० ॥ ९. रा$_2$ फ म-रावणस्य ॥ १०. प्र-हि । म-च ॥ ११. रा$_2$ फ म-०ष्टमनसश् । १२. प्र-भीमविक्रमान् ॥ १३. प्र रा$_2$ फ म-०ज्ञौ शरपी० ॥

विध्वस्त-कवचौ वीरौ विप्रविद्ध-शराऽऽसनौ ।
२६] सायकाऽऽचित-सर्वाऽङ्गौ शयानौ धरणी-तले ॥२४॥ [१८
तौ दृष्ट्वा भ्रातरौ तत्र शोक-बाष्प-समाकुला । [१९पू
२७] वेपन्ती दुःखिता सीता करुणं वि-ललाप ह ॥२५॥ [२०उ
सा शोक-बाष्पाऽपिहिता निर्-ईक्ष्य
तौ भ्रातरौ देव-सम-प्रभावौ ।
वि-तर्कयन्ती नि-धनं तयोः सा
N] दुःखाऽन्विता वाक्यम् इदं जगाद ॥२६॥ [२२

इत्यार्षे रामायणे युद्ध-काण्डे राम-लक्ष्मणयोः शर-बन्धनं नाम त्रयोविंशः सर्गः ॥२३॥

[वं-२३]= [चतुर्विंशः सर्गः] =[दा-४८]

साऽस्रु-पात-मुखी दीना तौ दृष्ट्वा राम-लक्ष्मणौ ।
२] हाऽऽर्य-पुत्रेति रुदती करुणं वि-ललाप ह ॥१॥ [N
भर्तारं नि-हतं दृष्ट्वा लक्ष्मणं च महा-रथम् ।
१] वि-ललाप भृशं सीता करुणं जनकाऽऽत्मजा ॥२॥ [१
निष्पि-पिषन्ती स्व-चरणौ क्रोशन्ती मधुर-स्वना ।
३] इदम् अन्ते वि-लापस्य सीता वचनम् अब्रवीत् ॥३॥ [N
४पू] ऊचुर् लक्षणिनो ये मां पुरा ह्य् अ-विधवेति च ।
५उ] तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृत-वादिनः ॥४॥ [२
इमानि तानि पद्मानि पार्श्व-तो यैः किल स्त्रियः ।
८] अधि-राज्येऽभि-षिच्यन्ते नरेन्द्रैर् भर्तृभिः सह ॥५॥ [६

---

१. रा$_2$ फ म-सायकैश्चित० ॥ २. ल$_1$ ब-०समाकुलौ ॥ ३. रा$_2$-०न्वितं । ४. रा$_2$ प्र-लंकाकांडे । म-लंकापर्वणि । ५. रा$_2$ फ म-सीताया राम० ॥ ६. प्र रा$_2$ फ म-वदती ॥ ७. ल$_1$ ल$_2$ ब अ-निष्पिपेष स्व० । रा$_2$-निष्पीडयन्ती च० ॥ ८. म-लक्षणतो ॥

वैधव्यं यान्ति नार्यो यैर् लक्षणैर् भाग्य-दुर्बलाः ।
९] आत्मनस् तानि पश्यामि पश्यन्ती हत-लक्षणा ॥६॥ [७
सत्यानि किल पद्मानि स्त्रीणाम् उक्तानि लक्षणे ।
१०] तान्य् अद्य नि-हते रामे वि-तथानि भवन्ति हि ॥७॥ [८
केशाः सूक्ष्माः समा नीला भ्रुवौ चाऽसंहते मम ।
११] न च मे रोम-शे जङ्घे दन्ताश् च न वि-रागिणः ॥८॥ [९
शङ्खौ नेत्रे करौ पादौ गुल्फौ च ललितौ मम ।
१२] तनु-वृत्त-नखाः स्निग्धाः समाश् चाऽङ्गुलयो मम ॥९॥ [१०
स्तनौ चाऽविरलौ पीनौ समौ मे मग्न-चूचुकौ ।
१३] मग्ना चोत्-सङ्गिनी नाभिः पार्श्वौ स्कन्धौ च मेऽञ्चितौ॥१०। [११
समो वर्णो मृदुः स्निग्धो मृदून्य् अङ्ग-रुहाणि च । [१२पू
१४] अ-विरूक्षा च मे वाणी नित्यं मधुर-भाषिणी ॥११॥ [N
अ-विस्मिता चाऽविगा(?ग्रा)ह्या नित्यं चाऽहम् अ-विक्लवा । [N
१५] प्रति-ष्ठितां द्वा-दशभिर् माम् ऊचुः शुभ-लक्षणाम् ॥१२॥ [१२उ
१६पू] समग्र-संमम् अ-च्छिद्रं पाणि-पादं च वर्ण-वत् ।
मन्द-स्मितं मे वचनं कन्या-लक्षणिनो विदुः ॥१३॥ [१३
१७] ननु नामाऽभि-षेको मे ब्राह्मणैः पतिना सह ।
१८पू] दैव-ज्ञैः कुशलैर् उक्तो नूनं तेऽनृत-वादिनः ॥१४॥[12] [१४
वीर-पार्थिव-पत्नी त्वं धन्येति मम ये विदुः ।[12]
N] तेऽद्य सर्वे हते रामे ज्ञानिनोऽनृत-वादिनः ॥१५॥[13] [N

---

१. रा₂-स्वैर्नार्यो । २. रा₁ ल₁ ब प्र-०दुर्लभाः । ३. रा₁ ल₁ ल₂ ब अ रा₂ फ म-तान्न ॥ ४. रा₁ ल₁ ल₂ ब अ प्र फ-वासं० ॥ ५. रा₁ ल₁ ल₂ ब-पद्मौ । ६. रा₂ फ म-गुल्फावुपचितौ ॥ ७. प्र-च मेचकौ । फ-च सेवितौ । रा₂-समोचितौ ॥ ८. रा₁ ल₁ ल₂ ब अ प्र-च वागर्थ्या । ९. रा₁-०लक्ष्मणाम् ॥ १०. रा₁ ल₁ ब अ प्र-समग्रं यवम् । ल₂-समग्रमिव । फ-०ग्रं चव मे । ११. रा₁ ल₁ ल₂ ब-०पादे । प्र-०पद्मं ॥ १२. ब म-नास्ति ॥ १३. अ-नास्ति ॥

१८] एतौ हित्वा जन-स्थानं प्र-वृत्तिं चोप-लभ्य मे[1] ।
तीर्त्वा सागरम् अ-क्षोभ्यं गोष्-पदे भ्रातरौ हतौ ॥१६॥ [१५
१९] ऐन्द्रं वारुणम् आग्नेयं रौद्रं वायव्यम् एव च ।
अस्त्रं ब्रह्म-शिरश् चैव राघवौ[2] प्रत्य्-अपद्यताम् ॥१७॥ [१६
२०] अ-दृश्यमानेन रणे मायया वासवोपमौ ।
मम नाथाव् अ-नाथाया नि-हतौ राम-लक्ष्मणौ ॥१८॥ [१७
२१] न च दृष्टि-पथं प्राऽऽप्य राघवाभ्यां रणे रिपुः ।
जीवन् प्रतिनि-वर्तेत यद्य् अपि स्यान् मनो-जवः ॥१९॥ [१८
२२] न कालस्याऽति-भारोऽस्ति कृताऽन्तः खलु दुर्-जयः ।
यत् तु रामः सह भ्रात्रा शेते रिपु-विनिर्जितः[3] ॥२०॥ [१९
२३] नाऽहं शोचामि भर्तारं नि-हतं न च लक्ष्मणम् ।
नाऽऽत्मानं जननीं वाऽपि यथा श्वश्रूं तपस्विनीम् ॥२१॥ [२०
२४] सा हि चिन्तयते नूनं समाप्त-व्रतम् आत्म-जम् ।
कदा द्रक्ष्यामि काकुत्स्थं स-सीतं सह-लक्ष्मणम् ॥२२॥ [२१
२५] परि-देवयतीं तां तु राक्षसी त्रि-जटाऽब्रवीत् । [२२
२६पू] मा वि-षादं कृथा देवि भर्ता हि तव जीवति ॥२३॥ [२३
कारणानि तु वक्ष्यामि महान्ति सदृशानि च ।
२७] यथा तौ भ्रातरौ वीरौ जीवितौ[4] राम-लक्ष्मणौ ॥२४॥ [२४
नहि कोप-परीऽतानि हर्ष-पर्युत्सुकानि[5] च ।
२८] भवन्ति युधि योधानां मुखानि नि-हते पतौ ॥२५॥ [२५
— हत-वीर-प्रधाना हि हतोत्साहा[6] हतोद्यमा ।
३०] सेना भ्रमति युद्धेषु हत-कर्णेव[7] नौर् जले ॥२६॥ [२७

---

१. रा$_1$-चाप० । रा$_2$-चोपलक्ष्य वै । फ-०लभ्य वै । म-चापलभ्य ते ॥ २. रा$_2$-भ्रातरौ ॥ ३. रा$_1$ ल$_1$ ब-०विवर्जितः ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-जीवंतौ ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-हर्षयंत्युत्सु० ॥ ६. म-महोत्साहा महोद्यमा । ७. रा$_2$-हतेव नौर्जले यथा ॥

इयं पुनर् अ-सम्भ्रान्ता स्वस्थे-यूथा तरस्विनी ।
३१] सेना रक्षति काकुत्स्थं शयानं रण-मूर्धनि ॥२७॥ [२८
इदं वि-मानं वैदेहि पुष्पकं नाम नाम-तः ।
N] दिव्यं न धारयेत् त्वां हि यदि रामो हतो भवेत् ॥२८॥[2] [२६
सा त्वम् एवं सु-विस्पष्टैर् अनु-मानैः सुखोदये ।
३२] अ-हतौ पश्य काकुत्स्थौ स्नेहाद् एतद् ब्रवीमि ते ॥२९॥ [२९
अन्-ऋतं नोक्त-पूर्वं मे न च वक्ष्यामि मैथिलि ।
३३] चारित्र-दुःख-शीलत्वात् प्र-विष्टाऽसि हि मे मनः ॥३०॥ [३०
न तौ शक्यौ रणे जेतुम् अपि सर्वैः सुराऽसुरैः ।
३४] तादृशं दर्शनं दृष्ट्वा मया चाऽऽवेदितं तव ॥३१॥
इदं च सु-महच् चिह्नं शुभं पश्यामि मैथिलि । [३१
३५] निः-संज्ञौ चाऽप्य् उभाव् एतौ श्रियो नैव वि(?व्य)युज्यताम् ३२
प्रायेण गत-सत्त्वानां पुरुषाणां गताऽऽयुषाम् ।
३६] दृश्यमानेषु वक्त्रेषु परं भवति वैकृतम् ॥३३॥ [३२
त्यज शोकं च दैन्यं च दुःखं च जनकाऽऽत्मजे ।
३७] राम-लक्ष्मणयोर् अर्थे नैतौ शूरौ वि-जीवितौ ॥३४॥ [३३
श्रुत्वा तु वचनं तस्याः सीता सुर-सुतोपमा ।
३८] कृताऽञ्जलिर् उवाचेदम् एवम् अस्त्व् इति मैथिली ॥३५॥ [३४
वि-मानं पुष्पकं नाम सन्नि-वर्त्य मनो-जवम् ।
३९] लङ्कां त्रि-जटया सीता दीना भूयः प्र-वेशिता ॥३६॥ [३५
तत्र त्रि-जटया सार्धं पुष्पकाद् अव-तीर्य सा ।[6]
४०] अशोक-वनिकाम् एव राक्षसीभिः प्र-वेशिता ॥३७॥ [३६

---

१. प्र-इतयूथा ॥ २. अतः परमधिकः पाठः—रा₂-पुष्पके त्वं समारूढा वरवर्णिनि शोभने । नैतद्धारयते पापं विधवां नापि मैथिलीं ॥ ३. फ-वाप्य् । ४. प्र-शयानौ च वि० । रा₂-लक्ष्मणो वाप्यसु० । फ म-लक्ष्म्या नैव वि० ॥ ५. ल₁-प्रयाणगत० । रा₂-प्राणेन गत० ॥ ६. रा₁ ल₁ ल₂ ब-नास्ति ॥

तस्मिन् वने सा मनुजेन्द्र-पत्नी
तौ राज-पुत्रौ पतितौ स्मरन्ती ।
न शर्म लेभे हृदि ताडितेव
४१] दिग्धेन बाणेन मृगीऽव बाला ॥३८॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे सीता-विलापो नाम चतुर्विंशः सर्गः ॥२४॥

[वं-२४]= **[पञ्चविंशः सर्गः]** =[दा-४९]

घोरेण शर-बन्धेन बद्धौ दशरथाऽऽत्मजौ ।
१] निः-श्वसन्तौ यथा नागौ शयानौ रुधिरोक्षितौ ॥१॥ [१
सर्वे ते वानर-श्रेष्ठाः स-सुग्रीवा महा-बलाः ।
२] परि-वार्य महाऽऽत्मानौ तस्थुः शोकेन पीडिताः ॥२॥ [२
३पू] अथ दीर्घेण कालेन सं-ज्ञां लेभे नरोत्तमः ।
४पू] प्रत्यवैक्षत चाऽऽत्मानं शोणितेन परि-प्लुतम् ॥३॥ [N
५उ] अ-दीनो दीनया वाचा रामः परम-मन्युमान् ।
६पू] अभ्य्-अभाषत् स्वर-भ्रष्टो हरिभिः परि-वारितः ॥४॥ [N
४उ] वि-ललाप ततो रामो मन्दम् अस्रूणि वर्तयन् ।
५पू] लक्ष्मणं पतितं दृष्ट्वा दुःख-शोक-समन्वितः ॥५॥ [N
६उ] किं नु मे सीतया कार्यं लङ्कया जीवितेन च ।
शयानं योऽद्य पश्यामि लक्ष्मणं शुभ-लक्षणम् ॥६॥ [५

---

१. रा१ ल१ ल२ ब अ-०न्द्रपुत्री ॥ २. फ म-नास्ति । ३. रा२ प्र-लंकाकांडे ॥ ४. म-अत आरभ्य १९-शश्लोकपर्यन्तं नास्ति ॥ ५. रा२ म-०मसत्त्ववान् ॥ ६. फ-अश्रूण्यव० ॥ ७. रा२-वा ॥

७] यत्र क्व-चन मे भार्या पुत्राश् चाऽन्ये च बान्धवाः ।[1]
तं तु देशं न[2] पश्यामि[3] यत्र सोदर्यम् आप्नुयाम् ॥७॥ [N
८] पर्जन्यो वर्षते शस्यम् इतीऽयं लौकिकी श्रुतिः ।
प्र-वादश् चाऽपि नित्योऽयं[3] मातृ-जं न स वर्षति ॥८॥ [N
९] ममाऽम्बा च सु-मित्रा च कौसल्या जननी च ते[4] ।
१०पू] नाऽनयोर् अन्तरं किं-चिन् मातृ-गौरव-कारितम् ॥९॥ [N
N] किं नु वक्ष्यामि कौसल्यां मातरं किमु कैकयीम् ।
N] कथं चाऽहं सु-मित्राया मुखं द्रक्ष्यामि[5] चाऽस्नु-मत् । [८
१४पू] उपाऽऽलम्भं न शक्ष्यामि[6] सोढुं तस्या मुख-च्युतम् ॥१०॥ [N
वि-वत्सां वि-लपन्तीं च क्रोशन्तीं कुररीम् इव ।
१३] कथम् आ-श्वासयिष्यामि सु-मित्रां लक्ष्मणं विना ॥११॥ [९
१०उ] अप्य् एव हिम-वान् क्षर्येत्[7] प्र-पतेद् वा दिवा-करः ।
सागरश् च क्षयं गच्छेद् अनलश् चाऽपि शीत-ताम् ॥१२॥ [N
११] आपोऽद्रव-त्वं च तथा पवनश् चाऽगतिर् भवेत् ।
१२पू] अम्बाया न सु-मित्राया स्नेह-नाशो भवेन् मयि ॥१३॥ [N
१५उ] लक्ष्मणश् चाऽपि[8] परया भक्त्या माम् अनु-गच्छति ।
१६पू] पतन्तम् अपि[9] पाताले नैव नाऽनु-पतेद् धि माम् ॥१४॥ [N
१७उ] धारयेयं[10] कथं चाऽहं प्राणान् सौमित्रिणा विना ।
१८पू] भाराऽऽर्त[11] इव भारेण दुःखेनैव परि-प्लुतः[12] ॥१५॥ [N
१६उ] शक्या सीता-समा नारी जीव-लोके वि-चिन्वता ।
१७पू] न लक्ष्मण-समो भ्राता सचिवः साम्परायिकः ॥१६॥ [६

---

१. रा$_{2}$-यत्र क्वचिल्लभे भार्यां पुत्रानन्यांश्च बान्धवान् । २. रा$_{2}$-नमस्यामि ॥ ३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब-नित्यं यो ॥ ४. रा$_{2}$-मे ॥ ५. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र फ म-पश्यामि । ६. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब-पश्यामि ॥ ७. रा$_{1}$ प्र-दीर्येत् ॥ ८. प्र रा$_{2}$ फ-चैव । ९. ल$_{1}$-इव ॥ १०. प्र रा$_{2}$ फ-०येहं । ११. ल$_{1}$ ल$_{2}$ प्र-भारान्त । रा$_{2}$-भारार्थ । १२. ल$_{1}$-परिप्लवः ॥

१८उ] इहैव देहं त्यक्ष्यामि नहि शक्ष्यामि जीवितुम्॥ । [N
१४उ] किं नु वक्ष्यामि शत्रु-घ्नं धर्म-ज्ञं भरतं नु किम् ॥१७॥ [१०
१५पू] सह येन वनं यातो विना च पुनर् आ-गतः ।
N] उपाऽऽलम्भं न शक्ष्यामि सोढुं लक्ष्मण-मातृ-तः ॥१८॥ [११
१८उ] इहैव देहं[1] त्यक्ष्यामि नाऽहं जीवितुम् उत्-सहे । [१२
धिङ् मां दुष्कृत-कर्माणम् अन्-आर्यं[2] यत्-कृतेऽप्य् अयम्[2] ।
१९] लक्ष्मणः पतितः शेते शर-तल्पं गताऽसु-वत् ॥१९॥ [१३
यो नित्यं स-विषण्णं मांम्[3] आ-श्वासयति दुःखितम्[3] ।
२०] पराऽसुर् नाऽद्य शक्नोति सोऽयं माम् उप-सर्पितुम् ॥२०॥[4] [१४
N] येनाऽद्य[5] बहवो युद्धे राक्षसाः शासिताः शरैः ।
२१उ] सोऽयं वि-चेष्ट(?ष्टि)ते(?तः)शूरः शर-तल्प(?ल्पे)गताऽसुवत्[१५
शयानः शर-तल्पेऽस्मिन् स्व-शोणित-परिप्लुतः ।
२२] शर-जालाऽऽवृतो भाति भास्-करोऽस्तम् इव व्रजन् ।२२। [१६
बाणैर् अर्दित-सर्वाऽङ्गो नैव शक्नोति चेष्टितुम् ।
२३] दशाऽस्य[6] बाधते कष्टा[7] दृष्टी रागेण पूर्यते[8] ॥२३॥ [१७
यथैव मां वनं यान्तम् अनु-यातो महा-द्युतिः ।
२४] अहम् अप्य् अनु-यास्यामि तथैवैनं[9] यम-क्षयम् ॥२४॥ [१८
इष्ट-बन्धु-जनो नित्यं नित्यं मां समनु-व्रतः ।
२५] इमाम् अव-स्थां गमितो ममाऽन्-आर्यस्य दुर्-नयैः[10] ॥२५॥ [१९
सु-रुष्टेनैव[11](?नापि)शूरेण लक्ष्मणेन न सं-स्मरे ।
२६] परुषं वि-प्रियं वाऽपि श्रावितो(?तं) वि-जने वने ॥२६॥[1] [२०

---

१. रा₁ ल₁ ल₂ ब श्र प्र-जीवं । २. रा₂-०ते ह्ययम् । म-०ते स्वयम् । ३. श्र-मां शासयति सुदुः० । ४. रा₁ ल₁ ल₂ ब म-नास्ति । ५. श्र प्र रा₂ फ-किं नु वक्ष्यामि शत्रुघ्नं ॥ ६. प्र-जातस्य । रा₂ फ-रुजास्य । म-रुजा च । ७. म-कृच्छ्राद् हृदि । ८. रा₂ फ म-सूच्यते ॥ ९. प्र रा₂ फ म-यथा त्वेनं ॥ १०. म-नास्ति ॥ ११. रा₁ ल₁ ब श्र प्र-सन्तुष्टेनैव । ल₂-सन्तुष्टेनेव । फ-सुतुष्टेनैव ॥

लक्ष्मणेन ततः पूर्वं जीवता[1] वन-जीविकाम्[2] ।
२७]विसंवादित-पूर्वो[3](?वं)वा उक्त-पूर्वो(?वं)ऽपि(?वा)वाऽ(?प्य)क्षमर्म्
वि-सृजत्य् एक-वेगेन पञ्च बाण-शतानि यैः[4] ।
२८] इष्व्-अस्त्रे सदृशो राज्ञः कार्तवीर्यस्य लक्ष्मणः ॥२८॥ [२१
अस्त्रैर् अस्त्राणि यो हन्याच् छक्रस्याऽपि महाऽऽत्मनः ।
२९] सोऽयम् उर्व्यां हतः शेते महाऽर्ह-शयनोचितः ॥२९॥ [२२
अयं मिथ्या-प्रलापो मे हत्वा युद्धे[6] दशाऽऽननम् ।
३०] यन् मया न कृतो राजा राक्षसानां वि-भीषणः ॥३०॥ [२३पू
अस्मिन् मुहूर्ते सु-ग्रीव प्रति-गन्तुं त्वम् अर्हसि ।
३१] त्वां मां च[5] स महा-राज(?जो) रावणोऽभि-द्रविष्यति॥३१॥ [२४
अङ्ग-दं तु पुरस्-कृत्य स-सैन्यः स-सुहृज्जनः[8] ।
३२] सागरं तर सु-ग्रीव पुनस् तेनैव सेतुना ॥३२॥ [२५
वि-जयोऽपि हि सु-ग्रीव लक्ष्मणे नि-धनं गते ।
३३] अन्धस्येवोदितश् चन्द्रः कां प्रीतिं जनयिष्यति ॥३३॥ [N
कृतं हनु-मता कर्म यद् अन्यैर् दुष्-करं रणे ।
३४] बल-विक्रम-सम्पन्ना राक्षसा मर्दिता[9] रणे ॥३४॥ [N
३५उ] अङ्ग-देन कृतं कर्म मैन्देन द्वि-विदेन च ।
सु-षेणेन च तुष्यामि नीलेन च नलेन च ॥३५॥ [N
३६] युद्धं सं-पातिना सं-ख्ये घोरं केसरिणा कृतम्[10] । [२७उ
गवयेन गवाऽक्षेण गजेन पनसेन च ।
३७] अन्यैश् च हरिभिर् युद्धं मद्-अर्थे त्यक्त-जीवितैः ॥३६॥
न चाऽति-क्रमितुं[11] शक्यं दैवं सु-ग्रीव मानवैः[12] । [२८

---

१. रा₂-वृण्वता । २. रा₂-जीवितुम् । प्र फ-०वित्तम् । ३. प्र-किं वा संवादित० । ४. म-नास्ति ॥ ५. रा₂ म-च ॥ ६. म-युधि ॥ ७. रा₂-हि ॥ ८. प्र फ-ससुहृद्गणः । रा₂-समरुद्गणः ॥ ९. रा₁ ल₁ ल₂ ब अ प्र-मुदिता फ-निहता ॥ १०. प्र रा₂ फ म-युद्धं केसरिणा संख्ये घोरं संपातिनाकृतं ॥ ११. म-०क्रामितुं । १२. प्र रा₂ फ म-मानुषैः ॥

३८] यस्य ते सं-भ्रमो नाऽस्ति रावणं प्रति युध्यतः ॥३७॥ [N
यत् तु कार्यं वयस्येन सु-हृदा[1]ऽपि परं-तप ।
३९] कृतं तन् नाऽस्ति सं-देहो भवता गम्यतां गृहे[2] ॥३८॥ [२९
मित्र-कार्यं कृतम् इदं भवद्भिर् वानरर्षभौः[3] ।
४०] अनु-ज्ञाता मया सर्वे यथेष्टं गन्तुम् अर्हथ ॥३९॥ [३०
शुश्रुवुश् चाऽपि ते तस्य वानराः परि-देवितम्[6] ।
४१] ते सर्वे मुमुचुर्[4] बाष्पं नेत्रेभ्यः[5] कातरेक्षणाः ॥४०॥ [३१
ततः सर्वाण्य् अनीकानि स्थापयित्वा समन्त-तः ।
४२] आ-जगाम गदा-पाणिः कृत-कर्मा वि-भीषणः ॥४१॥ [३२
तं दृष्ट्वाऽद्रुतम् आ-यान्तं शैलाऽञ्जन-चय-प्रभम् ।
४३] वानरा वि-द्रुताः सर्वे मन्यमानाः स्म रावणिम् ॥४२॥ [३३
वि-चेष्टौ[7] विगत-ज्ञानौ रण-रेणु-समुक्षितौ[8] ।
N] शयानौ शरतल्प-स्थौ द्रष्टुम् आऽयाद् वि-भीषणः ॥४३॥ [३४
ते राक्षसेन्द्राऽऽत्मज-दृष्ट-वीर्या
नि-पातितौ राज-सुतौ च दृष्ट्वा ।
जघन्य-तो विव्यथिरे वनौकसो
N] वातेरिता वै शरदीऽव मेघाः ॥४४॥ [३५

इत्यार्षे रामायणे युद्ध[9]-काण्डे राम-विलापो[10] नाम पञ्चविंशः सर्गः ॥२५॥

---

१. ल$_{2}$ ब प्र रा$_{2}$-०दा हि । २. रा$_{2}$ फ म-गृहं ॥ ३. म-०र्षभैः ॥ ४. प्र रा$_{2}$ फ-चक्रुरश्रूणि । ५. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र फ-नेत्रैः कृष्णतरेक्षणाः । ६. म-नास्ति ॥ ७. रा$_{2}$-निश्चेष्टौ । ८. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब-रणे रेणुसमुत्थितौ । प्र फ-रणे रेणु० ॥ ९. रा$_{2}$ प्र-लंकाकांडे । ब-नास्ति । म-युद्धपर्वणि । १०. म-रामप्रलापो ॥

अथोवाच महा-तेजाः सु-ग्रीवः प्लवगाऽधिपः[1] ।
१] किम् इयं व्यथते[2] सेना भिन्ना नौर् इव सागरे ॥१॥ [१
२पू] सु-ग्रीवस्य वचः श्रुत्वा राज-पुत्रोऽङ्ग-दोऽब्रवीत् । [२
N] इह बाणाऽर्दितौ दृष्ट्वा शयानौ राम-लक्ष्मणौ ॥२॥
३पू] शर-जालाऽऽवृतौ वीराव् उभौ परम-दुःखितौ[3] । [३
N] वरदान-कृतैर् बाणैर् निष्कम्प-भुजौ कृतौ ॥३॥ [N
[4]तेनेयं दीर्यते[4] सेना हीनाऽनेन[5] महाऽऽत्मना ।
४] स्वभाव-चपलां जातिं किं न जानासि वानरीम् ॥४॥ [N
५पू] अब्रवीद् वानरेन्द्रस् तु सु-ग्रीवो वालिनः सुतम् ।
N] नैव(?वं) तावद् अ-पूर्वेण भवितव्यं भयेन नः ॥५॥ [४
विषण्ण-वदना ह्य्[6] एते[7] नाना-प्रहरणा दिशः ।
६] पलायन्ते हि हरयस् त्रासाद् उत्फुल्ल-लोचनाः ॥६॥ [५
अन्योऽन्यं न च जल्पन्ति[8] निर्[9]-ईक्षन्ते न[9] पृष्ठ-तः ।
७] प्र-माथयन्ति चाऽन्योऽन्यं पतितं[10] लङ्घयन्ति च ॥७॥ [६
एतस्मिन्न् अन्तरे वीरो गदा-पाणिर् वि-भीषणः ।
८] सु-ग्रीवं वर्धयामास राघवौ च निर्-ईक्ष्य तौ ॥८॥ [७
वि-भीषणं तु सु-ग्रीवो दृष्ट्वा वानर-भीषणम् ।
९] ऋक्ष-राजं समीप-स्थं धूम्रं वचनम् अब्रवीत् ॥९॥ [८
वि-भीषणोऽयं सम्प्राऽऽप्तो यं दृष्ट्वा वन-चारिणः ।
१०] भवन्त्य्[11] आगत-सन्त्रासा रावणाऽऽत्मज-शङ्कया ॥१०॥ [९

---

१. ल१ ब-०गर्षभः । २. म-व्यथिता ॥ ३. म-नास्ति ॥ ४. रा२-तेनापदी० । ५. रा२-हीना तेन ॥ ६ रा२-च ॥ ७. म-तेन ॥ ८. रा१ ल१ ल२ ब श्र प्र रा२ म-लज्जन्ते । ९. रा२ फ-न निरीक्षन्ति । १०, म-पतितान् ॥ ११. म-द्रवन्त्यागत० ॥

शीघ्रम् एतांस् तु सं-त्रस्तान् बहु-धा सम्प्र-धावितान् ।
११] समव-स्थापयाऽऽख्याहि वि-भीषणम् इहाऽऽगतम् ॥११॥ [१०
सु-ग्रीवेणैवम् उक्तस् तु धूम्रो ऋ(?रि)क्ष-पतिस् तदा ।
१२] वानरान् सान्त्वयामास नि-वर्तध्वं प्र-धाविताः ॥१२॥ [११
ते नि-वृत्तास् ततः सर्वे वानरास् त्यक्त-सम्भ्रमाः ।
१३] ऋक्ष-राज-वचः श्रुत्वा तं च दृष्ट्वा वि-भीषणम् ॥१३॥ [१२
वि-भीषणस् तु रामस्य दृष्ट्वा गात्रं शरैश् चितम् ।
१४] लक्ष्मणस्य च धर्माऽऽत्मा बभूव व्यथितस् तदा ॥१४॥ [१३
जल-क्लिन्नेन हस्तेन तयोर् गात्रं ममार्ज सः ।
१५] शोक-सम्पीडित-मना रुरोद वि-ललाप च[२] ॥१५॥ [१४
इमौ तौ सत्त्व[३]-सम्पन्नौ वि-क्रान्तौ प्रिय-दर्शनौ ।
१६] इमाम् अव-स्थां गमितौ रक्षसा कूट-योधिना ॥१६॥ [१५
भ्रातृ-पुत्रेण सम्-अरे दुष्प्र-ज्ञेनाऽकृताऽऽत्मना ।[४]
१७] राक्षस्या जिह्मया बुद्ध्या [५]छलिताव् उरु-विक्रमौ [६]॥१७॥ [१६
शरैर् अ-विरलैर् विद्धौ रुधिरौघ-परिप्लुतौ ।
१८] वसु-धायाम् इमौ सुप्तौ पुष्पिताव् इव किं-शुकौ [६]॥१८॥ [१७
ययोर् वि-क्रमम् आ-साद्य प्रति-ष्ठा काङ्क्षिता मया ।
१९] ताव् [७]इमौ मोहम् आ-नीतौ वि-संज्ञौ न वि-रेजतुः [६]॥१९॥ [१८
जीवन्न् अद्य वि-पन्नोऽस्मि नष्ट-राज्य-मनोरथः ।
२०] क्रूर-प्रतिज्ञश् च रिपुः स-कामो रावणः कृतः ॥२०॥ [१९
एवं वि-लप्यमानं तं परि-ष्वज्य वि-भीषणम् ।
२१] सु-ग्रीवः सान्त्वयामास वचनं चेदम् अब्रवीत् ॥२१॥ [२०
वि-भीषण किम् आर्तस् त्वं किं च मां नाऽभि-भाषसे ।

---

१. म-संक्षुब्धान् ॥ २. प्र रा₂ फ म-ह ॥ ३. रा₂-शरसं० ॥ ४. रा₁ ल₁ ल₂ ब श्र प्र फ म-नास्ति । ५. रा₂-लक्षितावृजुविक्रमौ । फ-छलितावृजुवि० । ६. म-नास्ति ॥ ७. रा₂-उभौ मोहमापन्नौ । ८. रा₁ल₂ ब श्र प्र-विचेरतुः ॥

२२] पर्यव-स्थापयाऽऽत्मानं मैवं भूः शोक-लालसः ।।२२।। [N
राघवस् त्वां च मां चैव समा-श्वास्य समुत्थि(दु-स्थि)तः ।
N] रावणं सह पुत्रेण वधिष्यति स-बान्धवम् ।।२३।।[2] [N
तम् एवं सान्त्वयित्वा च परि-ष्वज्य च राक्षसम् ।[3] [२३पू
N] सु-ग्रीवः सत्त्व-सम्पन्न[4] इदं वचनम् अब्रवीत् ।।२४।। [२०उ
राज्यं प्राऽऽप्स्यसि धर्म-ज्ञ लङ्कायां नाऽत्र सं-शयः ।
२३] रावणः सह पुत्रेण स-कामो न भविष्यति ।।२५।। [२१
N] त्यक्त-मोहौ वधिष्येते स-गणं रावणं रणे । [२२उ
१४पू] तम् एवं पर्यव-स्थाप्य राक्षसं वानरर्षभः[5] ।।२६।। [N
N] अब्रवीद् वानरेन्द्रस् तु सु-ग्रीवः पुत्रम् अङ्ग-दम् । [N
१४उ] सु-षेणं [6]श्वशुरं चैव समा-हूयेदम् अब्रवीत् ।।२७।। [२३उ
सह शूरैर् हरि-गणैर् लब्ध-संज्ञाव् अ-विक्लवौ ।
२५] [7]उभौ प्राऽऽपयत क्षिप्रं किष्किन्धां राम-लक्ष्मणौ ।।२८।। [२४
अहं तु रावणिं हत्वा [8]रावणं चाऽपि राक्षसम् ।
२६] मैथिलीम् आ-नयिष्यामि शक्रो नष्टाम् इव श्रियम् ।।२९।। [२५
सर्वे गच्छत वि-स्रब्धा मुक्त्वैकं[9] मारुताऽऽत्मजम् ।
२७] अनेनाऽहं सहायेन हनिष्ये राक्षसाऽधिपम् ।
रावणं स-गणं हत्वा तोषयिष्यामि राघवौ ।।३०।। [N
२८] एक एव पुरीं लङ्कां भस्मी-कुर्यां स-राक्षसाम् ।
हरि-सैन्येन महता किम् अङ्ग पुनर् आ-वृतः ।।३१।। [N
२९] अद्य कोपम् अहं मोक्ष्ये स-सैन्ये रावणे दृढम्[10] ।

---

१. प्र-'रावणम्' इत्यारभ्य 'संशयः' इत्यन्तः पाठो नास्ति । २.-अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब फ म-परमं पीडितावेतौ भ्रातरौ रामलक्ष्मणौ । वरदानकृतैर्बाणैरुभौ वीरौ तपस्विनौ ॥ ३. अ-नास्ति । ४. म-०सम्पन्नम् ॥ ५. प्र रा$_2$ फ म-वानराधिपः ॥ ६. म-ससुतं ॥ ७. अ-ततो ॥ ८. रा$_2$ फ-च रावणं हत्वा रावणिं ॥ ९. प्र रा$_2$ फ म-वर्ज्यैकं ॥ १०. फ-दृढे ।

स-पुत्र-बान्धव-जने रु[1](?रो)षितः काल-चोदितः(?ते)।३२।[N
३०] अद्य वीर्यं च तेजश्[2] च सौहार्दं सत्य[2]-गौरवम् ।
वक्ष्यन्ति सर्व-भूतानि राम च दृढ-भक्ति-ताम् ॥३३॥ [N
३१] अद्य चन्दन-साराणां केयूराऽऽभरणस्य च ।
परि-ष्वङ्गस्य नारीणां स्पर्शस्य वि-विधस्य च ॥[3]३४॥ [N
३२] परि-स्पर्शस्य माल्यानां सूक्ष्माणां चैव वाससाम् ।
अनु-रूपम् इमौ बाहू मित्र-कर्म करिष्यतः ॥३५॥ [N
३३] अद्य लङ्कां पुरीं रोषात् स-प्राकारां स-तोरणाम् ।
नील-जीमूत-सङ्काशै राक्षसैर् बहुभिर् वृताम् ।
३४] दिशो वि-द्रावयिष्यामि वायुर् मेघम्[4] इवोत्थि(द्-स्थि)तम् ३६ [N
स्व-बाहु-बल-वीर्येण पश्यतां सर्व-रक्षसाम् ।
३५] रावणं प्र-मथिष्यामि वैनतेय इवोर-गम् ॥३७॥ [N
अद्य रोषं च शोकं[5] च दुःखं चेक्ष्वाकु-नन्दनः ।
३६] त्यक्ष्यत्य् एक-पदे रामः सूदिते युधि रावणे ॥३८॥ [N
यम-शक्र-कुवेराणां यश्च् अपाम् ईश्वरस्य च ।
३७] वीर्येण राक्षसस् तुल्यो न मे जीवन् वि-मोक्ष्यते॥३९॥ [N
मुहूर्ताद् एव पश्यध्वं कृत-कर्माणम् आ-हवे ।
३८] निर्-जित्य सीतां दास्यामि राघवाय महाऽऽत्मने॥४०॥ [N
३९पू] कर्मणा तेन महता तोषयिष्यामि राघवौ ।
४०पू] प्रति-ज्ञातं यद् आर्येण राघवेण महाऽऽत्मना ॥[6]४१॥ [N
३९उ] कृत-कृत्यो भविष्यामि यशश्[7] चाऽऽप्स्यामि शाश्वतम्[7] ।
४०उ] वि-भीषणाय दास्यामि राज्यं निहत-कण्टकम् ॥[6]४२॥ [N

---

१. रा₂-रूषितः कालसंभृता । फ-रूषितः कालसंभृताम् । म-नास्ति ॥ २. म-सत्त्वं च तेजःसौहार्दगौ० ॥ ३. फ-नास्ति ॥ ४. प्र-वेगम् ॥ ५. रा₁ ल₂-कोपं ॥ ६. प्र-नास्ति ॥ ७. रा₂ फ म-यशः प्राप्स्यामि चोत्तमम् ॥

स क्रोधाद् विपुल-यशा महाऽनुभावो
वाक्यैस् तैर् अति-बलविक्रमोपपन्नैः ।
उत्-साहं बलम् अधिकं च वानराणां
४१] संं-चक्रे दिवसकराऽऽत्मजः कपीऽन्द्रः ॥४३॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे सुग्रीव-गर्जनं नाम षड्विंशः सर्गः ॥२६॥

[वं–२६]= [सप्तविंशः सर्गः] =[दा–५०]

श्रुत्वैतद् वानरेन्द्रस्य सु-षेणो वाक्यम् अब्रवीत् ।
१] देवाऽसुरं महा-युद्धम् अनु-भूतं सु-दारुणम् ॥१॥ [२६
२पू] तदा स्म दानवा देवाञ् छर-संस्पर्श-कोविदाः ।
N] विनिर्-जघ्नुः सुबहु-शः शातयन्तो मुहुर्-मुहुः ॥२॥ [२७
तान् आर्तान् नष्ट-संज्ञांश् च पराऽसूंश् च बृहस्पतिः ।
३] दिव्याभिर् मन्त्र-युक्ताभिर् ओषधीभिश् चिकित्सति ।३। [२८
ता ओषधीर् आ-नयितुं क्षीरोदं यान्तु सागरम् ।
४] जवना वानराः शीघ्रं सम्पाति-पनसाऽऽदयः ॥४॥
ओषधीर् ये वि-जानन्ति पर्वतीया वनौकसः । [२९
५] सन्धाने-करणीर् दिव्या वि-शल्या देव-निर्मिताः ॥५॥ [३०

---

१. फ म-नास्ति । २. प्र रा$_2$-लकाकांडे । ब-नास्ति ॥ म-युद्धपर्वणि । ३. ब-०वतर्जनं ॥ ४. ल$_1$ ल$_2$ ब प्र रा$_2$ फ-मया युद्धम् ॥ ५. म-नास्ति । ६. फ-निजघ्नुस्ते ॥ ७. रा$_2$-हनुमान् मारुतात्मजः । ८. अतः परमधिकः पाठः—रा$_2$-शक्तो वीर्यबलोपेतो यथास्य पवनः पिता । रामलक्ष्मणयोरर्थे क्षीरोदं यान्तु सागरम् । जम्बूद्वीपपरं पारे दशाष्टौ लक्षयोजनम् । गत्वा वानरशार्दूल ओषधीरानयिष्यति । ९. रा$_1$-०नकरणे । रा$_2$-सवर्णक० । १०. रा$_2$-च महौषधिः । ११. अतः परमधिकः पाठः—रा$_2$-मृतसंजीवनी चैव संधिनीमपरामपि ॥

N] एता हि निर्-मिता देवैर् ओषधीर् अमृतोद्भवाः[1] । [३१उ
७३] अयं वायु-सुतश् चाऽपि हनु-मांस् तत्र गच्छतु ॥६॥ [३२[2]

एवं तेषां वि-ब्रुवतां दुःखाऽऽर्तानां महाऽऽत्मनाम् ।
N] रामं प्रति महाऽऽत्मानं लक्ष्मणं च महा-रथम् ॥७॥ [N
सर्वे वि-मूढा ह्य् अभवन्[3] स-सुग्रीव-विभीषणाः ।
N] प्रति-भेदम् अ-जानन्तः शर-बन्धस्य दुःखिताः ॥८॥ [N
वि-संज्ञाश् च वि-मूढाश् च परि-वार्य महा-बलाः ।
N] किञ्-चित् प्रत्य्-अपद्यन्त सर्वे वानर-यूथपाः ॥९॥ [N
तस्मिंस् तदा वर्त(?र्त्य)माने भ्रातृभ्यां व्य्-असने भृशम्[4] ।
N] महा-नादो बलौघानाम् अभूत् सङ्ग्राम-मूर्धनि ॥१०॥ [N
स(?तौ)विभीषण-सुग्रीवा(?वौ) ध्यान-मूकत्वम्[5] आ-गताः(?तौ)
N] परि-वार्य महाऽऽत्मानौ भ्रातरौ राम-लक्ष्मणौ ॥११॥ [N
तानि वानर-कोटीनां सहस्राणि शतानि च ।
N] निश्-चेष्टौ निष्-प्रतिद्वन्द्वौ दृष्ट्वा नरवराऽऽत्मजौ ॥१२॥ [N
वानराः पाद-पान् गृह्य शैल-शृङ्गाणि चाऽपरे ।
N] रामं च लक्ष्मणं चैव परि-वार्याऽव-तस्थिरे ॥१३॥ [N
एतस्मिन्न् एव काले च[6] महा-योग-बलाऽन्वितः ।
N] आ-जगाम महा-तेजा देवर्षिर् नारदस् तथा ॥१४॥ [N
राघवस्य समीपे तु नि-षसाद[7] समन्त-तः ।
N] कृत्वा प्र-दक्षिणं रामं तेषां मध्ये वनौकसाम् ॥१५॥ [N

१. अतः परमधिकः पाठः— अ प्र रा२ फ म-यत्र द्रोणश्च चंद्रश्च पर्वतौ लवणाम्भसि । अमृतं यत्र पतितं तत्र सा परमौषधिः ॥ २. म-अत आरभ्य ३२-शश्लोकान्तः पाठः २९-शसर्गस्य १८-शश्लोकपूर्वार्धतः पर व्यत्यासेन पठितः ॥ ३. प्र रा२ फ-अभवत् । ४. प्र रा२ फ-तस्मिन् ॥ ५. प्र-ध्यानमेकत्वम् ॥ ६. रा२ फ-तु ॥ ७. प्र-०साद स चोत्तमः । रा२ फ-निष्पपात सखा ततः ॥

रुधिरोक्षित-सर्वाऽङ्गं पतितं धरणी-तले ।
N] दृष्ट्वा तु सु-महाऽऽत्मानं शर-बन्धेन पीडितम् ॥१६॥ [N
वैक्लव्यं किम् इदं देव परं प्राऽऽप्नोषि मान-द ।
N] एवम् उक्त्वा महाऽऽत्मानं नारदो भग-वान् ऋषिः ।
अभि-तुष्टाव काकुत्स्थं स्मारयन् पूर्व-जन्मनः[1] ॥१७॥ [N
N] राम राम महा-बाहो शृणुष्व वदतां वर ।
दिव्य-लक्षण-संयुक्तं किम् आत्मानं न बुध्यसे ॥१८॥ [N
N] भवान् नारायणः श्री-मान् सर्व-लोक-नमस्कृतः ।
शङ्ख[2]-चक्राऽऽयुध-धरः सर्व-नाग-रिपु-ध्वजः ॥१९॥ [N
पिता-महाद् अपि परः पुरुषः शाश्वतो हरिः ।
N] वैकुण्ठस् त्वं महा-बाहो देव-देवः प्रताप-वान् ॥२०॥ [N
न परं विद्यते भूतं त्वत्-तः पुरुष-सत्तम ।
N] त्वं पद्म-नाभः काकुत्स्थ हृषीकेशस् तथैव च ॥२१॥ [N
धारयन्न् उरसा नित्यं मणिं कौस्तुभम् एव च ।
N] मह्यां नि-मज्जमानायां वराह-त्वम् उपाऽऽगतः ॥२२॥ [N
नि-हतश् चाऽसुरः पूर्वं हिरण्याऽक्षो महा-बलः ।
N] हिरण्य-कशिपुश् चैव नि-हतौ तौ महाऽसुरौ ॥२३॥ [N
कपिल-त्वम् उपाऽऽगम्य सागरः क्षोभितः प्र-भो ।
N] राम राम-त्वम् आ-गम्य कृता निष्-क्षत्रिया मही ॥२४॥ [N
हतः सहस्र-बाहुश् च कार्तवीर्योऽर्जुनस् तदा ।
N] कश्यपाय मही[3] दत्तौ यज्ञाऽन्ते बहु-दक्षिणा ॥२५॥ [N
अनन्त-मूर्तिना[4] मूर्ध्ना धृता ते सकला मही ।
N] क्षीरोद-शयनीयं ते शेषस्योपरि राघव ॥२६॥ [N
वदर्यां तप्यसे नित्यं यत् तत् परम-कं तपः ।

---

१. रा$_2$-०जन्म च ॥ २. रा$_2$ फ-शार्ङ्गचक्रायुधखड्गी ॥ ३. प्र-मही दत्त्वा ॥ ४. रा$_2$ फ-अनन्तरूपिणा ॥

N] ब्रह्मा त्वं देव-देवेश कृष्णो जि(?वि)ष्णुस् त्वम् एव च ।२७। [N
महेन्द्रस् त्वं महा-बाहो वसूनाम् अपि चाऽष्टमः ।
N] मरुतां पञ्चमश् चाऽसि वृषभश् च तथा गवाम् ॥२८॥ [N
[2]कपालं चैव [1]ते ब्रह्मा धर्मो मनसि नि-ष्ठितः ।
N] आ-काशं शिरसा व्य्-आप्तं पद्भ्यां ते पृथिवी धृता ॥२९॥ [N
उदरं [3]तेऽर्णवो राम प्राणास्[3] ते हव्य-वाहनः ।
N] दिशश् चैव स्थिताः श्रोत्रे कर्ण्यां ते वसवः स्थिताः ॥३०॥ [N
ऊरुभ्यां मित्रा-वरुणौ [4]चरणे ऋषयः स्थिताः ।[5]
N] दंष्ट्रासु चैव सर्वासु वेदास् ते सु-प्रतिष्ठिताः ॥३१॥ [N
शिखाऽन्ते चैव गायत्री ओं-कारो हृदि सं-स्थितः ।
N] ग्रीवायां सं-स्थिता द्यौश् च जिह्वा-प्राऽन्ते सरस्वती ।३२। [N
सर्वदे[6]व-मयस् त्वं च नाऽस्ति किं-चित् त्वया विना ।[7]
N] सनातनस् त्वं प्र-भवः प्र-लयो युग-संक्षये ॥३३॥ [N
आदित्या वसवो रुद्रा विश्वे-देवास् तथाऽश्विनौ ।
N] सेन्द्रा मरुद्-गणा देवा लोक-पालैः समन्व्-इताः ॥३४॥ [N
देवर्षयो महाऽऽत्मानस् तथा ब्रह्मर्षयोऽमलाः ।
कल्याणं वै पुरस्-कृत्य वि-मानैः समुप-स्थिताः ।
N] वीऽऽ[8]क्षमाणा जयं सर्वे तस्मिंस् तमसि दारुणे ॥३५॥ [N
त्वं स्रष्टा सर्व-लोकस्य स्थावरस्य चरस्य च ।
N] प्र-भवश् चाऽव्ययश् चैव किम् आत्मानं न बुध्यसे ।३६॥ [N
राक्षसानां वि-नाशाऽर्थे प्र-विष्टो मानुषीं तनुम्[9] ।
N] नाग-पाश-निबद्धस् तु तिष्ठसे किं रणाऽजिरे ॥३७॥ [N

---

१. रा$_2$ फ-तथैव ॥ २. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-कपाली च वरो ॥ ३. प्र रा$_2$ फ-तेर्णवा नाम प्राणस् ॥ ४. रा$_1$ ल$_1$ ल$_2$-म श्र-वले च । ५. अतः परमधिकः पाठः—प्र रा$_2$ फ-जानुनी चाश्विनौ राम रोमाण्योषधयः स्थिताः ॥ ६. रा$_2$-सर्वमेतन्मयश्च त्वं । ७. म-अत आरभ्य सर्गसमाप्तिं यावन्नास्ति ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब श्र-वीक्षन्तश्च ॥ ९. ब-नास्ति ॥

लक्ष्मणेन सह भ्रात्रा स्मरस्व गरुडं प्र-भो ।
N] नाग-पाश-निबद्धस्य तव वै लक्ष्मणस्य च ॥३८॥ [N
नागाऽशनो महाऽऽत्माऽसौ काश्यपेयो महा-बलः ।
N] [2]तस्याऽप्रतिहता नि[3]त्यं गतिर् वीरस्य सर्व-तः ॥३९॥ [N
योऽस्मात् त्वां नाग-पाशाच् च मोक्षयिष्यति बन्धनात् ।
N] स्वस्ति तेऽस्तु गमिष्यामि यथाऽऽगतम् अरिं-दम[4] ॥४०॥ [N
एवं स देवर्षि-वरो महाऽऽत्मा
प्र-बोध्य नारायणम् अ-प्रमेयम् ।
जगाम लोकान् मनसा यथेष्टान्
N] यथाऽऽगतोऽदृष्ट-गुणैर्[5] उपेतः ॥४१॥ [N

इत्यार्षे रामायणे युद्ध[6]-काण्डे नारद-वाक्यं नाम सप्तविंशः सर्गः ॥२७॥

[वं – २६]= [अष्टाविंशः सर्गः] =[दा – ५०]

नारदस्य वचः श्रुत्वा सं-ज्ञां लब्ध्वा च राघवः[7] ।
N] मध्ये वानर-सैन्यानां सस्मार गरुडं तदा ॥१॥ [N

अथैनम् उपसं-गम्य वायुः श्रोत्रे वचोऽब्रवीत् ।
८] राम राम महा-बाहो आत्मानं स्मर वै हृदा ।[1]
नारायणस् त्वं भग-वान् राक्षसाऽर्थेऽव-तारितः ॥२॥ [N
९] स्मर सर्प-भुजं देवं वैनतेयं महा-बलम् ।

---

१. ब-नास्ति ॥ २. रा₂ फ-नास्य प्रतिहता राम ॥ ३. प्र रा₂ फ-योस्माद्रक्षःप्रयुक्ताच्च मोचयेच्छरबन्धनात् । ४. प्र-नास्ति ॥ ५. रा₂ फ-मायागुणो ह्यष्टगुणैर् ॥ ६. प्र रा₂-लंकाकाण्डे । ब-नास्ति ॥ ७. म-प्रथमश्लोकादारभ्य २५-शश्लोकान्तः पाठः ३०-शसर्गस्य २१-शश्लोकात्परं व्यत्यासेन पठितः ॥ ८. प्र-तदा । ९. रा₂-नास्ति ॥

स सर्प-बन्धनाद्[1] घोराद् युवां सं-मोचयिष्यति ॥३॥ [N
१०] तस्य[2] तद् वचनं श्रुत्वा राघवो रघु-नन्दनः ।
सस्मार गरुडं देवं भुजं-गानां भयाऽऽवहम् ॥४॥ [N
११] एतस्मिन्न् अन्तरे वायुर् मेघाश् चाऽऽसन् सं[3]-विद्युतः ।
पर्य्-अस्तं सागरे तोयं कम्पन्ते समं[4] मही-धराः ॥५॥ [३३
१२] महता पक्ष-वातेन सर्वे[5] तीर-रुहा द्रुमाः ।
स-शाखाः[6] पतिता भग्नाः स-मूला लवणाऽम्भसि ॥६॥ [३४
१३] [7]सर्व-तः पन्न-गाः स्रस्ता व्य्-अद्रवन् शैल-वासिनः ।
१४उ] [8]लयं सर्वाणि यादांसि प्र-जग्मुर् लवणाऽम्भसि ॥७॥ [३५
१५उ] ततो मुहूर्तात् स-ततं वैनतेयं महा-बलम् ।
वानरा ददृशुः सर्वे[9] ज्वलन्तम् इव पावकम् ॥८॥ [३६
१६] तम् आ-गतम् अभिप्रेक्ष्य नागास् ते विप्र-दुद्रुवुः ।
१७उ] यैस् तौ सत्-पुरुषौ बद्धौ शर-भूतैर् महा-बलैः ॥९॥ [३७
ततः सु-पर्णः काकुत्स्थं दृष्ट्वा [10]प्रत्यभि-वाद्य च ।
१८] प्र-[11]संममार्ज च पाणिभ्यां मुखं चन्द्र-सम-प्रभम् ॥१०॥ [३८
वैनतेयेन सं-स्पृष्टाः सर्वे ते रुरुहुर् व्रणाः ।
१९] [12]स-वर्णाश् चाऽनयोर् गात्रे व्रणाः सर्वे तदाऽभवन् ॥११॥ [३९
तं चाऽपि समुपाऽऽघ्राय सु-पर्णं कनक-प्रभम् । [N
२०] बलं वीर्यं च तेजश् च तथैवोत्-साह एव च ।
प्र-हर्षणं च बुद्धिश् च तदाऽऽसीद् द्वि-गुणं तयोः ॥१२॥ [४०
२१] ताव् उत्था(द्-स्था)य महा-वीर्यौ गरुडं राम-लक्ष्मणौ ।
उभौ [13]सस्वजतुर् गात्रे रामश् चेदम् उवाच ह ॥१३॥ [४१

---

१. रा१ ल१ ल२ ब अ प्र-०नाहारो ॥ २. प्र रा२ फ-स तस्य ॥ ३. प्र-सहस्रशः । ४. रा२ फ-च ॥ ५. रा२ फ-बहवः ॥ ६. ब-पर्वताः । ७. रा१-नास्ति । ८. प्र-भयं । ९. रा१ ल२-नास्ति ॥ १०. रा१ ल१ ल२ ब अ-चैवाभि० । ११. रा२-स ममार्जे ॥ १२. रा१ ल१ ल२ ब अ-नास्ति ॥ १३. रा१ ल१ ल२ ब अ प्र फ-ममृजतुर्गात्रं ॥

२२] तव प्रसादाद् व्य्-असनं रावणि-प्रभवं महत् ।[1]
२३उ] आवां शीघ्रम् अति-क्रान्तौ शीघ्रं च बलिनौ कृतौ[2] ॥१४॥ [४२
यथा दश-रथं तातं यथा च प्र-पितामहम् ।
२४] तथा भवन्तम् आ-साद्य हृदयं मे प्र-सीदति ॥१५॥ [४३
को भवान् इह[3] सम्प्राऽऽप्तो दिव्य-स्रग्-अनुलेपनः ।
२५] वसानोऽरजसी वस्त्रे दिव्याऽऽभरण-भूषितः ॥१६॥ [४४
इत्य् उक्तः प्र[4]-श्रितं वाक्यं राघवेण महाऽऽत्मना । [N
२६] उवाच गरुडो वाक्यं मध्ये तेषां वनौकसाम् ॥१७॥
प्रीता[5]ऽऽत्मा च परि-ष्वज्य हर्ष-पर्याकुलेक्षणः । [४५
२७] प्र-हसन्न् आह[6] काकुत्स्थं सु-पर्णः पतगे[7]श्वरः ॥१८॥ [N
अहं सखा ते काकुत्स्थ बाह्यः प्राण इवाऽऽत्म-जः । [४६पू
२८] औरसः[8] कश्यप-सुतो विनता-सम्भवो ह्य् अहम् । [N
गरुत्-मान् इह सम्प्राऽऽप्तो युवयोः साह्य-कारणात् ॥१९॥[४६उ
२९] अ-सुरा वा महा-वीर्या दानवा वा महा-बलाः ।
देवता वा स-गन्धर्वा पुरस्-कृत्य शत-क्रतुम् ॥२०॥ [४७
३०] नैनं मोचयितुं शक्ताः शर-बन्धं दुरा-सदम् ।
मायाबिना हीऽन्द्र-जिता निर्-मितं क्रूर-कर्मणा ॥२१॥ [४८
३१] एते हि[9] नैर्ऋता नागाः क्षुद्रास् तीव्रविषोल्बणाः ।
रक्षो-माया-प्रभावेन शरास् तीक्ष्ण-विषा[10]ऽभवन् ॥२२॥ [४९
३२] स-भाग्यश् चाऽसि धर्म-ज्ञ राम सत्य-पराक्रम ।
लक्ष्मणेन सह भ्रात्रा सं-ख्येऽस्मिन् न हतोऽसि यत् ॥२३॥ [N

---

१ रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-नास्ति । २. अतः परमधिकः पाठः—रा$_2$-शरबन्धाद्विनिर्मुक्तौ क्षिप्रं च रुधिरोक्षितौ ॥ ३. फ-इति ॥ ४. रा$_2$ फ-प्रसृतं ॥ ५. ल$_1$-प्रीतात्मानं प० । रा$_2$ फ-नरिपूज्य च प्रीतात्मा । ६. रा$_2$-०सन्प्राह । ७. ल$_1$-पन्नगे० ॥ ८. रा$_2$-अहं सः ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-वै । १०. रा$_1$ ल$_1$ ल$_2$ ब श्र-तीक्ष्णतराभवन् । सन्धिरार्षः द्र० ॥

३३] इमं श्रुत्वा हि वृत्ताऽन्तं त्वरमाणोऽहम् आ-गतः ।
सहसैव तव स्नेहात् सखि-त्वम् अनु-पालयन्[2] ॥२४॥ [५१
३४] कारणं च वयस्य-त्वे न प्रष्टव्योऽस्मि राघव ।
नि-हते रावणे पापे सखि-त्वं ज्ञास्यसे स्वयम् ॥२५॥ [N
३५] मोक्षितश् च मया घोराद् एतस्माद् इषु-बन्धनात् ।
अ-प्रमादश् च सं-ग्रामे कर्तव्यो रघु-नन्दन ॥२६॥ [५२
३६] प्र-कृत्या राक्षसाः सर्वे मायया कूट-योधिनः ।
शूराणाम् ऋजु-भावानां भवताम् आर्जवं[3] धनम् ॥२७॥ [५३
३७] तन् न वि-श्वसितव्यं वै राक्षसानां रणाऽजिरे ।[3]
स्वेनौपम्येन राजेन्द्र नित्य-जिह्मा हि राक्षसाः ।[3] [५४
३८] कूट-युद्धा हि ते सर्वे क्षुद्राश् चैव विशेष-तः ॥२८॥ [N
एवम् उक्त्वा ततो रामं सु-पर्णः सु-महाबलः ।
३९] परि-ष्वज्य च सु-स्निग्धम् आ-प्रष्टुम् उप-चक्रमे ॥२९॥ [५५
सखे राघव धर्म-ज्ञ रिपूणाम् अपि वत्सल ।
४०] अभ्यनु-ज्ञातुम् इच्छामि गमिष्यामि यथाऽऽगतम् ॥३०॥ [५६
बालवृद्धाऽवशेषां हि कृत्वा लङ्कां शरोर्मिभिः ।
४२] रावणं च रणे हत्वा सीतां त्वम् उप-लप्स्यसे ॥३१॥ [५८
इत्य् एवम् उक्त्वा वचनं सु-पर्णः शीघ्र-विक्रमः ।
४३] रामं प्र-दक्षिणं कृत्वा मध्ये तेषां वनौकसाम् ॥३२॥ [५९
N] प्र-दक्षिणं तु तं कृत्वा परि-ष्वज्याऽभि-वाद्य च ।
जगामाऽऽकाशम् आ-विश्य गरुडः पवनो यथा ॥३३॥ [६०
४४] नी-रुजौ राघवौ दृष्ट्वा ते तु वानर-यूथपाः ।
४५पू] प्र-हृष्टाः ससृजुर् नादान् राक्षसानां भयाऽऽवहान् ।[6] [६१

---

१. प्र-शृण्वन् । २. प्र-अनुवर्धयन् ॥ ३. म-नास्ति ॥ ४. ल₁ प्र-नास्ति ॥ ५. म-०ज्य च पीडितं ॥ ६. अतः परमधिकः पाठः—प्र रा₂ फ-ततो भेरीः समाजघ्नुर्मृदंगांश्चाभ्यवादयन् ॥ दध्मुश्च शंखान् संहृष्टाश्चिक्ष्वेडुश्च सहस्रशः ॥

४८पू] अपरे चाऽपि वि-क्रान्ता वानरा नग-योधिनः ॥३४॥ [६३पू
४९उ] ते वानरा भीम-बलाः प्रहर्षाऽऽक्रोशितैर् मुखैः ।
४८उ] द्रुमान् उत्-पाट्य तरसा तस्थुः शत-सहस्र-शः ॥३५॥ [N
मुञ्चमाना महा-नादांस् त्रासयन्तो निशा-चरान् ।
४९] लङ्का-द्वारम् अभि-क्रान्ता योद्धु-कामाः प्लवं-गमाः ॥३६॥ [६४
तेषां तु भीमस् तुमुलः स नादो
बभूव शाखामृग-यूथपानाम् ।
क्षये निदाघस्य यथा घनानां
N] नादः सु-भीमो नदतां निशीथे ॥३७॥ [६५

इत्यार्षे रामायणे युद्ध-काण्डे विशल्य-करणं नामाऽष्टाविंशः सर्गः ॥२८॥

[वं-२७]= [एकोनत्रिंशः सर्गः] =[दा-२९]

तेषां तु तुमुलं शब्दं वानराणां तरस्विनाम् ।
१] नदतां राक्षसैः सार्धं तदा शुश्राव रावणः ॥१॥ [१
स्निग्ध-गम्भीर-निर्घोषं श्रुत्वा तु नि-नदं महत् ।
२] सचिवा राक्षस-पतेर् इदं वचनम् अब्रुवन् ॥२॥ [२
यथा हि सम्प्र-हृष्टानां वानराणां समुत्थि(दु-स्थि)तः ।
३] बहूनां सु-महान् नादो मेघानाम् इव गर्जताम् ॥३॥

---

१. ब-विश्रान्ता । २. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-नागयो० । रा$_2$-रथयो० ॥ ३. रा$_1$ ल$_1$ ल$_2$ श्र प्र-०र्षाक्रोशितैर्मुखैः । रा$_2$-०र्षात्प्रासते बलैः । ४. म-उद्यम्य । ५. प्र-शतशस् । रा$_2$-सहस्रान् । फ म-सहसा । ६. रा$_2$-जघ्नुः ॥ ७. ब-नास्ति । रा$_2$-लंकाकांडे । म-युद्धपर्वणि ॥ ८. ल$_1$-सचिवः । ९. ल$_1$-अब्रवीत् ॥ १०. ल$_1$ ब-तथा हि संप्रविष्टानां ॥

व्यू-अक्तं सु-महती प्रीतिर् एतेषां समुप-स्थिता । [३
४] यथा हि वि-पुलैर् नादैश् चुक्षुभे वरुणाऽऽलयः ॥४॥ [४
तौ च बद्धौ शरैस् तीक्ष्णैर् भ्रातरौ राम-लक्ष्मणौ ।
५] अयं च [1]सु-महान् नादः शङ्कां जनयतीऽव [2]नः ॥५॥ [५
एतत् तु वचनं श्रुत्वा मन्त्रिणां [3]राक्षसेश्वरः ।
६] उवाच [4]राक्षसांस् [4]तत्र समीप-[5]परिवर्तिनः ॥६॥ [६
ज्ञायतां तूर्णम् एतेषां सर्वेषां वन-चारिणाम् ।
७] शोक-काले समुत्-पन्ने [6]हर्ष-कारणम् उत्-तमम् ॥७॥ [७
८पू] ते [7]तथोक्तास् तु सं-भ्रान्ताः प्राकारम् अधि-रुह्य च । [८पू
१०उ] विषण्ण-वदनाः सर्वे राक्षसेन्द्रम् उप-स्थिताः ॥८॥ [१०उ
N] भयात् संहृष्ट-रोमाणो राक्षसास् ते महा-बलाः । [N
[9]तद् [9]अ-प्रियं दीन-मुखा [10]रावणस्य निशा-चराः ।
११] न्यू-अवेदयन् यथा-वृत्तं सर्वे वाक्य-विशारदाः ॥९॥ [११
यौ ताव् इन्द्र-जिता युद्धे भ्रातरौ राम-लक्ष्मणौ ।
१२] नि-बद्धौ शर-बन्धेन निष्प्रकम्प-भुजौ कृतौ ॥१०॥ [१२
विमुक्त-शर-बन्धौ ताव् उत्थि(द्-स्थि)तौ रण-मूर्धनि ।
१३] पाशान् इव गजौ छित्वा गजेन्द्र-सम-विक्रमौ ॥११॥ [१३
तच् छ्रुत्वा वचनं तेषां राक्षसेन्द्रोऽथ [11]रावणः ।
१४] चिन्ता-रोष-परीऽताऽङ्गो विवर्ण-वदनोऽब्रवीत् ॥१२॥ [१४
घोरैर् दत्त-वरैर् बद्धौ शरैर् आशीविषोपमैः ।
१५] अ-मोघैः सूर्य-सङ्काशैः प्र-मथ्येन्द्र-जिता युधि ॥१३॥ [१५
तम् अस्त्र-बन्धम् आ-साद्य यदि [12]मुक्तौ रिपू मम ।

---

१. रा$_1$ल$_1$ब श्र प्र म-स महान् । २. रा$_2$-च ॥ ३. प्र रा$_2$ फ म-राक्षसाधिपः । ४. रा$_2$ फ-रक्षसां श्रेष्ठः । ५. फ-०वर्तिनाम् ॥ ६. रा$_1$ ल$_2$ श्र प्रहर्षे का० ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब श्र-तथोक्त्वा । ८. रा$_2$-विवर्णव० ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब श्र-तदाश्रयं । प्र-तदा श्रिय। १०. ब-राक्षसस्य ॥ ११. प्र-०न्द्रो महाबलः। म-०न्द्रः स रावणः ॥ १२. प्र-रिक्तौ ।

१६] संशय-स्थम् इदं सर्वम् अनु-पश्याम्य् अहं बलम् ॥१४॥ [१६
१७पू] निष्-फलाः खलु सं-पन्नाः[1] शरा वासुकि-तेजसः । [१७पू
N] वैनतेयम् इवाऽऽसाद्य नागा गङ्गाह्रदौकसः ॥१५॥ [N
एवम् उक्त्वा तु सं-क्रुद्धो[2] नि-श्वसन् द्वि-रदो यथा[3] ।
१८] अब्रवीद् रक्षसां मध्ये धूम्राऽक्षं नाम राक्षसम् ॥१६॥ [१८
बलेन महता युक्तो रक्षसां भीम-कर्मणाम्[4] ।[3]
१९] निष्-क्रमस्व वधायाऽऽशु राघवस्य[5] वनौकसाम् (?सः) १७ [१९
एवम् उक्तस् तु धूम्राऽक्षो राक्षसेन्द्रेण धीमता ।[6]
२०] कृत्वा प्र-णामं सं-हृष्टो निर्-जगाम नृपाऽऽलयात्[7] ॥१८॥ [२०
अभिनिष्-क्रम्य स ततो बलाऽध्यक्षम् उवाच ह ।
२१] त्वरयस्व[8] बलं शीघ्रं रण-कालोऽयम् आ-गतः ॥१९॥ [२१
धूम्राऽक्षस्य वचः श्रुत्वा बलाऽध्यक्षो बलाऽनुगः ।
२२] बलम् उद्-योजयामास रावणस्याऽऽज्ञया त्वरन् ॥२०॥ [२२
ते बद्ध-घण्टा बलिनो घोर-रूपा निशा-चराः ।[9]
२३] वि-नर्दमानाः[10] सं-हृष्टा धूम्राऽक्षं पर्य्-अवारयन् ॥२१॥
विविधाऽऽयुध-हस्ताश् च शूल-मुद्गर-पाणयः । [२३
२४] गदाभिः पट्टिसैः खड्गैर् आयसैश्[11] चा[11]ऽपि मुद्गरैः[12] ॥२२॥
परि-घैर् भिण्डि-पालैश् च खड्गैर्[13] दण्डैः परश्व-धैः[13] ।
२५] निर्-ययू राक्षसा[14] दिग्भ्यो नर्दन्तो युद्ध-लोलसाः[14] ॥२३॥ [२४

---

१ प्र रा$_{2}$ म-संवृत्ता: ॥ २. म-संरब्धो । ३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब श्र प्र रा$_{2}$ फ-नास्ति ॥ ४. म-भीमतेजसां । ५. प्र-रामस्य च ॥ ६. म-अत: परं २७-श-सर्गस्थ: ६-३२ श-श्लोकान्त: पाठो व्यत्यासेन पठित: । ७. रा$_{2}$ फ-नृपाज्ञया ॥ ८. प्र-वर्धयस्व ॥ ९. अत: परमधिक: पाठ:—रा$_{2}$-तथा बद्धतनुत्राणा: सवाजिरथ-कुंजरा: । रोषसंरक्तनयना भीमवेगा महाबला: ॥ १०. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब श्र-विनन्दमाना: ॥ ११. रा$_{1}$-आयसैरेव । प्र-०सैश्चैव । १२. म-नास्ति ॥ १३. ल$_{1}$ ब श्र फ-खड्गदण्डै: प० । ल$_{2}$-खड्गदण्डप० । म-भल्लैर्दण्डै: प० । १४. म-राक्षसा: सर्वे शतशोथ सहस्रश: ॥

रथैः कवचिनश् चाऽन्ये ध्वजैश् च [1]सम्-अलङ्कृतैः ।
२६] [2]सुवर्ण-जाल-संयुक्तैः खरैश् च विकृताऽऽननैः ॥२४॥ [४] [२५
२७पू] हयैः परम-शीघ्रैश् च चामराऽऽपीड-[3]धारिभिः । [२६पू
प्रभिन्न-[5]करटैश् चैव गजेन्द्रैर् गिरि-सन्निभैः । [N
N] निर्-ययुर् नैर्ऋत-व्याघ्रा व्याघ्रा इव दुरा-सदाः ॥२५॥ [२६उ
[6]वृक-सिंह-मुखैर् जुष्टं खरैः कनक-भूषणैः ।
२८] आ-रुरोह रथं दिव्यं धूम्राऽक्षः खर-निः[7]स्वनः ॥२६॥ [२७
स निर्-ययौ महा-तेजा धूम्राऽक्षो राक्षसैर् वृतः ।
२९] [8]द्वारेण पश्चिमेनाऽऽशु हनु-मान् [9]यत्र यूथ-पः ॥२७॥ [२८
३०पू] प्र-यान्तं तु महा-घोरं राक्षसं भीम-[10]दर्शनम् ।
N] अन्तरिक्ष-चरा वाचो वि-[11]चेरुर् लोम-हर्षणाः ॥२८॥ [२९
रथ-शीर्षे महा-भीमो गृध्रो विनि-[12]पपात ह ।
३१] ध्वजाऽग्रे [13]पक्षिणश् [13]चाऽस्य नि-पेतुर् मांस-भोजनाः॥२९। [३०
३२पू] रुधिराऽऽर्द्रं महा-श्वेतं छत्रम् अस्य पपात ह । [३१पू
ववर्ष रुधिरं देवः प्र-चचाल च मेदिनी [14]॥३०॥
३३] प्रति[15]लोमोऽऽकुलो वायुर् निर्घात-सम-निःस्वनः । [३२
तिमिरौघ-समाक्रान्ता दिशश् च न चकाशिरे ॥३१॥ [14] [३३
३४] गृध्र-कङ्क-[16]वृक-श्येना ये चाऽन्ये रुधिराऽशनाः । [N
वि-[17]स्वैराः ससृजुर् वाचो धूम्राऽक्षस्य समीप-तः ॥३२॥ [३१उ
स उत्-पातांश् च तान् दृष्ट्वा राक्षसानां भयाऽऽवहान् ।

---

१. ल$_1$ म-समलक्षितैः । २. ल$_1$ प्र-स्ववर्ण० । फ-सुपर्ण० ॥ ३. प्र-०पीडनादिभिः । ४. म-नास्ति । ५. रा$_2$-०करटश् ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब फ-वृक्ष० । ७. रा$_1$ ब फ-०स्वनैः ॥ ८. प्र रा$_2$ फ म-पश्चिमेन तु द्वारेण । ९. म-हरियू० ॥ १०. प्र-भीमविक्रमम् । ११. रा$_2$-विरेजुर् ॥ १२. म-अभिपपात । १३. रा$_1$ ल$_1$ ल$_2$ ब-दक्षिणस्यास्य । रा$_2$-पश्चिमश्चास्य । म-व्यथिताश्चास्य ॥ १४. म-नास्ति ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब श्र-प्रतिकूलाकुलो ॥ १६. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-०कङ्कखरश्येना । १७. रा$_1$ ल$_1$ ल$_2$ ब श्र-निष्ठुराः ॥

३५] प्रादुर्-भूतान् महा-घोरान् धूम्राऽक्षो व्यथितोऽभवत् ।३३। [३४
ततः सु-भीमैर् बहुभिर् निशा-चरैर्
वृतोऽभिनिष्-क्रम्य रणोत्सुको बली ।
ददर्श तां राघव-बाहु-पालितां
N] समुद्र-कल्पां बहु-वानरां चमूम् ॥३४॥ [३६

इत्यार्षे रामायणे युद्ध-काण्डे धूम्राऽक्ष-निर्याणं नामैकोनत्रिंशः सर्गः ॥२९॥

[वं-२८]= [त्रिंशः सर्गः] =[दा-५२]

निर्-यान्तं प्रेक्ष्य धूम्राऽक्षं राक्षसं भीम-दर्शनम् ।
१] वि-नेदुर् वानराः सर्वे हृष्टा युद्धाऽभिकाङ्क्षिणः ॥१॥ [१
तेषां तु तुमुलं युद्धं जज्ञेऽथ हरि-रक्षसाम् ।
२] अन्योऽन्यं मुसुलैर्[2] घोरैर्[3] जघ्नुस् ते शूल-शक्तिभिः॥२॥ [२
वानरा राक्षसैर् घोरैः पोथिताश् च[4] वि-दारिताः । [३उ
३] राक्षसा वानरैश् चाऽपि द्रुमैर् भूमि-समी-कृताः ॥३॥
राक्षसास् त्व् अभिसं-क्रुद्धा वानरान् नि-शितैः शरैः ।
४] विव्यधुर् घोर-रूपैस्[5] तान् कङ्क-पत्रैर् अ-जिह्मगैः ॥४॥ [४
ते गदाभिः सु-भीमाभिः पट्टिशैः[6] कूट-मुद्गरैः । [५पू
५] घोरैश् च परि-घैश् चित्रैस् त्रि-शूलैश् चाऽपि सं-युगे[7]॥५। [३पू
वि-दार्यमाणा रक्षोभिर् वानरास् ते महा-बलाः ।
६] अमर्षजनितोद्धर्षाश् चक्रुः कर्माण्य् अनेक-शः ॥६॥[7] [५उ
शर-[8]निर्भिन्न-गात्रास् ते शूल-निर्गत-[9]लोहिताः ।

---

१. प्र रा$_{2}$-लंकाकांडे । म-युद्धपर्वणि ॥ २. ब-तुमुलैर् । ३. म-नास्ति ॥ ४. म-द्रुमैश्चापि समी० ॥ ५. म-०रूपैश्च ॥ ६. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-पट्टिसैश् । ७. म-नास्ति ॥ ८. म-शरसंभिन्न० । ९. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-शूलनिर्घात० ।

७] जगृहुः पाद-पांश् चैव शिलाश् च हरि-यूथपाः ॥७॥ [६
ते भीम-वेगा हरयो नर्दमानाः[1] सहस्र-शः ।
८] ममन्थू राक्षसान् घोरान् नामानि च बभाषिरे ॥८॥ [७
९पू] पुनश् च तुमुलस् तेषां सं-ग्रामः सम्-अपद्यत । [N
N] तद् बभूवाऽद्भुतं युद्धं तेषां सङ्ग्राम-शालिनाम् ॥९॥
९उ] शिलाभिर्[2] वि-पुलाभिश् च बहु-शाखैश् च पाद-पैः[4] । [८
N] वानरा मथिताः के-चित् के-चिद् भल्लैर्[3] वि-दारिताः ॥१०॥ [N
राक्षसा मथिताः के-चिद् वानरैर् जितकाशिभिः[5] ।
१०] वमन्ति रुधिरं के-चिन् मुखै रुधिर-भोजिनः[6] ॥११॥ [९
पार्श्वेषु दारिताः के-चित् के-चिच् चूर्णी-कृता द्रुमैः ।
११] शिलाभिश् चूर्णिताः के-चिन् नखैः के-चिद् वि-दारिताः[7] ॥१२॥ [१०
ध्वजैर्[8] वि-शकलैर् भल्लैः खड्गैश् च विनि-पातितैः ।
१२] रथैर् वि-मथिताः के-चित् के-चिन् मथित-वाहनाः ॥१३॥ [११
१४उ] वानरैर् भीम-विक्रान्तैर् आ-प्लुत्याऽऽप्लुत्य[9] वेग-तः ।
राक्षसाः कर-जैस् तीक्ष्णैर् मुखेषु च वि-दारिताः ॥१४॥ [१३
१५] विरूप-वदना घोरा विप्रकीर्ण-शिरोरुहाः ।
मत्ताः शोणित-गन्धेन नि-पेतुर् जगती-तले ॥१५॥ [१४
१६] अन्ये च परम-क्रुद्धा राक्षसा भीम-दर्शनाः ।
दुधुवुस्[10] तल-पातैश् च वज्र-स्पर्शैश् च वानरान् ॥१६॥ [१५
१७] वानरैर् आ-पतद्भिस्[11] तु वेगिता[12] वेगवत्-तरैः ।
१८पू] मुष्टिभिश् चरणैश् चैव पाद-पैश् च वि-पोथिताः ॥१७॥ [१६

---

१ रा$_1$ ल$_1$ ल$_2$ ब अ प्र-नन्दमानाः ॥ २. म-"शिलाभिर्" इत्यारभ्य "रुधिरभोजिनः" इत्यन्तः पाठो नास्ति । ३. रा$_1$-बल्लैर् । ४. प्र-नास्ति ॥ ५. रा$_1$ ल$_1$ ल$_2$ब अ प्र-जयकांक्षिभिः । ६. प्र-०रभाजनैः । रा$_2$-०रभोजनाः ॥ ७. म-नास्ति ॥ ८ प्र-द्विजैर् ॥ ९. प्र-आप्लवन्त्यतिवेगतः । रा$_2$-आप्लुत्य वेगितैः कृताः ॥ १०. अ प्र रा$_2$ फ म-दुद्रुवुस ॥ ११. ब-०द्भिश्च । १२. प्र-विशेषिताः । म-व्यपो० ॥

N] धूम्राऽक्षो नि-हतं दृष्ट्वा स्व-सैन्यं सह राक्षसैः ।
क्रोधेन कदनं चक्रे वानराणां युयुत्सताम् ॥१८॥ [१७
२०] प्रासैः प्र-मथिताः के-चिद् वेमुस् ते रुधिरं मुखैः ।
मुद्गरैर् आ-हताः के-चित् पतिता धरणी-तले ॥१९॥ [१८
२१] परि-घैः पतिता भग्ना भिण्डि-पालैः परश्व-धैः ।
पट्टिशैर् आ-हताः के-चित् के-चिद् विशकली-कृताः ॥२०॥ [१९
२२] के-चिद् वि-मथिता भूमौ रुधिराऽऽर्द्रा वनौकसः ।
के-चिद् वि-द्राविता नष्टाः सं-क्रुद्धै राक्षसैर् युधि ॥२१॥ [२०
२३] विभिन्न-हृदयाः के-चिद् एक-पार्श्वेन शायिताः ।
वि-दारितास् त्रि-शूलैश् च के-चिद् दंष्ट्रा-विकर्षिताः ॥२२॥ [२१
२४] तत् सु-भीमं महद् युद्धं हरि-राक्षस-सङ्कुलम् ।
२५पू] अभवच् छस्त्र-बहुलं शिला-पादप-सङ्कुलम् ॥२३॥ [२२
धनुर्-ज्या-तन्त्रि-मधुरं हिक्का-ताल-समन्वितम् ।
२६] मन्त्र-स्तनित-गीतं च युद्धं गान्धर्वम् आ-बभौ ॥२४॥ [२३
धूम्राऽक्षस् तु धनुष्-पाणिर् वानरान् रण-मूर्धनि ।
२७] हसन् वि-द्रावयामास दिशस् तान् शर-वृष्टिभिः ॥२५॥ [२४
धूम्राऽक्षेणाऽर्दितं सैन्यं मथितं प्रेक्ष्य मारुतिः ।
२८] उप-चक्राम तद् रक्षः प्र-गृह्य महतीं शिलाम् ॥२६॥ [२५

---

१. अ प्र-सैन्यं तु विहतं । रा$_2$ फ म-सैन्यं तु विद्रुतं । २. अ प्र रा$_2$ फ-धूम्राक्षो राक्षसैः सह । म-धूम्राक्षो राक्षसैर्वृतः ॥ ३. रा$_2$ म-पाशैः । ४. म-सुस्रवुः शोणितं । ५. म-नास्ति । ६. फ-नास्ति ॥ ७. रा$_2$-परिघैराहताः केचित् केचिद्भल्लैर्विदारिताः । फ म-नास्ति । ८. म-नास्ति । ९. रा$_1$ ल$_2$-केचिद्भि शक० । ल$_1$ ब रा$_2$ फ-केचिच्च शक० ॥ १० म-केचिन्निपतिता । ११. म-अतः परं २८-शसर्गस्थः १–२५-शश्लोकान्तः पाठो व्यत्यासेन पठितः ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-विद्रावितास् ॥ १३. ल$_1$ ल$_2$ ब अ प्र-महायुद्धं । १४. म-नास्ति ॥ १५. रा$_2$ फ-मन्द्रस्तनितगीतं च । म-मन्दस्तनितनिर्घोषं ॥ १६. रा$_2$-विश्वस्तान् । फ म-विशस्तान् ॥ १७. प्र-०नाधिकं । १८. रा$_2$-ततः संप्रेक्ष्य । १९. अ-प्रगृह्य ॥ २०. म-नास्ति ॥

क्रोध-द्विगुण-रक्ताऽक्षः पितुस् तुल्य-पराक्रमः ।
२९] शिलां तां पातयामास धूम्राऽक्षस्य रथं प्रति ॥२७॥ [२६
आ-पतन्तीं शिलां दृष्ट्वा गदाम् उद्-यम्य सं-भ्रमात् ।
३०] रथाद् आ-प्लुत्य वेगेन वसु-धायाम्[1] अव-स्थितः[1] ॥२८॥ [२७
सा प्र-मथ्य रथं तस्य नि-पपात शिला भुवि ।
३१] स-चक्र-कूबर[2]-युगं स-ध्वजं स-शराऽऽसनम् ॥२९॥ [२८
३२पू] भित्त्वा तु स रथं तस्य हनू-मान् पवनाऽऽत्मजः । [२९पू
N] क्रोध-संरक्त-नयनो बभूवाऽन्तक-सन्निभः ॥३०॥ [N
N] स मारुतिर् महा-वेगैः[3] सुग्रीव-सचिवो बली । [N
३२उ] रक्षसां कदनं चक्रे स-स्कन्ध-विटपैर् द्रुमैः ॥३१॥ [२९उ
विभिन्न-शिरसस् तेन राक्षसाः शोणितोक्षिताः ।
३३] द्रुमैः प्र-मथिताश् चाऽन्ये नि-पेतुर् धरणी-तले [4]॥३२॥ [३०
वि-द्राव्य राक्षसाऽनीकं हनू-मान् पवनाऽऽत्मजः ।
३४] गिरि-शृङ्गं तु सं-गृह्य धूम्राऽक्षं न्य्-अद्रवद् बली ॥३३॥ [३१
३५पू] तम् आ-पतन्तं[5] धूम्राऽक्षो[5] गदाम् उद्-यम्य वीर्य-वान् । [३२पू
N] वि-नदन्तं हनू-मन्तं गत्वाऽऽह्वयत[6] सं-युगे ॥३४॥ [N
तस्मै[7] क्रुद्धः स रोषेण गदां तां बहु-कण्टकाम् ।
३६] न्य्-अपातयत धूम्राऽक्षः स्तन-देशे हनू-मतः [8]॥३५॥ [३३
ताडितः स तया तत्र गदया घोर-रूपया । [३४
३७] स्तन-देशे महा-वीर्यो[9] मारुतिर् गत-साध्वसः ॥३६॥ [N
स कपिर् मारुत-बलस्[10] तं प्र-हारम् अ-चिन्तयन् ।
३८] धूम्राऽक्षस्य शिरो-मध्ये[11] गिरि-शृङ्गम् अपातयत्[12] ॥३७॥ [३५

---

१. प्र रा₂ फ म-०यां व्यवस्थितः ॥ २. रा₁-०कूबरं युग्मं । म-०कूबररथं ॥ ३. प्र रा₂ म-महावीर्यः ॥ ४. म-नास्ति ॥ ५. म-आगतं सुधू० । ६. रा₂-महाह्व० ॥ ७. म-ततः । ८. म-नास्ति ॥ ९. म-०वीर्यः साधु साध्विति चाऽब्रवीत् ॥ १०. रा₂-मारुतसुतस् । ११. ल₁-शिरोमुख्ये । १२. रा₂-अताडयत् ॥

स विह्वलित-सर्वाऽङ्गो गिरि-शृङ्गेण पोथितः ।
३९] पपात सहसा भूमौ वि-शीर्ण इव पर्वतः ॥३८॥ [३६
नि-हतं राक्षसं दृष्ट्वा हत-शेषा निशा-चराः ।
४०] ययुः प्र-वेपिता लङ्कां वध्यमाना वनौकसा ॥३९॥ [३७
विनिहत-रजनीचरां नि-शम्य
क्षतज-निरन्तर-कर्दमां महीं ताम् ।
रिपु-वध-जनित-श्रमः प्र-हृष्टः
४२] पवन-सुतः स सुहृद्भिर् अर्चितस् तु ॥४०॥ [३८

इत्यार्षे रामायणे युद्ध-काण्डे धूम्राऽक्ष-वधो नाम त्रिंशः सर्गः ॥३०॥

[वं-२९]= [एकत्रिंशः सर्गः] =[दा-५५]

धूम्राऽक्षं नि-हतं श्रुत्वा रावणः क्रोध-मूर्च्छितः । [स५३-१पू
१] बलाऽध्यक्षम् उवाचेदं कृताऽञ्जलिम् उप-स्थितम् ॥१॥ [५५-१उ
शीघ्रं निर्-यान्तु दुर्-धर्षा राक्षसा घोर-दर्शनाः ।
२] अ-कम्पनं पुरस्-कृत्य सर्व-शास्त्र-विशारदम् ॥२॥ [२

---

१. म-विकीर्ण ॥ २. फ-हतरोषा । ३. ल$_2$-ययुः प्रवेपितां । प्र रा$_2$ म-त्रस्ताः प्रवेशिता । फ-त्रस्ताः प्रवे० । ४. रा$_1$ ल$_1$ ल$_2$ ब श्र रा$_2$-वनौकसैः । फ म-प्लवंगमैः ॥ ५. ल$_1$ ब-रिपुवधजनितश्रमः प्र० । रा$_2$-रिपुवधजनितोग्रपुण्यकीर्तिः । ६. अतः परमधिकः पाठः—रा$_2$-भ्रममजहद्धि स मारुतिप्रख्यः ॥ ७. रा$_2$ फ-नास्ति । ८. ब रा$_2$-नास्ति । प्र-लंकाकांडे । म-युद्धपर्वणि ॥ ९. अतः परमधिकः पाठः—रा$_2$-एष वै बलगोप्ता च नेता च युधि संमतः । भूमिकामश्च मे नित्यं नित्यं च समरप्रियः ॥ एष जेष्यति काकुत्स्थौ सुग्रीवं च महाबलम् । वानरांश्च परान् घोरान् हनिष्यति न संशयः ॥ प्रतिगृह्य स तामाज्ञां रावणस्य महात्मनः । बलं संदेशयामास तदा स लघुविक्रमः ॥

ततो नाना-प्रहरणा भीमाऽक्षा भीम-दर्शनाः ।
७] निर्-ययू राक्षसा मुख्या बलाऽध्यक्ष-प्रणोदिताः ॥३॥ [६
[१]रथम् आ-स्थाय तु श्री-मांस् तप्त-काञ्चन-कुण्डलः । [७पू
८] अ-कम्पनस् ततो घोरै राक्षसैर् अभिनिर्-ययौ ॥४॥ [N
तस्य निष्-पततस् तूर्णम् अकस्माद् रथ-वाजिनः ।
९] [२]जघनैः सहसा पेतुर् भय-विह्वल-चेतसः ॥५॥ [N
प्राऽस्पन्दतेक्षणं चाऽस्य सव्यं युद्धाऽभिकाङ्क्षिणः ।
१०] बिभेदे[३] मुख-वर्णश् च कण्ठो वैस्वर्यम् आ-ययौ ॥६॥ [१०
आ-कुलं गगनं चाऽऽसीद् दुर्-दिनं रूक्ष-मारुतम् ।
११] ऊचुः खरं मृगाश् चाऽपि वाचो रूक्षा[४] भयाऽऽवहाः ॥७॥ [११
स तु सिंहोन्नत-स्कन्धः[५] शार्दूल-सम-विक्रमः ।
१२] तान् उत्-पातान् अधः कृत्वा निर्-जगाम निशा-चरः ॥८॥ [१२
तस्य निष्-पतमानस्य नगर्याः सह राक्षसैः ।
१३] बभूव सु-महान् नादः क्षोभयन्न् इव सागरम् ॥९॥ [१३
तेन शब्देन वि-त्रस्ता वानराणां महा-चमूः ।
१४] द्रुम-शैल-प्रहरणा युद्धाय समुप-स्थिता[६] ॥१०॥ [१४
तेषां युद्धं महा-घोरं बभूव कपि-रक्षसाम् ।[७]
१५] राम-रावणयोर् अर्थे समभित्यक्त-जीवितम् ॥११॥ [१५
सर्वे ह्य् अति-बलाः शूराः सर्वे पर्वत-सन्निभाः ।
१६] हरयो राक्षसाश् चैव परस्पर-जयैषिणः[८] ॥१२॥ [१६
तेषां वि-नदतां शब्दः सं-युगेषु तरस्विनाम् ।
१७] शुश्रुवे सु-महांस् तस्मिन्न् अन्योऽन्यम् अभि-गर्जताम् ॥१३॥ [१७

---

१. रा$_1$ ल$_1$ ल$_2$ अ-रथस्थस्तत्र स श्रीमांस् । प्र-रथस्थस्तु ततः श्रीमांस् । रा$_2$-रथमास्थापयामास ॥ २. रा$_1$ल$_1$ल$_2$ब अ प्र फ-साधनैः ॥ ३. अ-बिभिदे ॥ ४. प्र रा$_2$ म-क्रूरा ॥ ५. रा$_2$-सिंहोचितस्कन्धः । म-सिंहोपमस्कन्धः ॥ ६. प्र रा$_2$ फ म-द्रुमशैल प्रहाराणां योद्धुं समवतिष्ठति ॥ ७. म-नास्ति ॥ ८. प्र-०रवधैषिणः ॥

ततस् तु सु-महद् युद्धं सु-भीमम् अभवत् तदा ।
N] सर्व-तो हरि-रक्षोभिः सं-रुरोध दिशो दश ॥१४॥ [१८
अन्योऽन्यं रजसा तेन कौशेयं[1] बहु-पाण्डुरम् ।
१९] सं-वृतं धूम-धूम्रेण ददृशुर् न रणाऽजिरे[2] ॥१५॥ [१९
न ध्वजो न पताका वा धन्विनस् तुर-गोऽपि वा ।
२०] आ-युधं स्यन्दनो वाऽपि ददृशे तेन रेणुना ॥१६[3]॥ [२०
[4]शब्दः सु-तुमुलस् तत्र [5]नेदताम् अभि-धावताम् ।
२१] शुश्रुवे वि-पुलः सं-ख्ये न रूपाणि चकाशिरे ॥१७॥ [२१
परान् एवं सु-संरब्धा हरयो जघ्नुर्[6] आ-हवे ।
२२] वानरान् अपि रक्षांसि नि-जघ्नुः सम्-अरे तदा[7] ॥१८॥ [२२
ते परांश् च विनि-घ्नन्तः स्वांश् च वानर-राक्षसाः ।
२३] रुधिराऽऽर्द्रांस् तदा चक्रुर् महा-दारुण-दर्शनान् ॥१९[8]॥ [२३
हतानां रुधिरौघैस् तु शशामाऽभि-हतं रजः ।
२४] शरीर-शत-संस्तीर्णा[9] बभूव च वसुं-धरा [10]॥२०॥ [२४
द्रुम-शक्ति-शिला-प्राऽऽस-गदा-परिघ-तोमरैः ।
२५] राक्षसा हरयश् चैव जघ्नुर् अन्योऽन्यम् आ-हवे ॥२१॥ [२५
बाहुभिः पर्वताऽऽकारैर् अस्यन्तः परिघोपमैः । [२६पू
N] वानरान् अर्दयामासुः[11] सं-रब्धा रजनी-चराः ॥२२॥ [N
वानराश् चाऽपि रक्षांसि महा-द्रुम-शिलाऽऽदिभिः ।
N] अभि-जघ्नुर्[12] अति-क्रम्य शस्त्राण्य् उच्-छिद्य वीर्य-तः ॥२३[२९
एतस्मिन् अन्तरे वीरा हरयः कुमुदो नलः ।
२८] मैन्दश् च परम-क्रुद्धाश् चक्रुर् युद्धम् अन्-उत्तमम् ॥२४॥ [३०

---

१. रा$_2$ फ म-कौशेयारुणपा० । २. रा$_2$ फ-०जिरं ॥ ३. म-नास्ति ॥ ४. प्र-स शब्दस्तुमुलस् । रा$_2$-शब्दस्तु तु० । ५. रा$_2$ म-नर्दताम् ॥ ६. रा$_1$ ल$_1$ल$_2$ ब-जग्मुर् । ७. प्र रा$_2$-तथा ॥ ८. म-नास्ति ॥ ९. प्र-०संकीर्णा । १०. अ म-नास्ति ॥ ११. म-सूदयामासुः ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब प्र म-०जग्मुर् ॥

ते मुष्टिभिर् महा-वेगा राक्षसानां चमू-मुखे ।
२९] कदनं सु-महच् चक्रुर् लीलया हरि-पुङ्गवाः ॥२५॥ [३१
अभिवा(?पा)त-पुरोवाताः शिला-पादप-वर्षिणः ।
N] उत्-क्रुष्टा गर्जित-रवा मेघा इव बभुस् तदा ॥२६॥ [N
तदा च रक्षो-गणम् उन्-नदन्तं
सम्भ्रान्त-नागाऽश्वरथं वि-षण्णम् ।
महोदधेः क्षुब्धम् इवाऽनु-रूपं
N] निशा-चराणां बलम् आ-बभासे ॥२७॥[3] [N

इत्यार्षे रामायणे युद्ध-काण्डेऽकम्पन-निर्याणं नामैकत्रिंशः सर्गः ॥३१॥

[वं-३०]= **[द्वात्रिंशः सर्गः]** =[दा-५६]

रक्षसां वानरैर् दृष्ट्वा सु-महत् कदनं कृतम् ।
१] क्रोधम् आ-हारयामास तेषां तीव्रम् अ-कम्पनः ॥१॥ [१
क्रोधान् मारुत-वेगस् तु धुन्वन् धनुर्[6] अन्-उत्तमम् ।
२] दृष्ट्वा तत् कर्म शत्रूणां सारथिं वाक्यम् अब्रवीत् ॥२॥ [२
अत्रैव त्वरितं याहि सारथे यत्र वानराः ।
४] एते हि स-हिता घ्नन्ति सु-बहून् राक्षसान् रणे ॥३॥ [३
एतान् नि-हन्तुम् इच्छामि समर-श्लाघिनो ह्य् अहम् ।
५] एतैर् हि राक्षसाऽनीके सु-महत् कदनं कृतम् ॥४॥ [५
ततः प्रजविताऽश्वेन रथेन रथिनां वरः ।
६] हरीन् अभ्य्-अहनत् क्रोधात् किरन् बाणान् अ-कम्पनः ॥५॥ [६

---

१. रा१-उत्क्रुष्टा ग०। म-चक्रुर्वै गर्जितं स्वीयं। २. म-खे बहुशस्॥ ३. म-बस्ति॥ ४. प्र-लंकाकाण्डे०। ब म-अकम्पननिर्याणं। रा२ फ-०निर्याणो॥ ५. म-क्रोधमूर्छितत्वे०। ६. प्र रा२ फ म-परमकार्मुकम्॥ ७. म-रणे॥ ८. रा१-प्रजविता०॥

न[1] शेकुर् वानराः स्थातुं किं पुनर् योद्धुम् आ-हवे ।
७] अकम्पन-शरैर् भग्ना दुद्रुवुस्[2] ते दिशो दश ॥६॥ [७
तान् मृत्यु-वशम् आ-पन्नान् अकम्पन-शराऽऽहतान् ।
८] सम्-ईक्ष्य हनु-मान् ज्ञातीन् सम्प्र-तस्थे महा-बलः ॥७॥ [८
तं महा-प्लवगं दृष्ट्वा सर्वे प्लवग[3]-यूथपाः ।
९] समेत्य सम्-अरे वीरं सम्-अग्राः[4] पर्य्-अवारयन् ॥८॥ [९
हनू-मन्तं च[5] ते दृष्ट्वा बभूवुर् हरि-यूथपाः ।
१०] वि-ध्वस्ता[6] बलिनः सर्वे वेग-वन्तम्[7] उपाऽऽश्रिताः ॥९॥ [१०
अ-कम्पनस् तु शैलाऽऽभं हनू-मन्तम् अव[8]-स्थितम् ।
११] महेन्द्र इव धाराभिः शरैर् अभि-ववर्ष तम् ॥१०॥ [११
अ-चिन्तयित्वा तान् बाणान् शरीरे पततः शितान्[9] ।
१२] अकम्पन-वधाऽर्थाय महाऽऽत्मा वि-दधे मनः ॥११॥ [१२
स प्र-हस्य[10] महा-तेजा हनु-मान् मारुताऽऽत्मजः ।
१३] रक्षस् तद् अभि-दुद्राव कम्पयन्न् इव मेदिनीम् ॥१२॥ [१३
तस्याऽथ नर्दमानस्य[11] दीप्यमानस्य तेजसा ।
१४] बभूव रूपं दुर्-धर्षं शक्रस्येवोद्यताऽशनेः ॥१३॥ [१४
आत्मानं चाऽप्रहरणं[12] दृष्ट्वा[13] क्रोध-समन्वितः ।
१५] सालम् उत्-पाटयामास गिरि-शृङ्गम् इवोन्-नतम्[14] ॥१४॥ [१५
तं गृहीत्वा महा-सालं पाणिनैकेन मारुतिः ।
१६] वि-नद्य सु-महानादं[15] त्रासयामास राक्षसान्[16] ॥१५॥ [१६

---

१. म-न स्थातु वानरैः शक्य । २. प्र रा$_2$ फ-०वुः सर्ववानराः । म-सर्व एव प्रदुद्रुवुः ॥ ३. म-ने प्लवगेश्वराः । ४. म-पहिताः ॥ ५. म-तु । ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-वित्रस्ता । ७. रा$_2$ फ म-बलवन्तम् ॥ ८. प्र म-उपस्थितम् ॥ ९. ल$_2$-चितान् ॥ १०. म-प्रसह्य ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-नन्दमानस्य ॥ १२. रा$_2$-व प्रहर्षेण । १३. म-बुध्वा रोषस० । १४. रा$_2$ फ म-इवोच्छ्रितम् ॥ १५. प्र-अत आरभ्य "भ्रामयामास मारुतिः" इत्यन्तः पाठो नास्ति । १६. म-नास्ति ॥

ततस् तम् अभि-दुद्राव निशा-चरम् अ-कम्पनम्[1] ।
१७] नि-हन्तुं नमुँचिं क्रुद्धो वज्रेणेन्द्र इवाऽऽहवे ॥१६॥ [१७
तम् उद्-यम्य महा-सालं भ्रामयामास मारुतिः ।
N] [2]भ्राम्यमानं(?णं) स[3] चिच्छेद[3] शरैस् तालम् अ-कम्पनः॥१७॥ [N
वि-ध्वस्तं कर्म तद् दृष्ट्वा हनु-मान्[4] अति-विस्मितः ।
N] समुद्-यम्य गिरेः शृङ्गं जवेनाऽभि-ससार तम् ॥१८॥ [N
अ-कम्पनस् ततो दृष्ट्वा गिरि-शृङ्गं समुद्-यतम् ।
१८] दूराद् एव महा-बाणैर् अर्ध-चन्द्रैर् अदारयत् ॥१९॥ [१८
तत् पर्वताऽग्रम् आ-काशे रक्षो-बाण-विदारितम् ।
१९] वि-कीर्णं पतितं दृष्ट्वा हनु-मान् वि-स्मितोऽभवत् ॥२०॥ [१९
२०उ] सोऽश्व-कर्णं समा-साद्य[5] रोषदर्पाऽन्वितो हरिः ।
N] तूर्णम् उत्-पाटयामास गिरि-[6]शृङ्गम् इवोन्-[7]नतम् ॥२१॥ [२०
तं गृहीत्वा महा-कायम् अश्व-कर्णं महा-द्युतिः ।
२१] प्र-हस्य परम-प्रीतो भ्रामयामास सं-युगे ॥२२॥ [२१
प्र-धावन्न् ऊरु-वेगेन प्र[8]भञ्जन-परान् द्रुमान् ।
२२] हनु-मान् परम-क्रुद्धश् चरणैः कम्पयन् महीम् [10]। [२२
२३उ] जघान [11]परम-क्रुद्धः पदातींश् चाऽपरान् बहून् ॥२३॥ [२३उ
तम् अन्तकम् इव क्रुद्धं सम्-अरे प्राण-हारिणम् ।
२४] हनू-मन्तम् अभिप्रेक्ष्य राक्षसा विप्र-दुद्रुवुः [12]॥२४॥ [२४
तम् आ-पतन्तं सं-रब्धं राक्षसानां भयाऽऽवहम् ।
२५] ददर्शाऽकम्पनो वीरश् चुक्रोध च महा-बलः ॥२५॥ [२५

---

१. म-नास्ति ॥ २. प्र रा₂फ म-भ्रामयन्तं। ३. ल₁-च चिच्छेद । रा₂-विचिच्छेद ॥ ४. रा₁ ल₁ल₂ब-०मानिति वि०।प्र-०मान् वीक्ष्य वि० । रा₂फ-०मान्प्रेक्ष्य वि० । म-"हनुमान्" इत्यारभ्य "दृष्ट्वा हनु०" इत्यन्तः पाठो नास्ति ॥ ५. म-समादाय । ६. रा₂ फ म-महागिरिं । ७. प्र रा₂ फ-इवोच्छ्रितम् । म-इवोत्थितम् ॥ ८. रा₂ फ-सम्भञ्जनप० । ९. म-नास्ति । १०. अतः परमधिकः पाठः—रा₂-राक्षसान् सबलान् क्रूरान् सहयान् सरथस्थितान् । ११. प्र,रा₂-समरे क्रुद्धः ॥ १२. रा₁ ल₁ ल₂ ब श्र प्र फ-नास्ति ॥

स चतुर्-दशभिर् बाणैर् वि-शिखैर् मर्म-भेदिभिः ।
२६] बिभेद सु-महावीर्यं हनू-मन्तम् अ-कम्पनः ॥२६॥ [२६
स तथा तेन वि-ध्वस्तो बहुभिर् मार्गणैः शितैः[2] ।
२७] हनु-मान् ददृशे वीरो रुधिरेण सम्-उक्षितः ॥२७॥ [२७
उत्-पाट्य सहसा वृक्षं कृत्वा वेगम् अन्-उत्तमम् ।
२८] शिरस्य्[3] अभि-जघानाऽऽशु[3] निशा-चरम् अ-कम्पनम् ।२८। [२९
तेन वृक्ष-प्रहारेण वज्रेणेवाऽति-रंहसा ।
N] राक्षसो वानरेन्द्रेण प्रेषितो यम-सादनम् ॥२९॥[4] [३०
तं दृष्ट्वा पतितं भूमौ कम्पमानम् अ-कम्पनम् ।[4]
३०] व्यथिता राक्षसाः सर्वे क्षिति-कम्पे न(-?)गा इव ॥३०॥ [३१
त्यक्त-प्रहरणाः सर्वे राक्षसास् ते परा-जिताः ।
३१] लङ्कां प्र-विविशुस् त्रस्ता हन्यमानाः प्लवं-गमैः ॥३१॥[6] [३२
ते मुक्त-केशाः सं-विग्ना भज्यमानाः परा-जिताः ।[6]
३२] भयाच् छ्रम-जडैर् गात्रैः श्वसन्तो विप्र-दुद्रुवुः ॥३२॥ [३३
अन्योऽन्यम् अभि-मर्दन्तो विविशुर् नगरं तदा ।
३३] पृष्ठ-तस् त्रास-संमूढाः प्रेक्षमाणा मुहुर्-मुहुः ॥३३॥ [३४
तेषां सं-जहतां सं-रव्यं विशतां च पुरीं भयात् ।
३४] रक्षसाम् अ-जेयं दृष्ट्वा वि-नेदुस् ते वनौकसः ॥३४॥ [N
वि-नेदुश् च यथा-कामं हरयो जित-काशिनः ।
N] पुनश् च जघ्नुः पतितान् स-प्राण(?णा)नेव राक्षसान्॥३५॥[13] [३७

---

१. म-निशितैर्देहभेदिभिः॥ २. रा१-शतैः॥ ३. म-शिरसा निजघानाथ॥ ४.रा१ल१ल२ब अ प्र रा२फ-नास्ति॥ ५. म-अत आरभ्य ३४-शश्लोक यावत्पाठो नास्ति॥ ६. अ-नास्ति॥ ७ रा२-मुक्तवेशाः। ८. प्र-छ्रमपरैः॥ ९. रा१ल१ल२ ब अ प्र-०नन्दन्तो। १०. ल१ल२ब-०सम्पूर्णाः॥ ११. रा२ फ-राक्षसानां भयं॥ १२. रा१ल१ल२ब अ प्र रा२फ-सव्रणानेव। १३. म-पाठोऽयं ३७-शश्लोकानन्तरं व्यत्यासेन पठितः॥

तेषु लङ्कां प्र-विष्टेषु राक्षसेषु यथा-बलम् ।[1]
३५] [1]समेत्य हरयः [1]सर्वे हनु-मन्तम् अपूजयन् ॥३६॥ [३५
सोऽपि प्र-हृष्टस् तान् सर्वान् वानरान् प्रत्य्-अपूजयत्[2] ।
३६] हनू-मान् सत्त्व-सम्पन्नो यथाऽर्हम् अभि-पूजितः ॥३७॥ [३६
अपूजयन् देव-गणास् ततः कपिं
स्वयं च रामोऽति-[3]बलश् च[3] लक्ष्मणः ।
तथैव सुग्रीव-[4]मुखाश् च वानरा[4]ः
३९] वि-भीषणश् चैवं सहाऽ[6]नु-यायिभिः ॥३८॥ [३९

इत्यार्षे रामायणे युद्ध-[7]काण्डेऽकम्पन-वधो नाम द्वात्रिंशः सर्गः ॥३२॥

[वं-३१]= [त्रयस्त्रिंशः सर्गः] =[दा-२७]

१पू] ततस् तु रावणः क्रुद्धः श्रुत्वा हतम् अ-कम्पनम् । [१पू
३उ] पुरीं परि-ययौ लङ्कां सर्वा(न्) गुल्मान् अवेक्षितुम् ॥१॥ [२उ
तां राक्षस-गणैर् [8]गुप्तां गुल्मैश च बहुभिर् [9]युताम् ।
४] ददर्श लङ्कां राजन्तीं बहु-ध्वज-पताकिनीम् ॥२॥[10] [३
रुद्धां तु नगरीं दृष्ट्वा रावणो राक्षसेश्वरः ।
५] उवाचाऽमर्षितः काले प्र-हस्तं युद्ध-कोविदम् ॥३॥ [४
पुरस्योपनि-रुद्धस्य सहसा पीडितस्य च ।
६] नाऽन्यं सम्-अर्थं पश्यामि युद्धे [11]युद्ध-विदां [11]वरे ॥४॥ [५
७उ] अहं वा कुम्भ-कर्णो वा त्वं वा सेना-पतिर् मम[12] ।
इन्द्र-जिद् वा नि-कुम्भो वा वहेयुर भारम् ईदृशम् ॥५॥ [६

---

१. म-नास्ति ॥ २. अतः परमधिकः पाठः—म-स वीरशोभामतुलां वहन् कपिर्निहत्य रक्षः सहसानिलात्मजः । महासुरं वीरसमुन्नताय यथैव विष्णुर्बलिनं चमूमुखे ॥ ३. म-रामो सरथश्च । ४. म-०मुखाः प्लवंगमाः । ५. प्र-चापि । ६. म-०नुयोधिभिः ॥ ७ ब श्र प्र-लंकाकाडे । म-युद्धपर्वणि ॥ ८. म-युक्तां । ९. रा₂ फ म-वृताम् । १०. प्र-द्वितीयतृतीयपादौ न स्तः ॥ ११. ल₁ ल₂ ब रा₂ फ-युद्धविशारद । म-युद्धविशारदम् ॥ १२. म-नास्ति ॥

८] स त्वं बलम् इदं कृत्स्नम् आ-दाय परि-गृह्य च ।
वि-जयायाऽऽशु निर्-याहि जहि सर्वान् वनौकसः ॥६॥ [७
९] निर्-याणाद् एव ते वीर चपला हरि-वाहिनी ।
न[2]दतां राक्षसेन्द्राणां श्रुत्वा नादं न[3] तिष्ठति ॥७॥ [८
१०] चपला ह्य् अ-विनीताश् च चल-चित्ताश् च वानराः ।
घोषं न ते सहिष्यन्ति सिंह-नादम् इव द्वि-पाः ॥८॥ [९
११] न[4]दन्तं त्वां समा-लक्ष्य रामः सौमित्रिणा सह ।
अ-वशस् ते निरा-लम्बः प्र-हस्त वशम् एष्यति ॥९॥ [१०
१२] आपत्सु सं-[5]शयः श्रेयो न[6] तु[7] निः-संशयं(?यः)कृतम्(?तः) ।
प्रतिलोमाऽनुलोमं च य[10]था-वन् मन्यसे हितम् ॥१०॥ [११
१३] रावणेनैवम् उक्तस् तु प्र-हस्तो वाहिनी-पतिः ।
राक्षसेन्द्रम् उवाचेदम् असुरेन्द्रम् इवोशनाः ॥११॥ [१२
१४] राजन् मन्त्रितं-पूर्वं[8] मे[9] कुशलैर् मन्त्रिभिः सह ।
वि-वादश् चाऽपि नो वृत्तः समवेक्ष्य परस्परम् ॥१२॥ [१३
१५] प्र-दानेन तु सीतायाः श्रेयो व्यव-सितं मया ।
अ-प्रदाने पुनर् युद्धं दृष्टम् एतत् तदैव तु ॥१३॥ [१४
१६] सोऽहं दानैश् च मानैश् च सततं लालितस् त्वया ।
सान्त्वैश् च वि-विधै राजन् किं न कुर्यां प्रियं तव ॥१४॥ [१५
१७] मद्-बाणाऽशनि-वेगेन हतानां तु रणाऽजिरे ।
अद्य तृप्यन्तु मांसेन पक्षिणः कानननौकसाम्[11] ॥१५॥ [१६
१८] नहि मे जीवितं र[12]क्ष्यं पुत्रदारधनाऽऽदिभिः ।

---

१. म-नास्ति ॥ २. रा$_2$ फ म-नर्दतां । ३. ल$_1$-प्रतिष्ठति । प्र-चलिष्यति । रा$_2$ फ म-प्रविष्यति ॥ ४. रा$_2$ फ म-नर्दन्तं ॥ ५. ल$_1$ प्र-संश्रयं । रा$_2$ म-सश्रयः । ६. म-ननु । ७. म-यद्दन्यन् ॥ ८. म-मंत्रितमस्माभिः । ९. रा$_1$ ल$_1$ ल$_2$ ब-कुशलं ॥ १०. म-पूजितस् ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब-अप्र-०कसः ॥ १२. ल$_2$-शक्यं ।

स त्वं मां पश्य[1] जुह्वन्तं त्वद्-अर्थं[2] जीवितं रणे ॥१६॥ [१६
१९] एवम् उक्त्वा तु भर्तारं रावणं वाहिनी-पतिः ।
उवाचेदं[3] बलाऽध्यक्षान् प्र-हस्तः पुर-तः स्थितान्[4] ॥१७॥ [१७
२०] समाऽ[5]नयत मे क्षिप्रं राक्षसानां महद् बलम् । [१८
यावद् वानर-मांसेन पक्षिणस् तर्पयाम्य् अहम् ॥१८॥
२१] इत्य् उक्तास् ते प्र-हस्तेन बलाऽध्यक्षाः कृत-त्वराः[6][4] ।
बलम् उद्-योजयामासुस्[7] तस्मिन् राक्षस-मन्दिरे ॥१९॥ [२०
२२] सा बभूव मुहूर्तेन तिग्मा सेना(?तिग्म-सेना)बहु-ध्वजा ।
लङ्का राक्षस-वीरैस् तैर् गजैर्[8] इव समा-कुला ॥२०॥ [२१
२३] हुताऽशनं तर्पयेतां[9] ब्राह्मणांश्[10] च नमस्यताम् ।
हव्य-गन्धं प्रति-वहन् सुरभिर् मारुतो ववौ[11] ॥२१॥ [२२
२४] तर्पयित्वा तु ते सर्वे विधि-वज् जात-वेदसम् । [N
२५उ] स्रजश् च विविधाऽऽकाराः शिरोभिर् अभि-मन्त्रिताः[12] ॥२२॥
२६पू] सङ्ग्राम-संज्ञाः[13] सं-हृष्टा धारयन्तो महा-बलाः । [२३
N] ब्राह्मणैः स्वस्ति वाच्याऽग्रे सं-ग्रामाय जयाऽऽशिषः ॥२३॥ [N
२६उ] धनुर्-हस्ताः[14] कवचिनो वेगेनोऽऽप्लुत्य राक्षसाः ।
रावणं प्रेक्ष्य राजानं प्र-हस्तं पर्य्-अवारयन् ॥२४॥ [२४
२७] अथ सं-मान्य[15] राजानं भेरीम् आ-हत्य सु-स्वराम्[16] ।
आ-रुरोह रथं दिव्यं प्र-हस्तः सज्ज-कार्मुकम्[17] ॥२५॥ [२५

---

१. प्र रा$_2$फ म-संपश्य मां जुह्वयन्तं ।२. म-त्वदर्थे याचितं ॥ ३. रा$_2$ फ-बलाध्यक्षं प्रहस्तः पुरतः स्थितम् ।४. रा$_1$ल$_1$ल$_2$ब अ प्र-नास्ति ॥५. रा$_2$ फ-समानयस्व ॥ ६. रा$_2$ फ-उक्तस्तु प्रहस्तेन बलाध्यक्षः कृतक्षणः । ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-०मास ॥ ८. ल$_1$ ल$_2$ ब-गणैर् ॥ ९. ल$_1$ म-तर्पयित्वा । १०. ल$_1$ल$_2$ब-०णांश्च नमस्कृताम् । म-नास्ति । ११. म-नास्ति ॥ १२. प्र-अभिपूजिताः ॥ १३. रा$_1$ल$_1$ल$_2$ ब अ प्र-संज्ञां ॥ १४. म-खड्गचर्मधनुर्धराः ॥ १५. म-संगम्य । १६. ल$_1$ ल$_2$ अ प्र-सस्वराम् । १७. रा$_2$-नास्ति ॥

२८] हयैर् महा-जवैर् युक्तं सम्यक् तूल-समन्वितम् [2] ।
महा-जलद-निर्घोषं दीप्त-चन्द्राऽर्क-भास्वरम् ॥२६॥ [२६
२९] उदग्र-ध्वज-दुर्धर्षं सु-वरूथं [3]स्व्-अपस्करम् । [4]
३०उ] सुवर्ण-जाल-संयुक्तं प्र-हसन्तम् इव श्रिया [5]॥२७॥ [२७
स तूर्णं रथम् आ-स्थाय [6]बाणाऽर्पित-शराऽऽसनः ।
३१] लङ्काया निर्-ययौ क्षिप्रं बलेन महता वृतः ॥२८॥ [२८
ततो दुन्दुभि-निर्घोषः पर्जन्य-निनदोपमः ।
३२] शुश्रुवे शङ्ख-शब्दश् च प्र-याते वाहिनी-पतौ ॥२९॥ [२९
व्यू-ऊढेन वाऽथ सैन्येन प्राग्-द्वारेण विनिर्-ययौ [7] ।
३३] गज-यूथ-निकाशेन बलेन महता वृतः ॥३०॥ [३२
वि-नदन्तो रवान् घोरान् राक्षसा [8]जग्मुर् अग्र-तः ।
३४] [9]समन्त-तो महा-कायाः प्र-हस्तस्य पुरः-सराः ॥३१॥ [10] [३०
सागर-प्रतिमौघेन बलेन महता वृतः । [11]
N] प्र-हस्तो निर्-ययौ क्रुद्धः कालाऽन्तक-यमोपमः ॥३२॥ [३३
तस्य निर्याण-घोषेण राक्षसानां च गर्जताम् [12] ।
३५] लङ्काया सर्व-भूतानि वि-नेदुर् वि-[13]कृतैः स्वरैः ॥३३॥ [३४
व्यू-अभ्रम् आ-काशम् आ-वृत्य शस्त्र-वर्णे खर-स्वनम् । [३५पू
३६] ववर्ष रुधिरं देवः प्र-हस्तस्य रथोपरि ॥३४॥ [N
ध्वज-मूर्धनि गृध्रोऽस्य नि-लीनो दक्षिणा-मुखः । [३९पू
३७] वमन्त्यः पावक-ज्वालाः शिवा [14]घोरा ववाशिरे ॥३५॥
अन्तरिक्षात् पपातोल्का वायुश् च परुषो ववौ [15] । [३६

---

१. रा$_1$ल$_1$ल$_2$ब श्र प्र-प्रहसन्तमिव श्रिया । २. रा$_2$-नास्ति ॥ ३. रा$_2$-परिष्कृतम् । फ-परिस्करम् । ४. म-नास्ति । ५. म-सुवर्णजलसंमिश्रं सूर्यतेजः-समप्रभं ॥ ६. म-रावणं पुरतः स्थितम् ॥ ७. म-व्यूढेन रथघोषेण प्राग्द्वारेण स निर्ययौ ॥ ८. रा$_1$ल$_1$ल$_2$ब श्र म-जघ्नुः । ९. रा$_2$-भीमरूपा । १०. प्र-नास्ति ॥ ११. प्र रा$_2$म-नास्ति ॥ १२. रा$_2$-राजताम् । १३. ल$_1$ल$_2$ब श्र-विहतैः ॥ १४. श्र-घोरं ॥ १५. म-नास्ति ।

३८] अन्योऽन्यम् अभिसं-रब्धा ग्रहाश् च न चकाशिरे[1] ॥३६॥ [३७
३९पू] प्र-यातस्य च सं-ग्रामे छाया[2]ऽस्य वि-कृताऽभवत् ।
४१.उ] अश्रु-पूर्ण-मुखश् चाऽस्य दक्षिणः स्खलितो हयः ॥३७॥ [N
३९उ] सारथेर् बहुधा चाऽस्य पृतनाम् अव-गाहतः ।
प्र-तोदो न्य्-अपतद् धस्ताद् धरण्यां हय[3]-शासिनः ॥३८॥ [४०
४०] निर्याण-श्रीश् च तस्याऽऽसीद् भास्वरा या सु-दुर्लभा ।
४१.पू] सा ननाश मुहूर्तेन समे च स्खलिता हयाः ॥३९॥[4] [४१.
तान् सम्-ईक्ष्य महोत्पातान् प्र-हस्तो भृश-दारुणान् ।
४२] आत्म-धैर्यं वि-वृण्वानो राक्षसान् इत्य् उवाच ह ॥४०॥ [N
कालो भवेयं कालस्य दहेयम् अपि पावकम् ।
४३] मृत्युं मरण-धर्मेण सं-योजयितुम् उत्-सहे ॥४१॥[4] [N
तस्य तद् वचनं श्रुत्वा प्र-हस्तस्य रणाऽजिरे ।
४४] सुसंरब्ध-तरा नेदु[5] राक्षसा युद्ध-दुर्मदाः[6] ॥४२॥ [N
ततस् तम् अभिनिर्-यातं प्रभूत-बल-पौरुषम् ।
४५] युधि नाना-प्रहरणा कपि-सेनाऽभ्य्-अवर्तत ॥४३॥ [४२
अथ घोषः सु-तुमुलः कपीनां सम्-अजायत ।
४६] वृक्षान् प्र-भञ्जतां चैव गुर्वीश् चोद्-यच्छतां शिलाः ॥४४॥ [४३
उभे ते मुदिते सेने रक्षोगण-वनौकसाम् । [४४उ
४७] वेगितानां सम्-अर्थानाम् अन्योऽन्यं वध-काङ्क्षिणाम् ॥४५॥ [४५पू
ततः प्र-हस्तः कपि-वाहिनीं ताम्
अभिप्र-तस्थे नि-धनाय दुर्-मतिः ।
विवृद्ध-वेगं वन-दाह-दारुणं[8]
N] यथा मुमूर्षुः शलभो विभा-वसुम् ॥४६॥ [४६

इत्यार्षे रामायणे युद्धे-काण्डे प्रहस्त-निर्याणं नाम त्रयस्त्रिंशः सर्गः ॥३३॥

---

१. म-नास्ति ॥ २. रा१ल१ल२ब अ प्र रा२ फ-छाया च ॥ ३. म-हरिशासिनः ॥ ४. म-नास्ति ॥ ५. म-चासन् । ६. प्र रा२फ म-युद्धकांक्षिणः ॥ ७. रा२ फ म-तु ॥ ८. म-विशुद्धवेगं विनदन्सुदारुणं ॥ ९. ब प्र रा२-लंकाकाण्डे । म-युद्धपर्वणि ॥

ततः प्र-हस्तं निर्-यान्तं भीमं भीम-पराऽऽक्रमम् । [१पू
१] गर्जन्तं सु-महाकायं राक्षसैर् अभिसं-वृतम्[1] ॥१॥ [५उ
ददर्श महती सेना वानराणां बलीयसाम् ।
२] अभिसंजात-हर्षाणां प्र-हस्तम् अभि-गर्जताम् ॥२॥ [६
खड्ग-शक्त्यृष्टि-बाणाश् च शूलानि मुसलानि च ।
३] गदाश् च परि-घाश् चैव वि-विधाश् च परश्व-धाः ॥३॥ [७
धनूंषि च वि-चित्राणि राक्षसानां जयैषिणाम् ।[2]
४] प्र-गृहीतान्य् अशोभन्त वानरान् [3]अभि-धावताम् ॥४॥ [८
जगृहुः पाद-पांश् चैवं पुष्पितान् वानरर्षभाः ।
५] शिलाश् च वि-विधा दीर्घा योद्धु-कामाः प्लवं-गमाः ॥५॥ [९
तेषाम् अन्योऽन्यम् आ-साद्य सं-ग्रामः सु-महान् अभूत् ।
६] बहूनाम् अश्म[4] (?श्म)-वृष्टीश् च शर-वृष्टीश् च वर्षताम् ॥६॥ [१०
बहवो राक्षसा युद्धे बहून् वानर-यूथपान् ।
७] वानराश्[5] चाऽपि रक्षांसि नि-जघ्नुश् चपलान् बहून् ॥७॥ [११
शूलैः प्र-मथिताः के-चिद् वानराः[6] परमाऽऽयुधैः ।
८] परि-घैर्[7] आ-हताः के-चित् के-चिच् छिन्नाः परश्व-धैः ॥८॥ [१२
निर्-उच्छ्वासाः[8] कृताः के-चिन् नि-पेतुर् धरणी-तले ।
९] विभिन्न[9]-शिरसः के-चिद् इषुभिश् छादितास्[10] तथा ॥९॥ [१३
के-चिद् द्वि-धा कृताः[11] खड्गैः[12] स्फुरन्तः[13] पतिता भुवि ।

---

१. रा₂-बहुभिर्वृतम् ॥ २. अ-नास्ति ॥ ३. रा₂ फ-प्रतिधा० ॥ ४. रा₁ ल₁ ल₂ ब अ प्र-अस्त्रवृष्टीश् ॥ ५. अ प्र-वानराश् ॥ ६. म-नास्ति । ७. रा₁ ल₁ ल₂ ब अ-परिघेन ॥ ८. प्र रा₂ फ-०छ्वासाः पुनः । म-नास्ति । ९. ल₁ ल₂ ब-अभिन्नशि० । १०. रा₂ फ-चार्दितास् ॥ ११. फ-कृतैस् । १२. ल₁ ल₂ ब अ प्र रा₂-तीक्ष्णैः । १३ रा₁ ल₁ ल₂ ब अ प्र-पुरतः ।

१०] वानरा राक्षसैः शूरैः(?लैः) पार्श्व-तश् च वि-दारिताः[2] ।१०।[१४
पाद-पैर् गिरि-शृङ्गैश् च सं-पिष्टा धरणी-तले ।
११] वानरैश् चाऽपि सं-क्रुद्धै राक्षसौघाः समन्त-तः ॥११॥ [१५
वज्र-स्पर्शैस् तलैश् चाऽन्ये मुष्टिभिश् चै हता भृशम् ।
१२] वेमुश् च शोणितं वक्त्रैर् विशीर्ण-दर्शन-च्छदाः ॥१२॥ [१६
आर्त-स्वरं च नर्दतां सिंह-नादांश् च गर्जताम् ।
१३] बभूव तुमुलः शब्दो हरीणां रक्षसां तथा ॥१३॥ [१७
वानरा राक्षसाश् चैव वीर-मार्गम् अनु-व्रताः ।[10]
१४] निवृत्त-नयनाश् चक्रुः क्रुद्धाः कर्माण्य् अभीत-वत् ॥१४॥ [१८
१५उ] करं-धमः कुम्भ-हनुर् महा-नादः समुन्-नदः ।
एते प्रहस्त-सचिवा जघ्नुः सर्वान् वनौकसः ॥१५॥ [१९
१६] तेषाम् आ-पततां क्षिप्रं नि-घ्नतां च वनौकसः ।[12]
द्वि-विदो गिरि-शृङ्गेण[13] जघानैकं करं-धमम् ॥ १६॥ [२०
१७] दुर्-मुखः पुनर् आ-धूय बल-वान् वि-पुलं द्रुमम् ।
अ-परोक्षं प्र-हस्तस्य समुन्-नदम् अपोथयत् ॥१७॥ [२१
१८] जाम्ब-वांस् तु सु-संरब्ध[15] उत्था(द्-स्था)प्य[16] वि-पुलां शिलाम् ।
अपातयन् महा-तेजा महा-नादस्य वक्षसि ॥१८॥ [२२
१९] अथ कुम्भ-हनोस् तारस् तरसा सं-युगे बली ।

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-राक्षसाश्चैव । रा$_2$ फ-०सैश्चैव । २. रा$_1$ ल$_1$ ल$_2$ ब अ-बहुधारवि० । प्र-बहुधा च वि० । रा$_1$ म-०तश्चावदारिताः ॥ ३. ल$_2$-तुल्यैश् । ४. प्र म- चाहता । ५. प्र-ववमुः । रा$_2$ फ-अवमन् । म-उद्वमुः । ६. प्र रा$_2$ फ म-०दशनेक्षणाः ॥ ७. ल$_2$-अन्तस्वरं । रा$_2$ फ-आर्तस्वनं । ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-नदताम् । ९. प्र रा$_2$ फ-तदा ॥ १०. अतः परमधिकः पाठः—रा$_2$-एतस्मिन्नन्तरे शूराः प्रहस्तस्य पदानुगाः ॥ ११. प्र-०कसाम् । १२. फ म-नास्ति । १३. रा$_1$ अ-गिरिदुर्गेण । ल$_1$ ल$_2$ ब-गिरिमार्गेण ॥ १४. रा$_2$ फ-बलाद्वि वि० । म-बलात्सुविधमं । १५. म-सुसंक्रुद्धः । १६. रा$_2$ फ म-उत्पाटय ॥

वृक्षेण महता प्राणान् कपिस् तस्य समा-ददे ॥१९॥ [२३
२०] अ-मृष्यमाणस् तत् कर्म प्र-हस्तो रथम् आ-स्थितः ।
२१पू] चकार कदनं घोरं धनुष्-पाणिर् वनौकसाम् ॥२०॥ [२४
२२पू] क्षुभितस्याऽप्रमेयस्य सागरस्येव सं-प्लवैः ।
२१उ] आ-वर्त उपसं जज्ञे बलस्य महतो महार्ने ॥२१॥ [२५
२२उ] महताऽपि शरौघेण प्र-हस्तो युद्ध-कोविदः ।
अर्दयामास सं-क्रुद्धो वानरान् परमाऽऽहवे ॥२२॥ [२६
२३] वानराणां शरीरैस् तै राक्षसानां च मेदिनी ।
बभूव नि-चिता तत्र पर्वतैर् इव सर्व-तः ॥२३॥ [२७
२४] सा मही रुधिरौघेण प्र-च्छन्ना स्म प्र-काशते ।
२५पू] सं-च्छन्ना माधवे मासि पलाशैर् इव पुष्पितैः ॥२४॥ [२८
हत-वीरौघ-वप्रां तु भग्नाऽऽयुध-परिच्छदाम् ।
N] शोणितौघ-महातोयां यम-सागर-वाहिनीम् ॥२५॥ [२९
यकृद्-घन-महापङ्कां विनिष्कीर्णाऽन्त्र-शैवलाम् ।
N] छिन्न-काय-शिरो-मीनाम् अङ्गाऽवयव-शाद्वलाम् ॥२६॥ [३०
गृध्र-हंस-वटा(?का)ऽऽकीर्णां कङ्क-सारस-नादिताम् ।
N] मेदः-फेन-चयाऽऽकीर्णां मूर्त-स्तनित-निःस्वनाम् ।२७।
तां कापुरुष-दुस्तारां युद्धभूमि-महानदीम् । [३१
नदीम् इव जलाऽऽपातां हंस-सारस-सेविताम् ।
N] राक्षसाः कपि-वीरांश् च तां तेरुर् दुस्-तरां नदीम् २८ [३२

१. म-रथिनां वरः । २. म-नास्ति ॥ ३. फ-सम्भवः । ४. म-०तोभवत् ॥ ५. म-स महाहवे ॥ ६. रा१ ल१ ल२ ब ञ प्र-शरीरेषु । म-शरीरैश्च । ७. रा२ म-०रगामिनीम् ॥ ८. फ-यकृद्वन० । म-शोणितौघम० । ९. म-०र्णाङ्गशाद्वलाम् । १०. रा१ल१ल२ब-छिन्नछायाशिरो० ॥ ११. रा२-०ससेविताम् ॥ १२. रा१ ब ञ प्र फ-मत्त० ॥ १३ ल१ ल२ ब ञ रा२ फ प्र-जलापाये । १४. म-नास्ति । १५. रा१-कपियूथाश् । प्र रा२ फ-कपियोधाश् । १६. रा१-ते सर्वे दुस्तरां तदा ॥

यथा पद्म-रजो-ध्वस्तां नलिनीं गज-यूथपाः । [३३
N] व्य्-अगाहन्त तथा वीरा हरि-राक्षस-पुङ्गवाः ॥२९॥ [N
२५३] ततः सृजन्तं बाणौघान् प्र-हस्तं स्यन्दने स्थितम् ।
ददर्श तरसा नीलो विनि-घ्नन्तं प्लवं-गमान् ॥३०॥ [३४
२६] ततः परम-दुर्धर्षम् आ-पतन्तं महा-कपिः ।
प्र-हस्तं ताडयामास वृक्षम् उत्-पाट्य वीर्य-वान् ॥३१॥ [३८उ
२७] स तेनाऽभि-हतः क्रुद्धो नदन् राक्षस-पुङ्गवः ।
ववर्ष शर-वर्षाणि प्लवङ्गम-चमूपतौ ॥३२॥ [३९
२८] तद् यथा गो-वृषो वर्षं शारदं शीघ्रम् आ-गतम् । [४१पू
अ-पारयन् वारयितुं कृत्वा चक्षुर्-निमीलितम् ॥३३॥ [४०उ
२९] एवम् एव प्र-हस्तस्य शर-वर्षं प्लवं-गमः ।
निमीलिताऽक्षः सहसा नीलः सेहे ऽति-दारुणम् ॥३४॥ [४१उ
३०] रोषितः शर-वर्षेण सालेन महता ततः ।
नि-जघान हयान् नीलः प्र-हस्तस्य महा-जवान् ॥३५॥ [४२
३१] स हस्ताद् बाणम् उत्-सृज्य प्र-हस्तः स-शराऽऽसनम् ।
प्र-गृह्य मुसलं घोरं स्यन्दनाद् अव-पुप्लुवे ॥३६॥ [४४
३२] ततस् तौ वाहिनी-मुख्यौ जात-क्रोधौ तरस्विनौ ।
तस्थतुः क्षतजाऽऽर्द्राऽङ्गौ प्र-भिन्नाव् इव कुञ्जरौ ॥३७॥ [४५
३३] ततक्षतुः सु-तीक्ष्णाभिर् दंष्ट्राभिर् इतरेतरम् ।

---

१. रा$_1$-नलिनी नाम यू० । २. रा$_2$-महावीरा हरयो (?रीन्) राक्षसेश्वराः ॥ ३. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ म-निघ्नन्तं च ॥ ४. म-पाणिना ॥ ५. रा$_1$ म-क्रोधात् ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-अवारयद्वंचयितुं । रा$_2$ फ म-०यन्वर्जयितुं ॥ ७. रा$_1$-नीलोऽसहत दा० ॥ ८. रा$_1$-सालमुत्पाट्य वीर्यवान् । ९. रा$_1$-मनोजवान् ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र फ-स्वहस्ताद् बा० । रा$_2$-सहसा बा० । ११. रा$_1$-०सनः । १२. फ म-मुद्गरं । १३. ल$_1$ ब-स्यन्दनं चैव पु० ॥ १४. ल$_1$ ल$_2$ ब श्र प्र-०जाक्रान्तौ । रा$_2$ फ-०जात्ताङ्गौ । म-क्षतरक्ताङ्गौ ॥ १५. रा$_1$ रा$_2$ फ म-उल्लिखन्तौ ।

सिंह-शार्दूल-सदृशौ सिंह-शार्दूल-विक्रमौ ॥३८॥ [४६
३४] [1]तौ समानाव् उभौ[1] वीरौ सं-[2]युगेष्व् अ[2]-निवर्तिनौ ।
आ-काङ्क्षन्तौ यशः प्राऽऽप्तुं वृत्रेन्द्राव् इव सं-युगे॥३९॥ [४७
३५] आ-जघान ततो नीलं ललाटे मुसलेन सः ।
प्र-हस्तः परमाऽऽयस्तस् तस्य सुस्राव शोणितम् ॥४०॥ [४८
३६] ततः शोणित-संसिक्तः[3] स गृहीत्वा महा[3]-तरुम् ।
प्र-हस्तस्योरसि क्रुद्धो वि-ससर्ज महा-कपिः ॥४१॥ [४९
३७] [4]प्र-हारं तम् अ-चिन्त्याऽर्थं[4] प्र-गृह्य मुसलं मह[5]त् ।
अभि-दुद्राव बलिनं बली नीलं प्लवं-गमम् ॥४२॥ [५०
३८] तम् उग्र-[6]वेगं सं-रब्धम् आ-पतन्तं महा-कपिः ।
नीलः सम्प्रेक्ष्य जग्राह महा-कायो महा-शिलाम्॥४३॥ [५१
३९] तस्य युद्धाऽभिकामस्य मृधे मुसल-योधिनः ।
प्र-हस्तस्य शिलां नीलो मूर्ध्नि शीघ्रम्[7] [8]अपातयत्॥४४॥ [५२
४०] सा तस्य कपि-मुख्येन वि-मुक्ता महती शिला ।[9]
[9]बिभेद बहु-धा घोरा प्र-हस्तस्य शिरो महत् ॥४५॥ [५३
४१] स गताऽसुर् गत-श्रीको गत-सत्त्वो गतेन्द्रियः ।
पपात सहसा भूमौ छिन्न-मूल इव द्रुमः ॥४६॥ [५४
४२] विभिन्न-शिरसस् तस्य बहु सुस्राव शोणितम् ।
शरीराद्[11] [12]अतिसं-रब्धं जलं प्र-स्रवणाद् इव ॥४७॥ [५५
४३] हते प्र-हस्ते नीलेन तत्राऽऽकम्प्य[13] मह[13]द् बलम् ।
राक्षसानाम् अ-हृष्टानां लङ्काम् अभि-पपात ह ॥४८॥ [५६

---

१. ल$_{१}$ ल$_{२}$ ब ञ प्र रा$_{२}$ फ म-विक्रान्तौ समरे । २. ल$_{१}$ ल$_{२}$ ब-संग्रामेष्वनि० । रा$_{२}$-सयुगेष्वतिव० । म-संयुगेष्यनि० ॥ ३. रा$_{१}$-०संदिग्धः प्रगृह्य सुमहा० ॥ ४. रा$_{१}$-तमचिन्त्य प्रहारं तु । ५. रा$_{१}$-पुनः ॥ ६. ल$_{१}$ ल$_{२}$ ब ञ-उग्रवीर्यं ॥ ७. रा$_{१}$-तूर्णम् । प्र-नीलो । रा$_{२}$फ-चैव । ८. प्र रा$_{२}$फ-न्यपात० । ९. म-नास्ति ॥ १०. रा$_{१}$-तेन ॥ ११. फ-शरीरम् । १२. रा$_{१}$ प्र रा$_{२}$फ म-अभिसं० ॥ १३. रा$_{१}$-तदकम्पन्म० । ल$_{१}$ ल$_{२}$ ब ञ-तत्राकम्पत तद् ॥

४४] अ-शक्तं समभि[2]-स्थातुं नि-हते वाहिनी-पतौ ।
कुम्भं भग्नं समा-साद्य वि[3]-कीर्णं सलिलं यथा ॥[4]४९॥ [५७
हते तस्मिंश् चमू-मुख्ये न कश्-चित् पुरुषोऽभवत् ।
४५] तस्मिन् रक्षो-गणे-बले ध्यान-मूकत्वम् आ-गते ॥५०॥ [५८
ततः स नीलो वि-जयी महा-बलः
प्र-शस्यमानः स्व-कृतेन कर्मणा ।
समेत्य रामेण च लक्ष्मणेन
N] प्रहृष्ट-रूपोऽथ बभूव यूथ-पः ॥५१॥ [५९

इत्यार्षे रामायणे युद्ध-काण्डे प्रहस्त-वधो नाम चतुस्त्रिंशः सर्गः ॥३४॥

[वं-३३]= **[पञ्चत्रिंशः सर्गः]** =[दा-५९,प्रक्षिप्त-१

तस्मिन् हते राक्षस-सैन्य-नाथे
प्लवं-गमानाम् ऋषभेण युद्धे ।
भीमाऽऽयुधं सागर-तुल्य-रूपं
N] प्र-दुद्रुवे राक्षस-राज-सैन्यम् ॥१॥ [५९,१
गत्वा तु नीलेन हतं शशंसुः
सेना-पतिं साऽनुबन्धं प्र-हस्तम् ।

---

१. रा१-अशक्ताः । प्र रा२ फ-अशक्यं । २. रा१-समरे स्थातुं । रा२ फ-समवस्थातुं । म-समभिप्राप्तं । ३. रा१-प्रकीर्णं । ४. म-नास्ति ॥ ५. रा१-रक्षोबलगते ॥ ६. ल१ ल२ ब अ प्र रा२ फ-ततस्तु । ७. ल१ ल२ ब अ प्र रा२ फ-सल० ॥ ८. फ-नास्ति । ९. म-युद्धपर्वणि ॥ १०. ल१ ल२ ब प्र-०सैन्यराजे । अ-०सराजसैन्ये । ११. म-नास्ति ॥ १२. म-यदा । १३. म-तु युद्धे । १४. रा२-सानुचरं ।

तच् [1] चाऽपि तेषां स नि-शम्य वाक्यं

N] रक्षोऽधिपः क्रोध-वशं [2] जगाम ॥२॥ [२

स-भ्रातरं [3] नील-हतं नि-शम्य

शोकाऽर्दितः क्रोध [4]-विवृत्त-नेत्रः ।

उवाच तान् नैरृत-योध-मुख्यान्

N] इन्द्रो यथैवाऽमर-योध-मुख्यान् [5] ॥३॥ [३

प्र-हस्तस्य वधं श्रुत्वा रावणो भ्रान्त-मानसः ।

१] राक्षसान् आ-दिदेशाऽथ राक्षसेन्द्रो महा-बलः ॥४॥ [प्र०१

कार्या [6] शत्रुषु नाऽव-ज्ञा यैर् इन्द्र-बल-सूदनः । [7]

२] सूदितः सैन्य-पालो मे साऽनुयात्रः स-बान्धवः [8] ॥५॥ [२

३उ] सोऽहं रिपु-विनाशाय स्व-बलस्य च वृद्धये [9] ।

४उ] स्वयम् एव गमिष्यामि रण [10]-शीर्षम् अभि-त्वरन् ॥६॥ [३

अथैतद् [11] वानराऽनीकं सह रामं स-लक्ष्मणम् ।

५] निर्-दहिष्यामि [12] बाणौघैः शुष्कं वनम् [13] इवाऽनलः ॥७॥ [४

अद्य [14] सं-तर्पयिष्यामि पृथिवीं कपि-शोणितैः ।

६] रामं स-लक्ष्मणं चैव प्रेषयिष्ये यम-क्षयम् [15] ॥८॥ [५

एवम् उक्त्वा महा-तेजा रावणो राक्षसेश्वरः [16] ।

७] आऽगच्छत् सहसा क्रुद्धः सर्व-सैन्येन सं-वृतः ॥९॥ [17] [६

---

१. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-तथाहि । २. ल$_1$ ल$_2$ ब श्र-०वशो बभूव ॥ ३. रा$_1$-तं भ्रा० । ४. रा$_1$-क्रोधवशाभिभूतः । ५. रा$_1$-०योधवीरान् ॥ ६. ल$_1$ ल$_2$ ब श्र प्र-कुर्याच्छत्रुषु नावज्ञां । ७. रा$_1$-अत आरभ्य ९ मश्लोकं यावत्पाठः सप्तत्रिंशसर्गादावपि पुनः पठितः । ८. रा$_2$ म-सकुंजरः । ९. रा$_1$ म-विजयस्य । १०. म-नास्ति ॥ ११. रा$_1$-अहं तद् । १२. रा$_1$-प्रधक्ष्याम्यद्य । ल$_1$ ल$_2$ ब श्र प्र-निहनिष्यामि । १३. रा$_1$-शुष्केन्धनम् ॥ १४. ल$_1$ ल$_2$ ब प्र रा$_2$ फ म-च ल० । १५. प्र-यमालयम् ॥ १६. रा$_1$ म-लोकरावणः । १७. अतः परमधिकः पाठः—ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-कुम्भकर्णवचः श्रुत्वा रावणो लोकरावणः । गन्तुमैच्छदतिक्रुद्धः सर्वसैन्येन संवृतः ॥ म-अस्माच्छ्लोकादारभ्य सर्गसमाप्तिं यावन्नास्ति ।

संग्राममम् अभि-काङ्क्षन्तं श्रुत्वा तं राक्षसेश्वरम् ।
८] तत्रोत्था(द्-स्था)य ययौ देवी शीघ्रं[3] मन्दोदरी तदा[4] ॥१०॥ [७
माल्य-वन्तं करे गृह्य यूपाऽक्ष-सहिता तथा ।
९] मन्त्रिभिर् मन्त्र-तत्त्व-ज्ञैस् तथाऽन्यैर् मन्त्रि-सत्तमैः ॥११॥ [८
राक्षसैर् आ-वृता सर्वैर् वेत्र-मुद्गर-पाणिभिः ।
१०] योषिद्भिश् चैव वृद्धाभिस् तथा कन्याभिर् आ-वृता ॥१२॥ [९
आयुध-व्यग्र-हस्तैश् च राक्षसैश् च समन्त-तः ।
११] सभां तु प्र-स्थिता देवी यत्राऽऽस्ते राक्षसाऽधिपः ॥१३॥ [१०
छत्रेण ध्रियमाणेन अतिकाय-पुरःसरैः ? ।
१२] चामरैर् वीज्यमानैः सा[5] स्वति-मात्रम् अलं-कृता ॥१४॥ [११
सा[6] राज-मार्गे वि-पुले ध्वजमालोपशोभिते[7] ।
१३] उत्-सारणं प्र-कुर्वद्भिर् वेत्र-मुद्गर-पाणिभिः ॥१५॥ [१२
प्र-विष्टा च सभां दिव्यां प्र-भया द्योतमानया ।
१४] द्रष्टुं वै रावणं सा तु मयस्य दुहिता तदा ॥१६॥ [१३
प्राऽऽप्तां देवीं ततो राजा प्रियां मन्दोदरीं तदा ।
१५] दृष्ट्वा स-संभ्रमस् तूर्णं परि-ष्वज्य दशाऽऽननः ॥१७॥ [१४
मन्त्रिणां तु ततस् तेषाम् आसनान्य् आ-दिदेश ह ।
N] सौवर्णानि वि-चित्राणि सोपधानानि सर्व-शः ॥१८॥ [१५
तेष्व् आसनोपविष्टेसु[11] प्रणामाऽन्ते[12] च मन्त्रिषु ।

---

१. रा₁ प्र रा₂ फ-रावणं श्रुत्य भाविनी । २. रा₂-ततो । ३. रा₁ प्र रा₂ फ-नाम्ना । ४. रा₂ फ-तथा ॥ ५. रा₁-चामरैर्वैश्मरामाभिर्वीज्यमाना स्वलंकृता ॥ ६. प्र फ-सेनार्थं मार्गविपुलं । ७. ल₁ ल₂ ब ञ प्र रा₂ फ-॰शोभितं ॥ ८. ल₁ ल₂ ब ञ प्र-तमपश्यद्गन्तुमुद्यतम् ॥ ९. ल₁ ल₂ ब ञ-तु तां । १०. रा₁-सा (?तां) स्नेहसम्पूर्णं(?र्णा) ॥ ११. ल₁ ल₂ ब ञ प्र-स्वासनेषूपवि॰ । १२. रा₁ प्र रा₂ फ-॰मान्तेषु मं॰ । ल₁-नास्ति ।

N] पर्यङ्के तूऽप-विष्टाऽथ देवी[1] मन्दोदरी तथा ॥१९॥ [१६
N] अति-कायो महा-बाहुः पितरं चाऽभि-वाद्य तम् ।
मातरं चाऽभि-वाद्याऽथ तदा[2]ऽऽसन-गतोऽभवत् ॥२०॥ [१७
१६] प्रहस्त[3]-वध-सन्तप्तो महाकायवधाऽर्दितः ।
लङ्कायाश् चाऽव[4]-मर्देन कषायी-कृत-लोचनः ॥२१॥ [१८
१७] सं-ग्रामम् अभि-काङ्क्षन् वै[5] व्या-कुलेनाऽन्तर्-आत्मना ।
अब्रवीद् वि-विधं वाक्यं[6] महा-गम्भीर-निस्वनः ॥२२॥ [१९
१८] किम् आगमन[7]-कृत्यं ते[8] देवि शीघ्रं[9] तद् उच्यताम् ।
तूर्णं मम समीपं तु किम्-अर्थं त्वम् इहाऽऽगता ।
१९] मन्त्रिभिः स-हिता किं नु ब्रूहि साध्वि यथा-तथम् ॥२३॥ [२०
एवम् उक्ते तु वचने देवी वचनम् अब्रवीत् ।
२०] वि-ज्ञाप्यं शृणु राजेन्द्र याचे त्वां[10]ऽहं कृताऽञ्जलिः । [२१
नाऽप-राधश् च कर्तव्यो वदन्त्या मम मान-द ॥२४॥ [२२पू
२१] श्रुता मे नगरी रुद्धा श्रुता मे राक्षसा हताः ।
धूम्राऽक्ष-सहिता वीराः प्रहस्त[11]-सहितास् तथा[11] ॥२५॥ [२३
२२] भवान्[12] वै युद्ध-कामश् च[12] निर्-गन्तुं कृत-निश्चयैः[13] ।
इति जानीहि[14] राजेन्द्र ममाऽऽगमन-कारणम् ॥२६॥ [२४
२३] न[15] च युक्तं[15] प्रमुख-तः स्थातुं तस्य महाऽऽत्मनः ।
रामस्य सु-महाभाग यस्य भार्या हृता त्वया ।
२४] लक्ष्मणस्य च सौमित्रेर् यस्य नास्ति समो युधि[16] ॥२७॥ [२५

---

१. ल१ ल२ ब अ-तदा ॥ २. ल१ ल२ ब अ-तथास० ॥ ३. रा१-०बधसंत्रस्तो । प्र-प्रहस्तादधिसंतप्तो ॥ ४. रा१-सोथ । ल१ ल२ ब अ रा२ फ-चैव ॥ ५. फ-केनाग० । ६. ल१ ल२ ब अ-तु । ७ रा१-कार्यं देवि । ८ रा१ ल१ अ प्र रा२ फ-तु । ९ रा१-सांत्वं ॥ १०. रा१-त्वां हि । रा२-चाहं ॥ ११. रा१ प्र रा२ फ-प्रहस्तेन सहैव तु ॥ १२. रा१-भवंत युद्धकामं तु । १३. रा१--निश्चयं । १४. रा१-निश्चित्य । रा२-संचिन्त्य ॥ १५. रा२-नन्वयुक्तं । १६. ल१ ल२ ब अ प्र-नास्ति ॥

न च मानुष-मात्रोऽसौ रामो दशरथाऽऽत्मजः ।
२५] एकेन येन वै पूर्वं बहवो राक्षसा हताः ॥२८॥
चतुर्दश-सहस्राणि जनस्थान-निवासिनाम् । [२६
२६] खरश् च नि-हतः सं-ख्ये तदा[1] रामो न मानुषः ॥२९॥ [२७पू
त्रि-शिराश् च कबन्धश् च वि-राधो दण्डके वने ।
२७] शरेणैकेन वाली[2] च[2] तदा रामो न मानुषः ।
शङ्के चैनं महा-राजे[3] मारीचस्य वधात् तथा[4] ॥३०॥ [२८
२८] पितुश् च वचनाद् रामः प्र-विष्टो दण्डकं वनम् ।
ब्रह्मचर्य-व्रते युक्तः सह भ्रात्रा वने-चरः ॥३१॥ [२९
२९] तस्य भार्या जन-स्थानात् किम् आ-नीता पति-व्रता ।
अ-कारणं कृतं तत् ते दोषाय[5] समुप-स्थितम्[5] । [३०
३०] पतिव्रताऽवरोधश्[6] च[6] दोषम्[7] आ-वहते महत्[7] ॥३२॥
न मह्यं रोचते बुद्ध्या न[8] चैषां[8] मन्त्रिणां तथा । [३१
३१] राम-भार्या सती[9] ह्य्[9] एषा रामाय प्रति-दीयताम्[10] ॥३३॥
वि-भीषणेन वै[11] चोक्तं[11] पूर्वम् एव महाऽऽत्मना । [३२
३२] गतस् तत्रैव हित्वा[12] त्वां तत्-सौहार्द्यं[12] करिष्यति ॥३४॥
वस्त्राणि चैव रत्नानि प्रेषयाम रघूऽत्तमे । [३३
३३] सीतां चैव महा-राज सु-वर्णं वाहनानि च ॥३५॥
मणि-मुक्ता-प्रवालं च तथा रजतम् एव च । [३४

---

१. $ल_1$ $ल_2$ ब श्र-सोयं ॥ २. $ल_1$ $ल_2$ ब श्र प्र-मारीचस् । ३. $रा_1$-च राजेन्द्र । फ-महाबाहो । ४. $ल_1$ $ल_2$ ब श्र प्र $रा_2$ फ-तदा ॥ ५. $ल_1$ $ल_2$ ब श्र प्र-दोषोयं समुपस्थितः । ६. $रा_1$-०रोधस्तु । ७. $ल_1$ $ल_2$ ब श्र-महान्तं दोषमावहेत् ॥ ८. $रा_1$-एतेषां । प्र फ-नैतेषां । $रा_2$-न तेषां । ९. $रा_1$-या तु । १०. ब-प्रविधीयताम् ॥ ११. $ल_1$ $ल_2$ ब श्र प्र $रा_2$ फ-चैवोक्तं । १२. $ल_1$ $ल_2$ ब श्र प्र फ-रामश्च तद्वाचाऽयं । $रा_2$-रामस्य तद्वचोऽयं ॥

३४] माल्य-वान् गृह्य सं-यातु यूपा[1]Sक्षश् च तथैव च।
अति-कायस् तथा चाSयं कार्याSकार्य-विशारदः ॥३६॥ [३५
३५] वि-भीषणो गतः पूर्वम् एभिस् तत्र[2] गतैर्[2] ध्रुवम्[3]।
सन्धिं करिष्यति व्यक्तं राघवं प्रणि-पत्य हि[4] ॥३७॥
३६] सं-मान्य[5] मैथिलीं चाSस्मै प्र-दास्यति वि-भीषणः। [३६
माल्य-वांश् च महा-कायो[6] राक्षसानां हिते रतः ॥३८॥
३७] राघवं याच्य शिरसा[7] सन्धिं कुर्वन्तु राक्षसाः। [३७
N] सान्त्वं भेदस् तथा दानं राज्ञाम् एतत् त्रयं शुभम् ॥३९॥
अ-शुभं[8] तु स्मृतं युद्धं तस्माद् युद्धं वि-वर्जयेत्[9]।
N] त्रिभिर् नयैर् जितं तंत्र[10] वि-क्रमेण(?णा) जितं भवेत्[10] ॥४०॥ [३८
स्व-जनस्य क्षयं दृष्ट्वा[11] पुत्र-भ्रातृ-वधं तथा।
३८] सं-शयं चाSSत्मनो[12] गत्वा किम्[13] एतेन[13] करिष्यसि ॥४१॥ [३९
चञ्चला युद्ध-सिद्धिर्[14] हि[14] जीयते[15] न च जीयते[15]।
३९] तस्माद् युद्धं न रोचेत सन्धिं कुरु दशाSSनन ॥४२॥ [४०
प्रणि-पत्य महा-बाहो राघवं प्रति-नन्दय[16]।
४०] दीयताम् अद्य सा सीता सन्धिस् ते[17] तेन[17] रोचताम् ॥४३॥ [४१
साम्प्रतं सं-शयो राजन्[18] पुरस्य सह बान्धवैः।

---

१. प्र-सयूपाक्षस् ॥ २. ल$_1$ ल$_2$ ब श्र प्र-तव गुणैर्। रा$_2$-तव गणैर्। ३. ल$_1$ ल$_2$-ध्रुवन्। फ-युतम्। ४. रा$_1$-ह। प्र-च। ५. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-सामात्यो ॥ ६. ल$_1$ ल$_2$ ब श्र-महामायो। ७. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-तरसा ॥ ८. ल$_1$ ल$_2$ ब श्र-असुखं तु स्मृतं। प्र-असुखं संस्मृतं। रा$_2$ फ-श्रुत्वाSसुखं तु तत्। ९. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-विवर्जय। १०. रा$_1$-मन्ये अजितं विक्रमेण तु ॥ ११. रा$_1$-कृत्वा। १२. रा$_1$-चात्मना। १३. ल$_1$ ल$_2$ ब श्र प्र फ-किं जितेन। रा$_2$-किं चित्तेन ॥ १४. प्र-०सिद्धिर्हि। १५. रा$_1$ प्र रा$_2$ फ-हन्ति वा हन्यतेSपि वा ॥ १६. ल$_1$ ल$_2$ ब श्र रा$_2$-व प्रसाद्य च। प्र फ-प्रविशाम्य च। १७. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-तेनेह ॥ १८. ल$_1$ ल$_2$ ब श्र प्र-राज्ञः।

४१] आत्मनो राक्षस-श्रेष्ठ वर्तते नाऽत्र सं-शयः ॥४४॥[1] [४२
मा कृथाः सर्व-नाशं तु मा कृथाः पुत्र-संक्षयम् ।
N] तव सत्यं[2] ब्रवीम्य् एषा कुरुष्व[3] वचनं मम[3] ॥४५॥[1] [N
तस्माद्[3] राजन् ब्रवीम्य् एषा[3] पुरस्य च कुलस्य च ।
४२] रक्षणीयस् त्वयाऽऽत्मा वै सर्वम् आत्मन्य् अधि-ष्ठितम् ४६ [४३
क्षमा-शीलस् तथा रामः सत्य-वादी च राघवः ।
४३] धर्म-नित्यो महा-राज शरणाऽऽगत-वत्सलः ॥४७॥ [४४
लक्ष्मणश् च महा[4]-धन्वी नित्यं भ्रातृ-हिते रतः ।
४४] कुरु तेनाऽहतः[5] सन्धिं रामे दशरथाऽऽत्मजे ॥४८॥ [४५
प्र-हस्तेन कृतं किं तु युध्यता राक्षसेश्वर[6] ।
४५] धूम्राऽक्षेण च राजेन्द्र नित्यं समर-गृध्रिणा ॥४९॥ [४६
महा-कायेन च तथा महाप्रायेन रक्षसा ।
४६] अ-कम्पनेन वीरेण युध्यता राक्षसेश्वरः (?र) ॥५०॥ [४७
तथाऽन्यैर् युध्यमानैश् च किं कृतं वानरे बले ।
४७] न हतो यूथ-पः कश्-चिद् बलोद्देशेन[7] रावणः(?ण)॥५१॥ [४८
येषां वीर्याद् बिभेतीऽन्द्रः कुवेर-वरुणाव् अपि ।
४८] यमो वैवस्वतो येषां तथाऽन्ये देवता-गणाः । [४९
येषां नास्ति समो वीर्ये[8] ते हता वानरैर् युधि ॥५२॥
४९] न चाऽपि वानराः शक्या हन्तुं पादप-योधिनः । [५०
रक्ष्यमाणास्[9] तु रामेण सु-ग्रीवेण च पालिताः ॥५३॥
५०] तत्र[10] मे रोचते सन्धिः सह रामेण रावण । [५१
N] योग्यश् (?ग्यं) च राघवो मित्रं कार्तवीर्योऽर्जुनो यथा ॥५४॥

---

१. रा$_{1}$-नास्ति ॥ २. प्र रा$_{2}$ फ-सर्वं । ३. फ-नास्ति ॥ ४. रा$_{1}$-महाबाहुर् । ५. रा$_{1}$-तेनाहृतः । ब-नेनावृतः ॥ ६. रा$_{1}$-वानरे बले । रा$_{2}$ फ-राक्षसे बले ॥ ७. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-बलोद्देशेपि ॥ ८. रा$_{1}$-वीरास् ॥ ९. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ म-रक्षमाणास् ॥ १०. रा$_{2}$-अत्र ॥

N] मा कृथा मोघमानि-त्वं मा कृथाः कुल-संक्षयम् । [५२
मा कृथा गुरु[1]-नाशं तु[2] मा कृथाः पुत्र-संक्षयम् ।
५१.] हितं[3] सर्वं ब्रवीम्य् एषा कुरुष्व वचनं मम ॥५९॥ [५३

इत्यार्षे रामायणे युद्धे[5] काण्डे मन्दोदरी-वाक्यं नाम पञ्चत्रिंशः सर्गः ॥३५॥

[वं-३४]= [षट्त्रिंशः सर्गः] =[दा-प्रक्षिप्त-२]

तस्यास् तद्[6] वचनं श्रुत्वा प्रियाया राक्षसेश्वरः ।
१.] दीर्घम् उष्णं च नि-श्वस्य निर्-ईक्ष्य[7] च सभा-सदः ।
हस्ते मन्दोदरीं गृह्य वाक्यम् एतद् उवाच ह[8] ॥१॥ [१
२.] त्वया[9] वै[2] हित-काङ्क्षिण्या वचो यद् बहु भाषितम् ।
न तन् मनसि मे देवि प्र-विशां[10](?श)त्य् अ-प्रियं प्रिये ॥२॥ [२
३.] देवान् जित्वा रणे पूर्वं ससुराऽसुरमान-वान् ।
प्र-णमे मानुषं कस्माद् वानरान्[11] यः समा-श्रितः ॥३॥ [३
४.] प्र-णम्य रामं काकुत्स्थं किं वक्ष्ये सर्व-देवताः ।
कीदृशं वा भवेन् मह्यं जीवितं हत-चेतसः(?मे) ॥४॥[12] [४
५.] हृत्वा तस्य पुरा भार्यां मानं कृत्वा सु-दारुणम् ।
राक्षसान् घातयित्वा तु लङ्कां सं-पीड्य सर्व-शः[13] ।

---

१. रा$_1$-पुनराशां । २. ल$_1$ ल$_2$ ब अ-च । ३. अ-सत्यं ब्रवीमि चैषा ते । प्र रा$_2$ फ-सर्व ब्रवीमि चैषा ते । ४. ल$_1$ ल$_2$ ब-नास्ति ॥ ५. रा$_1$ ब प्र रा$_2$-लंकाकांडे ॥ ६. ल$_1$ ल$_2$ ब अ-तु । ७. ल$_1$ ल$_2$ ब अ-विलोक्य । ८. म-नास्त्ययं सर्गः ॥ ९. रा$_1$प्र रा$_2$फ-त्वयाहं । १०. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-यत्प्रोक्तोहं प्रियं ॥ ११. रा$_1$-वानरैर्यः समावृतः ॥ १२. रा$_1$-नास्ति ॥ १३. रा$_1$ ल$_1$ ल$_2$ ब अ रा$_2$ फ-सर्वतः ।

६] राघवं प्र-णमे कस्माद् धीन-वीर्य[1] इवाऽबलः ॥५॥ [५
राघवं प्र-णेमित्वाऽहं[2] कथं जीवितुम् उत्-सहे ।
८] एष[3] मे सह-जो भावो नित्यं मनस्य् अधि-ष्ठितः ॥६॥ [६
अधि-रुह्य तदा देवि न नमेयं तु कस्य-चित् ।[4]
९] त्रैलोक्ये स पुमान् नाऽस्ति यो मया[5] न जितो रणे ॥७॥ [७
देवतानां बलं हत्वा देव-राजो मया जितः ।
१०] राघवं प्र-णमे कस्मान् मूर्ध्नि[6] स्थित्वा तु देहिनाम् ॥८॥ [८
मा कृथा हृदि सं-तापं वि-जयिष्ये[7] शुचि-स्मिते ।
११] हनिष्ये राघवं चैव[8] लक्ष्मणं वानरांश् च तान् ॥९॥ [९
सु-ग्रीवं च वधिष्यामि हनू-मन्तं च वानरम् ।
१२] न तु सन्धिं करिष्यामि राघवेण कदा-चन ॥१०॥ [१०
वैदेहीं नोऽर्पयिष्यामि[9] राघवस्य भयाद् अहम् ।
१३] साम्प्रतं न चं[10] सन्धिं तु करिष्यति[11] स राघवः ॥११॥ [११
सागरं सेतुना[12] बद्ध्वा लङ्कां रुद्ध्वा स-काननाम् ।
१४] राक्षसान् प्र-वरान् हत्वा सन्धिं कुर्यात् कथं प्रिये ॥१२॥ [१२
न त्व् अहं सन्धिम् इच्छामि कदा-चिद् अपि भामिनि[13] ।
१५] गच्छ त्वं भव वि-स्रब्धा सर्वम् एतत्[14] सुखोदयम्[15] ॥१३॥ [१३
मा कृथा हृदि सं-तापम् अहं यास्ये रणाऽजिरम्[16] ।

---

१. रा$_1$ ल$_1$ ब अ प्र फ-इवाचलः ॥ २. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-वं प्रणम्याहं । ३. रा$_1$-यस्य रक्षःसहस्राणि ॥ ४. रा$_1$-अन्विष्यन्ति सदा देवि स नमेयं तु कस्य वै । ५. रा$_1$-प्रिये ॥ ६. ल$_1$ ल$_2$ ब अ प्र फ-कृत्ये स्थित्वा हि । रा$_2$-कृते स्थितं तु ॥ ७. रा$_1$-राजिष्येहं । रा$_2$ फ-तं जयिष्ये ॥ ८. रा$_1$-सहेह तु । प्र रा$_2$ फ-सहैव तु ॥ ९. रा$_1$-निर्यर्यिष्यामि । १०. रा$_1$-नैव । ११. रा$_2$-करिष्यामि च राघवे ॥ १२. ल$_1$ ल$_2$ ब अ प्र-सुमहत्तीर्त्वा । रा$_2$-सुमहद्बद्ध्वा ॥ १३. रा$_1$-भाविनी । १४. ल$_1$ ल$_2$ ब अ-भवेत् सर्वं । १५. रा$_2$-०दये ॥ १६. रा$_1$ रा$_2$ फ-०जिरे ।

१६] अद्य सर्वान् हनिष्यामि शत्रून् समर-मूर्धनि ॥१४॥ [१४
पुत्राश् च ते महा-वीर्या मेघनाद-पुरोगमाः ।
१७] न तेषां मुच्यते कश्-चिद् अपि मृत्युर् वराऽऽनने । [१५
अन्तः-पुराय गच्छ त्वं सुखिनी भव स-स्नुषा ॥१५॥
१८] एवम् उक्त्वा परि-ष्वज्य भार्यां प्रीत-मना इव । [१६
प्र(?प्रा)वेशयय(?त्त)दा देवी(?वीं)स्व-कं तु भवनं शुभम् ॥१६॥
१९] चिन्तयामास तं घोरं वि-ग्रहं समुप-स्थितम् ।[7]
रावणस् तु ततो वाक्यं राक्षसान् इदम् अब्रवीत् ।[7] [१८
२०] कल्प्यतां मे रथः शीघ्रं क्षिप्रम् आ-नीयतां धनुः ॥१७॥
अद्य क्रोधं[8] वि-मोक्ष्यामि नि-गूढं हृदये स्थितम् । [१९
२१] देवाऽसुरे यथा पूर्वं रुद्रेण नि-हतेऽन्धके ।
२२उ] चिरकालेप्सितं ह्य् एतद् युद्धं मे राघवेण हि[11] ॥१८॥ [२०
अद्य तूणी-शया बाणा निर्-मुक्ता इव पन्न-गाः ।
२३] रामं समभि-धावन्तु[12] विषाऽग्नि-प्रतिमाः शिताः[13] ॥१९॥ [२१
सु[14]-तेजनै रुक्म-पुङ्खैस्[15] तैल-धौतैर् हिरण्मयैः ।
२४] [16]शरैर् आ-दीपयाम्य् एष[16] मुक्ताभिर् इव कुञ्जरम् ॥२०॥ [२२

---

१. ल$_1$ ल$_2$ ब अ प्र-अथ ॥ २. रा$_2$-मन्यते । ३. रा$_2$-अन्तःपुरे च ॥ ४. ल$_1$ ल$_2$ ब अ-प्रविवेश च सा । रा$_2$-प्रविवेश तदा । ५. ल$_1$ ल$_2$ ब अ-तदा स्वभवनं० । प्र-स्वयं स्वभ० । रा$_2$-स्वयं च भ० ॥ ६. रा$_2$-घोरं च । ७. फ-नास्ति । ८. रा$_2$-सर्वान् हनिष्यामि । ९. ल$_1$ ल$_2$ ब अ प्र-हृदयोद्भवं । रा$_2$ फ-०येभवत् । १०. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-निहतोंधकः । ११. ल$_1$ ल$_2$ ब अ प्र फ-ह ॥ १२. रा$_1$-०भिवर्तन्तां । १३. रा$_1$-इव ॥ १४. रा$_1$-सुतेजितै । प्र रा$_2$ फ-सुतैजसै । १५. ल$_1$ ल$_2$ ब अ-०पुंखैरतिधौतैर् । प्र-०पुंखैः शितधौतैर् । १६. ल$_1$ ल$_2$ ब अ प्र फ-सागरं दीप० ॥

वानरान् सु-बहून् गृह्य राघवेण प्र-चोदितान् ।

N] ममाऽनु-गा हि वि-क्रान्ता मम पार्श्वम् उपाऽऽगताः[2]॥२१॥ [२३

इत्यार्षे रामायणे युद्ध-काण्डे रावण-वाक्यं नाम षट्त्रिंशः सर्गः ॥३६॥

[वं-३५,३६]= **[सप्तत्रिंशः सर्गः]** =[दा-५१]

स एवम् उक्त्वा तु विमान-रूपं

रथं तुरं-गैर् बहुभिः सु-युक्तम् ।

प्र-काशमानो वपुषा परेण

१] समा-रुरोहाऽमर-राज-शत्रुः ॥१॥[8] [८

स-शङ्ख-भेरी-पटह-प्रणादैर्

आस्फोटिताऽऽक्ष्वेडित-सिंहनादैः ।

पुण्यैः स्तवैश् चाऽप्य् अभि-पूज्यमानो

२] तदा ययौ राक्षस-राज-मुख्यः ॥२॥ [९

स शैल-जीमूत-निकाश-रूपैः

महा-बलैः पावक-दीप्त-नेत्रैः ।

---

१. ल$_1$ ल$_2$ ब श्र प्र-राघवं सप्रवेशितान् । रा$_2$-राघवात्संप्रदेशितान् । फ-०ण संप्रदेशितान् । २. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ- मामनुस्मृत्य विक्रान्तान् रामपार्श्वमुपागतान् ॥ ३. रा$_2$ फ-नास्ति । ४. ब-लंकाकांडे ॥ ५. म-प्रयुक्तम् । ६. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-०मानं । ७. म-०राजतुल्यः । ८. अतः परमधिकः पाठः—रा$_1$-आरुह्य तं तूणशतैः समेतं दिव्यं तथा राक्षस-राजपुत्रैः । ययौ तदायोधनमुग्रवीर्यो वेगेन रोषस्य बलेन चैव ॥ तमेव वीरं समुदीर्णमन्युं निशाचरेन्द्रं सुविवृद्धकोपम् । तदानुजग्मुर् गिरिराज-कल्पा रक्षोगणाः संयुगजातहर्षाः ॥ ९. प्र-०पटहनिनादैर् ॥ १०. रा$_1$-मांसाशनैः । म-महास्वरैः ।

बलैर् वृतो राक्षस-योध-वीरैर्[1]
३] भूतैर् वृतो रुद्र इवाऽमरेशः ॥३॥ [१०
ततो नगर्याः सहसा महौजा
निष्-क्रम्य तद् वानर-सैन्यम् उग्रम् ।
महाऽर्णवाऽम्भः-स्तिमितं ददर्श
४] समुद्-यतं पादप-शैल-हस्तम् ॥४॥ [११
तद् राक्षसाऽनीकम् अति-प्रचण्डम्
आ-लोक्य रामो भुजगेन्द्र[2]-बाहुः ।
वि-भीषणं शस्त्र[3]-भृतां वरिष्ठम्
५] उवाच शैलाऽग्र-गतः पृथु-श्रीः ॥५॥ [१२
नाना-पताका-ध्वज-शस्त्र-जुष्टं
कस्यैतद् अ-क्षोभ्यम अ-भीरु[4]जुष्टम् ।
प्राऽऽसा[5]ऽसिशूलाऽशनि-चक्र-जुष्टं
६] सैन्यं नगेन्द्रोपम-नाग-जुष्टम् ॥६॥ [१३
ततः स रामस्य वचो नि-शम्य
वि-भीषणः शुक्र-समान-बुद्धिः ।
शशंस रामाय बल-प्रवेकं[6](?कान्)
७] महा[7]ऽऽत्मनां राक्षस-पुङ्गवानाम् ॥७॥ [१४
यो[8]ऽसौ गज-स्कन्ध-गतो महाऽऽत्मा
नवोदिताऽर्कोपम-ताम्र[9]-नेत्रः ।
सं-कम्पयन् नाग-शिरोऽभ्युपैति
८] राजन्न् अवेह्य् एनम् अकम्पनाऽऽह्वम्[10] ॥८॥ [१५

---

१. रा$_{1}$-०धमुख्यैः ॥ २. रा$_{1}$-भुजगाभबाहुः । ३. रा$_{1}$-धर्मभृतां ॥ ४. रा$_{1}$-अतीव हृष्टम् । ५. ल$_{1}$ ल$_{2}$ ब अ-सप्रासशैलाशनि० ॥ ६. रा$_{1}$-०प्रवीरान् । ७. रा$_{1}$-दुरासदान् । प्र-महापतिं ॥ ८. ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ-योयं । ९. ल$_{1}$ ल$_{2}$ब अ-०पमदीप्तवक्त्रः । प्र रा$_{2}$-०मतुल्यवक्त्रः । फ-०ताम्रवक्त्रः । १०. रा$_{1}$-स कम्पनाख्यं समवैहि राजन् ॥

योऽसौ रथ-स्थो मृग-राज-केतुर्
धुन्वन् धनुः शक्र-धनुः-प्रकाशम् ।
करीऽव भात्य् उग्र-विवृत्त-दंष्ट्रः
९] स इन्द्र-जिन् नाम सुरेन्द्र-शत्रुः ॥९॥ [१६

यश् चैष वि-क्रान्त[2] इवेन्द्र-कल्पो
धन्वी रथ-स्थोऽति[3]-रथोऽति-वीरः ।
वि-स्फारयन् वै धनुर् उग्र-नादम्
१०] एषोऽति-कायोऽतिविवृत्त-नेत्रः ॥१०॥ [१७

योऽसौ नवाऽर्कोपम-ताम्र-चक्षुर्
आ-रुह्य घण्टा-निनद-प्रवेकम्[6] ।
खरं खरं गर्जति वै महाऽऽत्मा
११] महोदरो नाम स एष वीरः ॥११॥ [१८

योऽसौ हयं काञ्चन-चित्र-भाद्र(?भ्र)म्
आ-रुह्य सन्ध्याऽभ्र-घन-प्रकाशम् ।
प्राऽऽसं समुद्-यम्य मरीचि-कल्पं
१२] नराऽन्तकाऽऽख्योऽशनि-तुल्य-वेगः ॥१२॥ [१९

यश् चैष शूलं नि-शितं प्र-गृह्य
विद्युत्-प्रभं वासव-वज्र[11]-वेगम् ।
गजेन्द्रम् आ-स्थाय गिरि[12]-प्रकाशम्[13]
१३] आ-याति सोऽसौ[14] त्रि-शिरास् तरस्वी ॥१३॥ [२०

---

१. रा$_1$-तु राजपुत्रः ॥ २. रा$_1$-विन्यस्तहरीन्द्रकल्पो । ३. रा$_1$-०ऽतिरथी विभाति । ४. रा$_1$-०विवृद्धकोपः ॥ ५. रा$_1$-वराहोपम० । ६. रा$_1$-०प्रणादम् । ७. रा$_1$ल$_1$अ-स्वरं ॥ ८. रा$_1$-०नचक्रमारम् । ल$_1$ल$_2$ब अ प्र फ-०चित्रदण्डम् । ९. रा$_1$ म-०चिविद्धं । प्र-महेन्द्रकल्पं । १०. रा$_1$फ म-देवान्तका० ॥ ११. रा$_1$-कांचनचक्रसारं । ल$_1$ ल$_2$ ब अ प्र-किंकिणिवज्र० । रा$_2$-किंकिणिबाहुवेगं । १२. रा$_1$म-शशिप्र० । १३. ल$_1$ल$_2$ब प्र-अत आरभ्य ३६-शश्लोकपूर्वार्धं यावत् पाठो नास्ति । १४. अ फ म-योसौ । १५. अ रा$_2$ फ म-यशस्वी ॥

असौ तु[1] जीमूत-निकाश-रूपः
कुम्भ(ः) पृथुर्[2] व्यूढ[2]-सुजात-वक्षाः ।
समा-हितः पन्नग-राज-केतुर्
१.८] वि-स्फारयन्न्[3] एति[3] धनुर्[4] धनुष्-मान् ॥१.४॥ [२१

यश् चैष जाम्बूनद-वज्र-जुष्टं
दीप्तं स[5]-धूम्रं परि-घं प्र-गृह्य ।
आ-याति रक्षो-बल-केतु-भूतः
१.९] सो[6]ऽसौ नि-कुम्भोऽद्भुत-घोर-कर्मा ॥१.५॥ [२२

यश् चैष चापाऽसिशरौघ-जुष्टं
पताकिनं पावक-तुल्य-रूपम ।
रथं समा-स्थाय वि-भात्य् उद्-अग्रो
१.४] देवाँऽन्तकोऽसौ नग-शृङ्ग-योधी ॥१.६॥ [२३

यश् चैष कालाऽनल-तुल्य-रूपः
खड्गी धनुष्-मान् कवची किरीटी ।
गजेन्द्रम् आ-स्थाय गिरि-प्रकाशं
१.३] खंराऽऽत्मजोऽयं मकराक्ष-नामा[10] ॥१.७॥ [N

यश् चैष नाना-विध-घोर-रूपैर्
व्याघ्रोष्ट्रनागेन्द्रमृगा(?ग)र्क्ष-युक्तैः ।
भूतैर् वृतो भाति विवृत्त-नेत्रः[11]
१५] सो[12]ऽसौ स[12]-दंष्ट्रो विजिताऽरिसैन्यैः[13][14] ॥१.८॥ [२४

---

१. रा$_1$-च । २. रा$_1$-पृथुर्गूढ० । अ-प्रतिव्यूढ० । ३. रा$_2$ फ म-०यन्भाति । ४. रा$_2$-महाध० ॥ ५. रा$_1$-सुधूम्रं । ६. अ रा$_2$ फ म-सोयं ॥ ७. रा$_1$ म-विद्युत्प्रभोसौ ॥ ८. रा$_1$-नागेन्द्रम् । ९. अ-विभात्युदग्रो । रा$_2$ फ-शशिप्र० । १०. रा$_1$-खरात्मजो वै मकराक्ष एषः ॥ ११. अ रा$_2$ फ-०नेत्रैः । १२. अ फ-एको सुराष्ट्रो । १३ रा$_1$-०रिसूनुः । १४. अतः परमधिकः पाठः— रा$_1$-यश्चैष घोरं बहुवज्रजुष्टं सकांचनं पावकदीप्तरूपं । शूलं समुद्यम्य समेति वेगान्नरान्तकश्चैष गजेन्द्रयोधी ॥ म-नास्ति ॥

यत्रैतद् इन्दु-प्रतिमं वि-भाति
छत्रं सितं रुक्म-शलाकम् अग्र्यम् ।
स[1] एष[2] रक्षोऽधिपतिर् महाऽऽत्मा
२०] भूतैर् वृतो रुद्र इवाऽभ्युपैति ॥१९॥[3] [२५
३-३६] विभीषण-वचः श्रुत्वा राक्षसान् प्रति भाषितम् । [N
१] प्रत्य्-उवाच ततो रामो वि-भीषणम् इदं वचः ॥२०॥
अहो दीप्तो महा-तेजा रावणो लोक-रावणः । [२७
२] आदित्य इव दुः(?ष्प्रे) प्रेक्ष्यो रश्मिभिर् भाति राक्षसः॥२१॥
सु-व्यक्तं लक्षये चाऽस्य रूपं तेजः-समन्वितम् । [२८
३] दैत्य-दानव-वीराणां वपुर् एवं-विधं कुतः ॥२२॥
यादृशं राक्षसेन्द्रस्य वपुर् एतद् वि-राजते । [२९
४] तथैवाऽस्याऽनु-गास् तुल्याः पुत्राः पौत्रास् तथाऽनु-गाः॥२३॥
सर्वे पर्वत-सङ्काशाः सर्वे पर्वत-योधिनः ।
५] सर्वे दीप्ताऽऽयुध-धरा योधाश् चाऽस्य महौजसः॥२४॥ [३०
भाति राक्षस-राजोऽसौ प्र-दीप्तैर् भीम-विक्रमैः ।
६] शूरैः[4] परि-वृतो [5]योधैर् यम-काल-सम-प्रभैः ॥२५॥ [३१
एवम् उक्त्वा ततो रामो धनुर् आ-दाय वीर्य-वान् ।
७] लक्ष्मणाऽनुचरस् तस्थौ समुद्-यम्य शराऽऽसनम् ॥२६॥[३३
ततः स रक्षोऽधिपतिर् महाऽऽत्मा
रक्षांसि तान्य् आह महा-बलानि ।
द्वारेषु[6] पुर्यां गृह-गोपुरेषु
८] सु-निर्वृतास् तिष्ठत निर्वि-शङ्काः॥२७॥ [३४

---

१. रा$_2$ फ-सूक्ष्मश० । २ अ रा$_2$ फ-अत्रैष । ३. अतः परमधिकः पाठः—रा$_1$-योसौ किरीटी चलकुंडलास्यो महेन्द्रविन्ध्योपमभीमकायः । महेन्द्रवैवस्वतदर्पहन्ता रक्षोधिपः सोयमुपैति हृष्टः ॥ म-नास्ति । ४. म-प्रेतैः । ५. अ रा$_2$ फ म-०तीक्ष्णैर्देहवद्भिरिवान्तकैः ॥ ६. अ-घोरेषु ॥

स एवम् उक्त्वा त्रिदशेन्द्र-शत्रुर्
उद्-यम्य चापं स-शरं प्र-दीप्तं[1] ।
व्य्-अदारयद् वानर-सागरौघं
९] महा-झषः पूर्णम् इवाऽर्णवौघम् ॥२८॥ [३६
तम् आ-पतन्तं सहसा निर्-ईक्ष्य
दीप्तेषुचापं युधि राक्षसेन्द्रम् । [३७पू
ततो हरीऽऽशः सहसा जगाम
१०] तं रावणं योद्धुम् अति-प्रचण्डम्[1] ॥२९॥ [N
दुद्राव रक्षोऽधिपतिं[2] हरीऽऽशः[2]
बलात् संमुत्-पाट्य[3] महीधराऽग्र्यम् । [३७उ
तं शैल-शृङ्गं बहु-वृक्ष-सानुं
११] प्र-गृह्य चिक्षेप स रावणाय ॥३०॥
तम् आ-पतन्तं प्रसम्-ईक्ष्य[4] राजा
बिभेद बाणैर् यम-दण्ड-कल्पैः । [३८
तस्मिन् प्रवृद्धोत्तम-शृङ्ग[5]-वृक्षे
१२] शैले वि[6]-कीर्णे बहु[6]-चित्र-धातौ ॥३१॥
महाऽहि-कल्पं शरम् उग्र-वेगं
समा-ददे राक्षस-यूथपेशः[7] । [३९
स तं गृहीत्वाऽनिल-तुल्य-वेगं
१३] स-विस्फुलिङ्गं ज्वलन-प्रकाशम् ।
बाणं महेन्द्राऽशनि-तुल्य-वेगं
चिक्षेप राज्ञा[8] हरि-यूथपार्य ॥३२॥ [४०

---

१. अ फ-०प्रचण्डः ॥ २. अ रा$_2$ फ-०तिर्महात्मा । ३. रा$_1$-स उद्यम्य ॥ ४. अ रा$_2$ फ-तरसा निरीक्ष्य । ५. अ रा$_2$ फ-०मवृक्षखण्डे । म-०मचण्डवृक्षो । ६. रा$_1$-प्रकीर्णे बहु० । म-विशीर्णोत्तमचित्र० ॥ ७. रा$_1$-०सपुंगवेन्द्रं । म-०यूथपेन्द्रः । ८. रा$_2$ फ-राज्ञे हरियूथपानां ॥

स सायको रावण-बाहु-मुक्तः
१४] शक्राऽशनि-प्रख्य-वपुः शिताऽग्रः ।
सु-ग्रीवम् आ-साद्य बिभेद वेगाद्
गुहेरिता क्रौञ्चम् इवोग्र-शक्तिः ॥३३॥ [४१

स सायकाऽऽर्त्तो विपरीत-चेताः
१५] कूजन् व्यथाऽऽर्त्तो नि-पपात भूमौ ।
तं प्रेक्ष्य भूमौ पतितं वि-संज्ञं
नेदुः प्र-हृष्टा युधि यातु-धानाः ॥३४॥ [४२

ततो गवाऽक्षो गवयः सु-दंष्ट्रो
१६] मैन्दो गजो ज्ञाति-मुखो नलश् च[1] ।
शिलाः समुद्-यम्य विवृद्ध-कोपाः[2]
समाऽद्रवंस्[3] ते युधि राक्षसेन्द्रम् ॥३५॥ [४३

तेषां प्र-हारान्[4] स चकार मोघान्
१७] रक्षोऽधिपो बाण-शतैः शिताऽग्रैः ।
तान् वानरेन्द्रान् अपि बाण-जालैर्
बिभेद जाम्बूनद-चित्र-पुङ्खैः ॥३६॥ [४४

ते वानरेन्द्रास् त्रिदशाऽरि-बाणैर्
१८] भिन्ना नि-पेतुर् भुवि भीम-रूपाः ।
ततस् तु तद् वानर-सैन्यम् उग्रं
प्र-च्छादयामास स[5] बाण-जालैः ॥३७॥ [४५

ते वध्यमानाः पतिता[6]श् च शूरास्[7]
१९] तेनाऽर्द्यमानाश् च स-सैन्यमुख्याः ।
शाखा-मृगा रावण-सायकाऽऽर्ता

---

१. रा$_1$-नीलो नलो ज्योतिमुखो गदश्च । २. श्र रा$_2$ फ-०द्धकायाः । ३. रा$_1$-समर्दयन्सहसा । म-समाद्रवन्संप्रति ॥ ४. रा$_1$-प्रकारान् ॥ ५. रा$_1$-च ॥ ६. रा$_1$-पतितोग्ररूपाः । ७. रा$_1$-नानाद्रुमाभा भयशल्यविद्धाः ।

जग्मुः शरण्यं[1] शत-शः स्म रामं ॥३८॥ [४६

ततो महाऽऽत्मा स धनुर् धनुष्-मान्

२०] आ-दाय रामः सहसा जगाम ।

तं लक्ष्मणः प्राऽञ्जलिर् अभ्युपेत्य

प्रोवाच वाक्यं परमाऽर्थ-युक्तम् ॥३९॥ [४७

अहम्[2] आर्य[3] सु-पर्याप्तो वधायाऽस्य दुर्-आत्मनः ।

२१] वधिष्याम्य्[4] अहम् अद्यैनम् अनु-जानीहि मां वि-भो[5]॥४०॥ [४८

मम शक्र-रिपोश् चैव संवि-मर्दो भवत्व् अयम् ।

२२] अद्य पश्यन्तु भूतानि परा-भूतं मया रिपुम् ॥४१॥ [N

ततोऽब्रवीन् महा-तेजा रामः सत्य-पराऽऽक्रमः ।

२३] गच्छ त्वं वचनं चेदं नि-बोध[6] मम लक्ष्मणः (?ण) ॥४२॥ [४९

राक्षसेन्द्रो महा-कायो महा-मायो महा-धनुः ।

२४] त्रैलोक्येनाऽपि सं-क्रुद्धो दुष्प्र-धर्षो न सं-शयः ॥४३॥ [५०

तस्य छिद्राणि मार्गस्व स्व-च्छिद्राण्य् अभि-रक्ष च ।

२५] चक्षुषा धनुषा चैव रक्षाऽऽत्मानं समा-हितः ॥४४॥ [५१

राघवस्य वचः श्रुत्वा सम्प्रहृष्ट[7]-तनूरुहः ।

२६] अभि-वाद्य ततो रामं ययौ सौमित्रिर् आ-हवम् ॥४५॥ [५२

स रावणं वानर[8]-यूथ-मध्ये

ददर्श दीप्तोद्यत[9]-भीमचापम् ।

प्र-च्छादयन्तं शर-वृष्टि-जालैस्

२७] तान् वानरान् बाण-विदीर्ण[10]-देहान् ॥४६॥[11] [५३

---

१. रा१-शरणं ॥ २. फ-अयम् । ३. म-एव । ४. रा१-हनिष्याम्य-हमेवैनम् । ५. म-प्रभो ॥ ६. म-विबोध ॥ ७. ल१ ल२ ब अ प्र रा२ फ म-संपरिष्वज्य पीडितम् ॥ ८. ल१ ल२ ब अ प्र रा२ फ म-वारणहस्तबाहुः । ९. ल१ ल२ ब अ प्र रा२ फ म-भीमोद्यत० ॥ १०. रा१-०विकीर्ण० । म-०विशीर्ण० । ११. ल१ ल२ ब अ-अत्र सर्गसमाप्तिर्दृश्यते ॥

तम् आ-लोक्य महा-तेजा हनु-मान् मारुताऽऽत्मजः ।
२८] भ्रंशयंश् छर-जालानि प्रत्य्-अगच्छत्[1] स रावणम् ॥४७॥ [५४
रथं तस्य समा-साद्य तोदम् आ-च्छिद्य[2] सारथेः ।
२९] त्रासयन् रावणं धी-मान् हनु-मान् वाक्यम् अब्रवीत् ॥४८॥ [५५
३०पू] देव-दानव-गन्धर्वा यक्षाश् च सह पन्न-गैः[3] ।[4] [५६पू
३१उ] त्वां भग्नम् अद्य पश्यन्तु वानरैर् भीम-विक्रमैः ॥४९॥ [N
एष मे दक्षिणो बाहुः पञ्च-शाखः समुद्-यतः ।
३२] निर्-हरिष्यति[5] ते देहाद् भूताऽऽत्मानं चिरोषितम् ॥५०॥ [५७
श्रुत्वा हनु-मतो वाक्यं रावणो भीम-विक्रमः ।
३३] संरक्त-नयनः क्रोधाद्[6] इदं वचनम् अब्रवीत् ॥५१॥ [५८
क्षिप्रं प्र-हर निः-शङ्कः स्थिरां कीर्तिम् अवाऽऽप्नुहि ।
३४] वि-क्रमं च विदित्वा ते नाशयिष्यामि जीवितम् ॥५२॥ [५९
रावणस्य वचः श्रुत्वा वायु-सूनुर् अभाषत ।
३५] प्र-हृतं ते[7] मया पूर्वम् अक्षं सूदयता सुतम् ॥५३॥ [६०
एवम् उक्तो[8] महा-तेजा रावणो राक्षसाऽधिपः[9] ।
३६] आ-जघानाऽनिल-सुतं तलेनोरसि वीर्य-वान्[10] ॥५४॥ [६१
स तथाऽभि-हतस् तेन मुहूर्तं व्य्-अचरत् कपिः ।[10]
३७] आ-जघान च तं क्रुद्धस्[11] तलेनैवाऽमर-द्विषम् ॥५५॥ [६२
तथा स तेनाऽभि-हतो वानरेण तरस्विना ।

---

१. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ म-प्रत्ययुध्यत ॥ २. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ म-आक्षिप्य ॥ ३. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ म-राक्षसैः । ४. अतः परमधिकः पाठः—रा$_1$-अवध्यत्वात्त्वया भग्ना वानरेभ्यस्तु ते भयं । तदद्य देवाः पश्यंतु सयक्षोरगराक्षसाः । ५. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-निहनिष्यति ॥ ६. रा$_1$-कोपाद् ॥ ७. रा$_1$-युद्धं दत्त ॥ ८. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-उक्त्वा । ९. ल$_1$ ल$_2$ ब श्र प्र-रावण राक्षसाधिपम् । १०. ल$_1$ ल$_2$ ब श्र प्र-नास्ति ॥ ११. रा$_2$-महाक्रुद्धस् । फ म-च संक्रुद्धस् ॥

३८] दश-ग्रीवः समुद्र-धूतो[1] यथा भूमि-चलेऽचलः ॥५६॥ [६३
सं-ग्रामे[2] तु तथा दृष्ट्वा रावणं तल-ताडितम् ।
३९] ऋषयश् चारणाः सिद्धा नेदुर् देवास्[3] तथाऽसुराः[4] ॥५७॥ [६४
अथाऽऽश्वस्य महा-तेजा रावणो वाक्यम् अब्रवीत् ।
४०] साधु वानर वीर्यं ते श्लाघनीयोऽसि[5][6] मे रिपुः ॥५८॥ [६५
रावणेनैवम् उक्तस् तु मारुतिर् वाक्यम् अब्रवीत् ।[6]
४१] धिग् अस्तु मम वीर्यं[7] तु यत् त्वं जीवसि राक्षस ॥५९॥ [६६
स त्वं तु प्र-हरेदानीं दुर्-बुद्धे किं वि-कत्थसे ।[8]
४२] ततस् त्वां मामको मुष्टिर् नयिष्यति[9][10] यम-क्षयम् ॥६०॥ [६७
४३पू] तेन वानर-वाक्येन कोपस् तस्य[11] व्य्-अवर्धत ।[12]
संरक्त[13]-नयनश् चाऽपि स मुष्टिम् अकरोत् तदा ॥६१॥ [६८
४४] स[14] मुष्टिं पातयामास वज्र-कल्पं महा-यशाः ।
हनुमद्[15]-उरसि व्य्-ऊढे रावणः[16] परवीर-हा ।[17] [६९
४५] स तेनाऽभि-हतो गाढं वि-संज्ञो वि-ह्वलोऽभवत् ॥६२॥ [N
वि-ह्वलं तु[18] स तं दृष्ट्वा हनू-मन्तं महा-बलम् ।[19]

---

१. ल₁ ल₂ ब अ प्र रा₂ फ म-समुद्भूतो ॥ २. रा₁-संग्रामं तु तदा । ३. रा₁-देवाश्च सासुराः ॥ ४. रा₁-तथा० । ५. ल₁ ल₂ ब अ रा₂ फ-०नीयं सुरैरपि । ६. प्र-नास्ति ॥ ७. रा₁-सुमहावीर्यं ॥ ८. ल₁ ल₂ ब अ प्र रा₂ फ-विवक्षया । ९. म-नास्ति । १०. रा₁-अपनेता ॥ ११. ल₁ ल₂ ब अ प्र रा₂ फ-तस्याभवत्तदा । म-तस्य तदा भवेत् । १२. अतः परमधिकः पाठः—रा₁-स क्रोधाभिपरीतात्मा प्रजज्वाल च रावणः । १३. रा₁-संरब्धनयनोत्थयं ॥ १४. रा₁-तं । १५. रा₁-हनुमान्वक्षसि । १६. रा₁-संचचाल महाकपिः । १७. अतः परमधिकः पाठः—म-अथोत्पपात मेदिन्यां न तु प्राणैर्व्ययुज्यत ॥ १८. प्र-सततं । म-स मूर्तं । १९. अतः परमधिकः पाठः—म-हाहाकारस्तथोत्पन्नो दिशासु विदिशासु च । रावणोपि महावीरो विह्वलं त्यज्य मारुतिम् ॥ सारणम्प्रत्युवाचेदं रावणो राक्षसेश्वरः । सारथे मर्दयस्वैनं वानरं पतितं भुवि ॥ हयानां खुरमर्दैन रथचक्रेण वै दृढं । एवं तु वचनं श्रुत्वा तौ चोभौ शुकसारणौ ॥

४६] रथेना[1]ऽति-रथः क्षिप्रं[2] नीलं प्रति समा[3]ऽद्रवत् ॥६३॥ [७०
अन्तक-प्रतिमैर्[4] बाणैः पर-मर्म-विभेदिभिः ।
४७] क्षिप्रम् आ-पीडयामास[5] नीलं हरि-चमूपतिम् ॥६४॥ [७१
स शरौघ-समायस्तो नीलः[6] परम-दारुणम् ।
४८] गिरिं मलय-शैला[7]ऽऽभं रक्षोऽधिपतये[8]ऽक्षिपत् ॥६५॥ [७२
हनू-मान् अपि तेजस्वी समा-श्वस्तो महा-बलः ।[11] [७३पू
४९] नीलेन सह सं-[9]युक्तं रावणं[10] वीऽऽक्ष्य वीर्य-वान् ॥६६॥ [७४पू
५०उ] सम्-ईक्षमाणो युद्धेप्सुः स-रोषम्[12] इदम् अब्रवीत् । [७३उ
५१पू] अ-न्यायं[13](?य्यं) तु(?त) इदं युद्धं[13] क्षत्र-धर्मं[14] वि-जानतः[15] ॥६७॥ [N
५२उ] रावणोऽथ महा-तेजास् तच् छृङ्गं नवभिः शरैः ।[16]
N] आ-जघान सु-तीक्ष्णाऽग्रैस् तद् वि-शीर्णं पपात ह[17] ॥६८॥ [७५
तद् वि-दीर्णं[18] गिरेः शृङ्गं दृष्ट्वा हरि-चमूपतिः ।
५३] नीलोऽग्निर् इव जज्वाल क्रोधेन[19] परवीर-हा ॥६९॥ [७६

पतितं वायुतनयं पीडयामासुराहवे । रथचक्रप्रमथितो मुष्टिघातेन वै पुरा ॥ विसंज्ञो विह्वलो भूतस्तस्मिन्संग्राममूर्धनि । १. रा$_1$-जवेनाति० । म-रावणोति० । २. रा$_1$-शीघ्रं । ३. रा$_1$-समभ्यगात् ॥ ४. रा$_1$-सर्वा । ५. रा$_1$-आदीपयामास ॥ ६. रा$_1$-नीलो हरिचमूपतिः । ७. रा$_2$-गिरिशृङ्गं समुत्पाट्य । ८. रा$_1$-०येऽसृजत् ॥ ९. अ प्र रा$_2$ फ म-संसक्तो । १०. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-रावणो राक्षसाधिपः । म-रावणाय दुरात्मने । ११. अतः परमधिकः पाठः—रा$_1$-म रावणावधार्थं तु न चकार मतिं तदा ॥ १२. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-सरोष समचिन्तयत् । १३. ल$_1$-नैष न्यायं महायुद्ध । ल$_2$ ब अ-नष न्यायं मया योद्धुं । प्र-नहि न्यायं मया योद्धु । रा$_2$ फ-न न्यायं हि मया योद्धुं । १४. रा$_1$-०धर्मविनाकृतं । ल$_2$ ब अ प्र रा$_2$ फ-०धर्मं विजानता । १५. अतः परमधिकः पाठः—रा$_1$-मामपास्य यदन्येन युद्धं युद्धविशारद । तदनादृत्य वचनं राक्षसाधिपतिर्बली ॥ म-नास्ति ॥ १६. रा$_1$-व्यदारयद्गिरेः शृङ्गं नीलस्तं सप्तभिः शरैः । १७. रा$_1$-नास्ति ॥ १८. रा$_1$-विकीर्णं । १९. रा$_1$-स वीरः ॥

सोऽश्व-कर्णान् धवान्[1] सालांश् चूतांश्[2] चाऽपि सु[2]-पुष्पितान् ।
५४] अन्यांश् च वि-विधान् वृक्षान् नीलश् चिक्षेप सं-युगे ॥७०॥[७७
स तान् आ-पपतः शीघ्रं वृक्षांश्[3] चिच्छेद रावणः । [७८पू
५५] नीलम्[4] अभ्याऽहनद् गात्रे[4] दर्शयन्न् अस्त्र[5]-लाघवम् ॥७१॥ [N
अभि-वृष्टः[6] शरौघेण मेघेनेव[7] महाऽचलः[7] ।
५६] ह्रस्वं कृत्वाऽऽत्मनो रूपं[8] ध्वजाऽग्रे[9] नि-पपात ह[9] ॥७२॥ [७९
पावकोऽऽत्मजम्[9] आ-लोक्य[9] ध्वजाऽग्रे पर्यव-स्थितम् ।
५७] जज्वाल रावणः क्रोधात्[10] ततो नीलो ननाद ह[11] ॥७३॥ [८०
ध्वजाऽग्रे धनुषश् चाऽग्रे किरीटाऽग्रे च तं हरिम् ।
५८] स-सौमित्रिः स-सुग्रीवो दृष्ट्वा[12] रामोऽपि वि-स्मितः[12] ॥७४॥ [८१
रावणोऽपि महा-सत्त्वः कपि-लाघव-विस्मितः । [८२पू
५९] सम्भ्रमाऽऽविष्ट-हृदयो न किं-चित् प्रत्य्-अपद्यत ॥७५॥ [८४उ
ततश्[13] चुक्रुसु(?शु)र् आ[13]-विष्टा लब्ध-लक्षाः प्लवं-गमाः ।
६०] नील-लाघव-सम्भ्रान्तं[14] दृष्ट्वा रावणम् आ-हवे ॥७६॥ [८३
वानराणां प्र-णादेन सं-क्रुद्धो रावणस् तदा । [८४पू
६१] अस्त्रम् आ-हा[15]रयामास दीप्तम् आग्नेयम् उत्-तमम् ॥७७॥ [८२उ
आग्नेयेनाऽथ सं-युक्तं गृहीत्वा रावणः शरम् ।
६२] ध्वज-शीर्ष[16]-स्थितं नीलम् उद्-ऐक्षत निशा-चरः ॥७८॥

---

१. ल१ ल२ ब अ प्र रा२ फ-नरान् । २. रा१-समपर्णास्तु पु० ॥ ३. म-शैरश् । ४. रा१-नीलं चापि जघानाशु । ५. रा१-हस्तला० ॥ ६. रा१-सोतिविद्धः । ७. रा१-महाबलपराक्रमः । ८. रा१-देहं । ९. म-नास्ति ॥ १०. रा१-कोपात् । ११. म-च ॥ १२. ल१ ल२ ब अ प्र रा२ फ म-राघवो विस्मयं गतः ॥ १३. ल१ ल२ ब अ प्र-ततः श्रुत्वा सुराविष्टा । म-०सुसंहृष्टा । १४. ल१ ल२ ब अ-०संभ्रान्ता ॥ १५. रा१-आवाहया० ॥ १६. रा१-ध्वजमूर्ध्निस्थितं ॥

ततोऽब्रवीन् महा-तेजा रावणो राक्षसेश्वरः[1] । [८५
६३] कपे लाघव-युक्तोऽसि मायया परया[2] युतः ॥७९॥
यदि त्वं रक्षसि प्राणान् मायया वानराऽधम । [८६
६४] तानि तान्य् आत्म-रूपाणि वि-सृजन् बहु-शो रणे ॥८०॥
[3]तथा सोऽयं[3] मया क्षिप्तः सायकोऽस्त्राऽभिमन्त्रितः ।
६५] जीवितं[4] त्वां हि रक्षन्तं[5] जीविताद् भ्रंशयिष्यति ॥८१॥ [८७
एवम् उक्त्वा महा-बाहू रावणो [6]राक्षसाऽधिपः ।
६६] सं-धाय बाणम्[7] अस्त्रेण चमू-पतिम् अताडयत् ॥८२॥ [८८
सोऽस्त्र-युक्तेन बाणेन नीलो वक्षसि ताडितः ।
६७] निर्-दह्यमानः सहसा नि-पपात मही-तले ॥८३॥ [८९
पितृ-माहात्म्य-संयोगाद्[8] आत्मनश् चाऽपि[9] तेजसा ।
६८] जानुभ्यां न्य्-अपतद्[10] भूमौ न च प्राणैर् व्य्-अयुज्यत ॥८४॥ [९०
वि-संज्ञं वानरं[11] दृष्ट्वा दश-ग्रीवो रणोत्सुकः[12] ।
६९] रथेनाऽम्बुद-घोषेण[13] सौमित्रिं समुपाऽद्रवत् ॥८५॥ [९१
तम् आह सौमित्रिर् अदीन-सत्त्वो
वि-स्फारयन्तं धनुर् अ-प्रमेयम् ।
आ-गच्छ मां योधय राक्षसेन्द्र
७०] न[14] वानरांस् त्वं प्रति-योद्धुम् अर्हः[15] ॥८६॥ [९२
स तस्य वाक्यं [16]परिपूर्ण-घोषं

---

१. रा$_1$-राक्षसाधिपः । २. ल$_1$ ल$_2$ ब-वरया ॥ ३. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-त्वद्वधाय । म-अमोघोऽय । ४. फ-जीविते । ५. रा$_1$-परिर० ॥ ६. प्र रा$_2$ फ म-राक्षसेश्वरः । ७. रा$_1$-चापं धनुषि ॥ ८. रा$_1$-पितुर्माहात्म्ययोगेन । ९. रा$_1$-चैव । १०. रा$_1$-अगमद् ॥ ११. रा$_1$-पतितं । १२. रा$_1$-रणोत्कटः । १३. रा$_1$-रथेन मेघनादेन ॥ १४. ल$_1$ ल$_2$ ब अ-यथा नरास्त्वां । १५. रा$_1$-अर्हसि । ल$_1$ ल$_2$ ब अ-अर्हाः ॥ १६. रा$_1$-प्रतिपूर्ण० ।

ज्या-शब्दम् उग्रं च नि-शम्य राजा[1] ।
आ-सा[2]द्य सौमित्रिम् अमित्र-हन्ता[3]
७१] चुकोप कोपाद् अपि चेदम् आह ॥८७॥ [१४
दिष्ट्याऽसि मे राघव शस्त्र-मार्गे
प्रा[4]ऽऽप्तोऽन्तिकं वै विपरीत-बुद्धे ।
अस्मिन् क्षणे[5] यास्यसि मृत्यु-लोकं
७२] सं-छाद्यमानो मम बाण-जालैः ॥८८॥ [१९
तम् आह सौमित्रिर् अ-विस्मयेन
गर्जन्तम् उग्रं शर-चाप-पाणिम् ।
राजन्[6] न गर्जन्ति महा-प्रभावाः[6]
७३] किं कत्थसे[7] प्राकृत-वत् त्वम् अद्य ॥८९॥ [१६
जानामि वीर्यं तव राक्षसेन्द्र
बल[8]-प्रतापं च पराऽऽक्रमं च ।
अयं स्थितोऽहं शर-चाप-पाणिर्
७४] आ-गच्छ किं मूढ[9] वि-कत्थनेन[10] ॥९०॥ [१७
स एवम् उक्तः कुपितः ससर्ज
रक्षोऽधिपः सप्त-शरान् सु-पुङ्खान् ।
तांल् लक्ष्मणः काञ्चन-चित्र-पुङ्खैश्
७५] चिच्छेद बाणैर् नि-शितैः[11] सु-पत्रैः[12] ॥९१॥ [१८
तान् प्रेक्ष्य[13] बाणान् सहसा नि-कृत्तान्[14]
७६पू] निकृत्त-भोगान् इव पन्नगेन्द्रान् । [२२पू

---

१. रा१-राक्षसः । २. रा१-तथेति । ३. रा१-अथाभिभाष्य ॥
४. रा१-प्राप्तोऽनुगामी विपरीतबुद्धिः । ५. ल१ ल२ ब श्र प्र-रणे ॥
६. रा१-रणे न गर्जन्ति वृथा हि शूराः । ७. रा१-कथ्यसे ॥ ८. रा१-तेजश्च शक्तिं । ९. रा१ रा२ फ-मोघ । १०. रा२ फ-विकत्थितेन ॥
११. म-सुशितैः । १२. रा२-सुपुंखैः ॥ १३. म-वीक्ष्य । १४. रा१ फ-निराकृतान् ।

वर्वर्ष बाणांश्[1] चलिताऽग्र-मौलिर्
N] महेन्द्र-बाणाऽशनि-तुल्य-वेगान्[2] ॥२२॥ [N
स बाण-वर्षं च ववर्ष दिव्यं[3]
रामाऽनुजः कार्मुक-सम्प्रणुन्नम्[4] ।
क्षुरोऽर्धचन्द्रोत्तम-कर्णि-भल्लान्[5]
७७] शरान्[6] वि-चिक्षेप न चुक्षुभे च[7] ॥२३॥ [१००
स लक्ष्मणश्[8] चाऽऽशु शरान् शिताऽग्रान्[9]
महेन्द्र-वज्राऽशनि-तुल्य-वेगान् ।[10]
सं-धाय चापे ज्वलन-प्रकाशान्[11]
७९] ससर्ज रक्षोऽधिपतेर् वधाय[12] ॥२४॥ [१०२
शरान्[13] प्र-चिच्छेद निशाचरेन्द्रश्
छित्वा च तान्[14] लक्ष्मणम् आ-जघान ।
शरेण कालोऽग्नि-सम-प्रभेण[15]
८०] स्वयम्भु-दत्तेन ललाट-देशे ॥२५॥ [१०३
स लक्ष्मणो रावण-सायकाऽऽर्तश्
चचाल चापं शिथिलं[16] प्र-गृह्य ।
पुनः[17] स[17] सं-ज्ञां प्रति-लभ्य कृच्छ्राच्
८१] चिच्छेद चापं त्रिदशेन्द्र-शत्रोः[18] ॥२६॥ [१०४

---

१. रा$_1$-बाणैश् । २. रा$_1$-०वज्राशनितुल्यवेगः ॥ ३. रा$_1$-तीव्रं । ४. रा$_1$-०सम्प्रमृतम् । ५. ल$_1$ ल$_2$ ब अ-क्रूरार्धच० । प्र-कृतार्कच० । रा$_1$-०भल्लैः । ६. रा$_1$-शरान् स चिच्छेद ततः क्षणेन । रा$_2$-नास्ति । ७. म-नास्ति ॥ ८. रा$_1$-०णस्तांश्च । ९. रा$_1$-सुघोरान् । १०. रा$_2$म-नास्ति । ११. रा$_2$-नास्ति । १२. अतः परमधिकः पाठः—रा$_1$-विपाटवैतस्तिकवत्सदंतैः क्षुरार्धचन्द्रोपमसिंहदन्तैः । शक्तयष्टिनाराचशिलीमुखाग्रैः सञ्छिद्रसूचीमुखनैकवक्त्रैः ॥ १३. रा$_1$-स तांस्तु चि० । १४. रा$_1$-त । १५. रा$_1$-कालानलसप्र० । १६. प्र-त्रिदशेन्द्रशत्रोः । १७. रा$_2$ म-पुनश्च । १८. प्र-नास्ति ॥

तं कृत्त-चापं त्रिभिर् आ-जघान

बाणैस् तदा[1] दाशरथिः शिताऽग्रैः ।

स सायकाऽऽर्तो वि-चचाल राजा

८२] कृच्छ्राच् च सं-ज्ञां पुनर् आ-ससाद ॥९७॥ [१०५

स कृत्त-चापः शर-ताडिता[2]ऽङ्गः

स्वेदा[3]ऽऽर्द्रगात्रो रुधिराऽवसिक्तः ।

जग्राह शक्तिं सहसा[4] प्र[4]-चण्डां

८३] स्वयम्भु-दत्तां युधि देव-शत्रुः ॥९८॥ [१०६

स[5] तां विधूमाऽनल-सन्निकाशां

वि-त्रासिनीं वानर-राक्षसा[6]नाम् ।

चिक्षेप शक्तिं तरसा[7] ज्वलन्[7]तीं

८४] सौमित्रये राक्षस-राष्ट्र-नाथः[8] ॥[9]९९॥ [१०७

[10]प्र-दीप्यमानां रघु-नन्दनस् तां

जघान बाणैर् अनल-प्र[11]काशैः ।

तथाऽपि सा तस्य विवेश शक्तिर्

८५] भुजाऽन्तरं दाशरथेर् वि-शालम् ॥१००॥ [१०८

शक्त्या तया तु[12] सौमित्रिस् ताडित[13]श् च[13] स्तनाऽन्तरे ।

---

१ ल$_{१}$ ल$_{२}$ ब-तथा । म-ततो ॥ २. रा$_{१}$-०पीडि० । ३. ल$_{१}$ ल$_{२}$ ब अ प्र रा$_{२}$ फ म-मदार्द्र० । ४. रा$_{१}$-परमप्र० । ल$_{१}$ ल$_{२}$ ब अ प्र रा$_{२}$-०सा सुचण्डां ॥ ५. ल$_{१}$ ल$_{२}$ ब अ प्र-ततः सधू० । ६. रा$_{१}$-०रयूथपानाम् । ७. ल$_{१}$ ल$_{२}$ ब अ प्र-स महोज्वलां च । रा$_{२}$ फ म-सहसा ज्व० । ८. रा$_{१}$-०राष्ट्रराजः । म-०सलोकनाथः । ९. अतः परमधिकः पाठः—म-आपतन्तीं तु तां शक्तिं गृहीत्वा हनुमान्कपिः ॥ १०. रा$_{१}$-तां दीप्य० । ११. रा$_{१}$-०प्रतापैः ॥ १२. ल$_{१}$ ल$_{२}$ ब अ प्र रा$_{२}$ फ-स । १३. ल$_{१}$ ल$_{२}$ ब अ प्र फ-०तः स । रा$_{२}$ म-०तस्तु ।

८६] विष्णोर् अ-चिन्त्यं स्वं भागम् आत्[1]मानं सम्प्रवि-स्म[2]रन्।[3] [१११
N] पपात भूमौ सहसा छिन्न-मूल इव द्रुमः [4]॥१०१॥ [N
वि-संज्ञं पतितं दृष्ट्वा सौमित्रिं राक्षसेश्वरः ।
८७] अव-तीर्य रथात् तूर्णम् अभि-दुद्राव लक्ष्मणम् ॥१०२॥ [N
ततो दानव-दर्प-घ्नः सौमित्रिं देव-कण्टकः ।[3]
८८] विष्णोर् [5]अ-चिन्त्यो यो भागो मा[5]नुषं देहम् आ-स्थितः ।[3]
तं पीडयित्वा बाहुभ्याम् अ-प्रभुर् लङ्घनेऽभवत् ॥१०३॥ [११२
८९] स[6] तं गृहीत्वा[6] बाहुभ्यां चिन्तयामास रावणः[7] [N
हिम-वान् मन्दरो मेरुः[8] कैलासो वा [9]महा-गिरिः ।
९०] शक्यो भुजाभ्यां सं-वोढुं न त्व् अयं राघवाऽनुजः[10]॥१०४॥ [११०
एतस्मिन्न् अन्तरे वीरस् त्वरा-वान् मारुतात्मजः ।[11] [N
९१] आ-जघानोरसि न्य्-ऊढे वज्र-वेगेन[12] मुष्टिना ॥१०५॥ [११३उ
तेन मुष्टि-प्रहारेण रावणो भीम-विक्रमः ।
९२] जानुभ्यां न्य्-अपतद् भूमौ चचाल [13]नि-पपात च ॥१०६॥ [११४
वि-संज्ञं रावणं दृष्ट्वा [14]सम्-अरे भीम-विक्रमम् ।
९३] ऋषयो वानरा[15]श् चैव नेदुर् देवाश् च सेश्व[16]राः ॥१०७॥ [११६

---

१. रा₁-आत्मनः । २. रा₁ रा₂ फ म-प्रतिसंस्मरन् । ३. सर्वशाखासाधारणः प्राचीनप्रक्षेप इव द्र० । ४. रा₁ ल₁ ल₂ ब श्र प्र फ म-नास्ति ॥ ५. ल₁ ल₂ ब श्र प्र रा₂ फ म-अथैनं भागस्तु समग्रो ॥ ६. प्र रा₂ फ-तं गृहीत्वा तु । ७. प्र-राक्षसः । ८. प्र-मन्दरो वा महामेरुः । रा₂ फ-०वाम्मन्दरः शैलः । ९. रा₂ फ-महाबलः । १०. ल₁ ल₂ ब श्र म-नास्ति ॥ ११. रा₁-लक्ष्मणं तु ततः श्रीमाञ्जिघृक्षतं स मारुतिः । १२. रा₁-०वज्रकल्पेन ॥ १३. रा₁-जानुभ्यामगमद्भूमिं मुमोह प्रचचाल च । अतः परमधिकः पाठः—रा₁-आस्यैः सनेत्रश्रवणैर्ववाम रुधिरं बहु ॥ १४. ल₁ ल₂ ब श्र-राक्षसं । १५. रा₁-दानवाश् । १६. रा₁-हर्षिताः । ल₁ ल₂ ब श्र रा₂ फ म-सासुराः ॥

हनु-मान् अपि तेजस्वी लक्ष्मणं शुभ-लक्षणम् ।
९४] आऽनयद् राघवाऽभ्याशं बाहुभ्यां परि-गृह्य सः ।१०८। [११७
वायु-सूनोः सुहृत्[2]-त्वेन भक्त्या परमया च[1] सः[3] ।
९५] अ-कम्प्यो ह्य् अपि शत्रूणां लघु-त्वं स व्य्-अदर्शयत्[4] १०९[११८
सा[5] समुत्-सृज्य तं शक्तिः सौमित्रिं युद्ध-दुर्मदम्[6] ।
९६] रावणस्य रथे तस्मिन् स्व-स्थानं प्रत्य्-अपद्यत[7] ।।११०।। [११९
रावणोऽपि महा-तेजाः प्राऽऽप्य सं-ज्ञां महाऽऽहवे ।[8]
९७] आ-ददे[9] नि-शितान् बाणान् प्र-गृह्य वि-पुलं[10] धनुः ।१११।[१२१
आ-श्वस्तः[11] सः वि-शल्यश् च लक्ष्मणः शत्रु-सूदनः ।
९८] विष्णोर् भागम् अ-चिन्त्यं च[12] आत्मानं तत्र सोऽस्मरत् ११२[१२०
एतस्मिन्न् अन्तरे वीरो दृष्ट्वा रावण-विक्रमम् ।
९९] लक्ष्मणं च समा-श्वस्तं सैन्यं च मुदितं पुनः ।।११३।। [N
नि-पातितानां वीराणां[13] वानराणां महा-चमूम् ।
१००] दृष्ट्वा रामो रण-गतः प्रत्य-अयाद् रावणं युधि[14] ।।११४।। [१२२
अथैनम् उपसं-गम्य हनु-मान् वाक्यम् अब्रवीत् ।
१०१] मम पृष्ठं समा-रुह्य जहीऽमं[15] पाप-राक्षसम् ।।११५।। [१२३
N] श्रुत्वा हनू-मतो वाक्यं युक्तं[16] रामोऽनु-चिन्त्य च[16] ।

---

१. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ म-वै ॥ २. रा$_1$-सुकृत्येन । ३. ल$_1$ ल$_2$ ब श्र प्र फ-वशः । ४. रा$_1$-शत्रूणामप्रकंपोपि लघुत्वमगमत्कपेः ॥ ५. रा$_1$-समुत्सृज्य च सा । ६. रा$_2$ फ-०दुर्जयम् । ७. रा$_1$-पुनरागमत् ॥ ८. अतः परमधिकः पाठः—रा$_1$-पुनश्च स्वरथे स्थित्वा रोषपर्याकुलेक्षणः । ९. ल$_1$ ल$_2$ ब श्र-मुमोच । १०. रा$_1$-जग्राह च महद् ॥ ११. रा$_1$-०स्तश्च । १२. रा$_1$-एवं स्मृत्वा स्वस्थतरोभवत् ॥ १३. रा$_1$- ०तित-महावीरां । १४. रा$_1$-रणे तस्मिन्नभिदुद्राव रावणम् ॥ १५. ल$_1$ ल$_2$ ब श्र रा$_2$ फ-जह्येनं ॥ १६. रा$_2$ फ-रामो दाशरथिस्ततः ।

एवम् उक्तस् तथेत्य् उक्त्वा समा-रुह्य प्लवं-गमम् ॥११६॥[१२४उ
१०२] राघवः समराऽमर्षी हन्तु-कामो निशो-चरम् ।[N
ऐरावणम् इवेन्द्रस् तु[2] हनू-मन्तं[3] समा-स्थितः ॥११७॥[१२४पू
१०३] अथ तं[4] रावणं सं-ख्ये ददर्श मनुजाऽधिपः ।[१२५
तम् आ-लोक्य महा-तेजाः प्रेत्य्-अयाद् रघु-नन्दनः ।
१०४] वि-रोचनम् इव क्रुद्धो विष्णुर् अभ्युद्यताऽऽयुधः॥११८॥[१२६
ज्या-शब्दम् अथ[6] कुर्वन् स वज्र-निष्पेष-निस्वनम् ।
१०५] गम्भीरोदग्रया वाचा राक्षसेन्द्रम् उवाच ह ॥११९॥ [१२७
तिष्ठ तिष्ठ मम त्वं हि कृत्वा[7] वि-प्रियम् ईदृशम् ।
१०६] कं नु राक्षस-शार्दूल गतो मोक्षम् अवाऽऽप्स्यसि ॥१२०॥[१२८
यदीऽन्द्र-वैवस्वत-भास्वरान् वा
स्वयम्भु-वैश्वानरम् ईश्वरं चं ।
गमिष्यसि त्वं दश वा दिशो वा
१०७] तथाऽपि नैवाऽद्य वि-मोक्ष्यसे त्वम् ॥१२१॥ [१२९
येश् चैष शक्त्या नि-हतस् त्वयाऽद्य
वि-षादम् आऽगात् सहसाऽभि-पन्नः । [१३०पू
स एव रक्षो-गण-मृत्यु-भूतः [१३०उ
१०८] प्र-धक्ष्यते वै तव सैन्य-कक्षम् ॥१२२ [N
१०९पू] राघवस्य वचः श्रुत्वा राक्षसेन्द्रो महा-कपिम् ।
११०उ] आ-जघान शरैस् तीक्ष्णैः कौल[13]वैश्वानरोपमैः ॥१२३॥[१३२

---

१. रा२ फ-०कामस्तु रावणम् । २. रा१-स । ३. प्र-०मन्तमिवास्थितः ॥ ४. रा१-रथस्थं । ५. रा१-प्रदुद्राव च राघवः ॥ ६. ल१ ल२ ब-अपि ॥ ७. श्र-गत्वा । ८. ल१ ल२ ब श्र-स्वर्गं ॥ ९. ल१ ल२ ब श्र प्र रा२ फ-०नरशंकरान्वा । १०. ल१ ल२ ब श्र-वै ॥ ११. रा१-य एष । १२. रा१-कृच्छ्राद्विषादं ॥ १३. रा१-कालानलशिखोपमैः ॥

राघवं वहतस् तस्य ताडितस्याऽपि सायकैः ।
१११] स्वभाव-तेजो-युक्तस्य भूयस् तेजोऽभ्य्-अवर्धत॥१२४॥[१३३
ततो रामो महा-तेजा रावणेन कृत-व्रणम् ।
११२] दृष्ट्वा प्लवग-शार्दूलं क्रोधस्य वशम् अभ्य्-अगात् ॥१२५॥[2][१३४
तस्याऽभिसं-गम्य रथं सं[3]-चक्रं
साऽश्वध्वजं चारु[4] महा-पताकम् ।
स-सारथिं चाऽशनि[5]-तुल्य-वेगै
११३] रामः प्र-चिच्छेद शरैः सु-तीक्ष्णैः ॥१२६॥[१३५
अथेन्द्र-शत्रुं तरसा जघान
बाणेन[6] वज्राऽशनि-सन्निभेन ।
भुजाऽन्तरे व्यूढ-सुजात[7]-रूपे
११४] वज्रेण मेरुं भग-वान् इवेन्द्रः ॥१२७॥ [१३६
यो वज्रवेगाऽशनिसन्निपातैर्[8]
न चुक्षुभे नाऽपि चचाल राजा ।
स राम-बाणाऽभिहतो व्यथाऽऽर्तश्
११५] चचाल चापं च मुमोच वीरः ॥१२८॥ [१३७
स वि-ह्वलं तं [9]तुं सम्-ईक्ष्य रामः
समा-ददे दीप्तम् अथाऽर्ध-चन्द्रम् ।
तेनाऽर्क-वर्णं सहसा किरीटं
११६] चिच्छेद रक्षोऽधिपतेर् महाऽऽत्मा ॥१२९॥ [१३८

---

१. रा$_1$-तेजो व्यव० ॥ २. अतः परमधिकः पाठः–रा$_1$-हनूमानपि तेजस्वी व्यवर्धत महामनाः । विद्धो वेगेन महता शरैरग्निशिखोपमैः ॥ ३. रा$_1$-सुचक्रं । ४. रा$_1$-चापि । म-वाथ । ५. रा$_1$-साशनिखड्गशूलं ॥ ६. रा$_1$-शरेण । ७. ल$_1$ ल$_2$ ब ञ प्र-व्यूढशिलानुरूपे ॥ ८. रा$_1$ म-वज्रपाताशनि० ॥ ९. रा$_1$-सुविह्वलं । १०. रा$_1$ प्र-प्रसमीक्ष्य ॥

तं निर्विषाऽऽशीविष-सन्निकाशं
शान्ताऽर्चिषं सूर्यम् इवाऽभ्र-रुद्धम् ।
गत-श्रियं कृत्त-किरीट-कुण्डलं
११७] प्रोवाच रामो युधि राक्षसेन्द्रम् ॥१३०॥ [१३९

कृतं त्वया कर्म महत् सु-तीव्रं
हत-प्रवीरश् च कृतस् त्वयाऽहम् ।
तस्मात् परि-श्रान्तम् इव व्यवस्य
११८] न त्वां शरैर् मृत्यु-पथं नयामि[4] ॥१३१॥ [१४०

स एवम् उक्तो हत-मान-दर्पो
निकृत्त-चापः स-शरः स-शूलः ।
शोकाऽर्दितः कृत्त-महाकिरीटो
११९] विवेश लङ्कां सहसा गत-श्रीः ॥१३२॥ [१४२

तस्मिन् प्र-विष्टे रजनीचरेन्द्रे
महा-बले दानव-देव-शत्रौ ।
हरीन् वि-शल्यान् सह लक्ष्मणेन
१२०] चकार रामः परमाऽऽहवाऽग्रे ॥१३३॥ [१४३

तस्मिन् प्र-भग्ने त्रिदशेन्द्र-शत्रौ

---

१. ल$_1$ ल$_2$ ब श्र प्र-इवावरुद्धं । २. रा$_1$-०किरीटदेशं ॥ ३. ल$_1$ ल$_2$ -ब श्र प्र-त्वयाद्य । ४. अतः परमधिकः पाठः—रा$_2$-विमृश्य राघवो बुद्ध्या संचिन्त्य च पुनः पुनः । बुद्धिपूर्वं तु काकुत्स्थो नावधीद्रावणं तदा ॥ हितं संचिन्त्य सीताया आत्मनश्च महामतिः । नावधीद्राक्षसं तस्मात्क्रुद्धश्चैनमुवाच ह ॥ अभिजातं बलं शौर्यं यशो धर्मस्तपः श्रुतिः । मैथिलीं हरता मूढ सर्वं ते विफलीकृतं ॥ निरस्य रावणं युद्धे भर्त्सयित्वा मुहुर्मुहुः । प्रहस्य राघवो वाक्यं पुनरेवेदमब्रवीत् ॥ त्वाहमेकाकिनं दृष्ट्वा कारणाच्चैव दुर्मते । नाहं त्वां प्रवधिष्यामि तस्माद्गच्छ निशाचर ॥ म-अनुजानामि गच्छ त्वमिदानीं बाणपीडितः । प्रविश्य लंकामाश्वास्य श्वः पश्यसि बलं मम ॥

सुराऽसुरा भूत-गणा दिशश् च । [१४४पू
स-सागराः सर्षिमहोरगाश् च[3]　　　　[१४४उ
१२१]　　नर्नन्दिरे[5] सिद्ध-गणाश् च सर्वे[6] ॥१३४॥[N

इत्यार्षे रामायणे युद्ध-काण्डे रावण-भङ्गो नाम सप्तत्रिंशः सर्गः ॥३७॥

[वं-३७]=　　[अष्टात्रिंशः सर्गः]　　=[दा-६०]

स प्र-विश्य पुरीं लङ्कां राम-बाण-बलाऽर्दितः ।
१] भग्न-दर्पस् तदा राजा बभूव व्यथितेन्द्रियः ॥१॥ [१
मातङ्ग इव सिंहेन गरुडेनेव पन्न-गः ।
२] अभि-भूतोऽभवद् राजा राघवेण महाऽऽत्मना ॥२॥ [२
ब्रह्म-दण्ड-प्रकाशानां विद्युत्-सदृश-वर्चसाम् ।
३] स्मरन् राघव-बाणानां विव्यथे राक्षसेश्वरः ॥३॥ [३
स काञ्चन-मयं दिव्यम् आ-श्रित्य परमाऽऽसनम् ।
४] अवेक्षमाणः सचिवान् रावणो वाक्यम् अब्रवीत् ॥४॥ [४
सर्वं तत् खलु मोघं मे यत् कृतं परमं तपः ।

---

१. प्र-०गणादिकाश् । २. ल$_1$ ल$_2$ ब अ-समागताः । ३. अतः परमधिकः पाठः—ल$_1$ ल$_2$ब अ प्र रा$_2$ फ-चचाल भूर्भूतचराचरस्य बलाबलं रावणारामयोश्च । पराजयं चापि जयं च रामो दशाननश्चापि विवेद नैव ॥ ४. ल$_1$ ल$_2$ ब अ रा$_2$ फ-अज्ञासिषुः । ५. प्र-वानरराक्षसाश्च॥ ६. म-नास्ति । ७. फ म-नास्ति । ८. रा$_1$ ल$_2$ ब प्र-लंकाकांडे । फ म-युद्धपर्वणि ॥ ९. रा$_1$-बाणभयार्दितः । १०. रा$_1$ म-निश्वसन्वै तदा ॥ ११ म-०शतेजसाम् । १२. रा$_1$-म-राक्षसाधिपः ॥ १३. रा$_1$-निरीक्ष्य माणः ॥

५] यद् इन्द्रेण समानोऽहं मानुषेण परा-जितः ॥५॥ [५
पुरा मे ब्रह्मणा प्रोक्तं तद् वचस् समुप-स्थितम्[1] ।
६] मानुषेभ्यो वि-जानीहि भयम् इत्य् एव तत् तथा ॥६॥ [६
देव-दानव-गन्धर्वैर् यक्ष-राक्षस-पन्नगैः ।
७] अवध्य-त्वं मया प्राऽऽप्तं परि-भूतास् तु मानुषाः ॥७॥ [७
यच् चाऽपि हिमवच्-छृङ्गे क्रुद्धो नन्द्य् अभ्य्-अभाषत ।
८] तस्यैव तुल्य-वचनैर् अव-रुद्धा हि मे पुरी ॥८॥ [N
तयोर् महाऽऽत्मनोर् वाक्यं नाऽन्यथा तद् धि साम्प्रतम्[2] ।
९] सत्यं वि-भीषणेनोक्तं यच् च वाक्यं महाऽऽत्मना ॥९॥ [N
तद् इदं माम् अनुप्राऽऽप्तं विभीषण-वचः शुभम्[3] ।
१०] तस्य प्रयुक्त-वाक्यस्य नाऽन्यथा याति साम्प्रतम् ॥१०॥ [N
मया दर्पबलोत्सेकाद् अन्यथा चिन्तितं तदा[4] ।
११] तद् अन्यथा परि-गतं मम दौरात्म्य-चेष्टितैः ॥११॥ [N
१२पू] नाऽस्ति-भारोऽस्ति दैवस्य पौरुषे नियता मतिः[5] ।
N] दैव-पौरुष-संयोगात् सिद्धिर् नित्यम् अवाऽऽप्यते ॥१२॥ [N
सज्जा भवन्तु रक्षन्तु नगरीं मे समन्त-तः ।
१३] राक्षसाश् चैव तिष्ठन्तु पुर-गाः पुर-मूर्धसु ॥१३॥ [१२उ
स चाऽप्रतिम-दर्पोऽग्र्य देव-दानव-दर्प-हा ।
१४] ब्रह्म-शापाऽभिभूतश् च कुम्भ-कर्णो वि-बोध्यताम् ॥१४॥ [१३
सम्-अरे जितम् आत्मानं प्र-हस्तं च हतं रणे ।
१५] ज्ञात्वा रक्षो-बलं भीमम् आ-दिदेश महा-बलः ॥१५॥ [१४
द्वारेषु यत्नं क्रियतां प्राकारश् चाऽभि-रुह्यताम् ।
१६] निद्रा-बल-समाविष्टः कुम्भ-कर्णो वि-बोध्यताम् ॥१६॥ [१५

---

१. रा१-पुराणं ब्रह्मग इद वचनं मामुप० ॥ २. म-नास्ति ॥ ३. रा१-अत आरभ्य ३९-राश्लोकं यावन् नास्ति ॥ ४. ल१ ल२ ब अ प्र फ म-नास्ति ॥ ५. प्र-नास्ति ॥

स हि सं-ख्ये महा-बाहुः कुम्भ-कर्णश् च राक्षसः ।
१७] वानरान् राज-पुत्रौ च क्षिप्रम् एव हनिष्यति ॥१७॥ [१८
राम-बाण-निरस्तानां सं-भ्रमेऽस्मिन् सु-दारुणे ।
१८] वि-धमिष्यति नः क्षिप्रं कुम्भ-कर्णो महद् भयम् ॥१८॥ [२०
नव सप्त दशाऽष्टौ च मासान् स्वपिति राक्षसः । [१६उ
१९] तं वि-बोधयत क्षिप्रं कुम्भ-कर्णं महा-बलम् । [N
कुम्भ-कर्णः सदा शेते मूढो ग्राम्य-सुखे रतः ॥१९॥ [१९उ
२०] किं करिष्याम्य् अहं तेन शक्र-तुल्य-बलेन हि ।
ईदृशे सं-भ्रमे घोरे योऽभयाय न कल्पते ॥२०॥ [२१
२१] तेऽपि तद् वचनं श्रुत्वा राक्षसेन्द्रस्य राक्षसाः ।
जग्मुः परम-सम्भ्रान्ताः कुम्भकर्ण-निवेशनम् ॥२१॥ [२२
२२] ते तथा तु समा-दिष्टा राक्षसा भीम-विक्रमाः ।
गन्धान् माल्यं तथा पानं भक्ष्यं चाऽऽदाय स-त्वराः॥२२॥ [२३
२३] आ-साद्य भवनं तस्य विविशुस् ते नृपाऽऽज्ञया । [N
तत् प्र-विश्य महा-द्वारं सर्व-तो योजनाऽऽयतम्॥२३॥
२४] कुम्भकर्ण-गृहं रम्यं पुण्य-गन्धं शुचिं शुभम् । [२४
वि-बोधयन्तस् ते सर्वे तस्थुम् तस्य महा-गृहे ॥२४॥ [N
२५] तस्य निश्वास-वातेन कुम्भ-कर्णस्य रक्षसः ।
राक्षसा बल-वन्तोऽपि स्थातुं नाऽशक्नुवंस् तदा ॥२५॥ [N
२६] कुम्भ-कर्णस्य नि-श्वासैर् अव-धूता महा-बलाः ।
यतमानाश् च कृच्छ्रेण तत् ते प्र-विविशुर् गृहम्॥२६॥ [२५
२७] सम्प्र-विश्य तदा रम्यं गृहं काञ्चन-कुट्टिमम् ।
ददृशुर् नैर्ऋत-व्याघ्रं शयानं भीम-विक्रमम् । [२६
२८] ऊर्ध्वरोमाऽञ्चित-तनुं श्वसन्तम् इव पन्न-गम् ॥२७॥
वि-भ्रामयन्तं नि-श्वासैः शयानं पिशिताऽशनम् । [२८

१. म-नास्ति ॥

२९] भीम-प्राण-बलं भीमं पाताल-विपुलाऽऽननम् ॥२८॥ [२९पू
ते तु तं वि-कृतं सुप्तं वि-कीर्णम् इव पर्वतम् ।
३०] कुम्भ-कर्णं महा-निद्रं प्र-सुप्तं बोधयिष्णवः ॥२९॥ [२७
ततः परि-हिता गाढं राक्षसा भीम-विक्रमाः । [४२
३१]नीलाऽञ्जनचयाऽऽकाराः कुम्भकर्ण-समीप-गाः ॥३०॥ [४४पू
तत्रोपे-जहुः क्षिप्रं ते कुम्भकर्णाऽग्र-तस् तदा ।
३२] भक्ष्याणां मेरु-सङ्काशं राशिं परम-तर्पिणाम् ॥३१॥ [३१
मृगाणां महिषाणां च वराहाणां च सं-चयम् ।
३३] चक्रुर् नैर्ऋत-शार्दूला राशिम् अन्नस्य चाऽद्भुतम् ॥३२॥ [३२
ततः शोणित-कुम्भांश् च मद्यानि वि-विधानि च ।
३४] पुरस्तात् कुम्भ-कर्णस्य चक्रुस् त्रिदश-शत्रवः ॥३३॥ [३३
लिलिपुंश् चे पराऽर्ध्येन चन्दनेन सु-गन्धिना ।
३५] वस्त्रैश् च छादयामासुर् माल्य-योग-सुगन्धिभिः ॥३४॥ [३४
धूपं सु-गन्धं ससृजुस् तुष्टुवुश् च परं-तपम् । [३५पू
३६] कुम्भ-कर्णं महा-निद्रं बोधनाय प्र-चक्रिरे ॥३५॥ [N
जल-दा इव चोन्-नेदुर् यातु-धानास् ततस् ततः । [३५उ
३७] बिभिदुश् चाऽस्य गात्राणि नि-घ्नन्तो व्य्-अनदंस् तथा॥३६[N
अथ खिन्ना न शेकुस् ते तत्-प्रबोधाय राक्षसाः ।
३८] ततो गुरु-तरं यत्नं दारुणं समुपाऽक्रमन् ॥३७॥ [४५
शङ्खांश् च पूरयामासुः शशाऽङ्क-सदृश-प्रभान् ।
३९] तुमुलं युगपच् चाऽपि नेदुर् भृशम् अ-मर्षणाः ॥३८॥ [३६
नेदुर् आ-स्फोटयामासुश् चिक्ष्वेडुश् चैव राक्षसाः ।
४०] कुम्भकर्ण-विबोधाऽर्थं चक्रुश् च वि-पुलं स्वनम् ॥३९॥ [३७
उष्ट्रान् खरान् हयान् नागाञ् जघ्नुर् दण्डकशाऽङ्कुशैः ।

---

१. रा$_{2}$-तत्राप्याजह्नुः ॥ २. ल$_{1}$ ल$_{2}$ ब-लेपुश्चैव ॥ ३. प्र रा$_{2}$-धूम्रं ॥
४. रा$_{1}$-तान् । ५. रा$_{1}$-नास्ति ।

४१] भेरी-शङ्ख-मृदङ्गांश् च सर्व-प्राणैर् अवादयन् ॥४०॥ [४६
नि-जघ्नुश् चाऽस्य गात्राणि महा[1]काष्ठ-तां (?तो) डकैः।
४२] मुद्गरैर् मुसलैश् चैव सर्व-प्राणै[2]-समुद्यतैः [3]॥४१॥ [४७
तं शङ्ख-भेरी-मुरज-प्रणादम्
आस्फोटिताऽऽक्ष्वेडित-सिंह-नादम् ।
दिशो द्रवन्तस् [4]त्रि-दिवं क्रमन्तः
४३] श्रुत्वा विहं-गाः सहसा नि-पेतुः ॥४२॥ [३८
यदा तु तैः संनि-नदैर् महाऽऽत्मा
न कुम्भ-कर्णो बुबुधे प्र-सुप्तः ।
तदा भुशुण्डीर् मुसलानि चैव
४४] रक्षो-गणास् ते जगृहुर् गदाश् च ॥४३॥ [३९
तं शैल-शृङ्गैर् मुसलैर् गदाभिर्
वृक्षैस् तलैर् मुद्गर-मुष्टिभिश् च ।
सुख-प्रसुप्तं भुवि कुम्भ-कर्णं
४५] रक्षांस्य् उद्-अग्राणि तदा नि-जघ्नुः ॥४४॥ [४०
तेन शब्देन महता लङ्का [6]सम्परि-पूरिता ।
४६] स-पर्वत-वना सर्वा सँ चँ नैव व्य्-अबुध्यत ॥४५॥ [४८
ततः सहस्रं भेरीणां युगपत् सम्-अहन्यत ।
४७] मृष्ट-काञ्चन-कोणानाम् आ-सक्तानां समन्त-तः ॥४६॥ [४९
एवम् अप्य् अति-निद्रस् तु यदा नैव व्य्-अबुध्यत ।
४८] शाप-वश्यस् तथा सुप्तस् तदा क्रुद्धा निशा-चराः ॥४७॥ [५०
ते तु क्रोध-समाविष्टाः सर्वे भीम-पराऽऽक्रमाः ।

१. रा$_{1}$-महद्भिः कूटमुद्गरैः। ल$_{1}$ल$_{2}$ब अ प्र-०काष्ठकडंगरैः । २. रा$_{1}$-०प्राणैः समन्ततः।३. ल$_{1}$ल$_{2}$ब अ प्र-नास्ति ॥ ४. रा$_{1}$-वियदुत्प्लवन्तः। म-वियदुत्क्र० ॥ ५. अ-संनिरुतैर् ॥ ६. रा$_{1}$-सर्वाभिपू० । रा$_{2}$ फ म-सम्प्रतिपू० । ७. ल$_{1}$ ल$_{2}$ ब-न तु ॥ ८. रा$_{1}$-शापबद्धतया ॥

४९] तद् रक्षो बोधयिष्यन्तश् चक्रुर् अन्यं पराऽऽक्रमम् ॥४८॥ [५१
अन्ये भेरीः समा-जघ्नुर् अन्ये चक्रुर् महा-स्वनम्[1] ।
५०] केशान् अस्याऽलुञ्चंश् चाऽन्ये कर्णाव् अन्ये[2] दशन्ति च ४९[५२
अन्ये च बलिनस् तस्य कूट-मुद्गर-पाणयः ।
५१] मूर्ध्नि वक्षसि गात्रेषु निर्-दयाः[3] सम्-अताडयन्[3] ॥५०॥ [५४
मृदङ्गान् पणवान् भेरीः शङ्खान्[4] कुम्भ-मुखांस् तथा[4] ।
५२] दश राक्षस-साहस्रा जघ्नुर् भीम-पराऽऽक्रमाः ॥५१॥ [N
राक्षसानां सहस्रं तु शरीरे सम्प्र-धावति ।[N
५३] कुम्भ-कर्णस् तदा सुप्तो न चैवं[5] प्रत्य्-अबुध्यत[5] ॥५२॥ [५६उ
रज्जुजालाऽवनद्धाभिर्[6] घातनीभिः[6] समन्त-तः ।
५४] बध्यमानो महा-कायो न प्राऽबुध्यत राक्षसः ॥५३॥ [५५
ततो गज-सहस्रं तु शरीरे संव्य्[7]-अधावत[7] ।[५६पू
५५] स मर्द्यमानोऽपि तदा न[8] प्राऽबुध्यत राक्षसः ॥५४॥ [N
ते राक्षसास् तदा खिन्नाश् चक्रुर् अन्यं पराऽऽक्रमम् ।
५६] प्र-मदाश् चाऽऽह्वयामासुः सुमृष्ट-मणि-कुण्डलाः ॥५५॥ [N
नाग-राक्षस-कन्याश् च तथा गन्धर्व[10]-योषितः ।
५७] मनु-जानां दुहितरः किं-नराणां तथैव च ॥५६॥ [N
प्र-विष्टा भवनं रम्यं[11] तप्त[12]-काञ्चन-कुट्टिमम् ।
५८] [13]कुर्वन्त्यो गीत-वादित्रं[13] कुम्भकर्णाऽग्र-तः स्थिताः[14] ॥५७॥ [N

---

१. रा१-महास्वरं । ल१ ल२ ब अ-पराक्रमं । २. रा१-अपि ददंशिरे ॥ ३. ल१ ब अ-ताडयन्तोऽद्यं तथा ॥ ४. रा१-शंख-वादित्रनिस्वनाः ॥ ५. रा१-तथापि व्यबु० ॥ ६. रा१-०नीभिश्च सर्वशः ॥ ७. ल१ ल२ ब अ रा२ फ म-संप्रधावति । ८. रा२ फ-नैवाबुध्यत । ९. प्र-नास्ति ॥ १०. म-किन्नरयो० ॥ ११. ल१ ल२ ब अ प्र-मुख्यं । १२. रा२-तदा काञ्चन० । १३. रा१-ताः स्त्रियो गीतवादित्रैः ॥ १४. म-नास्ति ॥

दिव्या दिव्यैर् अलं-कारैर् दिव्य-धूपेन धूपिताः[1] ।
५९] दिव्य-गन्धाः सु-गन्धाश् च चिक्रीडुर्[2] भवनोत्तमे ॥५८॥ [N
ताश् च सर्वा विशालाऽक्ष्यः सर्वाः काञ्चन-सप्रभाः ।
६०] सर्वा रूपगुणोपेताः सर्वाऽऽभरण-भूषिताः ॥५९॥ [N
सर्वा विस्तीर्ण-जघनाः सर्वाः पीन-पयोधराः ।
६१] सर्वाः कमल-पत्राऽक्ष्यो नील-कुञ्चित-मूर्धजाः ॥६०॥ [N
तासां नूपुर-शब्देन मे[3]खलानां रवेण च[3] ।
६२] गीत-वादित्र-शब्देन स्वरेण मधुरेण च ॥६१॥ [N
दि[3]व्येन चैव ग[3]न्धेन स्पर्शेन वि-विधेन च ।
६३] वि-बुद्धः कुम्भ-कर्णोऽसौ भीमाऽक्षो भीम-विक्र[4]मः ॥६२॥ [N
स हन्यमानश् च महीध्र-वृक्षैर्
अ-चिन्तयंस् तांस् तुमुल-प्रहारान् ।
निद्रा-क्षयात् क्षुद्[5]-बल-पीडितश् च
N] वि-जृम्भमाणः सहसोत्-पपात ॥६३॥ [५७
महा-भुजौ वासुकितक्षकाऽऽभौ
वि-क्षिप्य वीरो गिरि-शृङ्ग-सारौ ।
वि-वृत्य वक्त्रं वडबा-मुखाऽऽभं
६४] निशा-चरोऽसौ वि-कृतं व्यू-अजृम्भत ॥६४॥[५८
वि-जृम्भमाणोऽति-बलः प्रत्यू-अबुध्यत राक्षसः ।
६५] नि-श्वासश् चाऽस्य सं-जज्ञे सं-वर्तक इवाऽ[6]नलः ॥६५॥ [६०
तस्य सं-जृम्भमाणस्य वक्त्रं पाताल-सन्निभम् ।[7]
६६] ददृशे मेरुशृङ्गाऽग्रे दिवा-कर[8] इवोदितः ॥६६॥ [५९

---

१. रा$_2$ म-नास्ति । २. ल$_1$ ल$_2$ ब श्र प्र रा$_2$फ म-क्रीडन्त्यो ॥ ३. ल$_1$ ल$_2$ ब श्र प्र-नास्ति ॥ ४. रा$_1$-भीमदर्शनः । ल$_1$ ल$_2$ ब श्र प्र फ-भीमपराक्रमः ॥ ५. रा$_1$-क्षुत्परिपी० ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब-०निलः ॥ ७. रा$_2$-विजृंभमाणं तद्वक्त्रं पातालतलसन्निभम् । ८. रा$_1$-०करमिवोदितम् ॥

दीप्तताम्राऽऽस्यजिह्वस्य विद्युत्-सदृशं[1]-पक्ष्मणी ।
६७] भीमे[2] नेत्रे न्य्-अदृश्येतां[2] दीप्ताव् इव महा-ग्रहौ ॥६७॥ [६२
रूपम् उत्-तिष्ठतस् तस्य कुम्भ-कर्णस्य सं-बभौ[3] ।
६८] तापो[4]ऽन्ते सर्व-लोकस्य[4] मेघस्येव वि-वर्षतः ॥६८॥[5] [६१
ते समुत्था(द्-स्था)ऽय भीमाऽक्षं भीम-रूप-पराऽऽक्रमम् ।
७२] राक्षसास् त्वरिता जग्मुर् दशग्रीव-निवेशनम ॥६९॥ [८५
N] तेऽभि-गम्य दश-ग्रीवम् आसीनं परमाऽऽसने ।
ऊचुर् बद्धाऽञ्जलिपुटाः सर्व एव निशा-चराः ॥७०॥ [८६
७३] प्र-बुद्धः कुम्भ-कर्णो[6] वै[7] भ्राता ते राक्षसर्षभ ।
यथा ते नैव निर्-यातु द्रक्ष(?क्ष्य)स्य् एनम् इहाऽऽगतम् ७१[८७
७४] रावणस् त्व् अब्रवीद् हृष्टो राक्षसान् राक्षसाऽधिपः ।
द्रष्टुम् एनम् इहेच्छामि यथा-न्यायं च[8] पूजितुम्[9] ॥७२॥ [८८
७५] तथेत्य् उक्त्वा च[9] ते सर्वे पुनर् आ-गम्य राक्षसाः ।
कुम्भ-कर्णम् इदं वाक्यम् ऊचू रावण-चोदिताः ॥७३॥ [८९
७६] द्रष्टुम् इच्छति राजा त्वां सर्व-राक्षस-पुङ्गवः ।
गमने क्रियतां बुद्धिर्[10] भ्रातरं सम्प्र-हर्षय ॥७४॥ [९०
७७] कुम्भ-कर्णस् तु दुर्-धर्षो भ्रातुर् आ-ज्ञाय[11] शासनम्[11] ।
तथेत्य् उक्त्वा महा-वीर्यः शयनाद् उत्-पपात ह ॥७५॥ [९१
७८] प्र-क्षाल्य वदनं हृष्टः शान्तः परम-भूषितः ।
पिपासुस् त्वरयामास पानं मद-समीरितम् ॥७६॥ [९२

---

१. रा$_{2}$-०समप्रकाशिनी । २. ल$_{1}$ ल$_{2}$ ब श्र प्र रा$_{2}$ फ म-भीमे ददृशतुर्नेत्रे ॥ ३. रा$_{2}$-रक्षसः । ४. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब श्र प्र रा$_{2}$ म-तपांते सवलाकस्य । ५. अतः परमधिकः पाठः—रा$_{1}$-तद्विनिद्रं ततो रक्षः कषायीकृतलोचनम् । विहरत्सर्वतो दृष्टिं तानुवाच निशाचरान् ॥ ६. रा$_{1}$ म-०कर्णोऽसौ ॥ ७. प्र-चमूपतिं ॥ ८. रा$_{1}$ म-तु । ९. म-नास्ति ॥ १०. रा$_{1}$-बुद्धी रावणं च प्रह० ॥ ११ म-आज्ञामवाप्य च ॥

७९] ततस् तु त्वरितास् तस्य राक्षसा रावणाऽऽज्ञया ।
मद्यं भक्ष्यं च वि-विधं क्षिप्रम् एवाऽऽनयंस्[1] तदा ॥७७॥ [९३
८०] प्र-हर्षणाऽर्थं मनसो दीप्ताऽऽस्यो रक्त-लोचनः ।[2] [N
८१उ] आ-ददे क्षुधितो मांसं शोणितं तृषितोऽपिबत् ॥७८॥
८२पू] मेदः-कुम्भांश् च मद्यं च पपौ शक्र-रिपुस् तदा ।[3] [९४
सज्ज-कर्णान् स-जठरान् महिष्यान् शूल्य-पैठरान् ।[4]
N] अष्टौ पशु-शतान्य् एव पुरुषान् एक-विंशतिम् ॥७९॥ [N
सं-भुज्य स महा-कायो दावाऽग्निर् इव तु तृणम्[5] ।
N] कुम्भ-कर्णो महा-बाहुर् गमनायोप-चक्रमे ॥८०॥ [N
ततस् तृप्तम् इदं[6] ज्ञात्वा सम्-ईयुस् ते निशा-चराः ।
८३] शिरोभिश् च प्र-णम्यैनं सर्व-तः पर्य्-अवारयन् ॥८१॥ [९५
स सर्वान् सान्त्वयामास नैर्ऋतान् नैर्ऋतर्षभः ।
८४] बोधनाद् वि-स्मितश् चाऽपि राक्षसान् इदम् अब्रवीत् ॥८२ [९७
किम्-अर्थम् अहम् आ-गम्य भवद्भिः प्रति-बोधितः ।
८५] कच्-चिच् च कुशलं राज्ञो भयं वा नेह किं-चन ॥८३॥ [९८
कच्-चिद् राक्षस-राजस्य न खल्व् अ-प्रियम् आ-गतम् । [N
N] न ह्य् अल्पे कारणे सुप्तं प्र-बोधयति माम् इह ॥८४॥
N] तत् कथ्यतां यथाऽर्थेन मत्-प्रबोधन-कारणम्[10] । [७१

१. रा$_1$-एवोपपादयन् ॥ २. अतः परमधिकः पाठः—रा$_1$-महिषाणां वराहाणां मांसं मद्यं च सत्कृतं ॥ ३. अतः परमधिकः पाठः—रा$_1$-भुक्त्वा चान्नं बहुविधं किंचि स ६वाभवत् । पीत्वा घटसहस्रं च तथा भुक्त्वा सुभोजनम् ॥ ४. रा$_1$-सवराहान्समहिषान्कुंजरान्शूलपैठरान् ॥ ५. रा$_1$-एतत्सं-भक्ष्य सुमहत् महादावाग्निवत्तृण ॥ ६. ल$_1$ ल$_2$ ब अ प्र रा$_2$ म-इति ॥ ७. रा$_2$-प्रहसन् ॥ ८. अ-अत आरभ्य ८६-शश्लोकस्य प्रथमपादं यावन् नास्ति ॥ ९. रा$_1$-तदाख्याताय तत्त्वेन । म-०तां यथातत्त्वं । १०. ल$_1$ ल$_2$ ब प्र रा$_2$ फ म-मम बोधन० ।

अथवा ध्रुवम् अन्येभ्यो भयं परम-दारुणम् ।
८६] यद्-अर्थं त्वरितैः सर्वैर् भवद्भिः प्रति-बोधितः ॥८५॥ [६९
अद्य राक्षस-राजस्य भयम् उत्-सादयाम्य् अहम् ।[2]
८७] पातयिष्ये महेन्द्रं वा भक्षयिष्यामि चोऽन्तकम् ॥८६॥ [७०
एवं ब्रुवाणं सं-रब्धं कुम्भ-कर्णम् अरिं-दमम् ।
८८] यूपाऽक्षः सचिवो राज्ञो[3] बद्धाऽञ्जलिर् उवाच ह ॥८७॥ [७२
८९पू] न नो देव-कृतं किं-चिद् भयम् अस्ति निशा-चर । [७३पू
गन्धर्व-दानवेभ्यो वा कुतः पतग-भोगिनः ।
९०] यादृशं मानुषाद् राज्ञो भयं घोरम् उप-स्थितम् ॥८८॥ [७४
वानरैः[1] पर्वताऽऽकारैर् लङ्का[4] सम्परि-वारिता ।
९१] सीताहरण-दुःखाऽऽर्ताद् रामान् नः परमं भयम् ॥८९॥ [७५
एकेन वानरेणेयं पूर्वं दग्धा महा-पुरी ।
९२] अक्षः कुमारो नि-हतो मन्त्रि-पुत्राः स-किङ्कराः ॥९०॥ [७६
स्वयम् इच्छति चोद्-हर्तुं पौलस्त्यं देव-कण्टकम् ।[5]
९३] मृत-कल्पो रणे मुक्तो[6] रामेणाऽमित-तेजसा ॥९१॥ [७७
यन् न देवैः कृतं पूर्वं न दैत्यैर् न च दानवैः ।
९४] कृतं तद् इह रामेण वि-मुक्तः प्राण-संशयात् ॥९२॥ [७८
स यूपाऽक्ष-वचः श्रुत्वा भ्रातुश् च भयम् आ-गतम् ।
९५] कुम्भ-कर्णो वि-वृत्ताऽक्षो यूपाऽक्षम् इदम् अब्रवीत् ॥९३॥ [७९
सर्वम् अद्यैव यूपाऽक्ष हरि-सैन्यं स-लक्ष्मणम् ।
९६] राघवं च रणे हत्वा पश्चाद् द्रक्ष्यामि[7] रावणम् ॥९४॥ [८०

---

१. ल₁ ल₂ ब भ्र प्र रा₂ फ म-वानलं । २. अतः परमधिकः पाठः—रा₂-यमं च घातयिष्यामि सपाशं च जलेश्वरं । पर्वतांश्चारयिष्यामि कंपयिष्यामि मेदिनीम् ॥ ३. रा₁-राज्ञः कृताञ्जलिर् ॥ ४. रा₁-लंकेयं परिवेष्टिता ॥ ५. रा₁-स्वयं रक्षोधिपश्चासौ पौलस्त्यो देवकण्टकः । ६. ल₁ ल₂ ब भ्र प्र रा₂ फ म-रणावार्तो ॥ ७. रा₁-गच्छामि ॥

राक्षसांस् तर्पयिष्यामि हरीणां मांस-शोणितैः ।
९७] राम-लक्ष्मणयोश् चाऽपि स्वयं पास्यामि शोणितम् ॥९५॥ [८१
तस्याऽथ वाक्यं वदतो[1] नि-शम्य
स-गर्वितं रोष-विवृद्ध-घोषम्[2] ।
महोदरो राक्षसराज-पुत्रैः[3]
९८] कृताऽञ्जलिर् वाक्यम् इदं बभाषे ॥९६॥ [८२
पश्चाद् अपि महा-बाहो शत्रून् युधि वि-जेष्यसि[4] । [८३उ
९९] त्वद्-दर्शन-परं तावद्[5] भ्रातरं द्रष्टुम् अर्हसि ॥९७॥ [N
महोदर-वचः श्रुत्वा राक्षसैः परि-वारितः ।
१००] कुम्भ-कर्णो महा-तेजाः सम्प्र[6]-तस्थे महा-बलैः ॥९८॥ [८४
उदाराणां स मद्यानां तदा राक्षस-पुङ्गवः ।
N] पीत्वा घट-सहस्रं वै तथा भुक्त्वा च भोजनम् ॥९९॥ [N
१०१पू] स-रोषश्[7] चोत्-कटो मत्तस् तेजो-बल-समन्वितः ।
N] कुम्भ-कर्णो बभौ घोरः कालाऽन्तकयमोपमः[8] ॥१००॥ [९४
N] सोऽगच्छद् भवनं राज्ञो रक्षो-बल-समन्वितः ।
१०१उ] कुम्भ-कर्णः पद-न्यासैः कम्पयन्न् इव मेदिनीम्[10] ॥१०१॥ [९५
स राज-मार्गं[9] वपुषा वि-दीपयन्
सहस्र-रश्मिर् भग[11]-वान् इवांऽशुभिः ।
जगाम नीलोऽम्बुद[12]-मालया वृतः[12]
N] शत-क्रतुः स्थानम् इव स्वयं-भुवः ॥१०२॥ [९६

१. रा$_1$-ब्रुवतो । २. रा$_1$ रा$_2$ फ म-घोरं । ३. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-०राजमुख्यः ॥ ४. रा$_1$-वधिष्यसि । ५. रा$_1$-तात ॥ ६. रा$_1$-प्रतस्थे त्वां (?भ्रा) तरं प्रति ॥ ७. रा$_1$-स एवं । ८. ल$_1$-कुम्भकर्णो महाबाहुर्गमनायोपचक्रमे । ल$_2$ ब श्र प्र-नास्ति ॥ ९. ल$_1$ ल$_2$ ब श्र प्र-नास्ति । १०. अतः परमधिकः पाठः—रा$_1$-महाबलो महाबाहुः प्रतस्थे भ्रातुरन्तिकम् ॥ ११. रा$_1$-वसुधाम् । १२. रा$_1$-नेत्रांजलिमालयार्चितः ॥

तं[1] मेरु-शृङ्ग-प्रतिमं किरीटिनं
स्पृशन्तम् आदित्यम् इवाऽऽत्म-तेजसा ।
वनौकसः प्रेक्ष्य वि-वृद्धम् अद्भुतं
१०२] भयाऽर्दिता दुद्रुविरे समन्त-तः ॥१०३॥ [९९
के-चिच् छरण्यं शरणं स्म रामं
व्रजन्ति के-चिद् व्यथिता नि-पेतुः[2] ।
के-चिद् दिशः सं[3]-त्वरिताः प्र-याताः[4]
N] के-चिद् भयाऽऽर्ता भुवि शेरते स्म ॥१०४॥ [N

इत्यार्षे[5] रामायणे[6] युद्ध[7]-काण्डे कुम्भकर्ण-प्रबोधनं[8] नामाऽष्टात्रिंशः सर्गः ॥३८॥

[वं-३८]= [एकोनचत्वारिंशः सर्गः] =[दा-६१]

ततो रामो महा-तेजा धनुर् आ-दाय वीर्य-वान् ।
१] किरीटिनं महा-कायं ददर्शाऽति-भयङ्करम् ॥१॥ [१
तं दृष्ट्वा राक्षस-श्रेष्ठं पर्वताऽऽकार-सन्निभम्[9] ।
२] क्रममाणम् इवाऽऽकाशं पुनर्[10] नारायणं यथा[10] ॥२॥ [२पू
कुम्भ-कर्णं[11] महा-कायं सर्व-भूत[11]-भयाऽऽवहम् । [N
३] सतोयाऽम्बुद-सङ्काशं काञ्चनाऽङ्गद-धारिणम्[12] ॥३॥ [२उ
४पू] यं दृष्ट्वा[13] वि-द्रुता दिग्भ्यो[13] वानराणां महा-चमूः । [३

---

१. रा$_{1}$-तमद्रिशृंग० ॥ २. ल$_{1}$ल$_{2}$ब अ प्र रा$_{2}$फ म-पतंति । ३. ल$_{1}$ब अ-सुत्वरिताः । ४. ल$_{1}$ल$_{2}$ब अ प्र रा$_{2}$फ-प्रयांति । म-व्रजन्ति ॥ ५. फ म-नास्ति । ६. रा$_{1}$प्र-लंकाकांडे । म-युद्धपर्वणि । ७. रा$_{1}$-०प्रबोधो ॥ ८. रा$_{1}$-कुम्भकर्णं ददर्श ह ॥ ९. रा$_{1}$-०रदर्शनम् । १०. रा$_{1}$-पुरा नारायणं विभुं ॥ ११. रा$_{1}$-शूलहस्तं महारौद्रं तीक्ष्णदंष्ट्रम० । १२. रा$_{1}$-०दभूषणं ॥ १३. रा$_{2}$-दृष्ट्वातिमहाकायं ।

N] वि-द्रुतां वाहिनीं दृष्ट्वा वर्धमानं च राक्षसम् ।
४३] सु-विस्मितम् इदं रामो वि-भीषणम् उवाच ह ॥४॥ [४
कोऽयं पर्वत-सङ्काशः किरीटी हरि-लोचनः ।
५] लङ्कायां दृश्यते वीरः स-विद्युद् इव तोय-दः ॥५॥ [५
पृथिव्यां केतु-भूतो वै महान् एष हि[1] दृश्यते ।
६] यं दृष्ट्वा वानराः सर्वे वि-द्रवन्ति भयाऽर्दिताः ॥६॥ [६
आ-चक्ष्व मे महान् कोऽसौ राक्षसो यदि वाऽसुरः ।
७] न मयैवं-विधं भूतं[2] दृष्ट-पूर्वं कदा-चन ॥७॥ [७
स पृष्टो राज-पुत्रेण रामेणाऽक्लिष्ट-कर्मणा[3] ।
८] वि-भीषणो महा-प्राज्ञः काकुत्स्थम् इदम् अब्रवीत् ॥८॥ [८
येन वैवस्वतो युद्धे वासवश् च परा-जितः ।
९] सोऽयं वि-श्रवसः पुत्रः कुम्भ-कर्णो निशा-चरः[4] ॥९॥ [९
एतेन देवा युधि दानवाश् च
यक्षा भुजं-गाः पिशिताऽशनाश् च ।
गन्धर्व-विद्याधर-गुह्यकाश् च
१०] सहस्र-शो राघव सम्प्र-भग्नाः ॥१०॥ [१०
शूल-पाणिं समा-यान्तं कुम्भ-कर्णं[5] महा-बलम् ।
११] हन्तुं न शेकुस् त्रि-दशाः कालोऽयम् इति मोहिताः ॥११॥ [११
प्र-कृत्यैवैष तेजस्वी कुम्भ-कर्णः सु-दुर्जयः[6] ।
१२] अन्येषां राक्षसेन्द्राणां वरदान-कृतं बलम् ॥१२॥ [१२
एतेन जात-मात्रेण क्षुधितेन महाऽऽत्मना ।[7]

---

१. रा१-महातेजोऽत्र ॥ २. रा१-रूपं ॥ ३. रा१-आचचक्षे महातेजा राघवाय विभीषणः ॥ ४. ल१ ल२ ब श्र-०स्वते । ५. ल२-नास्ति ॥ ६. अतः परमधिकः पाठ—रा१-अस्यैव तु महाबाहो निजमेवौरसं बलं ॥ ७. अतः परमधिकः पाठः—रा१-भक्षिता अप्सरसः सप्त महेंद्रानुचरा दश । ऋषीणां च सहस्राणि रक्षसानेन राघव ॥

१३] भक्षितानि सहस्राणि सत्त्वानां[1] सु-महान्त्य्[2] अपि ॥१३॥ [१३
तास् तदा भक्ष्यमाणास् तु प्र-जा भय-निपीडिताः ।
१५] प्र-ययुः शरणं शक्रं तं चाऽस्य् अर्थं न्य्-अवेदयन्[3] ॥१४॥ [१४
स कुम्भ-कर्णं क्रुपितो महाऽऽत्मा
जघान वज्रेण शितेन शक्रः ।
स शक्र[4]वज्राऽभिहतो महाऽऽत्मा
१६] चचाल कोपाच् च भृशं ननाद ॥१५॥ [१५
तस्य नानर्धमानस्य कुम्भ-कर्णस्य धी-मतः ।
१७] श्रुत्वा स्वभाव-तस् त्रस्ताः प्र-जा भूयोऽपि तत्रसुः[5] ॥१६॥ [१६
ततः क्रोधाद्[6] विवृत्ताऽक्षः कुम्भ-कर्णो महा-बलः ।
१८] निष्-कृष्यै[7]रावणाद् दन्तं जघानोरसि वासवम् ॥१७॥ [१७
कुम्भकर्ण-प्रहाराऽऽर्तः[8] स विह्वलित-मानसः ।
१९] ततो वि-षेदुः सहसा देव[9]-गन्धर्व-दानवाः ॥१८॥ [१८
प्र-जाभिः सह शक्रस्[10] तु[10] ययौ स्थानं स्वयं-भुवः ।
२०] कुम्भ-कर्णस्य दौरात्म्यं प्र-विवक्षुः प्रजा-पतेः । [१९
२१पू] प्र-जानां भक्षणं चैव देवानां[11] चैव भर्षणम्[12] ॥१९॥[13] [२०पू
एवं यदि प्र-जा नित्यं[14] भक्षयिष्यति राक्षसः ।
२२] अ-चिरेणैव कालेन लोकः[15] शून्यो[15] भविष्यति ॥२०॥ [२१

१. ल१ ल२ ब प्र-सत्त्वानि । २. म-महताम् ॥ ३. अतः परमधिकः पाठः—रा१ रा२-तच्छ्रुत्वा तु वचस्तासां शक्रस्तु त्वरयान्वितः । ऐरावणं समारुह्य वज्रमुद्यम्य वीर्यवान् ॥ जगाम सहितो देवैर्देवराजो महाबलः । तं तु देशं समासाद्य यत्रास्ते स निशाचरः ॥ ४. रा१-वज्रपाताभि० ॥ ५. रा२-तत्र । ६. रा१ म-कोपाद् । ७. ल१ल२ ब श्र प्र-विकृष्यै० ॥ ८. रा१ ल१ ल२ ब श्र प्र फ म-०तवासवः । ९. रा१-देवा ब्रह्मर्षिसत्तमाः ॥ १०. रा१-शक्रश्च । ११. रा२ फ म-०नामपि । १२. रा१-वर्षण । १३. अतः परमधिकः पाठः—रा१ रा२-आश्रमध्वंसनं चैव परस्त्रीहरणानि च ॥ १४. रा१-त्वेष । १५. ल१ ल२ ब श्र प्र रा२ फ म-शून्या भूमिर् ॥

वासवस्य वचः श्रुत्वा सर्व-लोक-पितामहः ।
२३] रक्षः समा-ह्वयामास कुम्भ-कर्णं ददर्श च[1] ॥२१॥ [२२
कुम्भ-कर्णं सम्[2]-ईक्ष्यैव वि-स्मितोऽभूत् प्रजा-पतिः ।
२४] [3]कुम्भ-कर्णं महा-वीर्यं स्वयं-भूर् इदम् अब्रवीत् ॥२२॥ [२३
२५पू] [4]ध्रुवं लोकविनाशाऽर्थं[5] पौलस्त्येनाऽसि निर्-मितः ।[6]
तस्मात् त्वम् अद्य-प्रभृति मृत-कल्पः शयिष्यसि ॥२३॥ [२४
२६] ब्रह्मशापाऽभिभूतस्[7] तु[8] नि-पपात स राक्षसः । [२५पू
२७] भ्रातरं पतितं दृष्ट्वा रावणो वाक्यम् अब्रवीत्[9] ॥२४॥ [N
कृत्वा किं काञ्चनं वृक्षं फल-काले नि-पात्यते ।
२८] न नप्तारं स्वयं न्याय्यं शप्तुम् एवं प्रजा-पते ॥२५॥[10] [२६
न च त्वद्-वचनं मिथ्या स्वप्स्यत्य् एष न सं-शयः ।[11]
२९] कालस् तु क्रियताम् अस्य स्वप्ने जागरणे तथा ॥२६॥ [२७
रावणस्य वचः श्रुत्वा स्वयं-भूर् इदम् अब्रवीत् ।[12] [N
३०] [13]शयिता ह्य् एष षण् मासान् एकाऽहं जागरिष्यति ॥२७॥
३१पू] असौ तु वीर एकाऽहे क्षुधितो वि-चरन् भुवि ।[14]
N] व्यात्ताऽऽस्यो भक्षयेल् लोकान् सं-क्रुद्ध इव पावकः ॥२८॥ [२९
आत्म-व्यसनम् आ-साद्य कुम्भ-कर्णो वि-बोधितः ।
३२] त्वत्-पराऽऽक्रम-भीतश् च राजा सम्प्रति रावणः ॥२९॥ [३०

---

१. रा$_1$-ह ॥ २. रा$_1$-निरीक्ष्यैव । ३. रा$_1$-तन एनं ॥ ४. रा$_2$-एवं । ५. ल$_1$ ल$_2$ ब अ प्र-ऽकावि० । ६. अतः परमधिकः पाठः—रा$_1$-यस्मात्त्वमीदृशः क्रूरो लोकं हिंसितुमुद्यतः ॥ ७. रा$_1$ रा$_2$ फ म-०भूतश्च । ८. रा$_1$-निद्रयाभिपरिप्लुतं । ९. अतः परमधिकः पाठः—रा$_1$-ततः परमसंभ्रान्तो रावणो वाक्यमब्रवीत् ॥ १०. अ-अत आरभ्य २७-शश्लोकपूर्वार्धं यावन्नास्ति ॥ ११. ल$_1$ ल$_2$ ब प्र-नास्ति ॥ १२. अतः परमधिकः पाठः—रा$_1$-पुरा हि वृतवान्निद्रां गोकर्णोऽसौ यदृच्छया । १३. रा$_1$-स्वपिता त्वेष ॥ १४. अतः परमधिकः पाठः—रा$_1$-आत्मतुल्यं महत्कर्म आहारं च करिष्यति ॥

स एष क्षुधितो वीरो[1] निर्-गमिष्यत्य् अ-संशयम् ।
३३] वानरान् भृश-संक्रुद्धो भक्षयिष्यति वीर्य-वान् ॥३०॥ [३१
कुम्भ-कर्णं सम्-ईक्ष्यैव हरयो विप्र-दुद्रुवुः ।
३४] कथम् एनं रणे क्रुद्धं वारयिष्यन्ति वानराः ॥३१॥ [३२
उच्यतां (?न्तां) वानराः सर्वे मतम्[2] एतत् समुच्[3]-छ्रितम् ।
३५] तर्कयन्तोऽर्थं बुध्यन्तो भविष्यन्तीऽह निर्-भयाः ॥३२॥ [३३
विभीषण-वचः श्रुत्वा हेतु-मद् ग्राहकं तथा ।
३६] उवाच राघवो वाक्यं नीलं सेना-पतिं तदा ॥३३॥ [३४
गच्छ सर्वाणि सैन्यानि व्य्-ऊह्य तिष्ठस्व पावके !
३७] द्वाराणि सं-क्रमांश् चैव लङ्काया यूथ-पैः सह ॥३४॥ [३५
शैल-शृङ्गाणि वृक्षांश् च शिलाश् चाऽऽदाय सर्व-तः[5] ।
३८] भवन्त्व् आत्ताऽऽयुधाः सर्वे वानराः शैल-पाणयः॥३५॥[३६
राघवेण समा-दिष्टो नीलो हरि-चमूपतिः ।
३९] शशास वानराऽनीकं यथा-वत् कपि-कुञ्जरः ॥३६॥ [३७
ऋषभः शरभो नीलो हनू-मान् अङ्ग-दो नलः ।
४०] शैल-शृङ्गाणि शैलाऽऽभा गृहीत्वा द्वारम् अभ्य्-अयुः ३७ [३८
ततो हरीणां तद् अनीकम् उग्रं
रराज भीमोद्यत[6]वृक्षशैलम् ।
गिरेः समीपाऽनुगतं यथैव
४१] महा-स्वनं तोयद-जालम् उग्रम् ॥३८॥ [४०

इत्यार्षे रामायणे युद्ध[7]-काण्डे कुम्भकर्ण-दर्शनो[8] नामैकोनचत्वारिंशः सर्गः ॥३९॥

---

१. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ म-वीर ॥ २. रा$_1$ ल$_1$ फ म-मंत्रम् । ३. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र रा$_1$ म-समुत्थित । ४. रा$_1$-०न्तो हि बु० । म-०न्तो भविष्यन्ति हरयो निर्भया रणे ॥ ५. रा$_1$-सर्वशः ॥ ६. रा$_1$-दीप्तोद्यतभीमशैलं ॥ ७. रा$_1$ प्र-लंकाकांडे । म-युद्धपर्वणि । ८. ल$_1$ ल$_2$ ब श्र प्र म-०र्णवृत्तवर्णनं । रा$_2$-०र्णवृतान्तवर्णनं ॥

स तु राक्षस-शार्दूलो निद्रा-बले[1]-समाकुलः ।
१] राज-मार्गं श्रिया जुष्टं ययौ विपुल[2]-विक्रमः ॥१॥ [१
राक्षसानां सहस्रैस् तु वृतः पर-पुरं-जयः ।
२] गृहेभ्यः पुष्प-वर्षैश् च कीर्यमाणस् तदा ययौ ॥२॥ [२
स हेम-जाल-विततं भ्रातुर्[3] भास्वर-दर्शनम्[3] ।
३] ददर्श वि-पुलं रम्यं राक्षसेन्द्र-निवेशनम् ॥३॥ [३
अभि-गम्य गृहं भ्रातुः कक्ष्याश् चाऽपि वि-गाह्य सः ।
४] ददर्शाऽऽसीनम् आ[4]-विष्टं वि-माने पुष्पके गुरुम् ॥४॥ [६
स तं तदा सूर्य इवाऽभ्र-जालं
प्र-विश्य रक्षोऽधिपतेर् नि-वेशम् ।
दूराद् ददर्शाऽग्र-जम् आसन-स्थं
N] स्वयं-भुवं शक्र इवाऽऽसन-स्थम् ॥५॥ [४
अथ दृष्ट्वा दश-ग्रीवः कुम्भ-कर्णम् उप-स्थितम् ।
५] किं-चिद् उत्था(द्-स्था)य सं-हृष्टः सन्नि-कर्षम् उपाऽऽनयत् ॥६॥ [७
अथाऽऽसीनस्य पर्य्-अङ्के कुम्भ-कर्णो महा-बलः ।
६] स जग्राह तदा भ्रातुः पादौ राक्षस-पुङ्गवः । [८
उत्-पत्य चैनं मुदितो रावणः परि-षस्वजे ॥७॥
७] स भ्रात्रा सम्परि-ष्वक्तो यथा-वच् चाऽभि-नन्दितः । [९
कुम्भ-कर्णस् ततो दिव्यं प्रति-पेदे वराऽऽसनम् ॥८॥
८] स तदाऽऽसनम् आ-विश्य कुम्भ-कर्णो महा-बलः ।
संरक्त-नयनः कोपाद् रावणं वाक्यम् अब्रवीत् ॥९॥ [१०

---

१. रा$_1$ ब रा$_2$ म-निद्रावशस० । २. रा$_1$-ययावतुल० ॥ ३. रा$_1$-सुभानुसुरद० । ल$_1$ ल$_2$ ब अ-भ्रातुर्भास्वरविक्रमः ॥ ४. रा$_1$-अत्युग्रं ॥ ५. रा$_1$-उत्थाप्य । ६. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-चैव ॥ ७. ल$_1$ ल$_2$ ब अ-विधिवच् । प्र-विविधाच्च ॥ ८. रा$_1$-आसाद्य ॥

९] किम्-अर्थम् अहम्[1] आ-हृत्य[1] त्वया राजन् प्र-बोधितः ।
शंस कस्माद् भयं तेऽद्य कोऽद्य प्रेतो भविष्यति ॥१.०॥ [१.१पू
१.०] यदीऽन्द्रात्[2] ते[2] भयं राजन् यदि वा[3] सलिलेश-तः[3] ।
शत[4]-क्रतुं वि-जेष्यामि[5] त्रैलोक्ये पार्थिवो भव ॥१.१॥ [N
१.२] दीर्घ-काल-प्रसुप्तस्य कुम्भ-कर्णस्य वि-क्रमम् ।
अद्य पश्यन्तु भूतानि भक्ष्यमाणानि[6] सर्व-शः ॥१.२॥ [N
१.३] नन्व्[7] इदं[7] त्रि-दिवं सर्वम्[8] आ-हारो युज्यते मम ।
सोऽद्य तृप्तिं[9] गमिष्यामि[9] भक्षयित्वा सुराऽसुरान् ॥१.३॥ [N
१४] कुम्भकर्ण-वचः श्रुत्वा जहृषे रावणस् तदा ।
पुनर् जातम् इवाऽऽत्मानं मेने स रजनी-चरः ॥१.४॥ [N
१.५] कुम्भकर्ण-बलाऽभिज्ञो जानंस् तस्य पराऽऽक्रमम् ।
बभूव मुदितो राजा शशाऽङ्क इव वि-ग्रहः[10] ॥१.५॥ [N
१.६] तम् ईक्ष्य[11] परि-वृत्ताभ्यां[12] नेत्राभ्यां कुपितोऽब्रवीत् [N
भ्रातरं रावणः प्रेक्ष्य कुम्भ-कर्णम्[13] उप-स्थितम्[13] ॥१.६॥ [१.२पू
१.७] अद्य ते सु-महान् कालः शयानस्य निशा-चर ।
स्वपितस् त्वं न जानीषे मम रामान् महद् भयम् ॥१.७॥ [१.३
१.८] न देवाऽसुर-नागेभ्यो गन्धर्वेभ्यः कदा-चन[14] ।

---

१. रा१ ल१ अ-महसाहृत्य ॥ २. रा१-यदीन्द्रतो । ३. रा१-वापि जलेशतः । रा२-०लेश्वरात् । ४. अतः परमधिकः पाठः—रा१-यमं हि मर्दयिष्यामि भक्षयिष्यामि पावकं । पर्वतांश्चूर्णयिष्यामि चालयिष्यामि मेदिनीं ॥ रा२-आदित्यं पातयिष्यामि सनक्षत्रं महीतले । ५. रा१-देवान्विद्रावयिष्यामि ॥ ६. रा१ ल१-भक्षमा० ॥ ७. रा१-न त्वय । ८. रा१-सर्वोप्याहारे पूर्यते । ९. रा१-तृप्तो भविष्यामि ॥ १०. रा१-शारदः ॥ ११. रा१-ईक्षन् । १२. ल१ ल२ ब अ प्र रा२ फ म-०वृत्ताक्षो । १३. ल१ ल२ ब अ प्र-०कर्णं मिथः स्थितम् । रा२ फ म-०कर्णमवस्थितम् ॥ १४. रा१-०रयक्षेभ्यो न गन्धर्वपतत्रिनः ।

भूत-पूर्वं भयं[1] तादृग् यादृशं मानुषाद् इदम् ॥१८॥ [N
१९] पुरा त्वं नाऽभि-जानीषे यथा[2] सीता मया हृता ।
सीता-हरण-सन्तप्ताद् रामान् मे सु-महद् भयम् ॥१९॥ [N
२०] एष दाशरथी रामः सुग्रीव-सहितो बली ।
सम्-उद्रं स-बलस् तीर्त्वा मूलं[3] नः परि-कृन्तति ॥२०॥ [१४
२१] तावद्[4] ईक्षस्व लङ्कायां द्वाराण्य् उप-वनानि च ।
सेतुना सुख-गम्यो[5] हि वानरैर् (?काऽ)अर्णवः कृतः ॥२१॥ [१५
२२] ये राक्षसा मुख्य-तमा हतास् ते युधि वानरैः[6] ।
वानराणां क्षयं[7] युद्धे न पश्यामि कदा-चन ॥२२॥ [१६
२३] नगरं शत्रुणा रुद्धं युद्धे हत-सुहृज्-जनम् । [N
२४पू] कोशश् च क्षपितः सर्वः स त्वम् अद्य प्र-पश्य माम् ॥२३॥
२५उ] त्रायस्व मां च नगरीं बाल-वृद्धाऽवशेषिताम् । [१७
भ्रातुर् अर्थे महा-बाहो कुरु साहाय्यम्[8] उत्-तमम् ॥२४॥
२६] मयैवं नोक्त-पूर्वं हि कश्-चिद् भ्रातः परं-तप[9] । [२०
त्वय्य् अस्ति[10] हि मम स्नेहः परा सं-भावना च मे ॥२५॥
२७] देवाऽसुर-विमर्देषु बहु-शो राक्षसर्षभ ।
२८पू] देवाऽसुराः[11] परिव्य्-ऊढा निर्-जिताश् चाऽसुरा युधि[12] । [२१
न हि ते सर्व-भूतेषु दृश्यते सदृशो बली[13] ॥२६॥

---

१. रा$_1$-भयम् ॥ २. ल$_1$ ल$_2$ ब ञ प्र रा$_2$ फ म-यदा ॥ ३. प्र रा$_2$ फ म-मूलान् ॥ ४. रा$_1$ रा$_2$ फ म-हतान् । ५. ल$_1$ ल$_2$ब ञ प्र रा$_2$-०गम्येन वानरैरागतैर्वृतम् ॥ ६. अतः परमधिकः पाठः—रा$_1$-तदेतद्भयमुत्पन्नं त्रासनं नो महाबलं । तस्माद्भयस्य नाशार्थं मया प्रबोधितो भवान् ॥ ७. ल$_1$ ल$_2$ ब-भयं ॥ ८. रा$_1$-अभ्युपपद्य ॥ ९. अतः परमधिकः पाठः—रा$_1$-निरयेष्वेव पतनं यथा दुष्कृतकर्मणाः । १०. रा$_1$ प्र फ म-अस्ति तु । रा$_2$-अस्त्विति ॥ ११. रा$_1$-त्वया देवाः प्रतिव्यूढास्तर्जिताश् । १२. अतः परमधिकः पाठः—रा$_1$-तव देवैरनाधृष्यं वीर्यं भीमपराक्रम । १३. रा$_1$-बले ॥

२९] स त्वं मया समा-दिष्टो वीर भीम-पराऽऽक्रम । [२२
निर्-गच्छ शूलम् आ-दाय पाश-हस्त इवाऽन्तकः ।
३०] वानरान् राज-पुत्रौ च भक्षयस्व प्र-मर्द[1] च ॥२७॥ [N
समा-लोक्यैव ते रूपं वि-द्रविष्यन्ति वानराः ।
३१] राम-ल[2]क्ष्मणयोश् चा[2]ऽपि हृदयं प्र-स्फुटिष्यति ॥२८॥ [N
[3]अति-बल [5]महतो भयाद् वि-मुक्तो
भवतु जनः सुखितो ममाऽद्य सर्वः ।
तव भुज-बल-संश्रयाऽभिगुप्तम्
३२] त्रिदश-रिपो [4]जहि [4]राघवं स-सैन्यम् ॥२९॥ [N
कुरुष्व मे प्रिय-हितम् एतद् उत्-तमं
यशस्-करं प्रिय-करं बान्धव-प्रियम् ।
स्व-तेजसा वि-धम सपत्न-वाहिनीं
३३] शरद्-घनं पवन इवोद्-धतो महान् ॥॥३०॥ [२३

[6]इत्यार्षे [7]रामायणे [7]युद्ध-काण्डे कुम्भकर्ण-[8]समादेशो नाम
चत्वारिंशः सर्गः ॥ ४० ॥

[वं-४०]= [एकचत्वारिंशः सर्गः] =[रा-६३]

[9]तस्य राक्षस-राजस्य नि-शम्य परि-[10]देवितम् ।
१] कुम्भ-कर्णो बभाषेदं वचनं प्र-जहास च ॥१॥ [१

---

१. ल१ ल२ ब श्र प्र-प्रमर्दय ॥ २. रा१-रामस्य लक्ष्मणस्यापि ॥ ३. रा१-कपिबल (?लान्) । ४. ल१ ल२ ब श्र प्र-हरिराघवं ॥ ५. रा१-महात्मन् ॥ ६. फ म-नास्ति । ७. रा१ ब प्र-लंकाकांडे । रा२-नास्ति । म-युद्धपर्वणि । ८. ल१-०कर्णवधो । रा२-०कर्णोपदेशो ॥ ९. रा१-स तु । १०. रा१-०देवनम् ॥

दृष्टो दोषो हि[१] योऽस्माभिः पुरा मन्त्र-विनिश्चये ।
२] हितेऽप्य् अन्-अभियुक्तेन[२] सोऽयम् आ-सादितस् त्वया॥२[२
इदं खलु फलं प्राऽऽप्तं शीघ्रं पापस्य कर्मणः[३] ।
३] निर्-अयस्याऽव-पतनं यथा दुष्कृत-कर्मणः ।।३।।[४] [३
प्रथमं वै महा-राज कृत्यम् एतद्[५] वि-चिन्तितम् ।
४] केवलं वीर्य-दर्पेण नाऽनु-बन्धो वि-चारितः ।।४।। [४
यः पश्चात् पूर्व[६]-कार्याणि करोत्य्[७] ऐश्वर्य-मोहितः ।
५] पूर्वे[८] चोत्तर-कार्याणि न स वेद नयाऽनयौ ।।५।। [५
देश-काल-विहीनानि कर्माणि[९] विपरीऽत-वत् ।

---

१. ल$_1$ ल$_2$ ब अ प्र-दृष्टदोषोऽपि । २. रा$_1$-अनतिरक्तेन ॥ ३. रा$_1$-कर्मणा । ४. अतः परमधिकः पाठः—म-पूर्वमेव मया प्रोक्तो रामो नारायणः स्वयम् । सीता च योगमायेति बोधितोऽसि न बुध्यसे ॥ एकदाहं वने सानौ विशालायां स्थितो निशिम् । दृष्टो मया मुनिः साक्षान्नारदो दिव्यदर्शनः ॥ तमब्रुवं महाभाग कुतो गन्तासि मे वद । इत्युक्तो नारदः प्राह देवानां मंत्रणे स्थितः ।। तत्रोत्पन्नमुदंतं वो वक्ष्यामि शृणु तत्त्वतः । युवाभ्यां पीडिता देवाः सर्वे विष्णुमुपागताः ।। ऊचुस्ते देवदेवेशं स्तुत्वा भक्त्या समाहिताः । जहि रावणमक्षोभ्यं देव त्रैलोक्यकंटकम् ॥ तथेत्याह महाविष्णुः सत्यसंकल्प ईश्वरः । जातो रघुकुले देव राम इत्यभिविश्रुतः ।। स हनिष्यति सर्वानित्युक्त्वा प्रययौ ऋषिः । अनुजानीहि रामं त्वं परब्रह्म सनातनम् ।। त्यज वैरं भजस्वाद्य मायामानुषरूपिणम् । भजतो भक्तिभावेन प्रसीदति रघूत्तमः ।। भक्तिर्जनित्री ज्ञानस्य भक्तिर्मोक्षप्रदायिनी । भक्तिहीनेन यत्किंचित्कृतं सर्वमसत्समम् ।। अवताराः सन्ति बहवो विष्णोर्लीलानुकारिणः । तेषां सहस्रसदृशो रामो ज्ञानमयः शुभः । रामं भजन्ति निपुणा मनसा वचसानिशम् । अनायासेन संसारं तीर्त्वा यान्ति हरेः पदम् ॥ ५. ल$_1$ ल$_2$ ब अ रा$_2$ फ म-एतन्न चिन्ति० ॥ ६. रा$_1$-सर्वका० । ७. रा$_1$-कुर्याद् । ८. रा$_1$-पश्चात्कार्याणि पूर्वं तु ॥ ९. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-रूपाणि ॥

६] क्रियमाणानि दुष्यन्ति [1]हवींष्य् अ-प्रयतेष्व् इव ॥६॥ [६
त्रयाणां पञ्च-धा योगं कर्मणां प्रति-प[2]द्यते ।
७] सचिवैः सं-विदं कृत्वा स सम्यग् वर्तते पथि ॥७॥ [७
याथातथ्येन [3]वै राजा समयं वि-[4]जिगीषति[5] ।
८] बुध्यते स शुचिर् बुद्ध्या सु-हृदश् चाऽनु-पश्यति ॥८॥ [८
धर्मम् अर्थं च कामं च सर्व-[6]र्थां रक्षसां पते ।
९] भजते पुरु[7]षैः काले [8]सर्व-द्वन्द्वानि वै[9] पुनः ॥९॥ [९
त्रिषु चैतेषु यच् छ्रेष्ठं श्रुत्वा तन् नाऽव-बुध्यते ।
१०] राजा वा राज-पुत्रो वा वृथा तस्य बहु-श्रुतम् ॥१०॥ [१०
उपप्र-दानं सान्त्वं च भेदं काले च वि-क्रमम् ।
११] योगं च राक्षस-श्रेष्ठ ताव् उभौ च नयाऽनयौ ॥११॥ [११
काले धर्माऽर्थकामान् यः सं-म[10]न्त्र्य सचिवैः सह ।
१२] नि-षेवेद् आत्म-वांल् लोके न तं व्य्-असनम् आ-श्रयेत्[11] १२ [१२
१३पू] हिताऽनुबन्धम् आ-लोक्य कार्याऽकार्यम् इहाऽऽत्मनः ।
N] राजा स[12]हाऽर्थ-तत्त्व-ज्ञैः सचिवैर् बुद्धि-निश्चितैः ॥१३॥ [१३
अन्-अभिज्ञा हि शास्त्राणां बहवः पशु-बुद्धयः ।
१४] प्रागल्भ्याद् वक्तुम् इच्छन्ति मन्त्रेष्व् अभ्यन्तरी-कृताः १४ [१४
मन्त्रि-रूपा हि रिपवः सं-भाव्यास् ते वि-चक्षणैः ।
N] ये हितं नयम् उत्-सृज्य विपरीऽतोपसेविनः ॥१५॥ [N
मूर्खैर् मन्त्रिगुणाऽपेतैर् [13]भ्राता मे पाप-बुद्धिभिः ।
N] वस्त्राऽन्तेष्व् आ-हरन्न् अग्निं पापैर् न प्रति-षेधितः ॥१६॥[N

---

१. ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ म-हविर् ॥ २. रा$_{1}$-यः प्रपश्यति ॥ ३. रा$_{1}$-यो । ४. रा$_{1}$-जेतुमिच्छति । ५. ल$_{1}$ ल$_{2}$ ब म-नास्ति ॥ ६. रा$_{1}$ रा$_{2}$ फ म-सर्वान्वा । ७. प्र रा$_{2}$ फ-पुरुषान् । ८. रा$_{1}$-त्रीणि द्व० । ९. रा$_{1}$-वा ॥ १०. ल$_{1}$ ल$_{2}$ ब अ प्र-समर्थ्य ॥ ११. अतः परमधिकः पाठः—रा$_{1}$-अन्तः-सारैरकुटिलैरच्छिद्रैः मुनिरूपितैः । १२. रा$_{1}$ ल$_{1}$ ल$_{2}$-महार्थ० ॥ १३. रा$_{1}$-भ्रातासौ ॥

अ-शास्त्रविदुषां तेषां न कार्यम् अ-हितं वचः ।
१५] अर्थशास्त्राऽनभिज्ञानां वि-पुलां श्रियम् इच्छताम् ॥१७॥ [१५
अ-हितं हि हिताऽऽकारं धाष्ट्र्याज् जल्पन्ति ये जनाः ।
१६] अवेक्ष्य मन्त्र-बाह्यास् ते कर्तव्याः कृत-दूषणाः ॥१८॥ [१६
वि-नाशाय च भर्तुर् हि भेदिताः[3] शत्रुभिर् बुधैः ।
१७] विपरीऽतानि कृत्यानि कारयन्तीऽह मन्त्रिणः ॥१९॥ [१७
तान् भर्ता मित्र-सङ्काशान् अ-मित्रान् मन्त्र-निर्णये ।
१८] व्यव-हारे च जानीयात् सचिवान् उपसं-हितान् ॥२०॥ [१८
चपलस्य हि[6] कृत्यानि सहसाऽनुप्र-धावतः ।
१९] छिद्रम् अन्ये प्र-पद्यन्ते क्रौञ्च-च्छिद्रम् इव द्वि-जाः ॥२१॥[१९
शक्तो व्यव-सितः शत्रुः स्वेन चाऽर्थेन तुष्यति ।
२०] सर्वं तस्मै प्र-दातव्यम् इति बुद्धि-मतां नयः ॥२२॥ [N
यो हि शत्रुम् अव-ज्ञाय[10] नाऽऽत्मानं[11] परि-रक्षति ।
२१] अवाऽऽप्नोति हि सोऽन्-अर्थान् स्थानाच् च[12] व्यव-रोप्यते[12]२३[२०
न श्रुतं न मया दृष्टं[11] सागरे सेतु-बन्धनम् ।
N] नूनम् अस्मद्-विनाशाय दैवेन भुज उच्-छ्रितः ॥२४॥ [N
स तु श्रुत्वा महा-राजः कुम्भ-कर्णस्य भाषितम् ।
२२] भ्रूकुटिं चैव सं-चक्रे क्रुद्धश् चैनम् उवाच ह ॥२५॥ [२२
मान्यो गुरुर् इवाऽऽचार्यः किं मां[13] त्वम् अनु-शोचसि ।
२३] किम् एवं वाक्-श्रमं कर्तुं[14] काल-युक्तं वि-धीयताम् ॥२६॥ [२३

---

१. रा₁-हितकाराय । २. रा₁-नराः ॥ ३. रा₁ म-सहिताः । ल₁ ल₂ ब अ प्र-संहिताः । ४. ल₁ ल₂ ब प्र-बुधाः ॥ ५. रा₁-विजा० ॥ ६. रा₁ ल₁ ल₂ ब म-च । ७. रा₁-एव ॥ ८. रा₁-शत्रुर्येनार्थेन स । ९. रा₁-स च तस्मै ॥ १०. रा₁-अभिज्ञाय । ११. ल₁ ल₂ ब-नास्ति । १२. रा₁-चैवावरोप्यते ॥ १३. रा₁-भवाननुशास्ति माम् । १४. रा₁-अलं वाक्यश्रमं कृत्वा ॥

वि-भ्रमाच् चित्त-मोहाद् वा बलवीर्योच्छ्रयेण वा ।
२४] नाऽभि-पन्नम् इदानीं यद् वृथा तस्य पुनः कथा[1] ॥२७॥ [२४
अस्मिन् काले तु यद् युक्तं तद् इदानीं वि-धीयताम् ।[1]
२५] ममाऽपनय-जं दोषं वि-क्रमेण [2]शमी-कुरु ॥२८॥ [२५
यदि [3]खल्व् [3]अस्ति ते स्नेहो भ्रातृ-त्वं चाऽव-गच्छसि ।
२६] यदि वा कार्यम् [4]एतत् [4]ते हृदि [5]कार्यम् अ-तन्द्रि[5]तम् ॥२९॥ [२६
स सुहृद् यो विपन्नाऽ[6]र्थे दीनम् अभ्य[6]व-पद्यते ।
२७] स बन्धुर् योऽप-नीतेषु साहाय्यायोप-कल्[7]पते ॥३०॥ [२७
त[8]म् [8]अर्थैवं ब्रुवाणं तु वचनं दीन-दारुणम् ।
२८] क्रुद्धोऽयम् इति वि-ज्ञाय शनैः श्लक्ष्णम् उवाच ह ॥३१॥ [२८
अतीऽव हि[9] [9]समा-लक्ष्य भ्रातरं [10]कुपितं [10]भृशम् ।
२९] कुम्भ-कर्णः शनैर् वाक्यं बभाषे परि-सान्त्वयन् ॥३२॥
[11]शृणु राजन्न् [11]अव-हितो मम वाक्यम् अरिं-दम । [२९
३०] यद्-अर्थं तु पुरा सौम्य नारदाच् छ्रुतवान् अहम्[12] ॥३३॥ [N
षण्-मासाद् अहम् उत्था(द्-स्था)य अशि[13]त्वा भक्ष्यम् उत्-तमम् ।
३१] न च तृप्तोऽस्मि राजेन्द्र ततोऽहं प्र-स्थितो वनम् ॥३४॥ [N
बहूनि भक्षयित्वाऽहं सत्त्वानि वि-विधानि वै[14] ।
३२] भुक्त्वा [15]प्राणाऽयनं कृत्वा शिला-तलम् उपाऽऽविशम् ॥३५॥ [N
शिला-तल-स्थोऽपश्यं तं नारदं [16]मुनि-सत्तमम् ।

---

१. ल$_1$ ल$_2$ ब-नास्ति ॥ २. ल$_1$ ल$_2$ ब श्र रा$_2$ फ म-समी० ॥ ३. रा$_1$-स्वल्पोपि । ४. प्र-एतद्धि । ५. रा$_1$ रा$_2$-कार्यसमं मम । म-कार्यमिदं मम ॥ ६. रा$_1$-अभ्युपप० । ७. रा$_1$-०कल्प्यते ॥ ८. रा$_1$-तं मिथ्यैवं ॥ ९. ल$_1$ ल$_2$ ब श्र प्र-सममालक्ष्य । १०. रा$_1$-कुपितेंद्रियम् ॥ ११. रा$_2$ फ-शृणुष्वेदं महाराज ॥ १२. म-अतः श्लोकादारभ्य सर्गसमाप्तिं यावन्नास्ति ॥ १३. ल$_1$ ल$_2$ ब श्र-ह्यशित्वा ॥ १४. ल$_1$ ल$_2$ ब-च । १५. रा$_2$ फ-प्रीणयनं ॥ १६. रा$_2$ प्र फ-शशिसप्रभम् ।

३३] आ-काशेन द्रुतं यान्तं मां च दृष्ट्वा स[1] तु स्थितम्(?:)॥३६॥[N
अव-तीर्णश् च सहसा मया चैवाऽभि-वादितः ।
३४] उप-विष्टं[2] शिलायां तु ततोऽहं तम् अथाऽब्रुवम् ॥३७॥ [N
कुत आ-गम्यते ब्रह्मन् कुतो वा प्रति-गम्यते[3] ।
३५] एवम् उक्तो महा-राज[4] नारदो माम् उवाच ह ॥३८॥ [N
देवानाम् आ-लयं मेरुं गतोऽहं देव-संसदि ।
३६] युष्मत्[5]-तो भय-भीतानां समाजस् तत्र सं-बभौ ॥३९॥ [N
तत्र[6] ब्रह्मा च रुद्रश् च विष्णुश् च जयतां वरः ।
३७] देव-राजो महेन्द्रश् च लोक-साक्षी च पावकः ॥४०॥ [N
मरुतो वसवश् चैव चन्द्राऽऽदित्यौ ग्रहास् तथा ।
३८] गन्धर्वा गुह्यकाश् चैव ऋषयो गरुडोरगाः ॥४१॥[7] [N
मन्त्रम्[8] आ-मन्त्रिरे तत्र वधं रक्षः-कुलस्य च[7] ।
३९] देव-राजो नि-बद्धश्[9] च येन सं[10]-ख्ये परा-जितः ॥४२॥ [N
जितौ तु स-बलौ[11] सं-ख्ये कुवेर-वरुणाव् अपि ।
४०] चन्द्राऽऽदित्यौ वशं[12] नीतौ त्रैलोक्यं स-चराऽचरम् ॥४३॥[N
यज्ञा वि-ध्वंसिताः सर्वे धर्मिष्ठाश् च हता नृपाः ।
४१] देवोद्यानानि भग्नानि स्त्रियो नीता यथेष्ट-तः ॥४४॥ [N
रक्षसा तेन रौद्रेण रावणेन बलीयसा ।
४२] ब्रह्मणो वर-दानेन गर्वितेन सुरोत्तमाः ॥४५॥ [N
इत्य् उवाच ततो देवान् सर्वान् देव-पुरोहितः[13] ।

---

१. रा१-तु धिष्ठितः । रा२-समुपस्थितं ॥ २. ब प्र रा२ फ-०विष्टः ॥ ३. रा१-गम्यते प्रभो । ४. रा१-महाभाग ॥ ५. रा१-युष्मद्भ्यो ॥ ६. रा१-मनुर् ॥ ७. अ-नास्ति ॥ ८. रा१-मंत्रं प्रचक्रिरे । ९. रा१-ते । फ-नः १०. रा१-निबद्धस्तु यमश्चैव ॥ ११. रा१-सकले । १२. रा२ फ-वशे ॥ १३. ल१ ल२ ब रा२-अत आरभ्य ४७-शश्लोकस्य तृतीयपादं यावन्नास्ति ।

४३] चिन्तयध्वं वधोपायं रावणस्य दुर्-आत्मनः ॥४६॥ [N
एवम् उक्ते तु वचनं ब्रह्मा देवान् उवाच ह ।
४४] अवध्य-त्वं मया दत्तं देवैर् दैत्यैश् च रक्षसः ॥४७॥ [N
मनुष्येभ्यो भयं तस्य वानरेभ्यश् च देवताः ।
४५] सुराऽसुर-समूहेऽपि वधस् तस्य न विद्यते ॥४८॥ [N
तस्माद् एष हरिर् देवः पद्म-नाभस् त्रि-विक्रमः ।
४६] पुत्रो दश-रथस्याऽस्तु चतुर्-व्यूहैः सना-तनः ॥४९॥ [N
भवन्तो वसु-धां गत्वा विष्णोर् अस्य महाऽऽत्मनः ।
४७] वानराणां तनुं कृत्वा सहाय-त्वं करिष्यथ ॥५०॥ [N
एवम् उक्त्वा ततो ब्रह्मा तत्रैवाऽन्तर्-अधीयत ।
४८] देवा अपि यथा-न्यायं जग्मुर् वै यत्र वासवः ॥५१॥ [N
एतद् आ-ख्यातवान् मह्यं नारदो भग-वान् ऋषिः ।
४९] यथा-तत्त्वम् अ-शेषेण ततो यातः सुराऽऽलयम् ॥५२॥ [N
सोऽयं विष्णुः सुरैः सार्धं वानर-त्वम् उपाऽऽगतैः ।
५०] रामाऽभिधानो राजेन्द्र अस्मान् हन्तुम् उपाऽऽगतः ॥५३॥ [N
तन् मह्यं रोचते सीता रामाय प्रति-दीयताम् ।
५१] कुरु मा वि-ग्रहं तेन संधिस् तेनेह रुच्यताम् ॥५४॥ [N
त्रैलोक्ये तु नमस्यस् तु पूज्यश् च सततं प्र-भुः ।
५२] नमस्व रामं राजेन्द्र रक्ष चाऽऽत्मानम् आत्मना ॥५५॥ [N

---

१. रा१-दारुणस्य ॥ २. श्र प्र रा२ फ-मानु० ॥ ३. रा२-चतुर्बाहुः ॥ ४. रा१-वानरीं च ॥ ५. ल१ ल२ ब-यत्र स ॥ ६. प्र रा२ फ-०लये ॥ ७. रा१-नरवानरतां गतः । ८. ल१ ल२ ब श्र प्र रा२ फ-नास्ति ॥ ९. ल१ ल२ ब श्र-रामायैव प्रदीयताम् । १०. रा१-नास्ति ॥

योग्यश् च राघवो मित्रं सन्धिस्[1] तेनोत्-तमो[1] भवेत् ।
५१] स-कामा न च वै देवा भविष्यन्ति निर्-उद्यमाः ॥५६॥ [N

इत्यार्षे रामायणे युद्ध[2]-काण्डे कुम्भकर्ण-वाक्यं नामैक-
चत्वारिंशः सर्गः ॥ ४१ ॥[3]

[वं-४१]= [द्वाचत्वारिंशः सर्गः] =[दा-६३]

कुम्भकर्ण-वचः श्रुत्वा रावणो राक्षसेश्वरः[4] ।[5]
१] तूष्णीं-भूतश्[6] चिन्तयित्वा ततो वाक्यम् उवाच ह ॥१॥ [N
कुम्भ-कर्ण महा-प्राज्ञ कुरुष्व[7] वचनं मम ।
२] कोऽसौ विष्णुर् इति ख्यातो यस्मात् त्वं तात बिभ्यसे[8] ॥२॥ [N
देव-त्वे तं[9] न मन्येऽहं तथाऽन्यान् देव-दानवान्[9] ।
३] मानुष-त्वं[10] गते तस्मिन् किं भयं त्वाम् उप-स्थितम् ॥३॥ [N
नित्यम् आहार-भूतास् तु मानुषाः[11] सन्ति चाऽबलाः[11] ।
४] खादयित्वा तु यं[12] तं पूर्वं कथं पश्चान् नमाम्य् अहम् ॥४॥ [N
प्र-णम्य मानुषं रामं सीतां[13] दत्त्वा तु तस्य वै ।
५] हास्य-भूतस् तु लोकानाम् अनु-यास्यामि[14] पृष्ठ-तः ॥५॥ [N
राघवं तं महा-बाहो दीन-रूपो[15] ह्य् उपाऽऽस्य वै[15] ।

---

१. ल$_{1}$ ल$_{2}$ ब श्र प्र फ-सन्धिश्चोत्तमो । रा$_{2}$-सन्धिश्चात्मनो ॥ २. रा$_{1}$ ब प्र-लंकाकांडे । ३. म-सर्गसमाप्तिर्न दृश्यते ॥ ४. रा$_{1}$-राक्षसाधिपः । ५. म-अत आरभ्य २५-शश्लोकपर्यन्तं नास्ति । ६. प्र-तूष्णीं स्थितश् ॥ ७. रा$_{1}$-शृणुष्व । ८. ल$_{1}$ ल$_{2}$ ब श्र-वै बिभेषि च ॥ ९. ल$_{1}$ ल$_{2}$ ब श्र प्र रा$_{2}$ फ-तथान्ये देवदानवाः । १०. रा$_{2}$-०त्वे ॥ ११. रा$_{1}$ रा$_{2}$-सुमहाबलाः । १२. रा$_{1}$-तान् ॥ १३. ल$_{1}$ ल$_{2}$ ब-सीता । १४. ल$_{1}$ ल$_{2}$ ब-०यास्यसि ॥ १५. रा$_{1}$-०रूपोथ दासवत् ।

६] ऋद्धिं तां पश्यमानोऽस्यं[1] कथं शक्ष्यामि जीवितुम् ॥६॥ [N
हृत्वा तस्य पुरा भार्यां मानं कृत्वा सु-दारुणम् ।
७] प्र-णमेद् रावणो रामम् एष बुद्धेर्[2] विपर्य्-अयः[2] ॥७॥ [N
यदि रामः स्वयं विष्णुर् लक्ष्मणोऽपि[3] शत-क्रतुः ।
८] सु-ग्रीवस् त्र्यम्बकः साक्षात् स्वयं ब्रह्मा च जाम्ब-वान् ॥८॥ [N
अहो शास्त्राण्य् अ-श्रुतानि[4] तस्य ते बुद्धिर् ईदृशी ।
९] अत्यन्त[5]-वैरिणं रामं यो नमस्[6]-कर्तुम् इच्छसि[7] ॥९॥ [N
देव-त्वं यः परि-त्यज्य मानुषीं योनिम् आ-स्थितः[8] ।
१०] अस्मान् हन्तुं किलाऽऽयातः[9] स सं-धेयः कथं मया[10] ॥१०॥ [N
यदि वो राघवो[11] विष्णुर् व्यक्तं ते श्रोत्रम् आ-गतः ।
११] देवतानां हिताऽर्थाय[12] प्र-विष्टो मानुषीं तनुम् ॥११॥ [N
स वानराणां राजानं सु-ग्रीवं शरणं[13] गतः[13] ।
१२] अहोऽस्य स-दृशं सख्यं तिर्यग्-योनि-गणैः[14] सह ॥१२॥ [N
वीर्य-हीनस् तु किं विष्णुर् यो गतो ह्य्[15] अ(?ऋ)क्षं[15]-वानरान् ।
१३] अथवा वीर्य-हीनोऽसौ येन पूर्वं महाऽसुरः ॥१३॥ [N
वामनं रूपम् आ-स्थाय याचितस्[16] त्रि-पद-क्रमम् ।
१४] बलिस् तु दीक्षितो यज्ञे तेन त्वं सख्यम् इच्छसि ॥१४॥ [N
येन दत्ता मही सर्वा स-सागरवनाऽऽकरा[17] ।
१५] उप-कार[18] कृतः पूर्वैः[18] स बद्धो यज्ञ-दीक्षितैः[19] ।

---

१. रा$_1$-परामृद्धिं समालोक्य । रा$_2$-हृदि च प० । फ-ऋद्धिं च प० ॥ २. रा$_1$रा$_2$-ते बुद्धिनिर्णयः ॥ ३. रा$_1$ प्र-०णो वा ॥ ४. रा$_1$-अधीतानि । ५. रा$_1$-अलं ते वै० । ६. रा$_1$-मित्रं । ७. रा$_1$-अर्हसि । ल$_1$ल$_2$ब म इच्छति ॥ ८. रा$_1$-आश्रितः । ९. ल$_1$ल$_2$ब-इहायातः । १०. रा$_2$-भवेत् ॥ ११. रा$_1$-रामाभिधो । १२ रा$_1$-हितार्थं च ॥ १३. रा$_2$-शरणागतः । १४. रा$_1$रा$_2$-०गतैः ॥ १५. ल$_1$प्र रा$_2$ फ-ऋक्षवा० ॥ १६. ल$_1$ल$_2$ ब फ-याचितं ॥ १७. रा$_2$प्र-वनान्तरा । १८. ल$_1$-ल$_2$ ब अ प्र रा$_2$ फ-उपचारः कृतः सर्वो । १९. ल$_1$ ब अ प्र रा$_2$ फ-यज्ञस्य दी० । ल$_2$-यज्ञस्य धीमतः ।

उप-[1]कारी हतो[2] येन सोऽस्मान् रक्षति वैरिणः ॥१५॥ [N

१६] यदा मे निर्-जिता देवाः स्वर्गं गत्वा त्वया सह ।

तदा किं नाऽस्ति[3] विष्णु-स्त्वं तस्य देवस्य राक्षस ।

१७] साम्प्रतं कुत आ-यातः स विष्णुर् येन बिभ्यसे[4] ॥१६॥ [N

शरीर-रक्षणाऽर्थाय ध्रुवं[5] ते वाक्यम् ईदृशम् ।

१८] नाऽयं क्लीबयितुं कालः काल-[6]युद्धे निशा-चर ॥१७॥ [N

आयुः पिता-महात् प्राऽऽप्तं त्रैलोक्यं च[7] वशी-[8]कृतम् ।

१९] राघवं प्र-णमे कस्माद् धीन-वीर्य-पराऽऽक्रमम् ॥१८॥ [N

गच्छस्व शयनीयाय शेष्वे[9] त्वं विगत-ज्वरः ।

२०] शयानं न च हन्यात् त्वां राघवो लक्ष्मणस् तथा ॥१९॥ [N

अहं रामं [10]वधिष्यामि स-सुग्रीवं स-[11]लक्ष्मणम् ।

२१] वानरांश् च वधिष्यामि[12] ततो देवान् महा-रणे ॥२०॥ [N

विष्णुं चैव हनिष्यामि[13] ये च विष्ण्व्-अनुयायिनः ।

२२] गच्छ गच्छ स्व-कं क्षेत्रं चिरं जीव सुखी भव ॥२१॥ [N

भ्रातरं त्व् एवम्[14] उक्त्वाऽसौ रावणः काल-चोदितः ।

२३] साऽवलेपं स गर्जन् वै[15] पुनर् वचनम् अब्रवीत् ॥२२॥ [N

जानामि सीतां धरणी-प्रसूतां

जानामि रामं[16] मधु-सूदनोऽयम् ।

अहं हि जाने स्वयम्[17] अस्य वध्यस्

२४] तेनाऽऽहृता मे जनकाऽऽत्मजैषा ॥२३॥ [N

---

१. अ प्र-०कारो । २. रा$_{२}$फ-हतस्तेन ॥ ३. ल$_{१}$ल$_{२}$ब-नास्य । ४. ल$_{१}$ ल$_{२}$ ब अ प्र रा$_{२}$ फ-बिभ्यसि ॥ ५. रा$_{१}$-त्वं ब्रूषे ६. ल$_{१}$ ल$_{२}$ ब अ रा$_{२}$ फ-कालो युद्धे ॥ ७. रा$_{१}$- तु । ८. रा$_{२}$ फ-वशे कृ० ॥ ९. ल$_{१}$ ल$_{२}$ ब अ प्र-शेषे ॥ १०. ल$_{१}$ ल$_{२}$ ब-हनिष्यामि । ११. रा$_{१}$-च ल० । १२. रा$_{१}$-हनिष्यामि ॥ १३. प्र रा$_{२}$ फ-वधिष्यामि ॥ १४. रा$_{१}$-चैवम् । १५. रा$_{१}$-सगर्वं च ॥ १६. ल$_{१}$ ल$_{२}$ ब अ प्र-रामो । १७. रा$_{१}$-त्वहम् ॥

न कामान् नैव च क्रोधात् त्यजामि जनकाऽऽत्मजाम् ।
२५] नि-हतो गन्तुम् इच्छामि तद् विष्णोः परमं पदम् ॥२४॥ [N
स०४२]रावणस्य वचः श्रुत्वा क्रुद्धस्य परि-देवितम् ।
१] कुम्भ-कर्णः पुनर् वाक्यम् अश्रु[2]-पूर्णम् अभाषत[2] ॥२५॥ [N
अलं राक्षस-शार्दूल सं-तापम् उप-गम्य हि ।
२] रोष[3]-शोकौ परि-त्यज्य स्व-स्थो भवितुम् अर्हसि ॥२६॥ [३०
नैवम् अर्हसि वक्तुं त्वं मयि जीवति पार्थिव ।
३] तम् अहं शातयिष्यामि यत्-कृते परि-तप्यसे ॥२७॥ [३१
अवश्यं तु हितं वाच्यैः सर्वाऽवस्थो मही-पतिः ।
४] बन्धु-भावाद् अभि-हितं भ्रातृ-स्नेहाच् च पार्थिव ॥२८॥ [३२
सदृशं यत् तु कार्येऽस्मिन् कर्त्तुं स्निग्धेन बन्धुना ।
५] शत्रूणां कदनं पश्य क्रियमाणं मयाऽनघ ॥२९॥ [३३
अद्य पश्य महा-बाहो मया समर-मूर्धनि ।
६] हते रामे सह भ्रात्रा द्रवन्तीं कपि-वाहिनीम् ॥३०॥ [३४
अद्य रामस्य दृष्ट्वा त्वं मयाऽऽनीतं रणाच् छिरः ।
७] सुखी भव महा-राज सीता भवतु दुःखिता[11] ॥३१॥ [३५
अद्य रामस्य नि-धनं पश्यन्तु सु-महत् प्रियम् ।
८] लङ्कायां राक्षसाः सर्वे ये ते निहत-बान्धवाः ॥३२॥ [३६
अद्य शोक-परीऽतानां स्व-बन्धु-वध-शोचिनाम् ।

---

१. रा$_1$-हरामि । टि० अन्तर्भावित: ण्यर्थ: द्र० ॥ २. रा$_1$ ल$_1$ ल$_2$ ब प्र रा$_2$ फ-साश्रुपूर्णमभा० । ल$_1$ ल$_2$ ब अ-०र्णमुखोऽब्रवीत् ॥ ३. रा$_1$-दोषायासौ ॥ ४. रा$_1$ ल$_1$ अ प्र रा$_2$ फ-वाक्यं । ५. रा$_1$ प्र रा$_2$-०वस्थं । ६. रा$_1$-मया तव ॥ ७. ल$_2$ ब अ-वक्तुं । ८. रा$_1$-मयाद्य तत् ॥ ९. ल$_1$ ल$_2$ ब अ-राजन् । १०. रा$_1$-हरिवा० ॥ ११. अत: परमधिक: पाठ:—रा$_1$ रा$_2$-अथ तस्य विनाशेन मारुतेर्मारुताश्रयं । क्रोधं निर्वापयिष्यामि लंका येन प्रधर्षिता ॥ सुखी भव महाबाहो लंका भवतु निर्वृता । भविष्यति न ते शोकः शत्रुपक्षे मया हते ॥

९] शत्रोर् युधि वि-नाशेन करोम्य् अश्रु-प्रमार्जनम् ॥३३॥ [३७
अद्य पर्वतकूटाऽऽभं [1]स-सूर्यम् इव तोय-दम् ।
१०] वि-शीर्णं पश्य सम्-अरे सु-ग्रीवं वानरेश्वरम् ॥३४॥ [३८
अहम् एकोऽद्य यास्यामि [2]रणं रण-विशारद[2] ।
११] [2]अ-साधारणम् इच्छा[2]मि तव दातुम् अहं जयम् ॥३५॥ [N
१२पू] नाऽपरे प्रेषणीयास् ते युद्धायाऽतुल-विक्रम ।[3] [४१.उ
अहम् उत्-सादयिष्यामि शत्रुं तव रिपुं-जय ॥३६॥ [४२
१५] यदि शक्रो यदि यमो यदि पावक-मारुतौ ।
तान् अहं [4]साधयिष्यामि कुवेर-वरुणाव् अपि ॥३७॥ [४३
१६] गिरि-मात्र-शरीरस्य शित[5]-शूल-धरस्य मे ।
नदतस् तीक्ष्ण-दंष्ट्रस्य विभी[6]याद् अपि वासवः ॥३८॥ [४४
१७] अथवा न्यस्त-शस्त्रस्य मृद्नतस् तरसा [7]चमूम् ।[8]
१८उ] न मे प्रमुख-तः कश्-चिच् छक्तः स्थातुं जिजीविषुः ॥३९॥ [४५
नैव शक्त्या न गदया नाऽसिना न शितैः शरैः ।
१९] वारयेन् मां [9]हि सं-[1]रब्धं साक्षाद् अपि पुरं-दरः । [N
हस्ताभ्याम् एव सं-रब्धो हन्याम् अपि हि वज्रिणम् ॥४०॥ [४६
२०] यदि मे मुष्टि-वेगं स राघवो वि-षहि[10]ष्यते ।
ततः पास्यन्ति बाणौघा रुधिरं राघवस्य वै ॥४१॥ [४७

---

१. रा$_1$-सूर्यपुत्रं प्लवंगमं ॥ २. ल$_1$ल$_2$ ब-नास्ति ॥ ३. अतः परमधिकः पाठः—रा$_1$ रा$_2$-कथं त्वं राक्षसैरेभिर्मया च परिरक्षितः । जिघांसुभिर्दाशरथेस्तप्यसे राक्षसाधिप ॥ यदि पूर्वं निपतिते मयि त्वां हन्ति राघवः । नाहमात्मनि संतापं गच्छेयं राक्षसाधिप ॥ कामं नान्यमिदानीं त्वमादेक्ष्यसि परंतप ॥ ४. रा$_1$-योधयिष्यामि । ल$_1$ ल$_2$ ब श्र प्र-शोषयि० ॥ ५. ल$_1$ल$_2$ब श्र प्र रा$_2$-शिलाशू० । ६. रा$_1$ल$_2$श्र प्र-बिभियाद् ॥ ७. रा$_1$म-रिपून् । ८. अतः परमधिकः पाठः—रा$_1$-पवनस्येव वेगेन भंजतस्तरसा द्रु(?रि) मा(?पू)न् ॥ ९. म-सुसं० ॥ १०. ल$_1$ ल$_2$ब श्र प्र रा$_2$फ म-विषहिष्यति ॥

२१] चिन्तया बा[1]ध्यसे राजन् किम्-अर्थं मयि तिष्ठति ।
सोऽहं शत्रु-विनाशाय तव निर्-यातुम् उद्-यतः ॥४२॥ [४९
अद्य रामं स-सौमित्रिं स-सुग्रीवं स-मारुतिम् । [५०उ
२२] सर्वान् ए[2]क-पदे हन्मि प्रति-ज्ञा[3]ने तवाऽग्र-तः ॥४३॥ [N
वधेन ते दाशरथेः सुखाऽर्हं
सुखं समा-हर्तुम् अहं प्र-यामि ।
नि-हत्य रामं सह लक्ष्मणेन
N] खादामि सर्वान् हरि-यू[5]थ-मुख्यान् ॥४४॥ [५७
रमस्व कामान् पिब चाऽग्र्य[6]-वारुणीं
कुरुष्व कृ[7]त्यान्य् अप-नी[8]यतां ज्वरः ।
तवाऽद्य रामे गमिते यम-क्षयं
२३] चिराय सीता वश-गा भविष्यति ॥४५॥ [५८

इत्यार्षे रामायणे युद्ध-काण्डे कुम्भकर्ण-गर्ज[10]नं नाम द्विचत्वारिंशः सर्गः ॥४२॥

[वं-४३]= [त्रिचत्वारिंशः सर्गः] =[दा-६४]

तद् उक्तम् अति-कायेन बलिना बल-शालिना ।[11]
१] कु[12]म्भ-कर्णेन वचनं श्रुत्वोवाच महोदरः ॥१॥ [१
कुम्भ-कर्ण कुले जातो वृ[13]था प्राकृत-दर्शनः ।
२] अ[14]व-लिप्तो न शक्नोति कृत्यं सर्व-त्र वेदितुम् ॥२॥ [२

---

१. रा$_1$-दह्यसे ॥ २. फ म-एकायने । ३. ल$_1$ ल$_2$ ब श्र रा$_2$ फ-प्रतिज्ञा मे ॥ ४. ल$_1$ ल$_2$ ब श्र-शत्रुं । ५. श्र प्र म-हरियोधमु॰ ॥ ६. ल$_1$ ल$_2$-चाग्रवा॰ । ७. ल$_1$ ल$_2$ ब श्र प्र-कार्याण्य् । ८. ल$_1$ श्र-अपयातु ते ॥ ९. रा$_1$ ब म-लंकाकां॰ । १०. रा$_2$म-॰गर्जनो ॥ ११. रा$_1$-एवं विकत्थमानस्य धन्विनो बलशालिनः । १२. रा$_1$-कुम्भकर्णस्य ॥ १३. रा$_1$-यथा । १४. ल$_1$ ल$_2$ ब-अविलुप्तो ॥

न हि राज्ञो[1] न जानीते कुम्भ-कर्ण नयाऽनयौ ।
३] त्वं तु कैशोरकाद् धृष्टं केवलं वक्तुम् इच्छसि[2] ॥३॥ [३
स्थानं वृद्धिं च हानिं च देश-काल-विभाग-वित्[3] ।
४] आत्मनश् च परेषां च बुध्यते राक्षसर्षभ[4] ॥४॥ [४
यत्[5] तु शक्यं बल-वता वक्तुं प्राकृत-बुद्धिना ।
५] अनुपासित-वृद्धत्वात्[6] तवैतत्[7] तादृशं[8] वचः ॥५॥ [५
यश् च धर्माऽर्थकामांस् त्वं ब्रवीषि पृथग्-आश्रयान् ।
६] अनु-पश्यसि नो भावं नहि लक्षणम् अस्ति[9] ते ॥६॥ [६
काम[10] एवं हि सर्वेषां कारणानां[11] प्र-योजनम् ।
७] श्रेयः-पापीयसां चाऽत्र फलं भवति कर्मणाम् ॥७॥ [७
निःश्रेयस-फलत्वे[12] च[12] धर्माऽर्थाव् इतराव् अपि ।
८] इह[13] धर्माऽर्थयोः प्राऽऽप्तिः फलं च[14] प्रेत्य-भाविकम्[15] ॥८॥ [८
इहलौकिक-पारत्रं[16] कर्म[17] पुंभिर् नि-षेव्यते ।
९] कर्मणोऽत्र[18] नु[18] कल्याणं लभते कामम् आ-स्थितः ॥९॥ [९
न प्र-मादो[19] ह्य् अयं[19] राज्ञा[20] हृदि कार्यः[21] कदा-चन[22] ।
१०] शत्रोर् हि सम्-अरे हिंसा किम् इवैऽत्र[23] वि-धीयते[23] ॥१०॥ [१०

१. रा१-राजन् विजा० । २. रा१-अर्हसि ॥ ३. रा१-०विभागतां । ४. ल१ ल२ ब श्र प्र रा२ फ-०सेश्वर ॥ ५. रा१-यत्र । ६. रा१ फ-०वृद्धेन । म-०वृद्धस्तु । ७. म-कः कुर्यात् । ८. रा१ ल१-भाषितं त्वया । म-०शं बुधः ॥ ९. रा१-नास्ति ॥ १०. ल१-कामश्चैषां । ल२ ब श्र प्र फ-कामश्चैव । रा२-कामस्त्वेवं । ११. रा१-कारणं तु ॥ १२. रा१ म-०फलं चैव । फ-०फलत्वेन । १३. ल१ल२ब प्र रा२ फ म-अथ । श्र-अत्र । १४. ल१ल२ब श्र प्र रा२ फ म-व । १५. ल१ल२ब श्र प्र रा२-भावितं ॥ १६. रा१-०पारत्र्यं । १७. म-फलं । १८. ल१ल२ब प्र-कर्मण्यर्थे तु । रा२-कर्मणामथ । फ-कर्मण्यपि च ॥ १९. रा१ प्र रा२ फ-प्रमादमिदं । २०. प्र रा२-राज्ञो । २१. प्र रा२-कार्यं । २२. ल१ ल२ ब-कथंचन । २३. रा२-इवात्रापनीयते । ल१ ल२ ब प्र रा२-एवात्र वि० ॥

सीतायां[1]श् चोपं[1]-नयने हेतुर् यः प्र-कृ[2]तस् त्वया ।
११] तत्राऽप्य् अन्-उपपन्नं ते[3] वक्ष्यामि यद् अ-साधु वो[4] ॥११॥ [११
येन पूर्वं जन-स्थाने बहवो राक्षसा हताः ।[5]
१२] तं शूरं राघवं सं-ख्ये कथम् एको हनिष्यसि[6] ॥१२॥ [१२
ये पुरा निर्-जितास् तेन जन-स्थाने महौजसः ।
१३] राक्षसास् तस्य तान् भीतान् सर्वान् एवाऽत्र लोकय ॥१३॥[7] [१३
तं सिंहम् इव सं-क्रुद्धं रामं दशरथाऽऽत्मजम् ।
१५] सर्पं[8] सुप्तम् इवाऽप्राज्ञः प्र-बोधयितुम् इच्छसि ॥१४॥ [१४
ज्वलितं तेजसा नित्यं क्रोधेन च दुरा-सदम् ।
१६] कथं मृत्युम् इवाऽसह्यम् आ-सादयितुम् इच्छसि ॥१५॥ [१५
संशयं-स्थम्[8] अन्-आचीर्णं शत्रुं प्रति च हासनम् ।
१७] एकस्य गमनं तत्र न मह्यं रोचते तव ॥१६॥ [१६
हीनाऽर्थस् तु समृद्धाऽर्थं को रिपुं प्राकृतो यथा ।
१८] निश्-चितं जीवित-त्यागी वशम् आ-नेतुम् अर्हति ॥१७॥ [१७
यस्य नाऽस्ति मनुष्येषु सदृशो राक्षसोत्तम ।
१९] तेनेच्छसि कथं योद्धुं तुल्येनेह वि-वस्वतः[9] ॥१८॥ [१८
एवम् उक्त्वा तु सं-क्रुद्धः कुम्भ-कर्णं महोदरः ।
२०] उवाच रक्षसां मध्ये रावणं रावणोपमं[10] ॥१९॥ [१९
लब्ध्वा पुनस् त्वं वैदेहीं किम् अस्मान् अभि-भाषसे ।
२१] यदीऽच्छसि सतीं सीताम् अ-वशां वशम् आ-गताम् ॥२०॥[२०

१. ल१ ल२ ब श्र प्र रा२-सीतावशोप० । फ-सीता तस्योपनयनो । २. रा१ प्र रा२ फ म-प्राकृ० । ३. फ-हि । ४. रा१-०वम् ॥ ५. अतः परमधिकः पाठः—रा१ रा२-खरश्च निहतः संख्ये दूषणस्त्रिशिरास्तथा । ६. रा१-बलिनं राघवं हंतुं कथमेको भविष्यति ॥ ७. अतः परमधिकः पाठः—रा१ रा२-येऽपि चान्ये महात्मानो राक्षसाः शूरसंमताः । रामं पश्यंति भीतास्ते स्वप्नेऽपि नरसत्तमं ॥ ८. ल१ ल२ ब श्र प्र-शयनस्थम् ॥ ९. रा१ रा२ फ-विवस्वता ॥ १०. रा१-राक्षसाधिपं ॥

दृष्टः कश्-चिद् उपायो मे सीतोपा[1]ऽऽदान-कारकः ।
२२] रुचितश् च स्व-बुद्ध्या मे राक्षसर्षभ तं शृणु ॥२१॥ [२१
[2]अहं द्रि-जिह्वः[2] सं-ह्रादी कुम्भ-कर्णो[3]ऽति-गर्जनः ।
२३] मुञ्च राम-वधायाऽद्य गच्छन्त्व् इत्य् अव-घोषय ॥२२॥ [२२
ततो गत्वा रणे युद्धं दास्यामस् तस्य यत्न-तः ।
२४] तं वधिष्यामहे शत्रुं नोपायैः कार्यम् अस्ति नः ॥२३॥ [२३
अथ जीवति शत्रुस् ते वयं[4] च कृत-संयुगाः ।
२५] ततः समभि-पश्यामो मनसा यत् सम्-अर्थितम्[5] ॥२४॥ [२४
वयं युद्धाद् इहैष्यामो रुधिरेण सम्-उक्षिताः ।
२६] वि-दार्य स्व-तनुं बाणैर् रामनामाऽङ्कितैर् युधि ॥२५॥ [२५
२७उ] नि-हतो राघवोऽस्माभिर् लक्ष्मणश् चेति वादिनः[6] ।
तव पादौ [7]ग्रहीष्यामस् त्वं नः कामं परि-ष्वजेः ॥२६॥ [२६
२८] ततोऽव-घुष्य नगरे गज-स्कन्देन पार्थिव ।
हतो रामः सह भ्रात्रा स[8]-सेन इति सर्व-तः ॥२७॥ [२७
२९] प्रीतो नाम ततो भूत्वा भृत्यानां त्वम् अरिं-दम ।
भोगांश् च परि-बर्हांश् च कामान् वसु च दापय ॥२८॥ [२८
३०] ततो माल्यानि वासांसि वराऽन्नम् अनु-लेपनम् ।
पेयं च दत्त्वा योधेभ्यः स्वयं च मुदितः पिब ॥२९॥ [२९
३१] ततोऽस्मिन् बहुली-भूते कौलीने सर्व-तो गते ।
N] भक्षितः सम्-अरे रामो राक्षसैर् इति वि-श्रुते ॥३०॥ [३०
प्र-विश्याऽऽश्वास्य चा[9]ऽपि त्वं सीतां रहसि पार्थिव ।

१. रा$_1$-सीता वाऽऽदान० ॥ २. ल$_1$ ल$_2$ ब श्र प्र-अनर्हजिह्वः । ३. रा$_1$-०कर्णो विमर्दनः ॥ ४. रा$_1$-वयं ॥ ५. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब श्र प्र रा$_2$-यस्य नास्ति मनुष्येषु सदृशो राक्षसोत्तम ॥ ६. ल$_2$-वादितः । ७. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ म-गृही० ॥ ८. म-ससैन्य ॥ ९. रा$_1$-चापि ।

३२] वर-मा[1]ल्यैश् च कामैश् च रत्नैश् चैतां प्र-लोभय ॥३१॥ [३१
अनयोप-धया राजन् भयशोकाऽवरुद्धया ।
३३] अ-कामा वश-गा सीता नष्ट-[2]नाथा भविष्यति ॥३२॥ [३२
रञ्जनीयं हि भर्तारं वि-नष्टम् अव-[3]गम्य सा ।
३४] वै-राग्यात् स्त्री-लघुत्वाच् च त्वद्-वशं प्रति-पत्स्यते ३३॥ [३३
सा पुरा सुख-संवृद्धा सुखाऽर्हा दुःख-कर्षिता ।
३५] त्वय्य् अ-दृष्टं सुखं ज्ञात्वा स[4]र्वथोप-गमिष्यति ॥३४॥ [३४
एतत् सु-नीतं हि वचो ममाऽद्य
रामं हि दृष्ट्वैव भवेद् अन्-अर्थः ।
इहैव ते मेत्स्यति मो[5]त्-सुको भूर्
३६] म[6]हान् अ-युद्धेन सुखस्य लाभः ॥३५॥ [३५
अदृष्टसैन्यो ह्य् अन्-अवाऽऽप्तसंशयो
रिपू[7]न् अ-युद्धेन जयेज् जनाऽधिपः ।
यशश् च पुण्यं च महीं च भू-पतिः
३७] श्रियं च कीर्तिं च चिरं सम्-अश्नुते ॥३६॥ [३६

इत्यार्षे रामायणे यु[8]द्ध-काण्डे महोदर-वाक्यं नाम
त्रिचत्वारिंशः सर्गः ॥४३॥

---

१. म-धनधान्यैश् ॥ २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-तव नाथ ॥ ३. प्र रा$_2$ फ-अधिगम्य ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब-सर्वशोथाग० ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब प्र फ-सोत्सुको । ६. रा$_1$ ल$_1$ ल$_2$ ब-महाहेयु० ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-रिपूंश्च यु० ॥ ८. ब प्र रा$_2$-लंकाकाण्डे ॥

स तथोक्तो विनिर्-भर्त्स्य कुम्भ-कर्णो महोदरम् । [१पू
१] आ-ददे नि-शितं शूलं शत्रु-शोणित-रञ्जितम् ॥१॥ [१८उ
सर्व-कालाऽऽयसं दीप्तं तप्त-काञ्चन-भूषणम् ।
२] इन्द्राऽशनि-समं घोरं वज्रे-प्रतिम-गौरवम् ॥२॥ [१९
देव-दानव-दर्प-घ्नं यक्ष-गन्धर्व-सूदनम् ।
N] रक्त-माल्याऽम्बर-धरं शिखा-प्रोद्दीप्त-पावकम् ॥३॥ [२०
३उ] आ-दाय नि-शितं शूलं शत्रु-शोणित-रञ्जितम् ।
कुम्भ-कर्णो महा-तेजा रावणं वाक्यम् अब्रवीत् ॥४॥ [२१
४] गमिष्याम्य् अहम् एवैकस् तिष्ठत्व् इह बलं तव ।
N] अद्य तान् क्षुधितः कोपाद् भक्षयिष्यामि वानरान् ॥५॥ [२२
अहं तेऽद्य भयं घोरं वधात् तस्य दुर्-आत्मनः ।
५] रावणैतत् प्र-मार्जामि निर्-वैरस् त्वं सुखी भव ॥६॥ [२
गर्जन्ति न वृथा शूरा निर्-जला इव तोय-दाः ।
६] पश्य सं-पाद्यमानं वै गर्जितं युधि कर्मणा ॥७॥ [३
नाऽमर्षयन्त्य् आत्मनो ये ते न सं-भावयन्त्य् उत ।
७] अमर्षयित्वा शूरास् तु कर्म कुर्वन्ति दुष्-करम् ॥८॥ [४
वि-क्लवानाम् अ-बुद्धीनां राज्ञां(?ज्ञः) पण्डित-मानिनाम् ।
८] शृण्वतां(?तो) व्या-हृतम् इदं त्वद्-विधानां महोदर ॥९॥ [५
युद्धे का-पुरुषैर् नित्यं भवद्भिः प्रिय-वादिभिः ।
९] राजानम् अनु-वर्तद्भिः कृत्यम् एतद् वि-नाशितम् ॥१०॥ [६
कृच्छ्राऽवस्था कृता लङ्का क्षीणः कोशो बलं हतम् ।

---

१. म-०भूषितं । २. फ-अत आरभ्य षष्ठश्लोकस्य प्रथमपादं यावन्नास्ति ॥ ३. रा$_2$-शिखास्फूर्जितपा० ॥ ४. रा$_2$-क्षुधितः ॥ ५. म-रामं च प्रमथिष्यामि ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब-तथा ॥ ७. फ-संभाषयंत्य् ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र म-शृण्वतामाहृतम् ॥

१.०] राजानम् एनम् आ-साद्य सुहृच्-चित्तम् इवाऽर्पितम् ॥१.१॥ [७
एष निर्-याम्य् अहं युद्धम्[1] उद्-यतः शत्रु-निग्रहे[2] ।
१.१.] दुर्[3]-णयं भवताम् अद्य समी-कर्तुं[4] महाऽऽहवे ॥१.२॥ [८
एवम् उक्तवतो वाक्यं कुम्भ-कर्णस्य धी-मतः ।
१.३] प्रत्य्-उवाच ततो वाक्यं प्र-हसन् राक्षसेश्वरः ॥१.३॥ [९
महोदरोऽयं रामस्य परि-त्रस्तो न सं-शयः ।
१.४] न हि रोचयते तात युद्धं युद्ध-विशारद ॥१.४॥ [१.०
न कश्-चित् त्वत्-समो ह्य्[4] अस्ति सौहृदेन[5] बलेन च ।
१.५] गच्छ शत्रु-वधाय त्वं कुम्भ-कर्ण जयाय च ॥१.५॥ [१.१.
बलैः[6] परि-वृतो भ्रातः कर्तव्यं वचनं च[7] मे । [२३पू
१.६] अ-सहायस्य गमनं मम बुद्ध्या न रोचते ॥१.६॥ [N
वानरा हि महाऽऽत्मानः शीघ्राश् च व्यव-सायिनः । [२३उ
१.७] एकाकिनं प्र-मत्तं[8] च गमयेयुर् हि सं-शयम् ॥१.७॥
तस्मात् त्वं[10] रामं दुर्[9]-धर्षं सैन्यैः परि-वृतो व्रज ।
१.८] अ-हितं राक्षसानां त्वं शत्रु-पक्षं नि-षूदय ॥१.८॥ [२४
अथाऽऽसनात् समुत्-पत्य मणिं सूर्य-सम-प्रभम् ।
१.९] आ-बबन्ध महा-तेजाः कुम्भ-कर्णस्य मस्तके ॥१.९॥ [२५
अङ्ग-दान्य् अङ्गुलीयानि[11] कवचं च महा-धनम्[12] ।
२०] हारं च शशि-सङ्काशं स बबन्ध महाऽऽत्मनः ॥२०॥ [२६
दिव्यं सु-गन्धं माल्यं[13] च[13] रत्नानि वि-विधानि च ।
२१.] गात्रेषु योजयामास कुण्डले च महा-भुजः ॥२१॥ [२७

---

१. ल₁ ल₂-युद्धे । २. ल₁ ल₂ ब-०विग्रहे । ३. रा₁ ल₁ ल₂ ब-दुर्जयं ॥ ४. म-नास्ति । ५. रा₁ प्र फ म-पौरुषेण ॥ ६. म-सैन्यैः । ७. ल₁ ल₂ ब-न ॥ ८. प्र-प्रमत्ताश्च ॥ ९. रा₂ फ म-परमदु० ॥ १०. रा₂ म-रावणः ॥ ११. प्र-०लीयाश्च । १२. म-महादृढं ॥ १३. रा₂-माल्यांश्च । म-माल्यानि ॥

काञ्चनाऽङ्गदकेयूरो　　निष्क-प्रवर-भूषणः　　।
२२] कुम्भ-कर्णो महा-बाहुर् हुतोऽनल इवाऽऽबभौ ॥२२॥ [२८
श्रोणि-सूत्रेण　महता　काञ्चनेन　वि-राजता　।
२३] अमृतोत्पादने　नद्धो　भुज-गेनेव　मन्दरः　॥२३॥[1] [२९
स　काञ्चनं　भार-सहं[2]　वि-मानं[2]
विद्युत्-प्रभं दीप्तम् इवाऽऽत्म-भासा ।
आ-बध्यमानः[3]　कवचं　बभासे
N]　　　सन्ध्याऽभ्रे[4]-संवीत　इवाऽद्रि-राजः ॥[5]२४॥[1] [३०
सर्वाऽऽभरण-पुष्टाऽङ्गः　शूल-पाणिः　स　राक्षसः　।
२४] वि-क्रमाय कृतोत्साहो नारायण इवाऽऽबभौ ॥२५॥ [३१
स रावणं　परि-ष्वज्य　कृत्वा　चाऽपि[6]　प्र[6]-दक्षिणम् ।
२५] प्र-णम्य शिरसा चैव सम्प्र-तस्थे महा-बलः ॥२६॥ [३२
तस्य　सूतो　रथं　दिव्यं　नवं[7]-नल्वं　प्रमाण-तः　।
२६] युक्तं　खर-सहस्रेण　युद्ध[8]-ध्वज-विभूषितम्　॥२७॥ [N
महा-जलद-निर्घोषं　　कैलाश[9]शिखरोपमम्　　।
२७] अष्ट-चक्रं　महा-वेगम्　उप-नीय　महा-रथम्　॥२८॥ [N
जयाऽऽशिषा वर्धयित्वा वि-नीतः प्राऽञ्जलिः स्थितः ।
२८] स तम् आ-रुह्य च ययौ मेघ-गम्भीर-निस्वनम् ॥२९॥ [N
सोऽति-कायो　महा-तेजा　रथस्योपरि　राक्षसः　।
N] गन्धर्वनगराऽऽकारः　प्रगृहीताऽऽयुधो　बभौ　॥३०॥ [N
तम्　आशीभिः　प्रसन्नाभिः[10]　प्रेषयामास　रावणः　। [N
२९] शङ्ख-दुन्दुभि-निर्घोषैः सैन्यैश् चाऽत्र वराऽऽयुधैः ॥३१॥

---

१. रा१-नास्ति ॥ २. म-भारसहस्रनिर्मितं । ३. ल१ ल२ ब अ प्र रा२ फ-०मानं । ४. म-०भ्रपीताभ । ५. म-अतः परं सर्गसमाप्तिः— इति रामायणे लंकाकाण्डे आभरणप्रदायको नाम सर्गः ॥ ६. ल१ ब अ म-चाभिप्र० । प्र-वाभिप्र० । रा२-वाग्भिः प्र० ॥ ७. रा२ फ-पंचनल्वं । ८. रा१ ल१ ल२ ब-युधि ध्वज० ॥ ९. रा१ ल१ ल२ ब अ प्र-कैलास० ॥ १०. म-प्रशस्ताभिः ॥

तं गजैश् च चतुर्-दन्तैः स्यन्दनैश् चाऽम्बुद-स्वनैः । [३४
३०] अन्व्-अगच्छन् महाऽऽत्मानं रथिनो रथिनां वरम्॥३२॥ [३५
नागोष्ट्र-खर-हस्त्य्-अश्व-सिंह-द्वीपि-मृग-द्विजैः ।
N] अनु-जग्मुर् महाऽऽत्मानं देव-दानव-दुर्जयम् ॥३३॥ [३६
स पुष्प-वर्षैर् अव-कीर्यमाणो
धृताऽऽतपत्रः शित-शूल-पाणिः ।
मदोत्कटः[1] शोणित-पीन[2]-मत्तो
३१] विनिर्-ययौ राक्षस-योध-मुख्यः॥[3]३४॥ [३७
निष्-पतन्तं महा-नादं महा-कायं महा-बलम् । [३३पू
३२] अन्व्-अयू राक्षसा घोरा भीमाऽक्षं शस्त्र-पाणयः॥३५॥ [३८उ
राक्षसाश् च महा-काया नीलाऽञ्जनचयोपमाः ।
३३] शूलान्य् उद्-यम्य खड्गांश् च वि-विधांश् च परश्वधान् ३६ [३९
बहु-व्यामांश् च परि-घान् गदाश् च मुशलानि[4] च ।
३४] साल-स्कन्धांश् च वि-विधान् छत-घ्नीश् च दुरा-सदाः ३७ [४०
स पुर-द्वारम् आ-साद्य राक्षसो घोर-दर्शनः । [N
३५] निष्-पपात महा-तेजाः कुम्भ-कर्णः प्रताप-वान् ॥३८॥ [४१
धनुः-शत-परीणाहः षड्-बाण-शतम् उच्-छ्रितः ।
३६] रौद्रः शकटचक्राऽक्षो गिरिशृङ्गोपमो[5] महान् ॥३९॥ [४२
सन्नि-पत्य[6] स रक्षांसि दग्धशैलोपमो बली ।
३७] कुम्भ-कर्णो महा-वक्त्रः प्र-हसन् वाक्यम् अब्रवीत् ॥४०॥ [४३
अद्य[7] वानर-मुख्यानां तानि यूथानि भाग-शः ।

---

१. श्र रा$_2$ फ म-महोत्कटः । २. म-०तगंधमत्तो । ३. अतः परमधिकः पाठः—रा$_2$-पदातयश्च बहवो महाकाया महाबलाः ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब श्र-मुसुलानि । प्र म-मुसलानि ॥ ५. प्र फ म-गिरिकूटोपमो । रा$_2$-चित्रकूटोपमो ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब-सन्निपात्य ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब श्र-एष । प्र-अथ ।

३८] निर्-दहिष्यामि सं-क्रुद्धः शलभान् इव पावकः ॥४१॥ [४४
N] सर्वे राम-सहायाश् च ये चाऽन्ये मम शत्रवः । [N
नाऽप-राध्यन्ति मे कामं वानरा वन-चारिणः ।
३९] जातिर् [1]एतद्-विधानां [2]सा पुरोद्यान-वि[3]दूषणम् ॥४२॥ [४५
पुर-रोधस्य मूलं तु राघवः सह-लक्ष्मणः ।
४०] हते तस्मिन् हतं सर्वं तं हनिष्यामि सं-युगे ॥४३॥ [४६
एवं तस्य ब्रुवाणस्य कुम्भ-कर्णस्य [4]राक्षसाः ।
N] नादांश् चक्रुर् महा-घोरान् कम्पयन्त इवाऽर्णवम् ॥४४॥ [४७
तस्य निष्-पततः पुर्याः कुम्भ-कर्णस्य रक्षसः ।[5]
४१] बभूवुर् घोर-रूपाणि निमित्तानि समन्त-तः ॥४५॥ [४८
शुष्काऽशनि-युता मेघा वि-चेरुर् गर्दभाऽरुणाः ।
४२] स-सागर-वना चैव वसु-धा सम्-अकम्पयत् ॥४६॥ [४९
घोर-रूपाः शिवा नेदुः स-ज्वाल-कवलैर् मुखैः ।
४३] मण्डलान्य् अप-सव्यानि बबन्धुश् च विहं-गमाः ॥४७॥ [५०
नि-[6]पपात च गृध्रोऽस्य रथस्योपरि गच्छतः ।
४४] [7]अस्फुरन् नयनं चाऽस्य सव्यो बाहुर् अकम्पत ॥४८॥ [५१
गगनान् निष्-पपातोल्का ज्वलन्ती भीम-नि[8]स्वना ।
४५] आदित्यो निष्प्र-भश् चाऽऽसीत् प्र-ववौ न च मारुतः ॥४९॥ [५२
अ-चिन्तयन् महोत्पातान् उत्थि(द्-स्थि)तान् जीविताऽन्तकान्
४७] निर्-ययौ कुम्भ-कर्णः स कृताऽन्त-बल-नोदितः ॥५०॥ [५३
स निष्-क्रम्य पुर-द्वारात् कुम्भ-कर्णो महा-बलः ।

---

१. रा$_2$ फ-अस्मद्वि° । २. रा$_1$ ल$_1$ ल$_2$ ब श्र-सपुरो° । प्र-°बिभीषणं । रा$_2$ फ म-°विभूषणं । ३. अतः परमधिकः पाठः—रा$_2$-पातश्चास्मद्विधावाशु वानराणां पुरःसरः ॥ ४. प्र रा$_2$-रक्षसः ॥ ५. ब श्र म-नास्ति ॥ ६. म-°पाताथ । ७. रा$_2$ फ म-प्रास्फुरत् ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब श्र-भीमदर्शना ॥

४८] शारदाऽभ्र-घन-प्रख्यं वानराऽनीकम् अद्भुतम् ॥५१॥[1] [५४
तं दृष्ट्वा वानर[2]-श्रेष्ठा राक्षसं पर्वतोपमम् ।
N] वायु-नुन्ना यथा मेघा जग्मुः सर्वा दिशस् तदा[3] ॥५२॥[4] [५५
विपुलपरिघ-वांस् तु कुम्भ-कर्णो
रिपु-निधनाय विनिः-सृतो महौजाः ।
कपि-गण-भयम् आ-चरन् सु-तीव्रं
N] प्र-भुर् इव किङ्करदण्ड-वान् युगाऽन्ते ॥५३॥ [५८

इत्यार्षे रामायणे युद्ध[5]-काण्डे कुम्भकर्ण-निर्याणं[6] नाम
चतुश्चत्वारिंशः सर्गः ॥ ४४ ॥

[वं–४५]= [पञ्चचत्वारिंशः सर्गः] =[दा–६६]

स ननाद महा-नादं सम्-उद्र इव पर्वणि ।
२] जनयन्न् इव निर्-घातं[7] कम्पयन्न् इव मेदिनीम्[8] ॥१॥ [२
तम् अ-वध्यं मघ-वता यमेन वरुणेन च ।
३] प्रेक्ष्य भीमाऽक्षम् आ-यान्तं[9] वानरा विप्र-दुद्रुवुः ॥२॥ [३

---

१. अतः परमधिकः पाठः—रा२-वानरान्वीक्ष्य संहृष्टो ननाद विकृतं स्वनं ॥ २. ल१ ल२ ब-राक्षसश्रेष्ठ वानराः । ३. अ रा२ फ-तथा । ४. अतः परमधिकः पाठः—रा२-तं तस्य नादं तुमुलं निशम्य यथा निनादं दिवि वारिदस्य । पेतुर्धरण्यां बहवः प्लवंगा निकृन्तमूला इव शालवृक्षाः ॥ कृच्छ्रेण तु समाश्वस्य संगम्य तु परस्परं । वृक्षाद्रिहस्ता हरयः संग्रामं प्रतितस्थिरे ॥ ५. ब प्र रा२-लंकाकाण्डे । फ म-युद्धपर्वणि । ६. रा२ फ-०निर्याणो ॥ ७. अ रा२-०वातं । ८. रा२ फ म-पर्वतान् ॥ ९. फ-भीममनुयान्तं ॥

तं[1] दृष्ट्वा वानर[2]-श्रेष्ठा राक्षसं पर्वतोपमम् ।
N] वायु-क्षिप्ता यथा मेघा ययुः सर्वा दिशस् तदा ॥३॥ [N
तद् वानराऽनीकम् अति-प्रचण्डं
दिशो द्रवद् भिन्नम् इवाऽभ्र-जालम् ।
स कुम्भ-कर्णः प्रसैम्[3]-ईक्ष्य हर्षान्
N] ननाद भीमं घन-वद् घनाऽऽभः ॥४॥[5] [N
तांस् तु वि-द्रवतो दृष्ट्वा राज-पुत्रोऽङ्ग-दोऽब्रवीत् ।
४] गवाऽक्षं गवयं नीलं कु-मुदं च महा-बलम् ॥५॥ [४
आत्मानम् अभिसं-स्मृत्य वीर्याण्य् अभि-जनानि च ।
५] क्व गच्छथ भय-त्रस्ताः प्राकृता हरयो यथा ॥६॥ [५
६पू] सर्वे सौम्या नि-वर्तध्वं किं प्राणान् परि-रक्षथ ।
८उ] नाऽलं युद्धाय वै रक्षो महतीऽयं वि-भीषिका ॥७॥ [६
महतीम् उत्थि[7](द्-स्थि)ताम् एतां वानराणां वि-भीषिकाम् ।
९] वि-क्रमाद् वि-धमिष्यामो नि-वर्तध्वं प्लवं-गमाः ॥८॥ [७
कृच्छ्रेण महता स्व-स्थाः सं-स्तभ्य च परस्परम् ।
१०] शिला-पादप-हस्तास् ते तस्थुः संग्राम-मूर्धनि ॥९॥ [८
ते प्र-हृष्टा नि-वृत्तास् तु स-मदा इव कुञ्जराः ।
११] नि-जघ्नुः परम-क्रुद्धाः कुम्भ-कर्णं वनौकसः ॥१०॥ [९
प्रांऽशुभिः साल-तालैश् च शिलाभिश् च महा-बलाः ।
१२] पाद-पैः पुष्पिताऽग्रैश् च हन्यमानो न चुक्षुभे ॥११॥ [१०
ततः पर्वतम् उत्-पाट्य द्वि-विदः प्लवगर्षभः ।
१३] दुद्राव ज्वलनाऽऽकारो राक्षसं सु-महाबलम् ॥१२॥ [N

---

१. रा$_2$ फ-न्ते । २. फ-वानराः श्रेष्ठा ॥ ३. रा$_2$ फ म-समवेक्ष्य । ४. रा$_2$ म-नादं । ५. अतः परमधिकः पाठः—रा$_2$ फ म-ततस्तु घोरं निनदं निशम्य यथाहवे दानवसंप्रमुक्तम् । पेतुर्धरण्यां बहवः प्लवङ्गा निकृत्तमूला इव शालवृक्षाः ॥ ६. म-शरभं ॥ ७. फ-उच्छ्रितां ॥ ८. प्र रा$_2$ फ म-बध्यमानो । ९. रा$_1$ ल$_1$ ल$_2$ ब श्म म-चक्षमे ॥

स तं महामेघ-निभं चिक्षेप प्लवगर्षभः[1] ।
१.४] तम् अ-प्राऽऽप्य महा-कायं तस्य[2] सैन्ये[3] पपात ह ॥१.३॥ [N
तस्य गात्रेषु पतिता भिद्यन्ते वि-पुलाः शिलाः ।
१.५] पाद-पाः पुष्पिताऽग्राश् च भग्नाः[3] पेतुर् मही-तले ॥१.४॥ [१.१
स हि सैन्यानि सं-क्रुद्धो द्रावयामास[4] राक्षसैः[5] ।
१.६] ममन्थ परभाऽऽयस्तो वनान्य्[6] अग्निर् इवोत्थि(द्-स्थि)तः १.५ [१.२
वानरास् तु सु-संक्रुद्धा गिरि-शृङ्गैर्[7] महा-बलाः ।
१.७] राक्षसानाम् अनीकानि विनि-जघ्नुः[8] सहस्र-शः ॥१.६॥ [N
तच् शैलवेगाऽभिहतं[9] हताऽश्वरथवारणम् ।
१.८] रक्षो-रुधिर-संक्लिन्नं[10] बभूवाऽऽयोधनं[11] महत् ॥१.७॥ [N
रथिनो वानरेन्द्राणां शरैः कालाऽन्तकोपमैः ।
१९] शिरांसि सहसा जघ्नुर् नदन्तो भीम-निःस्वनाः ॥१.८॥ [N
वानराश् च महाऽऽत्मानः समुत्-पाट्य महा-द्रुमान् ।
२०] रथिनश् च गजान् उष्ट्रान् राक्षसांश् चाऽप्य् अमृदयन् १.९ [N
लोहिताऽऽर्द्रास् तु बहवः शेरते वानरर्षभाः ।
२१] निर्-अस्ताः पतिता भूमौ ताम्र-पुष्पा इव द्रुमाः ॥२०॥ [१.३
वध्यमानास् ततो[12] वीरा राक्षसेन जघन्य-तः । [१.५उ
२२] सागरं[13] येन सं-तीर्णाः[13] पथा तेनैव दुद्रुवुः ॥२१॥ [१६
ते स्थलान्य् अथ निम्नानि विषण्ण-वदना भृशम् । [१.७पू
२३] लङ्घयन्ति स्म[14] धावन्तो निर्-अपेक्षाः प्लवं-गमाः ॥२२॥ [१४

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-प्लवगाधिपः । २. रा$_1$ ल$_1$ ल$_2$ ब-सर्वसैन्ये ॥ ३. रा$_1$ ल$_1$ ल$_2$ ब अ रा$_2$-तस्य ॥ ४. म-वानराणा महौजसां । ५. रा$_2$-०मास्त्रज्ञो । ६. रा$_2$-बलवान् ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब-०शृङ्गा । ८. रा$_2$-०जग्मुः ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-तद्वायुवेगा० । १०. प्र रा$_2$ फ-०संक्लेदं । ११. रा$_2$-बभौ च यो० ॥ १२. रा$_2$ म-तु ते । १३. अ रा$_2$-सागरो येन संतीर्णः ॥ १४. रा$_2$-समुद्रस्य ॥

के-चित् सम्-उद्रे[१] पतिताः के-चिद्[२] गगनम् आ[३]-श्रिताः । [१९पू
२४] के-चिद् वृक्षान् समा-रूढा ममज्जुः के-चिद् अर्णवे ॥२३॥ [१८पू
के-चिद् गिरीन् आ-रुरुहुर् गुहाः के-चित् समा-श्रिताः । [१७उ
२५] नि-पेतुर् वानराः के-चित् के-चिन् नैवाऽव-तस्थिरे॥२४॥[१८उ
सैम्-ईक्ष्यैवाऽङ्ग-दो भग्नान् वानरान् इदम् अब्रवीत् । [१९उ
२६] सं-तिष्ठध्वं हि[४] युध्यामो वि-द्रुताश् च हताश् च ये ॥२५॥
भग्नानां वो न पश्यामि परि-गम्यां महीम् इमाम् ।
२७] स्थानं सर्वे नि-वर्त्या[५]ऽऽशु युध्यध्वं वानरोत्तमाः ॥२६॥ [२०
२८उ] निर्-आयुधानां द्रवतां समं गमन-चेतसाम् ।
स्त्रीणाम् औपयिकम् त्रासः सर्वेषां वो जघन्य-तः[६] ॥२७॥ [२१
२९] कुलेषु जाताः सर्वे स्मो वि-स्तीर्णेषु महत्सु च । [२२पू
अन्-आर्यं[७] खलु यद् भीतास् त्यक्त्वा युद्धं पलायथ ॥२८॥ [२३
३०] वि-कत्थितानि वो यानि गर्जित्वा जन-संसदि ।
तानि वः क्वाऽद्य यातानि सोर्दग्राणि[८] गतानि च ॥२९॥[२४
३१] भीरोः[९] प्र-वादाः श्रूयन्ते न स[१०] जीवति धिक्-कृतः ।
मार्गं सत्-पुरुषैर् जुष्टं सेवामस् त्यज्यतां[११] भयम् ॥३०॥ [२५
३२] स्वप्स्यामो वाऽद्य नि-हताः पृथिव्यां त्यक्त-जीविताः । [२६पू
अवाऽऽप्स्यामोऽथवा कीर्तिं नि-हत्वा शत्रुम् आहवे । [२७पू
३३]दुष्पाऽऽपं ब्रह्म-लोकं वा प्राऽऽप्स्यामो युधि निर्-जिताः ३१[२६उ
न कुम्भ-कर्णः काकुत्स्थं दृष्ट्वा जीवितुम्[१२] अर्हति[१२] ।

---

१. रा$_2$ फ-समुद्रं । २. प्र रा$_2$ फ म-गगनं केचिदाश्रिताः ॥ ३. रा$_2$-स पश्यंश्चांगदो । ४. रा$_1$ ल$_1$ ल$_2$ ब-च ॥ ५. रा$_2$-०र्त्याथ ॥ ६. रा$_2$ फ-०न्यजः ॥ ७. प्र रा$_2$ फ म-वीर्यं ॥ ८. ल$_1$ ल$_2$ ब-क्षुद्रप्राणि ॥ ९. रा$_2$ फ म-भीरुप्र० । १०. रा$_2$-स्म जीवन्ति धिक्कृताः । ११. रा$_1$ ल$_1$ ल$_2$ ब-त्यजतां ॥ १२. रा$_2$ फ-जीवनमिष्यति ।

३४] दीप्यमानं समा-साद्य पतं-गो ज्वलनं यथा ॥३२॥ [२८
पलायनेन स्वान् प्राणान् यदि रक्षामहे वयम् ।
३५] एकेन बहवो भग्ना यशो नोऽद्य वि-नङ्क्ष्यति ॥३३॥ [२९
एवं ब्रुवाणं तं शूरम् अङ्ग-दं वानरर्षभाः ।
३६] द्रवमाणास् तदाऽन्योऽन्यम् ऊचुः शूर-विगर्हितम् ॥३४॥ [३०
कृतं नः कदनं घोरं कुम्भ-कर्णेन रक्षसा ।
३७] न स्थान-कालो गच्छामो दयितं[1] जीवितं हि नः ॥३५॥ [३१
एतावद् उक्त्वा प्लव-गाः सर्वे ते भेजिरे दिशः ।
३८] भीमं भीमाऽक्षम् आ-यान्तं दृष्ट्वा राक्षसम् आ-हवे ॥३६॥ [३२
द्रवमाणास् तु ते त्रासाद् अङ्ग-देन बली-मुखाः ।
३९] सान्त्वैश् चैवाऽनु-मानैश् च सर्वे ते विनि-वर्तिताः ॥३७॥ [३३
ततः पुनर् हरि-वृषभा महौजसस्
तदा बृहच्-छिखरिशिलाद्रुमाऽऽयुधाः ।
युयुत्सवः समुदित-भीम-विक्रमा
N] व्यव-स्थिताः पर-बल-दर्प-नाशनाः ॥३८॥[2] [N

इत्यार्षे रामायणे युद्ध[3]-काण्डे वानर-समा[4]श्वासो नाम
पञ्चचत्वारिंशः सर्गः ॥४५॥

---

१. रा$_2$-दीयतां ॥ २. प्र-नास्ति ॥ ३. ब प्र-लंका० । म-युद्धपर्वणि ।
४. म-कुम्भकर्णयुद्धे रावणाश्वासनो ॥

[वं-४६]= [षट्चत्वारिंशः सर्गः] =[दा-६७]

ते नि-वृत्ता महा-कायाः श्रुत्वाऽङ्गद-वचस् तदा ।
१] नैष्ठिकीं बुद्धिम् आ-स्थाय सर्वे सङ्ग्राम-काङ्क्षिणः ॥१॥ [१
समुदीरित-वीर्यास् ते समारोपित-विक्रमाः ।
२] पर्यव-स्थापिता वाक्यैर् अङ्ग-देन प्लवं-गमाः ॥२॥ [२
चक्रुर् युद्धं सु-तुमुलं वानरास् त्यक्त-जीविताः ।
३] प्र-हर्षाद् आगतोत्साहा मरणे कृत-बुद्धयः ॥३॥ [३
अथ वृक्षान् महा-कायाः शृङ्गाणि सु-महान्ति च ।
४] वानरास् तूर्णम् उत्-पाट्य कुम्भ-कर्णम् उपाऽद्रवन् ।४ [४
तान् समा-पततो दृष्ट्वा कुम्भ-कर्णः प्रताप-वान् ।
५] व्यू-अद्रावयत् सु-संरब्धो मेघान् इव सदा-गतिः ॥५॥ [N
ततस् तु तं महा-वीर्यं दश वानर-यूथपाः ।
६] शिलाः प्रोद्-यम्य वि-पुलाः कुम्भ-कर्णम् उपाऽद्रवन् ॥६॥ [N

---

१. म-ययुर् ॥ २. म-च म० । ३. म-उद्यम्य ॥ ४. फ म-सुसंक्रुद्धो । ५. अतः परमधिकः पाठः—म-कुम्भकर्ण तदा दृष्ट्वा गदापाणिर्विभीषणः । ननाम चरणौ तस्य भ्रातुर्ज्येष्ठस्य बुद्धिमान ॥ विभीषणोऽहं भ्रातर्मे दयां कुरु महामते । रावणस्तु मया भ्राता बहुधा परिबोधितः ॥ सीतां देहीति रामाय रामः साक्षाज्जनार्दनः । न शृणोति च मां हंतुं खड्गमुद्यम्य चोक्तवान् ॥ धिक् त्वां गच्छेति मां हत्वा तदाहं वाग्भिराहतः । चतुर्भिर्मंत्रिभिः साकं रामं सुशरणमागतः ॥ तच्छ्रुत्वा कुम्भकर्णोऽपि ज्ञात्वा भ्रातरमागतम् । समालिङ्ग्य च वत्स त्वं जीव रामपदाश्रयः ॥ कुलस्य रक्षणार्थाय राक्षसानां हिताय च । महाभागवतोऽसि त्वं पुरा मे नारदाच्छ्रुतम् ॥ गच्छ तात ममेदानीं दृश्यते न च किंचन । मदीयश्चापरो वापि मदमत्तविलोचनः ॥ इत्युक्तोऽश्रुमुखो भ्रातुश्चरणावभिवाद्य सः । रामपार्श्वमुपागम्य चिंतापर उपस्थितः ॥ कुम्भकर्णोऽपि हस्ताभ्यां पादाभ्यां पेषयन् हरीन् । चचार वानरीं सेनां कलयन् गंधहस्तिवत् ॥ ६. प्र फ म-शिलाश्चोद्यम्य ॥

अङ्ग-दः कु-मुदो नीलो गवाऽक्षो गवयो हरिः ।
७] मैन्दश् च द्वि-विदश् चैव जाम्ब-वान् वि-नतस् तथा ।
युगपत् प्राऽहरन् सर्वे कुम्भ-कर्णं महा-बलाः ॥७॥ [N
८] तस्य गात्रे विनिर्-भिन्नाः शिलाः शैल-निभास् तदा ।
ध्वजं रथं शरांश् चैव सूतं चैव न्य्-अपातयन् ॥८॥[2] [N
९] सोऽव-प्लुत्य रथाद् वीरो गदाम् उद्-यम्य स-त्वरः ।
वेगेनाऽभ्युत्-पपाताऽऽशु पक्ष-वान् इव पर्वतः ॥९॥ [N
१०] स कुम्भ-कर्णः सं-क्रुद्धो गदाम् उद्-यम्य वीर्य-वान् ।
अर्दयन्[3] सु-महातेजाः समन्ताद् वि-क्षिपन् गिरीन् ॥१०॥ [५
११] शतानि सप्त चाऽष्टौ च सहस्रं चाऽपि[4] वानराः ।
प्र-कीर्णाः शेरते भूमौ कुम्भकर्ण-निपातिताः ॥११॥[5] [६
१२] षोडशाऽष्टौ च दश च त्रिंशद् विंशच् च वानरान् ।
१३पू] सम्परि-ष्वज्य बाहुभ्यां निष्-पिपेष स राक्षसः ॥१२॥ [७
१४उ] हनु[6]-मान् शैल-शृङ्गाणि शत[7]-शोऽथ सहस्र-शः[8] ।
ववर्ष कुम्भ-कर्णस्य शरीरे वानरर्षभः ॥१३॥ [१५
तानि पर्वत-शृङ्गाणि शूलेन परमाऽऽहवे ।
१५] बिभेद परमाऽऽयस्तः कुम्भ-कर्णो मदोत्कटः[9] ॥१४॥ [१६
ततो हरीणां तद् अनीकम् उग्रं
दुद्राव शूलं नि-शितं प्र-गृह्य ।
तस्थौ च तस्याऽऽपततः पुरस्तान्
१६] महीधराऽग्रं हनु-मान् प्र-गृह्य ॥१५॥ [१७

---

१. ल१-तथा । २. प्र-नास्ति ॥ ३. रा१ ल१ ल२ ब श्र प्र-अदर्शयन् म० । रा२फ-०यन् स महा० । म-०यन् सुमहाकायः ॥ ४. रा२फ-वापि । ५. श्र-नास्ति ॥ ६. फ म-हनूमान् । ७. म-वृक्षांश्च विविधान्बहून् । प्र-"शतशः" इत्यारभ्य चतुर्दशश्लोकस्य प्रथमपादं यावन्नास्ति । ८. रा१ ल१ ल२ ब श्र-वानरस्तदा । म-तानि सर्वशः ॥ ९. ल१ ल२ब श्र रा२-महोत्कटः ॥

तम् आ-पतन्तं त्रिदशेन्द्र-शत्रुं
जघान शैलेन कपि-प्रवीरः ।
स चाऽपि तेनाऽभि-हतम् तरस्वी
१७] न चुक्षुभे काल-सम-प्रभावः ।।१६।।[2] [N
स शूलम् आ-विध्य[3] तडित्-प्रकाशं
गिरिं यथा प्रज्वलिताऽग्रशृङ्गम् ।
बाहु-अन्तरे मारुतिम् आ-जघान
१८] गुहोऽचलं क्रौञ्चम् इवाऽऽत्म-शक्त्या ।।१७।। [१९
स तेन[6] वीरोऽभि-हतः स्तनाऽन्तरे
सं-विह्वलः शोणितम् उद्-वमन् मुखात् ।
ननाद भीमं हनु-मान् महा-यशा
१९] यथा तपाऽन्ते जल-दो बलाहकः ।।१८।। [२०
ततो वि-नेदुः सहसा प्र-हृष्टा
रक्षो-गणास् तं[10] व्यथितं नि-शम्य ।
प्लवं-गमाश् चाऽपि तथा व्यथाऽऽर्ताः
२०] प्र-दुद्रुवुस् ते सहसा भयाऽऽर्ताः[11] ।।१९।। [२१
नीलश् चिक्षेप शैलाऽग्रं कुम्भ-कर्णाय[13] धी-मते । [२२उ
२१] तम् आ-पतन्तं सम्प्रेक्ष्य मुष्टिनाऽभि-जघान ह ।।२०।।
मुष्टि-प्रहाराऽभिहतं तच् छैलाऽग्रं व्य्-अशीर्यत । [२३
२२] स-विस्फुलिङ्गं स-ज्वालं नि-पपात च भू-तले ।।२१।। [२४

---

१. फ-समापतंस्तं । २. म- नास्ति ॥ ३. म-गिरेर् । ४. म-वै चलिता०। ५. अ फ-बह्वन्तरे ॥ ६. म-चापि तेनाभि० । ७. रा₁ रा₂ फ म-स वि० । ८. प्र रा₂ फ-सजलो । ६. म-बहूदकः ॥ १०. रा₂-ते । ११. रा₂ म-०सात्मभीताः फ-०सा यथार्ताः । १२. रा₁ ल₁ ल₂ ब अ प्र-शैलेन्द्रं । १३. म-रक्षसे ॥ १४. प्र-व्यदीर्यत । रा₂ फ-व्यकीर्यत । १५. प्र-महीतले । रा₂-च भूमुखे ॥

२३उ] ऋषभः शरभो नीलो गवाऽक्षो गन्ध-मादनः ।
पञ्च वानर-शार्दूलाः कुम्भ-कर्णम् उपाऽद्रवन् ॥२२॥ [२५
२४] शैलैर् वृक्षैस् तलैश् चाऽपि मुष्टिभिश् च महा-बलाः ।
कुम्भ-कर्णं महा-कायं सर्व-तोऽभ्य्-अहनन् दृढम् ॥२३॥ [२६
२५] सर्वैर् अपि प्र-वीरैस् तैर् हन्यमानो न विव्यथे ।
ऋषभं च महा-वेगं बाहुभ्यां परि-षष्वजे ॥२४॥ [२७
२६] कुम्भकर्ण-भुजाभ्यां च पीडितो वानरर्षभः ।
पपात भूमाव् ऋषभो मुखाद् आगत-शोणितः ॥२५॥ [२८
२७] मुष्टिना शरभं चाऽपि जानुना नीलम् आ-हवे ।
२८पू] आ-जघान गवाऽक्षं च तलेनेन्द्र-रिपुस् तदा । [२९
N] शरीरे मर्दितस् तत्र सु-गन्धाद् गन्ध-मादनः ॥२६॥
२८उ] एते[१०] प्रहार-व्यथिता मुमुहुः शोणितोक्षिताः । [३०
नि-पेतुश् चाऽपि मेदिन्यां नि-कृत्ता इव किं-शुकाः ॥२७॥
२९] तेषु वानर-मुख्येषु पतितेषु[११] महाऽऽत्मसु ।
वानराणां सहस्राणि कुम्भ-कर्णं प्र[१२]-दुद्रुवुः ॥२८॥ [३१
३०] तं शैलम् इव शैलाऽऽभाः परि-तः[१३] प्लवगर्षभाः ।
N] समा-रुरुहुर् उत्-पत्य नि-नदन्तो महा-बलाः ॥२९॥ [३२
तं नखैर् दशनैश् चैव जानुभिर् मुष्टिभिस् तलैः ।
३१] कुम्भ-कर्णं महा-कायं ते नि-जघ्नुः प्लवं[१४]-गमाः ॥३०॥ [३३
तैः स वानर-साहस्रैः परि-क्षिप्तः समन्ततः ।

१. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब म-०भ्यहरन् । २. म-भृशम् ॥ ३. रा$_{२}$फ-सर्वान् । ४. रा$_{२}$ फ म-प्रहारान् तान् मन्य० ॥ ५. रा$_{२}$ फ म-वानरोत्तमः । ६. प्र रा$_{२}$ फ म-ऋषभो भूम्यां ॥ ७. म-पनसं । ८. रा$_{२}$-वापि । ९. म-जानुभ्यां ॥ १०. प्र रा$_{२}$फ म-एतैः प्रहारैर्व्य० ॥ ११. प्र रा$_{२}$-पातितेषु । १२. प्र रा$_{२}$ फ-विदुद्रुवुः ॥ १३. प्र रा$_{२}$फ म-सर्वतः ॥ १४. प्र रा$_{२}$फ म-महाबलाः ॥ १५. रा$_{२}$-सहस्रशः ।

३२] रराज राक्षस-व्याघ्रो गिरिर् आत्म-रुहैर् इव ॥३१॥ [३४
बाहुभ्यां वानरान् सर्वान् आ-कृष्य स महा-बलः ।
३३] भक्षयामास सं-क्रुद्धो हरीन् पर्वत-सन्निभान् ॥३२॥ [३५
प्र-क्षिप्ताः कुम्भ-कर्णेन वक्त्रे पाताल-सन्निभे ।
३४] नासा-पुटाभ्यां निष्-पेतुः कर्णाभ्यां चैव वानराः॥३३॥ [३६
N] मर्दयन् पर्वताऽग्रैश् च प्र-हारै राक्षसर्षभः । [३७उ
मांस-शोणित-संक्लेदां कुर्वन् भूमिं स राक्षसः ।
३५] चचार हरि-सैन्येषु कालाऽग्निर् इव मूर्च्छितः ॥३४॥ [३८
वज्र-हस्तो यथा शक्रः पाश-हस्तो यथाऽन्तकः ।
३६] शूल-हस्तो बभौ तद्-वत् कुम्भ-कर्णो महाऽऽहवे ॥३५॥ [३९
यथा शुष्काण्य् अरण्यानि ग्रीष्मे दहति पावकः ।
३७] तथा वानर-सैन्यानि स ददाह महा-बलः ॥३६॥ [४०
ततस् ते वध्यमानास् तु हत-यूथा वि-नायकाः ।
३८] वानरा भय-संविग्ना वि-नेदुर् वि-स्वरं तदा ॥३७॥ [४१
ततो नि-पात्यमानास् तु कुम्भ-कर्णेन वानराः ।
३९] राघवाभ्यां समा-जग्मुर् व्यथाऽऽर्ता नष्ट-चेतसः ॥३८॥ [४२
तम् आ-पतन्तं सम्प्रेक्ष्य कुम्भ-कर्णं महा-बलम् ।
४०] उत्-पपात महा-वीरः सु-ग्रीवो वानरोऽधिपः ॥३९॥ [५२
स साल-वृक्षं सहसा समा-विध्य महा-कपिः ।
४१] अभि-दुद्राव वेगेन कुम्भ-कर्णं महा-बलम् ॥४०॥ [५३
तम् आ-पतन्तं सम्प्रेक्ष्य कुम्भ-कर्णो महा-बलः ।
N] तस्थौ विकृत-सर्वाऽङ्गो वानरेन्द्रं सम्-उत्सुकः ॥४१॥ [५४
कपिशोणित-दिग्धाऽङ्गं भक्षयन्तं महा-हरीन् ।
४२] कुम्भ-कर्णं स्थितं दृष्ट्वा सु-ग्रीवो वाक्यम् अब्रवीत् ॥४२॥ [५५

---

१. प्र. रा$_2$ फ म-राक्षसोत्तमः । २. म-नास्ति ॥ ३. ल$_1$ रा$_2$-०यूथवि० । फ-अत आरभ्य ३८-शश्लोकस्य प्रथमपादं यावन्नास्ति ॥ ४. प्र-वानरेश्वरः ॥ ५. प्र-महाकपीन् । म-महाबलः ॥

निहताः कपि-शार्दूलाः कृतं कर्म सु-दुष्करम् ।
४३] भक्षितानि च सैन्यानि प्राऽऽप्तं ते परमं यशः ॥४३॥ [५६
त्यजैतान् वानरान् सर्वान् किम् एभिर् दीन-चेष्टितैः ।
४४] सहस्वैकं नि-पातं मे साल-वृक्षस्य राक्षस ॥४४॥ [५७
तद् वाक्यं हरि-राजस्य सत्त्व-धैर्य-समन्वितम् ।
४५] श्रुत्वा राक्षस-शार्दूलः कुम्भ-कर्णोऽब्रवीद् वचः ॥४५॥ [५८
श्रुतः पौरुष-संपन्नः कस्माद् गर्जसि वानर । [५९उ
४७] कर्मणा दर्शयाऽऽत्मानं यावत् त्वां प्र-मथाम्य्[1] अहम् ॥४६॥ [N
स कुम्भ-कर्णस्य वचो निशम्य
व्याक्षिप्त-शूलस्य मुमोच सालम् ।
तेनाऽऽजघानोरसि कुम्भ-कर्णं
४८] वृक्षेण [2]शक्राऽशनि-सन्निभेन ॥४७॥ [६०
स साल-वृक्षः सहसा[3] वि-मुक्तो[3]
भुजाऽन्तरे तस्य तदा प्र-भग्नः ।
ततो वि-षेदुः[4] सहसा प्लवं-गा[5]
४९] रक्षो-गणाश् चाऽपि तदा[6] प्र-णेदुः[7] ॥४८॥ [६१
स साल-वृक्षाऽभिहतश् चुकोप
जहास चैवाऽथ वि-वृत्य वक्त्रम् ।
विव्याध शूलं च तडित्-प्रकाशं
५०] चिक्षेप हर्य्-ऋक्ष-पतेर् वधाय ॥४९॥ [६२
तत् कुम्भ-कर्णस्य भुज-प्रविद्धं[8]

---

१. म-यथावत्कथयाम्य् ॥ २. म-कालानलसन्नि० ॥ ३. रा$_1$ल$_1$ल$_2$ब अ-०सावभग्नो । रा$_2$ फ म-०सा च भग्नो । ४. ल$_1$ ल$_2$ च अ-निषेदुः । प्र रा$_2$-विनेदुः । ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-प्लवंगमाः । ६. म-मुदा । ७. प्र रा$_2$ फ म-विनेदुः ॥ ८. रा$_1$ ल$_1$ ल$_2$ब अ प्र-भुजाप्रवृद्धं ।

शूलं शितं काञ्चन-वज्र-जुष्टम् ।

क्षिप्रं समुत्-पत्य नि-गृह्य दोर्भ्यां

५१] बभञ्ज वीरस् तरसा कपीऽन्द्रः ॥५०॥ [६३

कृतं भार-सहस्रस्य शूलं कालाऽऽयसं दृढम् ।

५२] बभञ्ज जानुम् आ-रोप्य सम्प्र-हृष्टः प्लवं-गमः ॥५१॥ [६४

स तं तदा भग्नम् अवेक्ष्य शूलं

चुकोप रक्षोऽधिपतिर् महाऽऽत्मा ।

उत्-पाट्य शृङ्गं सहसाऽचलस्य

५३] जघान सु-ग्रीवम् अतिप्र-मर्दम् ॥५२॥ [६७

स शैलशृङ्गाऽभिहतो वि-संज्ञः

पपात भूमौ युधि वानरेन्द्रः ।

तं प्रेक्ष्य भूमौ पतितं वि-संज्ञं

५४] नेदुः प्र-हृष्टा युधि यातु-धानाः ॥५३॥ [६८

तम् अभ्युपेत्याऽथ सुवीर-कर्मा

स कुम्भ-कर्णो युधि वानरेन्द्रम् ।

जहार सु-ग्रीवम् अति-प्रगृह्य

५५] यथाऽनिलो मेघम् अति-प्रचण्डः ॥५४॥ [६९

स तं महामेघ-निकाश-रूपम्

उत्-पाट्य गच्छन् युधि कुम्भ-कर्णः ।

रराज मेघ-प्रतिमान-रूपो

N] मेरुर् यथाऽत्युच्छ्रित-सौ(?शा)र-शृङ्गः॥५५॥ [७०

---

१. रा₂-०नरज्जुजु० । २. फ म-विगृह्य । ३. रा₁ ल₁ ल₂ ब-नभो बभंज । प्र म-ननाद भीमं । ४. प्र रा² फ म-बलेन ॥ ५. रा₁ अ-जानुन्यारोप्य । ल₁ल₂ब-जानुनारोप्य । म-जानुनाक्रम्य ॥ ६. रा₁ल₁ल₂ब अ प्र म-तत् । ७. रा₁ल₁ल₂ ब अ प्र रा₂ फ-अभिप्रमर्दयन् ॥ ८. म-नास्ति ॥ ९. रा₂-जहास । १०. अ-अभिप्र० । ११. रा₂-०प्रचण्डम् ॥ १२. फ-उत्साद्य ग० । म-उद्यम्य शूलं । १३. फ-०तघोरशृङ्गः ॥

स तं समुत्-पाट्य जगाम वीरं[1]
संस्तूयमानो युधि राक्षसेन्द्रैः[2] ।
शृण्वन् नि-नादं त्रिदिवा[3]ऽऽलयानां
५६] प्लवङ्ग-राज-ग्रह-विस्मितानाम् ॥५६॥ [७१

ततस् तम् आ-दाय[4] तदा स मेने
हरीऽन्द्रम् इन्द्रोपम-तुल्य-वीर्यम्[5] ।
अस्मिन् हते सर्वम् इदं वि-शस्तं
५७] स[6]-राघवं सैन्यम् इहैव चोग्रम् ॥५७॥ [७२

वि-द्रुतां वाहिनीं दृष्ट्वा वानराणां ततस् ततः ।
५८] कुम्भ-कर्णेन सु-ग्रीवं गृहीतं चाऽपि वानरम् ॥५८॥ [७३

हनू-मांश् चिन्तयामास मति-मान् मारुताऽऽत्मजः ।
५९] एवं गृहीते सु-ग्रीवे किं कार्यं वै मया भवेत् ॥५९॥ [७४

यत् तु न्याय्यं समा-कर्तुं तत् करिष्यामि सर्व-था ।
६०] महापर्वत-सङ्काशं नाशयिष्यामि राक्षसम् ॥६०॥ [७५

मया हते सम्प्रति कुम्भ-कर्णे
महा-बले मुष्टि-निपात-भग्ने ।
वि-मोक्षिते वानर-पार्थिवे च[7]
६१] भवन्तु हृष्टाः प्लव-गाः सम्-अग्राः ॥६१॥ [७६

अथवा स्वयम् एवैष मोक्षं प्राऽऽप्स्यति पार्थिवः ।
६२] गृहीतो यद्य् अपि भवेत् त्रि-दशैः स-महोरगैः ॥६२॥ [७७

मन्ये न तावद् आत्मानं बुध्यते वानराऽधिपः ।
६३] शैल-प्रहाराऽभिहतः कुम्भ-कर्णेन सं-युगे ॥६३॥ [७८

---

१. प्र म-वीरः । २. रा$_2$ फ-०सेन्द्रः । रा$_2$ फ-राक्षसौघैः । ३. प्र रा$_2$-०त्रिदशाल० ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब-समादाय । ५. रा$_2$-०वीर्यः । ६. रा$_2$-स राघवशत्रुमितीन्द्रशत्रुः ॥ ७. रा$_2$-०पार्थिवर्षभे । म-पार्थिवेन्द्रे ॥

अयं मुहूर्तात् सु-ग्रीवो लब्ध-संज्ञो महाऽऽहवे ।
६४] आत्मनो वानराणां च यत् पथ्यं तत् करिष्यति ॥६४॥ [७९
मया वि-मोक्षितस्याऽस्य सु-ग्रीवस्य महाऽऽत्मनः ।
६५] अ-कीर्तिश् च भवेत् कष्टा कीर्ति-नाशश् च शाश्वतः ॥६५॥ [८०
तस्मान् मुहूर्तं वीऽऽक्षिष्ये वि-क्रमं पार्थिवस्य तु ।
६६] भिन्नं च वानराऽनीकं यावद् आ-श्वासयाम्य् अहम् ॥६६॥ [८१
इत्य्[2] एवं चिन्तयित्वा स हनु-मान् मारुताऽऽत्मजः ।
६७] भूयः सं-स्तम्भयामास वानराणां महा-चमूम्[5] ॥६७॥ [८२
स कुम्भ-कर्णोऽथ विवेश लङ्कां
स्फुरन्तम् आ-दाय महाहरीऽन्द्रम् ।
विमान-चर्या-गृह-गोपुर-स्थैर्
६९] माल्याऽग्रवर्षैर् अभि-कीर्यमाणः ॥६८॥ [८३
ततः स सं-ज्ञां प्रति-लभ्य कृच्छ्रात्
बलीयसस् तस्य भुजाऽन्तर-स्थः ।
अवेक्षमाणः पुर-राजमार्गे
७०] वि-चिन्तयामास मुहुर् महाऽऽत्मा ॥६९॥ [८५
एवं गृहीतेन कथं नु नाम
शक्यं मया सम्प्रति-कर्तुम् अद्य ।
तथा करिष्यामि यथा हरीणां[11]
७१] भविष्यतीऽष्टं मम चैव पथ्यम् ॥७०॥ [८६

---

१. प्र रा$_2$ फ म-हि ॥ २. रा$_2$ फ-इतीव । ३. रा$_2$ फ म-हनूमान् । ४. म-महाबलं । ५. अतः परमधिकः पाठः—रा$_2$-कृच्छ्रेण तु समाश्वस्य संगम्य च ततस्ततः । वृक्षाद्रिहस्ता हरयस्तस्थुः सर्वे प्लवंगमाः ॥ ६. प्र रा$_2$ फ-०हरीशं । ७. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-०नवर्यं गृ० ॥ ८. रा$_2$-पुनरेत्य । ९. श्र प्रं रा$_2$ फ-अवेक्ष्यमाणः ॥ १०. रा$_2$-सप्रतिकूलं । ११. म-नास्ति ॥

ततः कराऽग्रैः सहसोर्ध्वम् एत्य
राजा हरीणाम् अमरेन्द्र-शत्रोः ।
चकर्त कर्णौ दशनैश् च नासां
७२] ददार पार्श्वेषु च कुम्भ-कर्णम् ॥७१॥ [८७
स कुम्भ-कर्णो [1]हृत-कर्ण-नासो
भृशं नदन् वेदनयाऽन्वितश् च ।
रोषाऽभिभूतः क्षतजाऽऽर्द्रगात्रः
७३] सु-ग्रीवम् आ-विध्य पिपेष भूमौ ॥७२॥ [८८
स भू-तले भूरि-बलेन पिष्टः
सुराऽरिभिस् तैर् अभि-हन्यमानः ।
जगाम [2]खं वेग-वद् अभ्युपेत्य
७४] पुनश् च रामं सहसा जगाम ॥७३॥ [८९
कर्ण-नासा-विहीनस् तु कुम्भ-कर्णो महा-बलः ।
७५] रराज शोणितोत्सेकैर् गिरिः प्र-स्रवणैर् इव ॥७४॥ [९०
पुनः स पुर्याः सहसा महाऽऽत्मा
निष्-क्रम्य तद् वानर-सैन्यम् उग्रम् ।
अभक्षयत् [3]क्रोध-विवृत्त-नेत्रः
७६] प्र-जा [4]युगाऽन्तोऽग्निर् इव प्र-दीप्तः ॥७५॥ [९४
बुभुक्षितः शोणित-मांस-[5]गृध्नुः
प्र-विश्य तद् वानर-सैन्यम् आशु ।
चखाद [6]रक्षांसि [7]हरीन् वि-मिश्रान्
७७] [8]ऋक्षांश् च मोहाद् युधि कुम्भ-कर्णः ॥७६॥ [९५

---

१. रा$_2$ म-हत० ॥ २. ल$_1$-खे ॥ ३. म-रोषवि० । ४. रा$_1$ म-युगान्तेऽग्निर् ॥ ५. ल$_1$ ल$_2$ ब श्र प्र म-०मांसगंधी । ६. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ म-रक्षः स ह० । ७. ल$_1$ ल$_2$ ब श्र प्र फ-पिशाचान् । ८. ल$_1$ ल$_2$ ब श्र प्र-रक्षश् ॥

एकं द्वौ त्रीन् बहूंश् चाऽपि वानरान् राक्षसैः सह ।
७८] समा-दायैक-हस्तेन मुखे प्र-क्षिपति स्म सः[3] ॥७७॥ [९७
मुखात् प्रस्रुत-मेदोऽसृग् घोर-रूपः स राक्षसः ।
७९] वध्यमानो गिरीऽन्द्राऽऽभान् भक्षयामास वानरान् ॥७८॥ [९८
ते वध्यमाना हरयो रामं जग्मुस् तदा गतिम् । [९९
८०] राघवश् च समुत्-पत्य धनुर् उग्रं समा-ददे ॥७९॥ [१.३६उ
स चापम् आ-दाय भुजङ्ग-कल्पं
दृढ- ज्यम् उग्रं तपनीय-पृष्ठम् ।
हरीन् समा-श्वास्य समुत्-पपात
८१] रामो निबद्धोत्तमबाणतूणः ॥८०॥ [१३८
स वानर-गणैस् तैस् तु वृतः पर-पुरञ्जयः ।
८२] लक्ष्मणाऽनुचरो रामः सम्प्र-तस्थे महा-धनुः ॥८१॥ [१३९

पुरस्-ताद् राघवस्याऽर्थे गदा-पाणिर् वि-भीषणः ।
N] अभि-दुद्राव वेगेन भ्राता[12] भ्रातरम् आ-हवे ॥८२॥ [N
वि-भीषणं पुरो दृष्ट्वा पालनीयं[13] लघुं सदा[13] ।
N] करुणा-क्रोध-लज्जाभिर् व्य्-आप्तोऽन्तर् वाक्यम् अब्रवीत्[14] ८३ [N
प्र-हरस्व रणे शीघ्रं क्षत्र-धर्मे स्थितो भवान् ।
N] भ्रातृ-स्नेहं परि-त्यज्य राघवस्य प्रियं कुरु ॥८४॥ [N
अस्मत्-कार्यं कृतं वत्स यस् त्वं रामम् उपा-गतः ।

---

१. रा$_1$-वापि । २. रा$_1$-तान् ॥ ३. ल$_1$ ल$_2$ ब-महाबलो । ४. प्र रा$_2$ फ-वीर्यवान् ॥ ५. ल$_1$ ल$_2$ ब अ-हन्यमाना । ६. रा$_1$-धनू रत्नं ॥ ७. ल$_1$ ल$_2$ ब अ प्र-दृढं समग्रं । ८. ल$_1$-०बाणचापः ॥ ९. ल$_1$ ल$_2$ ब अ ञ-नास्ति ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-नास्ति । म-८२-तमश्लोकादारभ्य ९१-तमश्लोकपर्यन्तं नास्ति । ११. रा$_2$-अभिविध्य च । १२. ल$_1$ ल$_2$ ब अ प्र-रक्षो ॥ १३. रा$_1$ रा$_2$-कुम्भकर्णोऽब्रवीदिदं । १४. रा$_1$ रा$_2$-नास्ति॥ १५. रा$_1$-भव । अ ब फ-महान् ॥ १६. रा$_2$-आत्मकार्यं ।

N] त्वम् एको रक्षसां लोके सत्यधर्माऽभिरक्षिता ॥८५॥ [N
नास्ति सत्याऽभि[2]षक्तानां व्य्-असनं हि कदा-चन ।
N] सन्तानाऽर्थे[3] त्वम् एवैकः कुलस्याऽस्य भविष्यसि ॥८६॥[N
राघवस्य प्र-सादाच् च रक्षसां राज्यम् आ[4]प्स्यसि ।[5]
N] प्र-कृत्यांऽति-दुर्धर्षः शीघ्रं मार्गाद् अप-क्रम ॥८७॥ [N
न स्थातव्यं पुरस्-तान् मे सं-भ्रमान् नष्ट-चेतसः ।
न वे[6]द्मि सं-युगे सक्तः स्वान् परान् वा निशा-चर ।
N] रक्षणीयोऽसि मे वत्स सत्यम् ऐ[7]तद् ब्रवीमि ते ॥८८॥ [N
एवम् उक्तो (?क्तं) वचस् तेन कुम्भ-कर्णेन धी-मता ।
N] वि-भीषणो महा-बाहुः कुम्भ-कर्णम् उवाच ह ॥८९॥ [N
मन्त्रितं मे[9] कुलस्याऽस्य रक्षणाऽर्थम् अरिं-दम ।
न कृतं सर्व-रक्षोभिस् ततोऽहं रामम् आ-गतः ।
N] काङ्क्षितव्यं तु भवता सु-कृतं दुष्-कृतं [10]नुं वा ॥९०॥ [N
एवम् उक्त्वाऽश्रुपूर्णाऽक्षो गदा-पाणिर् वि-भीषणः ।
N] एकाऽन्तम् आ-श्रितो भूत्वा चिन्तयामास तत्-क्षयम्॥९१॥[N

स ददर्श महाऽऽत्मानं किरीटिनम् अव-स्थितम् ।
८३] शोणिताऽऽप्लुत-सर्वाऽङ्गं कुम्भ-कर्णं महा-बलम् ॥९२॥ [१४०
सर्वान् समभि-धावन्तं यथा [12]दृप्तं महा-गजम् ।
८४] मार्गमाणं हरीन् क्रुद्धं रा[13]क्षसैः परि-वारितम् ॥९३॥ [१४१

१. रा$_2$-शुभकर्मा० ॥ २. ल$_1$ ल$_2$ ब रा$_2$फ-०भिषित्तानां ॥ ३. रा$_1$-अवाम्स्य० । ४. रा$_2$-नास्ति । ५. रा$_1$-०त्या नास्मि दु० ॥ ६. रा$_1$-वेत्ति । ७. रा$_2$ एव ॥ ८. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-गदितं । ९. ल$_1$ ल$_2$ ब अ-च । प्र-हि । १०. रा$_1$रा$_2$- तु ॥ ११. रा$_1$-रोदयामास दुःखितः । अ-०स तत्क्षणं ॥ १२. ल$_1$ ल$_2$ ब अ प्र फ-दृष्टं । १३. रा$_1$-रक्षः सैन्यविवर्जितं ॥

विन्ध्य-मन्दर-सङ्काशं काञ्चनाऽङ्[1]दभूषणम् ।
८५] स्रवन्तं रुधिरं गात्रात् साक्षान् मेघम् इवोदितम् ॥९४॥ [१४२
लि[2]हन्तं जिह्वया घोरं तद् व[2]क्त्रं शोणितोक्षितम् ।
८६] मर्दन्तं वानरान् सं-ख्ये कालाऽन्तकयमोपमम् ॥९५॥ [१४३
तं दृष्ट्वा राक्षस-श्रेष्ठं प्रदीप्ताऽनल-वर्चसम् ।
८७] वि-स्फारयामास तदा कार्मुकं पुरुषर्षभः ॥९६॥ [१४४
स तस्य चाप-निर्घोषात् कुपितो रा[3]क्षसर्षभः ।[4]
८८] अ-मृष्यमाणस् तं घोषम् अभि-दुद्राव राघवम् ॥९७॥ [१४५
तस्मिन् काले सु-मित्रायाः पुत्रः परबलाऽर्दनः ।
८९] चकार लक्ष्मणः प्रादुर् अस्त्रम् अस्त्र-विदां वरः ॥९८॥ [१०३
स कुम्भ-कर्णस्य शरान् शरीरे सप्त वीर्य-वान् ।
९०] नि-शितान् आ-ददे चाऽन्यान् वि-ससर्ज च लक्ष्मणः॥९९[5] [१०४
अति-क्रम्य स सौमित्रिं कुम्भ-कर्णो महा-बलः ।
९१] रामम् एवाऽभि-दुद्राव कम्पयन्न् इव मेदिनीम् ॥१००॥ [११८

ततस् तु वातोद्धत-वह्नि-कल्पं
भुजङ्गराजोत्तमभोग-बाहुम् ।
तम् आ-पतन्तं धरणीधराऽऽभं
९२] प्रोवाच रामो युधि कुम्भ-कर्णम् ॥१०१॥ [१४६
आ-गच्छ रक्षोऽधिप मत्-समी[6]पम्
अयं स्थितोऽहं प्रगृहीत-चापः ।
उपै(? पे)हि मां मृत्युम् उप-स्थितं स्थिरं
९३] प्रेतो मुहूर्ताद् भविताऽसि पाप-क ॥१०२॥ [१४७

---

१. रा$_1$ रा$_2$ फ-०नांगदभू० ॥ २. रा$_1$-लेलिह्यानमसंप्रक्षो जिह्वया ॥ ३. रा$_1$ फ-नैर्ऋतर्षभः । ४. प्र-नास्ति ॥ ५. म-नास्ति ॥ ६. म-०मीपे ॥

रामोऽयम् इति वि-ज्ञाय जहास विकृत-स्वरम् ।
९४] पातयन्न् इव सर्वेषां हृदयानि वनौकसाम् ॥१०३॥ [१४८
प्र-हस्य वि-कृतं भीमं स मेघस्तनितोपमम् ।
९५] कुम्भ-कर्णो महा-तेजा राघवं वाक्यम् अब्रवीत् ॥१०४॥ [१४९
नाऽहं वि-राधो वि-ज्ञेयो न कबन्धः खरो न च ।
९६] न वाली न च मारीचः कुम्भ-कर्णम् अवे(?वे)हि माम् १०५ [१५०
पश्य मे मुद्गरं घोरं[1] सर्व-कालाऽऽयसं दृढम् ।
९७] अनेन निर्-जिता देवा दानवाश् च मया रणे[2] । [१५१
N] शक्रश् च निर्-जितो राम नष्टाऽहं च स्वयं-भुवः ॥१०६॥ [N
विकर्ण-नास इति मां नाऽव-ज्ञातुम् इहाऽर्हसि ।
९८] अल्पा हि न मे पीडा कर्णनासाऽवकर्तनात् ॥१०७॥ [१५२
दर्शयेक्ष्वाकु-शार्दूल वीर्यं गात्रेषु मे लघु ।
९९] ततस् त्वां भक्षयिष्यामि दृष्ट्वा पौरुष-विक्रमम् ॥१०८॥ [१५३
स कुम्भ-कर्णस्य वचो निशम्य
रामः सु-पुङ्खान् वि-ससर्ज बाणान् ।
तैर् आ-हतो वज्र-सम-प्रभावैर्
१००] न चुक्षुभे सं-यति कुम्भ-कर्णः ॥१०९॥ [१५४
यैः सायकैस् ताल-वरा नि-कृत्ता
वाली हतो वानर-पुङ्गवैश् च ।
ते कुम्भ-कर्णस्य तदा शरीरं[5]
१०१] वज्रोपमा न व्यथयाम्बभूवुः ॥११०॥ [१५५
स वारि-धारा इव सायकांस् तान्
पिबन् शरीरेण महेन्द्र-शत्रुः ।

---

१. म-भीमं । २. रा₂-महारणे । म-पुरा मया ॥ ३. रा₁ ल₁ ल₂ ब अ प्र-विकीर्ण० ॥ ४. प्र रा₂ फ म-राक्षसपुंगवाश् । ५. रा₂-शरीरे । म-कुलीरे । ६. म-व्यथयांप्रचक्रुः ॥

जघान तं राम-शर-प्रवेकं

१०२] व्या-विध्य तं मुद्गरम् उग्र-वेगम् ॥११२॥ [१५६

स शत्रुगात्रक्षतजाऽनुलिप्तं

वि-त्रासनं देव-महाचमूनाम् ।

व्या-विध्य तं मुद्गरम् उग्र-वीर्ये

१०३] वि-त्रासयामास रघु-प्रवीरः ॥११३॥ [१५७

अथ दाशरथी रामो रौद्रम् अस्त्रं प्र-योजयन् ।

१०४] कुम्भ-कर्णस्य हृदये नि-चखान शितान् शरान् ॥११४॥ [११९

तस्य रामेण विद्धस्य वानरान् विप्र-धावतः ।

१०५] अङ्गार-मिश्राः क्रुद्धस्य मुखान् निश्-चेरुर् अर्चिषः ॥११५॥ [१२०

तस्योरसि नि-मग्नाम् ते शरा बर्हिण-लक्षणाः । [१२२पू

१०६] हृदयं पीडयामासुः क्रोध-मुक्ता महाऽऽत्मना ॥११६॥ [N

हस्ताच् चाऽस्य परि-भ्रष्टं पपातोर्व्यां महाऽऽयुधम् । [१२३पू

१०७] स निर्-आयुधम् आत्मानं यदा मेने महा-बलः ॥११७॥

१०८पू] मुष्टिभ्यां स जघानाऽर्थ चकार कदनं तदा । [१२४

N] आ-ददेऽथ पुनर् घोरं भूमेर् मुद्गरम् आयसम् ॥११८॥ [N

१०८उ] स बाणैर् अति-विद्धाऽङ्गो रुधिरेण सम्-उक्षितः ।

रुधिरं परि-सुस्राव गिरिः प्र-स्रवणैर् इव ॥११९॥ [१२५

१०९] स तीव्रेण च कोपेन रुधिरेण सम्-उक्षितः ।

वानरान् राक्षसांश् चैव खादन् विपरि-धावति ॥१२०॥ [१२६

११०] तस्मिन् काले स धर्माऽऽत्मा लक्ष्मणो वाक्यम् अब्रवीत् ।

कुम्भकर्ण-वधे यत्तो योगान् परि-मृशन् बहून् ॥१२१॥ [१३०

---

१. म-नास्ति । २. रा$_2$ फ-उग्रवेगं ॥ ३. रा$_2$-अयोजयत् । म-प्रयुक्तवान् ॥ ४. म-सहसा ॥ ५. ल$_1$ल$_2$ब रा$_2$फ म-०लक्ष्मणाः । ६. प्र-क्रोधान्मुक्ता ॥ ७. प्र-नास्ति ॥ ८. रा$_2$ फ-चरणाभ्यां च । ९. प्र-तथा ॥ १०. प्र रा$_2$ फ म-क्षतजेन । ११. फ-प्रतिस्रु० ॥ १२. रा$_1$-च सूदितः । रा$_2$ फ म-स मूर्च्छितः ॥

१११] नैवाऽयं वानरान् खादन् न च जानाति राक्षसान् ।
मत्तः शोणित-गन्धेन स्वान् परांश् चैव खादति ॥१२२॥ [१३१
११२] साध्व् एनम् अधि-रोहन्तु सर्वे-तो वानरर्षभाः ।
यूथ-पाश् च तथा मुख्यास् तिष्ठन्त्व् अस्य समीप-तः॥१२३[१३२
११३] अथाऽयं दुर्-मतिः काले गुरु-भारम् अ-पारयन् ।
नि-पतेद् राक्षसो भूमौ न च हन्यात् प्लवं-गमान् ॥१२४॥[१३३
११४] तस्य तद् वचनं श्रुत्वा राज-पुत्रस्य धी-मतः । [१३४पू
गजो गवाऽक्षो गवयः शरभो गंध-मादनः ॥१२५॥ [N
११५] नीलश् च कु-मुदश् चैव जाम्ब-वान् अङ्ग-दस् तथा । [N
ते समा-रुरुहुर् हृष्टाः कुम्भ-कर्णं प्लवं-गमाः ॥१२६॥[१३४उ
११६] कुम्भ-कर्णः सु-संक्रुद्धः समा-रूढैः प्लवं-गमैः ।
व्य्-अधूनयत् तान् वेगेन दुष्ट-हस्तीऽव हस्ति-पान् ॥१२७[१३५
तान् दृष्ट्वा निर्-धुतान् रामो रोषाद् वानर-यूथपान् ।
११७] ज्ञात्वा महाऽनुभावं तं दिव्यान्य् अस्त्राणि सं-दधे ।१२८[१३६
वायव्यम् आ-हूय ततो महाऽस्त्रं
राम: प्र-चिक्षेप निशा-चराय ।
स-मुद्गरं तेन जहार बाहुं
११८] निकृत्त-बाहुस् तुमुलं ननाद ॥१२९॥ [१५८
स तस्य बाहुर् गिरि-शृङ्ग-कल्पः
स-मुद्गरो राघव-बाण-कृत्तः ।
पपात तस्मिन् हरि-सैन्य-मध्ये
११९] जघान तां वानर-वाहिनीं च ॥१३०॥ [१५९
ते वानरा भग्नहताऽवशेषाः
पर्य्-अन्तम् आ-श्रित्य भयाऽवसन्नाः ।

---

१. म-नास्ति ॥ २. प्र-अभिधावन्तु ॥ ३. रा१ ब [redacted] रा२ फ म-गुरुं भार ॥ ४. प्र-नास्ति ॥

प्रवेपिताऽङ्गा ददृशुः सु-घोरं
१२०] नरेन्द्र-रक्षोऽधिप-सन्नि[1]पातम् ॥१३१॥ [१६०

स कुम्भ-कर्णोऽस्त्र-निकृत्त-बाहुर्
महान् निकृत्ताऽग्र इवाऽचलेन्द्रः ।
उत्-पाटयामास करेण वृक्षं
१२१] ततोऽभि-दुद्राव र[2]णे नरेन्द्रम् ॥१३२॥ [१६१

ततोऽस्य बाहुं सह-साल-वृक्षं
सम्-उद्यतं पन्नग-भोग-क[3]ल्पम् ।
इन्द्राऽस्त्र-युक्तेन जहार रामो
१२२] बाणेन जाम्बूनद-[4]भूषितेन ॥१३३॥ [१६२

स कुम्भ-कर्णस्य भुजो नि-कृत्तः
पपात बाहुः पतगेन्द्र-क[5]ल्पः ।
वि-चे[6]ष्टमानोऽभि-जघान तत्र
१२३] शैलान् छिला राक्षस-[7]वानरांश् च ॥१३४॥ [१६३

तं कृत्त-बाहुं समवेक्ष्य रामः
[8]समा-पतन्तं सहसोन्-नदन्तम् ।
ततोऽर्ध-चन्द्रौ[9] [10]सु-शितौ गृहीत्वा
१२४] चिच्छेद पादौ युधि राक्षसस्य ॥१३५॥ [१६४

स कृत्त-बाहुर् विनिकृत्त-पादो
वि-वृत्य वक्त्रं वडबामुखाऽऽभम् ।
दुद्राव रामं सहसाऽभि-गर्जन्
१२५] राहुर् यथा चन्द्रम् इवाऽन्तरिक्षे ॥१३६॥ [१६६

---

१. प्र-०सन्निवेशं ॥ २. म-नरेन्द्रकल्पं ॥ ३. ब-०गतुल्यं । ४. म-०दसन्निभेन ॥ ५. रा$_1$ल$_1$ल$_2$ब ञ प्र रा$_2$फ-०न्द्रमुक्तः । ६. ल$_2$-विशीर्यमाणो० । ७. र$_1$-० वानराश् ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब ञ प्र-रणे सहर्षः सहसोन्ननाद । ९. म-०चन्द्रं । १०. प्र-निशितौ । म-सहसा ॥

अ[1]पूरयत् तस्य मुखं शिताऽग्रै
रामः शरैर् हेम-पिनद्ध-पुङ्खैः ।
स[2] पूर्ण-वक्त्रो न शशाक वक्तुं
१२६] चुकोप कृच्छ्रेण मुमोह चाऽपि ॥१३७॥ [१६७

अथा[3]ऽऽददे सूर्य-मरीचि-कल्पं
स ब्रह्मदण्डाऽन्तक-तुल्य[4]-रूपम् ।
अरि-घ्नम् ऐन्द्रं नि-शितं सु-पुङ्खं
१२७] रामः शरं मारुत-तुल्य-वेगम् ॥१३८॥ [१६८

अ-पारणीयं वि-शिखं वीर्य-वन्तं महा-बलम् ।
१२८] भयं-करम् अ-मित्राणां ज्ञातीनां नन्द[5]-वर्धनम् ॥१३९॥ [N

तं कार्मुकं समा-दाय वि-कृष्य च महा-बलः ।
१२९] ससर्ज कुम्भ-कर्णस्य वधाय शरम् उत्-तमम् ॥१४०॥ [N

दिव्यं मघ-वता दत्तं ज्वलन्तम् इव तेजसा ।
१३०] स वि-सृष्टो बल-वता रामेण नि-शितः शरः ॥१४१॥ [N

कुम्भ-कर्णस्य हृदयं भित्त्वा धरणिम् आऽविशत् ।
१३१] अथाऽऽददे शरं चाऽन्यं दिव्यमन्त्राऽभिमन्त्रितम् ॥१४२ [N

तं वज्र-जाम्बूनद-चारु-पुङ्खं
प्रदीप्त-सूर्य-ज्वलन-प्रकाशम् ।
महेन्द्र-वज्राऽशनि-तुल्य-वेगं
१३२] रामः स चि[6]क्षेप निशा-चराय ॥१४३॥ [१६९

स सायको राघव-बाहु[7]-विच्युतो
दिशः स्व-भासाऽति-भृशं प्र-काशयन् ।

---

१. ल$_2$-आपू० । २. रा$_2$ फ-संपूर्ण० ॥ ३. म-समाददे । ४. प्र रा$_2$ फ म-०ककालतुल्यं ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ फ म-नंदिव० । रा$_2$-हर्षव० ॥ ६. रा$_2$ म-प्रचि० ॥ ७. प्र-०बाणवि० । म-०बाहुमुक्तो ।

विधूम-वैश्वानर-तुल्य-दर्शनो
१३३] जगाम शक्राऽशनि-तुल्य-विक्रमः ॥१४४॥ [१७०
स तन् महापर्वत-कूट-सन्निभं
विवृत्तदंष्ट्रोज्ज्वल-चारु-भूषणम् ।
चकर्त रक्षोऽधिपतेः शिरस् तदा
१३४] यथैव वृत्रस्य पुरा पुरं-दरः ॥१४५॥ [१७१
तद् रामबाणाऽभिहतं पपात
रक्षः-शिरः पर्वत-सन्निकाशम् ।
बभञ्ज पुर्यां गृह-गोपुराणि
N] प्राकार-साऽट्टालचयांश् च तत्र ॥१४६॥ [१७३
अथ ते राक्षसाः सर्वे व्य्-अद्रवन् राक्षसे हते ।
१३५] वानराणां सहस्रे द्वे कायेनाऽथे व्य्-अपोथयत् ॥१४७॥ [N
सम्प्राऽकम्पन्त लङ्कायाः प्राकारास् तोरणानि च ।
१३६] तस्मिन् नि-पतिते भूमौ चुक्षुभे च महोदधिः ॥१४८॥ [N
तं तु भूमौ नि-पतितं दृष्ट्वा विक्षिप्त-भूषणम् ।
१३७] बभूवुर् व्यथिताः सर्वे हत-शेषा निशा-चराः ॥१४९॥ [N
ते विषण्ण-मुखा दीनाः प्रहार-जनित-श्रमाः ।
१३८] वि-नेदुर् उच्चैर् बहवः सहसा वि-स्वरैः स्वनैः ॥१५०॥ [N
स चाऽति-कायो हिमवत्-प्रकाशो
रक्षः-पतिस् तोय-निधेः समीपे ।
प्रहान् महामीन-चयान् भुजं-गान्
N] वि-क्षोभ्य भूमिं च तदा पपात ॥१५१॥ [१७५

---

१. रा$_1$-शक्तयाश० ॥ २. म-०रुकुण्डलं ॥ ३. प्र फ म-पातिते । रा$_2$-पतिते । ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ म-राक्षसानां । ५. प्र रा$_2$ फ-०नाति-व्य० । म-०नापि व्य० ॥ ६. रा$_1$ ल$_1$,ल$_2$ ब-सहसोदधिः ॥ ७. प्र रा$_2$-स्वरैः ॥ ८. प्र रा$_2$ फ-०नवरान् । ९. म-नास्ति ॥

तस्मिन् हते ब्राह्मण-देव-शत्रौ
महा-बले सं-यति कुम्भ-कर्णे ।
चचाल भूर् भूमि-धराश् च सर्वे
N] हृष्टाश् च देवाः प्र-सभं वि-नेदुः ॥१५२॥ [१.७६

प्रहर्ष-युक्ता बहवश् च वानराः
प्रबुद्ध-पद्म-प्रतिमैस् तदाऽऽननैः ।
अपूजयन् राघवम्[2] इष्टे[3]-भागिनं
१४०] हते[4] रिपौ भीम-बले दुरा-सदे ॥१५३॥ [१.८०

स कुम्भ-कर्णं सुर-शत्रुम्[6] उत्तमं
महत्सु युद्धेष्व् अ-जितं कदा-चन ।[5]
ननन्द हत्वा भरताऽग्रजो रणे
१३९] महाऽसुरं वृत्रम् इवाऽमराऽधिपः ॥१५४॥ [१८१

ततः सदेवर्षि-सगुह्यकाऽप्सरः-
सुराऽसुरा भूत-सुपर्ण-पन्नगाः ।
सयक्षगन्धर्व-सदैत्यदानवाः
१४१] प्र-हर्षिता राम-पराऽऽक्रमात् तदा ॥१५५॥[7] [१.७७

इत्यार्षे रामायणे युद्ध-काण्डे कुम्भकर्ण-वधो नाम
षटचत्वारिंशः सर्गः ॥ ४६ ॥

---

१. रा२ फ म-हर्षाच् ॥ २. रा२-०वमित्रभा० । रा१-०मिष्टभाषिणं । म-०वमाजिवर्धन । ३. फ-नास्ति ॥ ४. रा१-सुरदैत्यसूदनं । ५. फ-नास्ति । ६. ल१ ल२ ब-इव सुरद्विषः ॥ ७. ल१ ल२ ब अ प्र रा२ फ म-नास्ति ॥ ८. रा१ ब प्र-लङ्काकाण्डे युद्धपर्वणि ॥

कुम्भ-कर्णं हतं दृष्ट्वा राघवेण महाऽऽत्मना ।
१] राक्षसा राक्षसेन्द्राय रावणाय न्य्-अवेदयन् ॥१॥ [१
स श्रुत्वा नि-हतं सं-ख्ये कुम्भ-कर्णं महा-बलम्[2] ।
२] रावणः शोक-सन्तप्तो मुमोह च पपात च ॥२॥ [६
पितरं पतितं[3] दृष्ट्वा देवान्तक-नरान्तकौ ।
३] त्रि-शिराश् चाऽति-कायश् च रुरुदुः शोक-पीडिताः ॥३॥ [७
भ्रातरं नि-हतं श्रुत्वा रामेणाऽक्लिष्ट-कर्मणा ।
४] महोदर-महापार्श्वौ शोकाऽऽक्रान्तौ बभूवतुः ॥४॥ [८
ततः कृच्छ्रात् समा-साद्य सं-ज्ञां राक्षस-पुङ्गवः ।
५] कुम्भकर्ण-वधाद् दीनो वि-ललापाऽर्थे रावणः ॥५॥ [९
हा वीर रिपु-दर्प-घ्न कुम्भ-कर्ण महा-बल । [१०पू
६] शत्रु-सैन्यं प्र-तोर्यै(?प्यै)कः क्व मां सं-त्यज्य गच्छसि ॥६॥ [११उ
इदानीं खल्व् अहं नाऽस्मि यस्य मे पतितो[6] भुजः ।
७] दक्षिणो यं समा-श्रित्य न बिभेमि दिवौकसाम् ॥७॥ [१२
कथम् एवं-विधो नाम देव-दानव-दर्प-हा ।
८] कालाऽग्नि-प्रतिमः सं-ख्ये राघवेणाऽसि पातितः ॥८॥ [१३
ननु ते वज्र-निष्पेषा नाऽकुर्वन्त व्यथां तदा[9] ।

---

१. ल१ ल२ ब श्र प्र रा२-०कर्णवधं श्रुत्वा ॥ २. ल१ ब श्र प्र रा२ फ-०बलः ॥ ३. ल१ ल२ ब श्र प्र रा२ फ म-व्यथितं ॥ ४. म-०लाप स ॥ ५. रा२ फ-प्रतप्यैकः ॥ ६. ल१ ल२ ब श्र प्र म-०तोऽनुजः ॥ ७. रा१ म-०वेण निपा० । रा२-०वेण हि पा० ॥ ८. रा-यस्य कुर्वन्ति न व्यथां । ९. म-नास्ति ।

९] स कथं रामबाणाऽऽर्तः प्र-सुप्तोऽसि मही-तले[1] ॥९॥ [१४
एते देव-गणाः सार्धम्[3] ऋषिभिर् गगने स्थिताः ।
१०] त्वाम् अद्य दृष्ट्वा नन्दन्ति रामेण नि-हतं शरैः ॥१०॥ [१५
अद्य वैवस्वतो राजा प्र-भुः स प्रति-भाति मे ।
N] येन त्वं काल-सदृशो योजितः काल-धर्मणा ॥११॥ [N
N] त्वां भूमौ पतितं दृष्ट्वा भूयो रार्मरणोत्सुकाः । [N
ध्रुवम् अद्यैव सं-हृष्टा लब्ध-लक्षाः प्लवं-गमाः ।
११] समा-रोक्ष्यन्ति दुर्गाणि लङ्का-द्वाराणि सर्व-शः ॥१२॥ [१६
राज्येन नाऽस्ति मे कृत्यं किं करिष्यामि सीतया ।
१२] कुम्भकर्ण-विहीनस्य जीविते नाऽस्ति[11] मे स्पृहा ॥१३॥ [१७
यद्य् अहं भ्रातृ-हन्तारं न हन्मि युधि राघवम् ।
१३] ननु मे मरणं श्रेयो न[12] त्व् इदं[12] व्यर्थ-जीवितम् ॥१४॥ [१८
अद्यैव[13] तं[13] गमिष्यामि देशं[14] यत्राऽनु-जो मम ।
१४] नहि भ्रातृ-परित्यक्तः क्षणं जीवितुम् उत्-सहे[15] ॥१५॥ [१९
१५पू] देवा मां च हसिष्यन्ति दृष्टाः सर्वाऽपकारिणम्[15] ।
कथम् इन्द्रं[17] वि-जेष्यामि कुम्भ-कर्ण मृते त्वयि ॥१६॥ [२०
१६] तद् इदं माम् अनुप्राऽऽप्तं विभीषण-वचः शुभम् ।
यद् अ-ज्ञानान् मया तस्य न गृहीतं महाऽऽत्मनः ॥१७॥[18] [२१
१७] विभीषणाऽभिशापोऽयं कुम्भकर्ण-प्रहस्तयोः[18] ।

---

१. म-नास्ति ॥ २. ल₁ ल₂ ब अ प्र फ-हतं । ३. रा₁-सर्वे ऋषयो । ४. म-नास्ति । ५. ल₁ ब-निशितैः । ६. रा₂-निहतं त्वां रणे दृष्ट्वा विहसन्ति प्रहर्षिताः ॥ ७. रा₁-प्रभुर्हि । प्र रा₂-प्रभावः । फ-प्रभावं ॥ ८. रा₁-भूधराहर० । रा₂-भूधराभर० । ९. ल₁ ल₂प्र-०लक्ष्याः ॥ १०. रा₁-कार्यं । ११. रा₁-न मम ॥ १२. रा₁प्र रा₂ म-न चेदं ॥ १३. ल₁ल₂ ब अ प्र फ-अद्यैवाहं । १४. रा₁-कुम्भकर्ण हते त्वयि । १५. अ रा₂फ-नास्ति ॥ १६. अ-सर्वे । १७. रा₁-वैवस्वतं देवं वरुण च महाबलं ॥ १८. अ-नास्ति ॥

वि-नाशोऽयं समुत्-पन्नो मां पीडयति दारुणः ।।१८।।[2] [२२
तस्याऽयं कर्मणः प्राऽऽप्तो वि-पाको मम शोक-दः ।
१८] यन् मया धार्मिकः श्री-मान् स निर्-अस्तो वि-भीषणः।।१९।[२३
इति रजनी-चर-वरम् तदानीं
पितृपति-राष्ट्र-गतं तदा नि-शम्य ।
अनु-जम् अनु-शुशोच नैकधाऽसौ
१९] मृत्युम् अपश्यद् इवाऽऽत्मनस् तथा सः ।।२०।।[3][N

इत्यार्षे रामायणे युद्धे-काण्डे रावण-विलापो नाम
सप्तचत्वारिंशः सर्गः ।।४७।।

[वं-४८]= [अष्टाचत्वारिंशः सर्गः] =[दा-६९]

एवं वि-लप्यमानस्य रावणस्य दुर्-आत्मनः ।
१] श्रुत्वा शोकाऽभिसन्तप्तम् त्रि-शिरा वाक्यम् अब्रवीत्।।१।।[१
एवम् एतन् महा-सत्त्व न श्रुतं यद् वि-भीषणात् ।
२] न तु सत्-पुरुषा ह्य् एवं वि-लपन्ति यथा भवान् ।।२।। [२
ननु त्रि-भुवनस्याऽपि पर्य्-आप्तम् त्वं विनि-ग्रहे ।
३] स कथं प्राकृताऽऽत्मेव शोचस्य् आत्मानम् ईश्वरे ।।३।। [३

---

१. रा$_1$ ०मस्तन्मां पीडयते दृढं । २. अतः परमधिकः पाठः— रा$_1$-यद्वाक्यं कुम्भकर्णस्य मारीचस्य च यद्वचः । उक्तं विभीषणेनाऽपिं हितं तथ्यं च साधु च ॥ ३. ल$_1$ ल$_2$ ब भ प्र रा$_2$ फ म-नास्ति ॥ ४. रा$_1$-लङ्काकाण्डे । ५. ल$_2$ ब भ प्र फ म-सर्गसमाप्तिर्न दृश्यते ॥ ६. ब प्र रा$_2$ फ म-विलाप्य० ॥ ७. म-मैवं । ८. रा$_1$-च । ९. रा$_1$-एवं ॥ १०. रा$_1$-कस्मात् । ११. ल$_1$ ल$_2$ ब भ प्र रा$_2$ म-ईश्वरः ॥

ब्रह्म-दत्ताऽस्ति ते शक्तिः कवचं सायका धनुः ।
४] सहस्र-खर-[2]युक्तश् च[2] रथो मेघ-निभ-स्वनः ॥[3]४॥ [४
तदा त्वया वि-शेषेण निर्-अस्ता देव-दानवाः ।
५] स सर्वाऽऽयुध-सम्पन्नो राघवं हन्तुम् अर्हसि ॥५॥ [५
कामं तिष्ठ महा-राज निर्-गमिष्याम्य् अहं रणे ।
६] उद्-धरिष्यामि ते[7] शत्रुं गरुडः पन्न-गं यथा ॥६॥ [६
शम्बरो देव-राजेन नरको विष्णुना यथा ।
७] तथाऽद्य शयिता रामो मया युधि नि-पातितः ॥७॥ [७
श्रुत्वा त्रि-शिरसो वाक्यं रावणो राक्षसोऽधिपः ।
८] पुनर् जातम् इवाऽऽत्मानं मेने तस्य सु-[12]भाषितैः ॥८॥ [८
[13]श्रुत्वा तु [13]तस्य तद् वाक्यं देवाऽन्तक-नराऽन्तकौ ।
९] अति-कायश् च तेजस्वी बभूवुर् युद्ध-काङ्क्षिणः ॥९॥ [९
ततो हर्ष-समाविष्टा जगर्जुर् नैर्ऋतर्षभाः ।
१०] रावणस्य सुता वीराः शक्र-तुल्य-पराऽऽक्रमाः ॥१०॥ [१०
अन्तरिक्ष-चराः सर्वे [14]सर्वे माया-विशारदाः ।
११] सर्वे त्रिदश-दर्प-घ्नाः सर्वे सङ्ग्राम-काङ्क्षिणः ॥११॥ [११
सर्वेऽस्त्र-बल-सम्पन्नाः सर्वे विपुल-कीर्तयः ।

---

१. रा₁-सायकं । प्र-सायको । २. रा₁-०रसंयुक्तः । ३. अतः परम-धिकः पाठः—रा₁-शूलश्चान्तकसंकाशः परिघश्चापि दारुणः । यमदत्ता तथा शक्तिरेका शत्रुविनाशिनी ॥ तथा खड्गो महाघोरो नानास्त्राणि च मानद ॥ ४. रा₁-तथा । ५. रा₁-च शस्त्रेण वित्रस्ता देवतागणाः ॥ ६. रा₁-वधिष्यामि च ते रिपुं । ७. रा₁-शत्रुं ते गरुत्मानिव पन्नगं ॥ ८. रा₁-नमुचिर् । ९. रा₁-समरे । १०. रा₁-जानीहि सूदितः ॥ ११. रा₁-राक्षसेश्वरः । १२. रा₂-सुभाषितं ॥ १३. रा₂-ततः श्रुत्वा तु ॥ १४. रा₁ प्र-सर्वमाया० । १५. रा₁-०मयोधिनः ॥

१२] सर्वे समरम् आ-साद्य न श्रूयन्ते स्म निर्-जिताः[1] ॥१२॥[2] [१२

स तैस् तदा भास्कर-वह्नि-संनिभैः[3]

सुतैर् वृतः[4] शत्रु-बल-प्रमर्दनैः ।

रराज राजा मघवा यथाऽमरैर्[5]

१३] वृतो[6] महा-दानव-दर्प-नाशनैः ॥१३॥ [१४

इत्यार्षे रामायणे युद्ध-काण्डे[7] रावण-प्रबोधो[8]

नामाऽष्टाचत्वारिंशः सर्गः ॥४८॥

[वं-४९]= **[एकोनपञ्चाशः सर्गः]** =[दा-६९]

ततस् तान् स परि-त्यज्य[9] भूषयित्वा[10] च भूषणैः ।

१] आशीर्भिः[11] सु-प्रशस्ताभिः प्रेषयामास सं-युगे[12] ॥१॥ [१५

महोदर-महापार्श्वौ भ्रातराव् अपि[13] रावणः[14] ।

२] रक्षणाऽर्थे कुमाराणां प्रेषयामास सं-युगे[15] ॥२॥ [१६

---

१. रा१-पराजिताः । २. अतः परमधिकः पाठः—रा१-सर्वेऽस्त्रविदुषां श्रेष्ठाः सर्वे युद्धविशारदाः । सर्वे प्रवरविज्ञानाः सर्वे लब्धवरास्तथा ॥ ३. रा१ अ ब फ म-०सन्निभैः सुतैः । ४. रा२-वृतः शतैः शक्रबल० । ५. रा१-०वामरैर् । ६. रा१-यथा । रा२ फ-तथा ॥ ७. रा१ अ प्र-लंकाकाण्डे । ८. ल१ ल२ ब प्र रा२ फ म-०णविलापो ॥ ९. रा१-स पुत्रान् संपरि० । १०. ल१ ल२ ब अ प्र रा२ फ म-पूजयित्वा विभू० । ११. ल१ल२ ब अ म-०भिश्च प्र० । प्र रा२ फ-०भिस्तु प्र० । १२. रा१-संयुगं ॥ १३. रा१-उग्रविक्रमौ । म-अग्रविक्रमौ । १४. रा१-रावणः । १५. म-नास्ति ॥

तेऽभि-वाद्य महाऽऽ[2]त्मानो रावणं[3] राक्षसेश्वरम् ।
३] कृत्वा प्र-दक्षिणं सर्वे[4] महा-काया: प्र-तस्थिरे ॥३॥ [१७
सर्वौषधीभिर् गन्धैश् च समा-लब्धा महा-बला: ।
४] निर्-जग्मुर् नैर्ऋत-व्याघ्रा: षड्[5] जना युद्ध-काङ्क्षिण: ॥४॥ [१८
तत: सु-दर्शनं नागं नील-जीमूत-सन्निभम् ।
५] ऐरावण-कुले जातम् आ-रुरोह महोदर: ॥५॥ [२०
सर्वाऽऽयुध-समायुक्तं तूण-[6]तोमर-सङ्कुलम् ।[7]
६] रराज गजम् आ-स्थाय सवितेवाऽस्त-मूर्धनि ॥६॥ [२१
हयोत्तम-समायुक्तं सर्वाऽऽयुध-समन्वितम् ।
७] आ-रुरोह रथ-श्रेष्ठं त्रि-शिरा रावणाऽऽत्मज: ॥७॥[8] [२२
त्रि-शिरा रथम् आ-स्थाय वि-रराज धनुर्-धर: ।
९] स-विद्युदुल्क: स-[9]ज्वाल: सेन्द्रचाप इवाऽम्बु-द: ॥८॥ [२३
त्रिभि: किरीटैस् त्रि-शिरा: शुशुभे स रथोत्तमे ।
१०] हिम-वान् इव शैलेन्द्रस् त्रिभि: काञ्चन-पर्वतै: ॥९॥[10,11] [२४

---

१. म-ततस्ते । २. रा$_{1}$ म-०त्मानं । ३. रा$_{1}$-रिपुरावणं । ४. रा$_{1}$-चैव महावीर्या: ॥ ५. रा$_{1}$-सन्नद्धा यु० । ल$_{1}$ल$_{2}$ब अ-षड् नानायु० । रा$_{2}$-षडेते यु० । म-षड्गणा यु० ॥ ६. रा$_{1}$-शूलतो० । अ म-अत आरभ्य ७-मश्लोक-पूर्वार्धं यावन्नास्ति । ७. अत: परमधिक पाठ:—रा$_{1}$-मत्तसर्वाङ्गसंयुक्तं स्वर्णा-जालैरलङ्कृतं ॥ ८. अत: परमधिक: पाठ:—रा$_{1}$-पुष्पैर्मालायुधैश्चित्रै: कांचनैश्च विराजितं । किंकिणीशतनिर्घोषं सवरूथं घनस्वनं ॥ नीलपीत-सिताभिश्च पताकाभिर् विराजितं । हयै: परमकैर्युक्तं सर्वायुधसमन्वितं ॥ मनोमारुतरंहोभिश्चामरापीडधारिभि: ॥ ९. रा$_{1}$-संज्वाल: ॥ १०. रा$_{2}$-शृङ्गैर्हिरण्मयै: । ११. अत: परमधिक: पाठ:—रा$_{1}$-विरराज रथेऽन्यस्मिन् राजसूनुर्महाबल: ॥

अति-कायोऽ[1]ति-तेजस्वी राक्षसेन्द्र-सुतम् तदा ।
११] आ-रुरोह रथ-श्रेष्ठं श्रेष्ठः सर्व-धनुष्मताम् ॥१०॥ [२५
सु[2]-चक्राऽक्षं सु-संयुक्तं साऽनुकर्षं स-कू[3]बरम् ।
१२] सतूण-बाण-संयुक्तं प्राऽऽसाऽसिपरिघाऽऽकुलम् ॥११ [२६
स काञ्चन-विचित्रेण किरीटेन[4] वि-राजता ।
१३] भूषणैश् च बभौ चारु[5] प्र-भाभिर् इव भास्-करः ॥१२॥ [२७
वि-रराज रथे तस्मिन् राज-सूनुर् महा-रथः[6] ।
१४] वृतो नैर्ऋत-शार्दूलैर् वज्र-पाणिर् इवाऽमरैः ॥१३॥ [२८
हयम् उच्चैःश्रव-प्रख्यं श्वेतं कनक-भूषणम् ।
१५] मनो-जवं महा-कायम् आ-रुरोह नराऽन्तकः ॥१४॥ [२९
प्राऽऽसम् उल्का-निभं गृह्य वि-रराज नराऽन्तकः[7] ।
१६] शक्तिम् आ-दाय तेजस्वी हुताऽशन इवाऽऽबभौ ॥१५॥[8] [३०
देवाऽन्तकः समा-दाय परि-घं[9] वज्र-भूषणम् ।
१७] भुजैर् मन्दरम् उत्था(द्-स्था)प्य बभौ विष्णुर् इवाऽऽहवे[10] ॥१६ [N
१८पू] महा-पार्श्वो महा-तेजा गदाम् आ-दाय वीर्य-वान् । [३२पू
N] प्र-तस्थे रथम् आ-स्थाय सर्वाऽऽयुध-समन्वितम्[11] । [N
१८उ] वि-रराज गदा-पाणिः कुबेर इव सं-युगे ॥१७॥[12] [३२उ

---

१. रा$_{1}$ रा$_{2}$-०योऽपि ते० ॥ २. रा$_{1}$ ल$_{2}$ ब प्र रा$_{2}$ फ-सच० । ३. म-सुकू० ॥ ४. ल$_{1}$ ल$_{2}$ ब अ प्र फ-लांछनेन । ५. रा$_{1}$-मेरौ ॥ ६. रा$_{1}$ रा$_{2}$-महाबल: ॥ ७. अत: परमधिक: पाठ:—रा$_{1}$-कवचेन विचित्रेण भूषणैश् च विचित्रितः । ८. अत: परमधिक: पाठ:—रा$_{1}$-रराज हयपृष्ठे स सविद्युदिव तोयदः ॥ ९. अत: परमधिक: पाठ:—रा$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ-आरुरोह रथं वीरो दीप्ताग्निकनकप्रभं । १०. प्र-नास्ति ॥ ११. रा$_{1}$-नास्ति । १२. अत: परमधिक: पाठ:—रा$_{1}$-महोदरोऽपि बलवानिर्ययौ राक्षसोत्तमः ॥

ते प्र-तस्थुर् महाऽऽत्मानो बलैर् अ-प्रतिमैर् वृताः ।
१९] सुरा इवाऽमरावत्यां बभूवुर् युद्ध-दर्पिताः ॥१८॥ [३३
तान् गजैश् च तुरं-गैश् च रथैश् चाऽम्बुद-निस्वनैः ।
२०] अनु-जग्मुर् महाऽऽत्मानो राक्षस-प्रवरा युधि ॥१९॥ [३४
ते वि-रेजुर् महाऽऽत्मानः कुमाराः सूर्य-वर्चसः ।
२१] किरीटिनः श्रिया युक्ताः सप्तर्षय इवाऽम्बरे ॥२०॥ [३५
प्र-गृहीता बभौ तेषां छत्राणाम् आ-वली सिता ।
२२] शारदाऽभ्र-प्रकाशानां हंसानाम् आ-वली यथा ॥२१॥ [३६
मरणं वाऽपि निश्-चित्य शत्रूणां वा परा-जयम् । [३७
२३] इति कृत्वा मतिं वीरा निर्-जग्मुः संयुगाँऽर्थिनः ॥२२॥ [३८
जगर्जुश् चाऽपि ते नेदुश् चिक्रीडुश् चाऽपि राक्षसाः ।
२४] जहृषुश् च दुर्-आत्मानो निर्-यान्तो युद्ध-दुर्मदाः ॥२३॥ [३९
उत्-क्रुष्टा स्फोटिता नादैः सं-चचालेव मेदिनी ।
२६] रक्षसां सिंह-नादैश् च स्फुटतीऽव द्वि-धाऽम्बरम् ॥२४॥ [४०
तेऽभिनिष्-क्रम्य मुदिता राक्षसेन्द्रा महा-बलाः ।
२७] ददृशुर् वानराऽनीकं समुद्यत-शिलाऽऽयुधम् ॥२५॥ [४१
हरयोऽपि महाऽऽत्मानो ददृशुर् नैर्ऋतं बलम् ।
२८] हस्त्य्-अश्व-रथ-सम्बाधं किङ्किणी-शत-नादितम् ॥२६॥ [४२
नील-जीमूत-सङ्काशैः समुद्यत-महाऽऽयुधैः ।

---

१. रा$_1$-राक्षसप्रवरा युधि । २. रा$_1$-॰मरावत्या नानाप्रहरणायुताः ॥ ३. रा$_1$-॰दसन्निभैः । ४. रा$_1$-बलैरप्रतिमैर्वृताः ॥ ५. ल$_1$ल$_2$ब अ प्र रा$_2$फ म-स्थिता ॥ ६. रा$_1$-मरणं चाऽत्र निःश्रेयो न तु युद्धे पराजयः । ७. ल$_1$ल$_2$ब-युद्धकांक्षिणः ॥ ८. रा$_1$-॰चुक्रुशुश् । ९. रा$_1$-॰द्धदर्पिताः । रा$_2$-॰द्धहर्षिताः । १०. अतः परमधिकः पाठः—रा$_1$-ततो भेरीः समाजघ्नुः शंखान्दध्मुश्च हृष्टवत् । पटहान् डिंडिमांश्चापि तथान्यानथ वादयन् ॥ ११. रा$_1$-वसुंधरा ॥ १२. रा$_2$-॰तच्छिलायुधैः ।

२९] दीप्ताऽनल-रवि-प्रख्यैर् नैर्ऋतैः सर्व-तो वृतम् ॥२७॥ [४३
तद् दृष्ट्वा बलम् आ-यातं लब्ध-लक्षाः प्लवं-गमाः ।
३०] समुद्यत-महाशैला मुदा नेदुः पुनः पुनः ॥२८॥ [४४
ततः स-सुग्रीवरवं निशम्य
रक्षो-गणा वानर-यूथपानाम् ।
अ-मृष्यमाणाः पर-वीर्य-हर्षं
३१] महा-बला भीम-रवं प्र-णेदुः ॥२९॥[४] [४५
तद् राक्षस-बलं घोरं प्र-विश्य हरि-पुङ्गवाः[५] ।
३२] वि-चेरुश् चोद्-यतैः शृङ्गैर् न-गाः शिखरिणो यथा[७]॥३०॥ [४६
के-चिद् आ-काशम् आ-विश्य के-चिद् उर्व्यां प्लवं-गमाः[८] ।
३३] क्रुद्धा राक्षस-सैन्येषु चेरुर् द्रुम-शिलाऽऽयुधाः॥३१॥[९] [४७
नि-जघ्नुः शैल-शृङ्गाऽग्रैर् विव्यथुश् च परस्परम् । [N
३४] सिंह-नादान् वि-नेदुश् च रणे राक्षस-वानराः ॥३२॥[१०] [५०पू
ते पादप-शिला-शैलैश् चक्रुर् वृष्टिम् अन्-उत्तमाम् ।
३५] बाणौघैर् वार्यमाणांश् च हरयो भीम-विक्रमाः ॥३३॥[११] [N
शिखरैः शिखराऽऽभास् ते यातु-धानान् प्लवं-गमाः । [N
३६] नि-जघ्नुः सं-युगे क्रुद्धा हरयो राक्षसर्षभान्[१२] ॥३४॥
के-चिद् रथ-गतान् वीरान् गज-वाजि-गतान् अपि । [५१
३७] नि-जघ्नुः सहसाऽऽप्लुत्य यातु-धानान् बली-मुखाः[१३]॥३५॥

---

१. रा$_1$ रा$_2$-तं । २. रा$_1$ रा$_2$ ब म-०लक्ष्याः । ३. रा$_1$-०लाः प्रणेदुर्मुहुर्मुहुः । प्र-नास्ति ॥ ४. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-नास्ति ॥ ५. ल$_1$ ल$_2$ ब प्र रा$_2$ फ म-शैलैर् । ६. ल$_1$ ल$_2$ ब प्र-नागाः । ७. अ-नास्ति ॥ ८. म-नास्ति ॥ ९. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-नास्ति ॥ १०. रा$_1$ रा$_2$ प्र-०णापि । ११. म-नास्ति ॥ १२. रा$_1$-निर्जग्मुः समरे क्रुद्धाः कालान्तकयमोपमाः ॥ १३. म-नास्ति ॥

शैल-शृङ्ग-विभिन्नास् ते मुष्टि-निर्यात-लोचनाः । [५२
३८] चेलुः पेतुश् च नेदुश्[2] चै ततो राक्षस-पुङ्गवाः ।
राक्षसास् तु शरैस् तीक्ष्णैर् बिभिदुः कपि-कुञ्जरान् ॥[3]३६॥[५३
३९] ततः शूलैश् च वृक्षैश् च वि-सृष्टैर् हरि-राक्षसैः । [५५उ
शूल-मुद्गर-खड्गैश् च नि-शितैः शर-वृष्टिभिः[1] । [५४पू
४०] मुहूर्तेनाऽऽवृता भूमिर् अभवच् छोणिताऽऽप्लुता[5] ॥३७॥
४१पू] वि-कीर्णाः पतिता शाखै[4] रक्षोभिर् उप[7]-मर्दिताः । [५६
आ-क्षिप्ताः क्षिप्यमाणाश् च भग्न-शीर्षाश् च वानराः ॥३८[५७पू
४२] अन्योऽन्यं पातयामासुः परस्पर-जिघांसया ।
४३पू] रिपु-शोणित-दिग्धाऽङ्गैस् तत्र वानर-कुञ्जरैः ॥३९॥ [N
वानरं वानरेणैव जघ्नुर् योधा हि राक्षसाः ।
४४] राक्षसं राक्षसेनैव पिपिषुर् वानरा भुवि[14] ॥[15]४०॥ [५८
आ-च्छिद्य च शिलास् तेभ्यो नि-जघ्नू राक्षसा हरीन्[16] ।
४५] तेषाम् आ-च्छिद्य शस्त्राणि[17] जघ्नू रक्षांसि वानराः ॥४१॥[५९
नि-जघ्नुः शैल-शिखरैर् बिभिदुश् च परस्परम्[18] ।
४६] सिंह-नादान् वि-नेदुश् च रणे वानर-राक्षसाः ॥४२॥ [६०
छिन्न-वर्म-तनुत्राणा राक्षसा वानरैर् हताः ।
४७] सुस्राव रुधिरं तेभ्यः सलिलं[19] पर्वताद् इव ॥४३॥ [६१

---

१. फ-०ष्टिभिः क्रांतलो० । म-०ष्टिभिर्वान्तलो० । २. ल$_1$ ल$_2$-नेदुस्ते । ३. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-नास्ति ॥ ४. रा$_1$-पंचशाखैश् । ५. रा$_1$ म-०णितप्लुता ॥ ६. रा$_1$-पर्वताकारै । ७. रा$_1$-अवमर्दितैः । ८ रा$_1$-आक्षिप्याक्षिप्य० ॥ ९. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-नास्ति ॥ १०. रा$_1$-वानरान् । ११. रा$_1$-जघ्निरे चैव । १२. रा$_1$-राक्षसान् । १३. रा$_1$-निजघ्नुर् । १४. रा$_1$-युधि । १५. म-नास्ति ॥ १६. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-आक्षिप्ता बलिनो जघ्नू राक्षसा वानरास् तथा । म-नास्ति । १७. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-गात्राणि निजघ्नुश्चापि ॥ १८. म-नास्ति ॥ १९. ल$_1$ ल$_2$ ब अ प्र फ म-स्वरसः ॥

रथेन रथिनं[1] चाऽपि वारणं वारणेन च । [६२
४८] हयेन च हयं के-चिन् निष्-पिपिषुर् बली-मुखाः ॥४४॥ [६३पू
क्षुर-प्रैर् अर्ध-चन्द्रैश् च भल्लैश् च नि-शितैः शरैः । [६५पू
४९] वैतस्तिकैश् च नि-शितैस् तथ्यं[2]-तोमर-मुद्गरैः ॥४५॥[3] [N
राक्षसा वानरेन्द्राणां बिभिदुश् चिच्छिदुर् बहून् । [६५उ
५०] शिलाश् च गिरि-सानूनि वृक्षांश् च महतस् तथा ॥४६॥ [N
वि-कीर्णैः पर्वतैश् चैव द्रुमैश् छिन्नैश् च सं-युगे ।
५१] हतैश् च कपि-रक्षोभिर् धरणी दुर्-गमाऽभवत् ॥४७॥[3] [६६
तस्मिंस्[4] तथा सं-यति सम्प्र-वृत्ते
प्र[5]-हृष्यमाणे तु बले कपीनाम्[5] ।
नि-पात्यमानेषु च राक्षसेषु[6]
५२] महर्षयो देवँ[7]-गणाश् च नेदुः । [६८
ते चाऽपि सर्वे हरयः प्र-हृष्टा
वि-नेदुर् आक्ष्वेडित-सिंह-नादैः ॥४८॥[8] [N
ततो हयं मारुत-तुल्य-वेगम्
५३] आ-रुह्य शक्तिं नि-शितां प्र-गृह्य ।
नराऽन्तको वानर-राज-सैन्यं
विवेश मीनस् तु यथाऽर्णवौघम् ॥४९॥[9] [६९
स वानरान् सप्त-दशाऽति-वीरान्
५४] प्राऽऽसेन दीप्तेन विनिर्-बिभेद ।

---

१. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-०थिनश्चापि राक्षसं राक्षसेन वा ॥ २. आयुधविशेषः, तु. पंजा. धद्धा, धप्पा । ३. ल$_1$ ल$_2$ ब अ प्र रा$_2$फ म-नास्ति ॥ ४. रा$_2$-तस्मिन् प्रवृत्ते तुमुले विमर्दे । ५. ब अ प्र रा$_2$ फ म-नास्ति । ६. ल$_2$ अ प्र रा$_2$ म-प्रगृह्यमाणेषु महारथेषु । ७. रा$_2$फ म-भूतग० । ८. रा$_2$-अतः परं सर्गसमाप्तिः—इति संकुलयुद्धं नाम सर्गः ॥ ९. रा$_2$- नास्ति ॥

एक-क्षणेनेन्द्र-रिपुर् दुर्-आत्मा[1]

जघान सैन्यं हरि-पुङ्गवानाम् ॥५०॥[2] [७०

दद्दृशुश् च महाऽऽत्मानं[3] हय-पृष्ठे प्रति-ष्ठितम् ।

५५] चरन्तं हरि-सैन्येषु भूत-विद्याधरर्षभाः ॥५१॥ [७१

स तस्य दद्दशे मार्गं[4] मांस-शोणित-कर्दमम्[5] ।

५६] पतितैः पर्वताऽग्राऽऽभैर् वानरैर् अभिसं-वृतम्[6] ॥५२॥[7] [७२

यावद् वि-क्रमितुं बुद्धिं चक्रुः प्लवग-पुङ्गवाः ।

५७] तावद् वेगेन निष्-क्रम्य[8] निर्-बिभेद नराऽन्तकः ॥५३॥[9] [७३

N] धावमानान् कपीन् सर्वान् प्राऽऽस-भृत् सोऽनु-धावति ।[10] [N

५८पू] सर्वासु दिक्षु बल-वान् प्रावृषीऽव बलाहकः ॥५४॥[11] [७६पू

यतो यतः स दद्दशे प्राऽऽस-पाणिर् नराऽन्तकः ।[12]

५९] ततस् ततस्[13] तं मन्यन्ते[13] कालोऽयम् इति वानराः ॥५५॥[14] [N

ज्वलन्तं प्राऽऽसम् उद्-यम्य सङ्ग्रामाऽग्रे नराऽन्तकः ।

N] ददाह हरि-सैन्यानि काननानि यथाऽनलः ॥५६॥ [७४

यावद् उत्-पाटयामासुः शैलान् वृक्षांश् च वानराः ।

६०] तावत् प्राऽऽस-हताः पेतुर् वज्राऽऽक्रान्ता इवाऽचलाः ॥५७[15] [७५

न शेकुर् द्रवितुं वीरा न स्थातुं न च मर्दितुम् ।

---

१. रा$_1$ म-महात्मा । २. रा$_2$-नास्ति । रा$_1$-अतः परं सर्गसमाप्तिः 'इत्यार्षे रामायणे युद्धकांडे पंचकुमारनिर्याणं नाम सर्गः ॥ ३. रा$_1$-दुरात्मानं ॥ ४. रा$_1$ल$_1$ल$_2$ ब श्र-मार्गो । प्र फ-मार्गे । ५. रा$_1$ल$_1$ल$_2$ब श्र रा$_2$ फ-०कर्दमः । ६. रा$_1$ श्र प्र-०वृतः । ७. ल$_1$ ल$_2$ ब फ-नास्ति ॥ ८. श्र प्र रा$_2$ म-एतानतिक्रम्य ॥ ९. रा$_1$ ल$_1$ल$_2$ ब-नास्ति । १०. रा$_1$ श्र-विचचार नरान्तकः । ११. अतः परमधिकः पाठः—रा$_1$-कर्षन्वानरसैन्यानि महाभ्राणीव मारुतः । ल$_1$ ल$_2$ ब-नास्ति ॥ १२. म-नास्ति । १३. रा$_1$-ततोऽभ्यमन्यन्त । १४. ल$_1$ ल$_2$ ब-नास्ति ॥ १५. ल$_1$ ल$_2$ ब श्र-नास्ति ॥

६१] स्थितं चैवोत्-पतन्तं च धावन्तं च स विव्यधे ॥५८॥ [७७
एकेनाऽन्तक-कल्पेन प्राऽऽसेनाऽऽदित्य[1]-तेजसा ।
६२] भिन्नानि हरि-सैन्यानि नि-पेतुर् धरणी-तले ॥५९॥ [७८
वज्र-निष्पेष-निनदं प्राऽऽसस्य विनि-पातनम्[2] ।
६३] न शेकुर् वानराः सोढुं स्पर्शम्[3] अग्नेर् इव प्र-जाः[3] ॥६०॥ [७९
पततां हरि-वीराणां रूपाणि प्र-चकाशिरे ।
६४] विद्युद्-भग्नाऽग्रकूटानां शैलानां पतताम् इव ॥६१॥ [८०
ये नैं[4] पूर्वं महाऽऽत्मानः कुम्भ-कर्णेन पातिताः[5] ।
६५] [नराऽन्तकेन ते सर्वे द्राविता निर्-जिता हताः ।[6]] [८१.पू
N] तेऽस्वस्था वानर-श्रेष्ठाः सु-ग्रीवं पर्युपाँ[7]ऽऽसते ॥६२॥ [N
वि-चेष्टमानां सु-ग्रीवो ददर्श हरि-वाहिनीम् । [८१.उ
६६] नराऽन्तक-भय-त्रस्तां वि-द्रवन्तीं ततस् ततः ॥६३॥ [८२
वि-द्रुतां वाहिनीं दृष्ट्वा ददर्श सं[8] नराऽन्तकम् ।
६७] प्राऽऽस-हस्तं[9] तमे आ-यान्तं हय-पृष्ठेन दर्पितम् ॥६४॥ [८३
अथोवाच महा-तेजाः सु-ग्रीवो हरि-पुङ्गवः ।
६८] कुमारम् अङ्ग-दं वीरं[10] शक्र-तुल्य-पराऽऽक्रमम् ॥६५॥ [८४
गच्छैनं[11] राक्षसं वीर घोरं तुर-गम् आ-स्थितम् ।
६९] क्षोभयन्तं[12] हरि-बलं[12] क्षिप्रं प्राणैर् वि-योजय ॥६६॥ [८५
स[13] च[13] भर्तुर् वचः श्रुत्वा निष्-पपाताऽङ्ग-दस् तदा ।

---

१. ल$_1$ ल$_2$ ब अ-०नान्तकवर्चसा । रा$_2$ फ-०नान्तकृते० ॥ २. ल$_1$ ब रा$_2$ फ-०पातितं । ३. ल$_1$-ततो नेदुर्महास्वनाः । ल$_2$ब अ प्र फ म-तेऽतिनेदुर्महास्वनाः । रा$_2$-ते विनेदुर्महास्वराः ॥ ४. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-च । ५. ल$_1$ ल$_2$ ब अ प्र फ-योधिनः । ६. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-नास्ति । ७. रा$_1$-उपतस्थिरे ॥ ८. रा$_1$-च नरा० । ल$_1$ ल$_2$ब-नरकान्तकं । ९. रा$_1$ रा$_2$-०सपाणिनं । ल$_1$ ल$_2$ ब अ-०स्तं स ॥ १०. रा$_1$-पुत्रं ॥ ११. रा$_1$-जह्येनं । १२. ल$_2$ब अ प्र फ-०न्तं च सैन्यानि । रा$_2$-०यन्निव सैन्यानि । म-०न्तं हि सैन्यानि ॥ १३. रा$_1$-तु पितुर् ।

७०] अनीकान् मेघ-सङ्काशान् मेघाऽनीकाद् इवांऽशु-मान् ॥६७ [८६
स हरिः शैल[1]-सङ्काशो हरीणाम् उत्-तमोऽङ्ग-दः ।[2]
N] रराजाऽङ्गद-नद्धाऽङ्गः स-धातुर् इव पर्वतः ॥६८॥[2] [८७
निर्-आयुधो महा-तेजाः केवलं नखदंष्ट्र[3]-वान् ।
७१] नराऽन्[4]तकम् उपाऽऽगम्य वालि-सूनुर् उवाच ह ॥६९॥ [८८
७२पू] तिष्ठ किं प्राकृतैर् एभिर् हरि[6]भिस् त्वं करिष्यसि ।[7]
अस्मिन् वज्र-सम-स्पर्शे प्राऽऽसं मे क्षिप[8] वक्षसि ॥७०॥ [८९
अङ्ग-दस्य वचः श्रुत्वा प्र-चुक्रोध[9] नराऽन्तकः ।
७३] सं-पीड्य दशनैर् ओष्ठौ निः-श्वस्य च पुनः पुनः ॥७१॥ [९०
स प्राऽऽसम् आ[10]-दाय तदाऽङ्ग-दाय
सं[11]मुज्-ज्वलन्तं सहसा सं[12]सर्ज ।
स वालिपुत्रोरसि वज्र-कल्पे
७४] बभूव भग्नः पतितश् च भूमौ ॥७२॥ [९२
तं प्राऽऽसम् आ-लोक्य तदा[13] च भग्नं
सुपर्णकृत्तोरगभोग-कल्पम् ।
तलं[14] समुद्-यम्य स वालि-पुत्रस्
७५] तुरं-गमं तस्य जघान मूर्ध्नि[15] ॥७३॥ [९३
स तस्य वाजी नि-पपात भूमौ
तल-प्रहारेण विशीर्ण-शीर्षः ।

---

१. ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ-शैलसंघातसं० । २. म-नास्ति ॥ ३. ल$_{1}$ ल$_{2}$ ब अ-०दंतवान् । ४ ल$_{2}$ ब-नरकान्तकं ॥ ५. रा$_{1}$-वानरैर् । ६. रा$_{1}$-प्राकृतैस् । ७. अतः परमधिकः पाठः—रा$_{1}$-युध्यस्वाद्य मया सार्धं दर्पं ते विनयाम्यहं । ८. ल$_{1}$ल$_{2}$ब अ प्र फ-क्षेप्तुमर्हसि ॥ ९. रा$_{1}$-जातक्रोधो ॥ १०. ल$_{1}$ ल$_{2}$ ब अ प्र म-आविध्य । ११. रा$_{2}$ फ-समुज्वलन्तं । १२. रा$_{2}$ फ-ससर्ज वेगेन च वानराय ॥ १३. रा$_{1}$ ल$_{1}$ल$_{2}$ब अ प्र-तदावभग्नं । रा$_{2}$-तदा प्रभग्नं । १४. ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ म-मुष्टिं । १५. ल$_{1}$ ल$_{2}$ ब अ प्र-भूमौ ॥

निर्भग्न-तालुः स्फुटिताऽक्षितारो
७६] निर्यात-जिह्वोऽचल-सन्निकाशः ॥७४॥ [९४
नराऽन्तकः क्रोध-वशं जगाम
हतं तुरं-गं पतितं सम्-ईक्ष्य ।
स मुष्टिम् उद्-यम्य महाऽनुभावो
७७] जघान शीर्षे युधि वालि-पुत्रम् ॥७५॥ [९५
ततोऽङ्ग-दो मुष्टि-निपात-भग्नात्
सुस्राव तीव्रं रुधिरं च शीर्षात् ।
मुहुः प्र-जज्वाल मुमोह चाऽपि
७८] सं-ज्ञां समा-साद्य च वि-स्मितोऽभूत् ७६॥ [९६
अथाऽङ्ग-दो वज्र-सम-प्रवेगं
सं-वर्त्य मुष्टिं गिरि-वज्र-कल्पम् ।
नि-पातयामास तदा महाऽऽत्मा
७९] नराऽन्तकस्योरसि वालि-पुत्रः ॥७७॥ [९७
स मुष्टि-निष्पेष-विभिन्न-वक्षा
रक्तं वमच् छोणित-दिग्ध-गात्रः ।
नराऽन्तको भूमि-तले पपात
८०] यथाऽचलो वज्र-निपात-भग्नः ॥७८॥ [९८
अथाऽन्तरिक्षे त्रिदशोत्तमानां
वनौकसां चाऽपि महा-निनादः ।
बभूव तस्मिन् नि-हतेऽति-वीर्ये

---

१. रा$_1$-विभिन्नतालुः । २. रा$_1$ ल$_1$ ल$_2$ व म-०ताक्षतारो । रा$_2$ फ-स्फुरिताक्षि० । ३. ल$_1$ ल$_2$ ब अ प्र-निर्घातजि० । रा$_2$-निरस्तजि० ॥ ४. ल$_1$ल$_2$ ब अ प्र रा$_2$ फ म-अथांगदो । ५. रा$_1$-प्रमूर्धः । ल$_1$ ल$_2$ ब अ प्र-स्वशी० । ६. रा$_1$-समालभ्य ॥ ७. ल$_1$ ल$_2$ ब अ-०समानवेगं । ८ रा$_2$ फ-संबध्य ॥ ९. रा$_2$ फ-तथा । १०. रा$_1$-०तभिन्नः ॥ ११. रा$_1$-त्रिदिवेश्वराणां ।

८१] नराऽन्तके वालि-सुतेन सं-ख्ये ॥७९॥ [९९

अथाऽङ्ग-दो राम-मनः-प्रहर्षणं[2]
सु-दुष्करं तत् कृतवान् हि कर्म ।
वि-सिष्मिये नाऽति[3] च[3] भीम-विक्रमः
८२] पुनश् च युद्धाय मनो दधे तदा ॥८०॥ [१००

इत्यार्षे रामायणे युद्ध[4]-काण्डे नराऽन्तक-वधो नामैको-
नपञ्चाशः सर्गः ॥ ४९ ॥

[वं-५०]= **[पञ्चाशः सर्गः]** =[दा-७०]

नराऽन्तकं हतं दृष्ट्वा[5] चुक्रुधुर्[6] नैर्ऋतर्षभाः ।
१] देवाऽन्तकस् त्रि-मूर्धा च पौलस्त्यश् च महोदरः ॥१॥ [१
आ-रूढो मेरु-सङ्काशं वारणेन्द्रं महोदरः ।
२] वालि-पुत्रं महा-वीर्यम् अभि-दुद्राव वीर्य-वान्[7] ॥२॥ [२
भ्रातृ-व्यसन-सन्तप्तस् तथा[8] देवाऽन्तको बली ।
३] आ-दाय परि-घं घोरम् अङ्ग-दं सम्[9]प्र-दुद्रुवे ॥३॥ [३
रथम् आदित्य-सङ्काशं युक्तं परम-वाजिभिः ।
४] आ-स्थाय त्रि-शिराश् चाऽपि वालि-पुत्रम् उपाऽद्रवत् ॥४॥ [४
स त्रिभिर् मेघ[10]-सङ्काशैर् नैर्ऋतैस्[11] तैर्[11] अभि-द्रुतः[12] ।

---

१. म-वीरे ॥ २. रा१-०मनः प्रहर्षयन् । ३. रा१-चाति स ॥ ४. रा१ प्र-लंकाकांडे । म-युद्धपर्वणि ॥ ५. ल१ ल२ब अ प्र-०न्तकवधं श्रुत्वा । ६. रा१-शुशुचुर् ॥ ७. म-नास्ति ॥ ८. रा१-तदा । ९. ल१ ल२ ब अ प्र फ-स प्र० ॥ १०. रा१-देवसं० । ११. रा१-नैर्ऋतेन्द्रैर् । १२. अतः परमधिकः पाठः—ल१ ल२ ब अ प्र रा२ फ-हर्षाद् द्विगुणितोत्साहश्चकार मतिमान्बलं ।

५] महा-विटपम् आ-साद्य शालम् उत्-पाट्य वीर्य-वान्[2] ॥५॥ [५
देवाऽन्तकाय तं वीरश् चिक्षेप बल-वद् बली ।
६] महा-वृक्षं[3] महा-शैले शक्रो दीप्तम् इवाऽशनिम् ॥६॥ [६
त्रि-शिरास् तं तु चिच्छेद शरैर् आशीविषोपमैः ।
७] वृक्षं नि-कृत्तम् आ-लक्ष्य[4] समुत्-पाट्य[5] ततोऽङ्ग-दः[6] ॥७॥ [७
स ववर्ष ततो वृक्षान्[7] छिलाश् च कपि-कुञ्जरः ।
८] त्रि-शिरास्[8] तान् प्र-चिच्छेद सं-क्रुद्धो नि-शितैः शरैः ॥८॥ [८
परिघाऽग्रेण[9] तान् वृक्षाञ् छिलाश् च नि-जघान सः ।
९] त्रि-शिरास् त्व् अङ्ग-दं वीरम् अभि-दुद्राव सायकैः ॥९॥ [९
गजेन समभि-द्रुत्य[10] वालि-पुत्रं महोदरः[11] ।
१०] आ-जघानोरसि व्यू-ऊढे तोमरैर् वज्र-सन्निभैः ॥१०॥ [१०
देवाऽन्तकश् च सं-क्रुद्धः परि-घेण ततोऽङ्ग-दम्[12] ।
११] उप-गम्याऽभि-हत्वा च मुहुर् मुहुर् अपाऽक्रमत् ॥११॥ [११
स[13] त्रिभिर् नैर्ऋत-श्रेष्ठैर् युगपत् समभि-द्रुतः ।
१२] न[14] विव्यथे महा-तेजा वालि-पुत्रः प्रताप-वान् ॥१२॥ [१२
तलेन भृशम् उत्-पत्य जघान गजम् अङ्ग-दः[15] । [१३उ
१३] नि-पेततुम् ततो नेत्रे ननादाऽथ स वारणः ॥१३॥ [१४पू
विषाणं चाऽस्य निष्-कृष्य वालि-पुत्रो महा-बलः ।
१४] देवाऽन्तकम् अभि-द्रुत्य स जघान ततो(?थो)रसि ॥१४॥ [१५

---

१. ल$_{2}$ ब अ प्र-उद्यम्य । २. म-नास्ति ॥ ३. रा$_{1}$-०वृक्षे ॥ ४. ल$_{1}$ ल$_{2}$ ब अ-आलोक्य । ५. ल$_{1}$ ल$_{2}$ ब अ प्र-उत्पत्य च । ६. म-नास्ति ॥ ७. रा$_{1}$-शैलान् । ८. रा$_{1}$-तान्प्रचिच्छेद संक्रुद्धस्त्रिशिरा ॥ ९. रा$_{1}$-शिलाश्च परिघाग्रेण बभंज विबुधांतकः ॥ १०. ल$_{1}$ ल$_{2}$ अ प्र फ-०भिप्लुत्य । ११. अतः परमधिकः पाठः—रा$_{2}$-परिघाग्रेण निष्पेष्य शिलाश् च रजनीचरः ॥ १२. रा$_{1}$ म-तदांग० ॥ १३. रा$_{1}$-निशितैस्तोमरैश्चैव । १४. रा$_{1}$-तैस्तु विद्धो ॥ १५. रा$_{1}$-अत आरभ्य १५-शश्लोकपूर्वार्धं यावन्नास्ति ॥

स विकलित-सर्वाऽङ्गो वातोद्धूत इव द्रुमः ।
१५] लाक्षा-रस-सवर्णं च सुस्राव रुधिरं मुखात्[1] ॥१५॥ [१६
अथाऽऽश्वस्य महा-तेजाः कृच्छ्राद् देवा[2]ऽन्तको बली ।
१६] आ-विध्य परि-घं वेगाद् आ-जघान पुनर्[3] अङ्ग-दम् १६॥[१७
परिघाऽभिहतश् चाऽपि वानरेन्द्राऽऽत्मजस् तदा ।
१७] जानुभ्यां पतितो भूमौ पुनर् अभ्युत्-पपात ह ॥१७॥ [१८
तम् उर्व[4]-पतन्तं त्रि-शिराः शरैर् आशीविषोपमैः[5] ।
१८] रोषाद् धरि-पतेः पुत्रं ललाटेऽभि-जघान ह ॥१८॥ [१९
ततोऽङ्ग-दं परि-क्षिप्तं त्रिभिर् नैर्ऋत-पुङ्गवैः ।
१९] हनूँ-मान् अभिवि[6]-ज्ञाय नीलश् चाऽपि प्र-तस्थतुः॥१९॥ [२०
ततश् चिक्षेप शैलाऽग्रं नीलस् त्रि-शिरसे तदा ।
२०] तद् रावण-सुँतः शूँरो निर्-बिभेद शितैः शरैः ॥२०॥ [२१
तद्-बाण-शत-निर्भिन्नं विदारित-शिला-घनम् ।
२१] स-विस्फुलिङ्गं स-ज्वालं नि-पपात गिरेः शिरः ॥२१॥ [२२
तत् तु चूर्णितम् आ-लोक्य हर्षाद् देवाऽन्तकस् तदा ।
२२] परि-घेणाऽभि-दुद्राव मारुताऽऽत्मजम् आ-हवे ॥२२॥ [२३
तम् आ-पतन्तम् उत्-पत्य हनु-मान् कपि-कुञ्जरः ।
२३] आ-जघान तदा मूर्ध्नि वज्र-वेगेनँ मुष्टिना ॥२३॥ [२४

---

१. रा१-संचचाल च सुस्राव शोणित च मुखाद् बहु ॥ २. रा१-क्रोधान्तको । ३. ल१ ल२ ब अ प्र रा२ फ-तदा । म-ततो ॥ ४. रा१-चोत्प० । ५. अतः परमधिकः पाठः—रा१-त्रिभिर्विव्याध निशितैर्वालिपुत्रं महोरसि । पुनः स निशितैस्तीव्रैः कंकबर्हिणवर्जितैः ॥ ६. रा१-०मानथ वि० । ल१ ल२ ब प्र-हनूमान्नाम वि० । म-०मानपि वि० ॥ ७. रा१-०सुतो भीमो ॥ ८. रा१-०शिलातलं ॥ ९. रा१ म हनू० । १०. रा१-वज्रकल्पेन ॥

स मुष्टि-निष्पिष्ट-विदीर्ण[1]-मूर्धा
विशीर्ण-दन्ताऽक्षिबिलं वि-जिह्वः ।
देवाऽन्तको राक्षस-राज-सूनुर्[2]
२४] गताऽसुर् उर्व्यां सहसा पपात ॥२४॥ [२६
तस्मिन् हते राक्षस-राज-सूनौ
महा-बले सं-यति देव-शत्रौ ।
महोदरः क्रोध-वशाच् छरौघैर्[3]
२५] ववर्ष जाम्बूनद-चित्र-पुङ्खैः ॥२५॥ [२७
स[4] तैः शरौघैर् अभि-वर्ष्यमाणो
विभिन्न-गात्रः कपि-सैन्य-पालः ।
विष्टब्ध[5]-गात्रोऽपि बभूव नीलो
२६] वि-ष्टम्भितस्[6] तेन[7] महा-बलेन ॥२६॥ [३०
ततस् तु नीलः प्रति-लभ्य सं-ज्ञां
स शैलम् उत्-पाट्य स-वृक्षखण्डम् ।
सु-दूरम् उत्-पत्य खम्[8] उग्र-वेगो
२७] महोदरं तेन जघान मूर्ध्नि ॥२७॥ [३१
स तेन शैलेन समा-हतस् तदा
रक्षोऽधिपो भूमि-तले पपात ।
महोदरो जीवितम् उत्-ससर्ज
२८] यथा गजः[9] सिंहबलाऽभिभूतः ॥२८॥ [३२

इत्यार्षे रामायणे युद्ध-काण्डे[10] देवाऽन्तक-महोदर-वधो नाम पञ्चाशः सर्गः ॥५०॥

---

१. ल$_1$ल$_2$ब अ प्र रा$_2$फ म-०विकीर्ण० । २. रा$_1$-०जपुत्रो ॥ ३. ल$_1$ल$_2$ ब अ प्र रा$_2$फ म-नीलं त्रिमूर्धा कुपितः शरौघैर् ॥ ४. ल$_1$ ल$_2$ब अ प्र रा$_2$फ म-शितैः शरैस्तैर् । ५. ल$_1$ल$_2$ब अ प्र म-विसृष्टगा० । ६. रा$_1$-०म्भितेनाशु ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-स दू० । ८. रा$_1$-तमुग्रवेगं ॥ ९. ल$_1$ ल$_2$ ब अ-द्विपः ॥ १०. रा$_1$ प्र-लंकाकाण्डे ॥

[1]पितृव्यं नि-हतं दृष्ट्वा त्रि-शिराः क्रोध-मूर्च्छितः ।
२९] हनु-मन्तं सु-स[2]ङ्क्रुद्धो वि[3]व्याध नि-शितैः शरैः ॥१॥ [३३

स वायु-पुत्रः कुपितश् चिक्षेप शिखरं गिरेः ।
३०] त्रि-शिरास् तच् छरैस् तीक्ष्णैर् बिभेद बहु-धा बली ॥२॥[4] [३४
तच् छिन्नं शिखरं दृष्ट्वा द्रुम-वर्षं महा-बलः ।
३१] वि-ससर्ज महा-वीरो रावणस्य सुतं प्रति ॥३॥ [३५
ताम् आ-पतन्तीं सहसा द्रुम-वृष्टिं प्रताप-वान् ।
३२] त्रि-शिरा नि-शितैर् बाणैश् चिच्छेद च ननाद च ॥४॥[4] [३६

ततो हनू-मान् उत्-पत्य हयांस् त्रि-शिरसस् त[5]दा ।
३३] वि-ददार नखैः क्रु[6]द्धो गजेन्द्रं मृग-राड् इव ॥५॥ [३७
अथ शक्तिं सम[7]-दाय काल-रात्रिम् इवाऽन्तकः ।
३४] हनू-[8]मन्तं प्र-चिक्षेप त्रि-शिरा रावणाऽऽत्मजः ॥६॥ [३८
दिवि क्षिप्तां महोल्काऽऽभां शक्तिं तां तु [9]महा-प्रभाम् ।
३५] बभञ्ज हनु-मांस् तस्य हर्षाच् च वि-ननाद ह ॥७॥ [३९
[तां दृष्ट्वोरग-सङ्काशां शक्तिं भग्नां हनू-मता ।[10]
३६] वि-नेदुर् वानराः सर्वे प्र-हृष्टा जल-दा इव ॥८॥] [४०

---

१. इतः पूर्वमधिकः पाठः—म-हनूमंतं सुसंक्रुद्धो विव्याध निशितैः शरैः । तलेन हनुमानुत्पत्य हयान् चिक्षेप मूर्धनि ॥ २ रा₁-सुसंरब्धो । ३. म-अत आरभ्य पञ्चमश्लोकस्य तृतीयपादं यावन्नास्ति ॥ ४. ल₁ ल₂ ब श्र प्र रा₂ फ-नास्ति ॥ ५. रा₂-तथा । ६. रा₂ फ-तीक्ष्णैर् ॥ ७. ल₁ ल₂ ब श्र-उपादाय । ८. रा₁-हनूमति विचि० । ल₁ ल₂ ब श्र म-हनुमते प्र० ॥ ९. रा₁-सुमहा० ॥ १०. ल₁ ल₂ ब श्र प्र रा₂ फ म-नास्ति ॥

ततः[1] खड्गं समुद्-यम्य त्रि-शिरा राक्षसोत्तमः ।
३७] नि-चखान तदा शूरो वानरेन्द्रस्य वक्षसि ॥९॥ [४१
खड्ग-प्रहाराऽभिहतो हनू[2]-मान् प्लवगोत्तमः ।
३८] आ-जघान त्रि-शिरसं तलेनोरसि वीर्य-वान् ॥१०॥ [४२
स तथाऽभि-हतस् तेन [3]खड्ग-हस्तस् तदा भुवि[3] ।
३९] नि-पपात महा-तेजास् [4]त्रि-शिरा राक्षसोत्तमः ॥११॥ [४३
पततस् तस्य खड्गं तु समा-क्षिप्य महा-कपिः ।
४०] ननाद गिरि-सङ्काशस् त्रासयन्[5] सर्व-राक्षसान् ॥१२॥ [४४
अ-मृष्यमाणस् तं घोषं[6] त्रि-शिराः क्षिप्रम् उत्थि(दु-स्थि)तः ।
४१] उत्-पत्य च हनू-मन्तं आ-जघान स मुष्टिना ॥१३॥ [४५
तेन मुष्टि-प्रहारेण स चचाल महा-कपिः ।
४२] कुपितश् चाऽपि जग्राह किरीटे राक्षसर्षभम् ॥१४॥[7] [४६
स तेन खड्गेन महा-शिरांसि
कपिः समस्तानि स-कुण्डलानि
क्रुद्धः प्र-चिच्छेद तदा हनू-मान्
४३] त्वष्ट्रात्मजस्येव शिरांसि शक्रः ॥१५॥ [४७
तान्य् आयताऽक्षीण्य् अग-सन्निभानि
प्रदीप्त-वैश्वानर-भास्वराणि
पेतुः शिरांसीऽन्द्र-रिपोर् धरण्यां
४४] ज्योतींषि मुक्तानि यथाऽर्क-मार्गात् ॥१६॥ [४८

---

१. रा$_{१}$-ततः ॥ २. ल$_{१}$ ल$_{२}$ ब प्र रा$_{२}$-हनु० ॥ ३. रा$_{१}$म-शस्त्रहस्तो बलायुधि । ४. ल$_{१}$ ल$_{२}$ ब अ प्र रा$_{२}$ फ म-विसंज्ञस्त्रिशिरास्तदा ॥ ५. ल$_{१}$ ल$_{२}$ ब प्र-०यन्निव रा० । म-त्रासयामास रा० ॥ ६. ल$_{१}$ ल$_{२}$ ब अ प्र रा$_{२}$ फ म-घोरं ॥ ७. ल$_{१}$ ल$_{२}$ब अ प्र फ म-नास्ति ॥ ८. रा$_{१}$-०भासुराणि । ९. रा$_{१}$-बभुः ॥

तस्मिन् हते देव-रिपौ त्रि-शीर्षे
हनू-मता शक्र-पराऽऽक्रमेण ।
नेदुः प्लवं-गाः प्र-चचाल भूमी
४५] रक्षांसि सर्वाणि वि-दुद्रुवुश् च ॥१७॥[1] [४९
हतं त्रि-शिरसं दृष्ट्वा तथैव च महोदरम् ।
हतौ च प्रेक्ष्य तेजस्वी देवाऽन्तक-नराऽन्तकौ । [५०
४६] मुहूर्तं मोहम् आ-स्थाय[2] नैवाऽचेष्टत राक्षसः ॥१८॥[3] [N
N] ततश् चिरं स तु ध्यात्वा महाऽऽत्मा भीम-विक्रमः । [N
चुकोप सु-महातेजा महा-पार्श्वो महा-बलः ।
४७] जग्राहाऽर्चिष्-मतीं चाऽपि गदां सर्वाऽऽयसीं तदा ।१९ [५१
हेम-पट्ट-शतैर् नद्धां[4] मांस-शोणित-लेपनाम् ।
४८] वि-रोचमानां वपुषा शत्रु-शोणित-तर्पिताम्[5] ॥२०॥ [५२
तेजसा सम्प्रदीप्ताऽग्रां रक्त-माल्य-विभूषिताम् ।
४९] ऐरावतकराऽऽकारां सर्व-भूत-भयाऽऽवहाम् ॥२१॥[6] [५३
गदाम् आ-दाय सं-क्रुद्धो महा-पार्श्वो महा-यशाः[7] ।
५०] हरीन् समभि-दुद्राव युगाऽन्ताऽग्निर् इव प्र-जाः ॥२२॥ [५४
ऋषभस् तं समुत्-पत्य वानरो वरुणाऽऽत्मजः ।
५१] महा-पार्श्वे समा-साद्य तस्थौ तस्याऽग्र-तो बली[8] ॥२३॥ [५५
तं पुरस्-तात् स्थितं दृष्ट्वा वानरं पर्वतोपमम् ।
५२] आ-जघानोरसि क्रुद्धो[9] गदया वज्र-कल्पया ॥२४॥ [५६

---

१. रा$_1$-अतः परं सर्गसमाप्तिः—इत्यार्षे रामायणे लंकाकांडे त्रिशिरोवधो नाम सर्गः ॥ २. ल$_1$ल$_2$ब अ प्र रा$_2$ फ-आसाद्य । ३. म-मुहूर्तं शोकमाविष्टः शांतिं चैव न लब्धवान् ॥ ४. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-०शताबद्धां । ५. रा$_1$-०तच्चर्चितां ॥ ६. ल$_1$ ल$_2$ ब अ म-नास्ति ॥ ७. फ-महाबलः ॥ ८. रा$_1$ म-हरिः ॥ ९. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-क्रोधाद् ॥

स तथाऽभि-हतस् तेन गदया वानरर्षभः ।
५३] भिन्न-वक्षाः समा-धूतः सुस्राव रुधिरं बहु [2]॥२५॥ [५७
स सम्प्राऽऽप्य चिरात् सं-ज्ञाम् ऋषभो वानरर्षभः ।
५४] क्रुद्धो विस्फुरमाणौष्ठो महा-पार्श्वम् अवैक्षत ॥२६॥ [५८
अभि-दुद्राव वेगेन राक्षसेन्द्रम् अ-मर्षणः । [६४
N] आऽक्षिपत् स ततो वीरस् तामेव महतीं गदाम् [5]॥२७॥ [N
गृहीत्वा तां गदां वीरो व्याँ-विध्य च पुनः पुनः ।
५५] दुर्-आत्मानं महा-पार्श्वं जघान रण-मूर्धनि ॥२८॥ [६५
स तया गदया भिन्नो निर्यात-दशनेक्षणः ।
५६] नि-पपात महा-पार्श्वः [10]शम्बरो वेन्द्र-सूदितः ॥२९॥ [६६
तस्मिन् हते भ्रातरि रावणस्य
तन् नैर्ऋतानां बलम् अर्णवाऽऽभम् ।
त्यक्त्वाऽऽयुधं केवलजीवितार्थि
५७] दुद्राव [14]भीतं निहत-प्रधानम् ॥३०॥ [७८

इत्यार्षे रामायणे युद्ध-काण्डे त्रिशिरो-महापार्श्व-वधो

नामैकपञ्चाशः सर्गः ॥ ५१ ॥

---

१. रा$_{1}$ रा$_{2}$-तयाभि० । २. ल$_{1}$ ल$_{2}$ ब अ-नास्ति ॥ ३. रा$_{1}$-समवाप्य । ४. रा$_{1}$-निरैक्षत ॥ ५. ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ म-नास्ति ॥ ६. ल$_{1}$ ल$_{2}$ ब अ प्र फ म-विव्याध । ७. ल$_{1}$ रा$_{2}$-महात्मानं महा० । ल$_{2}$ ब अ फ म-महापार्श्वं महात्मानं ॥ ८. रा$_{2}$-तदा । ९. ल$_{1}$ ल$_{2}$ ब अ प्र फ-निर्धात० । १०. रा$_{1}$-वज्राहत इवाचलः । ११. रा$_{1}$-तद्राक्षसानां । १२. ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ-मुक्तायु० । १३. ल$_{1}$ ल$_{2}$ ब अ प्र फ म-०वितार्थं । १४. ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ म-भिन्नार्णवसन्निकाशं ॥ १५. रा$_{1}$ प्र फ म-लंकाकांडे ॥

स्व-बलं व्यथितं दृष्ट्वा तस्मिन् सङ्ग्राम-मूर्धनि ।
१] भ्रातॄंश्[2] च नि-हतान्[2] सं-ख्ये शक्र-तुल्य-पराऽऽक्रमान् १. [१
पितृव्यौ नि-हतौ चैव समरेष्व् अ-पलायिनौ ।
२] महोदर-महापार्श्वौ भ्रातरौ रावणस्य[3] तौ[3] ॥२॥ [२
चुकोपाऽथ महा-तेजा ब्रह्म-दत्त-वरो भुवि[4] ।
३] अति-कायो महा-वीर्यो देव-दानव-दर्प-हा ॥३॥ [३
स भास्कर-सहस्रस्य सं-घाते[5] इव भास्वरः[5] ।
४] [रथम् आ-स्थाय शक्राऽरिर् दुद्राव हरि-यूथपान् ।][6] [४
N] सूतं सं[7]-चोदयामास वाक्यं चेदम् उवाच ह ॥४॥ [N
नि-हतानाम् अमात्यानां दग्धस्य नगरस्य च ।
N] सम्प्र-माक्ष्येऽहम्[8] अद्याऽऽशु हत्वा तौ[8] राम-लक्ष्मणौ ॥५॥ [N
रघु-वृक्षं हनिष्यामि मैथिली-फले-पुष्प-द्रुमम्[9] ।
N][10] प्र-शाखा यस्य सु-ग्रीवः सर्वे च हरि-यूथपाः ॥६॥ [N
कर्मणो[11]ऽस्य हि तौ[11] मूलं भ्रातरौ राम-लक्ष्मणौ ।
N] मूले हते हतं सर्वं तौ हनिष्यामि सं-युगे ॥७॥ [N
स दिशो दश घोषेण रथेनाऽति-रथो[12] भृशम्[13] ।
N] नादयंश् च धनुस् तूर्णं[14] राघवं प्रति जग्मिवान् ॥८॥ [N

---

१. रा१-निहतं । २. ल१ ल२ ब श्र प्र-चाभिह० ॥ ३. ल१ ल२ ब प्र रा२ फ म-राक्षसर्षभौ ॥ ४. रा१-विभुः ॥ ५. रा१-संघातमिव राक्षसः । ६. ल१ ल२ ब श्र प्र रा२फ म-नास्ति । ७. रा२-स नोद० ॥ ८. रा१-संप्रमाक्ष्यामि च भयं हत्वोभौ ॥ ९. रा२ फ-०लीपुष्पपादपं । १०. ल१ल२ब श्र प्र म-नास्ति ॥ ११. रा१-०णोऽपि हि यन् ॥ १२. रा१-०रथी । १३. म-बली । १४. ल१ ल२ ब श्र-०यन् समरे सर्वं । प्र रा२ फ-०यन् परमं सर्वं । म-०यन् परमं क्रुद्धो ॥

पूरिता तेन शब्देन स-नदी-गिरि-कन्दरा ।
N] सं-चचाल मही सर्वा त्रस्त-सिंह-मृग-द्विजा ॥९॥ [N
स वि-स्फार्य[2] महच्[1] चापं किरीटी मृष्ट-कुण्डलः ।
५] नाम वि-श्रावयामास[4] ननाद च महा-स्वनम् ॥१०॥ [५
तेन सिंह-प्रणादेन[3] नाम-विश्रावणेन च ।
६] ज्या-शब्देन च भीमेन त्रासयामास वानरान् ॥११॥ [६
तस्य ते[5] रूपम् आ-लोक्य यथा विष्णोस् त्रि-विक्रमे । [८पू
७] भयाऽऽर्ता[6] वानरास् तत्र व्य्-अद्रवन्त दिशो[7] दशः ॥१२॥ [७उ
अति-कायं समा-साद्य सर्वे[8] ते मूढ-चेतसः ।
८] शरण्यं शरणं जग्मुर् लक्ष्मणाऽग्रजम् आ-हवे ॥१३॥ [९
ततोऽति-कायं काकुत्स्थो रथ-स्थं पर्वतोपमम् ।
९] ददर्श धन्विनं[9] दूराद् गर्जन्तं काल-मेघ-वत् ॥१४॥ [१०
तं तु[10] दृष्ट्वा महा-घोरं[11] राघवोऽथ[12] वि-सिष्मिये[12] ।
१०] वानरान् सान्त्वयित्वा च[13] वि-भीषणम् उवाच ह ॥१५॥ [११
कोऽयं पर्वत-सङ्काशो धनुष्-मान्[14] हरि-लोचनः ।
११] युक्ते हरि-सहस्रेण[15] वि-शाले स्यन्दने स्थितः ॥१६॥ [१२
शरैः शूलैः शितैः खड्गैर् मुद्गरैश् च परश्वधैः ।
१२] अर्चिष्-मद्भिर्[16] वृतो भाति भूतैर् इव महेश्वरः ॥१७॥ [१३
काल-जिह्वा-प्रकाशाभिर् य एषोऽति-विराजते[17] ।

---

१. ल$_1$ ल$_2$ ब श्र प्र-महाचापं । २. ल$_1$ ल$_2$ ब श्र-विस्फारया० ॥ ३. ल$_1$ ल$_2$ब-सिंहविनादेन । ४. रा$_1$-संश्रव० ॥ ५. रा$_1$-रूपं समालोक्य । ६. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ म-त्रस्ता । ७. रा$_1$ म-परस्परं ॥ ८. रा$_1$-सर्वतो ॥ ९. रा$_1$-ध्वजिनं ॥ १०. रा$_1$-स तं । ११. रा$_1$-दुरात्मानं । १२. रा$_1$-०वो विस्मितोऽभवत् । १३. रा$_1$-०यित्वैवं ॥ १४. रा$_1$-वपुष्मान् । १५. रा$_2$-खरस० ॥ १६. प्र रा$_2$फ-सार्चिष्मद्भिर् ॥ १७. ल$_1$ल$_2$ब श्र म-एषोऽभिवि० । प्र-एषोऽभिविगर्जते । रा$_2$ फ-एषोऽत्र वि० ।

N] आ-वृतो रथ-शक्तीभिर् वि-द्युद्भिर् इव तोय-दः ॥१८॥ [१४
धनूंषि चाऽस्य स-ज्यानि[1] हेम-पृष्ठानि सर्व-शः[2] ।
१३] शोभयन्ति रथ-श्रेष्ठं शक्र-चाप[3] इवाऽम्बु-दम् ॥१९॥[4] [१५
कोऽयं राक्षस-शार्दूलो रण-भूमिं वि-राजयन् ।
१४] अभ्य्-एति रथिनां श्रेष्ठो रथेनाऽऽदित्य-वर्चसा ॥२०॥ [१६
ध्वज-शृङ्ग-प्रतिष्ठेन राहुणाऽभिवि-राजते[5] ।
१५] सूर्य-रश्मि-मुखैर् बाणैर् दिशो दश वि-राजयन् ॥२१॥ [१७
त्रि-णतं मेघ-निर्ह्रादं हेम-पृष्ठम् अलं-कृतम् ।
N] इन्द्रस्येव धनुश् चाऽस्य कार्मुकं भाति बिभ्रतः ॥२२॥[6] [१८
स-ध्वजः स-पताकश् च साऽनुकर्षो महा-रथः[7] ।
१७] चापाऽसिभिः समा-युक्तो मेघ-स्तनित-निस्वनः ॥२३॥[8] [१९
विंशतिर् दश च द्वे च तूणा रथ-वरे स्थिताः ।
१८] कार्मुकाणि च भीमानि गदाश् चोग्र-प्रदर्शनाः ॥२४॥[8] [२०
द्वौ च खड्गौ रथ-गतौ पार्श्व-स्थौ पार्श्व-शोभिनौ[9] ।
१९] चतुष्-किष्कू त्सरू दिव्यौ[10] दश-हस्तौ प्रमाण-तः ॥२५॥ [२१
रक्तमाल्याऽम्बर-धरो महापर्वत-सन्निभः ।
२०] कालः काल-महावक्त्रो[11] मेघ-वस्त्रम् इवाऽम्बरम् ॥२६॥ [२२
काञ्चनाऽङ्गद-नद्धाभ्यां भुजाभ्याम् एष[12] शोभते ।
२१] शृङ्गाभ्याम् इवैव दीप्ताभ्यां[13] हिम-वान् पर्वतो यथा ॥२७॥[14] [२३

---

१. रा$_1$-सज्जानि । २. रा$_1$ रा$_2$ फ-सर्वतः । ३. ल$_1$ ल$_2$ब अ प्र रा$_2$ फ-०चापम् । ४. म-नास्ति ॥ ५. म-०रश्मिप्रभैर् ॥ ६. रा$_1$-नास्ति ॥ ७. रा$_2$फ-महाबलः । ८. ल$_1$ल$_2$ ब अ प्र-नास्ति ॥ ९. रा$_2$-०शोभितौ । १०. म-चतुर्हस्तौ च दिव्यौ च ॥ ११. ल$_1$ ल$_2$ ब अ प्र-महावक्त्रो । रा$_2$-महारौद्र ॥ १२. रा$_1$-एव शोभितः । १३. ल$_1$ ल$_2$ ब-अतिदी० । १४. अ-नास्ति ॥

कुण्डलाभ्यां च यस्यैतद् भाति वक्त्रं शुभेक्षणम्[२] ।
२२] पुनर्वस्व्-अन्तरे यद्-वद् भाति पूर्णो निशा-करः ॥२८॥ [२४
आ-चक्ष्व मे महा-बाहो कोऽयं राक्षस-पुङ्गवः ।
२३] यं दृष्ट्वा वानराः सर्वे भयाऽऽर्ता वि-द्रुता दिशः ॥२९॥ [२५
स पृष्टो राज-पुत्रेण रामेणाऽमित-तेजसा ।
२४] आ-चचक्षे महा-तेजा राघवाय वि-भीषणः ॥३०॥ [२६
दश-ग्रीवो महा-तेजा राजा वैश्रवणाऽनुजः ।
२५] भीम-कर्मा महोत्साहो रावणो राक्षसाऽधिपः ॥३१॥ [२७
तस्यैष वीर्य-वान् पुत्रो रावण-प्रतिमो रणे ।
२६] वृद्ध-सेवी श्रुत-धरः सर्वाऽस्त्र-विदुषां वरः ॥३२॥ [२८
अश्व-पृष्ठे रथे नागे खड्गे धनुषि कल्पते ।
२७] भेदे सान्त्वे प्र-दाने च नये मन्त्रे च सं-मतः ॥३३॥ [२९
अस्य प्र-भावः सु-महान् कथ्यते देव-दानवैः । [N
२८] तनयं विद्धि मालिन्यास् त्व् अतिकायेति यं विदुः ३४॥ [३० उ
अनेनाऽऽराधितो ब्रह्मा तपसा भाविताऽऽत्मना ।
२९] अस्त्राणि चाऽस्य दत्तानि रिपूणां च परा-जये[६] ॥३५॥ [३१
सुराऽसुरैर् अवध्य-त्वं दत्तम् अस्य स्वयं-भुवा ।
३०] एतच् च कवचं दिव्यं रथश् चैवैष भास्वरः ॥३६॥ [३२
एतेन शत-शो देवा दानवाश् च परा-जिताः ।
३१] रक्षितानि च रक्षांसि यक्षाश् च युधि सूदिताः[८] ॥३७॥ [३३
वज्रं वि-ष्टम्भितं बाणै रणे चेन्द्रस्य धी-मतः ।
३२] पाशः सलिल-राजस्य युद्धे प्रति-हतः पुरा ॥३८॥ [३४

१. ल१ ल२ ब प्र-सुशोभनं । २. अ-नास्ति ॥ ३. प्र-नास्ति ॥
४. ल१ ल२ ब-प्रमाणे ॥ ५. रा२-तस्य ॥ ६. रा१-०जयं ॥ ७. अ-निर्जिताः ।
८. ल१ ल२ ब-नास्ति ॥

एषोऽति-कायो बल-वान् राक्षसानां महा-रथः ।
३३] रावणस्य सुतो धी-मान् देव-दानव-दर्प-हा ॥३९॥ [३५
तद् अस्मिन् क्रियतां यत्नः क्षिप्रं पुरुष-पुङ्गव ।[2]
३४] पुरा वानर-सैन्यानि क्षयं नयति सायकैः ॥४०॥ [३६
ततोऽति-कायो बल-वान् प्र-विश्य हरि-वाहिनीम् ।
३५] वि-स्फारयामास धनुर् ननाद च पुनः पुनः ॥४१॥ [३७
तं भीम-दर्शनं दृष्ट्वा रथ-स्थं रथिनां वरम् ।
३६] अभि-पेतुर् महाऽऽत्मानः प्र-धाना ये वनौकसः ॥४२॥ [३८
द्वि-विदः कु-मुदो मैन्दो नीलः शरभ एव च ।
३७] पाद-पैर् गिरि-शृङ्गैश् च युगपत् समुपाऽद्रवन् ॥४३॥ [३९
तेषां वृक्षांश् च शैलांश् च शरैः कनक-भूषितैः ।
३८] अति-कायोऽति-तेजस्वी चिच्छेदाऽस्त्र-विदां वरः ॥४४॥ [४०
तांश् च सर्वांश् च स हरीन् शरैः सर्वाऽऽयसैर् बली ।
३९] विव्याधाऽभि-मुखान् सं-ख्ये भीम-कर्मा निशा-चरः ४५ [४१
ते[10]ऽर्दिता बाण-वर्षेण भिन्न-गात्राः प्लवं-गमाः ।
४०] न शेकुर् अति-कायस्य पुर-तः स्थातुम् आ-हवे ॥४६॥ [४२
तत् सैन्यं[11] हरि-वीराणां त्रासयामास राक्षसः ।
४१] मृग-यूथम् इव क्रुद्धः[12] केसरी बले-दर्पितः ॥४७॥ [४३
स राक्षसेन्द्रो हरि-सैन्य-मध्ये
ह्य् अ-युध्यमानं न जघान कं-चित्
उपेत्य[13] रामं च महा-धनुष्मान्

---

१. रा₂फ म-महाबलः ॥ २. रा₁-ततस्तस्मिन्क्रियायत्तं कुरु राघवपुंगव ॥ ३. ल₁ ल₂ ब अ-भीमपौरुषं । प्र रा₂ फ-भीमपुरुषं । ४. रा₁-रथिनं । ५. रा₁-०नाश्च ॥ ६. ल₁ ल₂ब अ प्र-०स्त्रभृतां ॥ ७. रा₁-चैव सर्वान्स । ल₁ ल₂ ब अ-समग्रानपि । म-ववर्ष शरैः । ८. म-सर्वान्हरीन् । ९. रा₁-बलैः ॥ १०. प्र-ते भिन्ना ॥ ११. म-सर्वं हरिसैन्यं तु । १२. ल₁ ल₂ब अ प्र रा₂-क्रुद्धो हरियौवनद० ॥ १३. रा₁-उत्पत्य ।

४२] स-गर्वितं वाक्यम् इदं बभाषे ॥४८॥ [४४

अयं स्थितोऽहं शर-चाप-पाणिर्

न प्राकृतं कं-चन योधयामि ।

यस्याऽस्ति शक्तिर् व्यवसाय-युक्ता

४३] ददातु मे शीघ्रम् इहाऽद्य युद्धम् ॥४९॥ [४५

तद् तस्य वाक्यं ब्रुवतो नि-शम्य

चुकोप सौमित्रिर् अमित्र-हन्ता ।

अ-मृष्यमाणश् च समुत्-पपात

४४] जग्राह बाणांश् च ततः प्र-हस्य ॥५०॥ [४६

पुरस्ताच् चाऽति-कायस्य वि-चकर्ष महद्-धनुः । [४७पू

४५] पूरयित्वा महा-शैलान् आ-काशं सागरं दिशः ।

N] ज्या-शब्दो लक्ष्मणस्योग्रस्[2] त्रासयन् रजनी-चरान्[3] ॥५१॥ [४८

सौमित्रेरं धनुषो घोषं श्रुत्वा प्रति-भयं तदा ।

४६] विसिष्मिये महा-तेजा राक्षसेन्द्र-सुतो बली ॥५२॥ [४९

अथाऽति-कायः कुपितो दृष्ट्वा लक्ष्मणम् अग्र-तः ।

४७] आ-दाय नि-शितं बाणम् इदं वचनम् अब्रवीत् ॥५३॥ [५०

बालस् त्वम् असि सौमित्रे वि-क्रमेष्व् अ-विचक्षणः ।

४८] गच्छ किं काल-सदृशं मां योधयितुम् इच्छसि[4] ॥५४॥ [५१

न हि मद्-बाहु-सृष्टानां शराणां नत-पर्वणाम् ।

४९] सोढुम् उत्-सहते वेगम् अन्तरिक्षम् अथो मही ॥५५॥[5] [५२

सुख-प्रसुप्तं कालाऽग्निं किं बोधयितुम् इच्छसि[6] ।

५०] न्य्-अस्य चापं नि-वर्तस्व मा प्राणैस् त्वं वि-मोक्ष्यसे ॥५६॥ [५३

अथवा त्वं प्रति-ष्टम्भान् न नि-वर्तयितुम इच्छसि[7] ।

---

१. रा₁-प्रशम्य ॥ २. ल₁ ल₂ ब प्र-०णस्याग्रे । फ-०णस्याथ । ३. ल₁ ल₂ ब ञ प्र-अनुजीविनः ॥ ४. म-अर्हसि ॥ ५. ल₁ ल₂ ब ञ प्र-नास्ति ॥ ६. रा₁-चोदयितुमर्हसि ॥ ७. रा₁-नास्ति ।

५१] तिष्ठ प्राणान्[1] परि-त्यज्य गमिष्यसि यम-क्षयम्[2] ॥५७॥ [५४
पश्यं मे[3] नि-शितान् बाणान् अरि-दर्प-विनाशनान् ।
५२] ईश्वराऽऽयुध-सङ्काशांम् तप्त-काञ्चन-भूषणान्[4] ॥५८॥ [५५
N] सितपीताऽमस्म् तीक्ष्णो मुक्ता-विद्रुम-भूषणः । [N
५३पू] एष ते सूर्य-सङ्काशो बाणः पास्यति शोणितम् ।[5]
N] मृग-राज इव क्रुद्धो नाग-राजस्य शोणितम्[6] ॥५९॥ [५६
यद्य् अपि त्वां वधिष्यामि न मे[7] कीर्तिर् भविष्यति ।
५४] अज्ञात[8]-वीर्यं बालं च ख्यातं[9]स्य त्रिदशां[10]ऽऽलये ॥६०॥ [N
कामस्[11] तु यदि[11] ते मोहान् मां योधयितुम् आ[12]-हवे ।
५५] यत्नाद् गृहाण वि-शिखांम्[13] ततस् त्यक्ष्यसि जीवितम् ६१ [N
श्रुत्वाऽति-कायस्य वचः स-रोषं
स[14]-गर्वितं सं-यति राज-पुत्रः ।
न चैव चुक्रोध बले[15] धृताऽऽत्मा
५६] प्रोवाच चैनं स ततो महाऽऽत्मा ॥६२॥ [५७
न वाक्य-मात्रेण भवान् प्र-धानो
न कत्थना[16]ः सत्-पुरुषा भवन्ति ।
मयि स्थिते धन्विनि बाण-पाणौ
५७] वि-दर्शय स्वाऽऽत्म[17]-बलं दुर्-आत्मन् ॥६३॥ [५८
कर्मणा दर्शयाऽऽत्मानं न वि-कत्थितुम् अर्हसि ।

---

१. ल$_1$ ल$_2$ ब अ प्र फ म-त्रास । २. रा$_1$-यमालयं ॥ ३. रा$_1$-पश्येमान् । ४. ल$_1$ ल$_2$ ब-०भूषितान् ॥ ५. म-नास्ति । ६. रा$_1$-नास्ति ॥ ७. ल$_1$ ल$_2$ ब अ-ते । ८. ल$_1$ ल$_2$ प्र म-अजात० । ९. रा$_1$-ख्यातं च । १०. रा$_2$-त्रिदिवाल० ॥ ११. ल$_1$ ल$_2$ब अ-कामाद्वा यदि वा । १२. ल$_1$ ल$_2$ ब अ-इच्छसि । १३. प्र रा$_2$फ-स्वशरान् ॥ १४. रा$_1$-जगर्ज तं । ल$_1$ ल$_2$ ब अ-सुग० १५. ल$_1$ ल$_2$ ब अ-बली ॥ १६. रा$_1$ ल$_1$ प्र रा$_2$ फ-०नात् । १७. रा$_1$-०यस्वाश्च बलं ॥

५८] पौरुषेण हि यो युक्तः स वै[1] शूर इहोच्यते[2] ॥६४॥ [५९
सर्वाऽऽयुध-समायुक्तो धन्वी रथ-वरे स्थितः ।
५९] शरैर् वा यदि वाऽप्य् अस्त्रैर्[3] दर्शय स्व-पराक्रमम् ॥६५॥[६०
ततः शिरस्[5] ते नि-शितैः पातयिष्याम्य् अहं शरैः[4] ।
६०] मारुतः काल-सम्पक्वं वृन्तात्[6] ताल-फलं यथा ॥६६॥ [६१
अद्य[7] ते मामका बाणास् तप्त-काञ्चन-भूषणाः[8] ।
६१] पास्यन्ति रुधिरं देहात् पुरा देवा यथाऽमृतम् ॥६७॥ [६२
बालोऽयम् इति वि-ज्ञाय न[9] माऽव-ज्ञातुम् अर्हसि । [६३
६२] बालो वा यदि वा वृद्धो मृत्युम्[10] अभ्य्[11]-एति(?षि)सं-युगे६८[६४पू
लक्ष्मणस्य वचः श्रुत्वा हेतु[12]-मत् परमाऽर्थ-वत्[13] ।
६३] अति-कायः प्र-चुक्रोध[14] बाणं चाऽथ[15] समा[16]-ददे ॥६९॥[६५
तम् आ-पतन्तं सौमित्रिस् त्रि-धा चिच्छेद लाघवात्[17] ।
६४] रावणिः परमाऽमर्षी[18] शरैर्[19] एनम् उपाऽद्रवत् ॥७०॥ [N
ततः शर-सहस्रेण सं-छाद्य रघु-नन्दनम् ।
६५] वि-भीषणं च साऽमात्यं यूथ-पांश् चाऽभि[20]-दुद्रुवे ॥७१॥ [N
सं-त्रास्य वानरीं सेनां शर-वर्षैर् महा-भुजः ।
६६] सौमित्रिम् अभि-दुद्राव पुनर् एव महा-मृधे[21] ॥७२॥ [N
तम् आ-पतन्तं सहसा प्रत्य्-अगृह्णान् महा-भुजः[21] ।

---

१. रा$_1$ रा$_2$ फ म-नः । २. रा$_1$-इवोच्यते । ल$_1$ ल$_2$ ब-इव कथ्यते । अ-इति कथ्यते ॥ ३. रा$_1$-आप्यथवा शस्त्रैर् ॥ ४. रा$_1$-शरैस् । ५. रा$_1$-शिरः । ६. ल$_1$ ल$_2$ ब अ प्र फ-वृक्षान्तात् ॥ ७. रा$_1$-अथ । ८. रा$_1$-०भूषिताः ॥ ९. रा$_2$-नावज्ञातुमि-हार्हसि । १०. रा$_1$-मृत्युर् । प्र-मृत्युश् । ११. ल$_1$ ब अ फ-नाभ्येति । प्र-चा-भ्येति ॥ १२. म-बलवान् । १३. प्र रा$_2$ म-०र्थवित् । १४. रा$_1$-प्रभुः क्रोधाद् । १५. रा$_1$ प्र रा$_2$ फ म-चास्य । १६. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-समादधे ॥ १७. रा$_1$-राघवः । १८. रा$_1$-०मर्षः । १९. ल$_1$ ल$_2$ ब अ-शनैर् ॥ २०. रा$_1$-च विदुद्रुवे । रा$_2$ म-चापि दु० ॥ २१. ल$_1$ म-नास्ति ॥

६७] लक्ष्मणो राक्षस-श्रेष्ठं शरैर् अ[1]त्यग्नि-सन्निभैः ॥७३॥ [N
ततो विद्या-धरा भूता देवा देवर्षयस् तथा ।
६८] गुह्यकाश् च महाऽऽत्मानस् तद् युद्धं ददृशुस् [2]तदा [3]॥७४॥ [६६
ततोऽति-कायः कुपितो धनुष्य् आ-धाय सायकम् ।
६९] लक्ष्मणाय [4]प्र-[5]चिक्षेप सं-क्षिपन्तम् इवाऽम्बरम् ॥७५॥ [६७
तम् आ-पतन्तं वि-शिखं शरम् आशीविषोपमम् ।
७०] अर्ध-चन्द्रेण चिच्छेद लक्ष्मणः पर-वीर-हा ॥७६॥[६८
तं नि-कृत्तं शरं दृष्ट्वा कृत्त-भोगम् इवोर-गम् ।
७१] अति-कायोऽति-सं[6]रब्धः पञ्च बाणान् समा[7]-ददे ॥७७॥ [६९
तान् छरान् सं [8]प्र-चिक्षेप लक्ष्मणाय निशा-चरः ।
७२] तान् अ-प्राप्तान् छरैस् तीक्ष्णैर् चिच्छेद युधि लक्ष्मणः ७८[७०
स तान् छित्वा[9] शरैस् तीक्ष्णैर् लक्ष्मणः पर-वीर-हा ।
७३] आ-ददे नि-शितं बाणं ज्वलन्तम् इव तेजसा ॥७९॥ [७१
तम् आ-दाय धनुः-श्रेष्ठे योजयामास लक्ष्मणः ।
७४] वि-चकर्ष च वेगेन वि-ससर्ज च रक्षसे[10] ॥८०॥[७२
पूर्णाऽऽयत-विसृष्टेन शरेणाऽऽनत-पर्वणा ।
७५] ललाटे राक्षस-श्रेष्ठम् आ-जघान स वीर्य-वान् ॥८१॥ [७३
स ललाटे शरो मग्नस्[11] तस्य भीमस्य रक्षसः ।
७६] ददृशे शोणितेनाऽक्तः पन्नगेन्द्र इवाऽऽहवे [12]॥८२॥ [७४

---

१. प्र-आदित्यस० ॥ २. ल१ ल२ ब अ-पुरा । ३. प्र-नास्ति ॥ ४. ल१ ल२ ब अ प्र-विचि० । ५. रा२-प्रदीप्तमिव पावकं । अ-अत आरभ्य ७८-तमश्लोकस्य प्रथमपादपर्यन्तं नास्ति ॥ ६. रा१ ल१ ल२ ब प्र फ-०संक्रुद्धः । ७. ल२ ब प्र-०दधे ॥ ८. रा१-संप्र० ॥ ९. रा१-दृष्ट्वा शरांस्तीक्ष्णान् । ल२ ब अ प्र फ म-छित्वा शरांस्तीक्ष्णान् ॥ १०. रा१-लक्ष्मणः । ल१ ल२ ब अ प्र रा२-राक्षसे ॥ ११. रा१-मग्नो धीमतस्तस्य । ब प्र-लग्नस्तस्य भी० । १२. प्र-नास्ति ॥

राक्षसः प्र-चकम्पे च लक्ष्मणेषु-प्रचालितः ।[1]
७७] रुद्र-बाण-हतं घोरं यथा त्रिपुर-गोपुरम् ॥८३॥ [७५
चिन्तयामास चाऽऽश्वस्य वि-श्रम्य च महा-बलः ।[2]
७८] साधु-मुक्तेन[3] बाणेन श्लाघनीयोऽसि मे रिपुः ॥८४॥ [७६
इत्य् एवं[4] सं वि-चिन्त्याऽथ वि-गृह्य च भुजाव् उभौ ।[5]
७९] स्यन्दनोपस्थम् आ-स्थाय[6] चापम् आ-दाय चोत्-तमम् ८५ [७७
त्रीण्य् एकं पञ्च सप्तेति सायकान् राक्षसर्षभः[7] ।
८०] आ-ददे सं-दधे[8] चाऽपि वि-चकर्षोत्-ससर्ज[9] च[10] ॥८६॥ [७८
हेम-पुङ्खा रवि-प्रख्याश् चक्रुर् दीप्तम् इवाऽम्बरम् ।
८१] ते बाणाः काल-सङ्काशा राक्षसेन्द्र-धनुश्-च्युताः ॥८७॥ [७९
ततस् तान् राक्षसोत्सृष्टाञ् छरौघान् राघवोऽनुजः[11] ।
८२] अ-सम्भ्रान्तः प्र-चिच्छेद[12] नि-शितैर् बहुभिः शरैः ॥८८॥ [८०
तांञ् छरान् युधि सम्प्रेक्ष्य नि-कृत्तान्[11] रावणाऽऽत्मजः ।
८३] चुकोपाऽति सुरेन्द्राऽरिर् जग्राह च शितं शरम् ॥८९॥ [८१
तं सं-धाय महा-तेजाः ससर्ज[13] च महा-मृधे[14] ।
८४] तेन सौमित्रिम् आ-यान्तम् आ-जघान स्तनाऽन्तरे ॥९०॥ [८२
सोऽति-विद्धो बल-वता लक्ष्मणो लक्ष्मि-वर्धनः ।[15]
८५] सुस्राव रुधिरं भूरि मदं[16] मत्त इव द्वि-पः ॥९१॥ [८३

---

१. प्र-मुदा चकम्पे बलवांश्चालितो लक्ष्मणेषुणा ॥ २. म-अतिकायस्तु सक्रोधो लक्ष्मणं वाक्यमब्रवीत् । ३. रा$_1$-०साधुयुक्तेन ॥ ४. रा$_1$-सन्निशम्यास्य निगृह्य वपुषा बभौ । फ म-संनिनम्यास्यं वि० । ५. अतः परमधिकः पाठः—रा$_2$-ननाद सुमहानादं यथा प्रावृषि तोयदः । ६. ल$_1$ ल$_2$ ब श्र प्र-आसाद्य ॥ ७. रा$_1$-राक्षसेश्वरः । ८. प्र म-०दधे । ९. रा$_1$रा$_2$फ-०कर्ष ससर्ज । १०. रा$_2$ फ-वै ॥ ११. ब-नास्ति ॥ १२. रा$_1$-तदायस्तांश्चिच्छेद निशितैः । म-०द राघवो निशितैः । १३. रा$_1$-ससर्जाथ । १४. म-महाहवे ॥ १५. रा$_1$म-अतीव तेन सौमित्रिस्ताडितो युधि वक्षसि । १६. ल$_1$ ल$_2$ ब श्र प्र-हतो ॥

स चकाराऽऽत्मनाऽऽत्मानं वि-शल्यं सहसा[1] वि-भुः ।
८६] जग्राह च शरं तीक्ष्णं[2] तैम्[3] अस्त्रेणाऽभिसं-दधे ॥२२॥ [८४
आग्नेयेन महा-तेजाः[4] सर्वा वि-द्योतयन् दिशः ।
८७] स जज्वाल महा-बाणो धनुष् चाऽस्य महाऽऽत्मनः ॥२३॥[5] [८५
तैतस् तं ज्वलितं तीक्ष्णं लक्ष्मणः शैरम् अञ्जसा[6] ।
८८] अति-कायाय चिक्षेप ब्रह्म-दण्डम् इवाऽपरम् ॥२४॥ [८६
अति-कायोऽति-तेजस्वी सौम्यम्[11] अस्त्रं समा-ददे ।
८९] तेन बाणं भुजङ्गाऽऽभं हेम-पुङ्खम् अयोजयत् ।[12] [८७
१०३] उत्-ससर्ज च वेगेन दीप्तं सूर्याऽस्त्र-संयुतम् ॥२५॥ [८८उ
ताव् उभाव् अन्तरे बाणाव्[13] अन्योऽन्यम् अभि-जघ्नतुः[14] ।
९१] तेजसा सम्प्रदीप्ताऽग्नौ क्रुद्धाव् इव भुजं-गमौ ॥२६॥ [८९
ताव् अन्योऽन्यं विनिर्-भिद्य पेततुर् धरणी-तले ।
९२] ताव् उभौ शर-हीनौ तु[15] न भ्राजेते स्म सं-युगे ॥२७॥ [९०
ततोऽति-कायस् त्व् ऐषीकं ससर्जाऽस्त्रं निशा-चरः[16] ।
९३] लक्ष्मणस् तं प्र-चिच्छेद ऐन्द्राऽस्त्रेण महा-बलः ॥२८॥ [९१
ऐषीकं नि-हतं दृष्ट्वा कुमारो रावणाऽऽत्मजः ।
९४] याम्येनाऽस्त्रेण सं-क्रुद्धो योजयामास सायकम् ॥२९॥ [९२
ततस् तद् अस्त्रं चिक्षेप लक्ष्मणाय निशा-चरः ।
९५] वायव्येन तद्[18] अस्त्रेण निर्-जघान स लक्ष्मणः[19] ॥१००॥ [९३

---

१. रा$_1$रा$_2$-भुवि । २. ल$_1$ल$_2$ब-घोरं । ३. म-नास्ति । ४. रा$_2$फ-महाबाहुः । ५. रा$_1$-योजयित्वा च चिक्षिपे । ६. ल$_1$ ल$_2$ ब अ प्र म-नास्ति ॥ ७. रा$_1$-परवीरहा । ८. ल$_1$ ल$_2$ ब अ प्र-अतिसंधाय । ९. ल$_1$ ल$_2$ ब अ-इवोद्धतं ॥ १०. अतः परमधिकः पाठः—ल$_1$ल$_2$ब प्र फ-दृष्ट्वा तु तं महाबाहुः शरं जग्राह कोपनः । ११. रा$_1$-सौरं । १२. अ-नास्ति ॥ १३. रा$_2$-तेजसौ सम्प्रदीप्तौ तौ । १४. ल$_1$ल$_2$ ब अ प्र रा$_2$फ-कल्पक्षये यथा प्राप्ते द्वावेवार्कौ सुतेजसौ ॥ १५. ल$_1$ल$_2$ ब अ-च ॥ १६. रा$_1$-तं प्रचिच्छेद सौमित्रिरस्त्रेणैन्द्रेण वीर्यवान् ॥ १७. ल$_1$ल$_2$ ब अ प्र रा$_2$फ-तं । १८. ल$_1$ल$_2$ब अ प्र-च । १९. अतः परमधिकः पाठः—ल$_1$ ल$_2$ ब अ प्र-कुबेरदत्तेनास्त्रेण त्रासयामास लक्ष्मणं ॥

अथैनं शर-धाराभिर् धाराभिर् इव तोय-दः ।
९७] प्र-ववर्ष सु-सङ्क्रुद्धो लक्ष्मणो रावणाऽऽत्मजम् १०१॥ [९४
तेऽति-कायस्य सम्प्राऽऽप्य कवचं वज्र-विग्रहम् ।
९८] [1]भग्नाऽग्रशल्याः सहसा नि-पेतुर् भुवि सायकाः॥१०२॥ [९५
तान् मोघान् अभिसम्प्रेक्ष्य लक्ष्मणः पर-वीर-हा ।
९९] अभ्य्-अवर्षत बाणानाम् अयुतेन महा-यशाः [2]॥१०३॥ [९६
स वध्यमानो बाणौघैर् अति-कायो महा-[3]बलः ।
१००] [4]ब्रह्म-दत्त-वरो वीरो राक्षसेन्द्रो न विव्यथे ॥१०४॥ [९७
न शशाक रुजं कर्तुं यदा तस्य महा-शरैः ।
१०१] अथैनम् अभ्युपाऽऽगम्य वायुर् वाक्यम् अभाषत १०५ [१०१
ब्रह्म-दत्त-वरो ह्य् एष ह्य् [5]अभेद्यकवचाऽऽवृतः । [१०२
१०२] [6]ब्रह्माऽस्त्रेणैव भग-वन् जहि दैवत-कण्टकम् ॥१०६॥ [१०३पू
ततस् तु वाक्यं स नि-शम्य वायोः
सौमित्रिर् इन्द्र-प्रतिमान-वीर्यः ।
समा-[7]ददे बाणम् अमोघ-वेगं
१०३] [8]तं ब्रह्मणोऽस्त्रेण युयोज चैवं ॥१०७॥ [१०४
तस्मिन् वराऽस्त्रे [9]विनि-युज्यमाने
सौमित्रिणा बाण-वरे शिताऽग्रे ।
देवाः स-चन्द्राऽर्क-महाग्रहाश् च
१०४] नभो-गतास् त्रेसुर् [10]अकम्पतोर्वी १०८॥ [१०५

---

१. ल$_1$ ल$_2$ ब श्र प्र रा$_2$ फ-सर्वे ते विफलीभूतास्तस्य लक्ष्मणसायकाः । म-ततः प्रसह्य सहसा नि० ॥ २. म-नास्ति ॥ ३. ल$_1$ ब श्र-महाभुजः । ४. रा$_1$-अभेद्यकवचः संख्ये राक्षसो नैव ॥ ५. रा$_1$-अभेद्य० ॥ ६. ल$_1$ ल$_2$ ब श्र प्र-तद्ब्रह्मणोस्त्रेण विभो । फ-ब्रह्मणोस्त्रेण भ० ॥ ७. ल$_1$ ल$_2$ ब श्र प्र-०दधे । ८. प्र-नास्ति ॥ ९. ल$_1$ ल$_2$ ब श्र फ-०स्त्रेण नि० । १०. ल$_1$ ल$_2$ ब श्र रा$_2$ फ म-रराज चोर्वी ॥

तं लक्ष्मणोत्सृष्टम् अमोघ-वेगं
समा-पतन्तं श्वसन-प्रकाशम्[1] ।
कालाऽग्नि-तुल्यं सित-पीत-पुङ्खं[2]
१०६] [3]ततोऽति-कायः सम्-अरे ददर्श॥१०९॥ [१०७
तं प्रेक्ष्यमाणस् तरसा[4]ऽति-कायो
जघान बाणैर् नि-शितैर् अनेकैः[5] ।
स सायकस् तस्य सुपर्ण-वेगस्
१०७] तदाऽति-वेगेन जगाम पार्श्वम् ॥११०॥[5] [१०८
[6]तम् आ-गतं प्रेक्ष्य तदाऽति-कायो[6]
बाणं प्रदीप्ताऽनल-काल-कल्पम्[7] ।[8]
जघान शक्त्य्-ऋष्टि-गदा-कुठारैः[9]
१०८] [10]शूलैर् हुलैश्[10] चाऽप्य् अविपन्न-चेष्टः[11] १११ [१०९
तान्य् आ-युधान्य् अ-प्रति[12]विक्रमाणि
मोघानि कृत्वा[13] स शरोऽग्नि-कल्पः ।
[14]स-कुण्डलं तस्य किरीट[14]-जुष्टं
१०९] तदाऽति-कायस्य शिरो जहार॥११२॥ [११०
तच् छिरः स-शिरस्त्राणं लक्ष्मणेन प्र-मर्दितम् ।
११०] पपात सहसा भूमौ शृङ्गं हिम-वतो यथा ॥११३॥ [१११
ततो हतान् राक्षस-पुङ्गवांस् तान्
स-कुम्भकर्णाऽतिरथाऽतिकायान् ।

---

१. म-ज्वलनप्र० । २. रा$_1$-तीक्ष्णाग्रधारोन्नतचित्रपुंखं । ३. रा$_1$-तदातिवीर्यः ॥ ४. रा$_1$-सहसाति० । ५. रा$_1$ प्र फ-नास्ति ॥ ६. रा$_1$ फ-नास्ति ७. ल$_1$ ल$_2$ ब श्र फ-०कालतुल्यं । ८. प्र-नास्ति । ९. रा$_1$-०गदाप्रहारैः । १०. रा$_1$-शूलार्गलैश् । ल$_1$ ल$_2$ब श्र प्र फ-शूलैर्नगैश् । ११. रा$_1$-अभिप० ॥ १२. रा$_1$-अप्रतिमक्र० । १३. ल$_1$ ल$_2$ ब श्र रा$_2$-हत्वा । १४ रा$_1$-प्रगृह्य तच्चाङ्गकि० ॥

रक्षो-गणा　　　वीरहताऽवशिष्टास्
१.१.१]　　　ते रावणाय त्वरिताः शशंसुः ॥१.१४॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे अतिकाय-वधो नाम
द्विपञ्चाशः सर्गः ॥ ५२ ॥

[वं-५२,५३]= [त्रिपञ्चाशः सर्गः] =[दा-७३,७४]

तेषां[२] वचस् तत् तु निशम्य राजा[२]
　　मुमोह शोकाऽश्रु-परिप्लुताऽक्षः ।
भ्रातुर् वधं पुत्र-वधं च[३] घोरं[३]
N]　　वि-चिन्त्य राजा तुमुले[४] प्र-गाढे[४] ॥१॥ [२
ततस् तु राजानम् अवेक्ष्य दीनं
　　सु[५]-विह्वलं शोक-परीत-देहम्[५] ।
रथर्षभो राक्षस-राज-सूनुर्
३]　　अथेन्द्र-जिद् वाक्यम् इदं बभाषे ॥२॥ [३
न तात[६] मोह[६]-विषाद-कालो
　　यद् इन्द्र-जिज् जीवति राक्षसेन्द्रः ।

---

१. प्र-लंकाकांडे । म-युद्धपर्वणि ॥ २. रा$_1$-ततो हतांस्तान् स नि० । रा$_2$-०चस्तत्र नि० । इतः पूर्वमधिकः पाठः—रा$_2$-तच्छ्रुत्वा वचनं तेषां रावणः शोकविह्वलः । न किञ्चिदप्युवाचार्तो दीनात्मा क्षुब्धचेतनः ॥ तं दृष्ट्वा राक्षसश्रेष्ठं मन्युनातिपरिप्लुतं । न किंचित्कंचिदप्याह सर्वः शोकान्वितोऽभवत् ॥ ३. रा$_1$-सुघोरं । ४. रा$_1$-०लं प्रगाढं ॥ ५. रा$_1$ म-शोकार्णवे संप्रति वर्तमानं । रा$_2$-स विह्वलः शो० ॥ ६. रा$_1$-तात ते मोहवि० ।

नेन्द्राऽरि-बाणाऽभिहतोऽस्ति कश्-चित्
४] प्राणान् हि शक्तो युधि धारयेद् यः ॥३॥ [४
पश्याऽद्य रामं सह लक्ष्मणेन
मद्-बाण-निर्[1]भिन्न-विकीर्ण-देहम् ।
गताऽऽयुषं भूमि-तले शयानं
५] शितैः शरैर् आ[2]चित-सर्व-गात्रम् ॥४॥ [५
इमां प्रति-ज्ञां शृणु चेन्द्र-शत्रोः
सु-निश्चितां पौरुष-दैव-युक्ताम् ।
यथाऽद्य रामं सह लक्ष्मणेन
६] सं-तर्पयिष्यामि शरैर् अ-मोघैः ॥५॥ [६
अ[3]द्येन्द्र-वैवस्वत-विष्णु-मित्राः
साध्याऽश्वि-वैश्वानर-चन्द्र-सूर्याः ।
द्रक्ष्यन्ति मे वि-क्रमम् अ-प्रमेयं
७] [4]त्रि-विक्रमे विक्रम-वद् [4]धि विष्णोः [5]॥६॥ [७
स एवम् उक्त्वा त्रिदशेन्द्र-शत्रुर्
आ-पृच्छ्य राजानम् अ-दीनसत्त्वः ।
समा-रुरोहाऽनिल-तुल्य-वेगं
८] [6]रथं [6]खर-श्रेष्ठ-सहस्र-युक्तम् ॥७॥ [८
तम् आ-स्थाय महा-तेजा रथं हरि-रथोपमम् ।
९] जगाम सहसा तत्र यत्र युद्धम् अरिं-दम[7]ः ॥८॥ [९

---

१. प्र-०विशीर्ण० । २. रा$_2$-अर्चितस० ॥ ३. ल$_1$ ल$_2$ ब प्र फ-अथेन्द्र० । ४. रा$_1$-त्रिविक्रमस्येव जयं च । प्र फ म-०मे विक्रममेव । ५. अतः परमधिकः पाठः—रा$_2$-ये चागता राघवकार्यहेतोरवेहि मत्सायकभिन्नगात्रान् ॥ ६. ल$_1$ ल$_2$ ब अ-रथोत्तमं श्रेष्ठसमर्द्धियु० । रा$_2$ फ-०ष्ठसमाधियु० ॥ ७. रा$_1$-०दमं ॥

तं प्र-स्थितं महाऽऽत्मानम् अनु-जग्मुर् महा-बलाः [1]।
१.०] सं-स्पर्धमाना बहवो धनुःप्राऽऽसाऽसि-पाणयः ॥९॥ [१.०
गज-स्कन्ध-गताः के-चित् के-चिद् धर्य[2]-गतास् तथा । [१.१पू
१.१] प्राऽऽस-मुद्गर-निस्त्रिंश-परश्वध-धराः परे ॥१.०॥ [१.३पू
स शङ्ख-निनदैः पुण्यैर् भेरीणां च महा-स्वनैः ।
१.२] जगाम त्रिदशेन्द्राऽरिः स्तूयमानः सपत्न-जित् ॥१.१॥ [१४
स शङ्ख-शशि-वर्णेन छत्रेण रिपु-सूदनः ।
१.३] रराज प्र-गृहीतेन नभश् चन्द्रमसा यथा ॥१.२॥ [१५
ततस् [3]तं विविजुर् भीमं मेघाऽऽभं हेम-भूषणम् ।
१.४] चारु-चामर-मुख्यैश्[4] च मुख्यं सर्व-धनुष्मताम् ॥१.३॥ [१.६
ततस् त्व् इन्द्र-जिता लङ्का सूर्य-प्रतिम-तेजसा ।
१.५] रराजाऽप्रतिवीर्येण द्यौर् इवाऽर्केण[5] भास्वता ॥१.४॥ [१.९
स तु दृष्ट्वा विनिर्-यान्तं बलेन महताऽऽवृतम् ।
१.६] राक्षसाऽधिपतिः श्री-मान् रावणः पुत्रम् अब्रवीत् ॥१.५॥ [१.७
त्वम् अ-प्रतिरथः पुत्र जितस् ते युधि वासवः ।
१.७] किं पुनर् मानुषं धृष्यं[6] न वधिष्यसि[7] राघवम् ॥१.६॥ [१.८
तथोक्तो राक्षसेन्द्रेण प्रति-गृह्य महाऽऽशिषः ।
१.८] रथेनाऽश्व-युजा वीरः शीघ्रं गत्वा नि-कुम्भिलाम् । [N
१.९उ] स्थापयामास रक्षांसि रथांश् चैव समन्त-तः ॥१.७॥ [२०उ

सर्व-तोऽग्निं समा-स्तीर्य शस्त्र-पात्रैः[8] स-तोमरैः[8] ।
२३] जुहाव रक्तं कृष्णस्य कण्ठाच् छागस्य जीवतः [10]॥१.८॥ [२४

---

१. ल$_1$-नास्ति ॥ २. प्र-रथग० ॥ ३. ल$_1$ल$_2$ब अ-तु भेजिरे । ४. म-०रपुष्पैश् ॥ ५. रा$_1$-न्तं ॥ ६. रा$_1$-दृश्यं । ७. ल$_1$ल$_2$ब अ म-हनिष्यसि ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब-०पातैः सतोरणैः । अ प्र-०त्रैः सतोरणैः । ९. रा$_2$-आदाय । १०. टि० अयं मध्यपाठः २७-शश्लोकात्परमधिकश्च पाठः २०-शसर्गेण लु० । अतः परमधिकः पाठः— रा$_2$ फ-जुहाव पावकं रात्रौ रक्ताक्ताः समिधस्तथा ॥

ततम् तं हुत-भोक्तारं हुतभुक्-सदृश-प्रभः ।
२०] अजुहोद् राक्षस-श्रेष्ठो मन्त्राऽस्त्रं विधि-वत् तदा ॥[1]१९॥ [२१
जुह्वतस् तस्य तत्राऽग्निं रक्तोष्[2]णीष-वर-स्रजः ।
२१] आ-जग्मुर् अथ सं-भ्रान्ता राक्षसा यत्र रावणिः ॥२०॥[3] [N
शस्त्राणि शित-धाराणि सम्-इधश् च वि-भीतकान् ।
२२] लोहितानि च वासांसि स्रुवं कार्ष्णाऽऽयसं तथा ॥२१॥ [२३
स हविर् होम-लाजाऽऽद्यैर् माल्य-गन्ध-सुसंयुतैः ।
N] अजुहोत् पावकं तत्र राक्षसेन्द्रः प्रताप-वान् ॥२२॥ [२२
सकृद् एव सम्[4]-इद्धस्य वि-धूमस्य महाऽर्चिषः ।
२४] बभूवुस् तानि लिङ्गानि वि-जयं यान्य् अदर्शयन् ॥२३॥[5] [२५
प्रदक्षिणाऽऽवर्त-शिखस् तप्त-हाटक-सन्निभः ।
२५] हविस् तत् प्रति-जग्राह पावकः स्वयम् उत्थि(द्-स्थि)तः॥२४॥[5] [२६

सोऽस्त्रम् आ-वाहयामास ब्राह्मम् अस्त्र-विदां[6] वरः ।
२६] धनुः शरान् रथांश् चैव सर्वं तत्राऽभ्य्-अमन्त्रयत् ॥२५॥ [२७
तस्मिन्न् आ-हूयमाने च हूयमाने च पावके ।
२७] साऽर्क-चन्द्रा स-नक्षत्रा वि-तत्रास मही तदा ॥२६॥ [२८
स पावकं पावक-तुल्य-तेजा
जुहाव शक्र-प्रतिम-प्रभावः ।
स-चाप-बाणाऽसि-रथाऽश्व-सूतं
N] खेऽन्तर्-दधे त्मानम् अचिन्त्य-रूपः ॥[7]२७॥ [२९

१. रा$_{2}$ फ म-०शः प्रभुः ॥ २. रा$_{2}$-रक्तोष्णीषधरास्रयः । ३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र म-नास्ति ॥ ४. रा$_{2}$-ततः समिद्भिरिद्धस्य । ५. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र फ म-नास्ति ॥ ६. म-अस्त्रविशारदः ॥ ७. अतः परमधिकः पाठः— रा$_{2}$ फ-इन्द्रजित्त्वथ संहृष्टो राक्षसेन्द्रसुतस्तदा । हुत्वाग्निं तर्पयित्वा च दैत्यदानवदर्पहा ॥ आरुरोह रथं दिव्यमन्तर्धानगतं शुभं । चतुर्भिर्वाजिभिर्युक्तं बाणतूणीरसंयुतं ॥

स सैन्यम् उत्-सृज्य समुत्-ससर्ज
बाणान्[1] रणे[2] वानर-वाहिनीषु ।
अ-दृश्यमानः शर-जालम् उग्रं
३१.] ववर्ष मेघो हि यथाऽम्बु-धाराः ॥२८॥ [५३
ते शक्रजिद्-बाण-विशीर्ण-देहा[3]
मायाऽविदो[4] वि-स्वरम् उन्-नदन्तः ।
[रणे नि-पेतुर् हरयः सु-घोरा
३२] यथेद्रवज्राऽभिहता नगेन्द्राः ॥२९॥[5] [५४
ते केवलांस् तान् ददृशुः सु-घोरान्
प्र-णर्दतो वानर-वाहिनीषु ।][5]
यथा नि-गूढं हि सुरेन्द्र-शत्रुं

आरोपितमहाचापः शुशुभे राक्षसात्मजः । आज्वल्यमानो वपुषा तपनीय-विभूषितः ॥ तोमरैरर्धचन्द्रैश्च स्वरथे बहलंकृते । नानारत्नविचित्रे च पताकाध्वजशोभिते ॥ नीलजीमूतसंकाशे शुशुभे स्यंदने स्थितः । रावण-स्यात्मजो वीरः शक्रजेता महाबलः ॥ किरीटकेयूरधरः संग्रामेष्वनिवर्तकः । जाम्बूनदमहावंशो दीप्तपावकसन्निभः ॥ बभूव चेन्द्रजित्केतुर्वैडूर्यसमलंकृतः । तेन चादित्यकल्पेन ब्रह्मास्त्रेण सुपालितः । बभूव हर्षदुर्द्धतरो रावणिः समलंकृतः ॥ स्वेन वीर्येण समः श्रीमानस्त्रेण च महाद्युतिः ॥ राक्षसैश्च महामात्यैः सपत्नायुधि दुर्जयः । अग्न्यागारात्स निर्याय शक्रजिच्च महा-बलः ॥ अब्रवीद्रक्षसां मध्ये वचनं स दुरासदः । अद्य हत्वा वधार्हौ तौ मिथ्याप्रव्रजितौ रणे ॥ जयं पित्रे प्रदास्यामि हत्वा तौ रामलक्ष्मणौ । अद्य निर्वानरामुर्वीं हतराघवलक्ष्मणां । करिष्यामि सुसंक्रुद्ध इत्युक्त्वान्त-र्धीयत ॥

१. रा१ ल१ ल२ ब अ म-ससर्ज बाणान् । २. रा१ ल१ ल२ ब अ-महारणे । म-भीमान्रणे ॥ ३. रा२ फ-०विकीर्ण० । ४. रा२-मायाहता वि० । म-नास्ति । ५. रा१ ल१ ल२ ब अ प्र फ म-नास्ति ॥

३३] न तत्र रक्षोऽधिपतिं व्य्-अपश्यन्[1] ॥३०॥ [५५

ततः स रक्षोऽधिपतिर् महाऽऽत्मा

सर्वासु वै[2] दिक्ष्व् अभि-वर्षमाणः[2] ।

प्र-च्छादयामास रवि-प्रभां[3] च[3]

३४] वि-द्रावयामास च वानरेन्द्रान् ॥३१॥ [५६

स शूल-निस्त्रिंश-परश्वधानि

दीप्ताऽनिलाऽर्क-द्युति-सन्निभानि ।

स-विस्फुलिङ्गोज्वल-पावकानि

३५] ववर्ष तस्मिन् प्लवगेन्द्र-सैन्ये ॥३२॥ [५७

ततस् तैः[4] पावक-प्रख्यैः शस्त्रैर् वानर-पुङ्गवाः ।

३६] पीडिताः पृथिवीं जग्मुर् वज्राऽऽक्रान्तौ[5] इवाऽचलौः[5] ३३ [५८

तेऽन्योऽन्यम्[6] अभि-सर्पन्तो वि-नदन्तश् च सु-स्वरम् ।

३७] राक्षसेन्द्राऽस्त्र-निर्भिन्ना वि-नेदुर् वानरर्षभाः ॥३४॥ [५९

सं-वीक्ष्यमाणा गगनं के-चिन् नेत्रेषु ताडिताः ।

३८] शरैर् विविशुर् अन्योऽन्यं नि-पेतुर् धरणी-तले ॥३५॥ [६०

स सु-ग्रीवं हनू-मन्तम् अङ्ग-दं गन्ध-मादनम् ।

३९] जाम्ब-वन्तं सुषेणं च वेग-वन्तं च वानरम् ॥३६॥ [६१

मैन्दं च द्वि-विदं नीलं गजं गवयम् एव च ।

४०] विद्युद्-दंष्ट्रं केसरिणं हरि-ग्भोमानम् एव च[7] ॥३७॥[8] [६२

सूर्याऽऽननं ज्योतिर्-मुखं तथा दधि-मुखं हरिम्[9][10] ।

४१] पावकाऽक्षं नलं चैव कु-मुदं चैव वामनम्[11] ॥३८॥ [६३

---

१. म-नास्ति ॥ २. रा$_{2}$-दिक्षु प्रववर्ष बाणान् । ३. रा$_{2}$-०प्रभावान् ॥ ४ रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र म-ते । ५. रा$_{1}$ ल$_{1}$ल$_{2}$ ब अ-०क्रान्त इवाचलः ॥ ६. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब-अन्यो० ॥ ७. म-नास्ति । ८. अ-नास्ति ॥ ९. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र म-नास्ति । १०. रा$_{1}$ ल$_{2}$ ब प्र फ-वानरं । ११. अ म-नास्ति ॥

उल्का-मुखं शरभं च हरिं पनसम् एव च ।[1]
४२] धूम्रं शत-बलिं तारं गवाऽक्षम् अपरान् हरीन् ॥३९॥ [N
बाणैः शूलैः शितैः खड्गैर् भिण्डि-पालैः परश्वधैः ।
४३] विव्याध कपि-शार्दूलान् सर्वांस् तान् राक्षसोत्तमः ॥४०॥[६४

स तांस् तदा वानर-राज-वीरान्
निर्-भिद्य बाणैस् तपनीय-पुङ्खैः ।
ववर्ष रामं शर-वृष्टि-जालैः
४४] स-लक्ष्मणं वज्र-सम-प्रवेगैः ॥४१॥ [६५

स बाण-वर्षैर् अभि-वर्षमाणो[2]
धारा-निपातैर् इव पर्वतेन्द्रः ।
तं वीक्ष्य(?क्ष)माणः परमाऽद्भुत-श्री
४५] रामस् तदा[5] लक्ष्मणम् इत्य् उवाच ॥४२॥ [६६

असौ पुनर् लक्ष्मण राक्षसेन्द्रो
ब्रह्माऽस्त्रम् आ-श्रित्य सुरेन्द्र-शत्रुः ।
सं-छाद्य सर्वं हरि-सैन्यम् एतद्
४६] आवां रथ-स्थो वि-वृणोति वीरः[3] ॥४३॥[६७

स्वयं-भुवा दत्त-वरो दुर्-आत्मा
N] खम् आ-प्लुतोऽन्तर्हित-भीम-देहः[4] ।
कथं नु शक्यो युधि नष्ट-रूपो
नि-हन्तुम् अद्येन्द्र-जिद् अस्त्र-पाणिः ॥४४॥ [६८

मन्ये स्वयं-भूर् भग-वान् अ-चिन्त्यो
४७] मन्ये तद् अस्त्रं हुत-भुक् च देवः । [६९पू

---

१. म-नास्ति ॥ २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ–अभिवृष्यमाणो ॥
३. म–धीरः ॥ ४. प्र–०भीमरूपः । म–०भीमकर्मा । ५. प्र रा$_2$ म–तु ॥

अयः सम्-अर्थो मम वीर्य-[2]धैर्ये

N] माया-बलाच् छादयितुं रणाऽग्रे ॥४५॥ [N

प्र-च्छादयत्य् एष च राक्षसेन्द्रः

४८उ] सर्वा दिशः सायक-शूल-जालैः ।

एतच् च सर्वं प्रविभग्न-शूरं

प्र-मुह्यते वानर-राज-सैन्यम् ॥४६॥ [७०

आवां तु दृष्ट्वा पतितौ वि-संज्ञौ

४९] निवृत्त-युद्धोत्तम-जात-हर्षः । [७१पू

प्र-याति भीमः पुनर् एव लङ्कां

N] प्र-हर्षयन् राक्षस-सैन्यम् एतद् ॥४७॥ [N

ततम् तु ताव् इन्द्र-जितो[7]ऽस्त्र-जालैर्

बभूवतुस् तत्र तदा वि-षण्णौ ।

स राघवौ तौ बलिनौ वि-षाद्य

५१] ननाद हर्षाद् युधि राक्षसेन्द्रः ॥४८॥ [७२

स तत् तदा वानर-राज-सैन्यं

स-राम-सौमित्रिम् अथाऽप्रमेयम् ।

वि-षाद्य सर्वं सहसा विवेश

५२] पुरीं दशग्रीव-भुजाऽभ्र-गुप्ताम् [8]। [७३

संस्तूयमानः स तु यातु-धानैः

---

१. रा$_1$ ल$_1$ ल$_2$ ब प्र ग्र फ म-समस्ता । २. प्र-वीर्यवंतो । म-वीर्यध्येया । ३. रा$_1$ल$_2$ब ग्र प्र फ म-०लाच्छादयतो । ल$_1$-०बलो छादयति । रा$_2$-मया बलान् छा० ॥ ४. रा$_2$ फ म-हि । ५. ग्र-०रसैन्यमुग्रं ॥ ६. रा$_1$ल$_1$ल$_2$ ब ग्र प्र-च ॥ ७. ग्र प्र फ-०जितास्त्र० ॥ ८. म-अत्रैव सर्गसमाप्तिर्दृश्यते-युद्धपर्वणि इन्द्रजित्कर्म नाम सर्गः ॥

N] प्रिये च सर्वं हृषितोऽभ्य्-उवाच ॥४९॥[2] [७४उ
ां-५३] तयोस् तु तत्राऽर्दितयो रणाऽग्रे [दा-७४
मुमोह सैन्यं हरि-यूथपानाम् ।
सर्वे वि-षण्णा विगत-प्रभावा
१] न चाऽपि किं-चित् प्रति-पेदिरे स्म ५०॥ [१
ततो वि-षण्णं समवेक्ष्य सैन्यं
वि-भीषणो धर्म-भृतां वरिष्ठः ।
उवाच शाखामृग-राज-वीरान्
२] आ-श्वासयन् वाग्भिर् अ-दीनसत्त्वः ॥५१॥ [२
मा भैष्ट नास्त्य् अत्र विषाद-कृत्यं
यद् आर्य-पुत्रौ वि-वशौ वि-षण्णौ ।
स्वयं-भुवो वाक्यम् अभिप्र-पन्नौ
३] सं-छादिताव् इन्द्र-जितोऽस्त्र-जालैः॥५२ [३
तस्मै हि दत्तं परमाऽस्त्रम् एतद्
स्वयं-भुवा ब्राह्मम् अमोघ-वीर्यम् ।
तन् मानयन्तौ यदि राज-पुत्रौ
४] वि-षादितौ नाऽत्र विषाद-कालः॥[5]॥५३॥ [५
स ब्राह्मम् अस्त्रं तद् धी-मान् मानयित्वा तु मारुतिः ।[5]
५] विभीषण-वचः श्रुत्वा हनू-मान् इदम् अब्रवीत् ॥५४॥ [६
अस्मिन् शस्त्र-हते सैन्ये वानराणां तरस्विनाम् ।

---

१. रा१ ल१ प्र-स । २. अतः परमधिकः पाठः—रा२-ततो रावण-मासाद्य अभिवाद्य कृताञ्जलिः । आचचक्षे प्रियं पुत्रो निहतौ रामलक्ष्मणौ ॥ स हर्षवेगानुगतान्तरात्मा श्रुत्वा गिरस्तस्य महारथस्य । जहौ ज्वरं दाश-रथेः समुत्थं प्रतीतचित्तश्च ननंद पुत्रं ॥ रा२-अत्रैव सर्गसमाप्तिर्दृश्यते । ३. म-विषण्णौ ॥ ४. रा१ ल१ ल२ व भ प्र-विषार्दितौ । ५. म-नास्ति ॥ ६. रा१ ल१ ल२ व प्र फ-स । भ-च ॥

६] यो यो धारयति प्राणांस् तं तम् आ-श्वासयामहे ॥५५॥ [७
ताव् उभौ युगपद् वीरौ वायुपुत्र-विभीषणौ ।
७] उल्का-हस्तौ तदा रात्रौ रण-शीर्षे[1] वि-चेरतुः ॥५६॥ [८
छिन्न-लाङ्गूल-हस्तैश् च विप्रकीर्ण-शिरोधरैः[2] ।
८] स्रोतोभिः क्षत-जं चाऽपि वि-स्रवद्भिः समन्त-तः॥५७॥ [९
पतितैः पर्वताऽऽकारैर् वानरैर् अभिसं-कुला ।
९] अस्त्रैश् च पतितैर् दीप्तैर् अभि-कीर्णा वसुं-धरा॥५८॥ [१०
सु-ग्रीवम् अङ्ग-दं नीलं शरभं गन्ध-मादनम् ।
१०] जाम्ब-वन्तं सु-षेणं च वेग-वन्तं दधी-मुखम् ॥५९॥ [११
११पू] ज्योतिर्-मुखं नलं मैन्दं द्वि-विदं पैनसं गैजम् । [१२पू
N] गवाऽक्षं गवयं धूम्रम् ऋषभं वि-नतं हरम् ॥६०॥ [N
एतांश् चाऽन्यांश् च सु-बहून् वानरेन्द्रान् महा-बलान् ।
१३] विभीषण-हनूमन्तौ ददृशाते हतान् रणे ॥६१॥ [१२उ
सप्त-षष्टिर् हताः कोट्यो वानराणां तरस्विनाम् ।
१४] अह्नः पश्चिम-भागेन वल्लभेन स्वयं-भुवः ॥६२॥ [१३
सागरौघ-निभं घोरं दृष्ट्वा व्या-पादितं बलम् ।
१५] विभीषण-हनूमन्तौ जाम्ब-वन्तं समागतुः[12] ॥६३॥ [१४
स्वभावै-जरया युक्तं वृद्धं शर-शतैश् चितम् ।
१६] रुजा परि-गतं वीरं शाम्यन्तम् इव पावकम् ॥६४॥ [१५

---

१. रा$_2$ प्र फ-०शीर्षे ॥ २. म-०धराः । ३. रा$_2$-वापि ॥ ४. रा$_2$म-शस्त्रैश् ॥ ५. म-च वानरं ॥ ६. म-चापि वानरं । ७. रा$_2$प्र-हरिं । ८. म-नास्ति ॥ ९. म-रणाजिरं ॥ १०. ल$_1$ल$_2$ब प्र म-हतान् । ११. रा$_2$-दिवसस्याष्टमे भागे वरदानात् । फ-०मकाले तु व० ॥ १२. म-नास्ति ॥ १३. रा$_1$ ल$_1$ ब अ-०वाजरया । १४. रा$_2$-प्रजापतिसुतं । १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-पर्वतम् ॥

अथैनम् उपसं-गम्य पौलस्त्यो वाक्यम् अब्रवीत्[1] ।

१७] क-चिद् आर्य शरै रौद्रैर्[2] न प्राणा हिंसितास् तव[3] ॥६५॥[१६

१८उ] विभीषण-वचः श्रुत्वा जाम्ब-वान् प्लवगर्षभः ।

कृच्छ्रेण धारयन् प्राणान् इदं वचनम् अब्रवीत् ॥[4]६६॥ [१७

१९] नैर्ऋतेन्द्र महा-वीर्य स्वरेण त्वाऽभि-लक्षये ।

पीड्यमानः शितैर् बाणैर् न त्वां पश्यामि चक्षुषा ॥६७॥ [१८

२०] अञ्जना सु-प्रजा येन मातरिश्वा च नैर्ऋत ।

कच्चि-चिद् धारयति प्राणान् हनू-मान् प्लवगर्षभः ॥६८॥[१९

२१] श्रुत्वा जाम्ब-वतो वाक्यम् अब्रवीत् तं वि-भीषणः । [२०पू

स्व-भावं तस्य जिज्ञासुः प्र-ज्ञां च प्राज्ञ-सत्तमः ॥[8]६९॥ [N

२२] क्लिश्यामहे यत्-कृते स्मँ यन्-मूलं चैव नो बलम् । [N

ताव् आर्य-पुत्राव् उत्-सृज्य हनू-मन्तं च पृच्छसि ॥७०॥[२०उ

२३] नैव राजनि सु-ग्रीवे नाऽङ्ग-दे न च राघवे ।

२४पू] आर्येण दर्शितः स्नेहो हनू-मति तु दर्शितः ॥[10]७१॥ [२१

वानरेन्द्रान् महा-वीर्यान् अति-क्रम्य महा-बलान् ।

N] बहून् अन्यांस् त्वम् एकं तु कस्मात् पृच्छसि मारुतिम् ७२[N

२४उ] विभीषण-वचः श्रुत्वा जाम्ब-वान् इदम्[12] अब्रवीत्[13] ।

शृणु नैर्ऋत-शार्दूल यन् मां पृच्छसि मारुतिम् ॥[14]७३॥ [२२

---

१. अतः परमधिकः पाठः—रा२-कच्चिज्जीवसि ऋक्षेन्द्र कच्चित्ते विपुलं बलं । २. म-तीक्ष्णैर्न प्राणैर्ध्वंसितो रणे । ३. ल१ ल२ ब-नास्ति ॥ ४. रा१ ल१ ल२ ब अ प्र-क्वचिद् । ५. रा२-हनुमान् ॥ ६. म-नास्ति ॥ ७. रा१ ल१ ल२ अ-च । ८. रा२ प्र फ-हि ॥ ९. रा२ फ म-विद० । १०. अतः परमधिकः पाठः—रा२-जाम्बवंश्च महाबाहो यस्त्वां वक्ष्यामि तच्छृणु । गवाक्षं गवयं धूम्रमृषभं गंधमादनं ॥ ११. रा२-हनूमन्तं ॥ १२. म-अब्रवीद् वचः । १३. अ-नास्ति । १४. रा१ ल१ ल२ ब प्र म-नास्ति ॥

२५] तस्मिञ् जीवति दुर्-धर्षे हतम् अप्य् अ-हतं बलम् ।
हनू-मति हते सर्वे जीवन्तोऽपि हता वयम् ॥७४॥ [२३
२६] एतच् छ्रुत्वाऽशुभं वाक्यं प्रत्य्-उवाच वि-भीषणः । [N
ध्रियते मारुतिस् तात मारुत-प्रतिमो जवे ॥७५॥
२७] वैश्वानर-समं तेजो धारयन् प्लवगर्षभः । [२४
त्वाम् एव मार्गयन्न् आस्ते मयेहाऽत्र सह प्र-भो ॥७६॥ [N
२८] ततो वृद्धम् उपाऽऽगम्य वि-नयेनाऽभ्य्-अवादयत् ।
जाम्ब-वन्तं महा-तेजा हनू-मान् मारुताऽऽत्मजः ॥७७॥ [२५
२९] श्रुत्वा हनू-मतो वाक्यं तथा स व्यथितेन्द्रियः ।
पुनर् जातम् इवाऽऽत्मानं मेने प्लवग-पुङ्गवः ॥७८॥ [२६
३०] ततोऽब्रवीन् महा-तेजा हनू-मन्तं स जाम्ब-वान् ।
आ-गच्छ हरि-शार्दूल वानरांस् त्रातुम् अर्हसि ॥७९॥ [२७
३१] भवान् विक्रम-सम्पन्नस् त्वम् एषां परमा गतिः ।
त्वत्-पराऽऽक्रम-कालोऽयं नाऽन्यं पश्यामि कं-चन ॥८०॥ [२८
३२] ऋक्ष-वानर-वीराणाम् अनीकानि प्र-हर्षय ।
वि-शल्यौ कुरु चाऽप्य् एतौ राघवौ राम-लक्ष्मणौ ॥८१॥ [२९
३३] गत्वा परमम् अध्वानम् उपर्य् उपरि सागरम् ।
हिम-वन्तं नग-श्रेष्ठं हनु-मन् गन्तुम् अर्हसि ॥८२॥ [३०
३४] ततः काञ्चनम् अत्य्-उग्रम् ऋषभं पर्वतोपमम् ।
कैलास-शिखरं चैव द्रक्ष्यसि रिपु-सूदन ॥८३॥ [३१

---

१. रा$_2$-वीरे हि ॥ २. म-नास्ति ॥ ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ-हनु० । ४. म-नास्ति ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-क्षुद्रवा० । ६. रा$_2$-भ्रातरौ । म-सादितौ ॥ ७. ल$_1$ ल$_2$ म-पर्वतं ॥ ८. म-नास्ति ॥

३५] तयोः शिखरयोर् मध्ये प्र-दीप्तम् अतुल-प्रभम् ।
सर्वौषधि-युतं श्री-मत् तद् द्रक्ष्यस्य् ओषधि-पर्वतम् ॥८४॥ [३२
३६] तस्य वानर-शार्दूल चतस्रो मूर्ध्नि स-प्रभाः ।
ओषधीर् द्रक्ष्यसि वीर दीपयन्तीर् दिशो दश ॥८५॥ [३३
३७] मृत-सञ्जीवनी चैव विशल्य-करणी तथा ।
सुवर्ण-करणी चैव सं-धानी च महौषधी ॥८६॥ [३४
३८] गृहीत्वा हनु-मन् सर्वाः क्षिप्रम् आ-गन्तुम् अर्हसि ।[1]
आ-श्वासय हरीन् सर्वान् प्राणैर् गन्धवहाऽऽत्मज ॥८७॥ [३५
३९] श्रुत्वा जाम्ब-वतो वाक्यं हनु-मान् हरि-पुङ्गवः ।
आऽपूर्यत[2] बलौघेन वारि-पूरैर्[3] इवाऽर्णवः ॥८८॥ [३६
४०] स पर्वत-तटाऽग्र-स्थः पीडयन् पर्वतोत्तमम्[4] ।
हनू-मान्[5] अभवत् तत्र द्वितीय इव पर्वतः ॥८९॥ [३७
४१] हरि-पाद-निमग्नश् च नि-षसाद स पर्वतः ।
४२पू] न शशाक तदाऽऽत्मानम् अव-स्थापयितुं ततः[6] ॥९०॥ [३८
N] तस्य पेतुर् नगा[8] भूमाव् उर-मार्गं[7] चाऽपि जज्वलुः ।
४२उ] शृङ्गाणि च शिलाश् चैव विनि-पेतुः समन्त-तः ॥९१॥ [३९
तस्मिन् प्र-पीड्यमाने तु भग्न-द्रुम-शिला-तले[9] ।
४३] न शेकुर् वानराः स्थातुं घूर्णमाने नगोत्तमे ॥९२॥[10] [४०
सा घूर्णित-महाद्वारा प्रभग्न-गृह-गोपुरा[11] ।
४४] लङ्का सम्भ्रान्त-रक्षोघा[12] प्र-नृत्तेव[13] बभूव ह ॥९३॥ [४१

---

१. म-नास्ति ॥ २. रा$_1$, ल$_1$, ल$_2$ ब अ प्र-आपूर्णोतिष० । ३. रा$_1$, ल$_1$, ल$_2$ ब-०पूर्णैर् । प्र रा$_2$ फ म-वारिवेगैर् ॥ ४. रा$_1$ अ रा$_2$-०तोपमं । ५. रा$_1$ अ रा$_2$-हनुमान् ॥ ६. म-यतः । ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ-नास्ति ॥ ८. रा$_2$-भूमौ पन्नगाश्च ॥ ९. ल$_1$ ल$_2$ ब अ प्र फ-०तटे । १०. रा$_2$-नास्ति ॥ ११. म-०हतोरणा । १२. रा$_1$ ल$_2$ ब अ प्र रा$_2$-०रक्षौघा । १३. म-नृत्यतीव ॥

पृथिवीधर-सङ्काशो नि-पीड्य पृथिवी-धरम् ।
N] पृथिवीं क्षोभयामास साऽर्णवां मारुताऽऽत्मजः ॥९४॥ [४२
पद्भ्यां स शैलम् आ-पीड्य बडवा-मुख-वन् मुखम् ।
४५] ननाद च वि-वृत्योग्रं त्रासयन्न् इव राक्षसान् ॥९५॥[1][2] [४७
तस्य नानद्यमानस्य[3] श्रुत्वा नि-नदम् उत्-तमम् ।
४६] लङ्कायां राक्षसाः सर्वे न शेकुः स्पन्दितुं भयात् ॥९६॥ [४८
नमस्-कृत्य स देवेभ्यो मारुतिर् भीम-विक्रमः ।
४७] राघवाऽर्थे परं कर्म कर्तुम् इच्छति स-त्वरः ॥९७॥ [४९
स पुच्छम् उद्-यम्य भुजङ्ग-कल्पं
वि-नम्य पृष्ठं श्रवणौ नि-कुञ्च्य ।
वि-वृत्य वक्त्रं भृशम् उन्-ननाद
४८] खम् उत्-पपाताऽद्भुत-चण्डवेगः ॥९८॥ [५०
स वृक्ष-खण्डं तरसाऽऽजिघृक्षच्
छैलाञ् छिलाः प्राकृत-पर्वतेभ्यः ।
बाहूऽऽरु-पातोद्धत-सम्प्रणुन्नास्
N] ते क्षीण-वेगाः सलिले नि-पेतुः ॥९९॥ [५१
स तौ प्र-सार्योरग-भोग-कल्पौ
भुजौ भुजङ्गाऽरि-निकाश-कल्पैः ।
ददर्श मेरुं सुर-राज-कल्पो
४९] दिशः प्र-कर्षन्न् इव वायु-पुत्रैः । [५२
आ-प्लुत्य वेगात् सहसा जगाम
५०] चक्रं यथा विष्णु-भुज-प्रमुक्तम् ॥१००॥ [५३

---

१. म-नास्ति । २. रा$_2$-नास्ति ॥ ३. फ-नानर्द्यमा० ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-भीमदर्शनः ॥ ५. रा$_2$ म-०चण्डविक्रमः ॥ ६. ल$_1$ ल$_2$ ब अ म-वृक्षषण्डं । ७. म-०तवानराश्च । ८. रा$_2$-नास्ति ॥ ९. रा$_2$-०कल्पौ । १०. रा$_2$ म-जगाम । ११. रा$_2$ म-वायुसूनुः । १२. रा$_2$-विष्णुकरप्रयुक्तं । म-०जप्रयुक्तम् ॥

स पर्वतान् वृक्ष-गणान् सरांसि
नदीस् तडागानि पुरोत्तमानि ।
स्फीतांश्च् जनांस् तान् अपि सम्प्र[1]-पश्यन्
५१] जगाम वेगाद् अति-चण्डवेगः ॥१०१॥ [५४
आदित्य-पथम् आ-सा[2]द्य स जगाम गतोऽम्ब[3]रम् । [५५पू
५२] स[4] ददर्श म[5]हा-शैलं हिम-वन्तं महा-क[6]पिः ॥१०२॥ [५७उ
नाना-प्रस्रवणोपेतं बहु-कन्दर-निर्झरम् ।
५३] श्वेतै रजत-सङ्काशैः शिखरैश् चारु-दर्शनम् ॥१०३॥ [५८
ततः समा-साद्य महा-नगेन्द्रम्
अतिप्रवृद्धोत्तम-घोर-शृङ्गम् ।
ददर्श पुण्यानि तपो-वनानि
५४] सुरर्षिसङ्घोत्तम-सेवितानि ॥१०४॥ [५९
स ब्रह्म-लो[7]कं रजताऽचलं च
शक्राऽऽलयं रुद्र-शर-प्रमोक्षम् ।
हयाऽऽननं ब्रह्म-शिरश् च दीप्तं
५५] ददर्श वैवस्वत-किङ्कराणाम् ॥१०५॥ [६०
वज्राऽऽकरं वैश्रवणाऽऽलयं च
सूर्य-प्रभं सूर्य-निबन्धनं च ।
ब्रह्माऽऽसनं शङ्कर-कार्मुकं च
५६] ददर्श नासां च वसु-धरायाः ॥१०६॥ [६१
कैलासम् उग्रं हिमवच्-छिलाश् च
तं चर्षभं काञ्चन-शृङ्गम् उग्रम् ।

---

१. रा₂-तत्र प० ॥ २. रा₂-अतिक्रम्य । ३. रा₂ म-०म्बरे । ४. म-ददर्श सहसा शैलं । ५. प्र-महागिरिं ॥ ६. रा₁ ल₁ ल₂ ब अ प्र-प्लवगोत्तमं ॥ ७. प्र रा₂ फ म-०नशैलम् ।

दीप्तं च सर्वौषधि-सम्प्रयुक्तं
५७] ददर्श सर्वौषधि-पर्वतेन्द्रम् ॥१०७॥ [६३

स तं सम्-ईक्ष्याऽनल-सम्प्रदीप्तं
विसिष्मिये वासव-दूत-सूनुः ।[2]
आ-प्लुत्य तं चौषधि-पर्वतेन्द्रं[2]
N] विवेश यत्रौषधयश् चतस्रः ॥१०८॥ [६४

स योजन-सहस्राणि समा-क्रम्य महा-कपिः । [६५पू
५८] अ-विश्रान्तो महा-तेजा वि-चिकाय महौषधीः ॥१०९॥ [N

ततस् ताः काम-रूपिण्यो महौषध्यो महा-कपिम् ।
५९] वि-ज्ञायाऽर्थिनम् आ-यान्तं तदा जग्मुर् अ-दर्शनम् ११० [६६

स तास् त्व् अ-पश्यन् भृशम् आ-चुकोप
ननाद कोपाच् च वि-वृत्य वक्त्रम् ।
अ-मृष्यमाणश् च वि-वृत्य नेत्रे
६०] तं शैल-राजानम् उवाच रोषात् ॥१११॥ [६७

किम् एतद् एवं सु-विनिश्चितं ते
यद् राघवे नाऽस्ति तवाऽनु-कम्पा ।
पश्याऽद्य मद्-बाहु-बलाऽभिभूतं
६१] वि-कीर्णम् आत्मानम् इहाऽद्रि-राज ११२ [६८

स तस्य शृङ्गं परमौषधीकं
स-काञ्चनं धातु-सहस्र-युक्तम् ।[5]
विकीर्ण-कूटं ज्वलिताऽग्र-शृङ्गं
६२] प्र-गृह्य वेगात् सहसोद्-ववर्ह ॥११३॥ [६९

---

१. रा₂-०संप्रयुक्तं ॥ २. रा₂-नास्ति ॥ ३. म-अवीक्ष्यमा० ॥ ४. रा₂-भुवि नि० । ५. रा₂-नास्ति ॥ ६. फ-०सोद्ववाह । म-०सोन्ममंथ ॥

स तं समुत्-पाट्य खम् उत्-पपात
विन्त्रास्य लोकान् स-सुराऽसुरेन्द्रान् ।
सं-स्तूयमानः सुर-सिद्ध-सङ्घैर्
६३] जगाम वेगाद् अति-चण्डवेगः ॥११४॥ [७०
स तेन शैलेन भृशं रराज
शैलोत्तमे(?पमो) गन्ध-वहस्य सूनुः ।
सहस्र-धारेण स-पावकेन
६४] चक्रेण विष्णुर् दिवि चो(?वो)द्[1]-यतेन ॥११५ [७२
स भास्कराऽध्वानम् अभिप्र-पन्नस्[2]
तद् भास्कराऽऽभं शिखरं प्र-गृह्य ।
बभौ तदा भास्कर-सन्निकाशो
N] रवेः सकाशे प्रतिभास्कराऽऽभः ११६ [७१
तं वानराः प्रेक्ष्य मुदा प्र-णेदुः
स चाऽपि तान् प्रेक्ष्य मुदा ननाद[3] ।
तेषां समुत्कृष्ट-रवं नि-शम्य
६५] लङ्काऽभि(?भृ)तो भीम-तरं वि-नेदुः ११७[७३
स तं गृहीत्वा नि-पपात तस्मिञ्
शैलोत्तमे वानर-सैन्य-मध्ये ।
हर्ष्-उत्तमैस् तैर् अभि-शस्यमानो
६६] वि-भीषणेनाऽपि च शस्यमानः॥११८ [७४
ततस् तु तौ सं-यति राज-पुत्रौ
तं गन्धम्[4] आ-घ्राय महौषधीनाम् ।
बभूवतुस् तत्र तदा वि-शल्यौ
६७] संरूढ-सर्व-व्रण-नष्ट-शोकौ ॥११९॥ [७५

---

१. ख१-बोधितेन ॥ २. रा२ फ म-अनुप्र० ॥ ३. म रा२ फ-समुन्ननाद ॥ ४. म-गन्धमासाद्य ॥

ततः स वै गन्ध-वहस्य सूनुः
संगृह्य हैमं शिखरं प्र-वृद्धम् ।
जगाम वेगाद् हिम-वन्तम् एव
N] पुनश् च रामेण समा-गतश् च ॥१२०॥ [७२

इत्यार्षे रामायणे युद्ध-काण्डे ओषध्यानयनं नाम
त्रिपञ्चाशः सर्गः ॥५३॥

[वं-५४,५५]= [चतुःपञ्चाशः सर्गः] =[दा-७५,७६]

ततोऽब्रवीन् महा-तेजाः सु-ग्रीवो वानराऽधिपः ।
१] अर्थं वि-ज्ञापयन्न् एव हनू-मन्तं महा-बलम् ॥१॥ [१
२पू] यतो हतः कुम्भ-कर्णः कुमाराश् च सहाऽनुगाः ।
३पू] नेदानीम् उप-संहारं रावणः कर्तुम् अर्हति ॥२॥ [२
....
४] लङ्काम् अभि-पतन्त्व् आशु प्र-गृह्योल्काः सहस्र-शः ॥३॥ [३
ततोऽस्तं-गत आदित्ये रौद्रे तस्मिन् निशा-मुखे ।
५] लङ्काम् अभि-मुखा जग्मुः सोल्कास् ते हरि-यूथपाः ॥४॥ [४
उल्का-हस्तैर् हरि-गणैः सर्व-तः समभि-द्रुताः ।
६] आ-रक्षास् ते विरूपाऽक्षा राक्षसा विप्र-दुद्रुवुः ॥५॥ [५

---

१. प्र-लंकाकांडे । २. रा$_2$ फ-अत्रबन्धे ओषध्या० ॥ ३. रा$_2$-इदा० । ४. प्र रा$_2$ फ-प्राशुं ॥ ५. टि०-अत्रत्यः पूर्वार्धः पतित इति संभाव्यते । ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ म-०तत्याशु ॥ ७. ल$_1$ ल$_2$ ब फ-आदित्यो ॥ ८. रा$_2$-नास्ति ॥

गो-पुरेषु प्र-तोलीषु रथ्यासु वि-विधासु च ।
७] प्रासादेषु च सं-हृष्टाः ससृजुस् ते हुताऽशनम् ॥६॥
तेषां गृह-सहस्राणि ददाह हुत-भुक् तदा । [६
८] राक्षसानां समा-साद्य सर्वेषां द्वार-रक्षिणाम् ॥७॥ [१३उ
हेम-चित्र-तनुत्राणां स्रग्दामाऽम्बर[1]-धारिणाम् ।
९] शीधु-व्याकुलिताऽक्षाणां मद-मन्थर[2]-गामिनाम् ॥८॥[3] [१४
कान्ताऽऽलम्बित-वस्त्राणां शत्रु-सङ्घात-भेदिनाम् ।[4]
१०] गदाऽसि[5]-शूल-हस्तानां खादतां दशनान् अपि ॥९॥ [१५
११पू] शयनेषु महाऽर्हेषु शयितानां तथैव च ।
१४पू] त्रस्तानां गच्छतां चैव पुत्रान् आ-दाय स-त्वराम् ॥१०॥ [१६
तेषां दश-सहस्राणि रक्षसां पुर-वासिनाम् ।
१२] अदहत् पावकस् तत्र जज्वाल च पुनः पुनः ॥११॥ [१७
१७उ] सानु-मन्ति महाऽर्हाणि गम्भीर-गुण[6]-वन्ति च ।
N] हेमचित्राऽर्कचन्द्राणि तपनीय-निभानि च ॥१२॥[7] [१८
रत्न-चित्र-गवाक्षाणि साऽधिष्ठानानि सर्व-शः ।
१८] मणि-विद्रुम-चित्राणि स्पृशन्तीऽव भास्-करम् ॥१३॥ [१९
क्रौञ्च-बर्हिण-वीणानां भूषणानां च निः-स्वनैः ।
१९] नादितान्य् आ-कुलानि स वेश्मान्य् अग्निर् ददाह वै १४ [२०
ज्वलनेन परीऽतानि तोरणानि चकाशिरे ।
२०] वि-द्युद्भिर् इव नद्धानि मेघ-जालानि पुष्करे ॥१५॥ [२१
स धूम-माली दीप्ताऽर्चिः सं-बभूव हुताऽशनः ।

---

१. प्र-नास्ति । २. अ प्र-मदविप्लवगा० । रा$_2$म-मदविह्वलगा० । ३. फ-नास्ति ॥ ४. अ फ-नास्ति । ५. रा$_2$-गदात्रिशू० ॥ ६. ल$_2$ अ ब-०गुरुवन्ति । ७. रा$_2$-१२-शश्लोकादारभ्य १६-शपूर्वार्धं यावन्नास्ति ॥ ८. म-०णरावाणां ॥ ९. फ म-घर्मगे ॥

N] युगाऽन्त इव भूतानि दिधक्षुर् अतुल-प्रभः ॥१६॥ [N
ज्वाला-माला-परिक्षिप्तो ददाह पवनाऽन्वितः ।
N] कृष्ण-वर्त्मा ततो घोरो लङ्कां रावण-पालिताम् ॥१७॥ [N
तस्यां तु दह्यमानायां लङ्कायां वानरोत्तमाः ।
N] बभूवुर् हृष्ट-मनसो नदन्तश् च महा-बलाः ॥१८॥ [N
ते राक्षसान् बहूंस् तत्र प्र-गृह्य हरि-पुङ्गवाः ।
N] [1]चिक्षिपुर् ज्वलने दीप्ते[2] किं-चिद् दग्धान् भयाऽऽतुरान् १९ [N
स्पष्टश् चटचटा-शब्दो [3]भवनानां वि-[4]शुश्रुवे ।
N] धूम-जाल-परीऽतानां वि-षमश् चित्र-भानुना [5]॥२०॥ [N
N] [क-चित् सं-भूषितान्य् एव दृश्यन्ते भवनानि वै[6]॥२१॥] [N
बहु-रत्न-समाकीर्णां[7] नाना-धातु-समन्विताम् ।
N] ददाह हुत-भुग् लङ्कां तीव्र-वायु-समन्वितः ॥२२॥[8] [N
युगाऽन्ताऽग्नि-समं वह्निम् उत्थि(द्-स्थि)तं लोम-हर्षणम् ।
N] ददृशुर् व्योम-निलया लङ्कायां मुदिता भृशम् ॥२३॥ [N
काञ्चनानि वि-मानानि मुक्ता-वैडूर्य-वन्ति च ।
N] दह्यमानानि राजन्ते [10]जले प्रत्यग्नि-वत् तदा ॥२४॥ [N
धूम-जाल-परीऽ[11]ताऽग्यो ब[11]हु-धा दहनाऽर्दिताः ।
N] [12]वि-द्रवन्ते स्म राक्ष[12]स्यो वह्नि-ज्वाला-भयाऽऽ[13]कुलाः२५॥ [N

---

१. रा$_2$ म-विक्षिपुर् । २. रा$_2$-तीव्रे ॥ ३. रा$_1$ ल$_1$ ल$_2$ ब भ्र-भुव० । ४. म-च शु० । ५. म-नास्ति ॥ ६. म-नास्ति । अत्र गलित इति संभाव्यते । यथास्थिते नैराकांक्ष्यादर्शनात् ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब भ्र प्रनावायुध्वस० । ८. रा$_2$-नास्ति ॥ ९. म-०भिनिभं ॥ १०. रा$_2$-भिन्ना:-जज्ञे ॥ ११. फ म-०तास्या बभूवुर् । १२. प्र रा$_2$ फ म-राक्षस्यो विनदंति स्म । १३. म-०भयार्दिता: ॥

वि-मानेषु प्र-सुप्ताश् च दह्यमाना वराऽङ्गनाः ।
२१] त्यक्ताऽऽभरण-संसक्ता[1] हाहेत्य्[2] उच्चैर् वि-चुक्रुशुः[3] ॥२६॥ [२३
काश्-चिद् भर्तॄन् समा-लिङ्ग्य निद्रा-पान-वशं-गताः ।
N] यथा सुप्तास् तथा दग्धाः श[4]यनेषु वराऽङ्गनाः[5] ॥२७॥ [N
काश्-चिन् निद्रा-परीऽताऽक्ष्यः प्र-मृज्य नयनान्य्[6] अथ ।
N] आ-दीप्तं गृहम् आ-लक्ष्य शिशून् आ-दाय दुद्रुवुः ॥२८॥[7] [N
तत्र चाऽग्नि-परीऽतानि नि-पेतुर् भुवनान्य् अथ[8] ।
२२] वज्रि-वज्र-हतानीऽव शिखराणि मही-भृताम्[9] ॥२९॥ [२२
तानि निर्-भिद्यमानानि[10] दूर-तः प्र-चकाशिरे ।
२३] हिमवच्-छिखराणीऽव दह्यमानानि सर्व-शः[11] ॥३०॥ [२४
हर्म्याऽग्रैर् दह्यमानैश् च तलैः प्र-ज्वलितैस् तथा ।
२४] रात्रौ सा शुशुभे लङ्का किं-शुकैर् इव पुष्पितैः ॥३१॥ [२५
उष्ट्रैर् मुक्तैर् गजैर् मुक्तैर् मुक्तैश् च तुर-गैर् अपि ।
२५] बभूव लोको लङ्कायां भ्रान्त-ग्राह इवाऽर्णवः ॥३२॥ [२६
अश्वं मुक्तं गजो दृष्ट्वा क-चिद् दुद्राव वेगितः[12] ।
२६] भीतः सोऽपि गजं दृष्ट्वा क-चिद् दुग्धो न्य्-अ[13]वर्तत ३३ [२७
अपरे हेम-कक्ष्याश् च सं-नद्धा वर-वारणाः ।
N] त्रस्त-बन्धाः समा-क्षिप्य येन केन प्र-दुद्रुवुः ॥३४॥[14] [N
पानीयं पातुम् इच्छन्तः परिभ्रमण-कर्षिताः ।
N] प्रति-बिम्बं जले दृष्ट्वा तम् अग्निम्[15] इति मेनिरे ॥३५॥[14] [N

---

१. अ प्र रा₂ फ-०णसंयोगान् । २. रा₁ ल₁ल₂ ब रा₂-हाहेति च । ३. म-नास्ति ॥ ४. रा₂-शरणेषु । ५. फ म-०नास्ति ॥ ६. रा₂-नास्तथा । ७. फ-नास्ति ॥ ८. रा₂फ-उत । ९. प्र रा₂फ-धरावृतां ॥ १०. रा₂फ म-निर्दह्यमानानि । ११. रा₂ फ म-सर्वतः ॥ १२. रा₁ ल₁ ल₂ ब अ-०तं । १३. ल₁-दुद्राव वेगितः ॥ १४. रा₂-नास्ति ॥ १५. रा₁ ल₁ ल₂ ब अ प्र फ-अग्निर् ॥

प्रासादेषू‌ऽस्थि(दू-स्थि)तो ह्य् अग्निः सम्प्र-दीप्तो व्य्-अरोचत ।
N] लङ्कां द्रष्टुम् इवाऽऽरूढो दग्धाम् इति विभा-वसुः ॥३६॥[1] [N
सा बभूव मुहूर्तेन हरिभिः पीडिता पुरी ।
२७] लोकस्याऽस्य क्षये घोरे प्र-दीप्तेव वसुं-धरा ॥३७॥ [२९
स्त्री-पुंसोश् चाऽपि मोहेन व्य्-अक्तिर् नाऽऽसीद् वि-नेदुषोः ।
२८] नादिता च धरा तत्र शुश्रुवे दश-योजनम् ॥३८॥ [३०
प्रदग्ध-कायान् सम्-अरे निर्-गतान्[2] राक्षसान् बहिः ।
२९] सहसाऽभिप्र-पेतुम् तान् क्रोशन्तो हरयो भृशम् ॥३९॥ [३१
उर्त्-क्रुष्टो वानराणां च राक्षसानां च निः-स्वनः ।
३०] दिशो दश सम्-उद्रं च पृथिवीं च व्य्-अनादयत् ॥४०॥ [३२
प्र-गाह्य च महाऽऽत्मानौ ताव् उभौ राम-लक्ष्मणौ ।
३२] अ-सम्भ्रान्तौ जगृहतुर् धनुषी धन्विनां वरौ ॥४१॥ [३३
ततो वि-स्फारयामास रामस् तद् धनुर् उत्-तमम् ।[5] [३४पू
३३] भग-वान् इव सं-क्रुद्धो रुद्रो वेदं[6]-मयं धनुः ॥४२॥ [३५पू
राक्षसोत्क्रुष्ट[7]-घोषश् च वानराणां च निः-स्वनः । [३६पू
३५] ज्या-घोषश् चाऽपि रामस्य त्रयो[8] व्य्-आपुर् दिशो दश४३[३७
तस्य कार्मुक-मुक्तैश् च शरैस् तत् पुर-गोपुरम् ।
३६] पावकेन च निर्-दग्धम् अपतच् छत-शो भुवि ॥४४॥ [३८
ततो राम-शरान् दृष्ट्वा वि-मानेषु गृहेषु च ।

---

१. रा२-नास्ति ॥ २. रा१ ल१ ल२ ब-निर्दग्धान् । ३. रा१ ल१ ल२ ब अ-ते ॥ ४. रा१ ब म-उत्कृष्टं । ल१ ल२ अ प्र-उत्कुष्टं । फ-सत्कुष्टं ॥ ५. अतः परमधिकः पाठः—रा२ म-लक्ष्मणश्च महातेजास्तथा विस्फारयद्धनुः । ६. ल१-वेधमयं । रा२-देवमयं ॥ ७. प्र रा२-०सोत्कृष्ट० । ८. म-त्रिभिर्व्याप्ता ॥

३७] सं-नादो[1] राक्षसेन्द्राणां तुमुलः सम्-अपद्यत ॥४५॥[2] [३९
आ-दिष्टा वानरेन्द्रेण सु-ग्रीवेण महाऽऽत्मना ।
४०] आ-स्थिता द्वारम् आ-श्रित्य प्लव-गा युद्ध-काङ्क्षिणः ४६॥ [४१
यश् च नो वि-तथं कुर्यात् तत्र[3] शत्राव् उप-स्थिते[3] ।
४१] स हन्तव्योऽभिसं-हृत्य[4] बल-वान् यः पलायते[4] ॥४७॥ [४२
इत्य् एवं निश्चिताऽर्थेषु सुग्रीव-वश-वर्तिषु ।
४२] स्थितेषु द्वारम् आ-श्रित्य रावणं मन्युर्[5] आऽविशत् ४८॥ [४३
तस्य जृम्भित-विक्षेप[6]-व्यामर्षाद्[6] अति-संकुलैः[7] ।
४३] रूप-वान् इव रुद्रस्य[8] मन्युर् गात्रेष्व् अजायत ॥४९॥ [४४
४४पू] स नि-कुम्भं च कुम्भं च कुम्भकर्णाऽऽत्मजाव् उभौ ।
४५उ] प्रेषयामास सं-क्रुद्धः सं-ग्रामं राक्षसाऽधिपः ॥५०॥ [४५
४६पू] शशास चैव सर्वांस्[9] तान् राक्षसान् राक्षसोऽधिपः[10] ।[४७पू
N] महा-बलान् महा-कायान् सर्व-युद्ध-विशारदान्[11] ।
४६उ] त्वरितं[12] गच्छतेत्य् एवं क्रुद्धः[13] सिंह इवोन्-नदन्[13] ॥५१॥ [N
तेन सं-नोदितास् ते तु तदा प्रज्वलिताऽऽयुधाः । [N
४७] लंकाया निर्-ययुर् द्वारान् नदन्तो भीम-निस्वनाः[14] ॥५२ [४८उ
कुम्भकर्णाऽऽत्मजौ वीरौ परि-गृह्य[15] समन्त-तः ।

---

१. भ-शर्वर्यां । २. अतः परमधिकः पाठः—अ भ-तेषां सभाद्यमानानां सिंहनादं च कुर्वतां । भ-हन्यमानास्तनश्चैवं दह्यमानाश्च वह्निना । राक्षसा निलयं जग्मुर्मेघा वातेरिता इव ॥ अर्दिता बाणजालैश्च निशितै रजनीचराः । बभ्रमुश्चस्खलुर्नेदुः समुत्पेतुर्निशाचराः ॥ ३. भ-न वा युद्धयेत वानरः । ४. भ-०सम्प्रेक्ष्य राजशासनदूषकः ॥ ५. रा$_{1}$ ल$_{1}$ल$_{2}$ ब अ प्र फ-मृत्युर् । रा$_{2}$-मन्युम् ॥ ६. म-०विक्षेपे व्य०० । भ-०क्षेपाद् व्या० । रा$_{1}$ ब अ-व्यामर्शाद् । ७. भ-आकुलात्मनः । ८. रा$_{2}$-नास्ति ॥ ९. रा$_{2}$ फ म-सुमहाबलान् । १०. ब-नास्ति । ११. रा$_{2}$फ म भ-नास्ति । १२. म भ-राक्षसा । १३. म-सिंहनादं चकार ह । भ-सिंहनादं व्यमुंचत ॥ १४. प्र रा$_{2}$ फ-भीम-विक्रमाः । म-घोरदर्शनाः । भ-०निःस्वनं ॥ १५. म भ-नास्ति ।

N] बहु-सैन्य-परीवारौ शीघ्रं रावण-चोदितौ [1]॥५३॥ [N
तयोर् आभरण-स्थाभिर् भाभिः स्वाभिश् च सर्व-तः ।[1]
N] चक्रुस् ते स-प्रभं व्योम हरयश् चाऽग्निना पुनः ॥५४॥ [४९
तत्र ताराऽधिपस्याऽऽभास् ताराणां[2] च तथैव भोः ।
N] तयोर् आ-भरणेभ्यस्[3] तु प्र-दीप्तम् इव सर्व-तैः[3] ॥५५॥ [५०
तत्र चाऽर्ध-प्रदीप्तानां गृहाणां सागरैः[4] पुनः[4] ।
N] भासा संसक्त-पातालश् चलोर्मिः शुशुभे भृशम् ॥५६॥[5] [५२
N] तद् वानर-बलं घोरं राक्षसानां तथा[6] बलम् । [५४उ
४८उ] ददृशे[7] ज्वलितं[7]-प्रासं किंकिणी-शत-शोभितम् ५७॥ [५५पू
भीमाऽश्व-रथ-मातङ्गं हय-वाहन-संकुलम् । [५३उ
४९] दीप्त-शूल-गदा-शक्ति-खड्ग-मुद्गर-धारिणम् ।[8] [५४पू
N] हेमजालाचितं(?त-)व्योम(?व्यामं)निशितान्तपरश्वधम् ५८ [५५उ
५०पू] व्याघूर्णित-महाशस्त्रं घन-संसक्त-कार्मुकम् ।[10]
N] माल्य-गन्ध-समुत्सेकं समाचित-महाबलम् ।
५०उ] घोर-शूर-जनाऽऽकीर्णं[11] महद् अम्बुद-निःस्वनम् ॥५९॥ [५६
तद् दृष्ट्वा बलम् आ-यातं राक्षसानां महत् तदा ।
५१] सं-चचाल कपीनां तु बलम् उच्चैर् ननाद च [12]॥६०॥ [५७

---

१. म भ-नास्ति ॥ २. फ-तारकाणां तथैव च । ३. म-०भ्यश्च ज्वालानामपि सर्वशः ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-सागराम्बुना । ५. रा$_2$-नास्ति ॥ ६. रा$_2$-तथैव च । ७. रा$_1$-०ते ज्वलितं प्रास । रा$_2$-तद्रात्रौ ज्व० । म-उद्यतज्वलित० ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब श्र-नास्ति । अतः परमधिकः पाठः—भ-पताकाध्वजसंयुक्तमुत्तमायुधभूषितं । ९. रा$_2$ म-०तं व्योम निशितन्तु प० । भ ०लावृतभुजं व्यावेष्टितप० ॥ १०. रा$_2$-नास्ति । ११. ब म-०रसमाकीर्णं । भ-०शूलसमाकीर्णं ॥ १२. अतः परमधिकः पाठः—भ-प्रगृहीतमहावृक्षं समुत्थितमहाशिलं । समतिष्ठत्सुदुर्धर्षं परस्परकृतोद्यमं ॥

जवेनाऽऽक्रम्य च[1] पुनस् तद् बलं रक्षसां महत् ।
५३] अभ्य्-अयात् प्रत्य्-अरि-बलं पतं-गा[2] इव पावकम् ॥६१॥ [५८
५४पू] तेषां भुज-पराऽऽमर्शाद्[3] आमृष्ट-[4]कनकाऽङ्गदः । [५९पू
N] ऋक्ष-नाद-[5]स्वनश् चित्रो दीप्ति-[6]मांश् छुशुभे भृशम् ६२॥ [N
N] सर्वे ते बलिभिर् भिन्ना[8] वि-चेरुस् तत्र राक्षसाः । [N
N] तथैवाऽप्य् अपरे तेषां कपीनाम् अभि-ताडिताः[9] ।[7] [६१पू
५६उ] प्र-वीरान्[10] अभि-तो जघ्नू राक्षसान् अन्तरे स्थितान् ६३ [६३उ

घ्नन्तम् अन्यं जघानाऽन्यः पतितोऽन्यम् अपातयत् ।[11]
५८] गर्हमाणं जगर्हाऽन्यो दशन्तम्[12] अदशत् तथा[12] ॥६४॥ [६६
देहीऽत्य् अन्यो ददात्य् अन्यो ददामीऽत्य् अपरः पुनः ।[13]
६१] क्लिश्नासि[14] किं मा हिंसीऽति तत्राऽन्योऽन्यम् अभाषत६५ [६७
तद् उद्यत-गदा-प्राऽऽस-शक्ति-[15]शूलाऽसि-संकुलम् ।
६०] प्राऽवर्तत महा-रौद्रं युद्धं वानर-रक्षसाम् ॥६६॥ [६८
राक्षसान् दश सप्तेति वानरा जघ्नुर् आ-हवे ।
६२] वानरान् अपि सप्ताऽष्टौ दश राक्षस-पुङ्गवाः ॥६७॥ [६९
प्रतिलम्बित-वस्त्रांश् च प्रमुक्त-कवचाऽऽयुधान् ।

---

१. रा$_2$-बलवांस् । २. ल$_1$ ल$_2$ ब भ-पतंग ॥ ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-ऽर्षाद् । ४. ल$_2$-अमृ० । ५. रा$_1$ ल$_1$ ल$_2$ ब अ-ऋक्षनादः स्व० । प्र-ऋक्षवादस्व० । ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-दीप्तमाशु० । फ-दीप्तानाशु० । ७. रा$_2$-नास्ति ॥ ८. म-शिलाद्रुमविभिन्नाऽङ्गा । ९. फ-अभिलक्षिताः । १०. भ-प्रवरानभिसंजघ्नू ॥ ११. भ-क्लिश्यमानास्तथा चान्ये ततस्ते पतिताः पृथक् । १२. प्र-नास्ति ॥ १३. प्र भ-नास्ति । १४. रा$_2$-क्लिष्टोऽसि ॥ १५. म भ-०समुष्टिशू० ॥

६३] राक्षसान् सम्प्र-लभ्याऽऽशु वानराः पर्य्-अवारयन् ६८[1] [७०
वानरा राक्षसाश् चैव व्यति-षक्ताः परस्-परम् ।
६४] आ-विष्टा इव युध्यन्तश् चक्रुस् तुमुलम् अद्भुतम्[2] ॥६९॥ [N
वं-५५] प्र-वृत्ते सं-कुले व्यर्थे तस्मिन् वीर-वर-क्षये । [दा-७६
१] अङ्ग-दोऽकम्पनं वीरम् आ-ससाद रणोत्कटः[3] ॥७०॥ [१
आ-हूय सोऽङ्ग-दम् अपि ताडयामास वेगितः ।
२] गदयाऽकम्पनः श्री-मान् स चचालाऽचलोपमः ॥७१॥[4] [२
स सं-ज्ञां प्राऽऽप्य तेजस्वी चिक्षेप शिखरं गिरेः ।[5]

---

१. रा$_2$म भ-अतः परं सर्गसमाप्ति —इति लंकाकांडे उल्काहरणे संकुलयुद्धं नाम सर्गः ॥ २. रा$_2$म भ-नास्ति ॥ ३. रा$_2$-नास्ति ॥ ४. भ-गदया चांगदः पूर्वं संचचाल भृशं हतः ॥ ५. अतः परमधिकः पाठः– भ-अर्दितो हि प्रहारेण वज्रकंठोऽपतद्भुवि । वज्रकंठे हते तस्मिन्नंगदेन महात्मना ॥ ततस्तं पतितं दृष्ट्वा भ्रातरं निहतं रणे । रथेनाभ्यपतत् क्षिप्रमथ संकंपनस्तदा ॥ अंगदं बहुभिर्बाणैः शितैर्विव्याध वेगितः । शरीरदारणैस्तीक्ष्णैः कालाग्निसदृशप्रभैः ॥ क्षुरक्षुरप्रनाराचैर्वत्सदंतशिलीमुखैः । कर्णिशल्यविपाटैश्च बहुभिश्च शितैः शरैः ॥ अंगदः प्रतिविद्धांगो वालिपुत्रः प्रतापवान् । रथमश्वान्धनुश्चास्य ममर्द तरसा बली ॥ ततः संकंपनः शीघ्रमसिचर्म समाददे । उत्पपात दिवं चापि वेगवानविचारयन् ॥ तं क्षिप्रं दूरमुत्क्षिप्य दोर्भ्यामादाय चांगदः । करेण तस्य तं खड्गं समाकृष्य ननाद च ॥ तस्याथ गलके खड्गं निचखान तदांगदः । यज्ञोपवीतच्छेदेन चिच्छेद कपिकुंजरः ॥ स प्रगृह्यासिमासुत्य विनदन् खे मुहुर्मुहुः । वालिपुत्रो महावीर्यो दुद्राव प्रहसन्निव ॥ आयसीं तु तदा वीरो गदामादाय राक्षसः । शोणिताक्षः समाविध्य अंगदं समुपाद्रवत् ॥ प्रजंघस्तु तदा वीरो यूपाक्षसहितो बली । रथेन हि ययौ क्रुद्धो वालिपुत्रं महाबलम् ॥ तयोर्मध्ये कपिश्रेष्ठः शोणिताक्षप्रजंघयोः । विशाखयोर्मध्यगतः पूर्णचन्द्र इवाबभौ ॥ अंगदं परिरक्षंतौ मैंदो द्विविद एव च । तस्य तस्थतुरभ्यासे परस्परजिघांसया ॥ अथोदीर्णान्महाकायान्प्रतीयुस्तान्महाबलान् । राक्षसा वानरश्रेष्ठानसिबाणगदाधराः ॥ एतस्मिन्नेव काले तु यूपाक्षो राक्षसैर्वृतः । असिशक्तिगदाकुंतैर्द्रावयामास राक्षसः ॥

७] मूर्ध्नि सम्प्राऽपतत् तस्य स पपात हतो भुवि ॥७२॥ [३
हत-प्रवीरा मथिता राक्षसेन्द्रस्य सा चमूः ।
३४] जगामाऽभि-मुखं तूर्णं[2] कुम्भकर्ण-सुतो यतः ॥७३॥ [३६
३५पू] आ-पतन्तीं च वेगेन कुम्भस् तां सान्त्वयंश्[3] चमूम् । [३७
N] अथोत्-क्रुष्ट(?ष्टो)महा-वेगैर् लब्ध-लक्ष्यैः प्लवं-गमैः[4] ॥७४ [३८पू
स-धनुर् धन्विनां श्रेष्ठो वि-रथः सु-समाऽऽहितः ।
३७] मुमोचाऽऽशीविष-प्रख्यान् छरान् हरिषु वीर्य-वान् ॥७५ [३९

प्रयाणां वानरेन्द्राणां त्रिभिः सह निशाचरैः । संसक्तानां बभौ युद्धमेक-भावगतात्मनाम् ॥ ते तु वृक्षान्समादाय चिक्षिपुः सुमहाबलाः । खड्गेन तान्प्रचिच्छेद प्रजंघोऽथ महाबलः॥ रथानश्वान् गजांश्चैव ते प्रचिक्षिपुराहवे । शरौघैस्तान्प्रचिच्छेद यूपाक्षो राक्षसर्षभः ॥ मैन्दद्विविदसृष्टांस्तान् द्रुमानुत्पाट्य वीर्यवान् । बभंज गदया मध्ये शोणिताक्षः प्रतापवान् ॥ उद्यम्य विपुलं खड्गं परमर्मनिकृंतनम् । प्रजंघो वालिनः पुत्रमभिदुद्राव वेगितः ॥ तमभ्यासगतं दृष्ट्वा वालिपुत्रो महाबलः । निजघानाश्वकर्णेन द्रुमेणातिबलस्तदा ॥ बाहुं चास्य सनिस्त्रिंशमाजघान स मुष्टिना । अंगदोऽस्य प्रजंघस्य स पपात क्षितावसिः ॥ तं दृष्ट्वा पतितं भूमौ खड्गं वैडूर्यसन्निभम् । मुष्टिं प्रकल्पयामास वज्रकल्पं महाबलः ॥ ललाटे स महावीर्यमंगदं वानरर्षभम् । आजघान महातेजा मुहूर्तं संचचाल सः ॥ स संज्ञां प्राप्य तेजस्वी वालिपुत्रः प्रतापवान् । प्रजंघस्य शिरः कायात्पातयामास मुष्टिना ॥ तं यूपाक्षोऽश्रुपूर्णाक्षः पितृव्यं वीक्ष्य सूदितम् । अवरुह्य रथात्क्षिप्रं क्षीणेषुः खड्गमाददे ॥ तमापतंतं सम्प्रेक्ष्य यूपाक्षं प्लवगर्षभः । जघानोरसि संक्रुद्धो जग्राह च महाबलः ॥ गृहीतं भ्रातरं दृष्ट्वा शोणिताक्षः प्रतापवान् । आजघान महातेजा वक्षसि द्विविदं तथा ॥ स तथाभिहतस्तेन विचचाल मुहुर्मुहुः । उद्यतां च पुनस्तस्य मुष्टिं दृष्ट्वाथ रक्षसः ॥ द्विविदः शोणिताक्षं तं विददार नखैस्तदा । निष्पिपेष च रोषेण क्षितावाविध्य वीर्यवान् ॥ यूपाक्षमभिसंक्रुद्धो मैन्दो वानरयूथपः ।

१. रा२ ल१ ल२ ब अ प्र फ भ-०मुखी । २. म-नास्ति ॥ ३. रा२-स्वां ; भ-स्वकां । ४. रा२-नास्ति ॥

तस्य तच् छुशुभे भूयः स-शरं धनुर् उत्-तमम् ।
४०] वि-द्युतेवाऽऽगताऽर्चिष्मद् द्वितीयेन्द्रधनुर् यथा ॥७६॥[1] [४०
तेन हाटक-वर्णेन पत्रिणा चित्र-वाससा ।
४१] आकुण्डल-विकृष्टेन विव्याध द्वि-विदं बली ॥७७॥ [४१
स तथाऽभि-हतस् तेन विप्रमुक्त-पदः स्फुरन्[2] ।
४२] नि-पपाताऽद्रिकूटाऽऽभो वि-ह्वलो गाढ-वेदनः ॥७८॥ [४२
मैन्दस् तु भ्रातरं दृष्ट्वा वि-ह्वलं गाढ-वेदनम्[3] ।
४३] कुम्भम् अभ्य्-अपतत् क्षिप्रं प्र-गृह्य महतीं शिलाम् ॥७९॥ [४३
तां शिलां साल-जालं च तस्मै चिक्षेप रक्षसे ।
४४] तां[4] बिभेद तदा कुम्भः[5] प्र-मुक्तां[6] पञ्चभिः शरैः ॥८०॥ [४४
सं-धाय सायकं तीक्ष्णं मुमोच सु-समाहितः ।
४५] वक्षस्य् अपि च तेनाऽसौ मैन्दं विव्याध राक्षसः ॥८१॥ [४५
स वानर-वरस् तेन मैन्दः सु-दृढम् आ-हतः ।
४६] रुधिराऽक्तस् ततो भूमौ नि-पपाता[7]ऽभि-मूर्च्छितः ॥८२ [४६
ततोऽङ्गदस् तौ पतितौ मातुलाव् अभि-जग्मिवान् ।
४७] अभि-दुद्राव वेगेन कुम्भम् उद्-यम्य वै शिलाम् ॥८३॥ [४७
तम् आ-पतन्तं वेगेन कुम्भः[8] पञ्चभिर् आयसैः ।
N] त्रिभिश्[9] चाऽन्यैर् बिभेदाऽऽशु मातङ्गम् इव तोमरैः ८४ [४८
स शरौघ-विभिन्नाऽङ्गो वालि-पुत्रः स-पादपम्[10] ।

---

१. भ-विद्युद्भिरावृतं व्योम्नि शक्रचापमिवापरं ॥ २. ल$_1$ल$_2$ब फ-स्फुटन् ॥ ३. म-नास्ति ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब श्र भ-तं । ५. रा$_1$ भ-क्रुद्धः । ६. ल$_1$ ल$_2$-०क्तं । भ-प्रहसन् ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब श्र फ-०पात हि मू० । प्र म-०पात ह मू० ॥ ८. रा$_2$-कुम्भश्च त्रिभिः सायकैः । ९. रा$_2$-त्रिभिरन्यैर् ॥ १०, रा$_1$ ल$_1$ ल$_2$ ब श्र प्र फ-सपादपः । भ-प्रतापवान् ।

N] शिला-वर्षम् अचिन्त्याऽऽत्मा ववर्ष सु-चिरं रिपौ ॥८५ [५०
ततश् चिच्छेद तान् वृक्षान् बिभेद च शिलाः शरैः ।
N] कुम्भकर्णाऽऽत्मजः शूरो वालि-पुत्र-समीरितान् ॥८६॥ [५१
समुद्-यम्य शिलाः क्रुद्धम् आ-पतन्तं सु-वेगितम् ।
४८] भ्रुवोर् विव्याध बाणाभ्याम् उल्काभ्याम् इव कुञ्जरम् ॥८७[५२
अङ्ग-दः पाणिना नेत्रे प्र-मृज्य रुधिरोक्षिते ।
४९] सालम् आ-सन्नम् एका(?के)न्ते(?न)परि-जग्राह पाणिना८८[५३
तम् इन्द्र-केतु-प्रतिमं सालं साल-भुजो बली ।
५०] उत्-ससर्जाऽङ्ग-दो वेगात् तं दूराद् अन्ववैक्षत ॥८९॥ [५५
स चिच्छेद शितैर् बाणैः सं-पत्रैः काय-भेदिभिः ।
५१] कुम्भकर्णाऽऽत्मजो वृक्षं सु-पुङ्खैर् दशभिः शरैः[10] ॥९०॥ [N
ततः स कुम्भः सं-धाय शरान् अग्निशिखोपमान् ।
५२] अङ्ग-दस्य महा-वेगान् मुमोचोरसि राक्षसः ॥९१॥ [N
स वज्राऽशनि-संस्पर्शैः शरैः काञ्चन-भूषणैः ।
५३] वि-क्षतः शर-वेगाऽऽर्त्तः पपात च मुमोह च ॥९२॥ [N
अङ्ग-दं व्यथितं दृष्ट्वा सीदन्तम् इव कुञ्जरम् ।
५४] दुरा-धर्षं राज-पुत्रं धूम्रो ह्य् अभ्य्-अपतद्[11] रुषा ॥९३॥ [५७
N] अथ धूम्रः शिला-हस्तः कोप-संरक्त-लोचनः ।
रिरक्षिषन्[12] अभ्य्-अपतद् अङ्ग-दं वानरर्षभः[13] ॥९४॥ [६०
५५] जाम्ब-वांश् च सु-षेणश् च वेग-दर्शी च वानराः ।
कुम्भम् अभ्य्-अद्रवन् दृष्ट्वा मेघा गिरिम् इवाऽसितम् ९५ [६१

---

१. भ-स प्रवि० । २. भ-श्रीमान् ॥ ३. भ-अंकुशेनेव ॥ ४. रा₂ फ म-विमृज्य । भ-पिधाय । ५. म-शाल्मम् । ६. रा₂-तु वृक्षं । ७. रा₂-प्रतिज० ॥ ८. रा₂ म भ-शालं शाल० ॥ ९. रा₂ म भ-सप्तभिः । १०. रा₂-नास्ति ॥ ११. रा₂-नास्ति ॥ १२ अ प्र-रिरक्षिष्यन् । भ-रिरक्षुर् । १३. म-नास्ति ॥

५६] सम्-ईक्ष्याऽऽपततस् तांस् तु वानरेन्द्रांस् तरस्विनः ।
अवारयत् स बाणौघैर् वायुर् घोरान् इवाऽम्बु-दान् ९६ [६२
५७] तस्य बाण-पथं प्राऽऽप्य न शेकुर् अति-वैर्तितुम् ।
वानरेन्द्रा महाऽऽत्मानो वेलाम् इव महोर्मयः ॥९७॥ [६३
५८] तांस् तु दृष्ट्वा हरीन् सर्वाञ् छर-वृष्टि-निवारितान् ।
अङ्ग-दं पृष्ठ-तः कृत्वा भ्रातृ-जं स महाऽऽहवे ॥९८॥ [६४
५९] अभि-दुद्राव सु-ग्रीवः कुम्भकर्णाऽऽत्मजं रणे ।
शैलं सानु-चरस्याऽर्थे वेग-वान् केसरी यथा ॥९९॥ [६५
६०] उत्-पाट्य वि-विधान् वृक्षान् अश्व-कर्णान् धवान् अपि ।
N] अन्यांश् च वि-विधान् वृक्षान् सम्प्र-चिक्षेप रक्षसे १०० [६६
तां छादयन्तीम् आ-काशं वृक्ष-वृष्टिं दुरा-सदाम् ।
६१] कुम्भकर्ण-सुतश् चित्रैः शरैश् चिच्छेद नैकधा १०१ [६७
अति-लक्षेण शीघ्रेण कुम्भेन नि-शितैः शरैः ।
६२] आ-चितास् ते द्रुमाः पेतुर् यथा घोराः शत-घ्नयः १०२ [६८
द्रुम-वर्षं ततश् छिन्नं दृष्ट्वा कुम्भेन वीर्य-वान् ।
६३] वानराऽधिपतिः श्री-मान् महा-सत्त्वो न विव्यथे ॥१०३ [६९
निर्-भिद्यमानः सहसा सहमानश् च ताञ् छरान् ।
६४] कुम्भस्य धनुर् आ-च्छिद्य बभञ्जेन्द्राऽऽयुधोपमम् १०४ [७०
अव-प्लुत्य ततः शीघ्रं कृत्वा कर्म च दुष्-करम् ।
६५] अब्रवीत् कुपितः कुम्भं भग्न-शृङ्गम् इवर्षभम् ॥१०५॥ [७१

---

१. म-नास्ति । २. भ-आजघान ॥ ३. प्र रा₂ फ-अभिव० ॥ ४. रा₁ ल₁ ल₂ ब श्र प्र म भ-भ्रातृव्यं ॥ ५. रा₁ ल₁ ल₂-सानुवर० । ६. रा₁-नास्ति ॥ ७. प्र रा₂ फ म-शैलान् ॥ ८. रा₁ ल₁ ल₂ ब-शैलवृष्टिं ॥ ९. रा₂-०लक्ष्येण । १०. रा₁ ल₁ ल₂ ब श्र-शरा रेजुर् । भ-द्रुमा रेजुर् ॥ ११. रा₁ ल₁ ल₂ ब श्र प्र फ-चित्रं ॥ १२. रा₂ म भ-सुदुष्करं । १३. भ-इव द्विपं ॥

निकुम्भाऽग्रज वीर्यं ते बलं च महद् अद्भुतम् ।
६६] सं-नतिश् च प्र-भावश् च तव वा रावणस्य वा ॥१०६॥ [७२
प्र-कामं चल-चित्त-घ्न माया-बल-विशारद[1] ।
६७] एकस्[2] त्वम् इह जातोऽसि[3] पितुश् च बलवत्-तरः १०७ [७३
त्वम् एको हि महा-वीर्यः शूल-हस्तोऽरि-मर्दनः[4] ।
६८] त्रि-दशानाम् अपि क्रुद्धो वि-जेता[5] रण-मूर्धनि ॥१०८॥ [७४
वर-दानात् पितृव्यस् ते समेतान्[6] दैत्य[7]-दानवान् ।
६९] कुम्भ-कर्णस्य वीर्येण सहते[8] वि-बुधान् अपि[9] ॥१०९॥ [७६
७०उ] धनुषीऽन्द्रजितस् तुल्यः प्र-तापाद् रावणस्य च ।
७१पू] त्वम् एको रक्षसां मध्ये श्रेष्ठोऽसि बल-वीर्य-तः ॥११०॥ [७७
वि-मर्दम् आवयोर् एतं समेतस्य मम त्वया[10] ।
७२] अद्य पश्यन्तु भूतानि शक्र-शम्बरयोर् इव[11] ॥१११॥ [७८
कृतम् अ-प्रतिमं कर्म दर्शितं चाऽस्त्र-कौशलम् ।
७३] पातिताश् च प्र-वीरा ये त्वयाऽनुपम-तेजसः[12] ॥११२॥ [७९
उपाऽऽलम्भ-भयाच् चैव नाऽसि वीर हतो मया ।
७४] कृत-कर्मा परि-श्रान्तो वि-श्रान्तः पश्य मे बलम्[13] ॥११३॥ [८०
तेन सुग्रीव-वाक्येन साऽवमानेन मानिनः ।

---

१. रा$_2$-प्रभावबलकृत्यज्ञ माया० । भ-प्रह्लादवलवृत्रेन्द्रवलिसूर्ययमोपम । २. रा$_2$-एषस् । ३. रा$_2$-पूज्योसि । भ-जेता वै ॥ ४. प्र फ-०स्तो विम० । भ-०स्तमरिन्दमं । ५. प्र रा$_2$ फ म-निर्जेता ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र रा$_2$-समेतो । भ-बाधते । ७. म-वै सदानवान् । भ-देवदा० । ८. रा$_1$ ल$_1$ ल$_2$ ब श्र-संहतान्दानवानपि । भ-सदृशस्त्वं महाबल । ९. रा$_2$-नास्ति ॥ १०. रा$_2$-नास्ति । ११. रा$_1$ ल$_1$ ल$_2$ ब-अपि ॥ १२. म भ-०सा ॥ १३. रा$_2$-नास्ति ॥

७९] अग्नेर् आज्याऽऽहुतेर्[1] यद्-वत् तेजस् तस्य [2]व्य्-अवर्धत ११४
८१उ] ततः कुम्भः समुत्-पत्य सु-ग्रीवम् अभि-[3]पैत्य च । [८१
आ-जघानोरसि क्रुद्धो वज्र-वेगेन मुष्टिना ॥११५॥[4] [८६पू
८२] चर्म प्र-स्फुटितं तस्य प्र-सुस्राव च शोणितम् ।
स तु मुष्टिर् महा-वेगः पतितो ह्य् [6]अस्थि-सञ्चये ॥११६॥[८७
८३] वेगेन महता तस्य तेजः समुद्-अपद्यत ।
वज्र-निष्पेष-सम्भ्रान्ता ज्वाला मेरौ यथा गिरौ॥११७॥ [८८
८४] स तथाऽभि-हतस् तेन सु-ग्रीवो वानरेश्वरः ।
मुष्टिं सं-वर्तयामास वज्र-वेगं महा-बलः ॥११८॥ [८९
८५] ज्वलिताऽनल-सङ्काशं रवि-मण्डल-सन्निभम् ।[8]
८६पू] मुष्टिं स पातयामास कुम्भस्योपरि वानरः ॥११९॥[9] [९०

---

१. रा२-०हुतस्यैव व्यवर्धत महाबली । म-०हुतस्येव तेजस्तस्य त्वव० ।
२.अतः परमधिकः पाठः—भ-युद्धायाभिमुखश्चैवमभ्ययाद्राक्षसर्षभः । सुग्रीवः कौम्भकर्णिश्च युद्धाय समुपस्थितौ ॥ गजाविवापीतमदौ निश्वसंतौ मुहुर्मुहुः । अन्योन्यगात्रमथितौ कर्षन्ताविवतरेतरम् ॥ कम्पयंतौ महावीरौ पदभारैर्मुहुर्मुहुः । मुष्टिभिर्जानुभिश्चैव जघ्नतुश्च परस्परम् ॥ उल्लिखन्तौ च दंष्ट्राभिः सिंहाविव विरेजतुः । रुधिरोक्षितसर्वांगौ पुष्पिताविव किंशुकौ ॥ तौ मुहूर्त्तं समाश्वस्य पांसुना चावगुंठितौ । करैर्नागकरप्रख्यैर्भूय एवाभिपेततुः ॥ वानरा राक्षसाश्चैव प्रेक्षका निश्चलाः स्थिताः । इतरेतरयोर्वीर्यं कथयंतः परस्परम् ॥ कपिराक्षसराजानौ भर्तृकार्ये व्यवस्थितौ । सधूमा मुखतो ज्वाला विमुंचंतावुभौ श्रमात् ॥ तयोः पादावगाढाच्च निम्नदेशाभवन्मही । विघूर्णिततरंगश्च चुक्षुभे वरुणालयः ॥ ततः कुम्भं समुत्क्षिप्य सुग्रीवो लवणाम्भसि । पातयामास वेगेन दर्शयन्नुदधेस्तलम् ॥ ततः कुम्भनिपातेन जलराशिः समुत्थितः । विन्ध्यमन्दरसंकाशो विससर्प समन्ततः ॥
३ रा२-०पात्य । भ-उपगृह्य । ४ म-नास्ति ॥ ५. रा२-हृदि सं० । भ-अस्थिमंडले । ६. रा२-नास्ति ॥ ७. रा२-नास्ति ॥ ८. म-नास्ति । ९. प्र-नास्ति । अतः परमधिकः पाठः—भ स तु तेन प्रहारेण विह्वलो हृदि पीडितः । रुधिरार्द्रो रणे कुम्भो निर्वपत् पावकार्चिषः ॥

मुष्टिनाऽभि-हतस् तेन नि-पपाता[1]ऽऽशु राक्षसः ।
८७] लोहिताऽङ्ग इवाऽऽ[2]काशाद् दीप्त-रश्मिर् यदृच्छया॥१२०॥[२२
कुम्भस्य पततो रूपं भग्नस्योपरि मुष्टिना ।
८८] ईश्वरेणाऽभि-पन्नस्य ददृशुर् गो-पतेर् इव ॥१२१॥[3] [२३
[4]ततो हते तत्र[5] महा-पराऽऽक्रमे
प्लवं-गमानाम् ऋषभेण सं-युगे ।
मही स-शैला वि-चचाल साऽऽपगा
८९] भयं च रक्षांस्य् अधिकं समाऽविशन्॥१२२॥[२४

इत्यार्षे रामायणे युद्ध-काण्डे कुम्भ-वधो नाम
चतुःपञ्चाशः सर्गः ॥ ५४ ॥

[वं-५६]= [पञ्चपञ्चाशः सर्गः] =[दा-७७]

नि-कुम्भो भ्रातरं दृष्ट्वा सु-ग्रीवेण नि-पाति[7]तम् ।
१] प्र-दहन्[8] इव कोपेन सु-ग्रीवं प्रत्यवैक्षत[9] ॥१॥ [१
कृत-संग्रामम् आ-तिर्यग् दत्त-पञ्चाऽङ्गुलं शुभम् ।[10]
२] आ-ददे परि-घं[11] वीरो नगेन्द्रशिखरोपमम् ॥२॥ [२
पि-नद्धम् आ-यतैः[12] पट्टैर् हेम-ज्वलितम् आ-यतम् ।[13]
३] यमदण्डोपमं घोरं रक्षसां भय-नाशनम् ॥३॥ [३

---

१. प्र रा$_2$ म-०पात स । २. ल$_1$-०काशं । प्र रा$_2$-०काशे ॥ ३. रा$_2$-नास्ति ॥ ४. रा$_2$-कुम्भे । भ-तस्मिन् । ५. रा$_2$-तेन ॥ ६. ब प्र रा$_2$ भ-लंकाकाण्डे । म-युद्धपर्वणि ॥ ७. म-निषूदितं भ-रणे हतं । ८. म-प्रहसन्न् । ९. म-पर्यवै० । भ-समुदैक्षत ॥ १०. रा$_2$-नास्ति । भ-ततः सङ्ग्रामसंच्छन्नं दत्त० । ११. रा$_2$ म-घोरं ॥ १२. प्र फ म भ-आयसं । १३. रा$_2$-नास्ति ॥

तम् आ-विध्य महा-तेजा महाशक्रध्वजोपमम् ।
४] वि-ननाद् विवृत्ताऽऽस्यो नि-कुम्भो भैरवं रवम् ॥४॥ [४
उरो-गतेन निष्केन भुज-स्थैर् अपि चाऽङ्गदैः ।
५] कुण्डलाभ्यां सु-तं[1]प्ताभ्यां स्रजा च सु-विचित्रया ॥५॥ [५
नि-कुम्भो भूषणैर् भाति परि-घेणाऽऽयतेने[2] च ।
६] यथेन्द्र-धनुषा मेघः स-विद्युत् स्तनै[3]यित्नु-मान् ॥[4]६॥ [६
परिघाऽग्रं तथाऽऽस्फोटश्च वर-ग्रे[5]न्थि महा-स्वनम् ।
७] जज्वाल च स-धूमो[6]ऽत्र सं-घर्षाद् इव पावकः ॥७॥ [७
नगर्या[7] विटपा-वत्या गन्धर्व-नगरैर् अपि ।
N] सहसै[8]वाऽमरा-वत्या सर्वैश् च भवनै[9]ः सह ॥[10]८॥ [८
स-तारागण-नक्ष[11]त्रं स-चन्द्रं स[12]-महाग्रहम् ।
N] निकुम्भपरिघोद्धूतं भ्रमतीऽव नभस्-तलम् ॥९॥ [९
दुरा-धर्षः स सं-कोपात् परिघाऽऽभरण-प्रभः ।
N] कपीऽ[13]न्धनो निकुम्भाऽग्निर् युगाऽन्ताऽग्निर् इवोत्थितः[14] १०[१०
राक्षसान्[15] वानराश् चैव[16] न शेकुर् मथितुं[17] भयात् ।
८] हनु-मांस् तु विवृत्तोरस्[18] तस्थौ प्रति-मुखो बली ॥११॥ [११

---

१. अ प्र-स त० । फ-स मृष्टाभ्यां । म भ-च मृष्टाभ्यां ॥ २. रा$_{2}$ भ-०णायसेन । ३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-०यित्नुना । म-०यित्नुवान् । ४. रा$_{2}$-नास्ति ॥ ५. म-०ग्रंथिं । भ-वासग्रंथि । ६. ब-सधूम्रोऽत्र ॥ ७. भ-लंकया सार्धं । ८. भ-सह चैवा० । ९. भ-भुवनैः । १०. रा$_{2}$-नास्ति ॥ ११. रा$_{1}$ल$_{1}$ल$_{2}$ ब अ-प्र रा$_{2}$-०नक्षत्रैः भ-ताराग्रहन० । १२. रा$_{1}$ ल$_{1}$ ल$_{2}$ अ फ-तु म० । ब प्र-च म० ॥ १३. प्र रा$_{2}$फ भ-कोपेन्धनो । म-कोपोक्षितो । १४. अतः परमधिकः पाठः—भ-अभिगम्य गृहीताश्च निपतन्त्युत्पतन्ति च । हरिराजस्तथा दृष्ट्वा तापितान्हरियूथपान् ॥ हनुमन्तमथोवाच शीघ्रं नाशय राक्षसान् ॥ १५. रा$_{2}$ फ म भ-राक्षसा । १६. म-चाऽपि । १७. रा$_{2}$-सर्पितुं । म भ-स्पंदितुं । १८. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-०साक्षस् । रा$_{2}$-वृत्योरस् । म-०वृत्तोरस्को ॥

परिघोपम-बाहुस् तु परि-घं भास्कर-प्रभम् ।
९] बली बल-वतस् तस्य पातयामास वक्षसि ॥१२॥ [१२
क्षिप्तम्[2] तस्योरसि व्यू-ऊढे परि-घः शत-धा गतः ।
१०] वि[3]-शीर्यमाणः प्र-भया ह्य्[4] उल्का-शतम् इवाऽम्बरे ॥१३॥ [१३
स तु तेन विनिर्[5]-भिन्नो वि-चचाल महा-कपिः ।
११] परि-घेण समा-धूतो यथा भूमि-चलेऽचलः ॥१४॥ [१४
स तथाऽभि-हतस् तेन हनू-मान्[6] प्लवगर्षभः[7] ।
१२] मुष्टिं सं-वर्तयामास वज्र-वेगोपमं बली ॥१५॥ [१५
तम् उद्-यम्य महा-[8]वीरो नि-कुम्भं प्रति वीर्य-वान्[9] ।
१३] मुष्टिं सं-पातयामास वेग-वांस तं[10]-जिघांसया ॥१६॥ [१६
ततः प्र-स्फोटि[11]थ चर्माऽस्य प्राऽवर्तत च शोणितम् ।
१४] मुष्टिना तेन सं-जज्ञे ज्वाला वि-द्युद् इवोत्थि(द्-स्थि)ता १७ [१७
स तु तेन प्र-हारेण व्यू-अजृम्भत मुहुर्-मुहुः । [१८पू
१५] आशूऽत्-प्लुत्य नि-जग्राह हनू-मन्तं स राक्षसः [12] ॥१८॥ [N
ततो रक्षोभिर् उत्-क्रुष्टं[13] भीमं लङ्का-गतैर् अपि । [N
१६] नि-कुम्भेनोद्-धतं दृष्ट्वा हनू-मन्तं जयैषिणा [14] ॥१९॥ [१९उ

---

१. रा₂ भ-०हुः स ॥ २. रा₂-स्थिरस् । फ-स्थिते । म-स्थिरे । भ-भिन्नेषु-स्थितस् । ३. रा₂-प्रकीर्य० । भ-विकीर्य० । ४. म-शुष्काशनिर् ॥ ५. म-विभिन्नाङ्गो । भ--प्रहारेण ॥ ६. रा₁ ल₁ ल₂ब अ-परिघेण प्लवंगमः । प्र-हनु० । ७. रा₂ भ-नास्ति ॥ ८. प्र म-०वीर्यो । फ-०वेगो । ९. अ-नास्ति । १०. प्र फ म-स विमर्दिषुः ॥ ११. रा₁ ल₁ ल₂ ब अ प्र-पुस्फोट ॥ १२. रा₂-शरस्तांश्चाभिजग्राह हनू० । अतः परमधिकः पाठः—भ-जघान शंखदेशे च मुष्टिना कपिकुंजरम् । स तु तेन प्रहारेण किंचिन्मूर्च्छाऽन्वितोऽभवत् ॥ तं मूर्च्छितमादाय गन्तुमैच्छत राक्षसः ॥ १३. ल₂ब प्र फ म-उत्कृष्टं । १४. अतः परमधिकः पाठः—भ-अपरे त्वब्रुवंस्तत्र दृष्ट्वा तं रक्षसां गणाः । अ दारुको गृहीतोऽयं निकुंभेन बलीयसा ॥

स तथाऽऽह्रियमाणस् तु कुम्भकर्ण-सुतं तदा ।
१८] नि-जघानोरसि क्रुद्धो वज्र-वेगेन मुष्टिना ॥२०॥ [२
उत्-क्षिप्य हनु-मांस् तं च निष्-पिपेषाऽऽशु वीर्य-वान् । [२२पू
१९] वि-मोक्षयित्वा चाऽऽत्मानं क्षितिम् अभ्या-ससाद ह ॥२१
हनु-मान् उत्-पपाताऽऽशु नि-कुम्भं मारुताऽऽत्मजः । [२१
२०] समुत्-पत्य च वेगेन नि-पपाताऽस्य वक्षसि ॥२२॥ [२२उ
परि-गृह्य च बाहुभ्यां परि-वृत्य शिरो-धराम् ।
२१] [1]अपातयत् तस्य शिरो भैरवं नदतः [2]स्वनम् ॥२३॥ [२३
अथ वि-नदति सूदिते नि-कुम्भे
पवन-सुतेन बभूव तत्र युद्धम् ।
दशरथसुत-राक्षसेन्द्र-[3]चम्वोर्
२२] भृश-तरम् आगत-रोषयोः सु-भीमम् ॥२४॥[4] [२६

इत्यार्षे रामायणे युद्ध-कांण्डे निकुम्भ-वधो नाम
पञ्चपञ्चाशः सर्गः ॥५५॥

---

१. रा$_2$-सोऽपातयच्चास्य । भ-उत्पाटयामास । २. रा$_1$ल$_1$ल$_2$ब श्च प्र-स्वरम् । भ-मुहुः ॥ ३. रा$_2$-०सेश्वरयोश्च । भ-०तवाहिनी समग्रा । ४. प्र-नास्ति ॥
५. ब प्र रा$_2$ भ-लंकाकाण्डे । फ-युद्धपर्वणि ॥

नि[1]-कुम्भं नि-हतं[2] श्रुत्वा कुम्भं च विनि-पातितम् ।

१] रावणः परमाऽमर्षी प्र-जज्वाल यथाऽनलः ॥१॥ [१

नैर्ऋतः क्रोध-शोकाभ्यां द्वाभ्यां तु[3] परि-मूर्च्छितः । [२पू

२] ततो[4] वि-चिन्त्य मनसा दश-ग्रीवश् चिरात् स्वयम् । [N

खर-पुत्रं विशालाऽक्षं मकराऽक्षम् अचोदयत् ॥२॥ [२उ

३] गच्छ पुत्र मयाऽऽज्ञप्तो बलेन महताऽऽवृतः ।

राघवं लक्ष्मणं चैव जहि तांश्[5] च वनौकसः ॥३॥ [३

४] शल्यम् उद्-धर मे क्षिप्रं स्व-पौरुष-समावृतः[6] ।

अयं ते शक्र-जिद् वीर पृष्ठ-तोऽनु-गमिष्यति ॥४॥[7] [N

५] खरस्य सदृशो वीर्ये त्वम् अस्य्[8] अमित-विक्रमः ।

तथा दिव्याऽस्त्र-विच् चैव माया-शत[9]-विशारदः ॥५॥ [N

६] एवम् उक्त्वा खर-सुतं समुत्था(द्-स्था)याऽऽसनात् स्वयम्[11] ।

द्रुतं[10] गन्धैश् च माल्यैश् च वासोभिश् च सम्-अर्चयत् । ६ [N

७] रावणस्य वचः श्रुत्वा शूर[12]-मानी निशा[13]-चरः ।

बाढम् इत्य् अब्रवीद् धृष्टो मकराऽक्षः[14] खराऽऽत्मजः[14] ॥७॥ [४

८] सोऽभि-वाद्य दश-ग्रीवं कृत्वा चाऽभि[15]-प्रदक्षिणम् ।[16] [५पू

रथम् आ-नीयतां शीघ्रं सैन्यं चेत्य्[17] अब्रवीद् द्रुतम् ॥८॥ [६उ

---

१. ब-नास्त्ययं सर्गः । २. रा$_1$ ल$_2$ अ प्र-तु हतं । रा$_2$- च हतं ॥ ३. रा$_2$ म-च । ४. रा$_2$ फ भ-ततः संचिन्त्य । म-अथ संचिन्त्य ॥ ५. म-तौ सवनौकसौ ॥ भ-चाथ व० ॥ ६. रा$_2$-०षमुपाश्रितः । भ-०षसमाश्रितः । ७. अ-नास्ति ॥ ८. रा$_2$ म-त्वं च । भ-बली । ९. म-मायायुद्धवि० ॥ १०. प्र फ म-भ-श्रुतं ॥ ११. प्र रा$_2$ फ म भ-स्वयं ॥ १२. रा$_2$ म-शूरो मानी । १३. अ-विशारदः । प्र रा$_2$ फ म भ-खरात्मजः । १४. प्र रा$_2$ फ म भ ०क्षो निशाचरः ॥ १५. रा$_2$ म भ-चापि प्र० । १६. अतः परमधिकः पाठः—भ-निर्जगाम गृहाच्छु-भ्राद्रावणस्याज्ञया शनैः । आदिशच्च बलाध्यक्षं खरपुत्रो महाबलः ॥ १७. रा$_2$-चवाब्रवीत्त्वरन् । प्र फ-चेत्यब्रवीत्त्वरन् । म-आहूयतां महत् । भ-चाहूयतामिति ॥

१०] तस्य तद् वचनं श्रुत्वा बलाऽध्यक्षो[1] निशा-चरः ।
स्यन्दनं च बलं चैव समीपं समुपाऽनयत् ॥९॥ [७
११] प्र-दक्षिणं रथं कृत्वा तु आ-रुरोह निशा-चरः ।
सूतं सं-चोदयामास[2] शीघ्रं समभि[3]-वाहय ॥१०॥ [८
१२] अथ तान् राक्षसान् सर्वान् मकराऽक्षोऽब्रवीद् इदम् ।
आगच्छत, प्र-यास्यामः[4], पुरं-तो मम राक्षसाः ॥११॥ [९
१३] अहं राक्षस-राजेन रावणेन महाऽऽत्मना ।
आ-ज्ञप्तः सम्-अरे हन्तुं ताव् उभौ राम-लक्ष्मणौ ॥१२॥ [१०
१४] अद्य रामं वधिष्यामि[5] लक्ष्मणं च निशा-चराः ।
शाखा-मृगं च सु-ग्रीवं वानरांश् च शरोत्तमैः[6] ॥१३॥ [११
१५] अद्य शूल-निपातैश् च वानराणां[7] महा-चमूम् ।
आ-दहिष्यामि सम्प्राऽऽप्य शुष्केन्धनम् इवाऽनलः ॥१४॥ [१२
१६] मकराऽक्ष-वचः श्रुत्वा ते च घोरा निशा-चराः ।
सर्वे नानाऽऽयुधोपेता[8] बल-वन्तोऽति-वेगिताः ॥१५॥ [१३
१७] ते काम-रूपिणः शूरा दंष्ट्रिणः पिंगलेक्षणाः ।
मातङ्गा इव नर्दन्तो ध्वस्त-केशा भयानकाः ॥१६॥ [१४
१८] परि-वार्य महा-काया महा-कायं[9] खराऽऽत्मजम् ।
अभि-जग्मुस् तदा हृष्टाश् चालयन्तो वसुं[10]-धराम् ॥१७॥ [१५
१९] शंख-भेरी-सहस्राणाम् आ-हतानां तु[11] सर्व-तः ।
२०पू] क्ष्वेडिताऽऽस्फोटितानां च तत्र शब्दो महान्[10] अभूत्[12] ॥१८॥ [१६

---

१. रा$_1$ ल$_1$ ल$_2$ ब-नास्ति ॥ २. फ म-संनोद० । ३. रा$_2$-मामतिवाहय । भ-याहीति शंसितः ॥ ४. रा$_2$-प्रयास्यध्वं प्रेरिता । भ-०म पुरस्तान् ॥ ५. रा$_1$ ल$_1$ ल$_2$-हनिष्यामि । ६. म-नास्ति ॥ ७. रा$_1$ ल$_1$ ल$_2$ अ प्र फ-नास्ति ॥ ८. रा$_2$-०कायं राक्षसास्ते । भ-महामायं महात्मानं । ९. रा$_1$ ल$_1$ ल$_2$ अ प्र-मुद । १०. म-नास्ति ॥ ११. रा$_2$-च । १२. अतः परमधिकः पाठः—

प्र-भ्रष्टोऽथ करात् तस्य प्र-तोदः सारथेस् तदा ।
२४] पपात सहसा चैवं[1] राक्षसस्य[2] रथ-ध्वजः ॥१९॥ [१७
[3]तस्य ये रथ-युक्तास् ते हया विक्रम-वर्जिताः ।
२५] चरणैर् आ-कुलैर् गत्या साऽश्रु[4]पात-मुखा ययुः ॥२०॥ [१८
प्र-वाति पवनस् तस्य स-पांसुः खर-[5]दारुणः ।
२६] निर्-[6]याणे चाऽति-रौद्रस्य मकराऽक्षस्य दुर्-मतेः॥२१॥ [१९
तानि दृष्ट्वा निमित्तानि राक्षसा वीर[7]-संमताः ।
२७] अ-सञ्चिन्त्य गताः सर्वे यत्र तौ राम-लक्ष्मणौ ॥२२॥ [२०
[8]घन-गज-महिषाऽङ्ग-तुल्य-वर्णाः
समर-मुखेष्व्[9] अ-सकृच् छरोऽसि-भिन्नाः[10] ।
अहम् अहम् इति युद्ध-लालसास् ते
N] रजनि-चराः परि-चुक्रुशुर् नदन्तः ॥२३॥ [२१

इत्यार्षे रामायणे युद्ध[11]-काण्डे मकराऽक्ष-निर्याणं नाम
षट्पञ्चाशः सर्गः ॥५६॥

---

१२ अतः परमधिकः पाठः—भ-समारूढो रथं दिव्यं दीप्तानलशिखोपमम् । रथोपकरणैः सर्वैः कीर्णं हेमपुरस्कृतम् ॥ युक्तं बृहद्भिस्तुरगैर्जाम्बूनद-विभूषणैः ॥ स दंशितः शरी खड्गी किरीटी रुक्मकुंडलः । शुशुभे राक्षस-श्रेष्ठः सूर्यश्लिष्ट इवाम्बुदः ॥ वृतः स बलिभिर्वीरै राक्षसैर्घोरदर्शनैः । विनि-र्ययौ रथो धीरः यियासुर्यमसादनम् ॥ १. रा$_{२}$-तस्य । २. रा$_{२}$-०स्य रथाद् ध्वजः । म-राक्षसः सहजानुभिः ॥ ३. रा$_{२}$-तस्याथ रथ० । भ-तस्य ते वर० । ४. रा$_{२}$फ म-साश्रु० ॥ ५.रा$_{२}$-खरनिस्वनः । ६.रा$_{२}$-निर्वाते ॥ ७. प्र रा$_{२}$ फ म भ-वीर्यसं०॥ ८. भ-वन० । ९. भ-०खेऽथ सकृद्ददासि० । १०. भ-०निवराः परिबभ्रमुर् ॥ ११. प्र रा$_{२}$ भ-लंकाकाण्डे ॥

निर्-गतं मकराऽक्षं ते दृष्ट्वा वानर-पुङ्गवाः ।[1]
१] आ-प्लुत्याऽऽप्लुत्य सहसा योद्धु-कामा व्यव-स्थिताः[2] ।।१।। [१
ततः प्र-वृत्तं युद्धं तु तुमुलं लोम[3]-हर्षणम् ।[4]
२] निशाचर-प्लवङ्गानां देवानां दानवैर् इव ।।२।। [२
[5]वृक्ष-मूल-निपातैश् च बाणौ-पातैश् च सं-म (?त) तैः (?तम्) ।[6]
३] अन्योऽन्यं पोथयन्ति स्म तदा कपि-निशाचराः ।।३।। [३
पट्टिसैर् भिण्डि-पालैश् च खर-पुत्रेण वानराः ।
६] सम्भ्रान्त-मनसः सर्वे दुद्रुवुर् भय-पीडिताः ।।४।। [६
तान् दृष्ट्वा राक्षसाः सर्वे द्रवमाणान् वनौकसः ।
७] नेदुस् ते सिंह-वद् धृष्टा युध्यन्तो जित-काशिनः ।।५।। [७
वि-द्रवत्सु तदा तेषु वानरेषु समन्त-तः ।
८] रामस् तान् वारयामास शर-वर्षेण राक्षसान् ।।६।। [८
वारितान् राक्षसान् दृष्ट्वा मकराऽक्षो निशा-चरः ।
९] क्रोधात् काल-समाविष्टो वचनं चेदम् अब्रवीत् ।।७।। [९
काऽसौ रामः सु-दुर्बुद्धिर् येन मे नि-हतः पिता ।
१०] जन-स्थान-गतः पूर्वं साऽनुजः स-परिच्छदः ।।८।। [N
अद्य गन्ताऽस्मि वैरस्य पारं वै रजनी-चराः ।

---

१. ब-नास्त्ययं सर्गः । २. प्र-नास्ति ॥ ३. रा$_2$-रोम० । ४. रा$_1$ ल$_1$ ल$_2$-अपि ॥ ५. रा$_1$ ल$_1$ ल$_2$ अ प्र फ म भ-शिलापरिघपातनैः । ६. अतः परमधिकः पाठः—रा$_2$ फ भ-प्रासमुद्गरदण्डैश्च निर्घातैरायसैस्तथा । ७. रा$_2$-कदनं कपियूथानां चक्रुस्ते रजनीचराः । अतः परमधिकः पाठः—अ प्र फ भ-शक्तिशूलगदाप्रासैः तोमरैश्च निशाचराः ॥ ८. रा$_2$-शरौघैर् । भ-पट्टिशैर् । ९. फ-बाणपातैश्च संततं ॥ १०. रा$_1$ ल$_1$ म-दृष्ट्वा ॥ ११. रा$_2$-विषण्णान् । १२. रा$_1$-नास्ति ।

११] सु-हृदां चैव सर्वेषां नि-हतानां रणाऽजिरे ॥९॥ [N
हत्वा रामं सु-दुर्बुद्धिं लक्ष्मणं च नराऽधमम् ।
१२] तयोः शोणित-निष्यन्दैः करिष्ये सलिल-क्रियाम् ॥१० [N
एवम् उक्त्वा महा-बाहुर् युद्धे स रजनी-चरः ।
१३] आऽलोकयत तत् सर्वं बलं राम-दिदृक्षया ॥११॥ [N
आ-हूयमानो बहुभिर् वानरैर् बल-शालिभिः ।
१४] युद्धाय सु-महातेजा रामाद् अन्यं न चेच्छति ॥१२॥ [N
मार्ग-माणस् तदा रामं बल-वान् रजनी-चरः ।
१५] रथेनाऽम्बुद-घोषेण व्य्-अचरत् ताम् अनीकिनीम् १३ [N
दृष्ट्वा रामं स दूरं-स्थं लक्ष्मणं च महा-रथम्(?थः) ।
१६] सेषुणा पाणिनाऽऽहूय ततो वचनम् अब्रवीत् ॥१४॥ [N
तिष्ठ राम मया सार्धं द्वन्द्व-युद्धं प्र-यच्छ मे ।
१७] त्याजयिष्यामि ते प्राणान् धनुर्-मुक्तैः शितैः शरैः १५॥ [१०
यत् मह्यं दण्डकाऽरण्ये पितरं हतवान् असि ।
१८] अन्-आगसं स्व-कर्म-स्थं स्मृत्वा कोपो वि-वर्धते ॥१६ [११
देहान्ते चाऽपि गात्राणि दुर्-आत्मन् मम राघव ।
१९] यत् मया हि न दृष्टस् त्वं तस्मिन् काले महा-वने ॥१७॥ [१२
दिष्ट्याऽसि गोचरं राम त्वं प्राऽऽप्तो मम दर्शने ।
२०] कांक्षितस्य क्षुधाऽऽर्तस्य सिंहस्येवेतरो मृगः ॥१८॥ [१३
अद्य मद्-बाण-वेगेन प्रेतानां विषयं गतः ।
२१] ये त्वं आजौ नि-हताः शूरास् तैः सहाऽद्य समेष्यसि १९ [१४

---

१. भ-युद्धेप्सू ॥ २. रा$_{1}$ ल$_{1}$ ल$_{2}$ म भ-बलिभिर् । ३. म-च म० । भ-स म० ॥ ४. अ म-रामं सुदु० । रा$_{2}$-रामं सुदुर्धर्षं ॥ ५. भ-प्रवर्तय । ६. रा$_{2}$ त्याजयिष्यामि त्वां प्राणैर् ॥ ७. रा$_{2}$ म भ-यत्तदा । ८. भ-कोपोभिव० ॥ ९. अ प्र रा$_{2}$ फ म भ-तेऽद्याऽपि चाऽङ्गानि । १०. भ-महाहवे ॥ ११. भ-दर्शनं प्राप्तो मम राम रणाजिरे । १२. अ-०जनाः । फ म-०तरे मृगाः ॥ १३. भ-प्रेतराड्विषयं । १४. रा$_{2}$ फ म भ-वयाजौ । १५. भ-सह त्वं ॥

बहुनाऽत्र किम् उक्तेन शृणु राम वचो मम ।
२२] पश्यन्तु सकलौ[1] लोकाम्[2] त्वां च मां च रणाऽजिरे ॥२०॥ [१९
अस्त्रैर् वा[3] गदया वाऽपि बाहुभ्यां वा महाऽऽहवे ।
२३] अभ्य्-अस्तं येन यद् राम वर्ततां तेन नौ[4] मृधम्[5] । [१६
तेन मां प्रति-युध्यस्व यदि जातोऽसि सत्-कुले ॥२१॥
२४] अद्य मद्-बाण-निर्भिन्नं स्रस्ताऽगं क्षतजोक्षितम् ।
क्रव्याऽद-संघाः कर्षन्तु रणे रेणु-परिष्कृतम् ॥२२॥ [N
२५] मद्-बाहु-गोचर-गतः साम्प्रतं न भविष्यसि । [N
मकराऽक्ष-वचः श्रुत्वा रामो दशरथाऽऽत्मजः ।
२६] अब्रवीत् प्र-हसन् वाक्यम् उत्तरोत्तर-वादिनम् ॥२३॥ [१७
चतुर्दश-सहस्राणि रक्षसां त्वत्-पिता च सः ।
२७] त्रि-शिरा दूषणश् चैव हता मे दण्डके वने ॥२४॥[6] [१९
स्वँ[7]-आशितास् तत्र मांसेन गृध्र-गोमायु-वायसाः ।
२९] भविष्यंत्य्[8] अद्य ते पार्थ तीक्ष्णतुण्डनखाऽऽयुधाः ॥२५॥ [२०
रुधिराऽऽर्द्र-मुखा हृष्टा रक्तपक्षाऽण्डजाश् च ये[9] ।
३०] खे[10] गता वसु-धां चैव भ्रमिष्यन्ति समन्त[11]-तः ॥२६॥ [२१
कत्थसे किं वृथा मूढ[12] बहून्य् अ-सदृशानि तु ।[13]
३१] न रणे शक्यते जेतुं विना युद्धेन वाग्-बलात् ॥२७॥ [१८

---

१. भ-०ना वा । २. अ प्र रा₂ फ म-लोकाः समरे त्वां मां चैव ॥ ३. रा₁ ल₁ ल₂ अ प्र-अस्त्रैश्च । ४. प्र रा₂ फ-नो युधि । ५. भ-वर्ततां तेन वा युद्धमभ्यस्तं चापि यत्त्वया ॥ ६. अतः परमधिकः पाठः— भ-त्वामद्य निहनिष्यामि यदि तिष्ठसि संयुगे ॥ ७. भ-स्वादुना ८. भ-अद्य तृप्ता भविष्यन्ति ॥ ९. भ-हृ । १०. भ - खं । ११. भ-ये चान्ये पिशिताशिनः ॥ १२. भ-रक्षो । १३. अतः परमधिकः पाठः—प-एवमुक्त्वा महाबाहुः संधाय धनुषि शरम् । आकर्णपूर्णमाकृष्य चिक्षेपाहितवक्षसि ॥ तमापतंतं संप्रेक्ष्य शरमन्तक-

एवम् उक्तस् तु रामेण खर-पुत्रो निशा-चरः ।
३२] बाणौघान् मुमुचे[2] तस्मै राघवाय रणाऽजिरे ॥२८॥ [२२
तांस्[3] छरांश् छर-वर्षेण रामश् चिच्छेद नैकधा ।
३३] नि-पेतुर् भुवि ते छिन्ना[4] रुक्म-पुङ्खाः सहस्र-शः ॥२९॥ [२३
तद् युद्धम् अभवत् तत्र समेत्याऽन्योऽन्यम् ओजसा ।
३४] खर-राक्षस-पुत्रस्य[5] रामस्य च महाऽऽत्मनः ॥३०॥ [२४

सन्निभम् । मकराक्षः प्रचिच्छेद त्रिभिर्भल्लैः प्रतापवान् ॥ ततो रामः शितैर्बाणैः षड्भिस्तं राक्षसोत्तमम् । रुक्मपुंखैः शिलाधौतैर्ललाटे समताडयत् ॥ तौ दृष्ट्वा संप्रयुक्तौ तु यमांतकसमप्रभौ । अन्योन्यं समरे जघ्नुः पुनर्वानरराक्षसाः ॥ चिकीर्षुः प्रतिकर्तुं स मकराक्षो महाबलः । मुमोचाशीविषाकारान्नाराचानेकविंशति ॥ तैर्हेमपुंखैस्तीक्ष्णाग्रैर्ललाटे ताडितः समम् । चुक्रोध राघवः श्रीमान्नाराचैर्भृशताडितः ॥ चिक्षेप राक्षसे रामो नाराचान्सुसमाहितान् । नाराचमाला सा तस्य शुशुभे वदनाश्रिता । यथा शरदि मत्तानामावली मधुपायिनाम् ॥ भल्लं निशितमादाय ततो रामो भृतां वरः । अस्यतः क्षिप्रहस्तस्य धनुश्चिच्छेद भासुरम् ॥ ध्वजमेकेषुणा चैव प्रतोदं सारथेस्तदा । चतुर्भिश्चतुरो वाहान्मकराक्षं च पंचभिः ॥ ततो निमेषादपरं सज्यं कृत्वा महाधनुः । उत्ससर्ज महाबाहुर्मंडलीकृतकार्मुकः ॥ मकराक्षः शरान्घोरान् कालांतकयमोपमान् । तयोर्मुक्तेन च तदा शरजालेन भास्वता । द्वितीयमिव चाकाशं तलबद्धमभूत्तदा । अथाग्नेयं महाघोरं तामसं नाम नामतः । उत्ससर्ज महाबाहुरस्त्रमप्रतिवारणम् ॥ सौरेणास्त्रेण तं चापि काकुत्स्थः प्रममाथ ह । ततोऽस्त्रयुद्धमभवत्तुमुलं लोमहर्षणम् ॥ अभूतपूर्वं सुमहद्रामराक्षसयोस्तदा । निहत्यास्त्रमहावर्षं मकराक्षस्य रक्षसः ॥ १. भ-नास्ति । २. भ-असृजत् ॥ ३ भ-ततस्तान् । ४. भ-पेतुस्ते भुवि विच्छिन्ना ॥ ५. भ-राक्षसस्य च पुत्रस्य सूनोर्दशरथस्य च ॥

जीमूतयोर् इवाऽऽकाशे शब्दो ज्या-तलयोस् तयोः ।
३५] धनुर्-मुक्तः स्वनोत्कृष्टः श्रूयते हि[2] रणाऽजिरे ॥३१॥ [२५
देव-दानव-गन्धर्वाः किं-नराश्[3] च महोरगाः[4] ।
३६] अन्तरिक्ष-गताः सर्वे द्रष्टु-कामास् तद् अद्भुतम् ॥३२॥[5] [२६
विद्धम् अन्योऽन्य-गात्रेषु[6] द्वि-गुणं वध्यते परः ।
३७]कृतं-(?त्त-)प्रकृत(?त्त)म् अन्योऽन्यं कुर्वाते तौ रणाऽजिरे ३३[7] [२७
शरौघ-सन्तताः[8] सर्वा दिशश् च वि-दिशस् तथा ।
३८] सं-छन्ना[9] वसु-धा चैव सम्-अन्तान् न प्र-काशते ॥३४॥ [२९
राम-मुक्तांश् छिंतान् बाणान् राक्षसोऽप्य् अच्छिनद् रणे[10] ।
३९] रक्षो-मुक्तांश् च रामो[11] वै नैकधा प्राऽच्छिनच् छरैः ॥३५ [२८
ततः क्रुद्धो महा-बाहुर् धनुश् चिच्छेद सं-युगे ।
४०] अष्टभिर्[12] अथ[12] नाराचैः सूतं वि-व्याध राघवः ॥३६॥ [३०
छित्वा शरै[13] रथं[13] रामो रथाद् अश्वान् अमोक्षयत्[14] ।
४१] वि-रथो वसु-धां प्राऽऽप्य[15] मकराऽक्षो निशा-चरः ॥३७ [३१
अधिकं क्रोध-संरब्धः[16] शूलं जग्राह पाणिना ।
४२] त्रासनं सर्व-भूतानां युगाऽन्ताऽग्नि-सम-प्रभम् ॥३८॥ [३२
स वि-भ्राम्याऽथ तं शूलं प्र-ज्वलन्तं[17] निशा-चरः ।
४३] क्रोधाच् च प्राऽहिणोत् तस्मै राघवाय महाऽऽत्मने ॥३९ [३४
आ-पतन्तं ज्वलन्तं[18] तु खर-पुत्र-कर-च्युतम् ।
४४] बाणैस् तु त्रिभिर् आ-काशे शूलं चिच्छेद राघवः॥४०॥ [३५

---

१. ल$_1$,ल$_2$ अ-भुवि । भ-तद। । २. भ-स्म ॥ ३. भ-०राः सम० । ४. फ-०क्षचराः । भ-अन्तरिक्षे स्थिताः ।५. रा$_1$,ल$_1$,ल$_2$-नास्ति ॥ ६. भ-गात्रेषु विव्यथे-न्योन्यं द्विगुणं विव्यथे पुनः । ७. भ-कृतप्रतिकृते यत्नौ चेरतुस् ॥ ८. भ-बाणौघैः संततैः । ९. भ-प्रच्छादितास् ॥ १०. भ-हि बाणांस्तान्रक्षश्चिच्छेद सायकैः । ११. भ-रामोपि ॥ १२. भ-०भिश्चैव ॥ १३. भ-परैस्तथा । १४. भ-व्यपोथयत् । १५. भ-०योप्यथ भूमिष्ठो ॥ १६. भ-क्रोधरक्तेक्षणः शीघ्रं ॥ १७. भ-प्रहस्य।विध्य तच्छूलं मकराक्षो ॥ १८. ल$_1$, ल$_2$ प्र भ-च ॥

तच् छिन्नं वसु-धां शूलं दिव्यं हाटक-भूषितम् ।
४५] व्यू-अदीर्यत महोल्केव राम-बाणाऽर्दितं भृशम् ॥४१॥ [३६
तच् छूलं नि-हतं दृष्ट्वा रामेणाऽद्भुत-कर्मणा ।
४६] साधु साध्व् इति भूतानि व्या-हरन्ति नभस्-तलात् ४२[३७
तद् दृष्ट्वा वि-फलं शूलं मकराऽक्षो निशा-चरः ।[३]
४७] मुष्टिम् उद्-यम्य काकुत्स्थं तिष्ठ तिष्ठेति चाऽब्रवीत् । ४३[३८
स तं दृष्ट्वा पतन्तं तु प्र-हस्य रघु-नन्दनः ।
४८] पावकाऽस्त्रं ततो रामः सं-दधे च शराऽऽसने ॥४४॥ [३९
तेनाऽस्त्रेण हतो रक्षः काकुत्स्थेन रणाऽजिरे ।
४९] संभिन्न-हृदयस् तत्र पपात च ममार च ॥४५॥ [४०
ततस् ते राक्षसाः सर्वे मकराऽक्षे हते[१] तदा ।
N] लङ्काम् एव प्र-धावन्ति राम-बाण-प्रपीडिताः ॥४६॥ [४१
दशरथ-नृप-पुत्र-बाण-वेगै
रजनि-चरं नि-हतं खराऽऽत्मजं तम् ।
ददृशुर् अति-बलं सुराः प्र-हृष्टा
N] गिरिम् इव वज्र-हतं क्षणाद् वि-शीर्णम्[१२] ॥४७॥ [४२

इत्यार्षे रामायणे युद्ध-काण्डे मकराऽक्ष-वधो नाम
सप्तपञ्चाशः सर्गः ॥५७॥[१४]

---

१. भ-विहतं । २. भ-०रंत विहायसि ॥ ३. अतः परमधिकः पाठः—भ-स्थितोऽहं यदि ते शक्तिर्युध्यस्वाद्य मया सह ॥ ४. भ-च । ५. भ-शीघ्रं । ६. भ-स्वश० ॥ ७. भ-तदा रणे । ८. भ-छिन्नवर्मतनुत्राणं ॥ ९. भ-निपातिते । १०. प्र रा₂फ भ-०बाणार्दितास्तदा । भ-रामेणाभ्यर्दिता ययुः ॥ ११. भ-अथ च देवताः । १२. भ-तदा विशालं ॥ १३. प्र रा₂ भ-लंकाकाण्डे । भ-युद्धपर्वणि । १४. भ-मकराक्षवधः ॥

मकराऽक्षं हतं श्रुत्वा रावणः समितिं-जयः[1]। [१ पू
N] राक्षसाश्[2] चैव ये तत्र प्रधाना नि-हता रणे ॥१॥ [N
तौ चाऽपि भ्रातरौ श्रुत्वा कुम्भकर्णाऽऽत्मजौ[3] रणे[3]। [N
N] आ-दिदेशाऽथ सं-क्रुद्धो रणायेन्द्र-जितं पुनः[4] ॥२॥[5] [२ उ
जहि[6] वीर महा-वीर्यौ रणे राघवं[7]-लक्ष्मणौ।
अ-दृश्यो दृश्यमानो वा सर्व-था त्वं बलाऽधिकः। [३
N] वानरं चैव सु-ग्रीवं तं[8] वाऽनार्यं[9] वि-भीषणम् ॥३॥ [N
तम् अप्रतिम-कर्माणं[10] जितवांस् त्वं शची-पतिम्[10]।
N] किं[11] पुनर् मनु-जौ वीरौ[11] न हनिष्यसि सं-युगे ॥४॥ [४

N] तथोक्ते[12] राक्षसेन्द्रेण प्रति-गृह्य पितुर् वचः।
१९पू] यज्ञ-भूमौ स विधिवज् जुहावाऽग्निम् अथेन्द्र-जित् ॥५॥ [५
N] जुह्वतश् चाऽस्य तत्राऽग्निं रक्षसो भीम-कर्मणः।
२१उ] आ-ययुस् तत्र सं-भ्रान्ता राक्षसा यत्र रावणिः ॥६॥ [६
शस्त्राणि[13] शर-पत्राणि सम्-इधश्[14] च वि-भीतकाः।
२२] लोहितानि च वासांसि[13] स्रुवा कार्ष्णाऽऽयसी तथा ॥७॥ [७

---

१. रा फ म-हतेषु तेषु रक्षस्सु रावणो राक्षसाधिपः । २. रा$_2$ फ म-नास्ति ॥ ३. प्र भ-०त्मजावुभौ। ४. भ-सुतं । ५. रा$_2$ फ म-अत आरभ्य ११-श्लोकान्तः पाठः ४१-श्लोकात्परं व्यत्यासेन पठितः ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-याहि। ७. भ-त्वं रामल०। ८. रा$_1$ल$_1$ल$_2$ ब श्र प्र-तथार्यं च। ९ भ-नास्ति ॥ १०. रा$_2$ फ म-इन्द्र जयसि संयुगे। ११. रा$_2$ फ म-किमुक्तो मानुषौ दृश्यौ। भ-०जौ वीर ॥ १२. ल$_2$ ब श्र प्र फ म भ-तयोक्तो ॥ १३. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-सर्वाणि। रा$_2$ फ-दर्भाश्च। १४. म-नास्ति ॥

सर्व-तोऽग्निं समा-स्तीर्य शर-पत्रैः स-तोमरैः ।
२३] छागस्य कण्ठ-देशं तु छित्वा जग्राह शोणितम् ॥८॥ [८
२४पू] [2]जुहाव च [3]सम्-इद्धस्य ततो वह्नेर् महाऽर्चिषः ।
बभूवुस् तानि लिङ्गानि वि-जयं प्रति तस्य वै ॥९॥ [९
२५] प्रदक्षिणाऽऽवर्त-शिखस् तप्त-काञ्चन-सन्निभः ।
२६पू] हविस् [3]तु प्रति-जग्राह पावकः स्वयम् उत्थि(द्-स्थि)तः॥१०[१०
हुत्वाऽग्निं तर्पयित्वा तु दैत्य-दानव-राक्षसान् ।
२९] आ-रुरोह रथं [4]दी-प्तम् अन्तर्धान-गतं शुभम् । [११
N] स वाजिभिश् चतुर्भिश् च [5]बाणैश् च नि-शितैर् युतम् ।११[१२पू

क्रोधेन महताऽऽविष्टो निर्-जगाम महा-[6]बलः ।
राक्षसाश् चैव ये तत्र [7]प्रधानाँऽसुरसम्मताः ।
N] परि-वार्याऽऽशु निर्-जग्मुः सर्वे ते काम-रूपिणः॥१२॥ [N
ततो रावणिम् आ-यान्तं पताका-ध्वज-शोभितम् ।
N] [8]अभ्य्-अयाद् राक्षस-बलं वि-नदद् वै युयुत्सया ॥१३॥ [N
[9]नादास् तूर्य-प्रधानाश् च शंखानां च सहस्र-शः ।
N] जज्ञिरे सिंह-नादाश् च भेरीणां च महा-स्वनाः ॥१४॥ [N
तं ते सम्-ईक्ष्य निर्-यान्तं रावणिं राक्षसैर् वृतम् ।
N] आ-पेतुर् हरयः सर्वे गजाः पुष्करिणीम् इव ॥१५॥ [N
ततः प्र-वृत्तः सु-महान् रक्षसां वानरैः सह ।
५९,२] सं-ग्रामस् तुमुलस् तत्र जयम् अन्योऽन्यम् इच्छताम् १६ [N
३पू] ततस् ते राक्षसा वीरा वानराणां महौजसाम् ।

---

१. प्र रा₂ फ म भ-जीवितं ॥ २. फ-शरहोमस० । म-सहहोमस० ॥ ३. फ म भ-तत् ॥ ४. रा₁ ल₁ ल₂ ब अ-श्रीमद् । ५. रा₂ फ म-अतः पर विंशति-सर्गस्थः १३-३८-शश्लोकान्तः पाठोऽधिकपाठत्वेन पठितचरः द्र० ॥ ६. रा₂ फ म-अत आरभ्य २२-शश्लोकान्तः पाठो नास्ति । ७. ब अ प्र-०नाः सु० ॥ ८, भ-अन्वयाद् ॥ ९. भ-नानातूर्यनिनादाश्च ॥

N] त्रासयन्ति स्म् अनीकानि धनूंष्य् उद्-यम्य वेगिताः ॥१७॥ [N
N] ते शरैर् बहुभिश् चित्रैस् तीक्ष्ण-वेगैर् अलं-कृतैः ।
तोमरैर् अंकुशैश् चैव वानरान् जघ्नुर् आ-हवे ॥१८॥ [N
४] गदा-परिघ-निस्त्रिंश-शूल-पट्टिस-मुद्गरैः ।
३उ] शक्ति-खड्ग-भुसुण्डीभिर् ऋष्टि-पात-विकम्पनैः ॥१९॥ [N
गदा-मुसल-चक्रैश् च भिण्डिपाल-परश्वधैः ।
N] पांसुवाताऽग्निसलिलैर् भस्म-लोष्ट-तृण-द्रुमैः ॥२०॥ [N
सं-रुजाऽऽरुज भिन्धीऽति जहि वि-द्रावयेति च ।
५] तयोस् तद् अभवद् युद्धं सेनयोर् हरि-रक्षसाम् ॥२१॥ [N
एकः समेति चैकेन द्वाभ्यां द्वौ चैव राक्षसौ ।
६] न्य्-अपातयन् रणे तस्मिंस् त्रयस् त्रीन् बहवो बहून् ॥२२॥ [N
रावणिस् तु ततः क्रुद्धस् तान् उवाच निशा-चरान् ।
७] हृष्टा भवन्तो युध्यन्तु वानराणां जिघांसया ॥२३॥ [N
ततस् ते राक्षसाः सर्वे नदन्तो जय-कांक्षिणः ।
८] अभ्य्-अवर्षंस् तदा घोरा वानरान् छर-वृष्टिभिः ॥२४॥ [N
ते वध्यमानाः सम्-अरे वानराः पादपाऽऽयुधाः ।
९] अभ्य्-अद्रवन्त सहसा गर्वितांस् तान् निशा-चरान् ॥२५॥ [N

---

१. प्र भ-त्रासयन्तो ॥ २. ल$_1$ल$_2$ ब-तैः । ३. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-बाणैस् । ४. ल$_1$ ल$_2$ ब-तीक्ष्णैर्वेगैर् ॥ ५. भ-यष्टिप्रासवि० ॥ ६. भ-महा-मुसल० ॥ ७. भ-प्ररु० ॥ ८. रा$_1$ल$_1$ल$_2$ब श्र प्र-चैके द्वौ । ९. अतः परमधिकः पाठः—रा$_2$फ म-निहतं मकराक्षं तं दृष्ट्वा रामेण संयुगे । शक्रजित्सुमहातेजा विवेश रणसंकटम् ॥ ततो युद्धं समभवद् रक्षसां वानरैः सह । निघ्नतां तत्र चान्योन्यं निशाचरवनौकसाम् ॥ आक्रीड इव रुद्रस्य घ्नतः कालात्यये पशून् ॥ १०. रा$_2$ फ म-सुसंक्रुद्धस् ॥ ११. भ-नर्दन्तो युद्धकां० ॥ १२. रा$_2$ फ म-राक्षसा भीमविक्रमाः । भ-सहितांस्तान्निशाचरान् । १३. अतः परमधिकः पाठः—श्र प्र फ म भ-केचिच्छिलाः समादाय मुष्टिमुद्यम्य चापरे । वानराः समरे तस्मिन् राक्षसांश्च निजघ्निरे ॥ जानुभ्यां पातिताः केचिद्वानरैस्ते निशाचराः । सुस्रुवुर्वसुधोपान्ते हन्यमाना निशाचराः ॥

निरस्त-[1]नासा-कर्णाश् च राक्षसा भिन्न-मस्तकाः ।
१३] [2]सुस्रुवू रुधिरं भूरि[2] [3]नगा गैरिक-धातु-वत् ॥२६॥ [N
तैर् हतैर् हन्यमानैश् च भ्रमद्भिः पतितैर् अपि[4] ।
१४] क्रूरम् आ-योधनं तेषां बभौ वानर-रक्षसाम् [5]॥२७॥ [N
राक्षसा [6]बहवस् तत्र [7]वानरैर् अर्दिता[7] रणे ।
१५] व्य्-अधावन्त [8]तदा लंकां त्यक्त्वेन्द्र-जितम् [8]आ-हवे ॥२८॥ [N
१६पू] तेषां प्र-द्रवतां लंका प्र-[9]चकम्प [10]स-कानना ।
N] शाखामृगभयाऽऽर्तानां राक्षसानां समन्त-तः [11]॥२९॥ [N
१६उ] इन्द्र-जिच् च ततः क्रुद्धो महा-तेजा [12]महा-बलः ।
वानराणां शरीराणि व्य्-अधमन् नि-शितैः शरैः ॥३०॥ [N
१७] शरेणैकेन[13] [14]स तदा हरीणां पञ्च सप्त [14]च ।
बिभेद सम्-अरे क्रुद्धो राक्षसान् सम्प्र-हर्षयन् ॥३१॥ [N
१८] स [15]बाणैः सूर्य-संकाशैः [16]शातकौम्भ-परिष्कृतैः ।
वानरान् सम्-अरे [17]भीमः प्र-ममाथ सु-दुर्जयः ॥३२॥ [N
१९] ततोऽष्टा-दशभिर् बाणैः [18]स विद्ध्वा गन्ध-[18]मार्दनम् ।
विव्याध [19]नवैभिश् चैव नलं दूराद् अव-स्थितम् ॥३३॥ [N

---

१. भ-०स्तहनुक० । २. रा₁ ल₁ ल₂ ब श्र प्र भ-स्रवद्रुधिरधाराश्च । ३. रा₁ ल₂ ब-नागा ॥ ४. रा₂ फ म-नास्ति । ५. फ-स्तनद्भिर्नपतद्भिश्च क्रूरमायोधनं बभौ । म-अधिकं निस्तनद्भिश्च क्रूरमायोधन बभौ ॥ ६. रा₂-निहतास् । ७. रा₂- वानरा निहता । फ म-निहता वानरै । ८. रा₂ फ म-परे त्यक्त्वा लंकामेव निशाचराः ॥ ९. भ-०कम्पे । १०. रा₂-वानरैश्च भ० । ११. फ-नास्ति ॥ १२. रा₂ फ म-०मद्रावणात्मजः ॥ १३. रा₂-शरण्यैकेन । १४. रा₂ फ म भ-च हरीन् नव पञ्च च सप्त च ॥ १५. रा₂ फ म भ-शरैः । १६. रा₂-शातकुंभविभूषितैः । फ म-०भविभूषणैः । भ-शातकुंभप० । १७. भ-भीमान् ॥ १८. रा₁ ल₁ ल₂ ब श्र प्र रा₂ म-स विद्धा ग० । फ-अत आरभ्य ३७-श श्लोकस्य प्रथमपादं यावन्नास्ति । १९. रा₂-नवभिर्बाणैर् ॥

२०] सप्तभिश् च महा-वीर्यं[1] गवयं शीघ्र-गैः शरैः[2] ।
पञ्चभिर् वि-शिखैश् चैव गजं विव्याध सं-युगे ॥३४॥ [N
२१] अ षरांश च पृथग् बाणैर् वानरान् अरि-मर्दनः[3] ।
N] प्रति-विव्याध चैकैकं सप्तभिः सप्तभिः शरैः[4] ॥३५॥ [N
ततस् ते वानराः सर्वे भिन्न-देहा वि-चेतसः[5] ।
२२] व्यथिता वि-द्रवन्ति स्म रुधिरेण सम्-उक्षिताः ॥३६॥ [N
के-चिद् आर्त-स्वरं चक्रुर् वि-नेदुश् च परे रणे ।
२३] रणे वा नि-हताः के-चिन् नि-पेतुर् विगताऽसवः ॥३७॥ [N
ते हन्यमाना बाणौघैस् तेनाऽमित्रेण सं-युगे ।
२४] शलभा इव सं-पेतुर् वानराः सर्व-तो दिशः ॥३८॥[9] [N
के-चिद् आ-रुरुहुर् वृक्षान्[10] के-चिद् आ-रुरुहुर् न-गान् ।
२५] के-चिद् आ-प्लुत्य सहसा वानरास्[11] तु गता वनम्[12] ॥३९॥ [N
६०-१पू] वि-द्राव्य वानरान् सर्वान् इन्द्र-जित् समिति-जयः ।
N] रणात् प्रति-ययौ शीघ्रं स्वां पुरीं रावणाऽऽत्मजः ॥४०॥[13] [N

इत्यार्षे रामायणे युद्ध-काण्डे इन्द्रजिद्-युद्धं नामाऽष्टापञ्चाशः सर्गः ॥५८॥

---

१. रा$_2$ म-०वीर्यो नीलं मर्मविदारणैः । २. रा$_2$-मार्गणैः ॥ ३. रा$_2$ फ म-म रणाजिरे । भ-अरिमृदनः ॥ ४ रा$_1$ ल$_2$ ब श्र प्र फ-शूरा । ५ रा$_2$-०तनाः ॥ ६. रा$_2$फ म-विभिन्ना वानरा । ७. रा$_2$ म फ म-रक्षोबाणहताः । ८. रा$_2$फ म भ-०तुश्च ग० ॥ ९. अतः परमधिकः पाठः—फ- ते कूटयोधिनस्तस्य संग्रामे दृष्टविक्रमाः ॥ १०. रा$_2$ फ म-केचिच्च धरणीधरान् । ११. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-वानरा ययुरम्बरम् । म-०रास्ते गता क्षयं । १२. रा$_2$ फ-केचिच्च तत्रा युध्यन्त युद्धव्रतमनुव्रताः ॥ १३. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब श्र प्र-विद्राव्य सर्वान्प्लवगान्नगरं प्रविवेश ह । तं रावणः परिष्वज्य मुदा वचनमब्रवीत् ॥ लघुत्वमा महावीर्या येपि राक्षसपुंगवाः । ते वै सर्वे हताः पुत्र राघवेण दुरात्मना ॥

 [एकोनषष्टितमः सर्गः]

N] स वि-ज्ञाय मतं तस्य रावणस्य[1] महाऽऽत्मनः ।
१.उ] सन्नि-वृत्याऽऽहवात् तस्मात् प्र-विवेश पुरीं[2] ततः[2] ॥१॥ [१
सोऽनु-चिन्त्य[3] वधं तेषां राक्षसानां तरस्विनाम् ।
२] रोषताम्रेक्षणो वीरो[4] निर्-जगाम पुनर् बली ॥२॥ [२
स च पश्चिम-द्वारेण निर्-ययौ राक्षसेश्वरः ।
३] इन्द्र-जित् परमोद्विग्नः परेषां जनयन् भयम् ॥३॥ [३
मेघ-नादस् ततो दृष्ट्वा भ्रातरौ राम-लक्ष्मणौ ।
N] रणायाऽभ्युत्थितौ(द्-स्थि)तौ वीरौ जुहुवे पावकं तदा ॥४॥ [४
रथं ततो व्यव-स्थाप्य रावणी राक्षसैर् वृतः ।
N] सीतां[10] माया-मयीं कृत्वा तस्या वधम् अरोचयत् ॥५॥ [५
N] सर्वेषां मोहनाऽर्थं तु कृत्वा बुद्धिं सु-दुर्मतिः ।

त्वया पुनर्भृशं तत्र राघवः सहलक्ष्मणः । घोरेण शरबंधेन संयतो रणमूर्धनि ॥ सांप्रतं तु हरीन्सर्वान्द्रावयित्वा मुहुर्मुहुः । आगतोसि रणाद्वीर कोन्योस्ति सदृशस्त्वया ॥ तद्गच्छ पुत्र भूयस्त्वमायोधनशिरः प्रति । जहि तौ पापकर्माणौ भ्रातरौ रामलक्ष्मणौ ॥ पुरा त्वयेन्द्रं निर्जित्य देवराजं सुराधिपम् । राक्षसा हर्षितास्तात यशः प्राप्तमनुत्तमम् ॥ अशक्यं च दीनाभ्यां च मनुष्याभ्यां रणाजिरे * ॥ १. प्र रा$_2$ फ म भ-राघवस्य । २. रा$_2$ फ म-पुनः पुरीं ॥ ३. रा$_2$ फ भ-०नुस्मृत्य । ४. रा$_1$ ल$_1$ ल$_2$ ब अ-०प्रमुखो वेगान् । ५. भ-युद्धायैव मनो दधे ॥ ६. रा$_1$ ल$_1$ ल$_2$ब अ प्र-०साधिपः । म-०सैर्वृतः । ७. सर्वेषां ॥ ८. भ-इन्द्रजित्तु तथा । रा$_2$ फ म-०तदा । ९. रा$_1$-०तो वी० । रा$_2$ फ म भ-०भ्युद्यतौ । प्र-०तो वी रो जुहाव ॥ १०. भ-बलेन महतावृत्य ॥

* अतः परं 'यथोक्तं' इत्यादि 'स वाजिभि.' इत्यन्तं ५-११-शश्लोकान्तं पाठं पुनः पठित्वा 'जज्वाल वपुषा चैव रावणिः पावको यथा। इत्यार्षे रामायणे युद्ध-काण्डे रावणवाक्यं नाम सर्गः, इति चाऽधिकः पठितः॥

४उ] हन्तुं सीतां व्यव-सितः कपीनाम् अभि-तो[1] ययौ ॥६॥ [६
तं तु दृष्ट्वा विनिर्-यान्तं नगर्याः[2] काननौकसः ।
५] उत्-पेतुर् अभिसं-रब्धाः शिला-हस्ता युयुत्सवः ॥७॥ [७
हनू-मान् पुर-तस् तेषां[2] जगाम हरि-यूथपः ।
६] उद्-यम्य सु-महच् छृङ्गं पर्वतस्य दुरा-सदम् ॥८॥[3] [८
स ददर्श निरा-लम्बां[4] स्थिताम् इन्द्र-जितो रथे ।
७] एक-वेणी-धरां सीतां रक्षो[5]-हरण-कर्षिताम् ॥९॥[6] [९
परिक्लिष्टैकवसनां मण्डनाऽर्हाम् अ-मण्डिताम्[7] ।
N] रण-रेणु-समादिग्धां भीम-रूपां वराऽऽननाम् ॥१०॥ [N
रजो-मलाभ्यां सं-लिप्तैः[9] सर्व[10]-गात्रैर् अव-स्थिताम्[11] । [१०उ
ददर्श हनु-मांस् तत्र स-पंकाम्[12] इव पद्मिनीम्[13] । [N
N] स मुहूर्तम्[14] इव ध्यात्वा सीतेयम् इति वानरः ॥११॥ [११पू
तां दीनां मल-दिग्धाऽङ्गीं रथ-स्थां प्रेक्ष्य मैथिलीम् ।
८] बाष्प-पर्याकुल-मुखो हनू-मान् व्यथितोऽभवत् ॥१२॥[15] [१२
अब्रवीत् तां तु शोकाऽऽर्तां निर्-आनन्दां तपस्विनीम् ।
९] दृष्ट्वा सीतां रथे तस्य रावणस्य दुर्-आत्मनः ॥१३॥ [१३
किं चिकीर्षितम् अस्येति चिन्तयन् स महा-कपिः ।
१०] सह तैर् वानरैः सर्वैर् अभ्य्-अधावत् स रावणिम् ॥१४॥ [१४

---

१. भ-वानराभिमुखं ॥ २. भ-नास्ति ३. श्र-नास्ति ॥ ४. भ-ततो दीना सीतां । ५. रा१ ल१ ल२ ब श्र प्र भ-उपवासकृशाननां ॥ ६. रा१ ल१ ल२ ब श्र भ-दीनां विवर्णवदनां मूर्च्छया भृशदुःखितां । प्र-नास्ति । ७. प्र म-नास्ति ॥ ८. रा१ ल१ ल२ ब श्र प्र-रक्ताभिषाभ्यां । ९. फ भ-आलिप्तैः । १०. रा१ ल१ ल२ ब श्र प्र-अर्धगात्रैर् । ११. रा२ म-नास्ति । १२. रा१ ल१ ल२ ब श्र प्र-सायाह्न । १३. भ-मेदिनीं । १४. ल१ ल२ श्र प्र रा२-सुमु० ॥ १५. रा१ ल१ ल२ ब श्र प्र-१२-शश्लोकादारभ्य १७-शश्लोकपूर्वार्धान्तः पाठो नास्ति ॥

तद् वानर-बलं दृष्ट्वा रावणिः क्रोध-मूर्च्छितः ।
११] कृत्वा वि-कोशं निस्त्रिंशं प्र-जहास महा-स्वनम् ॥१५॥ [१५
तां प्र-गृह्य स केशेषु रावणिर् जनकाऽऽत्मजाम् ।
१२] क्रोशन्तीं राम रामेति दृष्ट्वा माया-मयीं तदा । [१६
खड्ग-रत्नं समा-गृह्य केश-पक्षे पराऽमृशत् ॥१६॥ [१९पू
१३] गृहीतां तां तदा दृष्ट्वा हनु-मान् दैन्यम् आ-गतः । [१७पू
N] बभूव चिर-दृष्टा हि तेन सा जनकाऽऽत्मजा ॥१७॥ [११उ
N] तद्-वधायोद्-यतं पापं हनू-मान् पवनाऽऽत्मजः । [१७उ
अब्रवीत् परम-क्रुद्धो रावणिं परि-भर्त्सयन् ॥१८॥ [१८उ
१४] नृ-शंसाऽन्-आर्य दुर्-वृत्त क्षुद्र पाप-विनिश्चय । [२०उ
N] ब्रह्मर्षीणां कुले जातो राक्षसीं योनिम् आ-स्थितः ॥१९॥ [१९उ
N] धिक् त्वां पाप-समाचारं यस्य ते मतिर् ईदृशी ।
अ-कार्यं नाऽद्य ते कार्यम् ईदृशं सु-विगर्हितम् ॥२०॥ [२०
१५] च्युतां गृहाच् च राज्याच् च राम-हस्ताच् च मैथिलीम् । [२१पू
अन्-आगसां त्वं वि-वशाम् अ-पापां किं जिघांससि । [N
१६] किं तु चैवाऽपराद्धोऽपि यद् एनां हन्तुम् इच्छसि ॥२१॥ [२१उ
सीतां च हत्वा न चिराज् जीवितं मोक्ष्यसे प्रियम् ।
१७] वधाऽर्हः कर्मणाऽनेन मम हस्त-गतो ह्य् असि ॥२२॥ [२२
ये च स्त्री-घातिनो लोके ये चैवाऽवध्य-घातिनः ।
१८] इह जीवितम् उत्-सृज्य प्रेत्य तान् उप-भोक्ष्यसे ॥२३॥ [२३
एवं ब्रुवाणो हनु-मान् बहुभिर् वानरैर् वृतः ।

---

१. भ-लक्ष्मणेति च तां मुहुः ॥ २. भ-मूर्धजेषु । ३. भ-दुःखितोऽभवत् ॥ ४. रा$_2$ फ म भ-दुःखजं वारि नेत्राभ्यामुत्सृजन् । ५. अ म-रावणिः । ६. भ-राक्षसाधमं ॥ ७. भ-पापपराक्रम ॥ ८. भ-नृशंस लोकगर्हितं ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-भोगाच् । १०. रा$_2$ फ म-नास्ति ॥ ११. भ-जीविष्यसि कथंचन ॥ १२. फ- चैव शिशुघा० ॥ १३. रा$_1$-तामनुभोक्ष्यसि ॥

१९] अभ्य्-अधावत सं-क्रुद्धो राक्षसेन्द्र-सुतं प्रति ॥२४॥ [२४
ओ-पतत् तु तदा भीमं तद् अनीकं वनौकसाम् ।
२०] राक्षसो भीम-कर्मा स सम्-अरे प्रत्य्-अवारयत् ॥२५॥ [२५
तां तु बाण-सहस्रेण वि-क्षोभ्य हरि-वाहिनीम् ।
२१] परि-वार्य हनू-मन्तं प्रत्य्-उवाचेन्द्र-जित् तदा ॥२६॥ [२६
सु-ग्रीवस् त्वं च रामश् च यन् निमित्तम् इहाऽऽगताः ।
२२] तां हनिष्यामि वैदेहीम् एषोऽद्य तव पश्यतः ॥२७॥ [२७
इमां हत्वा ततो रामं लक्ष्मणं त्वां च वानर ।
२३] सु-ग्रीवं च हनिष्यामि तं चाऽन्-आर्यं वि-भीषणम् ॥२८ [२८
२४पू] न हन्तव्याः स्त्रियश् चेति यद् ब्रवीषि प्लवं-गम । [२९पू
N] सर्व-कालं मनुष्येण व्यवसाय-वता सदा । [N
२४उ] पीडा-करम् अ-मित्राणां यत् स्यात् कर्तव्यम् एव तत् २९। [२९उ
तम् एवम् उक्त्वा रुदतीं सीतां माया-मयीं ततः ।
२५] शित-धारेण खड्गेन तां जघानेन्द्र-जित् स्वयम् ॥३०॥ [३१
यज्ञोपवीत-मार्गेण छिन्ना तेन तपस्विनी ।
२६] सा पृथिव्यां पृथु-श्रोणी पपात प्रिय-दर्शना ॥३१॥ [३२
तम् इन्द्र-जित् स्वयं हत्वा हनू-मन्तम् उवाच ह ।
२७] पश्य रामस्य पश्यैतांम् एक-पत्नीं वि-नाशिताम् ॥३२॥ [३३
एवं खड्गेन रुदतीं हत्वा तां चारु-लोचनाम् ।
२८] आ-स्थितः स रथं हृष्टो वि-ननाद महा-स्वनम् ॥३३॥ [३४

---

१. रा२-सुक्रुद्धो ॥ २. रा२ म-० तंतं तु तं॥ ३. भ-वीर्यवन्तं ॥ ४. भ-वधिष्यामि ॥ ५. रा१ ल१ ल२ ब श्र प्र-आर्यं च ॥ ६. रा२ फ म भ-नास्ति ॥ ७. रा२-नास्ति । ८. भ-तदा ॥ ९. फ म-स्त्रियं । १०. रा२ फ म भ-मया । ११. प्र फ म भ-पश्येमां । १२. रा२-नास्ति ॥ १३. भ-सीतां स वै हत्वा शक्रजिद्रावणात्मजः ॥

व्यादितास्यस्य नदतस् तम् उग्रं[1] भीम-निस्वनम् ।
२९] वानराः शुश्रुवुः शब्दम् अनु[2]-रूपम् अव-स्थिताः ।।३४।।[3] [३५

तद्[4] अशनि-वद् उरु-वेग-निःस्वनं
नि-नदम् अथेन्द्रजितो महा-स्वनम् ।
रिपु-भय-जननं नि-शम्य ते च
N] लघु-हृदयाः कपयश् चकम्पिरे ।।३५।।[5] [N

तं हृष्ट-रूपं सम्[6]उद्-ईक्ष्य वानरा
विषण्ण-रूपाः समभिप्र-दुद्रुवुः ।[7]
वि-हाय संग्राम-शिरो महौजसः
N] [10]प्र-तस्थिरे वायु-सुतं तरस्विनम्[11] ।।३६।। [N

तथा तु सीतां विनि-हत्य दुर्-मतिः
प्रहृष्ट-चेताः स बभूव रावणिः ।
अचिन्तयच् चापि तदा स राक्षसः
N] कथं वि-जेयौ युधि राघवाव् इति[12] ।।३७।। [N

इत्यार्षे रामायणे युद्ध-काण्डे मायासीता-वधो नामैकोनषष्टितमः सर्गः ।।५९।।

[वं–६१]= [षष्टितमः सर्गः] =[दा–८२]

श्रुत्वा तं भीम-निर्ह्रादं शब्दं शक्राशनि-स्वनम् ।
१] वीक्षमाणा दिशः सर्वे दुद्रुवुर् वानरर्षभाः ।।१।। [१

---

१. भ-समरे तस्योग्रं । २. रा१ ल१ ल२ ब ग्र भ-अदूरे प्रत्यव० । ३. प्र-नास्ति ॥ ४. प्र रा१ ल१ ल२ ब ग्र-तमशनिपटु मेघनिः० । ५. रा२-नास्ति ॥ ६. फ म-च निरीक्ष्य । ७. रा२-नास्ति । अतः परमधिकः पाठः—म-विवर्णचेता बलिनं बलीयसो बलाधिकं शक्रबल-प्रमर्दनम् । ८. रा२-०मगतिं । ९. भ-हतौजसः । १०. रा१ ल१ ल२ ब ग्र प्र भ-वनौकसः संप्रतिपेदिरे स्म ते । ११. फ-नास्ति ॥ १२. फ म-नास्ति ॥ १३. ब प्र रा२ भ-लंकाकाण्डे । म-युद्धपर्वणि ॥ १४. रा१ ल१ ल२ ब ग्र प्र भ-तत्र । १५. ल१ ल२ ब ग्र प्र रा२ फ म-वीक्ष्य० ॥

तान् उवाच हरीन् सर्वान्[1] हनु-मान् पवनाऽऽत्मजः ।
२] विषण्ण-वदनान् दीनांस्[2] त्रस्तान् वि-द्रवतः पृथक् ॥२॥ [२
किं[3] विषण्ण-मुखा दीनां[3] वि-द्रवध्वं प्लवं-गमाः ।
३] त्यक्त्वा युद्धे समुत्[4]-साहं शूर-त्वं वः[5] क्व तद् गतम्[5] ॥३॥ [३
पृष्ठ-तोऽनु-व्रजध्वं माम् अग्र-तो यान्तम् आ-हवे ।
४] शूरैर् अभिजनोत्पन्नैर्[6] न युक्तं हि[7] पलायितुम् ॥४॥ [४
इत्य् एवम् उक्त्वा हरयः सम्-अरे[8] भीम-विक्रमाः[9] ।
५] शैल-शृङ्गाणि गृह्णन्तो द्रुमांश् च वि-विधान् बहून् ॥५॥ [५
अभि-पेतुश्[10] च नर्दन्तो राक्षसान् वानरर्षभाः ।
६] परि-वार्य हनू-मन्तम् अन्व्-अयुश् च महाऽऽहवे ॥६॥ [६
सर्वैर्[11] वानर-मुख्यैः[12] स[12] हनू-मान् परि-वारितः[13] ।
७] हुताऽशन इवाऽर्चिष्-मान् अदहच्[14] छत्रु-वाहिनीम् ॥७॥ [७
स[15] राक्षसानां कदनं चकार सु-महाबलः ।
८] वृतो वानर-सैन्येन कालाऽन्तक-यमोपमः ॥८॥ [८
स तु शोक-समाविष्टः[16] कोपेन[16] च महा-कपिः[17] ।
९] हनू[18]-मान् रावणि-रथे शिलां[19] गुर्वीम् अपातयत्[19] ॥९॥ [९
ताम् आ-पतन्तीं दृष्ट्वा तु रथः सारथिना तदा ।
१०] विधेयाऽश्व-समायुक्तः सु-दूरम्[20] अप-वाहितः ॥१०॥ [१०

---

१. रा$_2$ फ म-हनू० । भ-समेतान्मारुतात्मजः । २. भ-भीतांस् ॥ ३. रा$_2$ फ म-किमिदं विषण्णवदना । ४. प्र म भ-महोत्० । ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-च कृतं कृतं । भ-तत्कुतो गतं ॥ ६. भ-०नोपेतैर् । ७. रा$_2$ फ म-विनिवर्तितुं ॥ ८. रा$_2$ फ-अपि । म-तथा । ९. भ-शैलाग्राणि द्रुमांश्चापि जगृहुर्हृष्टमानसाः ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब अ-नदन्तो ॥ ११. भ-स तैर् । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ भ-०ख्यैश्च । १३. म भ-सर्वतो वृतः । १४. भ-प्राद० ॥ १५. रा$_2$ फ-राक्षसानां च ॥ १६. रा$_2$ फ म-कोपेन चाविष्टो शोकेन । भ-०न चाविष्टो क्रोधेन । १७. भ-महाबलः । १८. प्र रा$_2$ फ-हनुमान्राक्षसरथे । १९. रा$_2$ फ-पातयामास वै शिलां । म-अपातयन्महतीं शिलां ॥ २०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-स शीघ्रं ॥

तम् इन्द्र-जितम् अ-प्राऽऽप्य स-सारथि-रथं[1] तदा ।
११] विवेश धरणीं भित्त्वा शिला[2] सा शत-धा तदा ॥११॥ [११
राक्षसानाम् अभूद्[3] धैर्षो दृष्ट्वेन्द्र-जितम् आ-हवे ।
N] मुक्तं वायु-सुताद् वीरं सारथिं चाऽप्य् अपूजयन्[4] ॥१२ [N
पतितायां शिलायां तु व्यथितां रक्षसां चमूम् ।
१२] ताम् अभ्य्-अधावञ् छत-शो नदन्तः[5] काननौकसः॥१३। [१३
ते द्रुमांश् च महा-काया गिरीणां शिखराणि च[6] ।
१३] चिक्षिपू[7] रक्षसां[8] मध्ये वानरा भीम-विक्रमाः ॥१४॥ [१४
शिला-वर्षं तथाऽसह्यं वि-सृजन्तः प्लवं-गमाः ।
N] शत्रूणां कदनं चक्रुर् नेदुश् च वि-विधैः स्वनैः[9] ॥१५॥[10] [१५
वानरैस् तैर्[11] महा-वीर्यैर् भीम-रूपा[12] निशा-चराः ।
१४] वि-दार्याऽभि-हता वृक्षैर् व्य्-अचेष्टन्त धरणी-तले॥१६॥[१६
स सैन्यम् अभिवीऽऽक्ष्याऽथ वानराऽर्दितम् इन्द्र-जित् ।
१५] प्रगृहीताऽऽयुधः क्रुद्धः परान् अभि-मुखो ययौ ॥१७॥ [१७
शरौघान् व्य्-असृजत् सैन्ये[13] स्व-सैन्येनाऽभिसं-वृतः ।
१६] जघान कपि-शार्दूलान् कुपितो[14] रावणाऽऽत्मजः ॥१८॥ [१८
स शूलैः[15] शक्तिभिः खड्गैः पट्टिसैः[16] कूट-मुद्गरैः ।
१७] ते चाऽप्य् अनु-चरास् तस्य वानराञ् जघ्नुर् आ-हवे॥१९॥[१९
वानराश् चैव[17] सं-क्रुद्धाः शिलाभिः पर्वतैस् तथा ।[18]

---

१. भ-रथं साश्वसारथिं । २. फ म-शिला सा व्यर्थतां गता । प्र रा$_2$-०धा गता । भ-शिलाप्यथ समुद्गता ॥ ३. भ-चमू हर्षाद् । ४. म भ-चाभ्यपूज० । ल$_1$ ल$_2$ ब अ प्र रा$_2$-०यत् ॥ ५. म-नर्दन्तः ॥ ६. भ-गिरिशृंगाणि चैव हि । ७. रा$_2$ फ-आक्षिपन् द्विषतां ॥ ८. रा$_2$ फ म-वृक्षशैलशिलावर्षं । ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-नदन्तो विकृतस्वनाः । १०. भ-नास्ति ॥ ११. भ-तु महाभीमैर्घोररूपा । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-तदा रणे ॥ १३. रा$_2$ फ म-स शरौघानवसृजत् । भ-०घानसृजत्तत्र । १४. रा$_2$ फ म-सुबहून्पश्यतो द्रुमान् ॥ १५. रा$_2$ फ म भ-शूलैरशनिभिः । १६. रा$_2$ फ म भ-०शैः प्रासमु० ॥ १७. भ-चापि । १८. फ-नास्ति ।

१८] वृक्षैश् च सु-महा-कायान् राक्षसान् समुपाऽद्रवन् ॥२०॥[1] [N
राक्षसा वानरैः सार्धं वानराश् चाऽपि राक्षसैः ।
१९] अयुध्यन्त महा-वेगा[2] वि-बुधा दानवैर् इव ॥२१॥ [N
स-स्कन्ध-विटपैर् वृक्षैः[3] शिलाभिश् च महा-बलैः[4] ।
२०] हनु-मान् कदनं चक्रे रक्षसां भीम-कर्मणाम् ॥२२॥ [२०
तेन[5] भग्नाश् च चक्रन्दू राक्षसा रुधिरोक्षिताः ।
२१] वि-द्रुताः शत-शः सर्वे सम्-अरे[6] जीवितैषिणः ॥२३॥[7] [N
N] हनु-मान् अथ सं-रब्धो[8] विमुखी-कृत्य राक्षसान् ।
सं[9] नि-वार्य पराऽनीकम् अब्रवीत् काननौकसः[10] ।
२२] सत्त्व-वन्तो नि-वर्तध्वं मम शक्यम् इदं बलम् ॥२४॥ [२१
त्यक्त्वा प्राणान् हि युध्यामो राम-प्रिय-चिकीर्षया ।
२३] यन्-निमित्तं वयं[11] सर्वे हता सा जनकाऽऽत्मजा ॥२५॥ [२२
इमम् अर्थं च[12] वि-ज्ञाप्य राम-सुग्रीवयोर्[13] द्वयोः ।
२४] तौ यत् प्रति-करिष्येते[14] तत् करिष्यामहे वयम् ॥२६॥ [२३
इत्य् उक्त्वा वानर-श्रेष्ठो वारयन् युधि[15] राक्षसान्[16] ।
२५] शनैः शनैर् अ-सम्भ्रान्तो हि अगच्छद् यत्र राघवौ ।[17] [२४
२६उ] क्षत-विक्षत-गात्रास् ते हरयश् च व्युपाऽरमन्[18] ॥२७॥ [२५पू
रावणिश् चाऽपि सं-हृष्टः प्र-याते मारुताऽऽत्मजे ।[19]
२७] नि-कुम्भिलाम् अधि-ष्ठाय[20] जुहावाऽग्निम् अथेन्द्र-जित्[21]॥२८॥[२६

---

१. फ म-नास्ति ॥ २. ल$_1$ ल$_2$ व-०वेगं ॥ ३. रा$_2$ फ म-शैलैः । ४. प्र-०बलाः ॥ ५. भ-ते तेन भग्नाश्चस्कन्दू । ६. भ-समराज् । ७. फ म-नास्ति ॥ ८. भ-संक्रुद्धो । ९. भ-सन्नि० । १०. भ-तान्वनौ० ॥ ११. रा$_2$-च युध्यामो सा हता ॥ १२. भ-तु । १३. रा$_1$ ल$_1$ ल$_2$ ब श्र प्र भ-रामं सुग्रीवमेव च । १४. रा$_2$ फ म-प्रतिविधास्येते ॥ १५. रा$_2$ फ म-राक्षसांस्तदा । १६. रा$_2$ फ म भ-सबलः सन्न्यवर्तत । १७. रा$_2$ फ म-ततः प्रेक्ष्य हनूमन्तं व्रजन्तं यत्र राघवौ । १८. भ-चाप्युपागमन् ॥ १९. रा$_2$ फ म-नास्ति । २०. रा$_2$ फ-अथासाद्य । २१. म-नास्ति ॥

यज्ञ-भूमौ तु विधिना पावकम् तेन रक्षसा ।
२८] हूयमानः प्र-जज्वाल जप-होम-पुरस्कृतः[1] ॥२९॥ [२७
सोऽर्चिर्-विवृद्धो ददृशे होम-शोणित-तर्पितः ।
२९] सन्ध्या-गत इवाऽऽदित्यस् तीक्ष्ण[2]-रूपो हुताऽशनः ॥३०॥ [२८
अथेन्द्र-जिद् राक्षस-भूतये[3] तदा
जुहाव हव्यं विधिना विधि-ज्ञः ।
हृष्ट्वा[4] व्यू-अतिष्ठन्त च राक्षसास् ते[5]
N] महा-समूहेषु नयाऽनय-ज्ञाः ॥३१॥ [२९

इत्यार्षे रामायणे युद्ध[6]-काण्डे वानराऽपसर्पणं
नाम षष्टितमः सर्गः ॥ ६० ॥

[वं-६२]= [एकषष्टितमः सर्गः] =[दा-८३]

राघवश् चाऽपि तत्-कालं तद् राक्षस-वनौकसाम् ।
१] श्रुत्वा संग्राम-निर्घोषं जाम्ब-वन्तम् उवाच[7] ह ॥१॥ [१
सौम्य नूनं हनु-मता सं-ग्रामः क्रियते महान्[8] ।
२] श्रूयते हि यथा भीमः सु-महान् आयुध-स्वनः ॥२॥ [२
तद् गच्छ कुरु साहाय्यं क्षिप्रम्[10] ऋक्ष-पते स्वयम्[11] ।
३] स्व-बलेन[9] समा-युक्तो युध्यमानस्य मारुतेः ॥३॥ [३
ऋक्ष-राजस् तथोक्तस् तु स्वेनाऽनीकेन सं-वृतः ।
४] आऽगच्छत्[12] पश्चिम-द्वारं हनू[13]-मान् यत्र वानरः ॥४॥ [४
अथो[14]ऽऽयान्तं हनू-मन्तं ददर्शर्क्ष-पतिः पथि ।

---

१. रा₂ फ म भ-०परिष्कृतः ॥ २. रा₂ फ म-परिवेषसमन्वितः । भ-तीव्ररूपो हु० ॥ ३. भ-०ससंघभूत्यै । ४. भ-हृष्टाः स्थिता राक्षसयोधमुख्या । ५. प्र-०हे तु ॥ ६. प्र ब भ-लंकाकांडे । म-युद्धपर्वणि ॥ ७. भ-अभाषत ॥ ८. ब म-०मतो नित्यं संग्राममूर्धनि ॥ ९. रा₂ फ म-स्वबलेनाभिसंवृतः । १०. रा₂ फ-क्षिप्रं ऋक्षपते तस्य सहायो भव युध्यतः । म-नास्ति ॥ ११. भ-नास्ति । १२. ल₁ ब-अग० । १३. ब रा₂-हनु० ॥ १४. रा₁ ल₁ ल₂ ब-अथ यान्तं ।

५] वानरैर्[1] दत्त-संग्रामैः श्वसद्भिः परि-वारितम्[2] ॥५॥ [५
दृष्ट्वा[3] पथि हनू-मांस् तु तम् ऋक्ष-पतिम् उद्-यतम्[5] ।
६] नील-मेघ-निभं[4] घोरं स सम्-एत्य न्य्-अवर्तत ॥६॥ [६
अथ जाम्ब-वता सार्धं राघवाऽन्तिकम् एत्य सः ।[6]
७] शशंस हनु-मान् वीरो यत् तद् इन्द्र-जिता कृतम्[7] ॥७॥ [७
गर्जतां[8] युध्यमानानाम् असिनो पश्यतां[9] च नः ।[10]
८] जघान रुदतीं सीताम् इन्द्र-जित्[11] पाप-निश्चयः ॥८॥ [८
उद्भ्रान्त-चित्तस्[12] तां दृष्ट्वा वि-षण्णोऽहम् अरिं-दम[13] ।
९] तमसा महता छन्नो वि-ज्ञापयितुम्[14] आ-गतः ॥९॥ [९
तस्य[15] तद् वचनं श्रुत्वा रामो दुःखेन मूर्च्छितः ।
१०] नि-पपात तदा भूमौ कृत्त[16]-मूल इव द्रुमः ॥१०॥ [१०
तं भूमौ देव-संकाशं पतितं प्रेक्ष्य राघवम्[17] । [११पू
११] जग्राह लक्ष्मणः शीघ्रम् अभ्युपेत्य सु-दुःखितम् ॥११॥[19] [N
जाम्ब-वान् हनु-मान् मैन्दो नलो नीलश् च वानराः[18] ।
१२] अभि-पेतुः समुत्-पत्य सर्व-तो हरि-यूथपाः[20] ॥१२॥ [N
सिषिचुः सलिलैश् चैनं पद्मोत्पल-सुगन्धिभिः[21] ।
१३] दह्यमानं महा-दुःखैर् महा-कक्ष्यम् इवाऽग्निभिः ॥१३॥ [१२

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ भ-कृतसं० । २. रा$_2$ फ म-अभिसंवृतं ॥ ३. रा$_2$ फ म-०मांश्च तदृक्षबलम् । ४. रा$_2$ फ म-०घचयप्रख्यं । ५. अ-नास्ति ॥ ६. अ-नास्ति । रा$_2$ फ म-स तेन सह सैन्येन सन्निकर्षे महात्मनः । ७. रा$_2$ फ-शीघ्रमागत्य रामाय व्यथितो वाक्यमब्रवीत् । म-नास्ति ॥ ८. रा$_2$-जनानां । फ-यत्तानां । ९. रा$_2$ फ-द्विषतां प्रेक्ष्यतां । १०. म-नास्ति । ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-रावणात्मजः ॥ १२. रा$_2$ फ म-०न्तचेतनो । १३. ल$_1$ ल$_2$ ब-०ण्णो ह्यरिमर्दन । १४. रा$_1$-विन्न० ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ-स सीतां निहतां । १६. प्र-छिन्न० ॥ १७. फ म-नास्ति ॥ १८. ल$_1$ ब अ प्र रा$_2$-०रः । १९. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$-लक्ष्मणश्च महाबाहुस्तं समाश्वासयन्प्रभुम् । फ म-नास्ति । २०. रा$_2$ फ म-कपियू० ॥ २१. प्र-नास्ति । रा$_2$ फ म-प्रदहन्तमसह्यं च समिद्धमिव पावकं ॥

बाहुभ्यां सम्परि-ष्वज्य सु-दुःखितम् उवाच ह ।[1]
१४] लक्ष्मणो[2] रामम् अ-स्वस्थं वाक्यं हेत्वर्थ-संयुतम् ॥१४॥ [१३
शुभे[3] वर्त्मनि तिष्ठन्तं त्वाम् ऋजुं[4] विजितेन्द्रियम् ।
१५] अन्-अर्थेभ्यो न शक्नोति त्रातुं धर्मो निर्-अर्थकः ॥१५॥ [१४
भूतानां स्थावराणां च जंगमानां च दर्शनम्[5] ।
१६] यथा[6]ऽस्ति न तथा धर्मस् तेन नास्ती[7]ऽति मे मतिः[8] ॥१६॥ [१५
यथैव स्थावरं सर्वं[9] जंगमं च तथा-विधम् ।
N] नाऽयं धर्मस् तथा युक्तस् त्वद्-विधेन नि-षेवितुम्[10] ॥१७॥ [१६
यदि धर्मो भवेत् सत्यो रावणो नरकं व्रजेत्[11] ।
१७] भवांश्[12] च धर्म-संयुक्तो नेदं व्य्-असनम् आप्नुयात् ॥१८॥ [१७
तस्य चाऽव्यसनं दृष्ट्वा तव च व्य्-असनं तथा[13] । [१८पू
१८] धर्मेणोप-लम्भे[14] धर्मम् अ-धर्मे वाऽप्य् अ-धर्मताम्[15] ॥१९॥ [१९पू
ये[16] हि धर्मेण युज्येरंस् ते हि धर्म-व्रता नराः ।
१९] अ-धार्मिका[17] ह्य् अ-धर्मेण[18] फलं स्यात् समम्[19] एतयोः ॥२०॥ [२०
यस्माद् अर्थैर्[20] वि-वर्धन्ते येष्व्[21] अ-धर्मः सु-दारुणः[22] ।
२०] अन्-अर्थो येषु धर्मश् च तस्माद् धर्मो निर्-अर्थकः ॥२१॥ [२१

---

१. रा$_2$ फ म-लक्ष्मणस्तं तु बाहुभ्यां परिष्वज्य सुदुःखितः । २. रा$_2$ फ म-उवाच ॥ ३. रा$_2$ फ म-शुचौ । ४. रा$_2$ फ म भ-आर्य ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-सर्वशः । ६. रा$_2$-तथास्ते । ७. रा$_2$ फ म-सत्येन नास्ति सः ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$-अर्थस् । ९. ल$_1$-॰तं । १०. फ म-नास्ति ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब अ-न भविष्यति । भ-न भवेत्पुनः । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-चेद् ॥ १३. रा$_2$ फ म-तस्य च व्यसनाभावाद्व्यसनैश्चावृते त्वयि । १४. रा$_1$ ल$_1$ ल$_2$ ब अ-॰भेऽधर्मे । १५. रा$_2$ फ म-अधर्मेणापि धर्मतां ॥ १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-यदि । १७. रा$_2$-तेष्वधर्मश्च तेष्वर्थः । फ-येष्वधर्मश्च तेष्वर्थः । १८. रा$_2$ फ म-एवं १९. म-नास्ति ॥ २०. प्र-अर्था । २१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-यथाधर्मः । म-तेष्वकार्यः । २२. भ-प्रतिष्ठितः ॥

वध्यन्ते पुण्य-कर्माणो यद्य् अ-धर्मेण राघव ।
२१] अ-धर्मेण हतो धर्मः स हतः किं करिष्यति ॥२२॥ [२२
अथवा वि-हिते(?तो)नाऽयं हन्यते हन्ति चाऽपरम् ।
२२] वि-धाता लिप्यते तेन तस्मात् पापेन कर्मणा ॥२३॥ [२३
अ-दृष्टः प्रति-संस्कारो यदि पापस्य कर्मणः ।
२३] कथं शक्यं परं प्राऽऽप्तुं धर्मेणं रिपु-सूदन ॥२४॥ [२४
अथ वा दुर्-बलं त्यक्त्वा बलं धर्मोऽनु-वर्तते ।
२५] दुर्-बलो हत-मर्यादो न सेव्य इति मे मतिः ॥२५॥ [२६
बलस्य यदि वा धर्मो गुण-भूतः समा-हितः ।
२६] धर्मम् उत्-सृज्य वर्तस्व यथा धर्मे तथा बले ॥२६॥ [२७
यदि वा सत्य-वचनं धर्मः किल परो मतः ।
२७] अन्-ऋतम् त्यक्त-करुणः किं न बद्धः पिता त्वया ॥२७। [३१
अथैवैतन् मतं दानं धर्मोऽयम् इति राघव ।

---

१. भ-बाध्यंते । २. फ-कर्महतो धर्मः स हतः किं हनिष्यति ॥ ३. रा$_2$ फ म भ-वाऽपा० । ४ रा$_2$ फ म-वधेन । ५. म-पापो न लिप्यते ॥ ६. रा$_1$ ल$_2$ ब अ-सदुष्टः । ७. रा$_2$ फ-०संहारं । ८. भ-मन्यंते तु सनातनं । ९. भ-अथ । १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-०णारिनिसू० । रा$_2$ फ म-०णारिविनाशनं । ११. अतः परमधिकः पाठः—रा$_1$,ल$_1$,ल$_2$ ब अ प्र-यदि सत्स्यात्सतां मध्ये नासत्स्यात्तत्र किंचन । त्वयेदमीदृशं प्राप्तुं तस्मान्नैवोपपद्यते ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-ते । फ-चेद् । १३. रा$_1$ ल$_1$ ल$_2$ ब-दुर्लभः क्लीबो । अ प्र-दुर्बलः क्लीबो । १४. रा$_1$ ल$_1$ ल$_2$ ब-दुर्लभो । १५. भ-कृतम० ॥ १६. रा$_2$ फ म-बले स्याद् । १७. रा$_2$ फ म-हर्षो । १८. रा$_2$ फ म-स मानदः । १९. भ-धर्मस्तथा बलं ॥ २०. रा$_2$ फ म-अथ चेद् । २१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-यतः । २२. भ-त्वय्यकरुणः किं न बुद्धः । २३. अतः परमधिकः पाठः—रा$_1$,ल$_1$,ल$_2$ ब अ प्र-यदि धर्मान्भवेद्व्रतिर्नाधर्मात्तु परंतप । तस्मात्त्वा निर्बलं वज्री-कुर्यादैत्य शतक्रतुः ॥ अधर्मसंश्रितो धर्मो विनाशयति राघव । सर्वमेतद्यथा-कामं काकुत्स्थ कुरुते नरः ॥ २४. भ-अथ चैतन्मतिर् ।

२८] धर्म-मूलं हि तच् छिन्नं राज्यम् उत्सृजता त्वया ॥२८॥ [३१
अर्थेभ्यो हि वि-वृद्धेभ्यः सम्-ऋद्धेभ्यस् ततस् ततः ।
२९] क्रियाः सर्वाः प्र-वर्तन्ते पर्वतेभ्य इवाऽऽप-गाः ॥२९॥ [३२
अर्थेन हि वि-हीनस्य पुरुषस्याऽल्प-मेधसः ।
३०] वि-च्छिद्यन्ते[1] क्रियाः सर्वा ग्रीष्मे[2] कु-सरितो[2] यथा ॥३०॥ [३३
पुरुषोऽर्थ-परित्यक्तः[3] सुख-कामः सु-दुःखितः ।
३१] पापम् आ-रभते कर्तुं[4] क्रिया-दोषो[4] हि जायते ॥३१[5]॥ [३४
यस्याऽर्थास्[6] तस्य मित्राणि यस्याऽर्थास् तस्य बान्धवाः ।[7]
३२] यस्याऽर्थाः स पुमांल् लोके यस्याऽर्थाः स[8] च पण्डितः[9] ॥३२॥ [३५
यस्याऽर्थाः स महा-भागो यस्याऽर्थाः स[8] गुणाऽन्वितः ।
३३] यस्याऽर्थाः स च वि-क्रान्तो यस्याऽर्थाः[8] स च सं-मतः[8] ॥३३[10]॥ [३६
३५पू] अ-धनेनाऽर्थ-कामेन नाऽर्थाः[11] शक्या उपाऽर्जितुम्[11] । [N
३८पू] येनाऽर्थेन[12] तु लोकोऽयं[12] चरते धर्म-कारणम्[13] ॥३४॥ [४०पू
३५उ] अर्थैर् अर्था नि-बध्यन्ते गजैर् इव[14] महा-गजाः[14] । [N
३८उ] ते नाऽर्थास् त्वयि दृश्यन्ते दुर्-दिनेषु ग्रहा इव ॥३५॥ [४०उ
धनम् अर्जय[15] काकुत्स्थ धन-मूलम् इदं जगत् ।
३९] वि-शेषं नाऽधि-गच्छामि निर्-धनस्य मृतस्य च ॥३६[16]॥ [N
चाण्डालश्[17] च दरिद्रश् च द्वाव् एतौ सदृशौ मम ।
४०] चाण्डालस्य न[18] गृह्णन्ति दरिद्रो न प्र-यच्छति ॥३७॥ [N
त्वयि प्र-व्रजिते वीर पितर्य् उप-रते तथा[19] ।
४१] रक्षसाऽप-हृता भार्या प्राणेभ्योऽपि[20] गरीयसी[20] ॥३८॥ [४१
अर्थस्यैते[21] परि-त्यागाद्[22] दोषाः प्रव्या-हृता मया ।

---

१. रा$_2$—व्युच्छि० । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—ग्रीष्मेषु स० ॥ ३. रा$_2$ फ—सोऽयमर्थैः प० । ४. भ—क्षयाद्दोषो । ५. म—नास्ति ॥ ६. ल$_1$ प्र ब—०र्थैस् । ७. ल$_1$ ल$_2$—सर्वप० ॥ ८. भ—नास्ति । ९. अ प्र रा$_2$ फ म—बुद्धिमान् । १०. अतः परमधिकः पाठः—अ प्र रा$_2$ फ म भ—यस्यार्था धर्मकामार्थास्तस्य सर्वं प्रदक्षिणम् ॥ ११. रा$_2$ फ म—चर्तुं धर्मो न शक्यते । भ—०क्याः समीहितुं । १२. रा$_2$ फ म—येषामर्थे ह्ययं लोकश् । ल$_1$ ल$_2$—०न च लो० । भ—येषामर्थेन लो० । १३. रा$_2$ फ म—०र्मचारिणं ॥ १४. रा$_2$ फ म—वनगजा इव ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब—आर्जय । १६. अ—नास्ति ॥ १७. रा$_1$ ल$_1$ ल$_2$ ब प्र—चंडा० । १८. रा$_1$ ल$_1$ ल$_2$ ब प्र—च ॥ १९. ल$_2$ रा$_2$—यथा । २०. रा$_2$ फ म—प्राणैः प्रियतरा सती ॥ २१. रा$_1$ ल$_1$ ल$_2$ ब प्र भ—०स्य ते । २२. रा$_2$ फ म—०त्यागे ।

३६] राज्यम् उत्-सृजता[1] वीर[1] न[2] तद् बुद्धं तदा त्वया[2] ॥३९॥ [३७
धर्मः कामश् च दर्पश् च हर्षः क्रोधः श्रुतं[3] दमः[3] ।
३७] अर्थाद् एतानि सर्वाणि प्र-वर्तन्ते न संशयः ॥४०॥ [३९
तद् अ-सह्यम् इदं घोरं[4] दुःखम् इन्द्र-जिता[5] कृतम् ।
४२] कर्मणा व्यप-नेष्यामस्[6] तस्माद् उत्-तिष्ठ राघव ॥४१॥ [४२
उत्-तिष्ठ शतपत्त्राऽक्ष[7] दीर्घ-बाहो दृढ-व्रत ।
४३] किम् आत्मानं महाऽऽत्मानं श्रुताऽऽत्मन् नाऽव-बुध्यसे ॥[8]४२॥ [४३
अयम् अहम्[9] अद्य वि-भो तव[9] प्रियाऽर्थं[9]
जनक-सुता-निधनं सम्-ईक्ष्य रोषात् ।
स—रथ—गज—हयां[10] स-राक्षसेन्द्रां[10]
४४] भृशम् इषुभिर् विनि-पातयामि लंकाम् ॥४३॥ [४४

इत्यार्षे रामायणे युद्ध-काण्डे[11] राम-समाश्वासनं[12] लक्ष्मण-वाक्यं
नामैकषष्टितमः सर्गः ॥ ६१ ॥

[वं–६३]= [द्विषष्टितमः सर्गः] =[दा–८४]

रामम् आ-श्वासमाने तु लक्ष्मणे भ्रातृ-वत्सले ।
१] निर्-ईक्ष्य[13] गुल्मान् सकलांस् तत्राऽगच्छद्[14] वि-भीषणः ॥ १॥ [१
नाना-प्रहरणैर् वीरै[15] राक्षसैर् अपरैर्[16] वृतः[16] ।
२] महामेघचयाऽऽकारैर्[17] मातंगैर् इव यूथ-पः ॥ २॥ [२
अभि-गम्य[18] महा-वीर्यो[19] राघवस्य[20] समीप-तः[20] ।
३] स ददर्श हरीन् दीनान् सुग्रीवाऽऽदीन् स-लक्ष्मणान् ॥[21]३॥ [३

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०ज्यतां राजन् । २. रा$_2$ फ म–येन बुद्धिस्त्वया कृता ॥ ३. रा$_1$ ल ल$_1$ ब–श्रुतं मदः । प्र–शमं तपः । रा फ म–श्रुतं तपः ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–वीर । ५. रा$_1$–०जितः । ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–चाप० ॥ ७. भ–पद्मप० । ८. रा$_2$ फ म–नास्ति । भ–कृतात्मानं कृतात्मा च महात्मन्नावबुध्यसे ॥ ९. रा$_2$ फ म–अयमद्य तवोदितः । १०. रा$_2$ फ म–सहयगजरथं सराक्षसेन्द्रं ॥ ११. ब प्र भ–लंकाकांडे । १२. ल$_1$ ल$_2$ ब भ–नास्ति । रा$_1$ अ प्र–रामाश्वासनं ॥ १३. रा$_2$ फ–अवेक्ष्य । १४. रा$_2$ फ–ततः प्राप्तो । म–तत्र प्राप्तो ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–घोरैः । १६. म–अभिसंवृतः । १७. रा फ म–०घनिकाशैश्च ॥ १८. रा$_2$ म–सोऽभिगम्य । फ–सोऽधिगम्य । १९. रा$_1$ ल$_1$ ल$_2$–०वीरो । २०. रा$_2$–नास्ति । २१. फ म–ददर्श वानरान् दीनान्सुग्रीवं सलक्ष्मणं ॥

तत इक्ष्वाकु-शार्दूलं पार्थिवं[1] सचिवैर् वृतम् ।[2]
४] ददर्श मोहम् आ-पन्नं लक्ष्मणस्यांऽकम् आ-श्रितम् ॥ ४॥ [४
क्लान्तं शोकाऽभिसन्तप्तं वीऽऽक्षमाणं वि-भीषणम् ।[3]
५] दुर्-मनास्[4] तत्र[4] दीनाऽऽत्मा किम् एतद् इति सोऽब्रवीत् ॥[5]५॥ [५
N] तं विषण्ण-मुखं दृष्ट्वा ध्यान-युक्तं वि-भीषणम् ।
६उ] उवाच लक्ष्मणो वाक्यम् इदम् अश्रु-परिप्लुतः ॥ ६[6]॥ [६
हताम् इन्द्र-जिता वीर[7] सीतां[7] श्रुत्वैव राघवः ।
७] हनूमद्-वचनाद् एष[8] ततो मोहम् उपाऽऽगतः ॥ ७॥ [७
कथयन्तं[9] तु सौमित्रिं सन्नि-चार्य वि-भीषणः ।
८] पुष्कलाऽर्थम् इदं वाक्यम् अ-स्वस्थं[10] रामम् अब्रवीत् ॥ ८॥ [८
मनुजेन्द्राऽऽर्त-रूपेण यद् उक्तस् त्वं हनू-मता ।
९] तद् अ-युक्तम् अहं[11] मन्ये सागरस्येव सं-क्षयम् ॥ ९॥ [९
अभि-प्रायं हि[12] जानामि रावणस्य दुर्-आत्मनः ।
१०] सीतां प्रति महा-बाहो न स तां घातयिष्यति ॥१०॥ [१०
याच्यमानः स हि मया वाक्यैर् धर्माऽर्थ-संहितैः ।[13]
११] वैदेहीम् उत्-सृजस्वेति[14] न च वाक्यं चकार सः[14] ॥११॥ [११
नैव साम्ना न दानेन न भेदेन गताऽऽयुषा[15] । [१२पू
१२] शक्या सा द्रष्टुम् अन्येन राक्षसेन नरर्षभ ॥[16]१२॥ [N
यदा तु स हि सं-ग्रामम् उप-यास्यति रावणिः । [N
१३] चैत्यं[17] नि-कुम्भिला, नाम तत्र गत्वा प्र-तिष्ठते[18] ॥१३॥ [१३उ

---

१. रा$_1$ ल$_1$ ल$_2$ ब-०वैः । २. रा$_2$ फ-राघवं च महावीर्यमिक्ष्वाकुकुल-वर्धनं ॥ ३. रा$_2$ फ म-व्रीडितः शोकसंतप्तः प्रेक्ष्य रामं विभीषणः । ४. रा$_2$ फ-अन्तर्मुखेन । ५. म-नास्ति ॥ ६. अतः परमधिकः पाठः—म-विभीषण न जानासि यदिदं कर्म दुष्करम् ॥ ७. रा$_2$ फ-सीतां सम्यक् । म-सीतामद्य । ८. रा$_1$ ब अ-एव । प्र-दोषात् । रा$_2$ फ म-वीर ॥ ९. रा$_2$ फ म-तथा यांतं । १०. रा फ म-ससंज्ञं । भ-विसंज्ञं ॥ ११. रा$_1$ ल$_1$ ल ब अ-इदं । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र म-तु । भ-च ॥ १३. रा$_2$ फ-याच्यमानो हितार्थं नु वाक्यं धर्माऽर्थसंचितं । म-याचमानं हितार्थं स वा० । १४. प्र-०ति न च वाक्यं चकार ह । रा$_2$ फ-०ति न स तत्कृतवान्वचः । म-०जेत्येवं न चकार तथावचः ॥ १५. रा$_2$ म भ-कुतो युधि । फ-कुतो रुषा । १६. फ म-अनिरस्तेन वैदेही शक्या मोक्तुं हि संयुगे ॥ १७. भ-चैत्यो । १८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ म-०ष्ठितं ॥

हुत्वाऽग्निम्[१] उप-यातो हि[१] देवैर् अपि स-वासवैः ।
१४] अ-दर्शनीयो[२] भवति सं-ग्रामे स हि राक्षसः ।।[३]१४।।[१४
१५उ] वि-घ्नम् अन्व्-इच्छता तात वानराणां पराऽऽक्रमे ।[४] [१५उ
N] तद्[५] अग्निं होष्यताऽनेन[५] नूनं माया प्र-दर्शिता ।।१५।। [N
सु-ग्रीवस्य च सैन्यानां लक्ष्मणस्य च धी-मतः ।
N] जय-विघ्न-करी तेन माया सा सम्प्र-दर्शिता ।।१६[६]।। [N
तवाऽप्य् उद्यत-सैन्यस्य[७] सीता-विजय-कांक्षिणः ।
N] नैराश्यम् उप-नेतुं सा तव माया प्र-दर्शिता ।।[८]१७[८]।। [N
नि-कुम्भिलायां काकुत्स्थ स जुहोति न संशयः ।
१६] स-बलास् तत्र गच्छामो यावत् तन्[१०] न[१०] सम्-आप्यते ।।१८।। [N
त्यजैनं[११] नर-शार्दूल मिथ्या-सन्तापम् आ-गतम् ।
१७] सीदत्य्[१२] एतद्[१२] बलं सर्वं दृष्ट्वा त्वां शोकम् आ-गतम्[१३] ।।१९।। [१६
इहाऽस्वस्थो[१४] महा-बाहो स्व-स्थो भवितुम् अर्हसि ।[१५]
१८] लक्ष्मणं प्रेषयाऽस्माभिः[१६] सह सैन्याऽनुकर्षिभिः ।।२०।। [१७
एष तं[१७] नर-शार्दूलो रावणिं[१८] नि-शितैः शरैः ।
१९] त्याजयिष्यति तत् कर्म प्राणान्[१९] इष्टांश्[१९] च सं-युगे ।।२१।। [१८
एतस्य[२०] नि-शितास् तीक्ष्णाः पत्रिणो[२१] रुक्म-भूषणाः[२१] ।
२०] पिपासिता इव ख-गाः पास्यन्ति युधि[२२] शोणितम् ।।[२३]२२।। [१९
२१पू] तद् आ-दिश महा-बाहुं[२४] लक्ष्मणं शुभ-लक्षणम् ।

---

१. रा$_2$ म–स हुतो वै हुताशे तु। फ–स हुते वै हुताशे च। २. भ–अधर्षणीयो। ३. रा$_2$ फ म–अधृष्यः स तु संग्रामे बलवान्रावणात्मजः। अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–सीतां घातयता नूनमेषा माया प्रदर्शिता ॥ ४. रा$_2$ म–नास्ति। ५. रा$_2$ फ म–तेन हव्यनिमित्तार्थं ॥ ६. रा$_2$ म–नास्ति ॥ ७. फ–उच्छ्रित०। ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–कर्मणस्तस्य सिद्ध्यर्थमुपायः संप्रदर्शितः। ९. म–नास्ति ॥ १०. रा$_1$ ल$_1$ ल$_2$ अ–तेन ॥ ११. रा$_2$ फ म भ–त्यजेमं। १२. रा$_2$ फ म–मुह्यते हि। १३. रा$_2$ फ म–शोककर्शितं। भ–शोकपीडितं ॥ १४. भ–इहस्थस्त्वं। १५. रा$_2$ फ म–इह त्वं स्वस्थहृदयस्तिष्ठस्वारिविनाशन। १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०यामास ॥ १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ भ–ते। १८. रा$_1$–०णिर्। १९. रा$_2$ फ–प्राणनिष्ठां ॥ २०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–तस्यैते। २१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०णो रक्तभू०। रा$_2$ फ म–सुपत्राः कंकवाससः। २२. प्र भ–हृदि। २३. रा$_2$ फ म–पतत्रिण इवासौम्याः शराः पास्यन्ति शो०। २४. प्र रा$_2$ फ म–०बाहो।

N] रक्षसस् तस्य नाशाय वज्रं वज्र-धरो यथा ॥२३[1]॥ [२०
मनुज-वर[2] न काल-विप्रकर्षो[2]
रिपु-निधनं परि-मार्गतां क्षमं (? मो) नः ।
वद[3] वि-सृज[3] रिपोर् वधाय बाणान्[4]
२२] असुर-वरस्य[5] वधाय वै यथेन्द्रः[5] ॥२४॥ [२१
समाप्त-कर्मा स हि नैर्ऋतो भवेद्
असह्य-वीर्यः सम्-अरे सु-दुर्जयः ।
युयुत्सता तेन समाप्त-कर्मणा
२३] भवेत् सुराणाम् अपि सं-क्षयो महान् ॥२५॥ [२२

इत्यार्षे रामायणे युद्ध-काण्डे[6] विभीषण-वाक्यं[7] नाम
द्विषष्टितमः सर्गः ॥ ६२ ॥

[वं—६४]= [त्रिषष्टितमः सर्गः] =[दा—८५]

तस्य तद् वचनं श्रुत्वा चिन्ता-शोक-परिप्लुतः ।
१] नाऽव-धारितवान् पूर्वं[8] यद्[9] उक्तं[9] तेन रक्षसा ॥ १॥ [१
N] ततो धैर्यम् अव-स्थाप्य रामः पर-पुरं-जयः ।
वि-भीषणम् उपाऽऽसीनम् उवाच वदतां-वरः ॥ २॥ [२
२] नैर्ऋताऽधिपते वाक्यं किं[9] त्वयोक्तं[9] वि-भीषण । [३पू
व्या-कुलत्वाद् धि चित्तस्य न श्रुतं ते वचो मया ।[10] [N
३] भूयस् तच् छ्रोतुम् इच्छामि ब्रूहि यत् ते विवक्षितम् ॥ ३॥ [३उ
राघवस्य वचः[11] श्रुत्वा सुदीन-वद् उदा-हृतम्[11] ।
४] यत्नात्[12] पुनर् इदं वाक्यं बभाषे स वि-भीषणः ॥ ४॥ [४
यथाऽऽज्ञप्तं[13] महा-बाहो त्वया गुल्म-निवेशनम् ।

---

१. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब अ प्र—वधाय रावणेस्तस्य सहास्माभिररिन्दम ॥ २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—न तु जयरणकाल० । रा$_2$ फ म—०वर कालविक्रमो न । ३. रा$_2$ फ म भ—तदतिसृज । ४. रा$_2$ फ—वाणी । ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—०स्य वधे यथा महेन्द्रः । रा$_2$ फ—असुरवरोन्मथनाय वै यथेन्द्रः ॥ ६. ब प्र भ—लंकाकांडे । ७. रा$_2$ फ—रामाश्वासनं । भ—इन्द्रजिद्वधोपायो ॥ ८. प्र—राघवस् । ९. भ—त्वयोक्तं यद् । १०. फ म भ—नास्ति ॥ ११. रा$_2$ फ म भ—तु तद्वाक्यं श्रुत्वा वाक्यविशारदः । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—यत्स । रा$_2$ फ—यत्तत् ॥ १३. ल$_1$—०ज्ञासं ।

५] तत् तथाऽनु-ष्ठितं वीर त्वद्-वाक्य-समनन्तरम्[1] ॥ ५॥ [५
स्वान्य् अनीकानि सर्वाणि वि-भक्तानि समन्त-तः ।
६] न्य्-अस्ताश् च यूथप-श्रेष्ठा[2] यथा-न्यायं विभाग-शः ॥ ६॥ [६
भूयस् तु मम वि-ज्ञाप्यं[3] श्रोतुम् अर्हसि राघव[3] ।
७] त्वत्-सन्ताप-निमित्तं हि सन्तप्त-हृदयो ह्य् अहम् ॥[4]७॥ [७
त्यज्यतां तद् इदं दैन्यं[5] वृथा शोक-निबन्धनम्[5] । [८
८] मायया यत् कृतं तेन तत्[6] ते श्रोत्रम् उपाऽऽगतम्[6] ॥ ८॥ [N
तद् इयं त्यज्यतां चिन्ता शत्रु-पक्ष-प्रहर्षिणी[7] ।
९] उद्-यमः क्रियतां वीर हर्षः समुप-सेव्यताम्[8] ॥ ९॥ [९
प्राऽऽप्तव्या यदि वैदेही[9] हन्तव्यो यदि रावणः[10] ।
१०] रोचतां तन्[11] महा-बाहो मद्-वाक्यम् इदम् ऊर्जितम् ॥१०॥ [१०
साध्व्[12] अयं यातु[12] सौमित्रिर् दुर्-मतेस्[13] तस्य रक्षसः[13] ।
११] नि-कुम्भिलायां प्राऽऽप्तस्य ग्रसनाय[14] दुर्-आत्मनः ॥[15]११॥ [११
धनुर्-मुक्तैर्[16] व्य्-अवच्छिन्नैर्[16] आशीविषविषोपमैः ।
N] शरैर् हन्तुं महेष्वासो रावणिं समितिं-जयः ॥१२॥ [१२
तपसा तेन वीरेण[17] वर-दानात् स्वयं-भुवः ।
१२] अस्त्रं ब्रह्म-शिरः प्राऽऽप्तं काम-गश्[18] च रथोत्तमः[18] ॥१३॥ [१३
स एव वि-दधे तस्य[19] भग-वाँल् लोक-कृद् वधम्[19] ।[20]
१३] तेजसा[21] सम्प्र-तप्तस्य[21] तपसोऽन्ते[22] हि तस्य[22] च ॥१४॥ [N
नि-कुम्भिलाम् अ-सम्प्राऽऽप्तम् अहुताऽग्निं च यो रिपुः ।
N] अभि-यास्यति युद्धे त्वाम् इन्द्र-शत्रो स ते वधः ॥१५॥ [१५

---

१. रा$_1$ ल$_1$ ब अ रा$_2$ फ–०वाक्यं स० ॥ २. म–०पाः सर्वे ॥ ३. रा$_2$ फ–०प्यं त्वमिदं श्रोतुमर्हसि । म–विज्ञातं तमेत्वं श्रोतुमर्हसि । ४. रा$_2$ फ म–त्वद्व्यकारणसंतप्ते संतप्तहृदया वयं ॥ ५. रा$_2$ फ म–शोकं मिथ्याश्रममुपागतं । ६. रा$_2$ फ म–राक्षसेन दुरात्मना ॥ ७. रा$_2$ फ म–शत्रुहर्षप्रदायिनी । ८. रा$_2$ फ–समुपपद्यतां । म–०पलभ्यतां ॥ ९. रा$_2$ फ म–ते सीता । १०. रा$_2$ फ म–ते रिपुः ॥ ११. फ म भ–ते ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब अ फ–साधु संयातु । प्र–साध्वसौ यातु । १३. रा$_2$ फ म–सहास्माभिर्नरोत्तमः । १४. प्र भ–प्रणाशाय । भ–शासनाय । १५. रा$_2$ फ म–निकुम्भिलां महाबाहो निहंतुं रावणात्मजं ॥ १६. रा$_2$ फ म भ–सुविभक्तैरविच्छिन्नैर् । १७. अ–वीर्येण । १८. रा$_2$ फ म–०गाश्च हयोत्तमाः ॥ १९. रा$_2$ फ म–चास्य धीमतः पुण्यकर्मणः । २०. फ–अतः परं ६६–तमसर्गस्य १५–शश्लोकान्तः पाठस्त्रुटितः । २१. भ–०साभिप्र० । २२. भ–०सान्तर्हित० ॥

इत्य् एवं वि-हितस्[1] तस्य वधस् तेन महाऽऽत्मना[1] । [१६पू
१४] त्वरस्व[2] तद्-वधाय[2] त्वं वृत्रस्येव[3] पुरं-दरः ॥[4]१६॥ [N
वधस्येन्द्र-जितो राम हेतुर् भवितुम् अर्हसि ।
१५] हते तस्मिन् हतं मन्ये[5] रावणं राक्षसाऽधिपम्[6] ॥१७[7]॥ [१६उ
विभीषण-वचः श्रुत्वा रामो लक्ष्मणम् अब्रवीत् ।
१६] जानामि तस्य रौद्रस्य मायां चैव[8] पराऽऽक्रमम्[8] ॥१८॥ [१७
स हि ब्रह्माऽस्त्र-विच्[8] छूरो[8] वि-हायसि गतो रणे ।
१७] करोत्य्[9] अ-संज्ञान् सं-ग्रामे देवान् अपि स-वासवान्[10] ॥१९॥ [१८
तस्याऽन्तरिक्षे चरतः स-रथस्य महाऽऽत्मनः[11] ।
१८] न गतिर् लक्षितुं[12] शक्या सूर्यस्येवाऽभ्र-संप्लवे[13] ॥[14]२०॥ [१९
तं माया-शत-सम्प्राऽऽप्तं[15] महा-वीर्य-पराऽऽक्रमम्[16] । [२०पू
१९] जहि बाणैर् इतो[17] गत्वा[18] कूट-योधिनम् आ-हवे[18] ॥२१॥ [२२
यद् ऋक्ष-राजस्य बलं तेन सर्वेण सं-वृतः ।
२०] राज्ञा जाम्ब-वता सार्धम् अंग-देन हनू-मता ॥२२॥ [२१
गच्छ त्वं राक्षसेन्द्रस्य तनू-जं जहि लक्ष्मण ।
२१] जेतारं वज्र-हस्तस्य सं-युगेषु दुरा-सदम् ॥२३॥ [N
अयं[19] च[19] सचिवैः सार्धं महाऽऽत्मा रावणाऽनुजः ।
२२] अभि-ज्ञस् तस्य देशस्य पृष्ठ-तोऽनु-गमिष्यति ॥२४॥ [२३
स रामस्य वचः श्रुत्वा लक्ष्मणः पर-वीर-हा ।
२३] जग्राह कार्मुकं श्रेष्ठम् अत्युद्गार-सहं[20] महत्[20] ॥२५॥ [२४
स सं-नद्धः शरी खड्गी कवची हेम-जाल-भृत्[21] ।

---

१. रा$_2$ म–तस्य विहितो वधोपायो दुरात्मनः । २. रा$_2$–त्वर तस्य व० । ३. प्र रा$_2$ भ–मघस्येव । ४. म–नास्ति ॥ ५. रा$_2$–त्विद्धि । ६. रा$_2$–ससुहृज्जनं ॥ ७. रा$_2$ म–एतां दुरात्मनः । भ–सत्यपराक्रमं ॥ ८. म–दिव्यास्त्रविन्तात । ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–कुर्याद् । १०. रा$_2$ म–समागतान् ॥ ११. म–परतप । १२. प्र रा$_2$ भ–वेदितुं । १३. रा$_1$ ल$_1$ ल$_2$ ब अ–०भ्रसंक्षये ॥ १४. म–अत आरभ्य २१–शश्लोकस्य तृतीयपादं यावन्नास्ति । १५. रा$_2$ भ–०यागमसं० । १६. रा$_2$ भ–०र्यमरिन्दमं । १७. रा$_2$–इदं । १८. रा$_1$ ल$_1$ ल$_2$ ब अ–०स्वा शूलयो० । रा$_2$ म–कर्म कुरु सत्यपराक्रम ॥ १९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–अपरैः । रा$_2$ म–अयं त्वा ॥ २०. रा$_1$ ल$_1$ ल$_2$ ब अ–अन्यत्कार० । रा$_2$ म–भीमं भीमपराक्रमः । भ–महत्कार० ॥ २१. रा$_1$–०लभृत् । अ प्र–०लघृत् । रा$_2$ म–०लवान् । भ–०लधृक् ।

२४] राम-पादाव्[1] उप-स्पृश्य[1] हृष्टः सौमित्रिर्[2] अब्रवीत् ॥२६॥ [२५
अद्य मत्कार्मुकोत्सृष्टाः शरा निर्-भिद्य[3] रावणिम् ।
२५] लंकाम्[4] अभि-पतिष्यन्ति हंसाः पुष्करिणीम्[5] इव ॥२७॥ [२६
अद्य धक्ष्यन्ति भित्त्वा ते मम बाणा धनुश्-च्युताः ।
२६] शरीरं तस्य रौद्रस्य तृण-राशिम्[6] इवाऽनलः ॥२८॥ [२७
इत्य् एवम् उक्त्वा वचनं लक्ष्मणो भ्रातुर् अग्र-तः ।
२७] जिघांसू रावणिं क्रुद्धः[7] प्र-णम्य त्वरितं ययौ[7] ॥२९॥ [२८
स[8] रामम् अभि-वाद्याऽथ[8] कृत्वा चाऽभि-प्रदक्षिणम् ।
N] नि-कुम्भिलाम्[9] अभि-ययौ[9] हन्तुं रावणिम् आ-हवे ॥३०॥ [२९
वि-भीषणेन सहितो राज-पुत्रः प्रताप-वान् ।
N] कृत-स्वस्त्ययनो भ्रात्रा सज्ज-कार्मुक-मार्गणः[10] ॥३१[11]॥ [३०
वानराणां सहस्रैस् तु बहुभिर् हनु-मान् वृतः[12] ।[11]
२८] वि-भीषणश् च साऽमात्यो राम-भ्रातरम् अन्व्-अयात् ॥३२[13]॥ [३१
महा-कपि-बलौघैश् च समं सर्वैः समन्त-तः ।[14]
N] ऋक्ष-राज-बलं तद्-वद्[15] अगच्छन् मेघ-निस्वनम्[15] ॥३३॥ [३२
स गत्वा दूरम् अध्वानं सौमित्रिर् मित्र-नन्दनः[16] ।
२९] राक्षसेन्द्र-बलं दूराद् अपश्यद् व्यूह-संस्थितम्[17] ॥३४॥ [३३
सम्प्राऽऽप्य स धनुष्-पाणिं[18] माया-शत-विशारदम्[19] ।
N] तस्थौ ब्रह्माऽस्त्र-विद् धी-मान् लक्ष्मणः शुभ-लक्षणः ॥३५॥ [३४
विमल-विघन-भास्कर-प्रभावो[20]
ऽध्वज-गहनं गहनं महा-रथैश् च ।

---

१. रा$_1$ ल$_1$ ल ब अ प्र–०दाम्बुजं स्पृश्य । म–०दमुप० । भ–दौ च संस्पृश्य । २. रा$_2$ म–राघवं ॥ ३. म–संभिद्य । ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–लोकान् । ५. रा$_1$ अ–०णीर् ॥ ६. रा$_2$ म–कक्षरा० । भ–तूलरा० ॥ ७. रा$_2$ म–युद्धे लक्ष्मणो निर्जगाम ह ॥ ८. रा$_2$ म–भ्रातरं सोभि० । ९. रा$_2$ म–०लायामागत्य ॥ १०. म–लक्ष्मणो निर्ययौ तदा । ११. रा$_2$–नास्ति ॥ १२. रा$_1$–धृतः । म–सह । १३. अतः परमधिकः पाठः—म भ–हनूमंतं समारुह्य गरुत्मन्तं यथा हरिः । प्रययौ लक्ष्मणः श्रीमान् वानरैः परिवारितः ॥ १४. रा$_2$ म–०लौघस्तु कम्पयन्निव पर्वतान् । भ–महान् कपिबलौघस्तु समसर्पत सर्वतः । १५. प्र भ–चैव गच्छन्तं मे० । रा$_2$ म–चैव महाभ्रमिव नादयन् ॥ १६. भ–मित्रवर्धनः । १७. ल$_1$ ल$_2$ ब अ प्र भ–व्यूहमास्थितं ॥ १८. रा$_1$ भ–०णिर् । रा$_2$ म–महाबाहुर् । १९. प्र–०तमरिंदमं । रा$_2$ म–बलयोगं महाबलं । भ–तमायान्तमरिंदमं ॥ २०. म–०लविविधचारु भास्करं ।

प्रतिभय-करम् अ-प्रमेयवेगं
N] स्तिमितम् इव द्विषतां बलं विवेश ॥३६॥ [३५

इत्यार्षे रामायणे युद्ध-काण्डे[1] लक्ष्मण-प्रयाणं[2] नाम
त्रिषष्टितमः सर्गः ॥ ६३ ॥

[वं–६५]= [चतुःषष्टितमः सर्गः]= [दा–८६]

अथ तत्र[3] महा-बाहुं[3] लक्ष्मणं रावणाऽनुजः ।
१] परेषाम् अ-हितं वाक्यम् अर्थ-साधनम्[4] अब्रवीत् ॥ १॥ [१
अस्याऽनीकस्य महतो भेदं[5] त्वं[5] कुरु लक्ष्मण ।
२] राक्षसेन्द्र-सुतो ह्य् अस्मिन्[6] भिन्ने दृश्यो भविष्यति ॥ २॥ [३
तं[7] त्वम् इन्द्राऽशनि-प्रख्यैः[7] शत-शोऽव-किरञ् छरैः ।
३] अभि-द्रवाऽऽशु यावत् तु कर्म नाऽस्य सम्-आप्यते ॥[8] ३॥ [४
जहि पापं दुर्-आत्मानं माया-वन्तम्[9] अ-धार्मिकम् ।
N] रावणिं क्रूर-कर्माणं सर्व-लोक-भयाऽऽवहम् ॥४[10]॥ [५
विभीषण-वचः श्रुत्वा लक्ष्मणः[11] पर-वीर-हा[11] ।
४] राक्षसेषु महा-भीमं शर-वर्षम् अपातयत्[12] ॥ ५॥ [६
ऋक्षाः शाखा-मृगाश् चैव वृक्षशैलशिलाऽऽयुधाः[13] ।
५] अभ्य्-अधावन्त सं-हृष्टास् तद्-अनीकम् अव-स्थितम्[14] ॥६[15]॥ [७
परे चाऽपि[16] शितैः शूलैर् असिभिः पट्टिसैः[17] शरैः[17] ।
६] उद्-यतैस् त्वरिता जग्मुः कपीन् अभि-जिघांसवः[18] ॥ ७॥ [८
स सम्प्र-हारस् तुमुलो बभूव कपि-रक्षसाम् ।
७] शब्दैर्[19] आनादयंल्[19] लंकां जलद-प्रतिम-स्वनैः[20] ॥ ८॥ [९

---

१. प्र ब भ–लंकाकाण्डे । म–युद्धपर्वणि । २. भ–०णोपयानं ॥ ३. रा$_2$ म–तं समवस्थाप्य । ४. रा$_2$ म–स्वार्थं० ॥ ५. ल$_1$ ल$_2$ ब अ–भेदं तं । प्र–भेदनं । ६. रा$_2$ म–अत्र ॥ ७. रा$_2$–शीघ्रमयाश० । म–शीघ्रमिन्द्रा० ८. रा$_2$ म–अतिक्रमामहे यज्ञं तस्य कर्माऽसमासये ॥ ९. भ–०विनं । १०. म–नास्ति ॥ ११. रा$_2$ म–सम्प्रहृष्टः सलक्ष्मणः । १२. रा$_2$ म–ववर्ष सः ॥१३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०शैलतला० । १४. रा$_2$–बिभित्सवः । १५. म–अत आरभ्य ८–मश्लोकं यावन्नास्ति ॥ १६. रा$_2$–स्वपि । भ–वापि । १७. ब प्र भ–०शैस्तथा । १८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–एव जि० ॥ १९. रा$_2$–शब्देन ना० । २०. रा$_2$–०स्वनः ॥

अस्त्रैश् च विविधाऽऽकारैः शत-शाखैश्[1] च[1] पाद-पैः ।
८] पट्टिसैः[2] पर्वताऽग्रैश् च घोरम्[3] आ-काशम् आ-बभौ ॥ ९॥ [१०
राक्षसा वानरेन्द्रैस्[4] तु निकृत्ताऽऽननबाहवः[4] ।
९] नि-पातयन्तः शस्त्राणि चक्रुः[5] स्व-समम् आ-हवम्[5] ॥१०॥ [११
के-चिद् वृक्षैः[6] स-विटपैर्[6] बल-वन्तो वनौकसः ।
१०] अभि-जग्मुस्[7] ततो हृष्टाः[7] सम्-अरे राक्षसर्षभान् ॥११॥ [१२
ऋक्ष-वानर-मुख्यैश् च महा-कायैर् महा-बलैः ।
११] रक्षसां वध्यमानानां महद् भयम् अजायत ॥१२॥ [१३
स्वम् अनीकं वि-पन्नं[8] तु[8] दृष्ट्वा शत्रुभिर् अर्दितम् ।
१२] उत्-तस्थाव् इन्द्र-जिच् छीघ्रम् अ-समाप्यैव कर्म तत् ॥१३॥ [१४
ततः कर्मण्य् अ-निर्वृत्ते मन्यु-शल्यम्[9] समुद्-वहन्[9] ।
१३] परि-त्रातुं बलं दीनम् अभि-चक्राम रावणिः ॥१४॥ [N
वृक्षाऽन्धकारान्[10] निष्-पत्य[11] पूर्व-सज्जं महा-बलः[12] ।
१४] आ-रुरोह रथं दिव्यं वाजिभिर् मेघ-सन्निभैः ॥१५॥ [१५
स भीम-कार्मुक-धरः[13] कालाऽञ्जनचयोपमः ।
१५] रक्ताऽऽस्यनयनः[14] क्रुद्धो बभौ मृत्युर् इवाऽपरः ॥१६॥ [१६
दृष्ट्वैव च रथ-स्थं तम् अभ्य्-अधावत तद् बलम् ।
१६] वानराणां सु-भीमानां युद्धाय रिपुम् आ-हवे ॥१७॥ [१७
N] प्र-दुद्रुवे सा ध्वजिनी यत्र धन्वी स लक्ष्मणः ।[15] [N
तस्मिन् क्षणे[16] तु हनु-मान् प्र-गृह्य[17] सु-दुरासदम्[17] ।
१७] धरणी-धर-संकाशं महा-वृक्षं[18] महा-बलः ॥१८॥ [१८
राक्षसानाम्[19] अनीकानि[19] कालाऽग्निर् इव निर्-दहन् । [१९पू

---

१. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–०शश्चैव । २. भ–उद्यतैः । ३. म–'घोरं' इत्यादिः 'हृष्टाः' इत्यन्तः पाठो नास्ति ॥ ४. रा$_{2}$ भ–०रेन्द्रेषु विकृतान० । ५. प्र–चुक्रुशुः समतोरणान् । रा$_{2}$ भ–चक्रुः सुमहतो व्रणान् ॥ ६. रा$_{2}$ भ–वृक्षैश्च सकलैर् । ७. रा$_{2}$–०जग्मुश्च जग्धुश्च ॥ ८. रा$_{2}$ भ–विषण्णं च । म–विवर्णं तु ॥ ९. ल$_{2}$–सर्वं शल्यं स० । म–शत्रुं शल्यमिवोद्धरन् ॥ १०. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ–ऋक्षां० । ११. रा$_{2}$ म–निष्क्रम्य । १२. रा$_{2}$ म–स वीर्यवान् ॥ १३. रा –०करवः । १४. म–रक्तांजनचयः ॥ १५. रा$_{2}$ म भ–नास्ति । १६. रा$_{2}$ म भ–काले । १७. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–आलोह दु० । १८. रा$_{1}$–पराक्रमं ॥ १९. रा$_{2}$ म–रक्षसां तान्यनी० ।

१८] चचार[1] बहु-धा[2] मार्गान् राक्षसेषु महा-बलः[3] ॥१९॥ [N
कुर्वाणं कदनं दृष्ट्वा हनू-मन्तं कपिं तदा ।[4]
१९] परि-वव्रुः सहस्राणि राक्षसानां समन्त-तः[5] ॥२०॥ [२०
२०पू] शित-शूल-धराः शूलैर्[6] असिभिश् चाऽसि-पाणयः[6] ।
N] शक्तिभिः शक्ति-हस्ताश् च पट्टिसैः[7] पट्टिसाऽऽयुधाः[8] ॥[9]२१॥ [२१
परि-घैश् च गदाभिश्[9] च चक्रैश् च शुभ-दर्शनैः[9] ।[10]
२१] शत-शश् च शत-घ्नीभिर् आयसैश् चाऽपि मुद्गरैः ॥२२॥ [२२
२०उ] घोरैः परशुभिस् तीक्ष्णैर् भिण्डि-पालैश् च राक्षसाः ।[11]
अभि-जघ्नुः[12] समा-साद्य सम्-अन्तात् पर्वतोत्तमम् ॥२३॥ [२३
२३] तेषाम् अपि च सं-क्रुद्धश् चकार कदनं कपिः । [२४
उद्-यम्य चैव वृक्षांश् च शिलाश्[13] चैव सु-दारुणाः[13] ॥[14]२४॥ [N
२४] जघान पञ्च सप्ताऽथ दश चाऽष्टौ तथैव च ।
विंशतिं चैकविंशं[15] च[15] दण्ड-हस्त इवाऽन्त-कः ॥२५[16]॥ [N
२५] तम् अपश्यत् कपि-श्रेष्ठम् अचलोपमम्[17] इन्द्र-जित् ।
सूदयन्तम् अमित्र-घ्नं सम्-अरे मारुताऽऽत्मजम् ॥२६॥ [२५
२६] स सारथिम् उवाचेदम् अभि-याहि[18] महा-कपिम् ।
क्षयम् एष हि नः कुर्याद् राक्षसानाम् उपेक्षितः ॥२७॥ [२६

---

१. रा$_1$ प्र–चचाल । म भ–चकार । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–वसुधा । रा$_2$ म–महतो । ३. रा$_2$ म–महाकपिः ॥ ४. रा$_2$ म–विध्वंसयंस्तुतरसा राक्षसान् मारुता-ऽऽत्मजः । ५. भ– ततस्ततः ॥ ६. अ–०भिश् चापि मुद्गरैः । रा$_2$ म–शखैः शक्तिभिश्चापि मुद्गरैः । ७. रा$_1$ फ म–०शैः पट्टिशा० । ८. अ–नास्ति ॥ ९. रा$_2$ म–भुशुंडीभिश्च-क्रैश्चक्ररथैरपि । १०. अतः परमधिकः पाठः—म–परश्वधैर्धनुर्भिश्च गदाभिर्मार्ग-णैरपि ॥ ११. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ म–सालैरशनि-कल्पैश्च तालैर्वज्रसमैस्तथा । नखैर्दन्तैश्च वीराणां संयुगे जयमिच्छताम् ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–०जग्मुः ॥ १३. प्र भ–शिलाखण्डांश्च दारुणान् । १४. रा$_2$ म–नास्ति ॥ १५. भ–त्रिंशतं चैव । १६ रा$_2$ म–नास्ति । अतः परमधिकः पाठः—भ–वृक्षघाताभिघातैश्च घातयन् पवनात्मजः । रथान्बभंज तरसा गजेन्द्रांश्चाप्यपातयत् ॥ पदातिहयसाहस्रान् ममर्द प्रममाथ च । मुष्टि-भिर्निहताः केचित्तलैश्चाभिहतास्तथा ॥ तरुवेगाभिपतिता राक्षसाश्च समन्ततः । तदनीकं महाव्यूहं गजाश्वरथसंकुलम् ॥ राक्षसेन्द्रात्मजबलमभेद्यं कर्मसिद्धये । तच्छिदार्य महावेगो हनूमान् दृढविक्रमः । प्रविश्य होमभूमिं तु व्यध्वंसयत वीर्यवान् ॥ १७. रा$_2$ म–अनिलात्मजम् ॥ १८. भ–अनुयाहि ॥

२७] इत्य् उक्तः सारथिस्[1] तेन[1] प्र-ययौ[2] यत्र मारुतिः[3] ।
वहन् परम-दुर्धर्षं स्थितम् इन्द्र-जितं रथे[3] ॥२८॥ [२७
२८] सोऽभि-पत्य[4] कपिं खड्ग-शूल-प्राऽऽस-परश्वधान् ।
अपातयत् सु-दुर्धर्षो रावणिः कपि-मूर्धनि ॥२९॥ [२८
२९] तानि शस्त्राणि[5] घोराणि परि-गृह्य स मारुतिः ।
रोषेण महताऽऽविष्टो[6] वाक्यम् एतद् उवाच ह ॥३०[7]॥ [२९
३०] युध्यस्व यदि[8] शूरोऽसि रावणाऽऽत्मज दुर्-मते ।
वायु-पुत्रं समा-साद्य न जीवन् प्रति-यास्यसि ॥३१॥ [३०
३१] बाहुभ्यां प्रति-युध्यस्व[9] यदि मे द्वन्द्वम् आ-गतः ।
न[10] मां सहसि[10] दुर्-बुद्धे ततस् त्वं रक्षसां वर ॥३२॥[11] [३१
३२] हनू-मन्तं जिघांसन्तं समुद्यत-शराऽऽसनम् ।[12]
३३उ] रावणाऽऽत्मजम् आऽचष्ट लक्ष्मणाय वि-भीषणः ॥३३॥ [३२
यस्[13] तु[13] वासव-निर्जेता रावणस्याऽऽत्म-संभवः ।
३४] स एष रथम् आ-स्थाय हनू-मन्तं जिघांसति ॥३४॥ [३३
तम् अप्रतिम-संस्थानं शरैर् देह-विदारणैः ।
३५] जीविताऽन्त-करैर् घोरैः सौमित्रे जहि रावणिम् ॥३५[14]॥ [३४
इत्य् एवम् उक्तस् तु वि-भीषणेन[15]
रामाऽनुजः[16] शत्रु-विभीषणेन[16] ।
ददर्श तं पर्वत-सन्निकाशं
N] रथे स्थितं भीम-रवं[17] नदन्तम् ॥३६॥ [३५

इत्यार्षे रामायणे युद्ध-काण्डे[18] बलि-विध्वंसनं[19] नाम चतुःषष्टितमः सर्गः ॥६४॥

---

१. प्र—तेन वीरेण । २. रा$_2$ म—रथेनाभिययौ कपिं ॥ ३. भ—वर्जं—रणे ॥ ४. प्र रा$_2$ म भ—सोभ्युपेत्य ॥ ५. प्र भ—चास्त्राणि । ६. भ—परमाविष्टो । ७. रा$_2$ म—अत आरभ्य ३२-शश्लोकं यावन्नास्ति ॥ ८. अ—युधि ॥ ९ अ भ—सम्प्रयु० । १०. भ—वेगं सहस्व ॥ ११. अतः परमधिकः पाठः—भ—इत्युक्त्वा हनूमान्क्रुद्धो योधयामास वेगितः । अश्वकर्णैर्धवैः शालैरन्यैश्च विविधैर्द्रुमैः ॥ अप्राप्तानेव तान् वृक्षान् शरैः शतसहस्रशः । क्रोधादकृन्त चैकैकं तं च विव्याध रावणिः ॥ १२. अतः परमधिकः पाठः—म भ—आक्षेपोद्धूतसर्वांगं भ्रूकुटीकुटिलाननम् ॥ १३. रा$_2$ म—योऽसौ । भ—यः स ॥ १४. रा$_2$ म—तमप्रतिमकर्माणं शितैः शत्रुविनाशनैः । सौमित्रे वारयन् शत्रुमभिवर्ष शरोत्तमैः ॥ १५. रा$_2$ म—तदा महात्मा । १६. प्र—०जः सोऽथ वि० । रा$_2$ म—विभीषणेनारिविभीषणेन । भ—०जः सोऽरिवि० । १७. ल$_1$ ल$_2$ ब प्र—भीमस्वरं । म भ—भीमबलं ॥ १८. ब प्र भ—लंकाकांडे । १९. रा$_2$—इन्द्रजिद्दर्शनं । भ—इन्द्रजिद्वधो ॥

एवम्[1] उक्त्वा तु[1] सौमित्रिं त्वरमाणो वि-भीषणः ।
१] उपाऽऽययौ धनुष्-पाणिर् लक्ष्मणं रावणाऽनुजः ॥[2] १॥[१
अ-विदूरं ततो गत्वा प्र-विश्य च महद् बलम् ।
२] दर्शयामास तत् कर्म लक्ष्मणाय वि-भीषणः ॥ २॥[2][२
नील-जीमूत-संकाशं न्यग्रोध-वरम्[3] आ-श्रितम् ।
३] तेजस्वी रावण-भ्राता लक्ष्मणाय न्य्-अवेदयत् ॥ ३॥[३
इहोप-हारं भूतानां बल-वान्[4] रावणाऽऽत्मजः ।
४] उप-हृत्य ततः पश्चात् सं-ग्रामम् अभि-वर्तते ॥[5] ४॥[४
अ-दृश्यः सर्व-भूतानां[4] काम-गेन[6] रथेन च[6] ।
५] नि-हन्ति सम्-अरे शत्रून्[7] बध्नाति च शरोत्तमैः[7] ॥ ५॥[7][५
तम् अ-प्रविष्टन्यग्रोधम् इमं[8] त्वं[8] रावणाऽऽत्मजम् ।
६] वि-ध्वंसय शरैस् तीक्ष्णैः स-रथं साऽश्वसारथिम् ॥ ६॥[9][६
तथेत्य् उक्त्वा महा-तेजाः सुमित्राऽऽनन्दवर्धनः ।
७] बभूवाऽव-स्थितस् तत्र चित्रं वि-स्फारयन् धनुः ॥ ७॥[७
स[10] रथेनाऽग्नि-वर्णेन[10] बल-वान् रावणाऽऽत्मजः ।
८] इन्द्र-जित् कवची धन्वी[11] स-ध्वजः प्रत्य्-अदृश्यत ॥८[12]॥[८
लक्ष्मणस् तम् उवाचेदं[13] रावणिं युद्ध-दुर्मदम्[14] ।
९] तिष्ठ[15] राक्षस दुर्-बुद्धे रणे[15] युद्धं प्र-यच्छ मे ॥ ९॥[९
एवम् उक्तो महा-तेजा[16] मनस्वी[16] रावणाऽऽत्मजः ।

---

१. रा$_2$ म—स एवमुक्त्वा । २. ब म—नास्ति ॥ ३. अ प्र रा$_2$ म भ—०धद्वारम् ॥ ४. प्र—नास्ति । ५. म—नास्ति ॥ ६. रा$_2$—ततो भवति राक्षसः । ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—शत्रुर्भाति च सुरोत्तमान् ॥ ८. म—अमित्रं । ९ प्र—नास्ति ॥ १०. रा$_2$ म—रथेनादित्यव० । ११. रा$_2$ म—खड्गी । १२. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ—विभीषणवचः श्रुत्वा सौमित्रिपवनात्मजौ । भृशं जहर्षतुस्तत्र दृष्ट्वा तं रिपुमाहवे ॥ अत्रांतरे च हनुमान्वीरं लक्ष्मणमब्रवीत् । रथस्थोऽयं तवारातिः पदस्थस्त्वं च लक्ष्मण ॥ नैतद्युक्तं समं युद्धं मम पृष्ठं त्वमारुह । इति श्रुत्वा वचस्तस्य तथा चक्रे स लक्ष्मणः ॥ महापर्वतसंकाशमैरावणसमप्रभम् । समास्थाय महातेजा वटं कृत्वा तु पृष्ठतः ॥ १३. रा म—उवाचाथ । १४. रा$_2$—रघुनंदनः । म—समितिंजयः । १५. रा$_2$ म—त्वामाह्वयेहं समरे सौम्य ॥ १६. रा$_2$ म—महाराजः समरे ।

१०] अब्रवीत् परुषं वाक्यं तत्र दृष्ट्वा वि-भीषणम् ॥१०॥[1] [१०
इह त्वं जातः (? ता) सं-वृद्धः साक्षाद् भ्राता पितुर् मम ।
११] कथं द्रुह्यसि[2] पुत्राय[2] पितृव्यो मम राक्षस ॥११॥ [११
न ज्ञाति-त्वं न सायुज्यं न जातिस् तव दुर्-मते ।
१२] प्र-माणं न च सोदर्यं[3] न धर्मो धर्म-दूषक ॥१२॥ [१२
शोच्यस् त्वम् असि दुर्-बुद्धे निन्दनीयोऽसि[4] साधुभिः ।
१३] यस् त्वं जातिं समुत्-सृज्य पर-भृत्यत्वम् आ-स्थितः[5] ॥१३॥ [१३
नैतच् छिथिलया बुद्ध्या त्वं वेत्सि महद् अन्तरम् ।
१४] क्व[6] च[6] स्व-जन-संवासः क्व च नीच (? चः) पराऽऽश्रयः[7] ॥१४॥ [१४
गुण-वान् वा पर-जनः स्व-जनो[8] वाऽपि[8] निर्-गुणः ।
१५] निर्-गुणः स्व-जनः श्रेयान् यः परः पर एव सः ॥१५॥ [१५
निरनुक्रोश-ता चेयं यादृशी ते निशा-चर ।
१६] स्व-जने न त्वया शक्यं (? क्या) प्रति-ष्ठा न[9] सुखानि च ॥[10] १६॥ [१६
नूनं निर्-वासितो लंकां दिदृक्षसि वि-शीर्य ताम् ।
N] कामयेत्[11] पुरुषः कान्तां शूरस्यांऽक-गताम् इव ॥१७॥[12] [N
यदि त्वं परुषाण्य्[13] उक्तः[13] पित्रा मम निशा-चर ।[14]
१७] गौरवात् प्र-श्रयाद् वाऽपि तथैव परि-सान्त्वितः ॥१८॥ [N
यथैव प्र-णयाद् वाऽपि गुरुर् वदति वि-प्रियम् ।
१८] तथैव च पुनस् तं[15] स[15] लालयत्य्[16] अ-विचारयन् ॥१९॥ [N
क्रुद्धेनेन्द्र-जिता वाक्यं परुषं[17] रावणाऽनुजः[17] । [N
२१] उक्तः पितृव्यः पुत्रेण प्रत्य्-उवाच वि-भीषणः ॥२०॥ [२०
अ-जानन्न् इव मच्-छीलं किं त्वम् एवं ब्रवीषि माम् ।

---

१. अतः परमधिकः पाठः—रा$_2$-छलाद्वापि बलाद्वापि यत्कुर्याद्रघुनन्दनः । तत्सर्वमुपपद्येत न्याय्यमस्मासु दुर्मते ॥ आबाल्याच्च मया पित्रा राक्षसैर्वापि विप्रियम् । किं कृतं शठ यच्छिद्रे प्रहरस्यात्मजे मयि ॥ न जातिधर्मो न कुलं न भ्रातृत्वं न बन्धुता । रक्षितं नैव शूरत्वं क्लीबत्वं प्रकटीकृतम् ॥ २. रा$_2$ म—द्रक्ष्यसि पुत्रस्य ॥ ३. रा$_2$ म—सौहार्दं ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ म—०नीयश्च । ५. ल$_1$ ल$_2$ ब रा$_2$ म—आगतः । भ—आश्रितः ॥ ६. म—क्वचित् । ७. प्र—समाश्रयः ॥ ८. भ—०नोऽपि च ॥ ९. प्र—वा । १०. म—नास्ति ॥ ११. भ—कामीव । १२. रा$_2$ म—नास्ति ॥ १३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—तु रुषा त्यक्तः । १४. म—नास्ति ॥ १५. प्र—बालं । रा$_2$ म—मूढ । भ—मूर्खं । १६. रा$_2$ म—लाडयति ॥ १७. रा$_2$—अत आरभ्य २१—शश्लोकस्य तृतीयपादं यावन्नास्ति ॥

२२] राक्षसाऽधिपतेः पुत्र परुषं त्यक्त-गौरवम् ॥२१[१]॥ [२१
अ-युक्तरूपं[२] वचनं[२] पौलस्त्य-कुल-पांसन[३] ।[१]
२३] अ-धर्मेण हत-ज्ञानो[४] न वेत्सि त्वं गुणाऽगुणान् ॥२२॥ [N
कुले यद्य्-अपि जातोऽहं रक्षसां[५] क्रूर-कर्मणाम् ।
२४] गुणो यः प्रथमो नृणां तन् मे शीलम् अ-राक्षसम् ॥२३॥ [२२
सं-त्यक्तो[६] दारुणेनाऽहं[७] राज्ञा[७] वै[८] क्रूर-कर्मणा[८] ।
२५] भ्रात्रा विषय-शीलेन कथं रंस्ये[९] दुर्-आत्मना[९] ॥२४॥[१०] [२३
हरणं च पर-स्वानां परदाराऽभिमर्षणम्[११] ।
२६] सु-हृदाम्[११] अभि-शंका च त्रयो दोषाः[१२] क्षयाऽऽवहाः ॥२५॥ [२६
महर्षीणां भयं[१३] घोरं[१३] सर्व-देवैश् च वि-ग्रहः ।
२७] अभि-मानश्[१४] च रूपं च ह्य् ऐश्वर्य[१४] प्रति-कूलता ॥२६॥ [२७
एते दोषास् तव पितुर् जीवितैश्वर्यनाशकाः ।[१५]
२८] गुणान् प्राऽच्छादयंस् तस्य पर्वतान् इव तोय-दाः ॥[१६]२७॥[२८
एतैर्[१७] दोषैः परि-त्यक्तो मया भ्राता पिता तव ।
२९] न[१८] च मे स्व-पुरी[१८] लंका न च त्वं न च ते पिता ॥२८॥ [२९
अभि-मानी च दृप्तश् च दुर्-विनीतश् च राक्षसः (? स) ।
३०] त्वं[१९] काल-पाश-बद्धश् च[१९] ब्रूहि मा[२०] यद् यद् इच्छसि[२०] ॥२९॥ [३०
N] अन्-इष्टं व्य्-असनं प्राऽऽप्तः[२१] किम्-इव[२१] त्वं न वक्ष्यसि ।[२२]

---

१. म—नास्ति ॥ २. भ—०क्तं परुषं वाक्यं । ३. ल$_{1}$—०ने। ४. रा$_{2}$ म—हत० ॥ ५. रा$_{2}$—नास्ति ॥ ६ म भ—न रमे । ७. प्र भ—राज्येन । रा$_{2}$ म—न राज्ये । ८. रा$_{2}$ म—पापक० । ९. रा$_{2}$—भ्राता विवास्यते । म—भ्राता हि हन्यते । १०. अतः परमधिकः पाठः—रा$_{2}$ म—परोऽपि हितकृद्बन्धुर्बन्धुरप्यहितः परः। अहितो देहजो व्याधिर्हितमारण्यमौषधम् ॥ ११. रा$_{2}$—०मर्दनं। १२. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ—सुहृद्विवासनं चैव श्रियो देव्याः ॥ १३. रा$_{1}$ ल$_{2}$ ब अ प्र—महाघोरः। रा$_{2}$ म—त्रघो घोरः। १४. रा$_{2}$ म भ—क्रोधश्चैवाभिमानश्च वैरत्वं । भ—०मानश्च कोपश्च वैरत्वं ॥ १५ रा$_{2}$म—एतैर्दोषैर्मम भ्रातुर्जीवितैश्वर्यनाशनैः। १६. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र—नास्ति । म—गुणाः प्रच्छादिताः सर्वे पर्वतास्तोयदैरिव । १७. भ—एभिर् । १८. रा$_{2}$—नेयमास्ते पुरी । म—नैवमस्ति पुरी । भ—नेयमस्ति पुरी ॥ १९. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र भ—बद्धस्त्वं कालपाशेन । म—०पाशैर्बद्ध० । २०. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र—त्वं यदि जीवसि । भ—पुत्र यदिच्छसि ॥ २१. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र—प्राप्तं किमेवं । २२. अतः परमधिकः पाठः—रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र—गृह्यतामुद्यमो वाक्यैर्न च शक्नोऽभिधास्यति ।

प्र-वेष्टुं न त्वया शक्यो[1] न्यग्रोधो[1] राक्षसाऽधम ॥३०॥ [३१
३१] धर्षयित्वा च काकुत्स्थं न शक्यं जीवितुं त्वया ।
युध्यस्व नर-वीरेण[2] लक्ष्मणेन रणे सह ॥३१॥ [३२पू
३२] न त्वं प्र-वेक्ष्यसे लंकां कुतो न्यग्रोधम् एव च । [N
N] हतस् त्वं काल-पाशेन[3] गमिष्यसि यम-क्षयम् ।[4]३२॥[३२उ
नि-दर्शयस्वाऽऽत्म-बलं समुद्-यतः[5]
कुरुष्व सर्वाऽऽयुधसायक-क्षयम्[6] ।
न लक्ष्मणस्याऽति-शितैः[7] शरैः क्षतस्[8]
३३] त्वम् अद्य जीवन् स-गणो[9] गमिष्यसि ॥३३॥ [३३

इत्यार्षे रामायणे युद्ध-काण्डे इन्द्रजिद्-विभीषण-वाक्यं
नाम पञ्चषष्टितमः सर्गः ॥ ६५ ॥

[वं-६७]= [षट्षष्टितमः सर्गः] =[दा-८८]

विभीषण-वचः श्रुत्वा रावणिः क्रोध-मूर्च्छितः ।
१] अब्रवीत् परुषं वाक्यं वेगेनाऽभि-ससार च ॥ १[10]॥[१
उद्यताऽऽयुधनिस्त्रिंशे रथे वै सम्-अलंकृते ।
२] कालाऽश्व-युक्ते महति स्थितः कालाऽन्तकोपमः ॥ २॥[२
महा-प्रमाणम्[11] उद्-यम्य[11] विपुलं वेग-वद् दृढम् ।
३] धनुर् भीम-बलो भीमं शरांश् चाऽऽशीविषोपमान् ॥ ३॥[३
स सम्प्रेक्ष्य महा-बाहुर्[12] नीलाऽञ्जनचयोपमः । [N
N] रथ-स्थोऽलं-कृतः श्री-मान् रावणस्याऽऽत्म-जो बली ॥ ४[13]॥[४उ
उवाच चेदं सं-रब्धः सौमित्रिं स-विभीषणम् ।

---

१. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र भ-०क्यं न्यग्रोधं ॥ २. म भ-नरदेवेन ॥ ३. अ प्र-कालधर्मेण । ४. म भ-नास्ति ॥ ५. अ-०द्य तत । म भ-०यतं । ६. रा$_{2}$ म-०धसाधनव्ययं । ७. रा$_{2}$ म भ-०णस्यैत्य हि बाणगोचरं । ८. रा$_{2}$ म भ-सबलो ॥ .९ प्र ब भ-लंका० ॥ १०. अतः परमधिकः पाठः—रा$_{2}$-प्रागेव विश्वविजयी न निषिद्धः पिता मम । यदा यदा च रत्नानि भुवनेभ्योऽखिलान्यपि ॥ तदा त्वमपि रत्नानां भागभागभवः स्वयम् । निहतं वालिनं दृष्ट्वा सुग्रीवमभिषेचितम् ॥ त्वया तद्राज्यलुब्धेन दुरात्मन् समनुष्ठितम् । इत्युक्त्वा परुषं वाक्यं स्मयन्हेत्वर्थसंयुतम् ॥ ११ रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-०प्रासं समुद्यम्य ॥ १२. ल$_{1}$ ल$_{2}$ ब-महाधन्वी । १३. रा$_{2}$ म-नास्ति ॥

तांस्[1] च[1] वानर-शार्दूलान्[2] पश्यध्वं[3] मम वि-क्रमम्[3] ॥५ ॥[५
५] अथ मत्कार्मुकोत्सृष्टं शर-वर्षं दुर्-आसदम्[4] ।
६पू] मुक्तं वर्षम् इवाऽऽकाशे धारयिष्यथ सं-गरे[5] ॥६ ॥[६
७उ] अद्य[6] वो[6] मामका बाणा मत्-कार्मुक-विनिःसृताः ।
गात्राणि वि-धमिष्यन्ति तूल-राशिम् इवाऽनलः ॥७ ॥[७
८] तीक्ष्ण-सायक-निर्भिन्नान् भिण्डिपालाऽसिपट्टिशैः[7] ।
९पू] अद्यैव[8] वो नयिष्यामि[8] सर्वान् एव यम-क्षयम् ॥८ ॥[८
६उ] क्षिपतः[9] शर-जालानि तीक्ष्ण-हस्तस्य[9] सं-युगे ।
७पू] जीमूतस्येव नदतः कः स्थास्यति ममाऽग्र-तः ॥९ ॥[९
९उ] तच् छ्रुत्वा रावणेर्[10] वाक्यं गर्वितं[10] लक्ष्मणस् तदा ।
अभीत-वद् इदं[11] वाक्य क्रुद्धं राक्षसम् अब्रवीत्[11] ॥१०॥[१२
१०] न वाचा सु-गमः[12] पारः[12] कार्याणां राक्षसाऽधम ।
कार्याणां कर्मणा पारं यो गच्छति स बुद्धि-मान् ॥११॥[१३
११] स त्वम् अर्थस्य हीनाऽर्थं दुरवाऽऽपस्य[13] कस्य-चित्[14] ।
वाचा व्या-हृत्य जानीषे कृताऽर्थोऽस्मीऽति दुर्-मते ॥१२॥[१४
१२] अन्तर्धान-गतेनाऽहं[15] यत् त्वयाऽभि-हि (? ह) तो[16] रणे[16] ।
भास्कराऽन्तरितो[17] मार्गो नैव[18] शूर-निषेवितः[18] ॥१३॥[१५
१३] तद् आहव-पथे त्व् अद्य स्थितोऽहं तव राक्षस ।[19]
१४पू] दर्शयस्वाऽद्य[20] यत् तेजो[20] वाचा किं बहु[21] कत्थसे[21] ॥१४॥[१६
१६उ] एवम् उक्तो धनुर् भीमं परि-गृह्य[22] महा-बलः ।
वि-ससर्ज शितान् बाणान् इन्द्र-जित् समिति-जयः ॥१५॥[१७

---

१. रा$_1$ ल$_1$ ल$_2$ ब–हंहो । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०लाः । ३. रा$_2$ म भ–वीक्षध्वं मे पराक्रमं ॥ ४. रा$_2$–सुदुःसहं । म–सुदारुणम् । ५. रा$_2$ म भ–संयुगे ॥ ६. म–क्रुद्धा हि । भ–अद्यैव ॥ ७. भ–शितशूला० । ८. रा$_2$ भ–अद्य वो गमयि० । म–अद्य वेगान्नयि० ॥ ९. म–निक्षिप्य शर० । भ–सृजतः शरवर्षाणि क्षिप्रह० ॥ १०. भ–राक्षसेन्द्रस्य गर्जितं । ११. रा$_2$–सुसंक्रुद्धो राक्षसं वाक्यमब्रवीत् । म–सुसंक्रुद्धो राक्षसं तमथाब्रवीत् । भ–सुसंक्रुद्धो रावणिं वाक्यमब्रवीत् ॥ १२. प्र रा$_2$ म– ०मं पारं ॥ १३. म–दुरावा० । १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ भ–केनचित् ॥ १५. रा$_2$ म भ–०नावां । १६. रा$_2$–०भिहतौ रणे । म–०निहितौ रणे । भ–त्वया छलितौ तदा । १७. रा$_2$ म भ–तस्कराचरितो । १८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$–न शूरस्य नि० ॥ १९. रा$_2$ भ–यदि बाणपथं प्राप्य युध्यसे राक्षसोत्तम । २०. भ–द्रक्ष्यामः समरे वीर्यं । २१. भ–त्वं विक० ॥ २२. रा$_2$ म भ–परामृश्य ॥

१७] तेनोत्-सृष्टा[1] बल-वता शराः[2] सर्पविषोपमाः[2] ।
सम्प्राऽऽप्य लक्ष्मणं पेतुः श्वसन्त इव पन्न-गाः ॥१६॥ [१८
१८] शरैर् अति-महा-वेगैर्[3] वेग-वान् राक्षसोत्तमः ।
सौमित्रिम् इन्द्र-जिद् युद्धे विव्याध शुभ-लक्षणम्[4] ॥१७॥ [१९
१९] स[5] शरैर् अपविद्धाऽङ्गो[5] रुधिरेण सम्-उक्षितः[6] ।
शुशुभे लक्ष्मणः श्री-मान् वि-धूम इव पावकः ॥१८॥ [२०
२०] इन्द्र-जिच्[7] चाऽऽत्मनः[7] कर्म प्र-शशंसाऽथ[8] राक्षसः[8] ।
वि-नद्य च महा-नादम् इदं वचनम् अब्रवीत् ॥१९॥ [२१
२१] अद्य मत्कार्मुकोत्सृष्टाः शरास् तीक्ष्णाः सु-पत्रिणः[9] ।[10]
आ-दास्यन्ति शरीरात् ते जीवितं जीवित-च्छिदः ॥२०॥ [२२
२२] अद्य गोमायु-संघाश् च श्येन-संघाश् च लक्ष्मण ।
गृध्राश् चाऽपि पतन्तु त्वां गताऽसुं पतितं[11] भुवि[11] ॥२१॥ [२३
२३] क्षत्र-बन्धुः सु-दुष्टाऽऽत्मा[12] रामः परम-दुर्मतिः ।
भक्तं भ्रातरम् अद्य त्वां द्रक्ष्यतीऽह[13] मया हतम् ॥२२॥ [२५
२४] स-सायक-करो[14] भूमौ स-तूणः[15] स-शराऽऽसनः[15] ।
कृत्तोत्तमाऽङ्गः पतितः[16] स्वप्स्यसे त्वं मया हतः ॥२३॥ [२६
२५] इति ब्रुवाणं परुषं राक्षसं[17] रावणाऽऽत्मजम् ।
साऽर्थं[18] च हेतु-मद् वाक्यं[18] लक्ष्मणः प्रत्य्-उवाच ह ॥२४॥ [२७
२६] अ-कृत्वा कत्थसे कर्म किम्-अर्थम् इह राक्षस ।
कुरु तत् कर्म येनाऽहं श्रद्-दध्यां तव[19] जल्पितम्[19] ॥२५॥ [२९
२७] अ-ब्रुवाणस्[20] तु कर्माणि[20] यः[21] करोति स पण्डितः[21] ।

---

१. रा$_2$ फ–तदोत्० । २. रा$_2$ फ–०रास्तीक्ष्णा वि० ॥ ३. भ–०महाकायैर् । ४. म–०लक्ष्मणं ॥ ५. म–स शरौघैश्च वि० । भ–शरौघेण स वि० । ६. रा$_2$ फ–च भूषितः ॥ ७. रा$_2$ फ म भ–०जिरवात्मनः । ८. भ–सुसमीक्ष्याभियुज्य च ॥ ९. प्र–सुयंत्रिताः । १०. भ–पत्रिणः शितधारास्ते शरा मत्कार्मुकच्युताः ॥ ११. रा$_2$ फ म भ–निहतं मया ॥ १२. रा$_2$ म भ–स दु० । १३. भ–न द्रक्ष्यति ॥ १४. रा$_2$ फ म–अपास्तकवचो । भ–विशस्त्रकवचो । १५. रा$_2$ फ म भ–व्यपविद्धश० । १६. रा$_2$ फ म भ–व्यथितः ॥ १७. भ–अमर्षाद् । १८. रा$_2$ फ–हेतुमद्वाक्यमन्वर्थं । म–हेतुमद्वाक्यमत्यर्थं । भ–हेतुमद्वाहकं वाक्यं ॥ १९. रा$_2$ फ म–तव कत्थितम् । भ–कथितं त्वया ॥ २०. रा$_2$ फ–अब्रुवन्परुषं वाक्यं । म–०णस्तु परुषं । भ–अनुक्त्वा परुषं वाक्यं । २१. रा$_2$ फ म भ–किंचिदप्यनधिक्षिपन् ।

अ-विकत्थ्य[1] हनिष्यामि[2] त्वाम्[3] अद्य पुरुषाऽऽदकम्[3] ॥२६[4]॥[३०

२८] इत्य् उक्त्वाऽमर-बाणानाम् एकम् आ-कृष्य वै धनुः ।[5]

विक्षेप[6] नि-शितं वेगाल्[6] लक्ष्मणो राक्षसोरसि[7] ॥२७[8]॥[३१

२९] स शरेण[9] हतस्[9] तेन राक्षसो[10] रावणाऽऽत्मजः ।

सु-प्रमुक्तैस्[11] त्रिभिर् बाणैः प्रति-विव्याध लक्ष्मणम् ॥२८॥ [३३

३०] स बभूव[12] महा-भीमो[12] नर-राक्षस-सिंहयोः[13] ।

वि-मर्दस् तुमुलो घोरः[14] परस्परवधैषिणोः[15] ॥२९॥ [३४

३१] उभौ तौ बल-सम्पन्नाव् उभौ विक्रम-शालिनौ ।

N] उभाव् अपि च वि-क्रान्ताव्[16] उभौ शस्त्राऽस्त्र-वेदिनौ[16] ॥३०[17]॥[३५

३२पू] उभौ परम-दुर्धर्षाव् उभौ परम-तेजसौ ।

N] युयुधाते महा-वीर्यौ ग्रहाव् इव नभो-गतौ ॥३१॥ [३६

N] बलि-शक्राव्[18] इवाऽऽयस्तौ[18] युधि दुष्प्रति-धर्षणौ ।

३२उ] युयुधाते महाऽऽत्मानौ व्याघ्र-केसरिणाव् इव ॥३२॥ [३७

शितान्[19] अव-सृजन्तौ हि मार्गणौघान् अव-स्थितौ ।

३३] नर-राक्षस-सिंहौ तौ सम्प्र-हृष्टाव् अयुध्यताम् ॥३३॥ [३८

सु-सम्प्रहृष्टौ नर-राक्षसौ तदा[20] [३९पू[1]

शराऽभिचण्डौ शित-शस्त्र-धारिणौ[21] । [४०पू[2]

---

१. रा$_1$ ल$_1$ ल$_2$ ब—शीघ्रमद्य । अ—शीघ्रमेव । २. रा$_2$ फ म—वधिष्यामि । ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—०द्य क्षणदाचर । रा$_2$ फ म भ—त्वं पश्य पुरुषान्तक । ४. अतः परमधिकः पाठः—रा$_2$ फ म भ—अब्रुवाणो दहत्यग्निस्तथा तपति भास्करः । वायुश्चोन्मथते वृक्षान् न च किंचिद्विकत्थते ॥ ५. प्र—०बाणानामाकर्णात्पूरितं धनुः । रा$_2$ फ म—इत्युक्त्वा पंचपर्वाणमाकर्णात्पूरितं शरं । भ—इत्युक्त्वा पंच नाराचान्कर्णपूरिताञ्छितान् । ६. रा$_2$ फ—निचखान महावेगं । म—निचखान महावेगो । भ—निचखान महावेगांल् । ७. रा$_2$ फ म—रावणात्मजे । ८. अतः परमधिकः पाठः—म भ—सुपत्रराजिता बाणा ज्वलिता इव पन्नगाः । नैर्ऋतोरस्यभासन्त सवितू रश्मयो यथा ॥ ९. रा$_2$ फ म—०रेणाह० । भ—शरैराह० । १०. रा$_2$ फ म भ—सरोषो । ११. भ—सुपर्वभिस् ॥ १२. रा$_2$ फ म—बभौ सुम० । १३. रा$_1$ ल$_1$ ल$_2$ ब अ—हरिरा० । म—०सयोस्तयोः । १४. म—भीमः । १५. ल$_2$ म भ—०रजयैषिणोः ॥ १६. प्र—०न्तौ सर्वशास्त्रार्थकोविदौ । रा$_2$ फ—०न्तौ सर्वशस्त्रास्त्रकोविदौ । म—०न्तौ सर्वशास्त्रविशारदौ । १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—अतः परं ६७-तमसर्गस्याष्टमश्लोकस्य पूर्वार्धं यावन्नास्ति ॥ १८. फ भ—शक्रवृत्राविवापन्नौ ॥ १९. फ भ—बहून् ॥ २०. रा$_2$ म—तौ । २१. रा$_2$ म—०स्त्रपाणी ।

अभीऽऽक्ष्णम् अन्योऽन्यम् उभाव्[१] अवर्षताम्[१] [४०उ[१]
N] शरौघ-वर्षेण[२] बलाहकौ यथा ॥३४॥ [३९उ[२]

इत्यार्षे रामायणे युद्ध-काण्डे[३] आक्षेप-युद्धं[४] नाम
षट्षष्टितमः सर्गः ॥ ६६ ॥

[वं–६८]= [सप्तषष्टितमः सर्गः] =[दा–८९]

ततः शरं दाशरथिः स-धायाऽमित्र-कर्षणः ।
१] ससर्ज राक्षसेन्द्राय[५] क्रुद्धः सर्प इव श्वसन्[५] ॥ १॥ [१
तस्य ज्या-तल-निर्घोषम् अ-सहन रावणाऽऽत्मजः ।[६]
२] विवर्ण-वदनो भूत्वा समुद्-ऐक्षत लक्ष्मणम् ॥ २॥ [२
तं विषण्ण-मुखं दृष्ट्वा राक्षसं रावणाऽऽत्मजम् ।
३] सौमित्रिं युद्ध-संसक्तम् इत्य् उवाच वि-भीषणः ॥ ३[७]॥[३
इङ्गितान्य् अनु-पश्यामि यान्य् अस्मिन् रावणाऽऽत्मजे ।
४] त्वरस्व नर-शार्दूल भग्न एष[८] निशा-चरः ॥ ४॥ [४
ततः सं-धाय सौमित्रिः शरान् आशीविषोपमान्[९] ।
५] मुमोच नि-शितांस् तस्मै सर्पान् इव महा-विषान् ॥ ५॥ [५
शक्राऽशनि-सम-स्पर्शैर्[१०] लक्ष्मणेनाऽऽहतः शरैः ।
६] मुहूर्तम् अभवन् मूढः शक्र-जित्[११] क्षुभितेन्द्रियः[११] ॥ ६॥ [६
उप-लभ्य मुहूर्तेन सं-ज्ञां प्रत्यागतेन्द्रियः ।
७] ददर्शाऽव-स्थितं वीरम् आजौ[१२] दशरथाऽऽत्मजम् ॥ ७॥ [७
सोऽभि-चक्राम सौमित्रिं रोष-रक्ताऽन्त-लोचनः[१३] ।
८] अब्रवीच चैनम् आ-साद्य पुनः स परुषं वचः ॥ ८॥ [८
९पू] किं न स्मरसि तद् युद्धे प्रथमे[१४] मत् पराऽऽक्रमम् ।[१५] [९पू
युवां खलु मया युद्धे[१४] वज्राऽशनि-समैः शरैः ॥ ९॥

---

१. रा$_2$ म–अभिप्रपेततु । २. रा$_2$ म–०घवेगेन ॥ ३. फ भ–लंकाकांडे । ४. फ–अवक्षेपयुद्धं ॥ ५. रा$_2$ फ म–०से घोरे क्रुद्धानाशीविषोपमान् ॥ ६. रा$_2$ फ म–नास्ति ॥ ७. रा$_2$ फ म–नास्ति ॥ ८. रा$_2$ फ म–सैष ॥ ९. रा$_2$ फ म–अग्निसिखोपमान् ॥ १०. रा$_2$ फ म–स इन्द्राशनिसंस्पर्शैर् । ११. रा फ म–तदा संक्षुभि० ॥ १२. रा$_2$ फ म–अग्रे ॥ १३. रा$_2$ फ म–क्रोधसं० ॥ १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–नास्ति । १५. अतः परमधिकः पाठः—भ–निरस्तस्त्वं सह भ्रात्रा यदा पांशुष्वचेष्टथाः ॥

१०] शायितौ रथौ[1] मया[1] भूमौ वि-संज्ञौ स-पुरः-शरौ[2] ।
स्मृतिर् वा[3] नाऽस्ति ते[4] मन्ये सु-व्यक्तं यम-सादनम्[4] । [१०
११] गन्तुम् इच्छसि येन त्वं मां योधयितुम् इच्छसि ॥[5]१०[6]॥ [११
यदि ते प्रथमे युद्धे न दृष्टो मत्-पराऽऽक्रमः ।
१२] अद्य ते[7] दर्शयिष्यामि तिष्ठेदानीं स्थिरो[8] भव[8] ॥११॥ [१२
इत्य्[9] उक्त्वा सप्तभिर्[9] बाणैर् अभि-विव्याध[10] लक्ष्मणम् ।
१३] दशभिश् च हनू-मन्तं तीक्ष्ण-धारैः शरोत्तमैः ॥१२॥ [१३
ततः शर-शतेनैव[11] वि-प्रमुक्तेन वीर्य-वान्[11] ।
१४] क्रोधाद्[12] द्विगुण-संरम्भो[12] निर्-बिभेद वि-भीषणम् ॥१३॥ [१४
स[13] दृष्ट्वा राक्षसेन्द्रस्य कर्म[13] रामाऽनुजस् तदा ।
१५] चिन्तयित्वा[14] प्र-हसन् वै[15] न[15] किं-चिद् इति स ब्रुवन्[15] ॥१४॥
अब्रवीद् वचनं घोरम् उद्-यम्य नर-पुंगवः ।[16] [१५
१६] अ-भीतवद् अ-संरब्धो रावणिं लक्ष्मणो युधि ॥१५॥
नैवं शूरा रणे गत्वा प्र-हरन्ति निशा-चर ।[17] [१६
१७] लघवः स्वल्प-वीर्याश् च शरा हेम-मुखास् तव ॥[18]१६॥
नैवं शूरा वि-युध्यन्ते युद्धे विजय-कांक्षिणः ।
१८] इत्य्[19] एवम् उक्त्वा वचनं[19] शरैर् एनम्[20] अवाऽकिरत्[20] ॥१७॥ [१७
तस्य बाणैर् अप-ध्वस्तं कवचं काञ्चनं महत् ।
१९] व्य्-अशीर्यत[21] च निर्-मेघे[21] तारा-जालम् इवाऽम्बरे ॥१८॥ [१८
विध्वस्त-वर्मा[22] नाराचैर् बभूव स कृत-व्रणः ।

---

१. रा$_2$ फ म–प्रथमं । रा$_1$ ल$_1$ ल$_2$ ब अ प्र–तौ मया । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–सपुरस्सरौ । ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र म–ते । ४. रा$_1$ ल$_1$ ल$_2$ ब अ–तेनाद्य गमिष्यसि यमक्षयं । प्र–तद् व्यक्तं गमिष्यसि यमक्षयं । ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–नास्ति । ६. रा$_2$–नास्ति ॥ ७. भ–त्वां । ८. भ–ममाग्रतः ॥ ९. म–महाकायं त्रिभिर् । १०. म–विव्याध स हि ॥ ११. रा फ–०नैव सुप्रयुक्तेन वी० । भ–शरसहस्रेण क्षिप्रहस्तो निशाचरः । म–०नैव सुप्रयुक्तेन राक्षसः । १२. ल$_1$ ल$_2$ ब–०संरब्धो । भ–०णरक्ताक्षो । म–संरब्धो बाणजालेन ॥ १३. भ–तद्दृष्ट्वेन्द्रजिता कर्म कृतं । १४. भ–अचिन्तयित्वा व्यहसन् । रा फ म–अचिन्तयित्वा प्रहसन् । १५. रा फ भ–नैतत्किंचिदिति । म–निर्बिभेद शितैः शरैः ॥ १६. भ–अब्रवीत्तु शरान्घोरानुत्कृत्य रघुपुंगवः ॥ १७. म–नास्ति । १८. म भ–लघवश्चाल्पवीर्याश्च शरा हीमे यथा तव ॥ १९. भ–एवमुक्त्वा ततो वीरः । म–एवमुक्त्वा रघुसिंहः । २०. भ–भृशमताडयत् ॥ २१. भ–व्यकीर्यत रथोपस्थे ॥ २२. रा$_2$–निकृत्तवर्मा । म–लक्ष्मणस्य तु । भ–विधूतव० ।

२०] इन्द्र-जित् सम्-अरे शूरः[1] प्र-रूढ इव सानु-मान्[1] ॥१९॥ [१९
अभीऽऽक्ष्णं नि-श्वसन्तौ हि[2] युध्यमानौ महा-रणे[2] ।
२१] शर-संवृत-सर्वाऽङ्गौ सर्व-तो रुधिरोक्षितौ ॥२०[3]॥[२२
बभूव रूपं सृजतोर् मार्गणान् भीम-कर्मणोः ।
२२] प्र-वृष्टयोर्[4] यथाऽऽकाशे[5] नीलयोः काल-मेघयोः ॥२१॥ [२५
२३पू] अस्त्राण्य् अस्त्र-विदां श्रेष्ठौ दर्शयन्तौ[6] पुनः[7] पुनः[7] ।[8]
२५उ] शरैर्[9] उच्चाऽवचाऽऽकारैर्[9] अन्तरिक्षे[10] प्र-जघ्नतुः[11] ॥२२॥ [२७
व्यपेत-दोषम् अन्योऽन्यं लघु चित्रं च सुष्ठु च ।
२६] दर्शयन्तौ बलं[12] भीमं[12] सं-ग्रामे नर-राक्षसौ ॥२३[13]॥[२८
२७पू] तयोः पृथक् पृथग् भीमः शुश्रुवे तल-निस्वनः[14] ।[15] [२९पू
२८उ] सु-घोरयोः शब्द-वतोर्[16] यथा वै काल-मेघयोः[16] ॥२४॥ [३०उ
N] सुवर्ण-पुंखैर् नाराचैर् बल-वन्तौ कृत-व्रणौ ।
२५पू] प्र-सुस्रुवाते रुधिरं जलं प्र-स्रवणाव् इव ॥२५[17]॥[३१
तयोस्[18] तु मुक्ता गात्रेषु[18] रुक्म-पुंखाः शरा[19] युधि[19] ।[20]
२९] असृग्-दिग्धा विनिर्-भिद्य[21] विविशुर् वसुधा-तलम्[22] ॥२६॥ [३२
अन्योऽन्यं नि-शिता बाणा आ-काशेऽप्य् अव-घट्टिताः ।[23]

---

१. भ–वीरः प्रफुल्ल इव किंशुकः ॥ २. म–नास्ति । भ–तौ प्रायुध्येतां महाबलौ । ३. अतः परमधिकः पाठः—भ–ततः शरौघान् विविधान्मुंचंतौ भीमविक्रमौ ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–प्रवृद्धयोर् । म–प्रावृट्काले । ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ–०काले ॥ ६. भ–विसृजन्तौ । ७. भ–परस्परं । ८. अतः परमधिकः पाठः—म भ–सुदीर्घकालं तौ वीरौ युध्यमानौ विरेजतुः । बभूवतुश्चात्मजये यत्तौ भीमपराक्रमौ ॥ तौ शरौघैस्तदा कीर्णौ निकृत्तकवचध्वजौ । ९. भ–शरानुच्चावचाकारान् । १०. भ–०रिक्षे । ११. म–च रुन्धतां । भ–निजघ्नतुः । (टि० भ–भिन्नेषु "प्रजघ्नतुः>मयंधनुः") इत्येवं विकारः ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ म–महाभीमे । १३. रा$_2$–नास्ति ॥ १४. फ–तत्र मि० । १५. रा$_2$–नास्ति । अतः परमधिकः पाठः—म भ–प्रकम्पजननो भीमो निर्घात इव दारुणः । बभ्राजे स तयोः शब्दस्तदा समरमत्तयोः । १६. रा$_1$ ल$_1$ ल$_2$ ब अ–०था वै कामपर्वयोः । भ–निस्तनतोर्गगने मेघयोरिव ॥ १७. भ–नास्ति ॥ १८. रा$_1$ ल$_1$ ल$_2$ ब प्र–प्रमुक्ताः शक्रजिद्गात्रे । भ–तयोर्महात्मनोः संख्ये । १९. म–शिताः शराः । २०. अ–नास्ति । २१. भ–विनिष्पेतुर् । २२. रा$_2$ फ म भ–धरणीतलं ॥ २३. रा$_2$ फ म–अन्ये तु विशिखा बाणा ह्याकाशे ज्यावघट्टिताः । भ–अन्योन्यं निशितैः शस्त्रैराकाशं संजिघट्टिरे ।

३०] बभञ्जुश्[1] चिच्छिदुश् चैव[1] तयोर् बाणाः सहस्र-शः ॥२७॥ [३३
सं-बभूवुः[2] सम्-अन्ताच्[3] च[3] तयोर् बाण-समाश्रयाः[4] ।
N] अग्निभ्याम् इव दीप्ताभ्यां यज्ञे[5] कुश-मयाश् चयाः[5] ॥२८॥ [३४
तयोः कृत-व्रणौ देहौ शुशुभाते महाऽऽत्मनोः ।
३१] स-पुष्पाव् इव निष्-पत्रौ[6] वने[7] शाल्मलि-किंशुकौ[7] ॥२९[8]॥[३५
तयोर् गात्रेषु सं-लग्ना भान्ति[9] नाराच-पंक्तयः ।
३२] नक्षत्र-पंक्तयो व्योम्नि वि-मले वै यथोदिताः ॥[10]३०॥[N
उभौ तौ परमेष्वासाव्[11] उभौ[11] शस्त्र-विशारदौ । [N
३३] तयोर्[12] बभूव तुमुलः सन्नि-पातो[12] मुहुर्-मुहुः ॥३१॥ [३६पू
लक्ष्मणो रावणिं युद्धे[13] रावणिश्[14] चाऽपि[14] लक्ष्मणम् ।
३४] अन्योऽन्यं तौ[15] विनि-घ्नन्तौ न ग्लानिं चाऽधि-गच्छतः[15] ॥३२॥[३७
बाण-जालैः शरीर-स्थैर् अव-गाढैस् तरस्विनौ ।
३५] शुशुभाते रण-गतौ[16] प्र-रूढाव् इव पर्वतौ[17] ॥३३॥ [३८
तयोः शोणित-दिग्धानि[18] सं-वृतानि[19] शरैर् भृशम्[19] ।
३६] वि-रेजुः[20] सर्व-गात्राणि[20] ज्वलितानीऽव पावकाः[21] (?कैः)॥३४॥[३९
तयोस्[22] तु सु-महान्[22] कालो व्य्-अतीतो युध्यतो[23] रणे[23] ।
३७] न च तौ युद्ध-वैमुख्यं[24] श्रमं चाऽप्य्[25] अभि-जग्मतुः[25] ॥३५[26]॥[४०

---

१. रा$_1$–तमवर्तत दुःखेन । ल$_1$ ल$_2$ ब अ–समवर्तत दुःखेन । प्र–सममज्जंत दुःखेन । भ–०दुश्चान्ये ॥ २. भ–समीयुस्ते मुहूर्तं । ३. रा$_2$ फ–तु । ४. म–बाणमया दिशः । भ–बाणाः परस्परं । ५. भ–यथा काष्ठमहाचयाः ॥ ६. ल$_1$ रा$_2$ फ–०पत्रौ । भ–निष्पर्णौ । ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म–यथा शल्म० । ८. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म–अस्त्राण्यस्त्रविदां श्रेष्ठौ दर्शयन्तौ पुनः पुनः ॥ ९. भ–बभुर् । १०. म–नास्ति ॥ ११. प्र–०सौ चोभौ । १२. भ–चक्रतुस्तुमुलं घोरं संनिपातं ॥ १३. म–क्रुद्धो । १४. भ–०णिर्युधि । १५. रा$_2$ फ म–०निमभिजग्मतुः ॥ भ–तावतिघ्नंतौ न श्रमं ययतुस्तदा ॥ १६. भ–महावीर्यौ । १७. भ–किंशुकौ ॥ १८ म–०तसिक्तानि । भ–रुधिरसिक्तानि । १९. ल$_1$–संस्तृतानिश० । ल$_2$ ब प्र–संभृतानिश० । म–गात्राणि निशितैः शरैः । २०. म–शुशुभाते रणगतौ । २१. भ–वह्निना ॥ २२. भ–तयोरेवं म० । २३. रा$_1$–अत आरभ्य ३६-शश्लोकस्य तृतीयपादं यावत्त्रुटितः । ब भ–युध्यमानयोः । २४. ब अ प्र–युधि वै० । २५. भ–वाप्युपज० । २६. अतः परमधिकः पाठः—म भ–इंगितज्ञस्तदा तस्य लक्ष्मणस्य महात्मनः । विभीषणो धनुष्पाणिस्त्वरयामास तद्बलम् ॥

अथ समर-परिश्रमं वि-हन्तुं
समर-मुखे[1] प्रणितस्य[1] लक्ष्मणस्य ।
प्रिय-हितम् उप-पादयन् महौजाः[2]
N] सम्-अरम् उपेत्य[3] वि-भीषणोऽव-तस्थे ॥३६॥ [४१

इत्यार्षे रामायणे युद्ध-काण्डे[4] रावणि-लक्ष्मणयोः[5] संसक्त-युद्धं[5]
नाम सप्तषष्टितमः सर्गः ॥ ६७ ॥

[वं-६६]= [अष्टाषष्टितमः सर्गः] =[दा-६०]

१पू] युध्यमानौ तु तौ दृष्ट्वा सं-सक्तौ नर-राक्षसौ ।[6] [१पू
२उ] शूरः स रावण-भ्राता तस्थौ संग्राम-मूर्धनि ॥१ ॥ [२उ
ततो[7] वि-स्फारयामास महद् धनुर् अव-स्थितः ।
३] वि-ससर्ज[8] शरांस्[9] तत्र तीक्ष्णान् कर्मार-मार्जितान्[9] ॥२ ॥ [३
ते शराः शिखि-संस्पर्शा[10] नि-पतन्तः समा-हिताः ।[11]
४] राक्षसान् दारयामासुर्[12] वृक्षान्[11] अशनयो यथा ॥३ ॥ [४
वि-भीषणस्याऽनु-चरास्[13] तेऽपि शूलाऽसिपट्टिसैः[13] ।
५] चिच्छिदुः सम्-अरे वीरा राक्षसान् सु-महाबलाः[14] ॥४ ॥ [५
राक्षसैस् तैः परि-वृतः स तदाऽभूद्[15] वि-भीषणः ।
६] यथैव[16] मध्ये यूथस्य[17] कलभानां महा-द्विपः[17] ॥५ ॥ [६
स सं-चोदयमानस् तु हर्य्-ऋक्षान् रण-गर्वितान्[18] ।[19]
७] उवाच वचनं तत्र[20] काल-ज्ञो रक्षसां वरः ॥६ ॥ [७

---

१. रा₂ फ म भ—०स्वेष्वजितस्य । २. भ—महात्मा । ३. ब—मवाप्य ॥ ४. ब प्र भ—लंकाकांडे । ५ अ प्र म—इन्द्रजिद्युद्धं । भ—संसक्तयुद्धं ॥ ६. अतः परमधिकः पाठः—भ—प्रभिन्नाविव मातंगौ परस्परवधैषिणौ । तौ द्रष्टुकामः संग्रामे घोरचापधरौ बली ॥ ७. भ—तथा । ८. रा₂ फ म भ—उत्स० । ९. रा₂—नास्ति । फ म—च तांस्तीक्ष्णाञ्छरान्बर्हिणवाससः । भ—च तीक्ष्णाग्रान्राक्षसेषु महाशरान् ॥ १०. फ म—०संकाशा । ११. रा₂—नास्ति । १२. रा₁ ल₁ ल₂ ब अ प्र—ताडया० ॥ १३. रा₁ ल₁ ल₂ ब अ प्र—०णशरांस्तेपि प्रासशू० । १४. प्र रा फ म भ—राक्षसोत्तमाः ॥ १५. म—ननाद । भ—तदा तु । १६. प्र—बभूव । रा₂ फ म भ—बभौ । १७. प्र रा₂ फ म भ—च यूथानां कलभानामिव द्विपः ॥ १८. रा₁ ल₁ ल₂ ब अ प्र रा₂ फ म—वानरान् रणे । १९. भ—संचोदयन्नसावृक्षान्वानरान् २० । २०. रा₂ फ म भ—काले ॥

एकोऽयं[१] राक्षसेन्द्रस्य पराऽयणम् अव-स्थितः[२] ।
८] एतच्[३] छेषं[३] बलं तस्य तिष्ठध्वं[४] किं प्लवं-गमाः[४] ॥ ७॥ [८
अस्मिन् विनि-हते पापे राक्षसे रण-मूर्धनि ।
९] रावणो वै नि-हन्तव्यः शेषम् अस्य[५] हतं बलम्[५] ॥ ८॥ [९
प्र-हस्तो नि-हतो वीरो नि-कुम्भश् च महा-बलः ।
१०] कुम्भ-कर्णश् च धूम्राऽक्षः कुम्भश् चैव निशा-चरः ॥ ९॥ [१०
अकम्पन-सुपार्श्वौ[६] च चक्र-मौलिश्[७] च राक्षसः ।
१४] मकराऽक्षो[८] महेष्वासो[८] देवाऽन्तक-नराऽन्तकौ ।[९] [१४
१५पू] अति-कायो महा-वीर्यस् त्रि-शिराश् चाऽति-कोपनः ॥[१०]१०॥[N
महोदरश च रक्ताऽक्षो लम्ब-कर्णो महा-हनुः ।
N] मकराऽक्षोऽति-कायश् च त्रि-शिराश् चाऽपि वीर्य-वान् ॥११[११]॥[N
प्र-घसो जम्बु-माली च महा-पार्श्वश् च वीर्य-वान् ।
११] यज्ञ-कोपो विरूपाऽक्षो वज्र-मुष्टिश् च वीर्य-वान् ॥१२[१२]॥[११
१३उ] सु-प्लव(?प्रघ्न)श् चाऽग्नि-केतुश् च रश्मिकेत्व्-आदयस् तथा ।[१३][१३उ
१५उ] एतान् नि-हत्य सं-ग्रामे बहून् राक्षस-पुङ्गवान्[१४] ॥१३[१५]॥
बाहुभ्यां सागरं तीर्त्वा लङ्घतां[१६] गोष्-पदं यथा[१७] । [१५
१६] इदम्[१८] एवाऽव-शिष्टं[१८] वो[१९] हन्तव्यम् इति वानराः ॥१४॥
N] भ्रत सर्वे समा-गम्य राक्षसं बल-दर्पितम् । [१६
अ-युक्तं नि-धनं कामं मया[२०] पुत्रस्य वानराः[२०] ॥१५॥ [१७पू
१७] न[२१] तु मे[२१] राम-तुष्ट्य्-अर्थम् अ-कार्यम्[२२] भुवि विद्यते[२२] ।

---

१. म–०हं । २. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–इति स्थितिः । ३. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–एकस्यैव । म–भृतस्तेषां । ४. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–०ध्वं वै प्लु० । भ–किं तिष्ठत वनौकसः ॥ ५. रा ल$_1$, ल$_2$ ब अ–चाप्यबलं महत् ॥ ६. भ–०नः सुपार्श्वश् । ७. रा$_1$ ब अ–चक्रसैनिश् । ल$_1$ ल$_2$ प्र रा$_2$ फ–वक्रमौलिश् । ८. रा$_2$ फ म–कम्पनः सत्त्वसम्पन्नो । ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–नास्ति । अतः परमधिकः पाठः—रा$_2$ फ म–प्रजंघः प्रघसश्चैव शोणिताक्षश्च राक्षसः । १०. भ–वर्जं—नास्ति ॥ ११. भ–नास्ति ॥ १२. भ–जम्बुमाली महावीर्यस्तीक्ष्णवेगोऽशनिप्रभः । सुप्तघ्नो यज्ञकोपश्च वज्रदं‸ष्ट्रश्च राक्षसः ॥ अतःपरमधिकश्च पाठः—भ–संह्रादी विकटश्चैव तपनः काल एव च । प्रघसः प्रहसश्चैव प्रजंघो वज्र एव च ॥ १३. भ–अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वीर्यवान् । अतः परमधिकश्च पाठः—भ–विद्युज्जिह्वो द्विजिह्वश्च सूर्यचक्षुश्च राक्षसः । १४. फ म भ–०ससत्तमान् । १५. रा$_2$–नास्ति ॥ १६. रा$_2$ फ–लंघ्यतां । १७. रा$_2$ फ भ–लघु । १८. रा$_2$ फ म भ–एतावदेव शेषं । १९. म–च ॥ २०. भ–पुत्रस्य यतितुं मया ॥ २१. भ–अथवा । २२. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–यत्कार्यं भु० । भ–किन्न कुर्यां विगर्हितं ।

वधोपायो वधश् चेति[1] समम् आहुर् मनीषिणः[1] ॥१६॥ [N
१८] तत् पातकम् उपाऽऽतिष्ठे[2] राम-सिद्धि-प्रयोजनम्[2] । [N
घृणाम् अपाऽस्य[3] रामाऽर्थे हनिष्ये[4] भ्रातुर् आत्म-जम् ॥१७॥ [१७उ
१९] प्रहर्तु-कामस्य तु मे वैक्लव्यं[5] जायते महत्[5] ।
तद्[6] एनं वै[6] महा-बाहुर् लक्ष्मणः शमयिष्यति ॥१८॥
२०] वानरा घ्नत सं-भूय भृत्यान् अस्य समीप-गान् । [१८
इति तेनाऽथ तरसा राक्षसेनाऽभि-चोदिताः ॥१९॥ [१९पू
२१] वानरेन्द्रा जहृषिरे मेघान्[9] दृष्ट्वेव बर्हिणः[9] ।
ते[8] लब्ध-लक्ष्याः कपयः[8] प्रेक्ष्य युद्धे वि-भीषणम् ।[8] [२०
२२] भूयो जहृषिरे कामं लांगूलानि च चिक्षिपुः ॥२०॥ [१९उ
जाम्ब-वान् अपि तैः सर्वैर्[10] यूथ-पैर्[10] अभि-संवृतः ।
२३] अमर्दयत्[11] पर्वताऽग्रैर्[11] नखैर् दन्तैश् च राक्षसान्[12] ॥२१॥ [२१
नि-घ्नन्तम् ऋक्षाऽधिपतिं राक्षसाः सचिवैः सह ।
२४] परि-वव्रुर् भयं त्यक्त्वा तम् एकं विविधाऽऽयुधाः[13] ॥२२॥ [२२
घोरैः परशुभिस् तीक्ष्णैर् भिण्डि-पालैश् च राक्षसाः ।
२५] आ-जघ्नुर्[14] ऋक्षाऽधिपतिं[14] नि-घ्नन्तं राक्षसीं चमूम् ॥२३॥ [२३
स सम्प्र-हारस् तुमुलः सं-जज्ञे कपि-रक्षसाम् ।
२६] देवाऽसुराणां क्रुद्धानां यथा भीमः पुराऽभवत् ॥२४॥ [२४
हनू-मान् अपि सं-क्रुद्धः शालम्[15] उत्-पाट्य पर्वतात्[15] ।
२७] रक्षसां कदनं चक्रे दण्ड-पाणिर्[16] इवाऽन्त-कः[16] ॥२५[17]॥ [२५

---

१. रा$_2$ फ म–चेति समदोषमिदं द्वयं । भ–चैव तुल्यदोषमिदं द्वयं ॥ २. अ रा$_2$–उपतिष्ठे राम० । भ–०ष्ठेयं पुत्रस्य निधनं प्रति । ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–त्यक्त्वा च । ४. भ–निहन्मि ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–वक्तव्यं जा० । भ–चक्षुर्बाष्पेण रुध्यते । ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–तमिमं वा ॥ ७. भ–समारोपित-विक्रमाः । ८. भ–ततस्ते कपिशार्दूलाः ॥ ९. भ–बभूवुर्हृष्टमनसो मेघं दृष्ट्वैव बर्हिणः । १०. रा$_2$ फ–सार्धं यू० । भ–सर्वैः स्वयूथैर् । ११. भ–अश्मभिस्ताडयामास । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–नास्ति ॥ १३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–विबुधारयः ॥ १४. भ–जाम्बवन्तं रणे जघ्नुर् ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र म–सालमुत्० । रा$_2$ फ म–०मुद्यम्य वीर्यवान् । भ–तानुद्यम्य स वीर्यवान् । १६. रा$_2$ फ म–दण्डहस्त इवा० । भ–संग्रामे लोमहर्षणं । १७. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब अ प्र म–गिरेरुत्पाट्य शिखरं प्रचिक्षेप स वीर्यवान् । तेनाहतातिवेगेन नररक्षसां विंशतिस्तदा ॥

वि-भीषणश् च सं-क्रुद्धो धनुष्-पाणिर् महा-बलः ।
२८] साऽमात्यस् तत्र सं-ग्रामे जघ्ने रक्षो-गणांस् तदा ॥२६॥ [N
दत्त्वा[1] तु[1] तुमुलं युद्धं पितृव्यस्येन्द्र-जित् तदा[2] ।
२९] लक्ष्मणं पर-वीर-घ्नं पुनर् एवाऽभ्य्-अधावत[3] ॥२७॥ [२६
युयुधाते[4] तदा वीरौ रणे[4] लक्ष्मण-राक्षसौ ।
३०] शर-वर्षेण[5] वर्षन्तौ[5] जघ्नतुस्[6] तौ[6] परस्-परम् ॥२८॥ [२७
अन्योऽन्यम्[7] अन्तर्-दधतुः शर-जालैर् महा-बलौ ।
३१] चन्द्राऽऽदित्याव् इवोष्माऽन्ते घन-मेघैस्[8] तरस्विनौ[8] ॥२९॥ [२८
शरौघान् वि-सृजन्तौ तु[9] शुशुभाते शुभाऽऽननौ ।
N] प्र-वर्षन्तौ हि सलिलं मेघाव् इव महा-बलौ ॥३०[10]॥[N
नाऽऽदाने न[11] च[11] सं-धाने धनुषो[12] न परि-ग्रहे ।
३२] न विप्र-मोक्षे बाणानां न वि-कर्षे न वि-ग्रहे ॥३१॥ [२९
न मुष्टि-प्रतिसन्धाने[12] न च[13] लक्ष्य-प्रभेदने[13] ।
३३] अदृश्यत तयोः शैघ्र्याद्[14] युध्यतोः पाणि-लाघवम् ॥३२॥ [३०
चाप-वेग-प्रमुक्तैश्[15] च बाण-जालैः समन्त-तः ।
३४] अन्तरिक्षे प्रति-च्छन्ने न रूपाणि चकाशिरे ॥३३॥ [३१
तमसाऽपि-हितं सर्वम् आसीद् भीम-तरं नभः[16] । [३५पू
३५] न[17] तदा प्र-ववौ[17] वायुर् न च जज्वाल पावकः ॥३४॥
स्वस्त्य् अस्तु लोकेभ्य[18] इति जेपुस् तत्र महर्षयः[18] ।
३६] सं-पेतुश् चाऽपि गन्धर्वाः सं-त्रस्ताः सह चारणैः ॥[19]३५॥[३७

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ-कृत्वाथ । भ-स दत्त्वा । २. म-तथा । ३. रा$_1$ ल$_1$ ल$_2$ ब-एव व्यधा० । भ-०भ्यभाषत ॥ ४. रा$_2$ फ म-तौ प्रयुक्तौ पुनर्वी० । भ-तौ प्रयुद्धौ पुनर्वीरौ मृधे । ५. भ-शरौघानभिव० । ६. भ-विनिघ्नन्तौ ॥ ७. प्र रा$_2$ फ म भ-अभीक्ष्णं । ८. रा$_2$ फ म-यथा मेघैस्० । भ-महामेघैः समावृतौ ॥ ९. अ-तौ । रा$_2$ फ-हि । १०. भ-नास्ति ॥ ११. रा फ-नैव । १२. फ म-नास्ति ॥ १३. रा$_2$ फ म-लक्ष्यप्रतिपादने । १४. ल$_1$ ल$_2$ ब अ प्र-शैघ्र्यू ॥ १५. रा$_2$ फ म-०प्रयुक्तैश् ॥ १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म- भृशं । १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-तदानीं न ववौ ॥ १८. भ-लक्ष्मणायेति जजल्पुः परमर्षयः । १९. भ-संपेतुश्चैव संत्रस्ता गन्धर्वाश्चारणैः सह । अतः परमधिकश्च पाठः—भ-लक्ष्मणो रावणिं प्राप्य रावणिश्चापि लक्ष्मणम् । अव्यवस्थाऽभवच्चोग्रा ताभ्यामन्योऽन्यविग्रहे ॥ तत्र युद्धमभूद् घोरं ताभ्यामन्योन्यमाहवे । उभाभ्यामेव तरसा विसृष्टैर्विशिखैः शितैः ॥

अथ राक्षस-सिंहस्य[1] कालान्[1] काञ्चन-भूषणान्[2] ।
३८] शरैश् चतुर्भिः सौमित्रिर् विव्याध चतुरो हयान् ॥३६॥ [३८
ततः प्र-हस्य सौमित्रिर् नि-शितं[3] बाणम् उद्-यतः[4] । [३९पू
३९] शत्रु-वीर्य-प्रमथनं क्रुद्धं सर्पम् इवाऽऽददे[5] ॥३७॥ [N
४०पू] स यत्न-वान् महा-तेजा जघ्निवान् रावणाऽऽत्मजम् ।[5] [४०पू
४१उ] जहौ[6] च[6] स[6] समुत्-कर्ष[7] वि-मनाश्[8] च बभूव ह ॥३८॥ [४४उ
विषण्ण-वदनं दृष्ट्वा रावणिं हरि-यूथपाः ।
४२] प्र-हर्षम् अ-तुलं गत्वा रथं तस्य व्य्-अपोथयन्[9] ॥३९॥ [४५
ततः प्र-माथी क्रथनः[10] शर-भो मेघ-निस्वनः[11] ।
४३] अ-मृष्यमाणाश् चत्वारश् चक्रुर् वेगं प्लवं-गमाः[12] ॥४०॥ [४६
ते[13] तस्य हय-मुख्येषु[13] तूर्णम् उत्-पत्य वानराः ।
४४] चतुर्षु सु-महावीर्या नि-पेतुः सहिता बलात् ॥[14]४१॥ [४७
तेषाम् अधि-ष्ठितानां तैर्[15] वानरैः पर्वतोपमैः ।
४५] मुखेभ्यः[16] शोणितं शीघ्रं[16] हयानां सम्-अवर्तत[17] ॥४२॥ [४८
ते नि-हत्य हयांस् तस्य निर्-मथ्येषां रथस्य च ।
४६] पुनर् आ-वृत्य[18] वेगेन सौमित्रेस्[19] तस्थुर् अग्र-तः[19] ॥४३॥ [४९
स हताऽश्वाद् अव-प्लुत्य रथात् पतित-सारथेः ।[20]
४७] वानरैः सार्धम् अ-व्यग्रो बाणैः सौमित्रिम् अर्दयत् ॥[21]४४॥ [५०

---

१. भ–०सपुत्रस्य कृष्णान् । २. रा₁ ल₁ ल ब अ प्र रा₂ फ–कनकभू० ॥ ३. रा₂ फ म भ–नाराचमभिलक्षितं । ४. रा₁ ल₁ ल₂ ब अ–०द्धे ॥ ५. रा₂ फ म–स तेन बाणाशनिना तलशब्दानुनादिना । भ–स तेन बाणाशनिना लब्धलक्ष्यानुनादिना । अतः परमधिकश्च पाठः—रा₂ फ म भ–धनुर्मेघप्रयुक्तेन यन्तुर्जीवितमाददे । स यन्तरि महातेजा निहते रावणात्मजे ॥ ६. रा₂ फ म भ–प्रजहौ । ७. रा₁ ल₁ ल₂ ब अ प्र–सुमहद्धर्षं । भ–समरोत्कर्षं । ८. रा₂ फ म–विवर्णश् । भ–विषण्णश् ॥ ९. भ–हर्षं परममापन्नास्ततः स्यन्दनमार्दयन् ॥ १०. अ–पूतनः । रा₂–क्रकचः । ११. भ–गन्धमादनः । १२. रा₂ फ म–हरीश्वराः । भ–अनुत्तमं ॥ १३. म–ततस्ते हरिमु० । १४. भ–चतुर्ष्वपि महावीर्याश्चत्वारः पेतुराहवे ॥ १५. ल₁ ल₂ ब रा₂ फ–वै । भ–तु । १६. रा₂ फ म–०णितं तीव्रं । भ–०भ्यो रुधिरं तूर्णं । १७. रा₂ फ–सम्प्रवर्तते ॥ १८. भ–उत्पत्य । १९. भ–तस्थुर्लक्ष्मणपार्श्वतः ॥ २०. म–नास्ति । २१. म–तमभिबाणैः सौमित्रिमर्दयद्रावणात्मजः । भ–शरवर्षेण सौमित्रिमभ्यवर्षत रावणिः ॥

ततः स सौमित्रिर्[1] अथाऽप्रमत्तः[2]
N] स्थितः (? तं) पदातिं निहतंस् तुरं-गैः ।[3] [N
सृजन्तम् आजौ नि-शितान् पृषत्कान्
४८३] भृशाऽऽतुरं[4] बाण-गणैश्[5] चकार[6] ॥४५॥ [५१३

इत्यार्षे रामायणे युद्ध-काण्डे[7] रावणि-रथ-विमर्दो[8] नाम
अष्टाषष्टितमः सर्गः ॥ ६८ ॥

[वं–७०]= [एकोनसप्ततितमः सर्गः] =[दा–६९]

स हताऽश्वो महा-तेजा[9] भूमौ तिष्ठन् निशा-चरः ।[10]
१] इन्द्र-जित् परम-क्रुद्धः सम्प्र-जज्वाल तेजसा ॥१[11]॥ [१
तौ धन्विनौ जिघांसन्ताव् अन्योऽन्यम् अभि-तः[12] स्थितौ ।
२] वि-जयायाऽभिनिष्[13]-क्रान्तौ[13] वने सिंह-गजाव्[14] इव ॥२ ॥ [२
वि-गर्हयन्ताव्[15] अन्योऽन्यं[15] तौ राक्षस-नरोत्तमौ[16] ।
३] तदा[17] न जहतुर्[17] युद्धम्[18] आ-पतन्तौ[18] ततस् ततः ॥३[19]॥ [३

---

१. रा$_1$ ल$_2$ ब अ प्र रा$_2$–०र्त्रि । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०प्रवृत्तः । ३. भ–ततो महेन्द्रप्रतिमः स लक्ष्मणः पदातिनं तं युधि सूदिताऽऽश्वं । ४. भ–भृशं तदा । ५. रा$_2$ फ म–बाणशतैश् । ६. भ–न्यवारयत् ॥ ७. ब प्र रा$_2$ भ–लंकाकांडे । ८. अ–युद्धपर्वणि रथ० । रा$_2$ फ–इन्द्रजिद्विमर्दनं । म भ–रथावमर्दनं ॥ ९. भ–हतरथो हतसारथिरेव च । १०. अतः परमधिकः पाठः—भ–ध्यानशोकपरीतात्मा भुवमाश्रित्य विष्ठितः । ११. अतः परमधिकः पाठः—भ–लक्ष्मणश्च महातेजाः समरे सत्यविक्रमः । विस्फार्य चापं सहसा ससर्जाजौ शिलीमुखान् ॥ १२. भ–इषुभिः । १३. भ–शुशुभाते मदोन्मत्तौ । १४. रा$_2$ फ म भ–गजवृषाव् ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–विगर्हन्तावथान्योन्यं । १६. रा$_2$ फ भ–०सवनौकसौ । म–०सनरर्षभौ । १७. रा$_2$ फ म–भर्तारौ जग्मतुर् । भ–भर्तारौ न जहुर् । १८. रा$_2$ फ म–युद्धे संप० ॥ १९. अतः परमधिकः पाठः—भ–तत्र तान्राक्षसान्सर्वान्हर्षयन्राक्षसात्मजः । संस्तुवन्हर्षयंश्चैव इदं वचनमब्रवीत् ॥ तमसा बहुलेनेमाः संसक्ताः सर्वतो दिशः । नेह विज्ञायते ह्यास्तः परो वा राक्षसोत्तमः ॥ हृष्टा भवंतो युध्यंतु शत्रूणां मोहनाय वै । अहं तु रथमास्थाय शीघ्रमायामि संयुगे ॥ भवद्भिस्तु तथा कार्यं यथैते काननौकसः । न जयेयुर्दुरात्मानः प्रविष्टे नगरीमपि ॥ इत्युक्त्वा रावणसुतो वंचयित्वा वनौकसः । विकम्प्येन्द्रजितं यु (? कु) द्धे वदने रुक्मकुंडले ॥

स क्रोधाच् च पितृव्यस्य क्रुद्धस्याऽपि हतैर् हयैः ।[1]
४] प्र-गृह्याऽभ्य्-अद्रवच्[2] चापं शरैर् लक्ष्मणम् इन्द्र-जित् ॥४ ॥ [N
मुक्तम् इन्द्र-जिता तत् तु शर-जालम्[3] अमित्र-जित्[3] ।[4]
५] अवारयद् अ-सम्भ्रान्तो महत् परम-दुःसहम् ॥५ ॥ [२३
लक्ष्मणेन्द्रजितौ वीरौ बलाऽऽकृष्ट-शराऽऽसनौ[5] ।
६] अन्योऽन्यं नि-शितैर् बाणैर् जघ्नतुर् भीम-विक्रमौ ॥६ ॥ [३५
परस्पर-वधे[6] वीरौ निर्वि-ष्टौ तौ महा-बलौ ।
७] चक्रतुर् घोरम् अन्योऽन्यं शरजालाऽऽवृतं[7] रणे[8] ॥७ ॥ [N
ललाटे लक्ष्मणं बाणैः सु-घोरैस् त्रिभिर् इन्द्र-जित् ।[9]
८] अ-भेद्यं कवचं भित्त्वा विव्याध लघुहस्त-वत् ॥८ ॥ [३२
स तैस् त्रिभिर् अ-दीनाऽऽत्मा ललाट-स्थैः शरोत्तमैः ।
N] लक्ष्मणः शुशुभे वीरस् त्रि-शृङ्ग इव पर्वतः ॥९ ॥ [३३
अर्दितस् त्व् अथ बाणौघैस् तेनाऽमित्रेण लक्ष्मणः । [३४पू
९] उद्-ववह[10] शरांस् तीक्ष्णान् रावणाऽऽत्मज-वारणान् ॥१०॥ [N
१०पू] तम् आशु प्रति-विव्याध लक्ष्मणः[11] पञ्चभिः[11] शरैः । [३४उ
N] किं-चिद् रोष-परीतात्मा रावणिश्[12](?र्णिं) च महा-रथः[12](?थम्)११[13][N
तौ परस्परम् अभ्य्-एत्य सर्व-गात्रेषु धन्विनौ ।
१२] घोरैर् विव्यधतुर् बाणैः कृत-भावाव्[14] उभौ जये[15] ॥१२॥ [३७
ततः परम-रोषेण[16] स वि-रुद्धो वि-भीषणः[17] ।[17]
१५] वज्र-स्पर्श-समानांस्[18] त्रीन् ससर्ज नि-शिताञ् छरान्[18] ॥१३॥ [४३

---

१. भ–अत आरभ्य ११–शश्लोकं यावन्नास्ति । २. ल$_2$–०ह्याभिद्र० ॥ ३. म–०लानि शक्रजित् । ४. प्र–नास्ति ॥ ५. प्र–महोद्यतश० । रा$_2$ फ म–महाबलश० ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०रमथो । ७. प्र रा$_2$ म–०लाकुलं । ८. फ म–रणं ॥ ९. रा$_2$–नास्ति ॥ १०. म–०ववाह ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०णं च त्रिभिः । १२. रा$_2$ फ म–०र्णिं वदने शुभे । १३. अतः परमधिकः पाठः—रा$_2$ फ म भ–ततः शोणितदिग्धांगौ लक्ष्मणेन्द्रजितावुभौ । रणे विरेजतुर्वीरौ पुष्पिताविव किंशुकौ ॥ १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–निकृतौ ताव् । १५. रा$_1$ ल$_1$ ल$_2$ ब अ–रणे ॥ १६. रा$_2$ फ म–०मकोपेन कुपितो रावणाऽऽत्मजः । भ–०मकोपेन संक्रुद्धो रावणात्मजः । १७. अतः परमधिकः पाठः—रा$_2$ फ म भ–विभीषणं त्रिभिर्बाणैर्विव्याध वदने शुभे । अयोमुखैस्त्रिभिर्बाणैर्लक्ष्मणं शुभलक्षणम् ॥ एकैकेनाभिविव्याध सर्वांस्तान्हरियूथपान् । तस्मै दृढधनुः क्रुद्धो हताश्वाय विभीषणः ॥ १८. भ–०नान् पंच ससर्जोरसि सायकान् ॥

ते तस्य कायं निर्-भिद्य रुक्म-पुङ्खा विनिः-सृताः[1] ।
१६] बभूवुर्[2] लोहिताऽऽदिग्धा रक्ता इव महोरगाः ॥१४॥ [४४
स पितृव्याय[3] सं-क्रुद्धः शक्र-जित्[4] परमाऽऽहवे[4] ।
१७] वि-ससर्ज शरं घोरं यम-दण्डम् इवाऽपरम् ॥[5]१५॥ [४५
तं सम्-ईक्ष्य महा-तेजा हेम-पुङ्खेन[6] सं-युतम्[6] ।
२१] लक्ष्मणोऽप्य्[7] आ-ददे[7] बाणम् अन्यं भीम-पराऽऽक्रमः[8] ॥१६॥ [४६
कु-बेरेण स्वयं दत्तं[9] स्वप्ने बाणं महाऽऽत्मना[9] ।
२२] दुर्-जयं चाऽविषह्यं[10] च सेन्द्रैर्[10] अपि सुराऽसुरैः ॥१७॥ [४७
ताभ्यां च धनुषोस् तत्र सं-धितौ सायकोत्तमौ ।[11]
२३] वि-कृष्यमाणौ[12] च बल-वत्[12] प्र-जज्वलतुस्[13] तदा[13] ॥१८॥ [४९
महा-शरौ[14] ताव्[14] अन्योऽन्यं धनुर्-ज्यातल-विच्युतौ ।
२४] मुखेन मुखम् आ-हत्य सन्नि-पेततुर् आ-हवे[15] ॥[16]१९॥ [५०
तौ महा-ग्रह-संकाशाव् अन्योऽन्यम् अभि-हत्य च । [५२पू
२५] नि-पेततुर् महा-बाणाव्[17] अन्योऽन्यं शत-धा कृतौ ॥२०[16]॥ [N
शरौ प्रति-हतौ दृष्ट्वा ताव् उभौ रण-मूर्धनि ।
२६] नि-हतौ[18] जात-रोषौ च[19] लक्ष्मणेन्द्रजिताव् उभौ[19] ॥२१॥ [५३
सौमित्रिर् अथ सं-क्रुद्धः सं-दधेऽस्त्रं सु-दारुणम् । [५४

---

१. भ–शिलीमुखाः । २. भ–निपेतुर् ॥ ३. भ–०व्यस्य । ४. रा$_{2}$ फ म–०जिच्छरमाददे । भ–पावकास्त्रं तु संदधे । ५. रा$_{2}$ फ म–परमं रक्षसां मध्ये यमदत्तं महाबलः । भ–रौद्रं विभीषणश्चापि व्यसृजत्समनंतरं । अतः परमधिकश्च पाठः— भ–तौ समेत्य शरौ घोरौ वियत्यादित्यसन्निभौ । परस्परं समाहत्य महोल्केव पेततुः ॥ अस्त्रं निवारितं दृष्ट्वा रावणिः क्रोधमूर्च्छितः । दिव्यं शक्राशनिप्रख्यं ज्वलंतमिव पावकम् ॥ उत्तमं राक्षस-श्रेष्ठो मयदत्तं महारणे । उद्ववर्ह महातेजा परकायविदारणम् ॥ ६. म–महेन्द्रसमविक्रमः । भ–राक्षसेन्द्रेण संधितम् । ७. भ–आददे लक्ष्मणो । ८. प्र रा$_{2}$ म–०क्रमं । भ–भीमतरं विभुः ॥ ९. भ–स्वप्ने यद्दत्तममितात्मना । १०. प्र रा$_{2}$ फ म–दुर्विषह्यं च से० । भ–दुःसहं चैव सर्वैर् ॥ ११. भ–उभाभ्यां धनुषोःश्रेष्ठे पीडिते समरे तदा । १२. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–विलप्यमानौ च ब० । रा$_{2}$–परिकृष्यमाणौ च तदा । फ म–०णौ तौ तदा । भ–निष्कृष्यमाणौ सहसा । १३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–०ज्वाल नभस्तदा । भ–क्रौंचाविव विनेदतुः । म–बलाञ्ज्वलितौ युधि ॥ १४. रा$_{2}$ फ म–तौ भासयन्ताव् । १५. भ–ओजसा । १६. रा$_{2}$–नास्ति ॥ १७. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–महेष्वासाद् । फ म–महेषूनां ॥ १८. भ–बलिनौ । १९. भ–तु जातौ लक्ष्मणरावणी ॥

२७] रौद्रं स चेन्द्र-जित् क्रुद्धो व्य्-असृजत् तद् अनन्तरम् ॥[1]२२॥[५५पू
तयोः सु-तुमुले युद्धे[2] प्र-वृत्ते[3] रोम-हर्षणे[4] ।
२८] गगन-स्थानि भूतानि लक्ष्मणं पर्य्-अवारयन्[5] ॥२३॥ [६१
भैरवाऽभिरुते[6] युद्धे भीमे वानर-रक्षसाम् ।
२९] भूतैर् बहुभिर् आ-काशे[7] वि-स्मितैर् आ-वृताव्[8] उभौ[8] ॥२४॥ [६२
ऋषयः पितरो देवा गन्धर्वा गरुडोरगाः ।
३०] शत-क्रतुं पुरस्-कृत्य ररक्षुर् लक्ष्मणं रणे ॥२५[9]॥[६३
अथाऽन्यं मार्गण-श्रेष्ठं सं-दधे राघवाऽनुजः ।
३१] हुताऽशन-सम-स्पर्शं रावणाऽऽत्मज-वारणम्[10] ॥[11]२६॥ [६४
३२उ] आशीविष-सम-स्पर्शं वेगेनाऽत्यन्त-दर्पितम्[12] । [६६उ
N] सुवर्ण-विकृतं वीरः शरीराऽन्तकरं शरम् ॥२७॥ [६५उ
३२पू] दुरा-धर्षं[13] दुर्वि-षहं[14] राक्षसानां वि-दारणम् । [६६पू
N] दृढाऽन्तम् ऋजुवृत्ताऽङ्गं सु-पर्वाणं सु-संस्थितम् ॥[15]२८॥ [६५पू
येन शक्रः प्र-वृद्धोऽभूद् दानवाऽन्तकरः प्र-भुः ।
३३] पुरा देवाऽसुरे युद्धे वीर्य-वान् हरि-वाहनः ॥२९॥ [६७
तम् इन्द्र-दत्तं[16] सौमित्रिः सम्-अरेष्व्[16] अ-पराजितः ।
३४] शर-श्रेष्ठं धनुः-श्रेष्ठे नर-श्रेष्ठोऽभिसं-दधे[17] ॥३०॥ [६८
सं-धायाऽमित्र-मथनो[18] वि-पन्नं स्व-शराऽऽसनात्[18] ।

---

१. भ-असुरास्त्रमसौ युद्धे रावणिर्व्यसृजत्तदा । अतः परमधिकश्च पाठः—भ-तस्माच्चापाद्विनिष्पेतुरासुराः कूटमुद्गराः । शूलान्यथ भुसुंड्यश्च गदाः खड्गाः परश्वधाः ॥ तं दृष्ट्वा लक्ष्मणः संख्ये घोरमस्त्रमथासुरम् । माहेश्वरेण द्युतिमांस्तदस्त्रं पर्यवारयत् ॥ २. भ-तत्र संग्रामे । ३. प्र रा$_2$ फ म भ-लोम० । ४. अतः परमधिकः पाठ —भ-अस्त्रैरस्त्राणि संयोज्य वारयंतौ रणाजिरे । ५. भ-समवा० ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-०भिनये । ७. रा$_2$ फ म भ-०शं । ८. रा$_2$ फ म भ-भमृतं बभौ ॥ ९. अतः परमधिकः पाठः—भ-पूज्यमानस्ततो देवैर्हृष्टैः शक्रपुरोगमैः ॥ १०. रा$_1$ ल$_2$ प्र रा$_2$-०जरावणं । भ-०जनाशनं । ११. फ-नास्ति ॥ १२. फ म-वेगसम्पन्नमर्चितं । भ-दिव्यं देवगणार्चितं ॥ १३. म-दुराधारं दुराधर्षं । भ-दुराराधं दु० । १४. भ-सुदृढं तं सुपर्वाणं वज्रवृत्ताग्रसंस्थित ॥ १५. रा$_1$ अ म-इन्द्रजितं । ल$_1$ ल$_2$ ब प्र रा$_2$-इन्द्र-जिति । १६. भ-संयुगेष्व् । १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$-रथश्रेष्ठोभि० ॥ १८. म-०त्रनिधनं विपक्षं स्व० । भ-०त्रदमनं विप्रकर्षं श० ।

३५] सं-धीयमानं[1] दुर्-धर्षं[1] कालं[2] लोक-क्षये[3] यथा ॥३१॥ [६९
सं-धाय च धनुः-श्रेष्ठे वि-कर्षन्न् इदम् अब्रवीत् ।
३६] लक्ष्मी-वाँल् लक्ष्मणो वाक्यम् अर्थ-साधनम् आत्मनः ॥३२॥ [७०
धर्माऽऽत्मा सत्य-सन्धश् च रामो दाशरथिर् यथा ।
३७] पौरुषे चाऽप्रतिद्वन्द्वस् तथेमं जहि राक्षसम् ॥३३[4]॥ [७१
इत्य् उक्त्वा बाणम् आ-कर्णम् आ-कृष्य तम् अ-जिह्मगम् ।
३९] लक्ष्मणः सम्-अरे वीरः ससर्जेन्द्र-जितं प्रति ॥३४॥ [७२पू
सं-धाय चाऽप्रमेयेन[5] रक्षसां[6] शातनेन[6] च ।[7] [N
N] रौद्रेणाऽस्त्रेण सं-योज्य लक्ष्मणः पर-वीर-हा ॥[8]३५॥ [७२उ
स शरः स-शिरस्त्राणं श्री-मज् ज्वलित-कुण्डलम् ।
४०] प्र-मथ्येन्द्र-जितः कायात् पातयामास भू-तले ॥३६॥ [७३
तद् रावण-तनूजस्य छिन्न-स्कन्धं[9] शिरो महत्[9] ।
४१] तपनीय-निभं भूमौ ददृशे रुधिरोक्षितम् ॥३७॥ [७४
ततः स नि-पपाताऽऽशु धरण्यां रावणाऽऽत्मजः ।
४२] कवची स-शरः[10] खड्गी वि-ध्वस्तः स-शराऽऽसनः ॥[11]३८॥ [७५
चुक्रुशुस् ते ततः सर्वे वानराः स-विभीषणाः ।
४३] प्र-हृष्टा[12] नि-हते तस्मिन् देवा वृत्र-वधे यथा ॥३९॥ [७६
अथाऽन्तरिक्षे देवानाम्[13] ऋषीणां च महाऽऽत्मनाम् ।
४४] बभूव[14] तत्र सं-नादो[14] गन्धर्वाऽप्सरसाम् अपि ॥४०॥ [७७
पतितं[15] रावणिं[15] मत्वा[16] सा[17] राक्षस-महाचमूः[17] ।
४५] वध्यमाना प्र-दुद्राव[18] हरिभिर्[18] जित-काशिभिः ॥४१॥ [७८
ते वध्यमाना हरिभिः शस्त्राण्य् उत्-सृज्य राक्षसाः ।

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ म—संधायमानं दु० । भ—संजिहीर्षुः सुदुर्धर्षः । २. म भ—कालो । ३. फ—०क्षयं ॥ ४. अतः परमधिकः पाठः—भ—पितृभक्तो देवपरो वीरव्यूहरणे रतः । भक्तानुकम्पी भूतानां तथेमं जहि राक्षसम् ॥ ५. रा$_1$ ल$_1$ ल$_2$—०येण । ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$—राक्षसानां शतेन । ७. भ—नास्ति । ८. अतः परमधिकः पाठः—भ—क्षुरप्रं रावणेरर्थे सर्वेषां चैव रक्षसाम् । स तु बाणाग्निदीप्तार्चिः प्रज्वलन्निव तेजसा ॥ ९. भ—शिरो ज्वलितकुंडलं ॥ १०. फ—स रथी । ११. भ—व्यपविद्धशिरस्त्राणः सशरः सशरासनः ॥ १२. फ म भ—प्रहर्षान् ॥ १३. फ म भ—भूतानां । १४. भ—संजज्ञे तलसंपातो ॥ १५. भ—निहतं तमथ । १६. फ भ—ज्ञात्वा । म—दृष्ट्वा । १७. भ—राक्षसानां महा० । १८. भ—दिशो भेजे वानरैर् ॥

४६] लङ्काम् अभि-मुखा जग्मुर् नदन्तो नष्ट-चेतसः ॥४२॥ [७९
दुद्रुवुर् वसु-धां वीरा राक्षसाः सहसा दिशः ।
N] त्यक्त्वा प्र-हरणान्य् आशु पट्टिसाऽसिपरश्वधान्[1] ॥४३॥ [८०
के-चिल् लङ्काम् अभि-मुखाः[2] प्र-विष्टा वानराऽर्दिताः ।
४७] सम्-उद्रे पतिताः के-चित् के-चिच् छैलान् समा-श्रिताः ॥४४॥ [८१
हतम् इन्द्र-जितं दृष्ट्वा शयानं धरणी-तले[3] ।
४८] राक्षसानां सहस्रेषु न कश्-चिद् अव-तिष्ठते[4] ॥४५॥ [८२
ततो वि-नेदुः सं-हृष्टाः सम्-अरे हरि-यूथपाः ।[5]
N] चुक्रुशुर्[6] दुधुवुश्[6] चैव लांगूलानि प्र-हर्षिताः ॥[7]४६॥ [N
यथाऽस्तं-गत आदित्ये नाऽव-तिष्ठन्ति रश्मयः ।
४९] तथा तस्मिन् नि-पतिते नाऽव-तिष्ठन्ति[8] राक्षसाः[8] ॥४७॥ [८३
शान्त-रश्मिर् इवाऽऽदित्यो निर्वाण इव पावकः ।
५०] बभूव स महा-बाहुः सम्-अरे गत-जीवितः ॥४८॥ [८४
प्र-शान्तः प्र-ववौ वायुर् नष्टाऽनिष्टः प्र-हर्षयन् ।
५१] बभूव लोकः पतिते राक्षसेन्द्र-सुते तदा ॥४९॥ [८५
जहर्ष शक्रो भग-वान् सह सर्वैः सुरर्षिभिः[9] ।
५२] लक्ष्मणेन[10] हते[10] तस्मिन् राक्षसे पाप-कर्मणि ॥५०॥ [८६
शुद्धाश् चाऽऽपो नभश् चैव जहर्षुर् देव-दानवाः । [८८उ
५३] आ-जग्मुः पतिते तस्मिन् सर्व-लोक-भयाऽऽवहे ॥५१॥
ऊषुश्[11] च निहताऽरिष्टा[11] देव-गन्धर्व-दानवाः ।[12]
५४] वि-ज्वराश् च सुरा जाता नि-हते पाप-राक्षसे ॥[13]५२॥ [८९
ततोऽभ्य्-अनन्दन् सौमित्रिं सम्-अरे हरि-यूथपाः ।
५५] तम् अ-प्रतिबलं दृष्ट्वा हतं नैर्ऋत-पुंगवम् ॥५३॥ [९०
वि-भीषणोऽथ हनु-मान् जाम्ब-वान्[14] हरि-यूथपाः[14] ।

---

१. भ–पट्टिशासि० ॥ २. भ–परित्रस्ताः ॥ ३. भ–समरे क्षितौ । ४. भ–०ष्ठति ॥ ५. भ–नास्ति । ६. भ–चिक्षेपुर्दुद्रुवुश् । ७. म–नास्ति ॥ ८. रा$_1$, ल$_1$, ल$_2$ ब अ प्र रा$_2$–अत आरभ्य ४९–शश्लोकपूर्वार्धं यावन्नास्ति । भ–जग्मुस्ते राक्षसाः दिशः ॥ ९. म–सुरर्षभैः । १०. प्र फ म–जगाम निहते । भ–तदा विनिहते ॥ ११. फ म भ–ऊचुश्च सहितास्तुष्टा । १२. अतः परमधिकः पाठः—भ–शतक्रतु-मुखाः सर्वे परं हर्षमुपागताः । १३. भ–विज्वराः शान्तकलुषा ब्राह्मणा विचरन्त्विति ॥ १४. ब रा$_2$–०थपः । प्र भ–०वानृक्षयूथपः । फ–०वांश्चर्क्षयूथपः ।

५६] वि-जयेनाऽभि-नन्दन्तः प्र-शशंसुश्[1] च[1] लक्ष्मणम् ॥५४॥ [९१
क्ष्वेडन्तश्[2] च[2] प्र-हृष्टाश्[3] च गर्जन्तश् च प्लवं-गमाः ।
५७] लक्ष्मणं[4] तं[4] रघु-सुतं परि-वार्याऽव-तस्थिरे ॥५५॥ [९२
लाङ्गूलानि प्र-विध्यन्तः स्फोटयन्तः[5] प्लवं-गमाः[5] ।
५८] लक्ष्मणो जयतीऽत्य् एवं वाचं व्य्-अश्रावयंस् तदा[6] ॥५६॥ [९३
अन्योऽन्यं च समा-श्लिष्य कपयो हृष्ट-मानसाः ।
५९] चक्रुर् उच्चाऽवच-गुणा[7] राघवाऽऽश्रय-जाः कथाः ॥५७॥ [९४
तद् अ-सुकरम् अथाऽप्य्[8] अ-दृष्टपूर्वं[8]
युधि[9] परम् अस्य च[9] लक्ष्मणस्य कर्म ।
परमम् उप-गता मनः-प्रहर्षं
N] विनि-हतम् इन्द्र-रिपुं नि-शम्य देवाः ॥५८॥ [९५

इत्यार्षे रामायणे युद्ध-काण्डे[10] इन्द्रजिद्-वधो नाम
एकोनसप्ततितमः सर्गः ॥ ६९ ॥

[वं–७१]= [सप्ततितमः सर्गः] =[दा–६२]

१पू] रुधिर-क्लिन्न-गात्रस् तु लक्ष्मणः[11] शुभ-लक्षणः[11] ।
N] बभूव हृष्टस्[12] तं[12] हत्वा शक्र-जेतारम् आ-हवे ॥[13]१ ॥ [१
N] महाऽनुभावः कवची शुभ-लक्षण-संयुतः[14] ।
१उ] बभूव विक्षत-तनुः सम्-अरे तेन रक्षसा ॥२ ॥ [N
ततः[15] स[15] शरभं[16] वीरं जाम्ब-वन्तं[16] च वीर्य-वान् ।
२] सन्नि-वर्त्य महा-वेगांस् तांश् च सर्वान् वनौकसः ॥[17]३॥ [२

---

१. भ–संहृष्टाश्चैव ॥ २. भ–क्ष्वेडयन्तो । ३. म भ–नदन्तश् । ४. फ म भ–लब्धलक्षं ॥ ५. रा$_2$ फ म भ–०यन्तश्च वानराः । ६. रा$_2$ फ म भ–ततः ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–उच्चा बहुगुणा ॥ ८. रा$_2$ फ म–अवाप्य सम्प्रहृष्टाः । भ–अथाभिवीक्ष्य हृष्टाः । ९. रा$_2$ फ म भ–प्रियसुहृदो युधि ॥ १०. प्र भ–लंकाकांडे ॥ ११. भ–राघवस्यानुजो बली । १२. रा$_1$ ल$_2$ ब अ प्र रा$_2$ फ म–राक्षसं । १३. ल$_1$–नास्ति ॥ १४. फ–राजलक्ष्मणसम्मितः । म–लक्ष्मणो रामसंमतः । भ–लक्ष्मणः शुभलक्षणः ॥ १५. भ–लक्ष्मणो । १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–रभसं वीरं जा० । म भ–जाम्बवंतं च हनूमंतं । १७. भ–पूजयित्वा महातेजाः सह सर्वैः प्लवंगमैः ॥

आ-जगाम प्रहृष्टाऽऽत्मा[1] यत्र सुग्रीव-राघवौ ।
३] वि-भीषणम् अव-ष्टभ्य हनू-मन्तं च वानरम्[2] ॥४ ॥ [३
ततो[3] रामम् अभि-क्रम्य[3] सौमित्रिर् अभि-वाद्य च ।
४] तस्थाव् अदूर-तो भ्रातुः सोमस्येव[4] बृहस्-पतिः ॥५[5] ॥ [४
आ-चचक्षे[6] स धर्माऽऽत्मा[6] राघवाय वि-भीषणः । [५उ
६] छिन्नम् इन्द्र-जितः शीर्षं[7] लक्ष्मणेन महाऽऽत्मना ।
नि-वेदयित्वा रामाय तस्थौ हृष्टो वि-भीषणः ॥६[7] ॥ [६
७] विभीषण-वचः श्रुत्वा हर्ष-व्याकुल-लोचनः ।[8] [७पू
वि-भीषणं पुरस्-कृत्य हनू-मन्तं च वानरम्[9] ।[10] [३उ
N] जाम्ब-वन्तं च सु-ग्रीवं सं-पूज्य[11] च वनौकसः ॥७ ॥
शीघ्रम्[12] इक्ष्वाकु-शार्दूलं समाऽश्वासयताऽनु-जम् ।
N] रामस् त्व् इन्द्र-समो भ्राता लक्ष्मणं शुभ-लक्षणम् ॥८[13] ॥ [N
११उ] उप-वेश्य तम् उत्-सङ्गे परि-ष्वज्य च पीडितम्[14] । [१०पू
९उ] पीडितं सायकैर् दृष्ट्वा दुःखितो राघवोऽब्रवीत्[15] ॥९ ॥
१०पू] दुःख-हर्ष-युतो[16] रामः[17] स मूर्च्छित इवाऽऽबभौ । [N
उप-लभ्य ततः सं-ज्ञां लक्ष्मणं समुद्-ऐक्षत ॥[17]१०॥ [१०उ
१२] मूर्ध्नि चैनम् उपाऽऽघ्राय रामः[18] शूरम् उवाच ह ।[19] [१२पू

---

१. भ-ततः शीघ्रं । २. भ-वीर्यवान् ॥ ३. भ-ततः स राममभ्येत्य । ४. भ-इन्द्रस्येव । ५. अतः परमधिकः पाठः—भ-पप्रच्छ भ्रातरं रामः किं वृत्तमिति लक्ष्मणः (? म्) । अनिष्टमिव वागम्य राघवाय महात्मने ॥ ६. फ म-मथाचचक्षे ध० । ७. म-नास्ति । भ-नाचचक्षे यदा वीरः स्वयमिन्द्रजितो वधम् । रावणेस्तु शिरश्छिन्नं लक्ष्मणेन महात्मना । इत्येवं कथयामास तदा हृष्टो विभीषणः ॥ ८. भ-श्रुत्वैतन्महावीर्यो वीरेणेन्द्रजितं हतम् । अतः परमधिकश्च पाठः—भ-प्रहर्षमतुलं लेभे वाक्यमेतदुवाच ह । ९. रा$_2$ फ म-राघवः । १०. भ-नास्ति ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-संभाव्य । १२. रा$_2$ फ म-शूरम् । १३. भ-नास्ति ॥ १४. भ-राघवः ॥ १५. रा$_2$ फ-राघवस्तदा । १६. भ-०युतस्तत्र ॥ १७. भ-भ्रातरं लक्ष्मणं स्निग्धं पुनः पुनरुदैक्षत । १८. रा$_2$ फ-रामः शूरमुपागतं । भ-भूयः संस्पृश्य चातुरं । १९. अतः परमधिकः पाठः—भ-स तं शिरसि चाघ्राय लक्ष्मणं शुभलक्षणम् । लज्जमानं बलात्स्नेहादंकमध्ये न्यवेशयत् ॥ शल्यसंपीडितांगं तु निश्वसन्तं च लक्ष्मणम् । रामस्तु दुःखमापन्नस्तेन निश्वसता तदा ॥ साधु लक्ष्मण तुष्टोऽस्मि कर्म ते सुकृतं कृतम् । रावणोऽस्य विनाशेन हत इत्यवधारय ॥

भ्रातरं परमेष्वासम् आ-श्वास्य[1] पुरुषर्षभः ||[2]११||[१२
१३] कृतं परम-कल्याणं[3] कर्मेदं[4] दुष्-करं त्वया[4] ।[5] [१३पू
N] दुराऽवाऽऽपं[6] प्र-कृत्याऽद्य[7] वधेनेन्द्र-जितो[8] रणे ||[9]१२|| [N
निर्-अमित्रः[10] कृतोऽस्म्य् अद्य[10] निर्-यास्यति[11] हि[11] रावणः ।
१६] बल-व्यूहेन महता श्रुत्वा पुत्रं नि-पातितम् ||१३|| [१६
तं पुत्र-वध-सन्तप्तं निर्-यान्तं राक्षसेश्वरम्[12] ।
१७] बलेनाऽहं समा-साद्य हनिष्यामि रिपुं रणे ||[13]१४|| [१७
त्वया लक्ष्मण-नाथेन सीता च पृथिवी च मे ।
१८] न दुष्प्राऽऽपे हतो ह्य्[14] अद्य शक्र-जित्[14] सु-महा-बलः ||१५|| [१८
स तु भ्रातरम् आ-श्वास्य परि-ष्वज्य पुनः[15] पुनः[15] ।
१९] रामः सु-षेणं मुदितः[16] समवेक्ष्येदम् अब्रवीत्[16] ||१६|| [१९
शल्य-विद्धो[17] महा-प्राज्ञ सौमित्रिर् मित्र-नन्दनः ।
२०] यथा भवति[18] निः-शल्यस्[18] तथा त्वं कर्तुम् अर्हसि ||१७[19]||[२०
२३उ] विशल्य-करणीं[20] नाम ततो[21] हैम-वतीं[22] शुभाम्[23] ।
लक्ष्मणाय ददौ नस्यं[24] सु-षेणः परमौषधीम्[25] ||१८|| [२३उ

---

१. रा$_{2}$–लक्ष्मणं । २. भ–उवाच लक्ष्मणं वाक्यं राघवः पुरुषर्षभम् ॥ ३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$–सुकृतक० । म–सुकृतं क० । ४. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–कर्म दुःखकृतं त्वया । भ–कर्म दुष्करकारिणा । ५. अतः परमधिकः पाठः—भ–अद्य मन्ये हतं पापं रावणं राक्षसाधिपम् । अद्याहं विजयी शत्रौ हते तस्मिन् दुरात्मनि ॥ रावणस्य नृशंसस्य दिष्ट्या वीर त्वया रणे । छिन्नोऽस्य दक्षिणो बाहुः स हि तस्य व्यपाश्रयः ॥ विभीषणहनूमद्भ्यां कृतं कर्म सुदुष्करम् । अहोरात्रैस्त्रिभिर्वीरैः कथं युधि निपातितः ॥ ६. रा$_{1}$ ल$_{1}$ ब अ प्र–दुरवापं । म–०वाप्यं । ७. रा$_{2}$ फ म–प्रसह्याद्य । ८. म–वधमिन्द्र० । ९. भ–नास्ति ॥ १०. ल$_{1}$ फ म–निरमित्रं कृ० । भ–हतमित्रः कृतो ह्यद्य । ११. भ–स निर्यास्यति ॥ १२. भ–राक्षसाधिपं । १३. भ–बलेन महतावृत्य हनिष्ये रावणं रणे ॥ १४. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब प्र–यत्र इंद्रजित् । भ–यस्माच्छ० ॥ १५. रा$_{2}$ फ म–च वीर्यवान् । भ–च पीडितं । १६. भ–पार्श्वस्थं संभाष्येदमथाब्र० ॥ १७. प्र रा$_{2}$ फ म भ–सशल्योयं । १८. भ–वै भवति स्वस्थस् ॥ १९. अतः परमधिकः पाठः—भ–विशल्यः क्रियतां क्षिप्रं सौमित्रिः सविभीषणः । ऋक्षवानरसैन्यानां शूराणां द्रुमयोधिनाम् ॥ ये चान्ये व्रणितास्तत्र संग्रामे वानरर्षभाः । तेऽपि सर्वे प्रयत्नेन क्रियतां सुखिनस्त्वया ॥ एवमुक्तस्तु रामेण सुषेणो वानराधिपः ॥ २०. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र फ म–०णी । २१. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ म–वने । २२. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब–०वते । प्र–०वतः । २३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–शुभे । २४. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ–नस्ये । म–नस्तः । २५. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ म–०धी । प्र फ–०धं ॥

२४] स तस्या[1] गन्धम् आ-घ्राय[2] वि-शल्यः सम्-अपद्यत ।
तथा[3] निर्-वेदनश् चैव संरूढ-व्रण एव च ॥१९॥ [२४
२५] विभीषण-मुखानां च सु-हृदां[4] राघवाऽऽज्ञया[4] ।
२६पू] ताम् ओषधीं महा-बाहुः सु-षेणः प्र-ददौ तदा ॥[5]२०॥ [२५
ऋक्ष-वानर-योधानां [6]पर्वत-द्रुम-योधिनाम् ।[6] [२१उ
N] सम्-अरे प्रति-योधानां हरीणां च महा-बलः ॥[7]२१॥ [N
२६उ] ततः प्र-कृतिम् आ-पेदुर्[8] हृत-शल्या गत-क्लमाः[8] ।[9]
२७पु] सौमित्रि-प्रमुखाः सर्वे वानरा विगत-ज्वराः ।[10] [२६
२८पू] बभूवुर् मुदितास् तत्र प्राऽऽश्याऽमृतम्[11] इवाऽमराः ॥२२॥ [N
N] लक्ष्मणस् तु तदा हृष्टस् तथा[12] वानर-यूथपाः ।[13]
२८उ] उत्-साहं द्वि-गुणं प्राऽऽपुस्[14] तथा वीर्य-पराऽऽक्रमौ[15] ।
N] तुष्टुवुर् वानराः सर्वे सद्-वाग्भी राम-लक्ष्मणौ ॥[16]२३॥ [N
ततस्[17] तु[17] रामः प्लवगाऽधिपस् तथा
वि-भीषणश् चर्क्ष-पतिश् च जाम्ब-वान् ।
अवेक्ष्य सौमित्रिम् अ-रोगम् उत्थि(?दु-स्थि)तम्
N] तदा[18] स-सैन्याः सु-चिरं जहर्षिरे ॥२४॥ [२७
अपूजयत्[19] कर्म च[20] लक्ष्मणस्य
सु-दुष्करं दाशरथिर् महा-मतिः ।
बभूव हृष्टश् च रणे[21] दुरा-सदम्[21]
N] नि-शम्य तं शक्र-जितं तु[22] पातितम्[22] ॥२५॥ [२८

इत्यार्षे रामायणे युद्ध-काण्डे[23] युद्ध-विजयाऽऽख्यानं[24] नाम सप्ततितमः सर्गः ॥७०॥

---

१. प्र–तस्य । २. रा$_1$ ल$_1$ ल$_2$ ब अ–आदाय । ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$–तया ॥ ४. म–राघवस्तु तदाज्ञया । ५. भ–नास्ति ॥ ६. भ–ऋक्षवानरमुख्यानां चिकित्सामकरोत्तदा । ७. भ–नास्ति ॥ ८. भ–आपन्नो हृतशल्यो गतक्लमः । ९. अतः परमधिकः पाठः—भ–गतज्वरः क्षणे तस्मिन् सौमित्रिर्मित्रनंदनः । १०. रा$_2$ फ–नास्ति । भ–ते च शाखामृगाः सर्वे लक्ष्मणे विगतज्वरे । ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ–प्राप्यामृ० ॥ १२. रा$_2$ फ म–ते च । १३. भ–नास्ति । १४. म भ–प्रापास् । १५. भ–०क्रमाः । १६. म भ–नास्ति ॥ १७. भ–ततः स । १८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–मुदा ॥ १९. रा$_2$ फ म–०यन् । २०. भ–स । २१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–दुरासदस्तथा । रा$_2$ फ म–दुरासदस्तदा । २२. रा$_2$ फ म भ–निपा० ॥ २३. ब प्र भ–लंकाकांडे । म–युद्धपर्वणि । २४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–लक्ष्मणाश्वासनं । म–०जयाख्यापनो ॥

N] ततः पौलस्त्य-सचिवा वि-ज्ञायेन्द्र-जितं हतम् ।
२उ] वि-ज्ञापयामासुर् अथो रावणं सहितास् तदा ॥[1]१[2]॥ [१
N] न्य्-अवेदयन्त दुःखाऽऽर्ता वधम् इन्द्र-जितस् तु तम् ।[3] [N
३उ] विभीषण-सहायेन लक्ष्मणेन[4] दुर्-आत्मना[4] ॥२ ॥ [२उ
N] जयम् आ-कांक्षता राजन् हतो युद्धे सुतस् तव ।[5]
इत्य् एवं वचनं श्रुत्वा राक्षसेन्द्रो मुमूर्च्छ ह ॥[6]३ ॥ [N
७] स[7] सम्प्राऽऽप्य[7] चिरात् सं-ज्ञां राजा परम-दुःखितः[8] ।
पुत्र-शोकाऽर्दितो[9] दीनो वि-ललापाऽथ[10] रावणः[10] ॥४ ॥ [५
८] हा राक्षस-चमू-मुख्य[11] मम वत्स महा-रथ[12] ।
इन्द्र-जित् कथम् अद्य त्वं लक्ष्मणस्य वशं-गतः ॥५ ॥ [६
९] यस् त्वं कालम् अपि क्रुद्धो भिन्द्या मुष्टिभिर् आ-हवे ।[13]
मन्दरस्याऽपि शिखरं किं पुनर् लक्ष्मणं रणे[14] ॥६ ॥ [७
१०] अद्य वैवस्वतो राजा[15] भूयो बहु-मतो मम[16] ।
११पू] यो[17] हि योजितवांश् च त्वां[17] महता[18] काल-धर्मणा ॥७ ॥ [८
N] अ-वध्योऽसि हतः[19] सं-ख्ये देवाऽसुर-गणैर् अपि ।[20] [N

---

१. प्र–नास्ति । २. भ–ते प्रविश्य पुरीं लंकां हतशेषा निशाचराः । निकृत्तकवचा दीनाः प्रहारजनितश्रमाः ॥ ते तु सर्वे विमनसः सचिवा रावणिं तदा । लक्ष्मणेन हतं संख्ये रावणायाचचक्षिरे ॥ ३. प्र–नास्ति । भ–युद्धे हतो महाराज लक्ष्मणेन सुतस्तव । अतः परमधिकः पाठः—म–यथा हतो महाराज लक्ष्मणेन तवात्मजः । ४. भ–मिषतां नो महाद्युते ॥ ५. भ–लक्ष्मणेन हतः शूरः पुत्रस्ते विबुधेंद्रजित् । अतः परमधिकः पाठः—रा$_1$ फ म भ–शूरः संगम्य शूरेण संयुगे विनिपातितः । रा$_2$ फ म–विषण्णवदनास्ते तु रावणायाचचक्षिरे । रा$_2$ फ म भ–स्वर्गमिन्द्रजिद्यातः शरैः संतर्प्य लक्ष्मणं । स तं वधं प्रतिभयं श्रुत्वा पुत्रस्य रावणः ॥ घोरमिन्द्रजितः संख्ये कश्मलं महदाविशत् । स पुत्रवधसंतप्तः क्रूरः क्रोधवशं गतः ॥ ६. रा$_2$ फ भ–विसंज्ञश्च महाबाहुर्मुमोह च मुमूर्च्छ च ॥ ७. भ–उपलभ्य । ८. भ–राक्षसपुंगवः । ९. भ–०शोकाकुलो । १०. भ–०पाकुलेंद्रियः ॥ ११. भ–पुत्र राक्षसनाथ । १२. भ–महाबल ॥ १३. भ–ननु त्वमिषुभिः क्रुद्धो भिन्द्याः कालान्तकोपमः । १४. भ–युधि ॥ १५. भ–देवो । १६. फ–मया । १७. रा$_2$ फ म–येन त्वं योजितस्तात । भ–येनाद्य त्वं महाबाहो । १८. भ–संयुक्तः ॥ १९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–तदा । २०. भ–एषः पंथा सुयोधानां सर्वामरगणेष्वपि ।

यः[1] कृत्ये हन्यते[1] भर्तुः स पुमान्[2] स्वर्गम् अश्नुते ॥८ ॥ [९उ
१२] अद्य देव-गणाः सर्वे लोक-पालाः सहर्षिभिः[3] ।
हतम्[4] इन्द्र-जितं श्रुत्वा[4] सुखं स्वप्स्यन्ति निर्-भयाः ॥९ ॥ [१०
१३] अद्य लोक-त्रये[5] कृत्स्ना[5] पृथिवी च स-सागरा[6] ।
एकेनेन्द्र-जिता हीना शून्येव प्रति-भाति मे ॥१०॥ [११
१४] अद्य नैर्ऋत-कन्यानां श्रोष्याम्य्[7] अन्तः-पुरे रवम् ।
करेणु-संघस्य[8] यथा[8] नि-नादं[9] गिरि-गह्वरे ॥११॥ [१२
१५] यौवराज्यं बलं लङ्कां राक्षसांश्[10] च परं-तप[10] ।
मातरं मां च भार्यां च क्व नु[11] सं-त्यज्य गच्छसि[11] ॥१२॥ [१३
१६] ननु[12] त्वयेन्द्र-जिन् मह्यं गताय[12] यम-सादनम् ।
प्रेत-कार्याणि कार्याणि विपरीऽतम्[13] इदं गतम्[13] ॥१३॥ [१४
१७] स[14] त्वं[14] जीवति सु-ग्रीवे तथा[15] रामे स-लक्ष्मणे[15] ।
मम शल्यम् अन्-उद्धृत्य क्व नु[16] यास्यसि पुत्रक[16] ॥१४॥ [१५
१८] इति जल्पन्[17] स्मरंस् तस्य वृत्तानि[18] तनयस्य सः[19] ।
N] न शोकस्य गुणानां च[20] पारं गच्छति रावणः ॥१५[21]॥ [N
तं मध्य-गतम्[22] आसीनं रक्षसां[23] राक्षसाऽधिपम् ।
१९] आ-विवेश महान्[24] कोपः[24] पुत्र-व्यसन-सम्भवः ॥१६॥ [१६
घोरं प्र-कृत्या रूपं तु[25] तस्य कोपाऽभिमूर्च्छतः[25] ।
२०] बभूव रूपं[26] रुद्रस्य क्रुद्धस्येव[26] दुरा-सदम् ॥[27]१७॥ [२२

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ–त्रुटितः पाठः । प्र–कृत्वा कर्म मृतो । रा$_2$ भ–यत्कृते ह० । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–पुनः ॥ ३. भ–स्वथर्षयः । ४. भ–निहतं त्वां रणे दृष्ट्वा ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ–लोकास्त्रयः कृत्स्नाः । ६. रा$_2$ फ भ–सकानना ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–श्रोष्यन्त्य् । ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–यथा करीन्द्रः सिंहस्य । ९. रा$_1$ अ प्र फ भ–निनदं । भ–मर्दतां ॥ १०. भ–राक्षसैश्वर्यमेव च । ११. भ–गतोऽसि विहाय नः ॥ १२. भ–मम नाम त्वया वीर गतस्य । १३. रा$_2$ फ–०रीतं स्म वर्तते । भ–०रीतानि वर्तसे । भ–०तं हि वर्तते ॥ १४. रा$_2$ फ–शत्रौ । १५. भ–लक्ष्मणे च सराघवे । १६. रा$_2$ फ भ–कस्माद्व्रजसि पु० । भ–कस्मात्त्यक्ष्यसि जीवितं ॥ १७. रा$_2$–राजा । फ–बाल्ये । भ–बाल्यात् । १८. भ–वृत्तान्तं । १९. प्र रा$_2$ फ–च । २०. भ–वा । २१. भ–नास्ति ॥ २२. भ–मोहगतं । २३. भ–रावणं । २४. रा$_1$ ल$_1$ ल$_2$ ब अ–महाकायः ॥ २५. भ–च तस्य को० । भ–तु तत्र क्रोधाभिहरिथतः । २६. रा$_1$ ल$_1$ ल$_2$ ब–क्रुद्धरूपस्य रुद्रस्य च । २७. भ–नास्ति ॥

तस्य निर्-दशतो दन्ताञ् छुश्रुवे दन्त-निस्वनः ।
२४] यंत्रस्याऽऽवेष्ट्यमानस्य[1] महतो दानवैर् इव ॥१८॥ [२४
तस्य प्र-कृत्या रक्ताऽन्ते नेत्रे[2] क्रोधाऽग्निना तदा[3] ।
२१] रावणस्य महा-घोरे[4] रक्ते नेत्रे बभूवतुः ॥१९[5]॥ [२१
तस्य क्रुद्धस्य चक्षुर्भ्यां[6] प्राऽपतन् अश्रु-बिंदवः[7] ।
२२] दीप्ताभ्याम्[8] इव दीपाभ्यां[8] साऽर्चिषः[9] स्नेह-बिन्दवः[9] ॥२०[10]॥ [२३
राजा[11] काल इव क्रुद्धो[11] यां यां दिशम् अवैक्षत[12] ।
२५] तस्यां तस्यां भय-त्रस्ता राक्षसाः संनि-लिल्यिरे ॥२१॥ [२५
तम् अन्तकम् इव[13] क्रुद्धं चराऽचर-विषादिनम्[14] ।
N] वीऽऽक्षमाणं[15] दिशः सर्वा राक्षसा नोप-चक्रमुः ॥२२॥ [२६
प्रेक्ष्याऽपाऽङ्गेन[16] तेजस्वी[16] सं-रब्धो[17] राक्षसाऽधिपः[17] ।[18]
२६] अब्रवीन्[19] नैर्ऋतान्[19] सर्वान् संस्तम्भयिषुर्[20] (?)आ-हवे ॥[21]२३॥ [२७
मया वर्ष-सहस्राणि चरता[22] दुश्-चरं तपः ।
२७] तेषु तेष्व् अव-काशेषु स्वयं-भूश्[23] च प्र-सादितः[23] ॥२४॥ [२८
तस्यैव तपसो व्य्-उष्ट्या[24] प्र-सादाच् च स्वयं-भुवः ।[24]
२८] नाऽसुरेभ्यो[25] न देवेभ्यो[25] भयं मम कदा-चन ॥२५॥ [२९
कवचं ब्रह्म-दत्तं[26] मे[27] यन् नवाऽम्बुद-सन्निभम्[27] ।

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ–यत्तस्य वे० । प्र–यत्तस्य नदतो युद्धे ॥ २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म–भूयः । ३. भ–पुनः । ४. रा$_1$ ल$_1$ ल$_2$ ब–महाक्रोधे । ५. अतः परमधिकः पाठः—भ–प्रदीप्तो दीपयामास खमिवादित्यरश्मयः ॥ ६. म–नेत्राभ्यां । भ–नेत्रेभ्यः । ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–अस्रुबिं० । ८. रा$_1$ ल$_1$ ल$_2$ ब भ–दीप्तेभ्य इव दीपेभ्यः । ९. भ–०षस्तैलबिं० । १०. अतः परमधिकः पाठः—भ–ललाटे भृकुटीभिश्च संगताभिर्व्यरोचयत् । युगांते सह नक्राभिर्महोदधिरिवोर्मिभिः ॥ शोकाद्विजृम्भमाणस्य कोपाद् व्यक्तमिव ज्वलन् । निष्पपात सधूमोऽग्निर्वृत्रस्य वदनादिव ॥ ११. भ–स काल इव संक्रुद्धो । १२. भ–उदैक्षत ॥ १३. म–इति । १४. रा$_1$ ल$_1$ ल$_2$ ब–चचार रवि० । भ–दुर्निरीक्ष्य वि० । भ–०रभयावहं । १५. ल$_1$ ल$_2$ प्र रा$_2$–वीक्ष्यमाणं । भ–वीक्ष्यमाणाः ॥ १६. भ–ततः परमसंक्रुद्धो । १७. रा$_2$ फ–संरब्धांस्तांस्तदार्त्तवत् । भ–रावणो रा० । १८. म–नास्ति । १९. भ–०वीद् राक्षसान् ॥ २०. भ–०यितुम् । २१. रा$_1$–नास्ति ॥ २२. भ–चरितं । २३. भ–०भूः परितोषितः ॥ २४. भ–वृद्धया । २५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म–न सुरेभ्यो न भूतेभ्यो ॥ २६. रा$_2$ फ म भ–च प्रदत्तं । २७. म–च युद्धे मेऽस्तु० ।

२९] देवाऽसुर-विमर्देषु न भिन्नं वज्र-मुष्टिभिः[1] ॥[2]२६॥ [३०
तेन माम् अद्य सं-नद्धं[3] रथ-स्थम् इह सं-युगे[4] ।
३०] कः (? न) प्रतीऽयान्[4] मृधे जातु[4] साक्षाद् अपि पुरं-दरः ॥२७॥ [३१
यत् तदाऽति-प्रसादेन[5] स-शरं कार्मुकं महत् ।[5]
३१] देवाऽसुर-विमर्देषु मम दत्तं स्वयं-भुवा ॥२८॥ [३२
अद्य तूण-शतैर् मुख्यैर् धनुर् उत्था(द्-स्था)पयं(?ये)तु तत् ।[6]
३२] राम-लक्ष्मणयोर् एव वधाय परमाऽऽहवे ॥२९॥ [३३
स पुत्र-वध-सन्तप्तः शूरः क्रोध-वशं[7] गतः ।
३३] सम्-ईक्ष्य रावणो बुद्ध्या वैदेह्या[8] रोचयद् वधम्[8] ॥३०॥ [३४
प्रत्यवैक्षत तान् सर्वान् राक्षसान् घोर-दर्शनान् ।[9]
३४] दीनो[10] दीन-मुखान्[10] सर्वांस्[11] तान् उवाच निशा-चरान्[12] ॥३१॥ [३५
मायया मम वत्सेन त्रासनाऽर्थं[13] वनौकसाम् ।
३५] किं-चिद्[14] एव हि हत्वा यत्[14] सीतेयम् इति दर्शितम्[15] ॥३२॥ [३६
तद् इदं सत्यम् एवाऽहं[16] करिष्ये प्रियम् आत्मनः ।
३६] वैदेहीं सूदयिष्यामि क्षत्र-बन्धुम्[17] अनु-व्रताम् ॥३३॥ [३७
इत्य्-एवम् उक्त्वा सचिवान् खड्गम्[18] आशु पराऽऽक्रमात्[18] । [३८
३७] उद्-धृत्य[19] गुण-सम्पन्नं विमलाऽम्बर-दर्शनम्[20] ।
निष्-पपात[21] सु-वेगेन[21] समस्तैः[22] सचिवैः[22] सह ॥३४॥ [३९
३८] रावणः पुत्र-शोकेन भृशम् आकुल-चेतनः[23] ।

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ-वज्रघातनैः । २. प्र-नास्ति ॥ ३. भ-संयुक्तम-भेद्येन सुरासुरैः । ४. रा$_1$ ल$_1$ ल$_2$ ब अ-०यान्मृधेयाद्वा । भ-०यात् समासाद्य ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ रा$_2$ फ म-०प्रसादान्मे ॥ ६. रा$_1$ ल$_1$ अ प्र रा$_2$ म-अद्य तूर्यशतैर्मुख्यैर्धनुरुत्थापयंतु मे । भ-अद्य तूर्यप्रणादेन बलं संस्थाप्यतां महत् ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-शत्रुवशं । ८. भ-सीतां हंतुमवस्थितः ॥ ९. भ-प्रत्यवेक्ष्य च ताम्राक्षः सुघोरः पापदर्शनः । १०. रा$_2$ फ भ-दीनान् दीनमनाः । ११. रा$_2$ फ-स्त्रस्तांस् । १२. रा$_2$ फ म-०चरः ॥ १३. रा$_1$ ल$_1$ ल$_2$ ब अ-त्रासनार्थं । भ-वंचनार्थं । १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-किंचिदेव हि हत्वाऽन्यत् । भ-प्रतिमां सदृशीं कृत्वा । १५. म भ-०ता ॥ १६. भ-एवाऽद्य । १७. फ-०धर्मम् ॥ १८. रा$_1$ ल$_2$ ब अ प्र-चाऽऽकमचाप० । भ-खड्गं राक्षसपुंगवः । १९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-उत्सृज्य । २०. रा$_1$ ल$_1$ ल ब अ-०लं वर० । २१. म-०पाताथ वे० । भ-०पाताशु वे० । २२. प्र-सर्वार्थस० । रा$_2$ फ-सचापः स० । म-सर्वैश्च स० ॥ २३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-व्याकुललोचनः । भ-०लमानसः ।

खड्गं[1] क्रुद्धः समुद्-यम्य[1] स[2] गतो यत्र[2] मैथिली ।।[3]३५।।[४०
३९] व्रजन्तं राक्षसाः[4] प्रेक्ष्य सिंह-नादं प्र-चुक्रुशुः ।[5]
ऊचुश् चाऽन्योऽन्यम् आ-लिंग्य[6] सं-क्रुद्धं[6] प्रेक्ष्य रावणम्[7] ।।३६।।[४१
४०] अद्याऽयं[8] ताव्[8] उभौ दिष्ट्या नि-हनिष्यति राघवौ ।[9]
लोक-पाला हि चत्वारः क्रुद्धेनाऽनेन[10] निर्-जिताः । [४२
४१] बहवः शत्रवश् चाऽन्ये क्रुद्धेन[11] विनि-पातिताः[11] ।।३७[12]।।[४३पू
तेषां सं-जल्पमानानाम्[13] अशोकवनिका-गताम्[14] ।
४२] अभि-दुद्राव वैदेहीं रावणः[15] क्रोध-मूर्च्छितः[15] ।।३८।। [४४
वार्यमाणो बहु-विधं[16] सु-हृद्भिर् हित-बुद्धिभिः[17] ।[15]
४३] अभ्य्-अद्रवत[18] वैदेहीं[18] ग्रहः[19] खे[19] रोहिणीम् इव ।।३९।। [४५
कम्पयन् वसु-धां कोपात्[20] पाद-न्यासैर् द्रुतं[21] व्रजन् ।
४४] पुत्र-शोक-समाक्रान्तः स्त्री-वधे कृत-मानसः[22] ।।४०।। [N
४५पू] मैथिली रक्ष्यमाणा तु राक्षसीभिर् अ-निन्दिता ।[23] [४६पू
N] तं तथा क्रोध-रक्ताऽक्षम्[24] आ-यान्तं जनकाऽऽत्मजा ।।[25]४१।।[N
४५उ] ददर्श रावणं[26] क्रुद्धं निर्स्त्रिंश-वर-धारिणम् । [४६उ
तम् अवेक्ष्य[27] स-निस्त्रिंशं व्यथिता जनकाऽऽत्मजा ।।४२[28]।।
४६] नि-वार्यमाणं[29] सचिवैर्[29] मनसैवं व्य्-अचिन्तयत् । [४७पू

---

१. रा१-खड्गी क्रुद्धः स० । भ-तं क्रुद्धं खड्गहस्तं तु । २. भ-व्रजंतं यत्र । रा२ फ-सहसा येन । ३. म-नास्ति ॥ ४. रा२ फ-राक्षसं । ५. म-नास्ति । भ-सहसा राक्षसाः प्रेक्ष्य सिंहनादमथानदन् । ६. रा१ ल१ ल२ ब अ प्र-आश्लिष्य व्रजंतं । ७. रा२ फ म भ-राक्षसाः ॥ ८. रा१ ल१ ल२ ब अ प्र-अद्य पापाद्० । प्र रा२ फ म-दृष्ट्वा । ९. भ-अद्य तौ राघवौ राजा संयुगे प्रमथिष्यति । १०. भ-क्रुद्धेनैतेन । ११. भ-संयुगेषु नि० । १२. अतः परमधिकः पाठः-भ-बहूनि चैव रत्नानि भुंक्ते चाहृत्य रावणः । विक्रमे च बले चैव नास्त्यस्य सदृशो भुवि ॥ १३. रा१ ल१ ल२ ब अ प्र-जल्पायमा० । भ-०ल्पतामेव । १४. रा२ फ म-०कां गतः । १५. रा१ ल१ ल२ ब अ प्र-नास्ति ॥ १६. भ-सुसंक्रुद्धः । १७ भ-साध्वुत्तु० । १८. रा१ ल१ ल२ ब अ प्र-नास्ति । भ-अभ्यधावत संक्रुद्धः । १९. रा१ ल१-ग्रहो वै । ल२ ब अ प्र-ग्रहो वै ॥ २०. रा२ फ म भ-क्रोधात् । २१. भ-दृढं । २२. भ-कृतनिश्चयः ॥ २३. अतः परमधिकः पाठः—रा१ ल१ ल२ ब अ प्र रा फ-चिंतयंती रणगतं सानुजं राघवं सती । २४. प्र म-क्रोधदीप्ताक्षं । रा२ फ-क्रोधताम्राक्षं । २५. भ-नास्ति ॥ २६. भ-राक्षसं । २७. भ-निशाम्य । २८. रा१ ल१ ल२ ब अ प्र म-नास्ति ॥ २९. भ-०माणे तस्मिंश्च ।

यथाऽयं समभि-क्रुद्धः[1] समभि-द्रवति[2] स्वयम् ॥४३॥
४७] हन्तुम्[3] इच्छति पापाऽऽत्मा[3] रावणो[4] माम् अनाथ-वत् । [४८
बहु-शश्[5] चोदयानोऽपि[5] भर्तारं माम्[6] अनु-व्रताम्[6] ॥४४॥
४८] भार्या मम भवाऽद्येति[7] स निर्-अस्तस् ततो मया ।[8] [४९
सोऽयं मद्-अनवस्थानाद्[9] व्य्-अक्तं नैराश्यम्[10] आ-गतः[10] ॥४५॥
४९] काम-क्रोध-समाविष्टो[11] मां हन्तुम् उप-सर्पति । [५०
अथवा तौ नर-व्याघ्रौ भ्रातरौ राम-लक्ष्मणौ ।
५०] मन्-निमित्तम् अन्-आर्येण सम्-अरे विनि-पातितौ ॥४६॥ [५१
सम्प्रत्य्[12] एव हि लङ्कायां रक्षसां तुमुलः स्वनः ।
५१] बहूनां[13] सम्प्र-हृष्टानां[13] मया प्र-क्रोशतां[14] श्रुतः ॥४७॥ [५२पू
अथवेन्द्र-जितं श्रुत्वा लक्ष्मणेन रणे हतम् ।
५२] सं-तप्तः[15] पुत्र-शोकेन मां हन्तुम्[16] उप-सर्पति ॥४८॥ [N
अथवा राज-पुत्रौ तौ[17] वि-नाश्य क्रूर-निश्चयः ।
N] तथैवाऽमर्ष-सम्पूर्णो मां[18] हनिष्यति[18] रावणः ॥४९॥ [५३
अहो धिङ् मन्-निमित्तोऽयं[19] वि-नाशो राज-पुत्रयोः । [५२उ
५३] हनू-मतो हि तद् वाक्यं न कृतं क्षुद्रया मया ॥५०॥ [५४
यद्य् अहं तस्य पृष्ठेन[20] तदा यास्ये[21] नि-मन्त्रिता ।
५४] अद्य तावन् न रोदिष्ये ज्ञात्वाऽन्-इष्टां गतिं गतौ ॥[22]५१॥ [५५
मन्येऽद्य[23] तस्या हृदय[23] श्वश्वा मे प्र-स्फुटिष्यति ।
५५] एक-पुत्रा यदा[24] पुत्रं वि-नष्टं[25] श्रोष्यते युधि[26] ॥५२॥ [५६

---

१. भ—मामतिक्रुद्धः । २. रा$_1$ ल$_1$ ल$_2$ ब अ—मामेवाभिमुखः ॥ ३. भ—हिंसयिष्यति दुष्टात्मा । ४. रा$_2$ फ म भ—सनाथां । ५. भ—०शः प्रेरयन्मां हि । ६. भ—समनु० ॥ ७. रा$_2$—भवस्वेति । ८. भ—भव त्वं मम भार्येति निरस्तं तद्वचो मया । ९. भ—ममानुपस्था० । १०. रा$_2$ म—०श्यतां गतः ॥ ११. भ—क्रोध-शोकस० ॥ १२. भ—इदानीम् । १३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—वसूनामिव हृ० । रा$_2$ फ म—बहूनामिव हृ० । १४. भ—विक्रो० ॥ १५. भ—पीडितः । १६. भ—नास्ति ॥ १७ रा$_1$—तु । १८. प्र रा$_2$ फ म भ—वधिष्यति ॥ १९. रा$_1$ ल$_1$ ल$_2$ ब—०त्तं यो ॥ २०. रा$_1$ ल$_1$ ब—पृष्ठे तु । २१. भ—यायां । २२. रा$_2$ फ म—नाद्य तावत्तु शोचिष्ये भ्रष्टानिष्टां ग० । भ—नाद्याहमनुशोचेयं भर्तुरंकगता सती । अतः परमधिकश्च पाठः—भ—आर्यौ तावन्न शोचामि भ्रातरौ रामलक्ष्मणौ ॥ २३. भ—मन्ये तु हृदयं तस्या । २४. रा$_1$ ल$_1$ ल$_2$ ब अ—स्वकं । २५. रा$_1$ ल$_1$ ल$_2$ ब अ—नष्टं वै । २६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—यदि ॥

सा हि जन्म च बाल्यं च यौवनं बलम्[1] एव च[1] ।
५६] धर्म-कार्याणि रूपं च रुदती चिन्तयिष्यति ॥५३॥ [५७
निशाचर-हते[2] पुत्रे दत्त्वा[3] श्राद्धम्[3] अ-चेतना ।
५७] अग्निम् आ-रोक्ष्यते नूनं प्रायं वोप-गमिष्यति[4] ॥५४॥ [५८
धिग् अस्तु कुब्जाम् अ-सतीं मन्थरां पाप-निश्चयाम्[5] ।
५८] यन्-निमित्तं महा-दुःखं[6] कौसल्या प्रति-पत्स्यते ॥५५॥ [५९
इत्य् एवं मैथिलीं प्रेक्ष्य[7] वि-लपन्तीं[7] तपस्विनीम् ।
५९] रोहिणीम् इव चन्द्रेण वि-ग्रहेण[8] न सं-गताम्[8] ॥[9]५६॥ [६०
६०उ] सु-पार्श्वो[10] नाम मेधावी राक्षसो[11] राक्षसेश्वरम् ।
नि-वार्यमाणं सचिवैर् इदं वचनम्[12] अब्रवीत्[12] ॥५७॥ [६१
६१] कथं[13] नाम दश-ग्रीव साक्षाद् वि-श्रवसः सुतः ।
हन्तुम् इच्छसि वैदेहीं कं[14] वा धर्मम्[14] अनु-स्मरन् ॥५८॥ [६२
६२] विद्या-वेद-व्रत-स्नातः स्व-धर्म-निरतः सदा ।[15]
स्त्रियः कस्माद् वधं राजन् मन्यसे राक्षसाऽधिप ॥[16]५९॥[६३
६३] इष्ट-यज्ञस्य भवतः कुले जातस्य चोत्-तमे ।
स्त्री-वधो नाऽनु-रूपो[17] वै[17] वि-शेषेण मनस्विनः ॥६०॥ [N
६४] मैथिलीं रूप-सम्पन्नाम्[18] अपाऽस्य[19] प्रिय-दर्शनाम्[19] ।[20]
तस्मिन्न् एव परे[21] दीप्ते[21] राघवे[22] क्रोधम् उत्-सृज[22] ॥६१॥ [६४
६५] अभ्युत्था (?द्-स्था) नं[23] तु युद्धाऽर्थे[23] कृष्ण-पक्षे चतुर्-दशीम् ।

---

१. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ म–च महात्मनः ॥ २. भ–निराशा निहते । ३. रा$_{2}$ फ–श्रुत्वा श्वश्रूर् । ४. रा$_{2}$ म भ–चोप० ॥ ५. रा$_{2}$ फ भ–पापदर्शनां । ६. भ–इदं दुःखं ॥ ७. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–पश्यन् वि० । भ–प्रेक्ष्य चिंतयंतीं । ८. रा$_{2}$ फ म–बिना ग्रहवशं गतां । ९. अतः परमधिकः पाठः—भ–एतस्मिन्नन्तरे तत्र अमात्यो बुद्धिमाञ्छुचिः ॥ १०. भ–अविंध्यो । ११. भ–रावणं । १२. भ–वाक्यमुवाच ह ॥ १३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब–कामं । १४. रा$_{2}$ फ म–कोपाद्धर्मम् । भ–क्रोधाद्धर्म्यम् ॥ १५. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ–०वेदरतस्नात स्वं ध० । भ–०तः स्नातः स्वधर्मे नियतेन्द्रियः । १६. भ–कस्मात्त्वं स्त्रीवधं घोरं कर्तुमर्हसि रावण ॥ १७. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ–०पोऽयं । प्र–०पो हि ॥ १८. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र फ–रूपमाप० । १९. रा$_{2}$ फ म–०स्य च सुद० । भ–प्रत्यवेक्ष्य सुद० । २०. अतः परमधिकः पाठः—म–फाल्गुनश्चैव मासोऽयं राक्षसानां भयावहः । त्वं च लब्धवरः शूर हनिष्यसि च राघवम् ॥ २१. रा$_{2}$ फ म–रणे दीप्ते । भ–समासाद्य । २२. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–राघवः क्रोधमूर्च्छितः ॥ २३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–०स्यास्यति कुब्जस्य । रा$_{2}$ फ–०नं हि यु० । म–०नं च यु० ।

कृत्वा[1] निर्-याह्य् अमावस्यां वि-जयाय बलैर् वृतः ॥६२॥ [६५
६६] निः-संशयं शरी खड्गी[2] रणे रथ-वरे स्थितः[2] ।
हत्वा दाशरथिं रामं राजन्[3] प्राऽऽप्स्यसि मैथिलीम् ॥६३॥ [६६
६७] एवम् उक्त्वा तु तद् राज्ञो[4] बलात् सं-गृह्य वीर्य-वान् ।
अपाऽकर्षत वैदेह्याः सकाशाद् राक्षसेश्वरम् ॥६४॥ [N
६८] समवेक्ष्य[5] च वैदेह्या रूपं सर्वगुणाऽन्वितम्[6] ।
६९पू] ननाशैक-पदे रोषो रावणस्य दुर्-आत्मनः ॥६५॥ [N
स[7] निन्दिताऽऽत्मा[7] सु-हृदा नि-वेदितं
वचः स्व-धर्म्यं[8] प्रति-गृह्य[8] रावणः ।
गृहं जगामाऽथ ततः[9] स वीर्य-वान्[9]
N] पुनः सभां चाऽभि-ययौ[10] सुहृद्-वृतः[10] ॥६६॥ [६७

इत्यार्षे रामायणे युद्ध-काण्डे[11] सुपार्श्व-वाक्यं[12]
नामैकसप्ततितमः सर्गः[12] ॥ ७१ ॥

[वं-७२]= [द्विसप्ततितमः सर्गः] =[दा-९४]

स प्र-विश्य सभां राजा दीनः परम-दुःखितः ।
१] नि-पपाताऽऽसने[13] मुख्ये[14] सिंहः क्रुद्ध इव श्वसन् ॥१ ॥ [१
उवाच स तदा सर्वान् बल-मुख्यान् महा-बलः ।[15]
२] रावणः प्राऽञ्जलीन्[16] वाक्यं पुत्र-व्यसन-कर्षितः[17] ॥२ ॥ [२
सर्वे[18] भवन्तः सर्वेण[18] हस्त्य्-अश्वेन समा-वृताः[19] ।

---

१. रा$_1$, ल$_1$, ल$_2$ ब अ प्र फ म-स त्वं ॥ २. भ-धन्वी रणे स्यन्दनमास्थितः। ३. भ-पुनः ॥ ४. रा$_2$ फ म-रक्षो ॥ ५. रा$_1$ ल ल ब अ प्र भ-०वेत्य। ६. रा$_1$ अ प्र-सत्यगु० । ल$_1$ ल$_2$ ब-सत्वगु० ॥ ७. रा$_2$ फ म भ-एतद् दुरात्मा। ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-सधर्मं परिगृह्य । ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-ततः स शोचन् । भ-निशाचरेश्वरः । १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-०ययौ सुहृद्भिः । रा$_2$ फ-०ययौ सुहृद्वृतः । भ-प्राप सुहृद्गणैर्वृतः ॥ ११. प्र भ-लंकाकांडे । म-युद्धपर्वणि। १२. म-रावणकोपो ना० । भ-सीतावधनिवारणं ॥ १३. रा$_2$ फ म भ-निषसादासने। १४. भ-दिव्ये ॥ १५. भं-अब्रवीच्च तदा सर्वान् बलाध्यक्षानुपस्थितान्। १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-०लिः । १७. भ-इन्द्रजिद्वधशंकितान् ॥ १८. रा$_1$-समेऽमात्याश्च पूर्वेण। ल$_1$ ल$_2$ ब अ प्र-सर्वेऽमात्याश्च पूर्वेण। १९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-सुदंसिताः । रा$_2$ फ-सुदंशिताः । म-च संवृताः ।

३] निर्-यान्तु रथ-सङ्घैश्[1] च पदातैश् चोप-शोभिताः[1] ॥३ [2]॥[३
N] एवं[3] रामं समा-क्षिप्य[3] सम्-अरे हन्तुम् अर्हथ ।[4]
४उ] प्र-वृद्धाः शर-वर्षेण प्रावृषीऽव बलाहकाः[5] ॥४ ॥[४
अथवाऽहं शरैस् तीक्ष्णैर् भिन्न-मर्माणम् आ-हवे ।
५] सर्वैः सह भवद्भिस् तं रामं धक्ष्यामि[6] सं-युगे ॥५ [7]॥[५
इत्य् एवं[8] वाक्यम् आ-दाय[8] राक्षसेन्द्रस्य राक्षसाः ।
६] निर्-ययुस् ते[9] रथैः शीघ्रं[10] नागाऽनीकैश् च सं-वृताः[11] ॥६ [12]॥[६
स सं-ग्रामोऽभि-तो[13] भीमः[13] सूर्यस्योद्-अयनं प्रति ।
८] रक्षसां वानराणां च तुमुलः[14] सम्-अपद्यत[14] ॥७ [15]॥[९
९पू] ते[15] गदाभिर्[16] वि-चित्राभिः प्राऽऽसैः[17] खड्गैः परश्वधैः ।[18]
N] अन्योऽन्यं सम्-अरे जघ्नुस् तदा वानर-राक्षसाः ॥[15]८॥ [१०
हतानां युधि वीराणां तत्र[19] वानर-रक्षसाम् ।
११] सं-ख्या न शक्यते कर्तुं बहु-त्वाच् च ततस् तदा ॥९[20]॥ [११
मातंग-रथ-कूर्माश्[21] च शर-मत्स्या[21] ध्वज-द्रुमाः ।
१२] शरीर-संघात-वहाः सुस्रुवुः[22] शोणिताऽऽपगाः[23] ॥१०॥ [१२

---

१. रा₁-संघेन पदातैश्चैव शोभिनः । ल₁ ल₂ ब अ प्र-०संघेन पादातैश्चैव शोभिनः । रा₂ फ-०संघैश्च पदातैश्चाभिशो० । २. अतः परमधिकः पाठः—भ-नानाच्छत्रध्वजाकीर्णा भूषणोत्तमभूषिताः ॥ ३. प्र-एकं रामं स० । रा₂ फ म भ-एकं रामं परिक्षिप्य । ४. अतः परमधिकः पाठः—भ-सर्वतः सर्वयत्नेन रणकर्मणि पंडिताः । ५. भ-बाणवर्षाणि मुंचंतः प्रवृद्धा इव तोयदाः ॥ ६. रा₁ ल₁ ल₂ ब अ प्र-वध्यामि । ७. भ-पश्चादहं शितैस्तीक्ष्णैर्भिन्नगात्रं महारणे । पत्रिभिर्पोथयिष्यामि रामं लोकस्य पश्यतः ॥ ८. भ-एतद्वाक्यमाज्ञाय । ९. प्र फ-तै । १०. भ-शीघ्रैर् । ११. रा₂ फ म-भूषिताः । भ-संहताः । १२. अ-नास्ति । अतः परमधिकः पाठः—भ-शूराः शूलगदाहस्तास्तोमरासिपरश्वधैः । निर्ययू राक्षसव्याघ्राः सिंहा इव मदोत्कटाः ॥ १३ रा₂ फ म-०मोऽभवन्नीभः । भ-०मोऽभवद्घोरः । १४. भ-०लो लोमहर्षणः । १५. अ-नास्ति ॥ १६. रा₁ ल₁ ल₂ ब अ-गदाभिश्च । १७. म-पाशैः । १८. अतः परमधिकः पाठः—भ-वानरान् समरे जघ्नुर्विनदंतो महारथाः । वानरा राक्षसान् वृक्षैर्मुष्टिभिर्दशनैस्तथा ॥ गिरिशृङ्गैः शिलाभिश्च प्रापयन् यमसादनम् ॥ १९. रा₁ ल₁ ल₂ ब अ प्र-तदा । २०. भ-नास्ति ॥ २१. रा₁ ल₁ ल₂ ब अ प्र रा₂ फ म-०रथशार्दूला रथमत्स्या । २२. रा₁ ल₁ ल₂ ब अ प्र-सुस्रुवे । भ-प्रसस्रुः । २३. रा₁ अ प्र-०पगा ॥

ध्वज-चर्म-रथान्[1] नागान्[2] नाना-प्रहरणानि च ।
१३] आ-प्लुत्याऽऽप्लुत्य सम्-अरे[3] वानरेन्द्रा बभञ्जिरे ॥११॥ [१३
केश-कर्ण-ललाटांश्[4] च नासिकाश्[4] च प्लवं-गमाः ।
१४] रक्षसां दशनैस् तीक्ष्णैर् नखैश् च[5] वि-चकर्त्तिरे ॥१२॥ [१४
एकैकं राक्षसं सं-ख्ये शतं वानर-पुङ्गवाः[6] ।
१५] अभ्य्-अधावन्त बलिनो वृक्षं शकुनयो यथा ॥१३॥ [१५
ते गदाभिः खड्गैश् च परि-घैः पट्टिशैस् तथा[7] ।
१६] नि-जघ्नुर् वानरान् घोरान् राक्षसाः पर्वतोत्तमान्[8] ॥१४[9]॥[१६
राक्षसैर् वध्यमानानां वानराणां महा-चमूः ।
N] शरण्यं शरणं याता रामं दशरथाऽऽत्मजम् ॥१५[10]॥[१७
ततो रामो महा-तेजा धनुर् आ-दाय वीर्य-वान् ।
१७] प्र-विश्य राक्षसं सैन्यं शर-वर्षं ववर्ष सः ॥१६[10]॥[१८
प्र-विष्टं राक्षसं सैन्यं घनैः[11] सूर्यम् इवाऽऽवृतम्[11] ।
१८] नाऽभि-जज्ञे[12] तदा रामं निर्-दहन्तं शराऽर्चिषा[13] ॥१७॥ [१९
नि-कृत्ता[14] युधि रामेण घोरास् ते[15] रजनी-चराः[15] ।
१९] रणे रामस्य[16] ददृशुः कर्माण्य् अ-सुकराणि ते ॥१८॥ [२०
चालयन्तम्[17] अनीकानि क्षपयन्तं[17] महा-रथान् ।
२०] न ते ददृशिरे रामं वातं[18] घन-गतं[18] यथा ॥१९॥ [२१
छिन्नं भिन्नं[19] विपर्य्-अस्तं प्र-भग्नं[19] शस्त्र-पातितम्[20] ।
२१] बलं रामेण[21] ददृशुर् न[21] रामं शीघ्र-कारिणम्[22] ॥२०॥ [२२
प्र-हरन्तं शरीरेषु न ते[23] पश्यन्ति[23] राघवम् ।
२२] इन्द्रियाऽर्थेषु वर्तन्तं[24] भूताऽऽत्मानम् इव प्र-जाः ॥२१॥ [२३

---

१. रा$_2$ फ म–ध्वजच्चर्म० । २. भ–अश्वान् । ३. भ–वेगेन ॥ ४. भ–०टं च नासिका । ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–चैव च० ॥ ६. भ–०रयूथपाः ॥ ७. भ–०ते गदाभिश्च गुर्वीभिः पट्टिशैः परिघैरपि । ८. भ–०तोपमाः । ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–नास्ति ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–नास्ति ॥ ११. भ–मेघं सूर्यमिवाम्बरे । १२. रा$_2$ फ म–०जग्मुस् । १३. प्र–शराग्निना ॥ १४. रा$_2$–विकृता यु० । भ–कृत्तान्येव घोराणि रामेण । १५. म–युधि राक्षसाः । १६. भ–चित्राणि ॥ १७. भ–दलयंतं महानीकं विधमंतं । १८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–सिंहं वनगतं । भ–वायुं व्योमगतं ॥ १९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–छिन्नं छिन्नमपर्यस्तं प्रभिन्नं । म–छिन्नं छिन्नं शरैर्दग्धं प्र० । भ–०न्नं शरैर्दग्धं प्र० । २०. भ–शरताडितं । २१. म–रामस्य । २२. ल$_1$–तिष्ठंतं विप्रका० ॥ २३. रा$_2$–तं प० । भ–पश्यन्ति स्म । २४. ल$_2$ ब–तिष्ठंतं ॥

एष हन्ति गजाऽनीकम् एष हन्ति महा-रथान् ।
२३] एष हन्ति शरैस् तीक्ष्णैः पदातीन् वाजिभिः[1] सह ॥२२[2]॥[२४
अथ रामो महा-तेजा युध्यताम् एव रक्षसाम् ।
२४] प्र-ज्ञाम् अपाऽहरत् तेषां[3] मोहनाऽस्त्र-बलेन च[3] ॥२३॥ [N
ते वि-मूढा[4] वि-संज्ञाश् च राम-भूतम् इदं जगत् ।
२५] ददृशू राक्षसास् तत्र[5] ततो जघ्नुः परस्परम् ॥२४॥ [N
२६पू] अन्योऽन्यं स-हिता[6] जघ्नुः शक्ति-शूल-परश्वधैः । [२५उ
मोहिताः परमाऽस्त्रेण गान्धर्वेण[7] महाऽऽत्मना ।[8]
२७] न ते ददृशिरे रामं नि-घ्नन्तम् अरि-वाहिनीम् ॥[9]२५॥ [२६
ततो[10] राम-सहस्राणि रणे[11] पश्यन्ति राक्षसाः[11] ।
२८] पुनः पश्यन्ति काकुत्स्थम् एकम् एव महा-रणे[12] ॥२६[13]॥[२७
भ्रमन्तीं काञ्चनीं कोटीं कार्मुकस्य महाऽऽत्मनः ।
२९] अलात-चक्र-प्रतिमां ददृशुस् ते निशा-चराः[14] ॥२७॥ [२८
सूर्य-मण्डल-सम्भूतं[15] रश्मि-जालम् इवाऽम्बरे ।
३०] शर-जालं ददृशिरे राघवस्य धनुश्-च्युतम् ॥२८॥ [N
शररश्मिसहस्रौघं[16] मध्याऽह्नाऽऽदित्य-सन्निभम् ।
३१] चरन्तं दिक्षु सर्वासु न शेकुस् तम् उद्-ईक्षितुम् ॥२९[17]॥ [N
शरीर-नाभि-सत्त्वाऽर्चिश्[18] चापनेमिरथोदितम् ।[19]
३२] ज्या-घोष-तल-निर्घोषं तेजो-बुद्धि-गुण-प्रभम् ॥३०॥ [२९

---

१. म–वानरैः । २. अतः परमधिकः पाठः—भ–एवमेव हि तान् सर्वान् राक्षसान् निशितैः शरैः । सूदयत्यथ काकुत्स्थः कुंजरान्वाजिनस्तथा ॥ इति ते राक्षसाः सर्वे वाक्यमूचुस्तदा युधि ॥ ३. भ–तत्र मोहनास्त्रेण संयुगे ॥ ४. रा$_1$–विरूढा । ५. म–सर्वे ॥ ६. भ–कुपिता । ७. रा$_1$ ल$_1$ ल$_2$ ब भ–गंध० । ८. अतः परमधिकः पाठः—भ–राक्षसाः समरे शूराः सहसा राघवस्य ते । ९. भ–न पश्यंति स्म तं रामं निघ्नंतो हरिवाहिनीम् ॥ १०. भ–ते तु । ११. भ–रणेऽपश्यन्निशाचराः । १२. रा$_2$ फ म भ–महाहवे । १३. अतः परमधिकः पाठः—भ–निसूदयंतं रक्षांसि कालाग्निमिव दुःसहम् ॥ १४. भ–न राघवं ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०लसंकाशं ॥ १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–०हस्राढ्यं । १७. अतः परमधिकः पाठः—भ–राघवस्य रणे शत्रून्निघ्नतः शीघ्रकारिणः ॥ १८. रा$_2$ फ–०सत्त्वार्चिश् । म–०संध्यार्चिश् । १९. भ–शरार्चिषं दिव्यनाभि शतारं दिव्यकार्मुकम् ॥

दिव्याऽस्त्र-ग्राम-सम्पन्नं[1] बभौ[2] शरशताऽऽकुलम्[2] ।
३३] राम-चक्रं[3] वर्तमानं काल-चक्रम् इवाऽपरम्[4] ॥३१॥ [३०
ददृशुः सर्व-भूतानि नि-घ्नन्तं[5] सर्व-रक्षसाम्[5] ।
N] अनीकं शत-साहस्रं रथानां वात-रंहसाम् ॥[6]३२॥ [N
३४उ] अष्टादश-सहस्राणि[7] कुञ्जराणां तरस्विनाम् । [३१उ
N] चतुर्दश-सहस्राणि[8] साऽऽरोहाणां च वाजिनाम् ।
३५पू] पूर्णे शत-सहस्रे द्वे पदातीनां च रक्षसाम् ॥३३[9]॥[३२
३४पू] निमेषाऽन्तर-मात्रेण[10] शरैर् अग्निशिखोपमैः । [३१पू
हतान्य् एकेन रामेण लीलया विदिताऽऽत्मना ॥३४॥ [३३उ
३६] ते हताऽश्वा हत-रथाः श्रान्ता[11] विगलित-ध्वजाः ।
अभि-पेतुः पुरीं लंकां हत-शेषा निशा-चराः ॥३५॥ [३४
३७] नि-हतैर्[12] अथ(?श्व-)पादातैस् तद् बभूव[12] रणाऽजिरम् ।
आ-क्रीडम् इव रुद्रस्य क्रुद्धस्येव[13] महाऽऽत्मनः[13] ॥३६॥ [३५
३८] ततो देवाः स-गन्धर्वाः सिद्धाश् च परमर्षयः ।
साधु साध्व् इति रामस्य तत् कर्म सम्-अपूजयन्[14] ॥३७॥ [३६
३९] अब्रवीच्[15] च[15] तदा रामः सु-ग्रीवं तद्-अनन्तरम्[16] । [३७पू
४०पू] एतद्[17] अस्त्र-बलं सौम्य मम वा त्र्यम्बकस्य वा ॥३८[18]॥[३८उ
नि-हत्य[19] तां राक्षस-वाहिनीं स[20]
रामस् तदा शक्र-सम-प्रभावः[21] ।
अस्त्रेण दिव्येन गत-क्लमोऽभूत्[22]
N] सं-स्तूयते[23] देव-गणैः प्र-हृष्टैः[23] ॥३९॥ [३९

इत्यार्षे रामायणे युद्ध-काण्डे[24] रामाऽस्त्रयुद्धं[25] नाम द्विसप्ततितमः सर्गः[25] ॥७२॥

---

१. प्र रा$_2$ फ–०स्त्रगुणसं० । भ–०स्त्रगुणसंछन्नं । २. रा$_1$ ल$_1$ ल$_2$ ब–बभौ शरतल्पाकु० । भ–निघ्नंतं युधि राक्षसान् । ३. रा$_1$ ल$_1$ ल$_2$ ब अ रा$_2$–रामं चक्रं । ४. भ–इव प्रजाः ॥ ५. रा$_2$ फ म भ–दहन्तं सर्वराक्षसान् । ६. रा$_1$ ल$_1$ ल$_2$ ब म–नास्ति ॥ ७. भ–अष्टाशीतिस० । ८. भ–चतुःषष्टिस० । ९. भ–त्रिंशच्छतसहस्राणां ॥ १०. भ–विक्षेपांत० ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब अ–सर्वे । १२. भ–हतैरथ पादातैश्च संब० । १३. भ–०स्याभिघ्नतः पशून् ॥ १४. म–स्वभिपू० ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०वीत्तु । १६. भ–सविभीषणं । १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–यत्तद् । १८. अतः परमधिकः पाठः— भ–तृतीयस्य कपिश्रेष्ठ लोकेनाऽन्यस्य कस्यचित् ॥ १९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–निष्पिष्य । २०. रा$_2$ फ–च । भ–तु । २१. रा$_2$ फ–०समो महात्मा । भ–ब्रह्मसमो महात्मा । २२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–जितक्ल० । रा$_2$ फ म–जितक्लमः सः । भ–जितक्लमश्च । २३. भ–देवैस्तदास्तूयत संप्रहृष्टैः ॥ २४. प्र भ–लंकाकांडे । म–युद्धपर्वणि । २५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–राक्षसवधो ना० । भ–गन्धर्वास्त्रयुद्धं ॥

तानि नाग-सहस्राणि साऽऽरोहाणां[1] च वाजिनाम् ।
१] रथानाम्[2] अग्नि-वर्णानां[2] स-ध्वजानां वरूथिनाम् ॥१ ॥ [१
पदातीनां[3] सहस्राणि[4] गदा-परिघ-योधिनाम्[4] ।
२] अतीव भीम-रूपाणां काञ्चन-ध्वज-वर्मिणाम्[5] ॥[6]२ ॥ [२
नि-हतानि शरैस्[7] तीक्ष्णैस्[7] तप्त-काञ्चन-भूषणैः ।
३] रावणेन[8] प्र-युक्तानि[8] रामेणाऽक्लिष्ट-कर्मणा ॥३ [9]॥ [३
दृष्ट्वा[10] श्रुत्वा च सं-भ्रान्ता[10] हत-शेषा निशा-चराः ।
६] राक्षसीश्[11] च समा-गम्य[11] दीनाश् चित्राऽर्पिता[12] इव[12] ॥४ ॥ [४
वि-धवा हत-पुत्राश् च क्रोशन्त्यो हत-बान्धवाः ।
७] राक्षसैः सह दुःखाऽऽर्ताः सं-गताः पर्य-अदेवयन् ॥५ ॥ [५
कथं शूर्प-णखा[13] वृद्धा कराला निर्णतोदरी[14] ।
८] आ-ससाद[15] वने[15] रामं कं-दर्पम्[16] इव रूपिणम्[16] ॥६ ॥
सु-कुमारं महा-सत्त्वं सर्व-भूत-हिते-रतम् । [६
९] तं दृष्ट्वा लोकपालाऽऽभं[17] कथं[18] रामम् अकामयत्[18] ॥७ ॥
कथं सर्व-गुणैर् हीना गुण-वन्तं महौजसम् ।
१०] सु-मुखं दुर्-मुखी रामं[19] कामयामास राक्षसी ॥८ ॥ [७
जनस्याऽस्याऽल्प-भाग्यत्वान् मलिना श्वेत-मूर्धजा ।

---

१. म–नास्ति । २. भ–०नां चाग्नि० ॥ ३. रा$_1$ फ भ–राक्षसानां । ४. म–०घयोधिभिः । ५. रा$_2$–०जवर्मणां । ६. भ–कांचनध्वजवर्माणां शूराणां कामरूपिणाम् ॥ ७. रा$_2$ फ म भ–र्दीसैस् । ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–राघवेणास्तमक्षाणि । ९. अतः परमधिकः पाठः—भ–द्विजिह्वो निहतो वीरः संह्रादी च निशाचरः । विमर्दनः कुंभहनुः खरकेतुश्च राक्षसः ॥ विडालाक्षो हयग्रीवः शंकुकर्णः प्रमर्दनः । हस्तिकर्णो महावीरो दशैते नायका हताः ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–दृष्ट्वा श्रुत्वा च संत्रस्ता । भ–ते दृष्ट्वा तांश्च सं० । ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–राक्षसा बहवस्तत्र । १२. प्र–चिन्तापरायणाः । फ म भ–०चिंतापरायणाः । रा$_2$–चिन्तार्पिता इव ॥ १३. रा$_1$ ल ल$_2$ ब अ प्र फ म–०नखा । १४. ल$_2$ ब अ फ म–निम्नतोदरी । १५. म–असंपदं रणे । १६. रा$_2$ फ म–०र्पसमरू० । भ–०र्पशरपीडिता ॥ १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र म–लोकवंद्या (द्यं) सा । १८. भ–हीनरूपा प्रकामिता ॥ १९. रा$_1$ ल$_1$ ल$_2$ ब अ–वीरं ॥

११] अ-कार्यम्[1] एव हास्यं[1] च सर्व-लोक-विगर्हितम् ॥९॥ [८
राक्षसानां वि-नाशाय दूषणस्य खरस्य च ।
१२] चकाराऽप्रतिरूपस्य[2] राघवस्य[3] प्र-धर्षणम्[4] ॥१०॥
तन्-निमित्तं कृतं[5] वैरं दश-ग्रीवेण रक्षसा[5] । [९
१३] वधाय[6] च[6] हृता सीता रावणेन दुर्-आत्मना ॥११॥ [१०पू
मारीचो दण्डकाऽरण्ये शूरो राक्षस-पुंगवः ।
N] हतो वि-क्रम्य रामेण पर्य्-आप्तं तन् नि-दर्शनम् ॥१२॥ [N
चतुर्दश-सहस्राणि[7] रक्षसां भीम-कर्मणाम् ।
१६] नि-हतानि जन-स्थाने शरैर् अग्नि-शिखोपमैः ॥१३॥ [१२
खरश् च नि-हतः सं-ख्ये दूषणस् त्रि-शिरास् तथा ।
१७] शरैर्[8] आशीविषाऽऽकारैः[8] पर्य्-आप्तं तन् नि-दर्शनम् ॥[9]१४॥[१३
न च सीतां दश-ग्रीवः प्राऽऽप्स्यते जनकाऽऽत्मजाम् ।[10]
१४] बद्धं बल-वता वैरम्[11] अ-क्षयं राघवेण च ॥१५॥[१०उ
वैदेहीं प्राऽर्थमानं तु वि-राधं प्रेक्ष्य राक्षसम् ।[12]
१५] हतम् एकेन[13] रामेण पर्य्-आप्तं तन् नि-दर्शनम् ॥१६॥ [११
हतो योजन-बाहुश् च कबन्धो रुधिराऽशनः ।
१८] क्रौञ्चाऽचले[14] राघवाभ्यां पर्य्-आप्तं तन् नि-दर्शनम् ॥१७[15]॥[१४
१९पू] वानरं[16] वालिनं[16] हत्वा सहस्रनयनाऽऽत्मजम् ।
N] बलिनं मेघ-संकाशं राघवेण महाऽऽत्मना ॥[17]१८॥ [१५
ऋष्यमूके वसन्[18] शैले[18] दीनो भग्न-मनोरथः ।
२०] सु-ग्रीवः[19] प्राऽऽपितो[19] राज्यं पर्य्-आप्तं तन् नि-दर्शनम् ॥१९॥[१६
धर्माऽर्थ-सहितं वाक्यं सर्वेषां रक्षसां हितम् ।

---

१. भ-अकाममवहास्यं ॥ २. ल, रा, फ-०रूपाय । म भ-०रूपा सा । ३. रा, फ-०वाय । ४. रा-प्रहर्ष० ॥ ५. भ-इदं वैरं रावणस्य क्षयावहं ॥ ६. ल, ल, ब अ प्र रा, फ-०य सा । म-छद्मना च ॥ ७. रा, प्र-१३-शश्लोकादारभ्य १६-शश्लोकं यावन्नास्ति ॥ ८. भ-रामेण लोकरामेण । ९. ल,-नास्ति ॥ १०. भ-न च सीता दशग्रीवं मनसापि हि कामयेत् । ११. भ-चैवम् ॥ १२. भ-वैदेहीं तु प्रार्थयंतं विराधं वीक्ष्य सूदितं । १३. भ-कुब्जेन ॥ १४. रा, ल, ल, अ प्र- क्रौंचावटे । रा, फ-क्रौंचवधो । १५. ब-नास्ति ॥ १६. भ-वालिनं बलिनं । १७. भ-राजानं हरिमुख्यानां महावीर्यं महौजसम् ॥ १८. रा, ल, ल, ब अ प्र-च शैलेन्द्रे । १९. रा, ल, ल, ब अ प्र भ-०वस्थापितं ॥

२१] युक्तं वि-भीषणेनोक्तं मोहात्[1] तस्य न रोचते[1] ॥२०॥ [१९
विभीषण-वचः कुर्याद् यदि[2] स्म[2] धनदाऽनुजः ।[3]
२२] श्मशान-भूता दुःखाऽऽर्ता[4] नेयं लंका पुरी भवेत् ॥२१॥ [२०
कुम्भ-कर्णं हतं श्रुत्वा राघवेण महाऽऽत्मना ।
२३] प्रियं चेन्द्र-जितं पुत्रं रावणो[5] नाऽनु-शोचते[5] ॥[6]२२॥[२१
मम पुत्रो मम भ्राता मम भर्ता हतो रणे ।
२५] इत्य् एवं श्रूयते[7] शब्दो राक्षसीनां[8] गृहे गृहे ॥२३॥ [२३
रथा[9] नागास् तथाऽश्वाश्[9] च हताः शत-सहस्र-शः ।
२६] रणे रामेण शूरेण राक्षसाश् च पदातयः ॥२४॥ [२४
रुद्रो वा यदि वा विष्णुर् महेन्द्रो वा शत-क्रतुः ।
२७] हन्ति नो राम-रूपेण यदि[10] वा स्वयम् अन्त-कः[10] ॥२५॥ [२५
हत-प्रवीरा बहवो निर्-आशा जीविते वयम् ।
२८] व्यसनाऽन्तम्[11] अ-पश्यन्तो ह्य् अ-नाथा[11] वि-लपामहे ॥२६॥ [२६
राघवात्[12] स[12] दश-ग्रीवः शूरो लब्ध-पराऽऽक्रमः[13] ।
२९] इमं[14] क्षयं महा-घोरं[14] समुत्-पन्नं न बुध्यते ॥२७॥ [२७
तत्र देवा न गन्धर्वा न[15] पिशाचा न राक्षसाः[15] ।
३०] उप-सृष्टं[16] परि-त्रातुं शक्ता रामेण सं-युगे[17] ॥२८॥ [२८
निमित्तानि[18] च दृश्यन्ते रावणस्य[19] महा-रणे ।
३१] तानि रामे फलिष्यन्ति[19] रावणे नि-हते रिपौ ॥[20]२९॥[२९

---

१. भ–नास्य मोहादरोचत ॥ २. भ–यद्येष । ३. अतः परमधिकः पाठः—भ–रावणो रक्षसां भीमस्ततो नो न क्षयो भवेत् । एकेन वानरेणेयं पुरी लंका प्रधर्षिता ॥ अक्षः कुमारो निहतः सप्त सेनानुगास्तथा । अमात्य-पुत्रा निहताः किंकराश्च निशाचराः ॥ दग्धा च नगरी लंका पर्याप्तं तन्निदर्शनम् । सुहृदां वचनं कुर्याद्यदि वा मंत्रिणस्तथा ॥ ४. रा$_{1}$ प्र–दुःखांता ॥ ५. भ–शोचते नाथ रावणः । ६. अतः परमधिकः पाठः—भ–ततः संरक्तनयनाः संतताऽश्रुनिपातनाः । अभूतपूर्वव्यसना राक्षस्यः पर्यदेवयन् ॥ ७. भ–शुश्रुवे । ८. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र भ–०सानां ॥ ९. भ–रथाश्चोष्ट्राश्च नागाश् ॥ १०. भ–कालो वा सुदुरासदः ॥ ११. प्र–०श्यन्स्यो ह्य० । भ–अपश्यंतो भयस्यांतमनाथा ॥ १२. भ–ब्रह्मणो हि । १३. भ–लब्धमहावरः । १४. रा$_{2}$ फ भ–इदं महाभयं घोरं । भ–इत्थं महद्भयं घोरं ॥ १५. भ–नासुरोरगरा० । १६. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–उपस्पृष्टं । १७. भ–रावणं ॥ १८. रा$_{2}$ भ–०त्तानीह । १९. ल$_{2}$–नास्ति । २०. रा$_{1}$–०मे फलिष्यन्ते रा० । भ–फलिष्यंति रणे तानि रावणस्य निबर्हणात् ॥

देव-दानव-यक्षेभ्यो ददौ ब्रह्मा[1] पिता-महः[1] ।
३२] रावणस्याऽभयं[2] युद्धे मानुशेभ्यो न याचितः ॥३०॥ [३०
तद् इदं मानुषात् सर्वं[3] नैराश्यं समुपाऽऽगतम्[3] ।
३३] जीवताऽन्त-करं घोरं[4] रक्षसां रावणस्य च ॥३१॥ [३१
पीड्यमानास् तु[5] बलिना[5] वर-दत्तेन[6] रक्षसा ।
३४] दीप्तैस् तपोभिर् वि-बुधाः[7] पिता-महम् अतोषयन्[8] ॥[9]३२॥[३२
देवानां[10] स[10] हिताऽर्थं[9] तु[11] महा-तेजाः पिता-महः[12] ।
३५] उवाच देवताः[13] सर्वाः परि-तुष्टो महद् वचः[13] ॥३३॥[३३
३६उ] अद्य-प्रभृति लोकेषु[14] ये भूता भय-वर्जिताः[14] ।
भयाऽऽर्तास् ते पुनर् इह भविष्यन्तीऽव[15] राक्षसाः ॥[16]३४[17]॥[३४
३७] अथ[18] देवैः समा-गम्य सर्वैर्[19] इन्द्र-पुरो-गमैः[19] ।
वृष-केतुस्[20] त्रि-पुर-हा महा-देवः प्र-सादितः ॥३५॥ [३५
३८] प्र-सन्नस् तु महा-तेजा[21] रुद्रो[21] देवान् उवाच ह ।
उत्-पत्स्यतेऽभयाऽर्थं[9] वो नारी[22] रक्षः-क्षयाऽऽवहा[23] ॥३६॥ [३६
३९] सैषा[24] देव-प्रयुक्ता तु दानवानां यथा क्षुधा ।[24]
भक्षयिष्यति नः सर्वान्[25] राक्षसान् सह-रावणान्[25] ॥३७॥ [३७
४०] रावणस्याऽप-नीतेन दुर्-विनीतस्य दुर्-मतेः ।
अयम् इष्ट-क्षय-करः[26] शोको नः समुपाऽऽगतः ॥३८॥ [३८
न तं पश्यामहे लोके यो नः शरण-दो भवेत् ।
४१] राघवेणोप-सृष्टानां कालेनेव युग-क्षये ॥३९॥ [३९

---

१. भ-ब्रह्मोरगादपि । २. भ-०णेनाभयं ॥ ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ-शंके नैराश्यं स० । भ-एवं भयं घोरमुपस्थितं । ४. भ-युद्धे ॥ ५. रा$_2$-सुबलिनः । भ-सुबलिना । ६. प्र रा$_2$ फ म भ-वरदत्तेन । ७. रा$_1$ ल$_1$ ल ब प्र रा$_2$ फ म-नियमैः । ८. ल$_2$ ब म-०यत् । ९. अ-नास्ति ॥ १०. रा$_2$ फ म-देवतानां । ११. भ-च । १२. भ-महाबलः । १३. भ-वचनं तत्र ब्रह्मा लोकपितामहः ॥ १४. भ-लोकांस्त्रीन्सर्वदानवराक्षसाः । १५. रा$_2$ फ-०न्तीति । १६. भ-भयेन प्रावृता नित्यं विचरिष्यन्ति शाश्वतम् । १७. ल$_1$ अ-नास्ति ॥ १८. भ-ततो । १९. प्र रा$_2$ फ म-सर्वैः सेन्द्र० । भ-तदा शक्रपु० । २०. भ-वृषध्वजस् ॥ २१. प्र-महादेवो० । भ-महादेवस्तुष्टो । २२. रा$_1$ ल ल$_2$ ब अ प्र फ-नरो । २३. रा$_1$ ल$_1$ ल$_2$ ब अ फ म-०हः । प्र-रक्षोभयावहः ॥ २४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-सैष देवप्रयुक्तस्तु दानवानां यथा क्षुधा । भ-देवैः प्रसृष्टा सैषा तु क्षुधिता जनकात्मजा । २५. भ-सीता रावणं राक्षसैः सह ॥ २६. रा$_2$ फ म भ-निधानको घोरः ॥

इतीऽव सर्वा[1] रजनीचर-स्त्रियः[1]
परस्परं वै परि-रभ्य बाहुभिः ।
भृशं वि-नेदुर् भय-शोक-कर्षिता
४२] जजल्पुर्[2] उच्चैश् च वचः सु-दारुणम्[2] ॥४२॥[४२

इत्यार्षे रामायणे युद्ध-काण्डे[3] राक्षसी-विलापो[4] नाम
त्रिसप्ततितमः सर्गः ॥ ७३ ॥

[वं-७५]= [चतुःसप्ततितमः सर्गः] =[दा-६६]

आर्तानां राक्षसीनां[5] तु व्यथितानां गृहे गृहे[5] ।
१] रावणः करुणं सर्वं शुश्राव परि-देवितम् ॥१ ॥ [१
स्व-बलं क्षयितं दृष्ट्वा सम्-अग्रं स-सुतं रणे ।
२] सुतान्[6] भ्रातॄन्[6] विनि-हतान् शक्र-तुल्य-पराऽऽक्रमान्[7] ॥२ ॥ [N
स[8] दीर्घम्[8] अथ निः-श्वस्य[8] मुहूर्तं ध्यानम् आ-स्थितः ।
३] बभूव परम-क्रुद्धो राक्षसो[9] भीम-दर्शनः ॥३ ॥ [२
सं-दश्य दशनैर् ओष्ठं क्रोध-संरक्त-लोचनः ।
४] राक्षसेन्द्रः[10] सु-दुर्धर्षः[10] कालाऽग्निर् इव मूर्च्छितः ॥[11]४॥ [३
उवाच च समीप-स्थान् राक्षसान् राक्षसेश्वरः ।[11]
५] भयाऽऽक्रान्तान्[12] इदं तत्र निर्-दहन्न् इव चक्षुषा ॥५ ॥ [४
महोदरं[13] महा-पार्श्वं विरूपाऽक्षं[13] च राक्षसम् ।
६] शीघ्रं वदत रक्षांसि[14] निर्-यातेति ममाऽऽज्ञया ॥६ ॥ [५
तस्य तद् वचनं श्रुत्वा राक्षसास्[15] ते भयाऽऽतुराः[15] ।

---

१. रा₁ ल₁ ल₂ ब अ प्र–शोकाद्रुदती वर० । रा₂ फ म–सर्वे रजनीचरास्तदा । २. भ–विनेदुरुच्चैर्वदनैर्विचेतसो । महास्वनाः क्रांतसुदारुणं वचः ॥ ३. रा₂ फ म भ–लंकाकांडे । ४. रा₁ ल₁ ल₂ ब अ प्र–परिदेवनं । म–राक्षसपरिदेवनं । भ–राक्षसस्त्रीविलापः ॥ ५. रा₁ ल₁ ल₂ ब अ प्र रा₂ फ–रक्षसां तेषां व्य० । भ–०तु रुदंतीनां तु वेश्मसु ॥ ६. रा₂ फ–तथा वीराम् । म–सर्वान्भ्रातॄन् । ७. रा₂ फ–राक्षसानंतकोपमान् ॥ ८. रा₁ फ–सुदी० । भ–दीर्घमुष्णं विनि० । ९. भ–रावणो ॥ १०. भ–०सैरपि दुष्प्रेक्ष्यः । ११. अ–नास्ति ॥ १२. रा₁ ल₁ ल₂ ब अ प्र–भयासक्तान् ॥ भ–भयत्रस्तान् ॥ १३. म–अकंपनं पिशाचं च विडालाक्षं । १४. भ–सैन्यानि ॥ १५. ल₂ ब म–अत आरभ्य ८–मश्लोकस्य प्रथमपादं यावन्नास्ति । भ–०सास्ते भयार्दिताः ।

७] नोदयामासुर्[1] अ-व्यग्रा राक्षसांस् ते[2] तद्-आज्ञया[2] ॥७ ॥ [६
ते[3] तु[3] सर्वे तथेत्य् उक्त्वा राक्षसा घोर-दर्शनाः ।
८] कृत-स्वस्त्ययना हृष्टा[4] रावणाऽभिमुखा[5] ययुः ॥८ ॥ [७
अभि-पूज्य[6] यथा-न्यायं[7] रावणं तु[8] महा-रथाः ।
९] तस्थुः[9] प्राऽञ्जलयः सर्वे[9] भर्तुर् विजय-कांक्षिणः ॥९ ॥ [८
अथोवाच महा-तेजा रावणः क्रोध-मूर्च्छितः ।
१०] महोदरं[10] महा-पार्श्वं[10] विरूपाऽक्षं च राक्षसम्[11] ॥१०॥ [९
शीघ्रं निशा-चराः[12] सर्वे[12] निर्-गच्छत ममाऽऽज्ञया ।
११] राम-लक्ष्मण-सुग्रीवान् हत्वा प्रति-निवर्तत[13] ॥११॥ [N
अद्य[14] बाणैर् धनुर्-मुक्तैर् युगाऽन्ताऽऽदित्य-सन्निभैः ।
१२] राघवं लक्ष्मणं चोभौ[15] नयिष्ये[16] यम-सादनम्[16] ॥१२॥ [१०
खरस्य कुम्भ-कर्णस्य प्रहस्तेन्द्रजितोस् तथा ।
१३] उत्-तरिष्ये[17] क्षय-करम्[17] अद्य शत्रु-वधाद् अहम् ॥१३॥ [११
नैवाऽन्तरिक्षं न दिशो न च द्यौर् नाऽपि सागराः[18] ।
१४] प्र-काशतां[19] गमिष्यन्ति[19] बाण-जालैर्[20] मयाऽऽवृताः[20] ॥१४॥ [१२
अद्य वानर-मुख्यानां[21] तानि यूथानि[21] भाग-शः । [१३पू
१५] धनुः-समुद्राद् उद्-भूतैर् वि-धमिष्ये[22] शरोर्मिभिः[22] ॥१५॥ [१४उ
व्याकोश-पद्म-चक्राणां[23] पद्म-किञ्जल्क-वर्चसाम्[24] ।
१६] अद्य यूथ-तडाकानि[25] वि-गाहिष्ये गजेन्द्र-वत् ॥१६॥ [१५

---

१. भ—चोद० । २. रा₂ फ भ—तान्नृपाज्ञया ॥ ३. रा₂ फ—तेऽपि । भ—ते हि । ४. रा₂ फ म भ—सर्वे । ५. फ—नास्ति ॥ ६. भ—प्रतिगृह्य । ७. ब भ—वर्जं—न्याय्यं । ८. रा₂ म भ—ते । ९. भ—तुष्टाः ॥ १०. रा₁ ल₁ ल₂ ब अ प्र—०रं महाकायं । रा₂ फ—०रमहापार्श्वौ । भ—मत्तोन्मत्तौ महावीर्यौ । ११. रा₂—०सां ॥ १२. प्र—वाक्यं तु ते सर्वे । रा₂ फ म—वाद्यंतु वाद्यानि । भ—आपूर्य वाद्यानि । १३. भ—०त्तंथ ॥ १४. भ—अथ । १५. भ—चैव । १६. रा₁ ल₁ ल₂ ब अ प्र—अत आरभ्य १३-शश्लोकस्य प्रथमपादं यावन्नास्ति । भ—नयामि य० ॥ १७. भ—करिष्यामि प्रतीकारं ॥ १८. ल₁ अ प्र फ—०रः । १९. भ—०शा हि भविष्यंति । २०. भ—मम बाणगणैर्वृताः । रा₂ फ म—बाणज्वालावृता मया ॥ २१. भ—०रयूथानां तानि वृंदानि । २२. रा₁ ल₁ ल₂ ब अ—०ध्ये महोर्मिभिः । भ—मथिष्यामि श० ॥ २३. रा₁ ल₁ ल₂ ब अ—आकाशे प० । प्र—आकाशे पद्ममुख्यानां । २४. म—अत आरम्य ३०-शश्लोकस्य प्रथमपादपर्यंतं नास्ति । भ—पद्मकेशरव० । २५. रा₂ फ म—०डागानि । भ—व्यूहतडागानि ॥

अद्य युद्ध-प्रचण्डानां[1] हरीणां द्रुम-योधिनाम् ।
१७] मुक्तेनैकेषुणा सं-ख्ये[2] नि-योत्स्यामि शतं शतम्[2] ॥१७॥ [१७
हतो भर्ता हतो भ्राता यासां च तनयो[3] हतः[3] ।
१८] वधेनाऽद्य रिपोस् तासां करिष्येऽस्रु-प्रमार्जनम् ॥१८॥ [१८
अद्य मद्-बाण-निर्भिन्नैर् वि-कीर्णैर्[4] गत-जीवितैः[5] ।
१९] करिष्ये[6] वानरैर् युद्धे प्रच्छन्नैकतलां[7] महीम्[7] ॥१९॥ [१९
अद्य गोमायवो गृध्रा[8] ये[9] चाऽन्ये पिशिताऽशनाः[9] ।
२०] सर्वांस् तांस् तर्पयिष्यामि शत्रु-मांसैः[10] शराऽऽचितैः[10] ॥२०॥ [२०
कल्प्यतां मे रथः शीघ्रं क्षिप्रम्[11] आ-नीयतां धनुः[11] ।
२१] आ-यान्तु[12] ते च मे युद्धे[12] येऽत्र-शिष्टा निशा-चराः ॥२१॥ [२१
तस्य तद् वचनं श्रुत्वा महा-पार्श्वोऽब्रवीद् इदम्[13] ।
२२] बलाऽध्यक्षं स्थितं तत्र बलं सं-नह्यताम्[14] इति ॥२२॥ [२२
बलाऽध्यक्षस्[15] तु सं-ग्रामे[15] राक्षसांस् तान् गृहे गृहे ।
२३] चोदयन्[16] वै परि-ययौ[16] लङ्कां[17] लघु-पराऽऽक्रमः[17] ॥२३॥ [२३
ततो मुहूर्तान् निष्-पेतू[18] राक्षसा भीम-विक्रमाः[19] ।
२४] सम्प्र-हृष्टा[20] वि-नर्दन्तो[20] नाना-प्रहरणैर्[21] भुजैः[21] ॥२४॥ [२४
प्राऽऽसाऽसि-पट्टिसैः[22] शूलैर् गदाभिर् मुसुलैर् अपि ।
२५] शक्तिभिस् तीक्ष्ण-धाराभिर् महद्भिः कूट-मुद्गरैः ॥२५॥ [२५
N] ऋष्टिभिर् वि-विधैश् चक्रैर् नि-शितैश् च परश्व-धैः ।[23]
भिण्डि-पालैः[24] शत-घ्नीभिर् अन्यैर् अपि तथाऽऽयुधैः[25] ॥२६॥ [२६

---

१. रा$_{1}$, ल, ल$_{2}$ ब अ प्र फ–यूथप्र० । २. रा$_{2}$ फ–सैन्यं निर्बिभेत्स्यामि संयुगे । भ–युद्धे निर्भेत्स्यामि श० ॥ ३. ल$_{2}$ ब रा$_{2}$ फ भ–०या हताः ॥ ४. भ–प्रकी० । ५. प्र रा$_{2}$ फ–गतचेतनैः । भ–गाढवेदनैः । ६. भ–करोमि । ७. भ–संच्छन्नां च वसुंधरां ॥ ८. रा$_{1}$, ल$_{1}$, ल$_{2}$ ब अ प्र–ये च । ९. भ–०ये च मांसाशिनोऽपरे । १०. रा$_{2}$ फ–नास्ति । भ–०सैः शरार्दितैः ॥ ११. भ–योधाः सज्जीभवंतु नः । १२. रा$_{2}$ फ–अनुयांतु च मां युद्धे । भ–०न्तु तुरगाः शीघ्रं ॥ १३. रा$_{2}$ फ–वचः । १४. रा$_{2}$ फ–आनीयतां । भ–संस्वर्यतां ॥ १५. रा$_{2}$ फ–०क्षः स त्वरितो । भ–त्वरितस्तु बलाध्यक्षो । १६. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–०न् संप० । भ–संचोदयन्नुप० । १७. भ–लंकायां लघुविक्रमः ॥ १८. रा$_{1}$ प्र भ–निष्पेत्य । १९. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–मन्दविक्रमाः । भ–भीमदर्शनाः । २०. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–संप्रविष्टा विनिर्ध्वस्ता । भ–नर्दंतो विनदंतश्च । २१. भ–०रणायुधाः ॥ २२. भ–असिभिः प० ॥ २३. भ–नास्ति । २४. भ–भिंदिपालैः । २५. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–तथाविधैः ॥

२६] आऽनयच् च बलाऽध्यक्षस् तं[1] रथं[1] रावणाऽऽज्ञया । [२७पू
२७पू] द्रुतं सूत-समायुक्तं युक्ताऽष्टसुतुरङ्गमम् ॥[2]२७॥[३२उ
आ-रुरोह रथं दीप्तं दीप्यमानः स्व-तेजसा । [३३
२९] रावणः सत्त्व-गाम्भीर्यात् कम्पयन्न्[3] इव मेदिनीम् ॥२८॥ [३४उ
नादान् घोरान् वि-मुञ्चन्तौ महापार्श्व-महोदरौ[4] ।[5]
३०] विरूपाऽक्षश् च दुर्-धर्षो रथान् आ-रुरुहुस् तदा ॥२९॥ [३९
ते तु हृष्टा वि-नर्दन्तो भिन्दन्त इव मेदिनीम् ।[6]
३१] नादान् घोरान् वि-मुञ्चन्तो[4] निर्-ययुर् युद्ध-कांक्षिणः[7] ॥[8]३०॥[४०
ततो युद्धाय तेजस्वी रक्षो-गण-समावृतः[9] ।
३२] निर्-ययाव् उद्यत-धनुः कालाऽन्तकयमोपमः ॥[10]३१॥ [४१
ततः प्र-जविताऽश्वेन रथेन स महा-रथः ।[11]
३३] द्वारेण निर्-ययौ तेन यत्र तौ राम-लक्ष्मणौ ॥३२॥ [४२
ततो नष्ट-प्रभः सूर्यो दिशश् च तिमिराऽऽवृताः ।[11]
३४] वि-नद्युर्[12] द्यां तदा मेघाः[12] सं-चचाल च मेदिनी ॥[13]३३॥ [४३
ववर्ष रुधिरं देवः प्राऽस्खलन्[14] रथ-वाजिनः[14] ।
३५] पक्षिणो[15] मण्डलं चक्रुर्[15] वि-नेदुश् चाऽशिवं शिवाः ॥३४॥ [४४
नयनं चाऽस्फुरत् सव्यं[16] सव्यो बाहुर् अकम्पत ।
३६] विवर्ण-वदनश् चाऽऽसीत् किं-चिद् भग्न-मनोरथः ॥३५॥ [४५

---

१. रा₂ फ भ—चतुरो । २. भ—द्रुतं सूतः समाज्ञप्तो युक्ताष्टतुरगं रथं । अतः परमधिकश्च पाठः—भ—सुवर्णवेदिकायुक्तं रत्नैश्च समलंकृतम् । युक्तं वैदूर्यजालैश्च पताकाभिश्च शोभितम् ॥ केतुना नरशीर्षेण कांचनेन विराजितम् । पांडरेणातपत्रेण ध्रियमाणेन मूर्धनि । व्यराजद्राक्षसश्रेष्ठो धनेश इव पुष्पकम् ॥ ३. रा₂ फ—नादयन्न् । भ—नामयन्न् ॥ ४. अ प्र फ—नास्ति । ५. भ—रावणेनाभ्यनुज्ञातौ मत्तोन्मत्तौ निशाचरौ ॥ ६. अतः परमधिकः पाठः—भ—निर्ययुः सहिता राक्षा सर्वे संत्यक्तजीविताः । स राक्षसमहाराजः कोटिभिरभिसंवृतः ॥ दशभिर्हतशेषाभिर्निर्ययौ कंपयन्महीम् । ७. रा₂ म—जयकां० । ८. भ नास्ति ॥ ९. ल₁ ल₂ ब भ—०समन्वितः । १०. रा₁ ल₁ ल₂ ब अ—नास्ति । प्र—निर्ययौ रावणस्तत्र विरावै रावयन्महीं ॥ ११. रा₁ ल₁ ल₂ ब अ प्र—नास्ति । १२. रा₂ फ म भ—दीनं विनेदुर्मेघाश्च ॥ १३. प्र—नास्ति ॥ १४. भ—०लंस्तुरगाः पथि । १५. प्र—दीप्तास्याश्च मृगाश्चेरुः । रा₂—ध्वजेऽस्य न्यपतद्गृध्रो । फ—ध्वजेऽस्मिन्न्यपतद्गृध्रो । म भ—ध्वजे च न्यपतद्गृध्रो ॥ १६. भ—वामं ॥

तस्य[1] निष्-क्रमतो युद्धे[1] दश-ग्रीवस्य रक्षसः ।
३७] रणे निधन-शंसीनि रूपाण्य् एतानि जज्ञिरे ॥३६॥ [४६
अन्तरिक्षात् पपातोल्का निर्घात-सम-निःस्वनाः[2] ।
३८] चीची-वाचो[3] वि-नेदुश् च[3] वायसा[4] बल-मिश्रिताः[4] ॥३७[5]॥ [४७
शक्राऽशनिः[6] पपातोच्चैः प्र-जज्वाल ननाद च ।
N] वेपथुः सहसा चाऽस्य सर्व-गात्रेष्व्[7] अजायत ॥३८॥ [N
एतान् अ-चिन्तयन् घोरान् उत्-पातान् समुप-स्थितान्[8] ।
४०] निर्-ययौ रावणो मोहाद् आ-हवं[9] काल-चोदितः[9] ॥३९॥ [४८
तेषां तु रथ-शब्देन राक्षसानां[10] महाऽऽत्मनाम्[10] ।
४१] वानराणाम् अपि चमूर् युद्धायैवाऽभ्य्-अवर्तत[11] ॥४०॥ [४९
तेषां सु-तुमुलं[12] युद्धं[12] बभूव कपि-रक्षसाम् ।
४२] अन्योऽन्यम् आ-ह्वयानानां क्रुद्धानां जय-कांक्षिणाम्[13] ॥[14]४१॥ [५०
ततस् ते वानरा घोरा राक्षसांस् तान् रणाऽजिरे ।[14]
४३] जघ्नुः शैलैर् द्रुमैश् चैव रावणस्यैव पश्यतः ॥४२॥ [N
रावणस् तु ततः क्रुद्धस् तान् आह[15] स्म[15] निशा-चरान् ।
४४] हृष्टा भवन्तो युध्यन्तु[16] वानराणां जिघांसया ॥४३॥ [N
ततस् ते राक्षसाः सर्वे नदन्तो जय-कांक्षिणः[17] ।
४५] अभ्य्-अवर्षन्त तान् घोरान्[18] वानरान् छर-वृष्टिभिः ॥४४॥ [N
मुद्गरैः शक्तिभिः शूलैर् गदा-मुसल-तोमरैः ।
४६] परि-घैर् अङ्कुशैर् बाणैर्[19] वानरान् जघ्नुर् आ-हवे ॥४५॥ [N
रावणश् चाऽपि नाराचैर् वत्स-दन्तैर् अयो-मुखैः ।

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–तस्य निष्क्रमतोऽतीव । भ–तदा निष्पततो युद्धे ॥ २. भ–निर्घाताः पेतुरम्बरात् । ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०चो नेदुः स्वाद् । भ–विनेदुश्चक्रवाकाश्च । ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–वायसैरनुसंश्रिताः । ५. अतः परमधिकः पाठः—भ–गृध्रचक्रं च बभ्राम तस्योपरि महाऽऽत्मनः । अश्रूणि चास्य मुमुचुर्वाजिनो रथसंसदि ॥ ६. रा$_2$ फ भ–शुष्का० । ७. भ–स्वेदो गा० ॥ ८. रा$_2$ फ भ–अतिदारुणान् । ९. रा$_2$ फ भ–वधार्थं कालनोदितः । भ–वधार्थं दैवनोदितः ॥ १०. रा$_2$ फ भ–रक्षसां युद्धकांक्षिणां । भ–०नां दुरात्मनां । ११. भ–०य चाभिवर्तते ॥ १२. भ–०लः शब्दो । १३. भ–जयमिच्छतां । १४. भ–नास्ति ॥ १५. भ–अशासत् । १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–युध्यध्वं ॥ १७. भ–युद्धकां० । १८. भ–सर्वान् ॥ १९. रा$_1$ ल$_2$ ब अ प्र–घोरैर् । ल$_1$–घोरं ॥

४७] कर्णिभिश् चाऽऽयसैश् चैव वानरान् अभ्य्-अवर्षत ॥[1]४६॥[N
ते वध्यमानाः सम्-अरे वानराः पादपाऽऽयुधाः ।[2]
४८] अभ्य्-अद्रवन् वै सहिता[3] रावणं घोर-दर्शनम्[4] ॥४७॥ [N
रावणस् तु ततः क्रुद्धो महा-बल-पराऽऽक्रमः ।[5]
४९] वानराणां शरीराणि[6] व्य्-अधमच् छर-वृष्टिभिः ॥४८॥ [N
शरेणैकेन च[7] हरीन् नव सप्त च पञ्च च ।
५०] बिभेद सम्-अरे वीरो राक्षसान् सम्प्र-हर्षयन् ॥४९॥ [N
स[8] शरैर् अग्नि-संकाशैः शातकौम्भ-विभूषणैः[9] ।
५१] वानरान् सम्-अरे वीरः प्र-ममाथ सु-दुर्जयः[10] ॥५०॥ [N
ते भिन्न-गात्राः सम्-अरे वानराः शर-पीडिताः ।
५२] पेतुर् मथित-सर्वाऽङ्गाः[11] सुरैर्[12] इव महाऽसुराः[13] ॥५१॥ [N
शत-पत्रैर् यथाऽऽदित्यो घोरैर् बाण-गभस्तिभिः ।
५३] अभ्य्-अधावत् सु-संक्रुद्धः सं-युगे[14] वानरर्षभान् ॥५२॥ [N
ततस् ते[15] वानराः सर्वे भिन्न-देहा वि-चेतसः ।
५४] व्यथिताः प्र-द्रवन्ति[16] स्म रुधिरेण सम्-उक्षिताः ॥५३॥ [N
रामस्याऽर्थे पराऽऽक्रान्ता[17] वानरास् त्यक्त-जीविताः ।
५५] नदन्तश् चाऽनिवृत्तास् ते सम्-अरे च शिलाऽऽयुधाः ॥५४॥ [N
ते द्रुमैः पर्वताऽग्रैश् च मुष्टिभिश्[18] च प्लवं-गमाः[18] ।
५६] अभ्य्-अवर्षन्त[19] सम्-अरे रावणं पर्यव-स्थितम् ॥[20]५५॥[N
ततः[21] पावक-संकाशैः[21] शरैर् आशीविषोपमैः ।
५८] वानराणाम् अनीकानि बिभेद सम्-अरे प्र-भुः ॥५६[21]॥[N
अष्टभिर् दशभिश् चैव स[22] विद्धा गन्ध-मादनम् ।
५९] विव्याध दशभिश् चैव[22] नीलं[23] दूराद् अव-स्थितम् ॥[24]५७॥[N

---

१. भ-विकर्णिभिः क्षुरप्रैश्च वानरान्पर्यवर्षत । रा३-नास्ति ॥ २. रा८-नास्ति । ३. रा१ ल१ ल८ ब अ प्र-सहसा । भ-०द्रवंत स० । ४. भ-घोरविक्रमं ॥ ५. रा२-नास्ति । ६. म-अनीकानि ॥ ७. म-तु । भ-स ॥ ८. प्र रा२ फ म-तैः । ९. रा२ फ-०षितैः । १०. रा१ ल१ प्र-स दु० । म-स वीर्यवान् ॥ ११. म-व्यथि० । १२. रा१ ल१ ल२ ब अ-देवैर् । १३ रा१-०रैः ॥ १४. भ-समरे ॥ १५. भ-तु । १६. भ-विद्र० ॥ १७. फ-परिक्रांता ॥ १८. प्र-नास्ति । १९. भ-अभ्यद्रवंत । २०. अतः परमधिकः पाठः—भ-तं द्रुमानां शिलानां च वर्षं प्राणहरं महत् । व्यपोहत महातेजा रावणः पर्यवस्थितः ॥ २१. फ-अत आरभ्य ५८-शश्लोक-पूर्वार्धं यावन्नास्ति ॥ २२. प्र-नास्ति । २३. भ-नवत्या च नलं । २४. म-नास्ति ॥

सप्तभिश्[1] च महा-कायं[1] मैन्दं विद्ध्वा[2] सु-दारुणैः[2] ।
६०] पञ्चभिर् वि-शिखैश् चैव गजं विव्याध सं-युगे[3] ।।[4]५८।। [N
विंशत्या[5] च हनू-मन्तं नलं[6] च दशभिः शरैः[6] ।
६१] गवाऽक्षं पञ्च-विंशत्या शक्र-जातं तु[7] सप्तभिः[7] ।।[8]५९।। [N
द्वि-विदं षड्भिर् आ-हत्य पनसं दशभिः शरैः ।
६२] कु-मुदं पञ्च-दशभिर् जाम्ब-वन्तं च पञ्चभिः ।।६०[9]।। [N
६४पू] तारं चैव त्रिभिर् बाणैर् वि-नतं[10] चाऽष्टभिस् तथा[11] ।[12]
अशीत्या वालिनः पुत्रम् अङ्ग-दं बिभिदे[13] शरैः ।।६१[14]।। [N
६३] शर-भं च महा-तेजाः शरेणोरस्य् अताडयत् ।
६४उ] ऋष-भं[15] च त्रिभिर् बाणैर्[16] ललाटे प्रत्य्-अविध्यत ।।६२।। [N
स पुनः सूर्य-संकाशैर्[17] इषुभिर् मर्म-भेदिभिः ।
६५] वानराणाम् अनीकानि ममन्थ[18] परमाऽऽहवे ।।६३।। [५१
विभिन्न-शिरसः के-चिद् अपतन्त[19] मही-तले[19] ।
६६] निर्-उच्छ्वासाः कृताः के-चित् पेतुश्[20] चक्षुर्-विवर्जिताः[20] ।[21] [५३
६७उ] भिन्न-गात्राः शरैः के-चिद् रावणेन बलीयसा[22] ।।६४।। [५२पू
आ-कुलां वानरीं सेनां शर-जालेन[23] मोहिताम्[23] ।
६८] रावणः परम-प्रीत्या ददर्श रुधिरोक्षिताम्[24] ।।६५।। [N
ततस् तु वि-द्रुताः सर्वे वानरा रावणाऽर्दिताः ।[25]
N] राघवं शरणं जग्मुः[26] प्रजा-पतिम् इवाऽमराः[27] ।।[28]६६।। [N

---

१. भ-सहस्त्या तु महाघोरैर् । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ म-भित्त्वा सु० । भ-विध्वाथ दा० । ३. म-दारुणं । ४. भ-पश्चाच्छतेन विव्याध गयं समरमूर्धनि ॥ ५. भ-त्रिंशता । ६. म-अंगदं त्रिंशता शरैः । भ-नीलं चैव शतेन च ॥ ७. भ-शतेन च । ८. अ म-नास्ति ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र म-नास्ति ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब प्र-सुतारं । ११. रा$_2$-शरैः । १२. फ-नास्ति । १३. भ-चाहनच् । १४. अ म-नास्ति ॥ १५. रा$_2$ फ म भ-क्रथनं । १६. रा$_2$ फ म भ-भल्लैर् ॥ १७. भ-सर्पसं० । १८. भ-ममर्द ॥ १९. भ-नष्टसंज्ञा महींगताः । २०. रा$_2$ फ भ-केचित्पार्श्वेषु दारिताः । म-नास्ति । २१. अतः परमधिकः पाठः—भ-केचिच्छिन्नहृदयाः केचिच्चक्षुषि दारिताः । २२. रा$_2$ फ म-बलीमुखाः । भ-विदारिताः ॥ २३. म-०लविमो० । २४. भ-क्षतजोक्षि० ॥ २५. भ-ततस्ते वानराः सर्वे विद्रुता राक्षसार्दिताः । २६. भ-प्राप्ताः । २७. भ-इव प्रजाः । २८. म-नास्ति । अतः परमधिकः पाठः—भ-ततस्तु तं कालमिवापततं विक्षोभयंतं हरिवाहिनीं ताम् । त्रेसुस्तदा ते हरयो निशाम्य मृगाधिपं क्षुद्रमृगा इवार्ताः ॥

वि-द्राव्य वानरान् सर्वान्[1] हत्वा चैव सहस्र-शः ।[2]
N] कपि-शोणित-निस्यन्दैश् चक्रे भूमिं स-कर्दमाम् ॥६७[3]॥[N

इत्यार्षे रामायणे युद्ध-काण्डे[4] वानर-त्रासनं[5] नाम
चतुःसप्ततितमः सर्गः ॥ ७४ ॥

[बं-७३]= [पञ्चसप्ततितमः सर्गः] =[दा-६७]

तथा विक्षत-गात्रैस्[6] तु दश-ग्रीवेण सं-युगे[7] ।
१] वसु-धा सकला[8] तत्र प्र-कीर्णैर् हरिभिर् वृता[9] ॥१ ॥[१
स[10] ममन्थ[10] महा-कायो वानरान् राक्षसेश्वरः[11] ।
२] युगाऽन्त-वातः सहसा प्र-वृद्धः क्षिति-जान्[12] इव[12] ॥२ ॥[१०
रावणाऽस्त्रम्[13] अ-सह्यं तं[13] शर-सम्पातम् आ-गतम् ।
३] दीप्तं[14] न शेकुः सं-सोढुं[14] पतंगा इव पावकम् ॥३ ॥[२
तेऽर्दिता[15] वि-शिखैर्[15] बाणैः क्रोशन्तो विप्र-दुद्रुवुः ।
४] पावकाऽर्चि-समाविष्टा[16] दह्यमाना[17] यथा ख-गाः[17] ॥४ ॥[३
प्लव-गानाम् अनीकानि महाऽभ्राणीऽव[18] मारुतः ।
५] उवाह[19] सम्-अरे तस्मिन् वि-धमन् नि-शितैः[20] शरैः ॥५ ॥[४
कदनं[21] सहसा[22] चक्रे[23] राक्षसेन्द्रो वनौकसाम् ।
६] आ-सिसादयिषू[24] रामं त्वरितो[25] रावणो[25] ययौ ॥६ ॥[५
सु-ग्रीवस् तान् हरीन्[26] दृष्ट्वा भग्नान्[27] वि-द्रवतो रणे ।[28]

---

१. अ रा$_{2}$ फ-मुख्यान् । २. म-नास्ति ॥ ३. भ-नास्ति । ४. प्र रा$_{2}$ भ-लंकाकांडे । म-युद्धपर्वणि । ५. भ-रावणनिर्याणं ॥ ६ भ-तैः क्षत० । ७. भ-मार्गणैः । ८. प्र रा$_{2}$ फ-संवृता । म-शुशुभे । भ-ववृधे । ९. भ-हतैः ॥ १०. रा$_{2}$ फ म भ-ममंथ च । ११. भ-०साधिपः । १२. म-क्षणदाचरः । भ-पर्वतानिव ॥ १३. भ-०णस्याप्रसह्यं तं । म-०ह्यं तु । १४. भ-सोढुं न शेकुः कपयः ॥ १५. रा$_{2}$ फ-ते हता विविधैर् । भ-निर्भिन्ना निशितैर् । १६. भ-०र्चिषमा० । १७. रा$_{2}$ फ म-०ना वने यथा । भ-यथा नागा महाहवे ॥ १८. म-सहस्राणि च । १९. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-उवास । म-उवाच । भ-स ययौ । २०. भ-रावणः ॥ २१. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-गहनं । २२. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब-समरे । भ-तरसा । २३. अ-सर्वे । भ-कृत्वा । २४. रा$_{1}$-०सादियिषू । ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ म-आससादयिषू । २५. भ-त्वरमाणस्तदा ॥ २६. रा$_{2}$ म-कपीन् । २७. म-त्रस्तान् । २८. अतः परमधिकः पाठः—रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र रा फ-त्रस्तां स्वसेनामालोक्य चिकीर्षुः कर्म दुष्करम् ।

७] गुल्मे सु-षेणं नि-क्षिप्य युद्धे[1] चक्रे ततो मनः[1] ॥७ ॥ [६
आत्मनः सदृशं वीरः स तं नि-क्षिप्य वानरम् ।[2]
८] सु-ग्रीवोऽभि-मुखं[3] शत्रोः[3] प्र-तस्थे पादपाऽऽयुधः ॥८ ॥ [७
पार्श्व-तः पृष्ठ-तश्[4] चाऽस्य सर्वे यूथाऽधिपा भवन्[5] ।[6]
९] सम्प्र-गृह्य महा-शैलान् प्र-वृद्धांश् च मही-रुहान्[7] ॥[8]९ ॥ [८
वि-नदन्[9] युधि सु-ग्रीवः स्वरेण महता महान् ।
१०] पातयन् वि-धमंश्[10] चाऽन्याञ् जघानोत्तम-राक्षमान् ॥१०[11]॥[९
क्रोध-संरक्त-नयनः कालाऽन्तकयमोपमः[12] ।
११] प्र-ममाथ[13] महा-कायो[13] राक्षसान् वानरेश्वरः ॥[14]११॥[N
राक्षसानाम् अनीकेषु[15] शिला-वर्ष[15] ववर्ष सः[16] ।
१२] अश्म-वर्षं यथा[17] मेघः[17] पक्षि-संघेषु कानने ॥१२॥ [११
कपिराज-प्रमुक्तैस् तैः शिला-वर्षैस्[18] तु राक्षसाः ।
१३] विभिन्न-शिरसः पेतुर् वि-कीर्णा[19] इव पर्वताः[19] ॥१३॥ [१२
तेषु[20] सं-क्षीयमाणेषु[20] राक्षसेषु समन्त-तः ।
१४] सु-ग्रीवेण प्र-भग्नेषु पतत्सु[21] वि-नदत्सु च[21] ॥१४॥ [१३
विरूपाऽक्षः स्वकं नाम धन्वी वि-श्राव्य राक्षसः[22] ।
१५] रथेनाऽऽसाद्य सु-ग्रीवं ववर्ष[23] शर-वृष्टिभिः ॥१५॥ [१४
तस्य तान् अशनि-प्रख्याञ् छरान् दृढ-धनुश्-च्युतान् ।
१६] अ-चिन्तयित्वा सु-ग्रीवः[24] ससाराऽभि-मुखो[24] नदन् ॥१६॥ [N

---

१. प्र–योद्धुं च० । भ–युद्ध चक्रे महत्तदा ॥ २. रा$_1$, ल$_1$, ल$_2$ ब म–नास्ति । ३. रा$_1$, ल$_1$, ल$_2$–०खो यांतं । ब अ प्र–०खो यत्तं । रा$_2$–०खः शत्रुं ॥ ४. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–कपयश् । ५. टि. अडभाव आर्षः । भ–यूथपयूथपाः । ६. अतः परमधिकः पाठः—भ–अनुजग्मुर्महात्मानं शालतालशिलायुधाः । ७. रा$_1$, ल$_1$, ल$_2$ ब अ प्र म–महाद्रुमान् । ८. भ–नास्ति ॥ ९. भ–सोऽनदद् । १०. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–विषमान् । ११. म–नास्ति ॥ १२. ल$_2$–०क इवोपमः । १३ म–०थ महाकायान् । भ–ममंथ चरणैरन्यान् । १४. अतः परमधिकः पाठः—भ–युगांताग्निरिवोत्सृष्टः प्रवृद्धानगमानिव ॥ १५. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–०कानि शिलावर्षैर् । १६. म–च । भ–ह । १७. रा$_1$, ल$_1$, ल$_2$ ब–यथा मेघाः । प्र–महामेघः ॥ १८. भ–शैलैर्वृक्षैस् । १९. म–विशीर्णं इव पावकः । भ–प्रकीर्णा इव पादपाः । रा$_1$, ल$_1$, ल$_2$ ब अ प्र–अत आरभ्य १४-शश्लोकस्य तृतीयपादं यावन्नास्ति । २०. भ–अथ प्रक्षी० । २१. रा$_1$, ल$_1$, ल$_2$ ब अ–पतंतो नेदुरेव च ॥ २२. भ–संयुगे । २३. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–नास्ति ॥ २४. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–संयातोऽभि० । भ–सरोषोभि० ॥

सोऽव-प्लुत्य[1] महा-वेगो हरिर् इन्द्र-पराऽऽक्रमः[2] ।
१७] आऽक्रामत्[3] स्यन्दनं तस्य धुरि पादेन पश्यतः ।।[4]१७।।[N
वानरेन्द्रपदाऽऽक्रान्ताद् रथात् पेतुर् भयाद्[5] भुवि ।
१८] विनिष्पतित-नेत्रास् ते भग्न-ग्रीवास् तुरं-गमाः ।।१८[4]।।[N
आ-क्रम्य स्यन्दनं[6] भीमो[6] वृक्ष-षण्डेन[7] वानरः[7] ।
१९] सारथिं नि-जघानाऽऽशु[8] विरूपाऽक्षस्[9] त्व् अपाऽक्रमत्[9] ।।१९[10]।।[N
अप-क्रान्ते[11] विरूपाऽक्षे[11] सुग्रीव-सचिवा रथम् ।
२०] बभञ्जुस्[12] तरसा वीरा हरयो[13] वात-रंहसः[13] ।।२०।। [N
विरूपाऽक्षो हत-रथो धन्वी तूण-तनुत्र-वान् ।
२१] बहु-शस्[14] ताडयामास[14] नाराचैः प्लवगर्षभम्[15] ।।२१।। [N
रावणेन प्र-युक्तं तु विरूपाऽक्षो महा-गजम् ।
२२] शीघ्रम्[16] आ-रुरुहे वीरो[16] बहुशस्त्रोपकल्पितम् ।।२२[17]।।[N
स तं द्वि-रदम् आ-स्थाय विरूपाऽक्षो महा-बलः ।
२३] व्य्-अनदद्[18] भीम-निर्ह्रादो वानरांश्[19] चाऽभ्य्-अधावत[19] ।।२३[20]।।[१५
सु-ग्रीवेऽथ[21] शरान् घोरान् वि-ससर्ज महा-बलः[22] ।
२४] स्थापयामास चोद्-विग्नान् राक्षसान् सम्प्र-हर्षयन् ।।[23]२४।।[१६
सु-ग्रीवं तं विरूपाऽक्षः शरैर् आशीविषोपमैः ।
२५] बहु-शस् ताडयामास सर्वाऽङ्गेष्व् अरि-मर्दनः ।।[24]२५।। [N
सोऽति-विद्धः शरैस्[25] तीक्ष्णैः[25] कपीऽन्द्रस् तेन रक्षसा ।
२६] चुक्रोध च महा-तेजा वधे चाऽस्य मनो दधे ।।२६।। [१७

---

१ भ–सोऽभिसृत्य । २. अ–०मं । ३. फ म–आक्रमत् । म–आक्रम्य । ४. ल$_1$ अ–नास्ति ॥ ५. रा$_1$ ल$_2$ ब अ प्र रा$_2$ फ–हया ॥ ६. रा$_2$ फ म भ–स रथं वीरो । ७ रा$_2$–वृक्षदंडेन वा । भ–विरूपाक्षस्य वै तदा । ८. भ–०नास्य । ९. रा$_1$ ल$_1$ ल$_2$ ब प्र म–०क्षमुपा० । १०. अ–नास्ति ॥ ११. रा$_1$ ल$_1$ ब अ–अभिक्रांते वि० । फ–अपाक्रान्ते वि० । म–ते विरूपाक्षसुग्रीवं । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ–ममंथुस् । १३. रा$_2$–नास्ति ॥ १४. रा$_2$–नास्ति । भ–चतुर्भिस्ता० । १५. रा$_2$ फ म भ–प्लवगेश्वरं ॥ १६. रा$_2$–आरुरोह महावीर्यो । १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ म–नास्ति ॥ १८. ल$_1$ रा$_2$ फ म–विनदन् । १९. भ–०रानभ्य० । २०. म–अत आरभ्य २५–शश्लोकांतं यावन्नास्ति ॥ २१. प्र–०वे वै । रा$_2$–०वे च । भ–०वाय । २२. भ–निशाचरः । २३. भ–छादयामास सर्वांस्तान्राक्षसांश्च प्रहर्षयन् ॥ २४. भ–बहुभिस्ताडयामास संग्रामेष्वरिमर्दनम् ॥ २५. रा$_2$–शरैर्घोरैः । भ–शितैर्बाणैः ॥

ततः पाद-पम् उत्-पाट्य शत्रु-संक्रन्दनो[1] बली[1] ।[2]
२७] अभि-पत्य जघानाऽऽशु[3] प्र-मुखे तं[4] महा-गजम् ॥२७॥ [१८
स[5] सम्प्रहाराऽभिहतः सु-ग्रीवेण[5] महा-गजः ।[6]
२८] अप-सृत्य धनुर्-मात्रं नि-पपात[7] ननाद च[8] ॥२८॥ [१९
२९पू] राजा तु पतितस तूर्णम् अपाऽक्रामत् सु-वीर्यवान् ।
N] राक्षसोऽभि-मुखं क्रुद्धः प्रत्य्-अगच्छच् च तं कपिम् ॥२९॥ [२०
२९उ] आर्षभं[9] चर्म खड्गं च प्र-गृह्य[10] लघु-विक्रमः[10] ।[11]
N] भर्त्सयन्न् इव सु-ग्रीवं सम्-ईयायाऽऽततायिनम्[12] ॥[13]३०॥ [२१
सोऽपि[14] तस्याऽथ सं-क्रुद्धः[14] प्र-गृह्य महतीं[15] शिलाम् ।
३४] विरूपाऽक्षाय चिक्षेप सु-ग्रीवो जलदोपमाम् ॥३१॥ [२२
स[16] तां शिलाम् आ-पतन्तीं[16] दृष्ट्वा राक्षस-पुङ्गवः ।
३५] अप-क्रम्य[17] तु[17] वि-क्रान्तः खड्गेन प्राऽहरत् तदा ॥३२॥ [२३
तेन मोक्षेण[18] शस्त्राणां[18] सु-ग्रीवं[19] च[19] चमू-मुखे ।
३६] वि-ह्वलं पातयामास पदा[20] चैनम् अताडयत् ॥[21]३३॥ [२६उ

---

१. रा$_2$–शूरः संक्रंदनो हरिः । फ–शूरश्चाक्रंदनो हरिः । म–शूरः संक्रोधनो हरिः । २. भ–ततः स मुष्टिमुद्यम्य वज्रनिष्पेषगौरवम् । ३. भ–०नास्य । ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–च ॥ ५. भ–मुष्टिप्रहाराभिहतो हरीन्द्रेण । ६. अतः परमधिकः पाठः—भ–सुस्राव रुधिरं नस्तो जलं प्रस्रवणादिव । ७. रा. ल$_1$ ल$_2$ ब अ प्र–०त विदारयन् । रा$_2$–०त विताडयन् । भ–निषसाद न० ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ म–नास्ति । भ–महाप्रहाराभिहतो गजेन्द्रः स पपात च । गजात्प्रपततस्तूर्णमाप्लुतः स महाभुजः ॥ ९. भ–अभेद्यं । १०. रा$_1$ ल$_1$ ल$_2$ ब अ–०ह्य-लघुविक्रमैः । भ–प्रागृह्णाद्रजनीचरः । ११. म–नास्ति । अतः परमधिकः पाठः—भ–तथैव च महाखड्गं चर्म चापतितं भुवि । जगृहे हरिशार्दूलः सुग्रीवो वानराऽधिपः ॥ ततस्तौ रोषसंतप्तौ नदंतावभ्यधावताम् । उद्यतासिधरौ वीरौ युधि युद्धविशारदौ ॥ दक्षिणं मंडलं चोभौ त्वरया संपरीयतुः । अन्योऽन्यमभिसंरब्धौ परस्परजयैषिणौ ॥ निजघ्नतुस्तदान्योन्यं पेततुश्च महीतले । उत्पेततुस्ततस्तूर्णं जघ्नतुश्च परस्परम् ॥ भुजैश्चिक्षिपतुर्वीरावन्योऽन्यमपराजितौ । १२. रा$_2$ फ म–आससादाततायिनं । १३. भ–नास्ति ॥ १४. भ–ततः परमसं० । १५. रा$_2$ फ म–विपुलां ॥ १६. भ–तामापतंतीं वेगेन । १७. रा$_2$ फ म–०क्रम्याशु । भ–अपाक्रमत्तु ॥ १८. भ–खड्गेन संक्रुद्धः । १९. भ–०वस्तु । २०. रा$_1$ ल$_1$ ल$_2$ ब अ–पादे । २१. भ–कवचं पाटयामास तं चैवापातयद्भुवि ॥

स समुत्था (दु-स्था) य पतितः कपिस्[1] तस्य न्य्-असर्जयत् ।
३७] तल-प्रहारम् अशनी-सदृशं[2] भीम-निःस्वनम्[2] ॥[3]३४॥[२७
तल-प्रहारं तं रक्षः सु-ग्रीवेण समुद्-यतम्[4] ।
३९] नैपुण्यान्[5] मोक्षयित्वाऽथ[5] मुष्टिनोरस्य् अताडयत् ॥३५॥ [२८
ततः सु-संरब्धतरः सु-ग्रीवोऽभवद्[6] आ-हवे[6] ।
४०] आत्मानं[7] मोक्षितं[7] दृष्ट्वा प्राऽहरत्[8] तस्य रक्षसः[8] ॥३६॥ [२९पू
राक्षसश् चाऽपि तं दृष्ट्वा[9] प्र-हारं घोरम् उद्-यतम् ।
N] असिनाऽभ्य्-अवधीत् क्रुद्धो वानरान् पार्श्व-तः स्थितान् ॥३७[10]॥[N
स तु[11] दृष्ट्वाऽन्तरं[11] तस्य विरूपाऽक्षस्य वानरः ।[12] [२९उ
४१] तलं[13] न्य्-अपातयत्[13] क्रोधाच् छंख-देशे महा-चलः[14] ॥३८॥ [३०
महेन्द्राऽशनि-कल्पेन[15] तलेन नि-हतः क्षितौ ।
४२] पपात रुधिरं[16] वेगात्[16] प्रसृ[17](?स्नु)ताऽङ्गः(?गं) स निर्-वमन्[17] ॥[18]३९॥[३१
विवृत्त-नयनं मोहाद् वानरा[19] रुधिराऽऽप्लुतम्[19] ।
४३] ददृशुस् ते विरूपाऽक्षं विरूपाऽक्ष-वधात् कृतम्[20] ॥[21]४०॥[३२
तथा तु तौ सं-यति सम्प्र-युक्तौ[22]
तरस्विनौ वानर-राक्षसानाम् ।
बलाऽर्णवौ सस्वनतुः सु-भीमं
N] यथाऽर्णवौ[23] द्वाव् इव भिन्न-वेलौ ॥[23]४१॥[३४

---

१. भ—कपेस् । २. रा$_1$, ल$_1$, ल$_2$ ब अ—०नीसमं वै भी० । रा$_2$—०नेः समं वै भी० । भ—०नेः सदृशं घोरदर्शनं । ३. अतः परमधिकः पाठः—भ—समवाप्य प्रहारं तु राक्षसं स हरीश्वरः । तलेनैव महावेगो विरूपाक्षमुपाद्रवत् ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब अ—समुद्धृतं । ५. प्र—नैपुण्यं घातयि० ॥ ६. भ—वानरेश्वरः । ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—नं मूर्च्छितं । भ—शिक्षया मो० । ८. अ—प्रहारांस्तस्य वानरः । प्र रा$_2$ फ म—प्रहारास्तेन रक्षसा । भ—प्रहारं तेन रक्षसा ॥ ९. प्र रा$_2$ फ—ईक्ष्य । १०. अ भ—नास्ति ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब अ फ म—तं दृष्ट्वा ततस् । भ—ददर्शांतरं । १२. अ—नास्ति । १३. भ—ततोऽस्य पातयामास । १४. भ—महत्तलम् ॥ १५. भ—०नितुल्येन । १६. भ—निहतं रक्षः । १७. रा$_2$ फ म—स्रोतोभिः स विनिर्व० । १८. भ—पपात निहतं रक्षः शोणितं चासृजन्मुखात् ॥ १९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म—सफेनरु० । भ—०रुधिरप्लु० । २०. भ—०क्षतरं । २१ अतः परमधिकः पाठः—रा$_2$ फ भ—स्फुरंतं परिवर्तंतं पार्श्वेषु रुधिरोक्षितम् । करुणं निःश्वसंतं च ददृशुर्हरयो रिपुम् ॥ २२. अ—सम्प्रहारौ । भ—सम्प्रसक्तौ । २३. म—नास्ति ॥

नि-पातितं प्रेक्ष्य विरूप-नेत्रं
तम्[1] आ-पतन्तं[1] हरि-पुङ्गवेन[2] ।[3]
बलं सम्-अग्रं[4] कपि-राक्षसानाम्[5]
N] उन्मत्त-गङ्ग-प्रतिमं बभूव ॥४२॥ [३५

इत्यार्षे रामायणे युद्ध-काण्डे[6] विरूपाऽक्ष-वधो नाम
पञ्चसप्ततितमः सर्गः ॥ ७५ ॥

[वं-७७]= [षट्सप्ततितमः सर्गः] =[दा-६८]

शात्यमाने[7] बले तूर्णम् अन्योऽन्येन पृथक् पृथक् ।
१] सरसीऽव महा-घर्मे क्षीण-तोये बभूवतुः ॥१ ॥ [१
स्व-बलस्य[8] वि-घातेन[8] विरूपाऽक्ष-वधेन च ।
२] बभूव द्वि-गुणं[9] क्रुद्धो[9] रावणो राक्षसाऽधिपः ॥२ ॥ [२
प्र-क्षीणं[10] स्व-बलं[10] दृष्ट्वा वध्यमानं बली-मुखैः[11] ।
३] बभूव[12] व्यथयाऽऽविष्टः[12] प्रेक्ष्य[13] दैव-विपर्ययम्[14] ॥३ ॥
उवाच च[15] समीप-स्थं महोदरम्[16] अव-स्थितम्[16] । [३
४] अस्मिन् काले महा-बाहो जयाऽऽशा मे त्वयि स्थिता ॥४ ॥
जहि शत्रु-चमूं वीर दर्शय[17] स्वं च वि-क्रमम्[17] ।
५] भर्तृ-पिण्डस्य कालोऽयं निर्-दिष्टः[18] साधु[19] बुद्धि-मन्[19] ॥५ ॥ [४
तथेत्य्[20] उक्त्वा सु-तेजस्वी[20] राक्षसेन्द्रं महोदरः[21] ।

---

१. रा$_2$ फ–समा० । भ–महाबलं तं । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–हरियूथपेन । ३. म–नास्ति । ४. रा$_2$ फ भ–समस्तं । म–च तद् । ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–कपियूथपानां । म–राक्षसयूथपानां ॥ ६. प्र रा$_2$ भ–लंकाकांडे ॥ ७. म भ–हन्यमाने ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब अ फ–स ब० । प्र म–०स्य निघा० । रा$_2$ फ–०लस्याऽथ घा० । भ–०स्य च घा० । ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०णक्रोधो ॥ १०. भ–क्षीयमानं बलं । ११. भ–च वानरैः । १२. म–बभूवाऽथ व्यथाविष्टो । भ–बभूवाऽस्य व्यथा युद्धे । १३. रा$_2$ फ–वीक्ष्य । १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ–चैवं वि० ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब अ–स । १६. भ–स तु मत्तमनन्तरम् ॥ १७. भ–दर्शयाद्य पराक्रमम् । १८ रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ–निर्वेष्टुं । १९. रा$_1$ अ म–०धु बुद्धिमान् । भ–०धुबुद्धिभिः ॥ २०. रा$_1$ ल$_1$ ब अ–०क्त्वा स ते० । म–तस्मिन्काले स ते० । भ–सामंतस्तु तथेत्युक्त्वा । २१. भ–महाद्युतिं ।

६] प्र-विवेश रिपोः सेनां[1] मकरः सागरं यथा[1] ॥६ ॥ [५
ततः स कदनं चक्रे वानराणां महा-बलः ।
७] भर्तृ-वाक्येन[2] तेजस्वी[2] तेजसा[3] च[3] प्र-चोदितः[4] ॥७ ॥ [६
प्र-भग्नां सम्-अरे दृष्ट्वा वानराणां महा-चमूम् ।
८] अभि-दुद्राव सु-ग्रीवो[5] महोदरम्[6] अन्-अन्तरम् ॥८ ॥ [१०
प्र-गृह्य वि-पुलां घोरां महीधर-निभां[7] शिलाम् ।
९] चिक्षेप स[8] महा-तेजास् तद्-वधाय महा-कपिः ॥९ ॥ [११
ताम् आ-पतन्तीं सहसा शिलां दृष्ट्वा[9] महोदरः[9] ।
१०] अ-सम्भ्राऽऽन्तां ततो[10] बाणैर् निर्-बिभेद दुरा-सदाम्[10] ॥१०॥ [१२
रक्षसा तेन बाणौघैर् नि-कृत्ता तु[11] सहस्र-धा[12] ।
११] नि-पतन्ती[13] तदा भूमौ[14] गृध्र-चक्र-समाकुला[15] ॥[16]११॥ [१३
तां[17] च दृष्ट्वा शिलां[17] मोघां[18] सु-ग्रीवः क्रोध-मूर्च्छितः ।[19]
१२] सालम् उत्-पाट्य चिक्षेप चिच्छेदाऽनेक-धा[20] स तम्[20] ॥१२[16]॥[१४
तं चैवाऽथ स सु-ग्रीवं दारयामास पत्रिभिः ।[21] [१५
१३] ततो[22] ददर्श सु-ग्रीवः[22] परि-घं पतितं भुवि ॥१३॥
तं[23] प्र-गृह्य[23] ततः शीघ्रं व्य्-अधमत्[24] तस्य मार्गणान्[24] ।
१४] जघान चोग्र-वेगेन ततोऽस्य रथ-वाजिनः ॥[25]१४॥[१६
तस्माद् धत-हयाच् छीघ्रं[26] समा-प्लुत्य महा-रथात् ।
१५] गदां जग्राह सं-क्रुद्धो राक्षसोऽथ महोदरः[27] ॥[28]१५॥[१७

---

१. भ–सैन्यं पतंग इव पावकम् ॥ २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०वाक्यैः सुते० । म भ–०क्यैश्च ते० । ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–तेनासौ हि । ४. म–प्रनोदितः ॥ ५. म–तेजस्वी । ६. भ–तदा मत्तम् ॥ ७. म भ–महोदरनिभां । भ–०रसमां । ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ–सुम० । म–च म० ॥ ९. भ–राक्षसपुंगवः । १०. भ–शितैर्बाणैर्बिभेद सुदु० ॥ ११. भ–सा । १२. भ–०स्रशः । १३. रा$_1$ ल$_1$ ल$_2$ ब अ–निपपात । १४. भ–शिला । १५. रा$_2$ फ–०क्रमिवाबभौ । भ–गृध्रसंघ इवाम्बरात् । १६. म–नास्ति ॥ १७. भ–स तु भिन्नां । १८. ल$_1$ ल$_2$ ब–घोरां । भ–दृष्ट्वा । १९. अतः परमधिकः पाठः— भ–प्रगृह्य विपुलं घोरं महीधरसमुच्छ्रितम् । २०. रा$_2$ फ भ–स तं चिच्छेद नैकधा ॥ २१. भ–शरैश्च विददारैनं राक्षसः प्लवगाधिपम् । २२. भ–स ददर्श ततः क्रुद्धः ॥ २३. भ–आविध्य तु । २४. म–०मत्तस्य सायकान् । भ–मत्तस्य वधमादिशन् । २५. भ–परिघेणोग्रवेगेन जघान च हयोत्तमान् ॥ २६. रा$_2$ फ म भ–वीरः । २७. भ–महाबलः । २८. म–नास्ति ॥

गदा-परिघ-हस्तौ तौ युधि[1] वीरौ सम्-ईयतुः[1] ।[2]
१६] नदन्तौ[3] गो-वृष-प्रख्यौ[4] साऽशनी[5] इव तोय-दौ ॥[6]१६॥[१८
आ-जघान गदां तस्य परि-घेण हरीऽऽश्वरः । [२०
१८] पपात[7] गदया भिन्नः परि-घस्[8] तस्य भू-तले[8] ॥१७॥ [२१
ततो जग्राह दुर्-धर्षं[9] कपीऽन्द्रो वसुधा-तलात् ।
१९] आयसं मुसलं घोरं सर्व-तः स्वर्ण-भूषितम् ॥१८[9]॥[२२
स तद् उत्-क्षिप्य चिक्षेप राक्षसोऽप्य् अपरां गदाम् ।
२०] भिन्नेऽन्योऽन्यम् आ-साद्य पेततुस् ते मही-तले ॥१९॥ [२३
ततो भग्न-प्रहरणौ मुष्टिभ्यां तु सम्-ईयतुः ।[10]
२१] तेजो-बल-समाविष्टौ दीप्ताव् इव हुताऽशनौ ॥[10]२०॥[२४
जघ्नतुस् तौ तदाऽन्योऽन्यं नेदतुश् च पुनः पुनः ।[11]
२२] तलेनाऽन्योऽन्यम्[12] आ-हत्य पेततुर्[13] धरणी-तले[13] ॥२१[14]॥[२५
उत्-पेततुस् ततस् तूर्णं[14] जघ्नतुश् च परस्परम् ।[14]
२३] भुजौ[15] चिक्षिपतुर्[15] वीराव् अन्योऽन्य-वध-कांक्षिणौ[16] ॥२२॥ [२६
जग्राह च ततः खड्गम् अदूर-परिवर्तिनम् ।
२४] राक्षसश् चर्मणा सार्धं[19] महा-वेगो[17] महोदरः[17] ॥२३॥ [२७
२५पू] तथैव सु-महाखड्गं[18] पतितं चर्मणा सह ।[19]
N] जग्राह वानर-श्रेष्ठः सु-ग्रीवो वि-ननाद च ॥[20]२४॥[२८
२५उ] तौ तु रोष-परीऽऽताऽङ्गौ नर्दन्ताव्[21] अभ्य्-अधावताम्[21] ।

---

१. भ–शुशुभाते महारणे । २. अतः परमधिकः पाठः—भ–क्रोधेन महताविष्टौ दीप्ताविव हुताशनौ । ३. रा$_2$ फ भ–नदंतौ । ४. म–तौ वृष० । भ–वृषभप्रख्यौ । ५. भ–सवज्राव् । ६. अतः परमधिकः पाठः—भ–ततः क्रुद्धो गदां तस्य चिक्षेप रजनीचरः । ज्वलंतीं भास्कराकारां सुग्रीवस्य महारणे ॥ स गदां तां महाघोरामापतंतीं महाबलः । सुग्रीवो रोषताम्राक्षः समुद्यम्य महाहवे ॥ ७. भ–अथास्य । ८. भ–०घः पतितो भुवि ॥ ९. भ–वर्जं–नास्ति ॥ १०. ल$_1$ फ म–नास्ति ॥ ११. फ–नास्ति । १२. भ–तलैश्चान्यो० । १३. भ–०तुस्तौ महीतले । १४. म–नास्ति ॥ १५. ल$_1$ ब रा$_2$ फ–भुजौ विक्षि० । भ–भुजैश्चि० । १६. रा$_2$–०न्यं नेदतुश्च पुनः पुनः ॥ १७. भ–०बाहुर्महाद्युतिः ॥ १८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–स महा० । म–०च महा० । १९. भ–सोप्यसिं चर्मणा सार्धं जग्राह पतितं भुवि । २०. भ–नास्ति ॥ २१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–निशाचरकपीश्वरौ ।

उद्यताऽसी[1] रणे हृष्टौ[1] युधि[2] (?द्ध-) शस्त्र-विशारदौ[2] ॥२५॥ [२९
२६] दक्षिणं मण्डलं चोभौ सु-तूर्णं[3] समतीऽऽयतुः[3] ।
२७पू] अन्योऽन्य-प्रतिसंरब्धौ जय-प्रणिहिताव् उभौ ॥[4]२६॥[३०
स तु शूरो महा-वेगो वीर्य-श्लाघ्यो[5] महोदरः[5] ।
२८] महा-चर्मणि तं खड्गं पातयामास दुर्-मतिः ॥२७॥ [३१
लग्नं[6] तु कर्षतः[6] खड्गं खड्गेन कपि-कुञ्जरः ।
२९] जहार स[7] शिरस् तस्य[7] कुण्डलोपचितं गुरुं[8] ॥२८॥ [३२
निकृत्त-शिरसस् तस्य पतितस्य मही-तले ।
३०] तद् बलं राक्षसेन्द्रस्य भयान्[9] नैव व्य्-अतिष्ठत[9] ॥२९॥ [३३
तं हत्वा वानरैः[10] सार्धं ननाद मुदितो हरिः ।
३१] चुक्रोध च दश-ग्रीवो बभौ[11] हृष्टश् च वानरः[11] ॥[12]३०॥[३४

इत्यार्षे रामायणे युद्ध-काण्डे[13] महोदर-वधो[14] नाम

षट्सप्ततितमः सर्गः ॥ ७६ ॥

[वं-७८]= [सप्तसप्ततितमः सर्गः] =[दा-९९]

महोदरे तु नि-हते महा-पार्श्वः प्रताप-वान् ।[15]
१] अङ्गदस्य चमूं भीमां[16] क्षोभयामास मार्गणैः[17] ॥१ ॥[१
स वानराणां मुख्यानाम् उत्तमाऽङ्गानि राक्षसः ।

---

१. भ-०तासिधरौ वीरौ । २. रा$_1$ ल$_2$ ब-सर्वशास्त्र० । ल$_1$ अ-सर्वशस्त्र० । म-युधि तन्त्रवि० । भ-युधि युद्धवि० ॥ ३. रा$_1$ म-स तूर्णं स० । ल$_2$-सुतीर्णं स० । भ-तूर्णं च संपरीयतुः । ४. अतः परमधिकः पाठः—भ-उभौ विक्रमसम्पन्नौ परस्परजिघांसिनौ ॥ ५. भ-०श्लाघी महाबलः ॥ ६. प्र रा$_2$ फ म भ-भग्नमुक्त० । ७. भ-सशिरस्त्राणं । ८. रा$_2$ फ म-शुभं । भ-शिरः ॥ ९. भ-प्रदुद्राव दिशो दश ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-राक्षसैः । ११. भ-रामो हृष्टो बभूव ह । १२. अतः परमधिकः पाठः—भ-ततः स मत्तं विनिहत्य भूमौ महागिरेर्दीर्णमिवैकदेशम् । सूर्यात्मजस्तत्र रराज लक्ष्म्या सूर्यः स्वतेजोभिरिवाप्रधृष्यः ॥ १३. प्र भ-लंकाकांडे । १४. भ-मत्तवधः ॥ १५. भ-तस्मिन्विनिहते मत्ते उन्मत्तो रजनीचरः । १६. म-घोरां । १७. भ-सायकैः ॥

२] पातयामास कायेभ्यः फलानीऽव सदा-गतिः ॥[1]२ ॥ [२
४३] केषां-चित् सायकैर् बाहूंश् चिक्षेपाऽथ स राक्षसः ।[2]
वानराणां सु-संरब्धः पार्श्वान्[3] केषां-चिद् आऽक्षिपत्[3] ॥३ ॥ [३
५] तेऽर्दिता बाण-वर्षेण[4] महा-पार्श्वेन[5] वानराः ।
वि-षादाद्[6] वि-मुखाः[6] सर्वे बभूवुर् गत-चेतसः ॥४ ॥ [४
६] नि-शम्य बलम् उद्-विग्नम् अङ्ग-दो राक्षसाऽर्दितम् ।
वेगं चक्रे महा-वेगः सम्-उद्र इव पर्वणि ॥५ ॥ [५
७] प्र-गृह्याऽश्म-मयं[7] वीरः सूर्य-रश्मि-सम-प्रभम् ।
परि-घं वानर-श्रेष्ठो[8] महा-पार्श्वे[8] न्य्-अपातयत् ॥६ ॥ [६
८] स तु तेन प्र-हारेण[9] महा-पार्श्वोऽल्प-चेतनः[10] ।
स-सूतः स्यन्दनात् तस्माद् वि-संज्ञो न्य्-अपतद् भुवि ॥७ ॥ [७
९] तस्यर्क्ष-राजो[11] बल-वान्[12] नीलाऽञ्जन-चयोपमः ।
विनिष्-पत्य[13] महा-तेजा जाम्ब-वान्[14] दृढ-विक्रमः[14] ॥[15]८ ॥ [८
१०] प्र-गृह्य गिरि-संकाशां[16] क्रुद्धः स[16] विपुलां शिलाम् ।
अश्वाञ् जघान सहसा स्यन्दनं च बभञ्ज वै[17] ॥९ ॥ [९
११] मुहूर्ताल् लब्ध-संज्ञस् तु महा-पार्श्वो[18] महा-बलः[18] ।
अङ्ग-दं दशभिर्[19] बाणैर् भुजयोः प्रत्य्-अविध्यत[20] ॥१०॥ [१०
१२] जाम्ब-वन्तं त्रिभिर् बाणैर् आ-जघान[21] स्तनाऽन्तरे[21] ।

---

१. रा$_1$,ल$_1$,ल$_2$ब अ प्र म–नास्ति । २.रा$_2$ फ–वर्जं–नास्ति । भ–बाहून्बाणैः स केषाञ्चित् स्कंधांश्चापि निशाचरः । अतः परमधिकश्च पाठः—भ–उवाच वचनं चाऽपि राक्षसांश्च प्रहर्षयन् । मयि तिष्ठति शत्रुघ्ने नेमे वानरपुंगवाः ॥ प्रभग्ना वर्तयिष्यन्ति सैन्ये मम सुदुःसहे ॥ ३. रा$_1$ ल$_1$ ल$_2$ ब अ–पार्श्वं के० । प्र फ म–पार्श्वं के० । भ–पार्श्वानि च बिभेद ह ॥ ४. रा$_2$–०वर्षैश्च । ५. भ–उन्मत्तेन तु । ६. रा$_1$ ल$_1$ ल$_2$ ब अ–विध्यंतोऽभिमुखाः । भ–विषण्णा वि० ॥ ७. भ–गृहीत्वा चायसं । ८. भ–०श्रेष्ठ उन्मत्ते स ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब अ–प्रमाणेन । १०. भ–उन्मत्तो नष्टचेतनः ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–ऋक्षराजस्तु । १२. भ–तेजस्वी । १३. रा$_2$–विनिहत्य । १४. रा$_2$ फ म–स्वयूथाग्वानरर्षभः । भ–स्वयूथान्मेघसन्निभात् । १५. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ब अ प्र रा$_2$–विनिष्पत्य महावेगः स्वान् रिपून्मेघनिःस्वनः । १६. भ–गिरिश्रृंगाभः संगृह्य । १७. रा$_2$ म–तं । भ–ह ॥ १८. भ–उन्मत्तो राक्षसर्षभः । १९. भ–पंचभिर् । २०. म–समविध्यत । २१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–राघवं च स्त० । म–दुर्जयः समविध्यत ।

ऋक्ष-राजं गवाऽक्षं च बिभेद[1] दशभिः[1] शरैः ॥११॥ [११
१३] गवयं पञ्च-विंशत्या[2] दृष्ट्वा[3] शर-निपीडितम्[3] ।
जग्राह परि-घं घोरम् अङ्ग-दः क्रोध-मूर्च्छितः ॥१२॥ [१२
१४] तस्याऽङ्ग-दः सु-रुषितो[4] युगाऽन्ताऽग्निर् इवोत्थि (दू-स्थि[4])तः ।
दूर-स्थितस्य परि-घं वज्र-संकाशम् आयसम्[5] ॥१३॥ [१३
१५] द्वाभ्यां भुजाभ्यां सं-गृह्य[6] भ्रामयित्वा च वेग-वान् ।
N] महा-पार्श्वस्य[7] चिक्षेप वधाऽर्थं[8] वालिनः सुतः[8] ॥१४॥ [१४
स तु क्षिप्तो बल-वता परि-घस् तस्य रक्षसः ।
१६] शिरस्-त्राणं धनुश् चाऽपि पातयामास वेगितः ॥[9]१५॥ [१५
तं[10] समा-रुह्य[10] वेगेन वालि-पुत्रः प्रताप-वान् ।[11]
१७] तलेनाऽभ्य्-अहनत्[11] क्रुद्धः[12] कर्ण-मूले स-कुण्डले ॥१६॥ [१६
स[13] तु क्रुद्धो महा-पार्श्वो[13] महा-वेगो महोद्यमः[14] ।
१८] करेणैकेन जग्राह सु-महान्तं परश्व-धम् ॥१७॥ [१७
तं तैल-धौतं[15] वि-मलं शैल-सारमयं[16] दृढम्[17] ।
१९] शस्त्रं[18] परम-संक्रुद्धो वालि-पुत्रे न्य्-अपातयत् ॥१८॥ [१८
तस्य[19] वामेंऽस-फलके[19] भृशं क्रोधान्[20] नि-पातितः[20] ।
२०] अङ्ग-दं मोहयामास प्र-हितः[21] स[21] परश्व-धः ॥१९॥ [१९
स वीरो वज्र-संकाशम् अङ्ग-दो[22] मुष्टिम् आत्मनः[22] ।
२१] न्य्-अपातयत्[23] सुसं-क्रुद्धः[23] पितुस् तुल्य-पराऽऽक्रमः ॥[22]२०॥ [२०
रक्षसस्[24] तस्य सं-ग्रामे[24] मर्म-ज्ञो[25] हृदयं प्रति ।

---

१. भ–विव्याध बहुभिः ॥ २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–जांबवंतं च । भ–ऋक्षराजं तु । ३. भ–स दृष्ट्वा शरपीडितौ ॥ ४. भ–प्रकुपितो विससर्ज तमायसं । ५. रा$_1$–आयतं ॥ ६. भ–तं वीरो । ७. भ–निशाचराय । ८. भ–वधाय वालिनंदनः ॥ ९. रा$_2$–नास्ति । भ–धनुश्च सशरं हत्वा शिरस्त्राणमपातयत् ॥ १०. फ म भ–स तमासाद्य । ११. रा$_2$–नास्ति । अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब अ प्र–जघान कर्णमूले तु तलेनामितविक्रमः । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०नाभिहतः क्रुद्धः । भ–०भिजघानाशु ॥ १३. भ–ततः क्रुद्धः स उन्मत्तो । १४. भ–महाभुजः ॥ १५. भ–शैल० । १६. भ–तीक्ष्णसा० । १७. रा$_2$ फ म भ–महत् । १८. भ–रक्षः ॥ १९. भ–तेन वा० । २०. म–कोपाभिपा० । २१. भ–स मुहूर्तं ॥ २२. फ–नास्ति ॥ २३. भ–आवर्त्तयत संरब्धः । २४. भ–राक्षसस्य स्तनाभ्यासे । २५. रा$_1$–असंज्ञो ।

२२] इन्द्राऽशनि-सम-स्पर्शं तदा[1] मुष्टिम् अपातयत् ॥२१॥ [२१
तस्य[2] मुष्टि-निपातेन राक्षसस्य महा-मृधे[3] ।
२३] पफाल हृदयं भिन्नं[4] स पपात ततो[5] भुवि ॥२२॥ [२२
तस्मिन् नि-पतिते[6] भूमौ तत् सैन्यं विप्र-दुद्रुवे[7] ।
२४] आ-विवेश महा-क्रोधः सम्-अरे चाऽपि रावणम् ॥[8]२३॥[२३

इत्यार्षे रामायणे युद्ध-कांडे[9] महापार्श्व-वधो[10] नाम
सप्तसप्ततितमः सर्गः ॥ ७७ ॥

[वं–७९]= [अष्टासप्ततितमः सर्गः] =[दा–१००]

महा-पार्श्वे विनि-हते राक्षसे च महोदरे ।[11]
N] निशा-चरे महाऽमात्ये विरूपाऽक्षे नि-पातिते[12] ॥१ ॥[१
विप्र-द्रुतेषु योधेषु कां-दिशीकेषु[13] सर्व-न्तः[13] ।
N] रावणः शोक-सन्तप्तः[14] कार्य-शेषम् अचिन्तयत् ॥२ ॥[N
N] चिन्तयित्वा नाऽति-चिरं[15] स्व-सैन्यं[16] विनि-वर्त्य[17] च ।[11] [N
३उ] सूतं[18] सं-चोदयामास[18] वाक्यं चेदम्[19] उवाच ह ॥३ ॥[२
नि-हतानाम् अमात्यानां रुद्धस्य[20] नगरस्य च ।[21]
४] अन्तम्[22] अद्य गमिष्यामि हत्वा तौ राम-लक्ष्मणौ ॥४ ॥[३

---

१. भ–तस्य ॥ २. भ–तेन । ३. भ–महात्मनः । ४. भ–भग्नं । ५. रा₂ म–हतो ॥ ६ म–विनिहते । ७. भ–संप्रचुक्षुभे । ८. अतः परमधिकः पाठः—भ–स तु जलधरवद्विनद्य नादं समरगतः कुपितो निशाचरेन्द्रः । अदहदथ शरैर्हरींस्तदानीं तृणशलभानिव कानने दवाग्निः ॥ ९. प्र भ–लंकाकांडे । १०. भ–उन्मत्तवधः ॥ ११. भ–स्वबलं निहतं दृष्ट्वा तस्मिन्संग्राममूर्धनि । भ्रातृभ्विनिहतांश्चैव शक्रतुल्यपराक्रमान् ॥ निशम्य मन्त्रिप्रवरौ सूदितौ युधि वानरैः । मत्तोन्मत्तौ च सम्प्रेक्ष्य निहतौ परमद्युती ॥ विरूपाक्षं च दुर्धर्षं ससैन्यं वानरैर्युधि । चुकोपाथ महातेजा देवदानवदर्पहा । स भास्करसहस्रस्य तेजो बिभ्रन्महाद्युतिः ॥ १२. म–महासुरे ॥ १३. म–काल्यमानेषु सर्वशः । १४. म–क्रोधसं० ॥ १५. रा₁ ल₁ ल₂ ब–नातिस्थिरं । १६. रा₁ ल₁ ल ब अ प्र रा₂ फ–०न्याद् । १७. म–०वार्य । १८. रा₁ ल₁ ल₂ ब अ प्र–स्वं रथं चो० । म–सूतं स नोद० । १९. म–एतद् ॥ २०. भ–दग्धस्य । २१. अतः परमधिकः पाठः—भ–प्रहस्तस्यातिकायस्य इन्द्रजित्कुम्भकर्णयोः । २२. रा₁ ल₁ ल₂ ब अ प्र–अहम् । भ–गतिम् ॥

कर्मणोऽस्य हि तौ मूलं भ्रातरौ राम-लक्ष्मणौ[1] ।[2] [N
५] प्र-शाखा यस्य सु-ग्रीवो बह्वोऽन्ये[3] च यूथ-पाः[3] ॥[4]५ ॥ [४उ
N] फल-पुष्पे[5] जनक-जा[5] द्रष्टा सेक्ता च मारुतिः ।[4]
६पू] मूले हते हतं सर्वं तौ हनिष्यामि सं-युगे ॥६[6]॥ [N
७उ] स दिशो दश[7] घोषेण रथेन सहसा[7] भृशम् ।
नादयन् राक्षस-श्रेष्ठो[8] राघवाव्[9] अभ्य्-अवर्तत[9] ॥७ ॥ [६
८] पूरिता तेन शब्देन स-नदी-गिरि-कानना[10] ।
सं-चचाल मही सर्वा त्रेसुश्[11] चैव मृग-द्विजाः[11] ॥८ ॥ [७
९] स[12] वि-स्फार्य महा-चापं किरीटी मृष्ट-कुण्डलः ।
नाम वि-श्रावयामास[13] जगर्ज च ननाद च ॥९ ॥ [N
१०] तेन सिंह-प्रणादेन नाम-संकीर्तनेन[14] च ।
स्यन्दनस्य च नादेन पूरयामास रोदसी ॥१०॥ [N
११] त्रि-विक्रमे यथा विष्णोः सर्वे[15] दैत्य-जनाः[15] पुरा ।
N] भयाऽऽर्ता वानराः सर्वे विविशुस् ते परस्परम् ॥११॥ [N
ते राक्षसेन्द्रं तं दृष्ट्वा वानरास् त्रस्त-चेतसः ।
१२] शरण्यं शरणं जग्मुर् मनसा पुरुषोत्तमम् ॥१२॥ [N
ततस् तं राघवो[16] दृष्ट्वा रथ-स्थं[17] पर्वतोपमम् ।
१३] वि-धुन्वानं धनुर् घोरं व्यादिताऽऽस्यम् इवाऽन्त-कम् ॥१३॥ [N
१४पू] विरूपाऽक्षं[18] महा-घोरं[19] गर्जन्तं कालमेघ-वत् ।
N] वानरान् सान्त्वयित्वा च[20] वि-भीषणम् उवाच ह ॥१४॥ [N

---

१. प्र रा$_2$ फ-राघवावुभौ । २. टि० ५-६ श्लोकौ क्रमवैपरीत्ये तु. गपू. स० ५२. श्लो० ५-७. । ल$_1$ ल$_2$ ब-नास्ति ॥ ३. भ-पत्राणि हरियू० । ४. म-नास्ति ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-फलमूले च जानक्या । ६. अतः परमधिकः पाठः—भ-रावणस्य वचः श्रुत्वा सूतो हर्षसमन्वितः । स वाहयामास रथं कपीनां भयमादधत् ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-रथघोषेण जातेन महता । भ-०ण रथस्थोऽतिरथो । ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-प्रदिशो भूमिं । भ-प्रययौ तूर्णं । ९. भ-राघवं प्रति रावणः ॥ १०. भ-मही सगिरि० ११. रा$_1$ ल$_1$ ल$_2$ ब-भ्रेमुश्चैव मृ० । प्र रा$_2$ फ म- त्रस्ताश्चैव मृ० । भ-त्रस्तसिंहमृगद्विजाः ॥ १२. अत आरभ्य म-१८-श्लोकं यावन्नास्ति । १३. रा$_2$ फ-संश्राव० ॥ १४. म-नामविश्रावणेन ॥ १५. ल$_2$ अ-सर्वदैत्य० । रा$_2$ फ-सर्वदैत्यवधे । प्र म-सर्वे दैत्यवराः । १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ म-रावणं । १७. रा$_1$ ल$_1$ ल$_2$ ब-राक्षसं ॥ १८ रा$_1$ ल$_1$ ल$_2$ ब अ प्र-स तं दृष्ट्वा १९. प्र-महारौद्र । म-महावेगं । २०. भ-तु ॥

कोऽयं पर्वत-सङ्काशो धनुष्-मान् कवची शरी ।
N] दिव्यं रथं समा-स्थाय वानरान् सं-जिघांसति[1] ॥१५॥ [N
आ-चक्ष्व मे महा-बाहो कोऽयं राक्षस-पुङ्गवः ।
N] यं दृष्ट्वा वानराः सर्वे भयाऽऽर्ता विप्र-दुद्रुवुः ॥१६॥ [N
स पृष्टो राज-पुत्रेण रामेणाऽमित-तेजसा ।
N] आ-चचक्षे महा-तेजा राघवाय वि-भीषणः ॥१७॥ [N
दश-ग्रीवो महा-तेजा राजा वैश्रवणाऽनुजः ।
N] भीम-कर्मा महोत्साहो रावणो राक्षसाऽधिपः ॥१८॥ [N
पुत्रो वि-श्रवसः साक्षात् क्रूर-कर्मा सु-दारुणः ।
N] दारुणो दारुणाऽऽचारो देव-दानव-दर्प-हा ॥१९[2]॥ [N
एतस्मिन् क्रियतां यत्नो महान्[3] पुरुष-पुङ्गव ।[4]
N] पुरा वानर-सैन्यानि क्षयं नयति सायकैः ॥२०॥ [N
N] विभीषण-वचः श्रुत्वा रामो राजीव-लोचनः ।
१४३] जग्राह कार्मुक-श्रेष्ठं वाक्यं चेदम् उवाच ह ॥२१॥ [N
दिष्ट्या मे दर्शनं प्राऽऽप्तो नैर्ऋतेन्द्रः सु-दुर्मतिः ।[5]
१५] वधेनाऽस्य नृ-शंसस्य तुष्टिम् एष्यामि सं-युगे ॥२२॥ [N
इत्य् उक्त्वा बाणम् आ-कर्णं पूरयित्वा ससर्ज ह ।
१६] तं राक्षसेन्द्रश् चिच्छेद त्रिभिर् बाणैर्[6] अ-मर्षणः ॥२३॥ [N
नि-कृत्तं सायकं दृष्ट्वा सौमित्रिः कुपितो भृशम् ।
१७] त्रासयामास रक्षांसि ज्या-घोषेण महा-बलः ॥२४॥ [N
N] पूरयन् स महीं[7] शैलान् अर्णवांश् च दिशस्[7] तथा ।
सौमित्रेर् धनुषो घोषं श्रुत्वा प्रति-भयं तदा ॥२५॥ [N
१८] वि-सिष्मिये महा-तेजा राक्षसेन्द्रो भृशं बली ।
स रावणः प्र-कुपितो दृष्ट्वा लक्ष्मणम् अग्र-तः ॥२६[8]॥ [N
१९] आ-दाय नि-शितं बाणम् इदं[9] वचनम् अब्रवीत्[9] ।

---

१. रा₂ फ-प्रजि० ॥ २. म-नास्ति ॥ ३. रा₂ म-क्षुद्रे । ४. फ-नास्ति ॥ ५. म-नास्ति ॥ ६. रा₂ फ म-भल्लैर ॥ ७. रा₂ फ-महाशैलानर्णवं च दिशस् । म-महीं सर्वां साकाशां दिशास् ॥ ८. म-नास्ति ॥ ९. रा₂ फ म-अरिदर्पनिसूदनं ।

तिष्ठ प्राणान् परि-त्यज्य गमिष्यसि यम-क्षयम् ॥[1]२७॥[N
२०] पश्य मे नि-शितान् बाणान् अरि-दर्प-निषूदनान् ।[1]
सितपीताऽमलांस् तीक्ष्णान् मुक्ता-रजत-भूषणान् ॥[2]२८॥[N
२१] एष[3] ते[3] सूर्य-सङ्काशो बाणः पास्यति शोणितम् ।[4]
मृग-राड् इव सं-क्रुद्धो नाग-राजस्य शोणितम् ।[5]
२२] त्यज सर्वाऽऽत्मना बाणं ततस् त्यक्ष्यसि जीवितम् ॥२९॥ [N
ततः स रक्षो-वचनं नि-शम्य
सु-गर्वितं[6] सं-यति राज-पुत्रः ।
न[7] चैव चुक्रोध बलस्थिराऽऽत्मा[7]
२३] प्रोवाच चैनं[8] वचनं महाऽऽत्मा ॥३०॥ [N
कर्मणा दर्शयाऽऽत्मानं न वि-कत्थितुम् अर्हसि ।
२४] पौरुषेण हि[9] युक्तेन[9] सं[10](?त्वं) वि-कत्थितुम् अर्हसि ॥३१॥ [N
सर्वाऽऽयुध-समायुक्तो धन्वी रथ-वरे स्थितः ।
२५] स[11] शरैर्[11] यदि वा शस्त्रैर् दर्शयस्व पराऽऽक्रमम् ॥३२॥ [N
ततः शिरांसि ते[12] बाणैः[12] पातयिष्याम्य्[13] अहं रणे[13] ।
२६] मारुतः काल-पक्वानि फलानीऽव वनस्-पतेः ॥३३॥ [N
अद्य ते मामका बाणास् तप्त-काञ्चन-भूषणाः ।
२७] पास्यन्ति रुधिरं देहात् सुराऽमृतम्[14] इवोत्थि(द्-स्थि)तम् ॥३४॥[N
लक्ष्मणस्य वचः श्रुत्वा हेतु-मद्[15] वीर्य-संयुतम्[15] ।
२८] रावणः परम-क्रुद्धो बाणम् उत्-तमम् आ-ददे[16] ॥[17]३५॥[N
तम् आ-पतन्तं सौमित्रिस् त्रि-धा चिच्छेद लाघवात् ।[17]
२९] रावणः परमाऽमर्षी शर-वर्षेण सोऽभ्य्-अयात् ॥३६॥ [N
ततः शर-सहस्रेण सं-च्छाद्य रघु-नन्दनम् ।

---

१. रा$_{2}$–भिन्नेषु नास्ति ॥ २. अ–नास्ति । अतः परमधिकः पाठः—रा$_{1}$–उवाच तं महातेजा लक्ष्मणं शुभलक्षणम् ॥ ३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब प्र–वर्षान्ते । ४. अ–नास्ति । ५. अ प्र म–नास्ति ॥ ६. म–निशम्य वै । ७. रा$_{2}$ फ–०बले स्थितात्मा । म–तथैव मुक्ते वचने महात्मा । ८. रा$_{2}$ फ म–चेदं ॥ ९. रा$_{2}$ फ–तु संयुक्तो । म–च यो युक्तो । १०. फ म–न वि० ॥ ११. प्र–सर्वैर् ॥ १२. म–बाणौघैः । १३. प्र–०ष्यामि भूतले ॥ १४. टि. सन्धिरार्षः । १५. रा$_{2}$ फ म–उत्साहसमन्वितं । १६. रा$_{1}$ ल$_{2}$–आददे । १७. म–नास्ति ॥

३०] वि-भीषणं च[1] सु-ग्रीवं वानरांश् चाऽभि-दुद्रुवे ॥३७॥ [N
सं-त्रास्य वानराऽनीकं शर-वर्षैर् महा-भुजः ।
३१] रामम् एवाऽभि-दुद्राव शरैर् अग्निशिखोपमैः ॥[2]३८॥[N
तम् आ-पतन्तं सहसा प्रत्य्-अगृह्णान् महा-भुजः ।[2]
३२] रामोऽपि राक्षस-श्रेष्ठं शरैर् अर्काऽग्नि-सन्निभैः ॥[3]३९॥[N
N] सं-क्रुद्धयोस् तयोर्[4] आसीत् सं-युगं[5] लोम-हर्षणम्[5] ।[6]
ततः प्र-वधृते युद्धं राम-रावणयोर् महत्[7] ।
३३] जीविताऽन्तकरं घोरं परस्पर-वधैषिणोः[8] ॥४०॥ [N
लाघवं[9] शर-मोक्षं च शर-व्याघातम् एव च ।
३४] आत्मनः प्रति-घातं च दृष्ट्वा रक्षो न[10] विव्यथे[10] ॥४१॥ [N
ततः शर-शतैस्[11] तीक्ष्णै[11] रावणं[12] स प्र-वेगितैः[12] ।
३५] राघवः परमाऽमर्षी[13] प्र-विव्याध महा-बलः[14] ॥४२॥ [N
चचाल पृथिवी सर्वा स-सागर-वन-द्रुमा ।[15] [७उ
३६] तामसं सु-महाघोरं मुमोचाऽस्त्रं सु-दारुणम् ॥४३॥
३७पू] निर्-ददाह[16] कपींस् तेन ते[17] प्र-पेतुर् मही-तले[17] ।[18] [८
३८उ] तान्य् अनीकान्य्[19] अनेकानि[19] रावणस्य शरोत्करैः ॥४४॥
प्रेक्ष्य भग्नानि शत-शो राघवः[20] समुप-स्थितः[21] । [१०
३९] ददर्श स ततो रामं तिष्ठन्तम्[22] अ-पराजितम्[22] ॥४५॥[११उ
लक्ष्मणेन सह भ्रात्रा विष्णुना वासवं यथा ।
४०] उल्-लिखन्तम् इवाऽऽकाशम् अव-ष्टभ्य स्व-कं[23] धनुः ।

---

१. ल$_1$ ल$_2$ प्र–तु ॥ २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ म–नास्ति ॥ ३. अतः परमधिकः पाठः—भ–ततोऽभवद्युद्धमनुत्तमं तयोर्महत्तदा रामनिशाचरेन्द्रयोः । जिगीषतोर्वन्यमृगेन्द्रयोर्वने प्रभिन्नयोर्यूथपयोर्यथा भवेत् ॥ ४. रा$_1$–ततो । ५. रा$_2$–संगरो रोमहर्षणः । फ–०गो लोमहर्षणः । ६. भ–नास्ति । ७. भ–तदा । ८. प्र म भ–०रजयैषिणोः ॥ ९. भ–रामस्य । १०. म–स दुद्रुवे । भ–प्रचुक्षुभे ॥ ११. भ–शरसहस्रेण । १२. ल$_1$ ल$_2$ ब अ प्र फ रा$_2$–व्यवच्छेदं प्र० । म–वज्रवेगप्र० । भ–प्रचिच्छेद परेरितं । १३. भ–समरामर्षी । १४. रा$_2$ फ म भ–विव्याध सुमहा० ॥ १५. भ–०ल दशग्रीवः क्रुद्धश्चैव महाबलः ॥ १६. भ–स द० । १७. भ–प्रयुक्तेन समंततः । १८. अतः परमधिकः पाठः—भ–उत्पात रजो भौमं भग्नैस्तत्र प्रधावितैः । सोढुं नैव हि तच्छेकुर्ब्रह्मणा निर्मितं स्वयम् ॥ १९. भ–०कानि सर्वाणि ॥ २०. रा$_1$ ल$_1$ ल$_2$ ब–रावणः । २१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ–पर्यवर्तत । २२. रा$_2$ फ–रावणः पर्यवस्थितं ॥ २३. रा$_1$ अ प्र–महद् । फ–स्वयं ।

N] पद्मपत्रनिभाऽक्षं[1] तं दीर्घ-बाहुम् अरि-दमम् ॥[2]४६॥[१२
वानरांश् च रणे भग्नान् आ-पतन्तं च रावणम्[3] ।
४२] सम्-ईक्ष्य राघवो हृष्टो[4] मध्ये[4] जग्राह तद्[5] धनुः[5] ॥४७[2]॥[१३
वि-स्फारयितुम्[6] आ-रेभे[6] ततः स पुनर्[7] आऽह्वयत् ।
४३] महा-वेगं[8] महा-कायं[9] भिन्दन्तम्[10] इव रोदसी[11] ॥४८॥ [१४
लक्ष्मणस्य च बाणेन राम-विस्फारितेन च ।
४४] शब्देन राक्षसास् त्रेसुः[12] पेतुश चैव[12] सहस्र-शः ॥४९॥ [१५
तयोर्[13] इषु-पथं[13] प्राऽऽप्य राम-लक्ष्मणयोर्[14] मृधे[14] ।
४५] बभूव स यथा राहुः समीपे शशि-सूर्ययोः[15] ॥५०॥ [१६
तम् ऐच्छत् प्रथमं योद्धुं लक्ष्मणो नि-शितैः शरैः ।
४६] मुमोच धनुर् आ-दाय[16] शरान् अग्नि-शिखोपमान् ॥५१॥ [१७
तान् मुक्त-मात्रान् आ-काशे लक्ष्मणेन धनुष्-मता ।
४७] बाणैर्[17] बाणान्[17] महा-तेजा रावणः प्रत्य्-अवारयत् ॥५२[18]॥[१८
एकम् एकेन बाणेन त्रिभिस् त्रीन् दशभिर् दश ।
४८] लक्ष्मणस्य प्रचिच्छेद[19] दर्शयन् हस्त-लाघवम् ॥५३॥ [१९
अभ्यति-क्रम्य[20] सौमित्रिं रावणः समिति-जयः ।
४९] आ-ससाद रणे[21] रामं स्थितं शैलम्[22] इवाऽचलम् ॥५४॥ [२०
स सं-ख्ये रामम् आ-साद्य क्रोध-संरक्त-लोचनः[23] ।
५०] व्य्-असृजच्[24] छर-वर्षाणि राघवे राक्षसेश्वरः ॥५५॥ [२१
शर-धारास् ततो रामो रावणाऽम्बुद-निःसृताः[25] ।

---

१. भ-०त्रविशालाक्षं । म-०त्रमिवाकाशं । फ-०त्रनिकाशाख्यं । २. प्र-नास्ति । अतः परमधिकः पाठः—भ-स तु सम्प्रेक्ष्य काकुत्स्थं राघवं रावणो युधि । रथेनाभ्यद्रवत्तूर्णं जघान च कपीन् बहून् ॥ ३. म भ-राक्षसं । ४. म-क्रुद्धो मृधे । ५. म भ-कार्मुकं ॥ ६. रा$_2$-०यित्वा समारेभे । भ-विस्फार्य च महच्चापं । ७. भ-रिपुम् । ८ म-०वेगो । ९. म-०यो । भ-महानादं । १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म-०दन् । ११. भ-मेदिनीं ॥ १२. भ-तेन न्यपतंत ॥ १३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र म-ततो रिपुपथं । भ-तयोः शरपथं । १४. भ-रावणो राजपुत्रयोः । १५. भ-चन्द्रसू० ॥ १६. भ-आनम्य ॥ १७. भ-बाणजालैर् । १८. भ-नास्ति ॥ १९. म-च चि० । भ-स चि० ॥ २०. भ-अथाति० । २१. भ-ततो । २२. म-मेरुम् ॥ २३. रा$_2$-कोपसं० २४. भ-असृ० ॥ २५. भ-शरव्रातांस्तु तान्रामो रावणेष्वासनिसृतान् ।

५१] दृष्ट्वाऽऽपतिताः[1] शीघ्रं[2] भल्लान्[3] जग्राह राघवः[3] ॥५६॥ [२२
ताञ् छरौघांस् ततो भल्लैस् तीक्ष्णैश् चिच्छेद सं-युगे[4] ।
५२] दीप्यमानान् महा-घोरान्[5] क्रुद्धान् आशीविषान् इव[5] ॥५७॥ [२३
राघवो रावणं सं-ख्ये[6] रावणश् चाऽपि राघवम्[6] ।
५३] अन्योऽन्यं वि-शिखैस्[7] तीक्ष्णैः[7] शरैर् अभि-ववर्षतुः ॥५८॥ [२४
चेरतुश् च[8] ततश् चित्रैर्[8] मण्डलैः[9] सव्य-दक्षिणैः[10] ।
५४] बाण-जालैर्[11] जिघांसन्ताव्[11] अन्योऽन्यम् अ-पराजितौ ॥५९[12]॥ [२५
तयोर् भूतानि सं-त्रेसुर्[13] युग-पत् सम्प्र-वृत्तयोः ।
५५] रौद्रयोः[14] सायक-मुचोर्[14] यमाऽन्तक-निकाशयोः ॥६०॥ [२६
सं-ततं[15] वि-विधैर्[15] व्योम[16] बभूव नि-शितैः[17] शरैः[17] ।
५६] घनैर् इवाऽऽतपाऽपाये विद्युज्-ज्वाला-समाकुलम्[18] ॥६१॥ [२७
समुत्-क्षिप्तम्[19] इवाऽऽकाशं बभूव शर-वृष्टिभिः ।
N] महाऽऽभोगैः[20] सुतीक्ष्णाऽग्रैर् वज्राऽग्निसदृशाऽऽननैः[21] ॥६२॥ [२८
शराऽन्धकारं तौ भीमं[22] चक्रतुः सम्-अरे तदा ।
५७] गतेऽस्तं तपने देवे गर्जन्[23] मेघाव्[24] इवोत्थि(दु-स्थि)तौ[24] ॥६३॥ [२९
तयोर् युद्धं महा-भीमं[25] परस्पर-वधैषिणोः[25] ।
५८] बभूवोग्रम्[26] अ-चिन्त्यं च वृत्र-वासवयोर् इव ॥६४॥ [३०
उभौ च[27] परमेष्वासाव उभौ शस्त्र-विशारदौ[28] ।

---

१. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–ददौ चापं ततः । २. भ–तूर्णं । ३. रा$_{1}$–बलाज्जग्राह रावणः ॥ ४. भ–राघवः । ५. प्र म–०घोरान्क्रुद्धानाशीविषोपमान् । भ–महेष्वासः क्रोधेनाशीविषोपमान् ॥ ६. भ–बाणै रावणो राघवं तथा । ७. भ–समरे वीरौ ॥ ८. प्र रा$_{2}$ फ भ–चरितं चित्रं । ९. रा$_{2}$–०ले । भ–०लं । १०. रा$_{2}$–०णे । भ–णं । ११. भ–बाणवर्षं समीक्षेताम् । १२. म–नास्ति ॥ १३. ल$_{1}$ ल$_{2}$ ब–बिभ्रेसुर् । प्र रा$_{2}$ फ म भ–त्रिभ्रेसुर् । १४. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब–०योः साकमुत्पत्य । भ–रामरावणयोर्युद्धे ॥ १५. भ–छन्नं तैर्निशितैर् । १६. प्र रा$_{2}$ फ म भ–बाणैर् । १७ रा$_{2}$ फ म–गगनं शितैः भ–गहनं नभः । १८. रा$_{1}$ अ–ज्वालामालास० ॥ १९. रा$_{1}$ ल$_{1}$ ल$_{2}$ अ प्र म–तदुत्क्षि० । भ–गवाक्षितम् । २०. भ–महावेगैः । २१. रा$_{2}$ फ–०ग्निविकृताननैः । म–०ग्निविसृताननैः । भ–वज्राश्मसदृशाननैः ॥ २२. भ–भीमौ । २३. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र रा$_{2}$ फ–जगन् । २४. रा$_{2}$ फ–मेघैरिवावृतं ॥ भ–मेघाविवोद्दितौ । २५. म–महाघोरमभवद्वधकांक्षिणोः । भ–०भीममन्योन्यवधकांक्षिणोः । २६. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र रा फ म–मनासाद्यम् ॥ २७. भ–तौ । २८. ल$_{1}$ प्र–शास्त्र० । भ–युद्धवि० ।

५९] उभौ चाऽस्त्र-विदां[1] श्रेष्ठाव् उभौ युद्धे[2] न चेलतुः[2] ॥६५॥ [३१
उभौ च[3] येन व्रजतो ययुस्[4] तेन[4] शरोर्मयः ।
६०] ऊर्मयः श्वसनाऽऽविद्धा भीमाः सागरयोर् इव ॥६६॥ [३२
ततः[5] संत्रस्त-चक्रस्[6] तु रावणो लोक-रावणः ।
६१] नाराच-मालां रामस्य ललाटे प्रत्य्-अमुञ्चत ॥६७॥ [३३
रौद्र-चाप-प्रमुक्तां तां नीलोत्पल-मयीम्[7] इव[7] ।
६२] शिरसा धारयन् रामो न व्यथाम् अभ्य्-अगच्छत[8] ॥६८॥ [३४
अथ मन्त्रान् अभि-जपन् रौद्रम् अस्त्रम् उद्-ईरयन् ।
६३] रामोऽपि जगृहे बाणान् स तदा क्रोध-मूर्च्छितः ॥६९[9]॥ [३५पू
N] सं-धायाऽग्नि-शिखा-प्रख्यांश्[10] चक्री-कृत्य महद् धनुः ।[11] [N
मुमोच च महा-तेजाश् चापम् उद्-यम्य[12] वीर्य-वान्[13] ॥७०॥ [३५उ
६४] ते शरा राक्षसेन्द्रस्य व्यव-च्छिन्नेन[14] वेगिताः । [३६पू
N] नि-पेतू रावणस्याऽग्रे वज्राऽशनि-सम-प्रभाः ॥७१[15]॥ [N
ते महामेघ-सङ्काशे कवचे[15] पतिताः शराः[15] ।
६५] अ-भेद्ये राक्षसेन्द्रस्य[16] न[17] व्यथां चक्रिरे[18] तदा[18] ॥७२॥ [३६उ
पुनर् एवाऽथ तं रामं रथ-स्थो राक्षसेश्वरः ।[19]
६६] विव्याध परमाऽस्त्रेण सर्वाऽस्त्र-कुशलो[20] रणे ॥[21]७३॥ [३७
ते ह (?कृ) त्वा शर[22] (?रा) वर्षाणि पञ्च-शीर्षाणा[23] (?णो) वोरगाः[23] ।
६७] श्वसन्तो विविशुर् भूमिं रावणेन[24] प्र-चोदिताः[24] ॥७४[25]॥ [३८
नि-हत्य राघवस्याऽस्त्रं रावणः क्रोध-मूर्च्छितः ।[25]

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–शास्त्र० । रा$_2$–शस्त्रभुजां । फ–शस्त्रभृतां । २. म–युद्धबले स्थितौ ॥ ३. भ–हि । ४. म–चक्रतुस्ते । भ–तेन तेन ॥ ५. भ–अथ । ६. रा$_1$–०स्त्रवक्त्रस् । भ–संसक्तहस्तस् ॥ ७. भ–०लसमप्रभां । ८. भ–प्रत्यपद्यत ॥ ९ भ–ततस्त्वभिजपन्मन्त्रं रौद्रास्त्रं समुदीरयन् । शरांश्चैव समाधत्त रामः क्रोधसमन्वितः ॥ १०. प्र रा$_2$ फ–०याशीविषप्र० । ११. म भ–नास्ति । १२. भ–आकृष्य । १३. ल$_2$–वेगवान् ॥ १४. प्र–नास्ति । १५. भ–रावणस्य रणे रामः शरानग्निशिखोपमान् । राघवेण प्रयुक्तास्ते कवचे निशिताः शराः ॥ १६. भ–अभेद्यकवचावृते । १७. प्र–नास्ति । भ–तु । १८. भ–चक्रुराहवे । १९. भ–नास्ति । २०. रा$_1$–सर्वासु कुशलं । ल$_1$ ल$_2$ ब अ प्र–०स्त्रकुशलं । २१. भ–अताडयन्महास्त्रेण गांधर्वेण महाबलः ॥ २२. रा$_2$ फ भ–बाणरूपाणि । २३. रा$_1$ अ प्र–०शीर्षा इवो । भ–०शीर्षा महोरगाः । टि०–वा=इव । २४. रा$_2$–०न प्रयोजिताः । भ–रामेण प्रतिचो० ॥ २५. म–नास्ति ।

६८] आसुरं सु-महाघोरम् अन्यद् अस्त्रं मुमोच[१] ह[१] ॥७५॥ [३९
व्याघ्र-सिंह-मुखान् बाणान् काक-कङ्क-मुखांस्[२] तथा ।
६९] गृध्र-दीप्ताऽऽननांश् चाऽपि[३] सृगाल-वदनान्[४] शितान्[४] ॥७६॥ [४०
ईहामृग-मुखांश् चाऽपि[५] व्यादिताऽऽस्यान् भयाऽऽवहान्[६] ।
७०] पञ्चाऽऽस्यांल् लेलिहानांश् च ससर्ज वि-विधाञ्[७] छरान् ।[८]   [४१
७१उ] रामं प्रति महा-तेजाः क्रुद्धः[९] सर्प[९] इव श्वसन् ॥७७॥ [४२उ
आसुरेण समा-विष्टः(?द्धः) सोऽस्त्रेण[१०] युधि राघवः ।
७२] ससर्जाऽस्त्रं महोत्साहः[११] पावकं पावकोपमः[१२] ॥७८॥ [४४
अग्नि-दीप्त-मुखान् बाणांश् चन्द्र-सूर्य-मुखांस्[१३] तथा ।
७३] चन्द्राऽर्धचन्द्र-वक्त्रांश्[१४] च[१४] धूम-केतु-निभान् अपि ॥७९॥ [४५
ग्रह-नक्षत्र-वक्त्रांश्[१५] च महोल्का-मुख-संस्थितान् ।
७४] विद्युज्-जिह्वांस् तथा[१६] चाऽन्यान्[१६] वि-ससर्ज[१७] शिताञ्[१७] छरान् ॥८०॥ [४६
ते रावण-शरा घोरा राघवाऽस्त्रेण[१८] मोहिताः[१८] ।
७५] वि-लयं जग्मुर् आ-काशे विनि-कृत्ताः[१९] सहस्र-धा[२०] ॥८१॥ [४७
तद् अस्त्रं नि-हतं दृष्ट्वा रामेणाऽक्लिष्ट-कर्मणा ।
७६] हृष्टा नेदुस् ततः सर्वे हरयः काम-रूपिणः ॥८२[२१]॥ [४८

इत्यार्षे रामायणे युद्ध-काण्डे[२२] राम-रावणयोर् अस्त्र-युद्धं
नामाऽष्टासप्ततितमः सर्गः ॥ ७८ ॥

---

१. रा$_2$ फ भ–समाददे ॥ २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–काकगृध्रमु० । ३. भ–चैव । ४. म–०नांस्तथा । भ–वराहवदनांस्तथा ॥ ५. रा$_2$ फ म भ–चान्यान् । ६. म–महाभयान् । ७. भ–निशिताञ् । ८. म–नास्ति । अतः परमधिकः पाठः—रा$_2$ फ भ–खरान्खरमुखांश्चान्यान् वराहमुखसंस्थितान् । कूर्मकुक्कुटवक्त्रांश्च मकराशीविषाननान् ॥ एतांश्चान्यांश्च मायाभिः ससर्ज विविधाञ्छरान् ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब अ–क्षुद्रः सर्प । रा$_2$–महासर्प । १०. ल$_1$ ल$_2$ ब अ प्र–शस्त्रेण । ११. भ–महातेजाः । १२. भ–दिव्यमुत्तमम् ॥ १३. रा$_1$ ल$_1$ ल$_2$ अ प्र रा$_2$ फ–०र्यसमांस् । भ–सूर्यवायुमु० । १४. भ–०र्धवक्त्रान्विमलान् ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म–०वर्णांश् । १६. रा$_2$ फ म भ–तथैवान्यान् । १७. रा$_2$ फ–ससर्ज निशिताञ् । म भ–ससर्ज विविधाञ् ॥ १८. भ–राघवस्य समीपतः । १९. भ–जघ्नुश्चैव । २०. फ म भ–०शः ॥ २१. अतः परमधिकः पाठः—भ–सुग्रीवप्रमुखा वीराः सर्वे ते प्रत्यपूजयन् ॥ २२. प्र भ–लंकाकांडे । म–युद्धपर्वणि ॥

अस्त्रेणाऽस्त्रं प्रति-हतं दृष्ट्वा रामेण रावणः ।
१] क्रोधं तु द्वि-गुणं चक्रे क्रोधात् स[1] तद्-अनन्तरम्[1] ॥१ ॥[१
मयेन माया-विहितं[2] रौद्रम् अस्त्रं महा-बलः[2] ।
२] उत्-स्रष्टुं[3] रावणो घोरं[4] राघवायोपचक्रमे[5] ॥२ ॥[२
ततः[6] प्राऽऽसाश् च निष्-पेतुर् गदाश् च मुसलान्य्[7] अपि[8] ।
३] कार्मुका दीप्यमानाश्[9] च[9] वज्र-धाराश्[10] च[10] सर्व-शः ॥३ ॥[३
मुद्गराः कूट-यन्त्राणि[11] दीप्ताश् चाऽशनयस् तथा ।
४] निष्-पेतुर् वि-विधास् तीक्ष्णा[12] वाता इव युगाऽत्यये[13] ॥४ ॥[४
ततस् तद्[14] राघवः शीघ्रम्[15] अस्त्रम् अस्त्र-विदां[15] वरः ।
५] जघान परमाऽस्त्रेण गान्धर्वेण महा-द्युतिः ॥५[16] ॥[५
ततश् चक्राणि निष्-पेतुर् भास्वराणि[17] महांति[18] च[18] ।
७] कार्मुकाद् भीम-वेगानि[19] राघवस्य महाऽऽत्मनः[19] ॥६ ॥[७
तैर् आसीद् गगनं व्याप्तं[20] सं-पतद्भिस् तमो-नुदैः ।
८] भासिताः[21] सर्व-लोकाश् च[21] चन्द्राऽऽदित्य-ग्रहैर् इव ॥७ ॥[८
तैः स[22] चिच्छेद[22] तान् बाणान् अस्त्राणि[23] वि-विधानि[23] च ।[24]
९] आ-युधानि वि-चित्राणि रावणस्य चमू-मुखे ॥८ ॥[९
तद् अस्त्रं नि-हतं[25] दृष्ट्वा रावणो राक्षसेश्वरः[26] ।
१०] विव्याध नि-शितैर्[27] बाणै रामं सर्वेषु मर्मसु ॥९ ॥[१०
स विद्धो बहुभिर् बाणैर् महा-कार्मुक-निःसृतैः ।[28]

---

१. भ-मस्त्रं ससर्ज ह ॥ २. भ-विहितं रौद्रमन्यदस्त्रं महाद्युतिः । ३. भ-सुघोरं । ४. भ-भीमं । ५. भ-०वाय महात्मने ॥ ६. भ-शूलाः । ७. रा$_2$ फ-मुशलानि । ८. रा$_2$ फ म भ-च । ९. रा$_2$ फ म भ-०नानि । १०. रा$_2$ फ म भ-०राणि ॥ ११. रा$_2$ फ म-कूटजालानि । भ-कूटसंज्ञाश्च । १२. रा$_2$ फ-तीव्रा । १३. रा$_2$ फ-युगक्षये ॥ १४. भ-तु । १५. भ-श्रीमानस्त्रशास्त्रविदां । १६. अतः परमधिकः पाठः—भ-तदस्त्रं निहतं दृष्ट्वा राघवेण महात्मना । पैशाचं सुमहातेजाः सोऽन्यदस्त्रमुदैरयत् ॥ १७. ल$_1$ ल$_2$ अ रा$_2$ फ-भासुराणि । १८. भ-महात्मनः । १९. भ-०वेगस्य दशग्रीवस्य रक्षसः ॥ २०. रा$_2$ फ म-हृष्टैः । २१. भ-पतद्भिः स्वर्गलोकेभ्यश् ॥ २२. रा$_1$ फ-निश्चि० । २३. रा$_2$ फ-शूलानि मुशलानि । २४. भ-नास्ति ॥ २५. रा$_1$-विहतं । २६. भ-राक्षसाधिपः । २७. भ-दशभिर् ॥ २८. भ-सोतिविद्धः शितैर्बाणै रामः सर्वेषु मर्मसु ।

११] रावणेन महा-तेजा न प्राऽकम्पत[1] राघवः[1] ॥१०॥ [११
ततो विव्याध गात्रेषु सर्वेषु समितिं-जयः ।
१२] रामः सु-संरब्धतरो रावणं नि-शितैः शरैः ॥११[2]॥[१२
वि-भीषणश् च साऽमात्यः सु-ग्रीवश्[3] च स-सैनिकः[3] ।
N] प्रेक्षकाः सम्-अपद्यन्त दश-ग्रीवस्य सैनिकाः ॥[4]१२[5]॥[N
एतस्मिन्न् अन्तरे क्रुद्धो राघवस्याऽनु-जो बली ।
१४] लक्ष्मणः सायकान् सप्त जग्राह पर-वीर-हा ॥१३॥ [१३
तैः सायकैर् महा-वेगै रावणस्य महा-द्युतेः[6] ।
१५] ध्वजं मनुष्य-शीर्षं[7] च तदा[7] चिच्छेद वीर्य-वान्[8] ॥१४॥ [१४
सारथेश् चैव[9] बाणेन[9] शिरो ज्वलित-कुण्डलम्[10] ।
१६] जहार लक्ष्मणः श्री-मान् रथाद्[11] आशु पपात च[11] ॥१५॥ [१५
कृष्यमाणं[12] तु[12] चिच्छेद धनुर् गजकरोपमम् ।
१७] लक्ष्मणो राक्षसेन्द्रस्य पञ्चभिः पञ्चभिः[13] शरैः[13] ॥१६॥ [१६
नील-मेघ-निभांश्[14] चाऽस्य[14] सद्-अश्वान् पर्वतोपमान् ।
१८] नि-जघान[15] तदा वेगाद् रावणस्य[15] वि-भीषणः[16] ॥१७॥ [१७
हताऽश्वो[17] वेग-वान्[18] वेगाद् अव-प्लुत्य[19] महा-रथात्[19] ।
१९] क्रोधम् आऽहारयत्[20] तीव्रं[20] भ्रातरं प्रति रावणः ॥१८॥ [१८

---

१. भ—मनागप्यकंपत ॥ २. अतः परमधिकः पाठः—भ—यथा प्रावृषि मेघो वै धारावर्षं विमुंचति । एवं रामो महात्मा तु बाणवर्षं व्यमुंचत ॥ पूरयन् शरवर्षेण गगनं मेदिनीं तथा । अभिनच्च रथं रामः सपताकध्वजं तथा ॥ स रथो राक्षसेन्द्रस्य रामेणाभ्याहतः शरैः । साश्वः सारथिनोपेतः सध्वजः पतितो भुवि ॥ पदातिर्नष्टसंज्ञश्च कृतो वै रक्षसां पतिः । निमेषान्तरमात्रेण सज्जमन्यं रथोत्तमम् ॥ आरुरोह ततः शीघ्रं रावणो राक्षसाधिपः । मायया विहितैर्बाणै रामं विव्याध संयुगे ॥ ३. अ—०वस्य च सैनिकाः । ४. म—नास्ति । ५. भ—नास्ति ॥ ६. म—दुरात्मनः । भ—०द्युतिः । ७. ब प्र रा$_{2}$ फ म भ—तस्य । ८. भ—सायकैः ॥ ९. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ—चैकबा० । १०. ल$_{1}$ ल$_{2}$ ब—०तमंड० । ११. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र—०द्दषुमथांतरं । म—नास्ति । भ—आशु पपात सः ॥ १२. भ—नाम्यमानं च । १३. रा$_{2}$ फ म भ—पंचपर्वभिः ॥ १४. म—०निकाशाश्च । भ—०भांश्चैव । १५. रा$_{2}$ फ म—०न महावेगान्रा० । भ—जघान गदया तत्र रथे भ्रातुर् ॥ १६. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र—रथे स्थितान् । १७. रा$_{2}$ फ म—०श्वाद् । १८. म—तु तदा । १९. भ—आप्लुत्य स महारथः । २०. भ—आहावयांचक्रे ॥

ततस् तु स[1] महा-शक्तिं[1] दीप्ताम् अग्नि-शिखाम् इव ।[2]
२०] वि-भीषणाय चिक्षेप राक्षसेन्द्रः प्रताप-वान् ॥१९॥ [१९
२१पू] अ-प्राऽऽप्ताम् एव तां बाणैम् त्रिभिश् चिच्छेद राघवः । [२०पू
तां दृष्ट्वा नि-हतां शक्तिं[3] राघवेण महाऽऽत्मना[3] । [N
२२] उद्-अतिष्ठन्[4] महा-नादो[4] वानराणां रणे[5] तदा[5] ॥२०॥ [२०उ
२१उ] सा पपात त्रि-धा छिन्ना[6] शक्तिः कनक-भूषणा[7] ।
N] स-विस्फुलिङ्गा ज्वलिता महोल्केव नभश्-च्युता ॥[8]२१॥ [२१
ततः स[9] राक्षसेन्द्रोऽन्यां[9] कालेनाऽपि दुरा-सदाम् ।
२३] मुमोच[10] विपुलां[10] शक्तिं दीप्यमानां[11] स्व-तेजसा[11] ॥२२॥ [२२
सा[12] प्र-मुक्ता[12] बल-वता रावणेन[13] दुर्-आत्मना[13] ।
२४] जज्वाल सु-महावेगा[14] दिवि[14] सौदामिनी यथा ॥२३॥ [२३
एतस्मिन् अन्तरे वीरो लक्ष्मणस् तं वि-भीषणम् ।
२५] प्राण-संशयम् आ-पन्नं तूर्णम् एवाऽभ्य्-अपद्यत[15] ॥२४॥ [२४
तं मुमोचयिषुर् वीरश् चापम् उद्-यम्य[16] लक्ष्मणः ।
२६] रावणं शक्ति-हस्तं तं शर-वर्षैर् अवाऽकिरत् ॥२५॥ [२५
कीर्य-माणः शरौघेण वि-सृष्टेन महाऽऽत्मना ।
२७] न प्र-हर्तुं मनश् चक्रे विमुखी-कृत-विक्रमः[17] ॥२६॥ [२६
मोक्षितं भ्रातरं दृष्ट्वा लक्ष्मणेन स रावणः ।
२८] लक्ष्मणाऽभिमुखो[18] भूत्वा ततो[18] वचनम् अब्रवीत् ॥२७॥ [२७
रक्षितस् ते बल-श्लाघिन्[19] यस्माद् एष वि-भीषणः ।
२९] वि-मुच्य राक्षसं तस्मात् त्वयि शक्तिः पतिष्यति ॥२८॥ [२८
एषा ते हृदयं भित्त्वा शक्तिर् बर्हिण-लक्षणा ।

---

१. अ-वज्रं-सुम० । २. भ-ततः शक्तिं महाबाहुर् दीप्तां दीप्तमिवाशनिं ॥ ३. भ-बाणैर्दीप्तामिव महाशनिं । ४. भ-उत्तस्थौ सुमहान्नादो । ५. रा$_2$ फ-महात्मनां । भ-चमूमुखे ॥ ६. रा$_2$ फ-भिन्ना । ७. भ-कांचनमालिनी । ८ भ-नास्ति ॥ ९. प्र रा$_2$ फ म भ-संभाविततरां । १०. रा$_2$ फ म भ-जग्राह विमलां । ११. ल$_1$-राघवेण महात्मना । ल$_2$ अ-नां सुते० । १२. रा$_2$ फ म-सोत्तोलिता । भ-सा पीडिता । १३. प्र-अत आरभ्य २४-शश्लोकस्य प्रथमपादपर्यंतं नास्ति । म भ-०णेन महात्मना । १४. भ-०हातेजा व्योम्नि ॥ १५. भ-अभ्युपपद्यत ॥ १६. रा$_2$ फ म-संयम्य । भ-आनम्य ॥ १७. म-०तनिश्चयः । १८ भ-०खं तिष्ठन्निदं ॥ १९. भ-०श्लाघ्य ॥

३०] मद्-बाहु-बल-वेगेन[1] प्राणान् आ-दाय यास्यति ॥२९[2]॥[२९
इत्य् एवम् उक्त्वा तां शक्तिम् अष्ट-घण्टां[3] महा-स्वनाम्[3] !
३२] मयेन माया-विहिताम् अ-मोघां[4] शत्रु-तापिनीम्[4] ॥३०॥ [३०
लक्ष्मणाय समुद्-दिश्य ज्वलन्तीम् इव[5] तेजसा ।
३३] रावणः परमः क्रुद्धश् चिक्षेप च ननाद च ॥३१॥ [३१
सा क्षिप्ता भीम-वेगेन वज्राऽशनि-सम-प्रभा[6] ।
३४] शक्तिर् अभ्याऽपतद्[7] वेगाल् लक्ष्मणं रण-मूर्धनि ॥३२॥ [३२
ताम् अनुव्याऽहरच् छक्तिम् आ-पतन्तीं स राघवः ।
३५] स्वस्त्य् अस्तु लक्ष्मणायेति[8] मोघा भव हतोद्यमा[9] ॥[10]३३॥[३३
३६उ] न्य्-अपतत् सा महा-वेगा लक्ष्मणस्य[11] महोरसि[11] ।
जिह्वेवोरग-राजस्य दीप्यमाना महा-द्युतिः ॥३४॥ [३५
३७] ततो रावण-वेगेन सु-दूरम्[12] अव-गाढया[12] ।
शक्त्या[13] निर्भिन्न-हृदयः[13] पपात भुवि लक्ष्मणः ॥३५॥ [३६
३८] तद्-अवस्थं समीप-स्थो लक्ष्मणं वीऽऽक्ष्य[14] राघवः ।

---

१. भ–मद्बाहुपरिघोत्सृष्टा । २. रा$_1$ अ–नास्ति । अतः परमधिकः पाठः—भ–एवमुक्त्वा दशग्रीवो रथस्थो राक्षसेश्वरः । प्रगृह्य रोषताम्राक्षः शक्तिं बालार्कसन्निभाम् ॥ कृशानुज्वलिताकारां युगांतोल्कासमद्युतिम् । विस्फुलिंगसहस्राणि तां च वै शक्तिमुत्तमाम् ॥ विकिरंतीं महत्प्रेक्ष्य घंटाशतनिनादिताम् । दृष्ट्वैव ज्वलितां शक्तिं देवताः क्षोभमागताः ॥ आदित्यो निष्प्रभश्चासीन्मंदतेजश्च पावकः । शक्तिं सुमहतीं दृष्ट्वा नक्षत्राणि प्रदुद्रुवुः ॥ गगनं चांतरिक्षं च मही चैव प्रकंपिता । यक्षा भूताः पिशाचाश्च तथा विद्याधरोरगाः ॥ चकंपिरे भयत्रस्ता दृष्ट्वा शक्तिं समुद्यताम् । प्रतिस्रोतः प्रवृत्ताश्च गंतुं वै निम्नगास्तदा ॥ हाहाभूतमिदं सर्वं दृष्ट्वा शक्तिं समुद्यताम् । अभ्यादाय शुभां शक्तिं लक्ष्मणं रावणोऽब्रवीत् ॥ सुदृष्टः क्रियतां लोको लक्ष्मण त्वं हि तापसः । स्मर त्वं मातापितरौ भार्यां च सुहृदस्तथा ॥ राममामन्त्र्य क्षिप्रं सुग्रीवं च विभीषणम् । अस्माल्लोकादमुं लोकमचिरात्त्वं गमिष्यसि ॥ कार्त्तिकेयं कुमारं हि समाराध्य पुरा भृशम् । सम्प्राप्तेयं मया शक्तिरेकशत्रुविनाशिनी ॥ ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–त्वष्टृबाणम० । ४. रा$_2$ फ म–०त्रुनाशिनीं । भ–एकशत्रुविनाशिनीं ॥ ५. भ–स्वेन ॥ ६. प्र रा$_2$–०समस्वना ॥ ७. रा$_2$ फ म भ–अभ्यप० ॥ ८. प्र–राघवायेति । ९. भ–महाद्युते । १०. अतः परमधिकः पाठः—भ–इत्येवं ध्यायतस्तस्य राघवस्य महात्मनः ॥ ११. ल$_1$–०णं रणमूर्धनि ॥ १२ रा$_1$ ल$_1$ ल$_2$ ब अ प्र–सा वेगेन जगाम यत् ॥ १३. रा$_2$ फ म–वज्रं-शक्तिनि० ॥ १४. प्र रा$_2$ फ म–प्रेक्ष्य ।

भ्रातृ-स्नेहेन मनसा[1] विषण्ण-वदनोऽभवत्[1] ॥३६॥ [३७
३९] स मुहूर्तम् इव[2] ध्यात्वा[2] बाष्प-व्याकुल-लोचनः ।
बभूव संरब्ध-तरो युगान्ताऽग्निर् इवोत्थि (वु-स्थि) तः[3] ॥३७॥[३८
४०] न वि-षादस्य[4] कालोऽयम् इति सं-चिन्त्य राघवः । [३९पू
ततस् तु नि-शितैर् बाणैर् वीरो दशरथाऽऽत्मजः ।[5] [N
४१] चक्रे सु-तुमुलं युद्धं रावणस्य वधे[6] धृतः[6] ॥[7]३८[7]॥[३९पू

इत्यार्षे रामायणे युद्ध-काण्डे[8] लक्ष्मण-शक्ति-भेदो[9]
नामैकोनाशीतितमः सर्गः ॥ ७९ ॥

[वं-८१]= [अशीतितमः सर्गः] =[दा-१०१]

तं ददर्श तदा[10] रामः शक्त्या[11] निर्-भिन्नम्[11] आ-हवे ।
१] लक्ष्मणं रुधिराऽऽदिग्धं स-पन्नगम् इवाऽचलम्[12] ॥१ ॥[४०
२पू] ताम्[13] अस्मै[13] प्र-हितां शक्तिं रावणेन बलीयसा ।[14]
यत्नेन[15] ते[15] हरि-श्रेष्ठा न शेकुर् अप-कर्षितुम् ॥२ ॥
३] अर्दितं[16] चैव बाणौघैः[17] क्षिप्र-हस्तेन रक्षसा । [४१
N] सौमित्रिं[18] चैव भित्त्वा सा विवेश[18] धरणी-तलम् ॥३ ॥[४२
तां कराभ्यां परा-मृष्य रामः शक्तिं भयाऽऽवहाम् ।
४] बभञ्ज सम्-अरे[19] क्रुद्धो बल-वान्[19] अप-कृष्य च[20] ॥४ ॥[४३

---

१. भ—महता विषण्णहृदयोभवत् ॥ २. भ—अनुध्यात्वा । ३. भ—इव ज्वलन् ॥ ४. रा$_1$ अ—विवादस्य । ५. म—नास्ति । ६. रा$_1$—वधे कृतः । रा$_2$ फ—वधे युतः । भ—वधोद्यतः । ७. अतः परमधिकः पाठः—भ—स तं ममंथाशु सरथध्वजं च दशाननं बाणगणेन राघवः । प्रपूरयामास नभश्च संयुगे शरार्दितश्चापि मुमोह रावणः ॥ म भ—भिन्नेषु-स कीर्यमाणः शरजालवृष्टिभिर्महात्मना दीप्तधनुष्मता रणे । ततोऽपसर्पद्रणसन्निकर्षाद्यथानिलेनाभिहतो बलाहकः ॥ ८. रा$_1$ प्र भ—लंकाकांडे । म—युद्धपर्वणि । ९. रा$_2$—०शक्त्यभिघातो । भ—शक्तिभेदः ॥ १०. भ—ततो । ११. अ—शक्तिनि० । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—इवानलं ॥ १३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—तेनास्मै । म—तां तस्य । भ—तामस्य । १४. अतः परमधिकः पाठः—भ—सुग्रीवोऽथांऽगदश्चैव तथा हनूमदादयः ॥ १५. भ—यत्नेनैते । १६. रा$_1$ ल$_1$ अ प्र म भ—अर्दिताम् । १७. रा$_1$ ल$_1$ ल$_2$ ब अ—ते बाणैः । १८. भ—लक्ष्मणं चापि सा भित्वा प्रविष्टा ॥ १९. भ—बलवान् । २०. रा$_1$ ल$_1$ ल$_2$ ब फ म—०कर्ष च । भ—निश्चकर्ष च वीर्यवान् ॥

तस्य निष्-कर्षतः[1] शक्तिं नाराचान् दीप्त-तेजसः[2] ।
५] नि-चखान दश-ग्रीवः सर्व-गात्रेषु[3] वीर्य-वान्[3] ॥५ ॥ [४४
अ-चिन्तयित्वा तान् बाणान् समुत्था(द्-स्था)प्य च लक्ष्मणम् ।
६] अब्रवीद् धनु-मन्तं च सु-ग्रीवं चैव[4] वानरम्[4] ॥६[5] ॥ [४५
लक्ष्मणं सम्परि-ष्वज्य नीत्वा चैव स्वम् आ-लयम् ।[6]
N] कुरुध्वं स्तोककस्येव[7] घर्माऽन्ते[8] मेऽद्य[8] दर्शनम् ॥[9]७ ॥ [४६
अस्मिन् मुहूर्ते न चिरात् सत्यं प्रति-शृणोमि[10] वः ।
१०] अ-रावणम् अ-रामं वा जगद् द्रक्ष्यथ वानराः[11] ॥८ ॥ [४७
राज्य-नाशं[12] वने वासं दण्डके परि-सर्पणम्[13] ।
१५] वैदेह्याश् च पराऽऽमर्ष[14] रक्षोभिश् च समा-गमम्[15] ॥९ ॥ [४८
एतद् दुःखं महा-घोरं क्लेशं च[16] निरयोपमम्[16] ।
१६] त्यक्ष्यामि सर्वम् एवाऽहं[17] हत्वेमं राक्षसं[17] रणे ॥१०॥ [४९
यद्-अर्थं वानरं सैन्यं समा-नीतम्[18] इदं मया ।
१७] सु-ग्रीवश् च कृतो राजा तं हनिष्यामि रावणम् ॥११[19]॥ [५०
यद्-अर्थं सागरः क्रान्तः सेतुर्[20] बद्धश्[20] च सागरे[21] ।
१८] सोऽयम् अद्य रणे[22] पापश् चक्षुर्-विषयम् आ-गतः ॥१२॥ [५१
चक्षुर्-विषयम्[23] आ-गत्य[23] नाऽयं जीवितुम् अर्हति ।
१९] दृष्टिं दृष्टि-विषस्येव सर्पस्य समुपाऽऽगतः[24] ॥१३॥ [५२

---

१. रा$_2$–क्र्षतः । २. रा$_1$–०सा । ३. रा$_1$ ल$_1$ ल$_2$ ब अ–सर्वायुधविशारदः ॥ ४. भ–अथ वानरान् । ५. अतः परमधिकः पाठः—भ–लक्ष्मणं परिवार्येह तिष्ठत प्लवगर्षभाः । परिवृत्याप्रमादेन रक्षितव्यो महाबलः ॥ पराक्रमस्य कालोऽयं संप्राप्तो मे चिरेक्षितः । अयं स रावणः पापः पापी पापविनिश्चयः ॥ अग्रतो मे स्थितो युद्धे घर्मांते मेघवन्नदन् । स्तोकका इव मेघानां तद्वीक्षध्वं समागमम् ॥ ६. प्र भ–नास्ति । ७. रा$_1$ ल$_1$ ल$_2$ ब अ–०कस्याद्य । रा$_2$ फ–चातक० । ८. रा$_1$ ल$_1$ ब–घर्मार्थं बत । ल$_2$–०र्थं तव । अ प्र रा$_2$–०न्ते मेघद० । ९. म भ–नास्ति ॥ १० प्र–परिवृणोमि । ११. भ–यूथपाः ॥ १२. म–राष्ट्रभंगं । भ–राज्यभ्रंशो । १३. भ–परिधावनम् । १४. भ–०र्षो । १५. भ–०मः ॥ १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–वातरयो० । १७. भ–अथाहं तं हत्वा रावणं ॥ १८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–समीचीनम् । १९. भ–नास्ति ॥ २०. प्र म भ–सेतुबंधश्च । २१. म–वानरैः । २२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ–हतः ॥ २३. प्र रा$_2$ फ–०यमागम्य । भ–मच्चक्षुर्विषयं प्राप्य । २४. रा$_1$ ब–समजायत । रा$_2$ फ म–मम मानदाः ॥

सुखं पश्यत[1] दुर्-धर्षा[2] युद्धं[2] वानर-पुङ्गवाः ।
२०] आ-सीनाः पर्वतस्याऽग्रे[3] ममेदं रावणस्य च ॥[4]१४॥ [५३
अद्य रामस्य राम-त्वं सं-पश्यन्त्व्[5] अत्र[5] सं-युगे ।
२१] त्रयो लोकाः स-गन्धर्वाः स-महेन्द्राः[6] स-चारणाः[6] ॥१५॥ [५४
अद्य कर्म करिष्यामि यल् लोकाः स-चराऽचराः ।
२२] स-देवाः कथयिष्यन्ति यावद् भूमिर् धरिष्यति[7] ॥१६॥ [५५
एवम् उक्त्वा शितैर् बाणैस् तप्त-काञ्चन-भूषणैः[8] ।
२३] आ-जघान रणे रामो दश-ग्रीवं समा-हितः[9] ॥१७॥ [५६
अथ प्र-दीप्तैर् नाराचैर्[8] मुसलैर्[10] इव रावणः ।
२४] अभ्य्-अवर्षत् तदा रामं धाराभिर् इव तोय-दः ॥१८[11]॥ [५७
राम-रावण-मुक्तानाम् अन्योऽन्यम् अभि-धावताम्[12] ।
२५] शराणां[13] च[13] शराणां च बभूव तुमुलः स्वनः ॥१९॥ [५८
ते वि-कीर्णा[14] वि-शीर्णा[15] वा[15] राम-रावणयोः शराः[16] ।
२६] अन्तरिक्षात् प्रदीप्ताऽग्रा नि-पेतुर् धरणी-तले[17] ॥२०॥ [५९
तयोर् ज्या-तल-निर्घोषो राम-रावणयोर् युधि[18] ।
२७] त्रास-कः[19] सर्व-भूतानां स बभूवाऽद्भुतो[20] महान्[20] ॥२१॥ [६०

स कीर्यमाणः शर-जाल-वृष्टिभिर्
महौजसा[21] दीप्त-धनुष्मता रणे ।
भयात् प्र-दुद्राव सम्-एत्य रावणो
N] यथाऽनिलेनाऽभि-हतो बलाहकः ॥२२[22]॥ [६१

इत्यार्षे रामायणे युद्ध-काण्डे[23] रावण-विद्रावणं[24] नामाऽशीतितमः सर्गः[24] ॥ ८० ॥

---

१. भ—पश्यंतु । २. रा$_1$ ल ल$_2$ ब अ प्र—०र्षं युद्धे । ३. भ—पर्वताग्रेषु । ४. रा$_1$ ल$_1$ ल$_2$ ब अ म—०नास्ति ॥ ५. भ—पश्यन्तु मम । ६. भ—सहदेवर्षिचारणाः ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—भविष्यति ॥ ८. ब—नास्ति ॥ ९. रा$_2$ फ म भ—०हितैः ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब अ—मुसुलैर् । भ—मुसु० । ११. अतः परमधिकः पाठः—भ—ततो युद्धं समभवद्रामरावणयोस्तदा ॥ १२. भ—अभिनिघ्नताम् । १३. भ—समस्तानां ॥ १४. प्र रा$_2$ फ—विशीर्णा । म—विस्तीर्णा । भ—छिन्नाश्च । १५. प्र फ—विप्रकीर्णा । भ—विकीर्णाश्च । १६. भ—तदा । १७. भ—वसुधातले ॥ १८. भ—तदा । १९. रा$_2$ म भ—त्रासनः । २०. म भ—०तोपमः ॥ २१. प्र रा$_2$ फ म भ—महात्मना । २२. अ—नास्ति ॥ २३. प्र म—लंकाकांडे । म—युद्धपर्वणि । २४. भ—रावणापक्रमणं ॥

स दत्त्वा[1] सु-महद्[2] युद्धं राघवस्य[3] निशा-चरः ।[4] [२पू
१] द्वन्द्व-युद्ध-परिश्रान्तस्[5] ततोऽप-क्रम्य[6] वै[6] स्थितः ॥१ ॥ [N
सन्नि-कर्षाद् अप-क्रान्ते किं-चित्[7] तस्मिन् निशा-चरे । [N
२] वि-श्राम्यन्तं समा-लक्ष्य सु-षेणं राघवोऽब्रवीत्[8] ॥२ ॥ [२उ
एष[9] रावण-वेगेन लक्ष्मणः पातितो[10] भुवि ।
३] सर्प-वच्[11] चेष्टते[12] वीरो मम शोकम् उद्-ईरयन् ॥३ ॥ [३
शोणिताऽऽर्द्रम् इमं वीरं प्राणात्[13] प्रिय-तरं[13] मम ।
४] पश्यतो बत[14] का शान्तिर्[15] योद्धुं पर्याकुलाऽऽत्मनः ॥४ ॥ [४
अयं हि समर-श्लाघी भ्राता मे शुभ-लक्षणः ।
५] यदि पञ्च-त्वम् आ-पन्नः किं मे प्राणैर् जयेन वा ॥५ ॥ [५
मज्जतीऽव हि मे वीर्यं भ्रश्यतीऽव कराद् धनुः ।
६] परि-षीदन्ति मे प्राणा दृष्टिर् बाष्प-वशं गता ॥६ ॥ [६
चिन्ता मे वर्धते तीव्रा मुमूर्षा चोप-जायते ।
७] अ-जेयं नि-हतं दृष्ट्वा लक्ष्मणं[11] रण-मूर्धनि ॥७ [17]॥ [७
तन् न युद्धेन[18] मे[18] कार्यं न प्राणैर् न च सीतया ।
८] भ्रातरं नि-हतं दृष्ट्वा[16] लक्ष्मणं पांसु-गुण्ठितम् ॥८ ॥ [१०
किं मे युद्धेन किं प्राणैर् युद्ध-कार्यं न विद्यते ।
९] यत्राऽयं नि-हतः शेते रण-मूर्धनि लक्ष्मणः ॥[19]९ ॥ [११

---

१ रा₂ फ-वर्ज—कृत्वा। २. म-तुमुलं। ३. रा₂-०वाय। ४. टि. भ-अस्मिन् सर्गे वंगीयपाठमनुसरतीति त्यक्तः। ५. रा₁-द्वन्द्व युद्धे प०। ६. रा₁ ल₁ ल₂ ब अ प्र-तस्याज क्रमणे ॥ ७. रा₁ ल₁ ल₂ ब-गते। ८. रा₁ ल₁ ल₂ ब अ प्र-वाक्यमब्र० ॥ ९. रा₁ ल₁ ल₂ ब अ प्र-पश्य। १०. म-वर्ज—पतितो। ११. रा₁ ल₁ ल₂ ब अ प्र-चर्मवद्। १२. रा₁ रा₂ प्र फ-वेष्टते। ल₁ ल₂ ब अ-वेष्टितो ॥ १३. रा₂ फ म-प्राणैरिष्टतरं। १४. अ प्र रा फ म-मम। १५. म-शक्तिर् ॥ १६. म-नास्ति। १७. टि. तु. ८-मश्लोकादारभ्य २३-शश्लोकपर्यन्तं गपू. २५-श स. ॥ १८. रा₁ ल₁ ल₂ ब अ प्र फ-युद्धे मया। १९. अतः परमधिकः पाठः—रा₂ फ-अद्यैव तत्परित्यक्ष्ये जीवितं त्वहमात्मनः। लक्ष्मणस्य शिरो गात्रे संस्थाप्यैव तु राघवः ॥ रुरोद करुणं दुःखं लक्ष्मणं शुभलक्षणम्। हा भ्रातः स्नेहसर्वस्व हा भ्रातर्मम जीवितम् ॥ सर्वान्भोगान्परित्यज्य मया सह वनं गतः। वनतो व्यसनं प्राप्तः सीताव्यसनदुःखितः ॥ क्व गच्छसि महाबाहो सौमित्रे भ्रातृवत्सल। विचेष्टमानं मां हि त्वमुच्छ्वसंतं मुहुर्मुहुः ॥

किं नु राज्येन मे कार्यं लक्ष्मणो यत्र पातितः ।
N] कथं शक्ष्यामि सं-सोढुं सोढुं दत्तं सु-मित्रया ? ॥१०[१]॥ [१३
किं नु वक्ष्यामि कौसल्यां मातरं किं नु कैकयीम् ।
N] भ्रातरं किं नु वक्ष्यामि शत्रु-घ्नं च महा-बलम् ॥११॥
सह येन वनं यातो विना तेन गमे कथम् । [१४
N] इहैव मरणं श्रेयो न तु बन्धु-विगर्हणम् ॥१२॥ [१५
किं मया दुष्-कृतं कर्म कृतम् अन्यत्र जन्मनि[२] ।
N] येन मे धार्मिको भ्राता म्रियते चाऽग्र-तः स्थितः ॥१३॥ [१६
हा भ्रातर् मनुज-श्रेष्ठ शूराणां प्र-वरः प्र-भुः ।
N] एकाकी कस्य मां त्यक्त्वा पर-लोकाय गच्छसि ॥१४॥ [१७
वि-लपन्तं च शोकाऽऽर्तं किं नु मां नाऽभि-भाषसे ।
N] उत्-तिष्ठ वीर किं शेषे मां दीनं पश्य चक्षुषा ॥१५॥ [१८
शोकाऽऽर्तस्य प्र-मत्तस्य पर्वतेषु वनेषु च ।
N] मा[३] शोचस्व[४] महा-बाहो सीतां प्रति महा-बल[५] ॥१६॥ [१९
तत्र गत्वाऽऽनयिष्यामि यत्र नीता तु मैथिली ।
N] प्रति-ज्ञा सा च काकुत्स्थ या त्वया भाषिता पुरा ॥१७॥ [N
एवम् आ-श्वास्य मां पूर्वं सौमित्रे वि-जने वने ।
N] अ-मित्रेषु परि-त्यज्य कस्य मां गन्तुम् अर्हसि[६] ॥१८॥ [N
हा हतोऽस्मि महा-बाहो त्वया वीर विना-कृतः ।
N] वि-लपन् इति दुःखाऽऽर्तो नि-पपात मही-तले ॥१९॥ [N
सं-ज्ञां सम्प्राऽऽप्य तेजस्वी सु-षेणं राम इत्य् अथ[७] ।
N] उवाच मधुरं वाक्यं शृण्वं[८](?णु)तु(?त्वं)मम[९] वानराः(?र)॥२०॥[N
शृणु सत्यं महा-बाहो न मे प्राणैः प्र-योजनम् । [N
N] यद् अयं नि-हतः शेते रण-मूर्धनि लक्ष्मणः ॥२१॥ [११उ
वि-जयोऽपि हि मे सम्यग् लक्ष्मणेन विना कथम् ।
N] अन्धस्येवोदितश् चन्द्रः कां प्रीतिं जनयिष्यति ॥२२[१०]॥[N
रामम् एवं ब्रुवाणं तु शोक-विह्वलितेन्द्रियम् ।

---

१. अत आरभ्य रा$_2$ फ म–१०–२२–शश्लोकान्तः पाठो नास्ति ॥ २. प्र–कर्मणि ॥ ३. अ–मां । ४. प्र–विभूय । ५. प्र–महाभुज ॥ ६. अ–इच्छसि ॥ ७. प्र–अथो । ८. प्र–शृण्वतां । ९. प्र–सर्ववानराः । ल$_1$–मम वानरः ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–श्लोकोऽयं ८–मश्लोकात्परं "लक्ष्मणे विनिपातिते इति" पाठभेदेन पूर्वमपि पठितः ॥

N] आ-श्वासयन् उवाचेदं सु-षेणः परमं वचः ॥२३॥ [२०
त्यजेमां नर-शार्दूल बुद्धिं वैक्लव्य-कारिणीम्[1] ।
३०] शोक-संजननीं चिन्तां[2] तुल्यां बाणैश्[3] चमू-मुखे ॥२४॥ [N
नैष पञ्च-त्वम् आ-पन्नो[4] लक्ष्मणो लक्ष्मि-वर्धनः[5] ।
३१] न ह्य् अस्य वि-कृतं वक्त्रं नैवाऽस्याऽऽवर्तम् आ-गतम् ॥२५॥ [२१
सु-प्रभं[6] च प्र-सन्नं च[6] मुखम् अस्य हि[7] दृश्यते[7] ।
३२] पद्म-पत्र-निभौ हस्तौ सु-प्रसन्ने च लोचने ॥२६॥ [२२
नेदृशं दृश्यते[8] रूपं गताऽसूनां विशां-पते । [२३पू
३३] मा वि-षादं कृथा देव[9] स-प्राणोऽयम् अरिं-दम[10] ॥[11]२७॥[२४उ
पश्य चाऽस्य प्र-सुप्तस्य शस्त्र-गात्रस्य[12] भू-तले ।[11]
३४] सोच्छ्वासं[13] हृदयं[13] वीर कम्पमानं मुहुर्-मुहुः ॥२८॥ [२५
एवम् उक्त्वा महा-प्राज्ञः सु-षेणो राघवं[14] वचः[14] ।
N] समीप-स्थम्[15] उवाचेदं हनू-मन्तं[16] प्लवं-गमम्[16] ॥२९॥ [२६
सौम्य शीघ्रम् इतो गत्वा शैलं तं[17] सु-महोदयम्[17] ।
N] पूर्वं[18] ते कथितो योऽसौ वीर जाम्ब-वता तदा ॥[18]३०॥[२७
दक्षिणे शिखरे जाताम् ओषधीं ताम् इहाऽन्-अघ[19] ।
N] विशल्य-करणीं नाम शीघ्रम्[20] आ-नय तां[20] शुभाम्[21] ॥३१॥ [२८
सं-जीवनीं तथा वीर सन्धिनीं च महौषधीम् ।[22]
सवर्ण-करणीं[23] चैव दिव्यां देव-विनिर्मिताम् ।[22]
N] सञ्जीवनाऽर्थं वीरस्य लक्ष्मणस्य त्वम्[24] आ-नय[24] ॥३२॥ [२९
सम्-उद्रं समति-क्रम्य लवणोदं महोदधिम् ।[25]
N] क्षीरोदं च समुत्-तीर्य कुश-द्वीपम् अतीत्य च ॥[26]३३॥ [N

---

१. रा$_2$ म-०कारिकां । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-विद्यां । ३. रा$_1$ ल$_2$ अ रा$_2$ म-बाणैश् ॥ ४. प्र-आयातो । ५. म-लक्षणान्वितः ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-प्रसन्नं च शुभं चैव । ७. रा$_2$ फ म-निरीक्ष्यतां ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-विद्यते । ९. रा$_2$ फ-शूर । १०. रा$_2$-वर्ज—०दमः । ११. म-नास्ति ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब-शस्त्रघातस्य । १३. म-नास्ति ॥ १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-प्रति राघवं । १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-हनूमंतम् । १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-स्थितं रामस्य पार्श्वतः ॥ १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-एव म० । १८. म-नास्ति ॥ १९. रा$_2$ फ-इहानय । २०. रा$_2$ फ म-सवर्णकरणीं । २१. म-तथा ॥ २२. रा$_2$ फ म-नास्ति । २३. रा$_1$-स्वव० । ल$_2$-सुव० । २४. रा$_2$ फ-महात्मनः ॥ २५. म-अत आरभ्य ४३-शश्लोकपर्यन्तं नास्ति । २६. रा$_2$ फ-कुशद्वीपमतिक्रम्य क्षीरोदं च महार्णवम् ॥

तस्माद् उत्तर-तो भागे कुश-द्वीपस्य[1] वायु-ज[1] ।
N] सं-जीवकौ[2] समौ दिव्यौ वि-शल्यौ[3] देव-निर्मितौ ॥३४॥ [N
चन्द्रश् च नाम्ना द्रोणश् च पर्वतौ तौ महोदयौ ।
४९उ] अ-मृतं यत्र वि-न्यस्तं तत्र जाता महौषधीः ॥३५॥ [N
५०पू] तं च गन्धर्व-राजानो रक्षन्ते[4] शैलम्[4] उत्-तमम् ।
५१उ] तैश् चाऽपि सह योद्धव्यं गन्धर्वैर् युद्ध-दुर्मदैः ॥३६॥ [N
बहु-मायाश् च मार्गे[5] तु[5] राक्षसाः काम-रूपिणः ।
५७] अ-प्रमत्तेन गन्तव्यं त्वया वीर महा-बल ॥३७॥ [N
लक्ष-त्रयं योजनानां शतानि दशभिर्[6] दश ।
N] यातव्यो वीर ते सोऽध्वा द्वि-गुणस् तु गताऽऽगतैः ॥३८॥ [N
यावन् न क्षीयते रात्रिर् यावन् नोदयते रविः ।
५८] तावत् त्वया महा-बाहो आ-गन्तव्यं महा-जव[7] ॥३९॥ [N
निशा-क्षये तु[8] सं-पन्ने[8] उद्-इते तु दिवा-करे ।
N] मन्द-वीर्यास् ततो वीर ओषध्यो हि भवन्ति वै ॥[9]४०॥ [N
N] लक्ष्मणोऽपि वि-नश्येत नियतं शर्वरी-क्षये ।
ओषधीनां तु चिह्नानि कथयामि महा-कपे ॥४१॥ [N
६०] पीतलानि[10] तु[11] पत्राणि फलानि हरितानि च ।
६१उ] पुष्पाणि चैव तासां तु रक्तानि हरि-पुङ्गव ॥४२॥ [N
त्वर वीर महा-बाहो रामम्[12] आ-मन्त्रयस्व[12] च ।
५२] वि-भीषणं च[13] सु-ग्रीवं[13] जाम्ब-वन्तम् अथाऽङ्ग-दम् ॥४३॥ [N
४१पू] एवम् उक्ते सु-षेणेन रामोऽप्य् एनम् अथाऽब्रवीत् ।[14]
४२पू] गच्छ वीर महा-बाहो भ्रातृ-भिक्षां ददस्व मे ।[15]
४३पू] चतुर्णाम् एव भ्रातृणाम् अस्माकं पञ्चमो भव[16] ॥४४॥ [N
एवम् उक्तोऽथ[17] हनुमान् नादं चक्रे[18] कपीऽऽश्वरः[18] ।
N] येन सा चलिता लङ्का क्षुभितश् च महोदधिः ॥४५॥ [N

---

१. रा$_2$ फ–क्षीरोदस्य हरीश्वर । २. ल$_2$ ब–सुजी० । ३. रा$_2$ फ–वर्ज— विशाली ॥ ४. रा$_2$ फ–०म्ति गिरिम् ॥ ५. रा$_2$ फ–मार्गेषु ॥ ६. रा$_2$ फ–दशतीर् ॥ ७. रा$_2$ फ–महाबल ॥ ८. प्र रा$_2$ फ–निवृत्ते तु । ९. रा$_2$ फ–भवंति स्म महावीर ओषध्यो मंदतेजसः ॥ १०. रा$_2$ फ–शीत० । ११. प्र–हि ॥ १२. प्र रा$_2$ फ–पार्थिवं मं० । १३. रा$_1$ ल$_1$ ल$_2$ ब अ–ससु० ॥ १४. म–इत्येवमुक्तो हनुमान्सुषेणेन महौजसा । १५. म–नास्ति । १६. रा$_2$ फ–भवान् ॥ १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–उक्तस्तु । १८. रा$_2$ फ–उच्चैर्ननाद च ॥

पतितं पुष्प-वर्षं च दुन्दुभिश्[1] चाऽऽहतो[1] दिवि ।
N] प्रणि-पत्य ततो रामम् अब्रवीद् वायु-नन्दनः ॥[2]४६॥ [N
वैक्लव्यं[3] गच्छ मा देव मयि भृत्येऽव-तिष्ठति ।[4]
N] अहं शैलवनोपेतां सप्त-द्वीपां स-सागराम् ॥४७॥ [N
महीम् अतीत्याऽऽगमिष्ये यावन् नोत्-तिष्ठते रविः ।[5]
N] रामस्[6] तु[6] पुनर् एवेदम् उवाच पवनाऽऽत्मजम् ॥४८॥ [N
५५उ] त्वर वीर त्वया[7] गत्वा आ-नयस्व[7] महौषधीः ।
N] स्वस्ति तेऽस्तु महा-सत्त्व गच्छ यात्रां प्र-साधय ॥४९॥ [N
एवम् उक्तस् तु रामेण सु-ग्रीवेणाऽङ्ग-देन च ।
सु-वेलम् अधिसं-रुह्य सं-पीड्याऽऽप्लुत्य[9] चाऽम्बरम्[9] ।
६३उ] जगाम[8] त्वरया श्री-मान्[8] उपर्य्-उपरि सागरम् ।[9]५०[10]॥ [N
व्रजन्तं चैव वि-ज्ञाय रावणः पवनाऽऽत्मजम् ।[11]
६४] अब्रवीत्[12] स्व-समीप-स्थं[12] काल-नेमिं निशा-चरम् ।[13]
चतुर्-मुखं चतुर्-बाहुं चतुर्-दंष्ट्रं मनो-जवम् ॥५१॥ [N
६५] श्रूयतां वचनं मह्यं[14] काल-नेमे निशा-चर ।[13]
हनु-मान् गच्छते वीरः कुश द्वीपं मनो-जवः[15] ॥५२॥ [N
६६] ओषध्य्-अर्थं महा-सत्त्वो यत्र तौ वर-पर्वतौ ।
N] द्रोणो[16] नाम्नाऽथ चन्द्रश्[16] च तयोर् जाता महौषधीः ॥५३॥ [N
ताश्[17] चाऽनेतुं प्र-यानस्य[17] व्रज पूर्वं निशा-चर[18] ।
६७] कुरु वि-घ्नं ततो गत्वा यावद् उत्-तिष्ठते[19] रविः ॥५४॥ [N
N] तत्र गत्वा महा-ग्राहो मायया[20] कुरु चाऽऽश्रमम् ।
६८उ] ऋषि-रूप-धरो भूत्वा आतिथ्यं[21] कुरु मा चिरम्[21] ॥५५॥ [N

---

१. रा₂–दुंदुभ्यश्च हता । २. म–रामं प्रदक्षिणं कृत्वा मंदरं देवसेवितं ॥ ३. प्र रा₂ फ–विक्लवं । ४. म–अत आरभ्य ५०-शश्लोकपूर्वार्धं यावन्नास्ति ॥ ५. रा₂ फ–वर्ज-क्रमित्वा पुनरागच्छे यावदुत्ति० । ६. रा₂ फ–राघवः ॥ ७. रा₂ फ–त्वयावश्यमानेतव्या ॥ ८. रा₁ ल₁ ल₂ ब अ प्र–क्रमित्वा वायुनंदनः । ९. रा₁ ल₁ ल₂ ब अ प्र–तत्रोत्प्लुत्य गतो वीर । १०. म–ततो निमिषमात्रेण वेगवान्मारुतात्मजः । जगाम पर्वतश्रेष्ठमोषधीशतमंडितम् ॥ ११. म–अत आरभ्य १२१-शश्लोकपूर्वार्धं यावन्नास्ति । १२. रा₂ फ–आज्ञापयन् स० ॥ १३. प्र–नास्ति ॥ १४. फ–मेऽद्य । १५. रा₂ फ–वर्ज-महाजवः ॥ १६. प्र रा₂ फ–चन्द्रो नामाथ द्रोणश् ॥ १७. रा₁ ब अ प्र–गच्छं तं तामानयितुं । १८. प्र रा₂ फ–विहायसा । १९. रा₂–चोत्० ॥ २०. रा₂ फ–वर्ज-ऋषिवत् । २१. रा₂–आतिथ्यनिरतो भव ॥

७३पू] यत्र सा वसति ग्राही अ-दृश्या[1] प्राण-हारिणी[1] ।
७५उ] देवता अपि गृह्णाति[2] का शङ्का वानरेषु च ॥५६॥ [N
तत्र त्वयैष हन्तव्य उपायेन प्लवं-गमः ।
७६] हनू-मति वि-नष्टे तु लक्ष्मणो न भविष्यति ॥५७॥ [N
लक्ष्मणस्य वि-नाशेन रामोऽपि न भविष्यति ।
७७] रामस्य तु वि-नाशेन सु-ग्रीवोऽपि[3] वि-नश्यति[3] ॥५८॥ [N
सु-ग्रीवस्य वि-नाशेन अङ्ग-दोऽपि[4] वि-नश्यति[4] ।
७८पू] अङ्ग-दस्य वि-नाशेन क्षयं यास्यन्ति वानराः ॥५९॥ [N
७९पू] ध्रुवम् अस्मज् जयो[5] वीर गच्छ शीघ्रं महा-बल ।
६९पू] राज्याऽर्धं ते[6] प्र-दास्यामि कृते कर्मणि राक्षस ॥६०॥ [N
एवम् उक्तो[7] राक्षसस् तु[7] प्रणि-पत्य दशाऽऽननम् ।
८१] गतो[8] जवेन[8] सम्प्राऽऽप्तः[9] शीघ्रं[10] तं[10] चन्द्र-पर्वतम् ॥६१॥ [N
तस्मिन् पर्वत-पार्श्वे तु[11] वि-दधे[11] माययाऽऽश्रमम् ।
८२] अग्नि-होत्रेण दिव्येन उपवास-कृशोदरः ॥६२॥ [N
जटा-मुकुट-भारेण[12] चीर-वल्कल-संवृतः ।
८३] दीर्घ-श्मश्रु-धरो भूत्वा तस्थौ जाप्य-परायणः[13] ॥६३[14]॥ [N
१४२उ] अ-चिरेण तु सम्प्राऽऽप्तस्[15] तत्र कालेन मारुतिः[15] ।
१४३पू] अपश्यद् आ-श्रमं दिव्यं[16] कदली-षण्ड-मण्डितम्[17] ॥६४॥ [N
ऋषि-रूप-धरं चैव ह्य्[18] अपश्यद् राक्षसं तु तम्[18] ।
N] हनू-मान् अभि-वाद्यैव[19] बली[19] तस्याऽग्र-तः स्थितः ॥६५॥ [N
१४४पू] स्व्-आगतं चाऽब्रवीत् सोऽपि अब्रवीत् तं च वाग्-यतः ।
वि-श्रमस्व कपि-श्रेष्ठ भुक्त्वा पीत्वा च गम्यताम्[20] ॥६६॥ [N

---

१. रा$_1$—०श्या प्राणदारिणी । रा$_2$ फ—अमोघा प्रा० । ल$_1$ ल$_2$ ब प्र—०श्या। प्राणधारिणी । २. रा$_1$ ल$_1$ ल$_2$ ब—गृह्णंति ॥ ३. रा$_2$ फ—०वो न भविष्यति ॥ ४. रा$_2$ फ—०दो न भविष्यति ॥ ५. अ प्र फ—वर्जं—जयं । ६. प्र रा$_2$ फ—अर्धराज्यं ॥ ७. रा$_2$ फ—उक्तं तु तद्रक्षः । प्र—उक्तस्त्वसौ रक्षः । ८. ल$_1$ ल$_2$—ततो ज० । रा$_2$ फ—मनोज० । ९. रा$_2$ फ—वेगेन । १०. प्र—शुभ्रं तं । रा$_2$फ—संप्राप्तश् ॥ ११. रा$_2$ फ—सोऽकार्षीत् ॥ १२. प्र—०टजूटेन । १३. फ—वर्जं—अप्यप० । १४. अतः परमधिकः पाठः—रा$_2$ फ—गृह्याक्षमालां हस्तेन तस्य गमनकांक्षया । हनुमानपि तेजस्वी पितुस्तुल्यपराक्रमः ॥ १५. रा$_1$—कालेन यत्रासौ कृतको मुनिः । १६. रा फ—वर्जं—घोरं । १७. रा$_2$ फ—०लीखंड० ॥ १८. रा$_2$ फ—तं चापश्यन्नि-शाचरं । १९. रा$_2$ फ—०वाद्याथ प्राह ॥ २०. रा$_2$ फ—वर्जं—रम्यताम् ॥

१४५उ] तस्य तद् वचनं श्रुत्वा हनू-मान् वाक्यम् अब्रवीत् ।
१४६उ] श्रूयते[1] यदि किष्किन्धा वानराणां महा-पुरी ॥६७॥ [N
सु-ग्रीवो वसते[2] यत्र वानरेशो[2] महा-बलः ।
१४७] तस्य मित्रं महा-तेजा रामो दशरथाऽऽत्मजः ॥६८॥ [N
तस्य भार्या जन-स्थानाद्[3] धृता[3] सीतेति वि-श्रुता ।
१४८] मायाविना राक्षसेन रावणेन दुर्-आत्मना ॥६९॥ [N
तस्याऽर्थे[4] तु महद् युद्धं घोरं परम-दारुणम् ।[5]
१४९] राम-भ्राता महा-वीरो लक्ष्मणो नाम वि-श्रुतः ॥[6]७०॥ [N
शक्त्या[7] विनि-हतो[7] विप्र[8] निर्-भिन्नो[9] मेदिनीं गतः ।
१५०] तस्याऽर्थेऽहम् इह प्राऽऽप्त ओषधीः प्रति तापस ॥७१॥ [N
१५१पू] विशल्य-करणी नाम[10] सेह[10] जाता शिलोच्चये ।
१५२पू] वि-लम्बो[11] नैव कर्तव्यो[11] यदि जानासि कथ्यताम् ॥७२॥ [N
यावत् स-चन्द्र-नक्षत्रा[12] न रात्रिः[13] क्षयम् आप्नुयात्[13] ।
N] तावन् मयाऽद्य गन्तव्यं गृहीत्वा परमौषधीः ॥७३॥ [N
पानीयं पातुम् इच्छामि शीघ्रं[14] सं(?स)भा(?मा)व(?न)यस्व मे ।
N] येन तृप्तिं गमिष्यामि[14] तत् कुरुष्व महा-तपः ॥७४॥ [N
१५३उ] तस्य तद्-वचनं श्रुत्वा रक्षो वचनम् अब्रवीत् ।
N] श्रूयतां वचनं मह्यं यत् सत्यं वानरोत्तमः[15] (?म) ॥७५[16]॥[N
इदं महत् सरो दिव्यं तपसा[16] निर्-मितं मया ।
१५५] अस्मिन् पीत्वा तु पानीयं मासं न भवति क्षुधा ॥७६[16]॥[N
तस्य तद्-वचनं श्रुत्वा एवम् अस्त्व् इति मारुतिः ।
१५६] अव-तीर्य सरो दिव्यं[17] पानीयं पातुम् उद्-यतः ॥७७॥ [N

---

१. रा$_2$ फ–श्रुता ते ॥ २. रा$_2$ फ–यत्र वसति वानरेंद्रो ॥ ३. रा$_2$ फ–०स्थाने हृता ॥ ४. टि. सन्धिरार्षः द्र० । ५. रा$_2$–तस्या निमित्तं सुमहद्युद्धं घोरमासीत्सुदा० । फ–तस्या निमित्तं सुमहायुद्धमासीत्सुदा० । ६. रा$_2$ फ–तस्य भ्राता राघवस्य लक्ष्मणो नाम वीर्यवान् ॥ ७. रा$_2$ फ–शक्त्यासौ ताडितो । ८. रा$_1$ ल$_1$ ल$_2$ ब अ–वीर । ९. रा$_2$ फ–निर्भिन्नो ॥ १०. रा$_2$ फ–वर्जं–चैव इह । ११. रा$_1$ अ–वर्जं–०वं न च कर्तव्यं ॥ १२. रा$_2$ फ–०न्द्रतिलका । १३. ल$_1$ ल$_2$ ब प्र–शर्वरी नहि प्रत्ययात् । रा फ–प्रयातीह शर्वरी ॥ १४. रा$_2$ फ–वर्जं–नास्ति । १५. रा फ–०राधिपः । १६. ल$_1$ ल$_2$ ब प्र–नास्ति ॥ १७. फ–नास्ति ॥

पिबतस् तस्य पानीयं पद्म-पत्र-पुटेन तु ।
१५७] उदकाऽभ्यन्तरे ग्राही पादं जग्राह दक्षिणम् ॥७८॥ [N
ततस् तां स[1] महा-वेगो[2] हनू-मान् मारुताऽऽत्मजः[3] ।
१५८] स्थले[4] नि-पातयित्वा[5] तु नखैस् तीक्ष्णैर् व्य्-अदारयत् ॥७९॥ [N
१५९पू] नि-हता तत्-क्षणे दिव्या साऽऽकाशेऽधि-ष्ठिताऽब्रवीत् ।
N] कस् त्वं वानर-रूपेण मम मृत्युर् इहाऽऽगतः ॥[5]८०॥ [N
श्रोतुम् इच्छा (?च्छे) महा-बाहो किम्-अर्थं[6] त्वम् इहाऽऽगतः ।
N] ग्राह्यास् तु वचनं श्रुत्वा हनू-मान् वाक्यम् अब्रवीत् ॥[5]८१[5]॥[N
मा वि-षादं कुरु त्वं हि मरणं प्रति सुन्दरि ।
N] हनू-मान् वायु-पुत्रोऽहं[7] सम्प्राऽऽप्तो गन्ध-मादनम् ॥८२[8]॥[N
तस्य[9] तद् वचनं श्रुत्वा ग्राही वचनम् अब्रवीत् ।
N] मां वि-जानीह्य् अप्-सरसं विद्युन्-मालेति वि-श्रुताम् ॥८३॥[N
१६०] गच्छन्त्याऽऽकाश-मार्गेण स्वर्-भानुर् दीप्त-विग्रहः ।
१६१] ऋषिर् मयाऽव-धूतो हि[10] तेनाऽहं पातिता भुवि ॥८४॥ [N
१६२उं] अव-लिप्तेति[11] स क्रोधान् माम् उवाच महा-मुनिः ।
१६४उ] गच्छ ग्राही भवस्वेति शप्ताऽहं तेन वानर ॥८५॥ [N
इहाऽहं वसती भद्र वर्षाणाम् अयुतं शतम् ।
१६५] उक्ता च तेन ऋषिणा दीप्त-क्रोधेन मान-द ॥८६॥ [N
यदा वीरो हनू-मांस् त्वां ग्रहीष्यति जले[12] गताम्[12] ।
१६६] तदा शापाद्[13] वि-मोक्षस् ते[13] भविष्यति[14] न[15] सं-शयः[15] ॥८७॥[N
१६७उ] दिष्ट्या त्वम् इह सम्प्राऽऽप्तः शापाच् चाऽहं[16] वि-मोक्षिता ।
१६८पू] भृशं प्रीताऽस्मि ते वीर राघवाऽऽज्ञां प्र-कुर्वतः ॥८८॥[N
पापाऽऽत्मा ह्य् एष दुर्-बुद्धिर् यम् एनं मन्यसे ऋषिम्[17] ।
N] जहि[18] रक्षो महा-मायं[19] विप्र-वेशं[20] महा-बल ॥८९॥ [N

---

१. रा$_2$ फ–वर्ज–तु । २. रा$_2$ फ–महाबाहुर् । ३. ल$_1$ ल$_2$ ब प्र–पवनात्मजः । ४. रा$_2$ फ–स्थलं निर्यात० ॥ ५. अ प्र फ–नास्ति ॥ ६. रा$_2$–नास्ति ॥ ७. रा$_2$–रामदूतोऽहं । ८. फ–नास्ति ॥ ९. ल$_1$ ल$_2$ ब–ततस् ॥ १०. रा$_1$ अ-वर्ज–स ॥ ११. रा$_1$ फ–वर्ज–०लिप्तो हि ॥ १२. रा$_2$–जलेचरीं । १३. रा$_1$ अ–संप्राप्तमोक्षा त्वं । १४. अ–०ष्यसि । १५. रा$_2$ फ–वर्ज–निरामया ॥ १६. ल$_1$ ल$_2$ ब प्र–अस्माद् । रा$_2$ फ–चैव ॥ १७. रा$_1$ अ–मुनिं । १८. रा$_2$ फ–वर्ज–एष । १९. ल$_1$ ल$_2$ ब प्र–०मायो । २०. ल$_1$ ल ब प्र–०वेशो ॥ रा$_2$–वेषविप्रं ॥

एष राक्षस-राजेन रावणेन दुर्-आत्मना ।
N] प्रेषितस् त्वद्-विनाशाय काल-नेमिर् निशा-चरः ॥९०॥ [N
इत्य् उक्त्वा वायु-पुत्रं सा अप्सरा काम-रूपिणी ।
N] अन्तर्-धानं गता तत्र दृश्यमाना हनू-मता ॥९१॥ [N
N] ग्राह्यां गतायां हनु-मांश् चिन्तयामास बुद्धि-मान् ।
१७४पू] रक्षसां सदृशान्य् अस्य दृश्यन्ते चरितानि हि ॥९२॥ [N
सु-व्यक्तं राक्षसो ह्य् एष पाप-बुद्धिर् नृशंस-कृत् ।
१७५] न हि जानाति मन्दाऽऽत्मा स्व-मृत्युं माम् इहाऽऽगतम् ॥९३॥ [N
N] इत्य् एवं चिन्तयित्वा तं प्राऽऽह गत्वा निशा-चरम् ।
तिष्ठ पाप दुर्-आचार न मे जीवन् वि-मोक्ष्यसे ॥९४॥ [N
१७६] तस्य तद् वचनं श्रुत्वा काल-नेमिर् निशा-चरः ।[1]
१७७पू] रूपं वि-कुरुते घोरं[2] दश-नल्वं[3] प्रमाण-तः ॥९५॥ [N
ऊर्ध्वं[4] तु योजनं पञ्च धुन्वन् रूक्षाञ् छिरो-रुहान् ।
N] अष्टौ दंष्ट्राः सु-तीक्ष्णाऽग्राः सृक्किणीं चोपसं-लिहन्[5] ॥९६॥ [N
विवृत-नयनो[5] घोरो[5] मेघ-स्तनित-निःस्वनः ।
N] अर्ध-दग्धम् अलातं तु[6] प्र-गृह्याऽभ्य्-एति[7] तं[7] हरिम् ॥९७॥ [N
१७९उ] हनू-मान् अपि दुर्-धर्षो दश-योजनम् आ-यतम् ।
N] रूपं कृत्वा सु-विपुलं महा-कायो महा-बलः ॥९८॥ [N
उत्-प्लुत्याऽऽकाश-मार्गे तु न्य्-अपतद् रक्षसो[8] हृदि[8] ।
N] तलेनैव जघानाऽऽशु वज्रपातोपमेन तम् ॥९९॥ [N
N] स विनिर्भिन्न-मस्तिष्कः शिरः-स्फुटित-बन्धनः[9] ।
गताऽसुर् नि-पपातोर्व्यां काल-नेमिर्[10] निशा-चरः[10] ॥१००॥ [N
१८३] तं नि-हत्य महा-नादं ननाद स महा-कपिः ।
१८४पू] तेन नादेन गन्धर्वाः प्र-बुद्धाः शैल-वासिनः ॥१०१॥ [N
N] असि-शक्ति-धराः पेतुर् गदा-मुसल-पाणयः[11] ।

---

१. रा₂ फ-वर्ज—नास्ति ॥ २. रा₁ अ-भीमं । ३. रा₂-वर्ज—दशकल्पं ॥ ४. रा₂ फ-चापि सं० ॥ ५. रा₂ फ-वर्ज—विवृते नयने घोरे । ६. रा₂-च । ७. रा₁ ल₁ ब प्र-०भ्यर्दितो । अ-०ह्याभिद्रुतो ॥ ८. रा₂ फ-राक्षसोपरि ॥ ९. रा₂ फ-चिरं स्फु० । १०. रा₂ फ-विशीर्ण इव पर्वतः ॥ ११. रा₂ फ-वर्ज—०मुसुल० ।

१८४उ] वि-लोकयन्तः सहसा सं-नद्धाः[1] सर्व-तो दिशः ॥१०२॥[N
वं-८३] हत्वा निशा-चरं घोरं[2] हनू-मान् मारुताऽऽत्मजः ।
१] आ-रुरोह गिरेः[3] शृङ्गं[3] नाना-रत्न-विभूषितम् ॥१०३॥[N
आ-रूहन् स महा-शैलं गन्धर्वैर् अन्व-अरुध्यत ।
२] कस्[4] त्वं[4] वानर-रूपेण सम्प्राऽऽप्तो निशि दारुणे ॥१०४॥[N
गन्धर्वाणां वचः श्रुत्वा हनू-मान् वाक्यम् अब्रवीत् ।
३] श्रुता वो यदि किष्किन्धा जम्बू-द्वीप-समाश्रया ॥१०५॥ N
४पू] वानराऽधिपतिस् तत्र सु-ग्रीवो नाम वि-श्रुतः ।
मित्रकार्याऽर्थम् उद्-युक्तो[5] रावणेनाऽथ वि-ग्रहे ॥१०६॥[N
६] मित्र-भ्राता राक्षसेन शक्त्या च विनि-पातितः ।
७उ] तद्-अर्थं सम्प्र-यातोऽहम् ओषधीः[6] प्रति[7] पर्वतम्[7] ॥१०७॥[N
८पू] विशल्य-करणीं नाम जानेऽहं परमौषधीम्[8] ।
N] वि-घ्नं न मे प्र-कर्तव्यं प्र-सादं कर्तुम् अर्हथ ॥१०८॥[N
८उ] अहं वानर-राजस्य भृत्यस् तु परमैर् गुणैः ।
९पू] हनू-मान् इति वि-ख्यातः स्वाम्य-अर्थे प्राऽर्थयामि वः॥१०९॥[N
१२उ] हनू-मतो[9] वचः[9] श्रुत्वा गन्धर्वास् ते महा-बलाः ।
विचित्र-कवचाः[10] सर्वे नानाप्रहरणोद्यताः ।
१३] कोलाहलं प्र-कुर्वन्तः साऽऽयुधाः समभ्य्-अद्रवन् ॥[11]११०॥[N
N] ततो हनू-मता तूर्णं कृत्वा रूपं च दारुणम् ।[11]
१७उ] लाङ्गूलेनाऽऽहताः[12] के-चित् के-चिद् दन्तैर् वि-दारिताः ।
मुहूर्तेनाऽऽहताः सर्वे गन्धर्वा युद्ध-दुर्मदाः ॥१११॥[N
N] हत्वा गन्धर्व-वीराणां सहस्राणि चतुर्-दश ।
२१पू] पर्य्-अटन् स गिरिं सर्वं नैवाऽपश्यद्[13] इहौषधीः[14] ॥११२॥[N
चिन्तयामास हनु-मांस् तस्याश्[15] चिह्नं न लक्षये[15] ।

---

१. प्र-सन्नादाः ॥ २ रा₁ अ-क्रूरं । ३. रा₂ फ-गिरिं रम्यं ॥ ४. रा₂-वर्जं-कथं ॥ ५. रा₂ फ-वर्जं-इक्ष्वाको । फ-संयुक्तो ॥ ६. रा₂-०धीं । ७. फ-प्रेषितो वनं ॥ ८. ल₁ ल₂ अ प्र-प्रवरौषधीं ॥ ९. रा₂ फ-०मद्वचनं । १०. रा₂ फ-०त्रवसनाः । ११. रा₂-नास्ति ॥ १२. रा₁-लांगले० ॥ १३. रा₂ फ-नापश्यत्तां । १४. रा₁-महौ० । रा₂ फ-महौषधिं ॥ १५. रा₂ फ-कृते कर्मणि निष्फले ।

N] स चिरं चिन्तयित्वा तु हृदये न व्य्-अदृयत ।।११३।।[N
२०पू] ततो द्रुमलताऽऽकीर्णं सिंह-व्याघ्र-समाकुलम् ।[1]
२१उ] मृगयंश् च सम्-अन्तात् तु न पश्यति महौषधीः ।।११४।।[N
अचिन्तयच् च तेनाऽथ किं करोमीऽति वै तदा ।
यद्य् अहं न नयिष्यामि कथं द्रक्ष्यामि पार्थिवम् ।
N] वानराणां च सर्वेषाम् अव-हास्यो भवाम्य् अहम् ।।११५।।[N
N] इमम् एव नयिष्यामि पर्वतं गन्ध-मादनम् ।
२५पू] नानाद्रुमलताऽऽकीर्णं नानापुष्पोपशोभितम् ।।११६।।[N
१७पू] ततः सम्-अभवद् युद्धं गन्धर्वैः सु-महाबलैः ।
N] पुरा त्रि-(?ति)विक्रमे सोऽ(?णाऽ)थ बलि-(?ली)य-(?यु)ज्ञे(?द्धे) महाऽऽत्मनः[2]
उत्-पाट्य शिखरं तस्य पर्वतस्य महा-कपिः ।
N] चूर्णयामास तान् सर्वान् गन्धर्वान् काल-चोदितान्[3] ।।११८।।[N
मुहूर्ताद् एव ते सर्वे सं-क्रुद्धेन हनू-मता ।
१९] त्रयः कोट्यो हतास् तत्र गन्धर्वाणां महाऽऽत्मनाम् ।।११९।।[N
हत्वा गन्धर्व-राज्ञोऽसौ गिरिम् आ-रुरुहे ततः ।
N] नानाद्रुमलताऽऽकीर्णं सिंह-व्याघ्र-निषेवितम् ।।१२०।।[N
वि-चिन्वानः सम्-अन्ताच् च गिरि-श्रेष्ठे महौषधीः ।
N] न ज्ञातवान् स वै तत्र चिन्ताम् अभ्य्-अगमत् कपिः ।।[4]१२१।।[३०उ
तस्य बुद्धिः समुत्-पन्ना हनू-मतो[5] महाऽऽत्मनः[5] । [३१पू
N] बहु-त्वान् नोप-गच्छामि विशल्य-करणीं तथा ।।[6]१२२।।[N
२२पू] इदम् एव[7] नयिष्यामि गृहीत्वा[7] शिखरं गिरेः । [३१उ
N] प्र-गृह्य यदि गच्छामि तन् मे स्यात् सु-कृतं कृतम् ।।[8]१२३।।[३२पू
N] मार्गमाणे[9] महा-दोषः कालस्याऽति-व्यतिक्रमः ।[10] [N
कालाऽत्यये महा-दोषो[11] वैरस्यं[11] च महद् भवेत् । [३३उ

---

१. अतः परमधिकः पाठः—प्र-ते सम्मताश्चौषध्यो गंधर्वास्ते महाबलाः ॥ २. अ प्र फ-वर्जं—०ना ॥ ३. रा१, ल१, ल२ अ-०दितः ॥ ४. म-चिन्तामभ्यगमद्धीमानपश्यंस्तां महौषधीम् ॥ ५. म-मारुतेर्मारुतौजसः । ६. म-नास्ति ॥ ७. म-एवास्य नेष्यामि दक्षिणं । ८. म-अगृहीत्वैव गच्छामि विशल्यकरणीं यदि ॥ ९. ल१, ल२ ब अ प्र-०माणो । १०. म-नास्ति । ११. म-च दोषः स्याद्वैकृत्यं ।

२४] इति सं-चिन्त्य[1] मनसा उन्-ममाथ[2] महा-गिरिम्[2] ॥१२४॥[३४पू
२७पू] नाना-तरु-गणाऽऽकीर्णं[3] नाना-धातु-विभूषितम्[3] । [३५पू
२५उ] अनेक-रत्न-निलयं शिला-पादप-शोभितम् ॥१२५॥[N
वापीषु भ्रान्त-विहगं लीन-विद्याधरोरगम् । [३६पू
२६] सिंह-व्याघ्र-समाकीर्णं[4] गज-यूथ-समाकुलम् ॥[5]१२६॥[N
२८पू] शत-योजन-विस्तीर्णं[6] ततो विंशतिम्[6] आ-यतम् । [N
२९पू] उत्-पाटयित्वा बाहुभ्यां[7] लीलया[7] चाऽचलोप(?त्त)मम्[7]।१२७[8]॥[३५उ
N] ततस् तं पर्वतं गृह्य आ-काशेन स गच्छति[9] । [३६उ
२९उ] पतन्ति शिखरात् तस्माल् लताभिः सह पाद-पाः ॥[10]१२८[11]॥[N
वि-द्रुताः शर-भाः सिंहा व्यालाश् च महिषा गजाः ।
N] उत्-पाट्य शैलं बाहुभ्याम् आ-जगाम महा-बलः ॥१२९॥[N
खे-चरैः स्तूयमानस् तु स-विद्याधरकिन्नरैः ।
N] आ-जगाम हरि-श्रेष्ठो द्वितीय इव पर्वतः ॥१३०॥[N
N] पुष्प-वृष्टिं वि-मुञ्चन्ति गतं मार्गे हरीऽऽश्वरम् ।
३२पू] स-विद्याधरगन्धर्वा देवास् च सह किं-नरैः ॥१३१॥[N
N] वायु-मुख्याश् च ते सर्वे सं-स्तुवन्ति हरीऽऽश्वरम्[12] ।
३२उ] अब्रुवन् वि-स्मिता दृष्ट्वा हनू-मन्तं विहायसि ॥१३२॥[N
त्रैलोक्येऽपि न पश्यामो महतां कर्म चेदृशम् ।
३३] यो हि कुर्याद् इदं कर्म गन्धर्वाणां वधं रणे ॥१३३॥[N
पर्वतोत्पाटनं चैव कोऽन्यः कुर्याद् धनू-मतः ।
३४] साधु साधु महा-वीर्य वि-क्रान्तोऽसि महा-बलः ॥१३४॥[N
३५पू] शापाद् वि-मोक्षिता चैव गन्ध-(?विद्युन्)माली(?ला) त्वयाऽप्सराः ।
N] त्रयो गन्धर्व-कोट्यस् तु हतास् ते निमिषेण वै ॥१३५॥[N
३५उ] इमम् ओषधि-सम्पूर्णं पर्वतं गृह्य गच्छसि ।
N] वायोस् तु वचनं श्रुत्वा हनू-मान् वाक्यम् अब्रवीत् ॥१३६॥[N

---

१. म-निश्चित्य । २. म-निष्प्रकंपं गिरेस्तटं ॥ ३. म-फुल्लं नानातरुतलं । ४. म-नास्ति ॥ ५. अ-नास्ति ॥ ६. ल$_1$ ल$_2$ ब-विस्तीर्णं । ७. म-हस्ताभ्यां समलोडयत् । ८. अ प्र-नास्ति ॥ ९. म-परिगृहीत्वा प्रययौ तच्छैलशिखरं महत् । १०. म-अत आरभ्य १६६-तमश्लोकं यावन्नास्ति । ११. प्र-नास्ति ॥ १२. रा$_1$ ल$_1$ ल$_2$ ब अ-हनूमतं ॥

लक्ष्मणं जीवयिष्यामि आज्ञां कुरु मम प्र-भो ।
अभि-वाद्य पितुः पादौ जगाम स कपीऽऽश्वरः ।
N] खे-चरैः स्तूयमानस् तु स-विद्याधरकिन्नरैः ॥१३७॥[N
N] रावणेनाऽपि क्रुद्धेन विदित्वा वि-क्रमं रिपोः ।
वं-८४,१३उ] राक्षसाः पूर्वम् आ-दिष्टा गृह्यतां वानराऽधमः ॥१३८॥[N
N] नि-हते वानरे त्व् अद्य अर्ध-राज्यं ददाम्य् अहम् ।
?तस्य राज्यं प्र-दास्यामि? तिष्ठध्वं खे निशा-चराः ॥१३९॥[N
१४] रावणस्य वचः श्रुत्वा ये प्र-धाना महा-बलाः ।
१५पू] गृहीत्वा शर-निस्त्रिंशान् नि-पेतुस् ते मही-तलम् ॥१४०॥[N
स्थूल-दंष्ट्रा महा-नादा अष्ट-दंष्ट्राश् च राक्षसाः ।
१२] उल्का-मुखो महा-वक्त्रश् चतुर्-नेत्रो महा-बलः ॥१४१॥[N
१३पू] हस्ति-कर्णो द्वि-जिह्वश् च महा-वक्त्रो महा-बलः ।
N] रक्ताऽक्षः पिङ्गलाऽक्षश् च दंष्ट्रोदर-महोदरौ ॥१४२॥[N
वक्र-नासो वि-नासश् च काक-तुण्डः स-भैरवः ।
N] गृध्र-तुण्डश् च हस्त्य्-अश्वः काककुवदनाव् उभौ ॥१४३॥[N
उल्का-केशो महा-कायो हस्ति-पादश् च राक्षसः ।
N] एते चाऽन्ये च बहवो रावणस्य हितैषिणः ॥१४४॥[N
१५उ] आ-वृत्य गगनं तस्थुर् हनूमद्-वध-कांक्षया[1] ।[2]
N] मायाविनो महा-वीर्या मायां कुर्वन्ति राक्षसाः ॥१४५॥[N
१८उ] शक्रो वैश्रवणः के-चिद् यमो वरुण एव च ।
१९पू] ब्रह्मा विष्णुः स्वयं रुद्र आदित्यो वायु-शीतगू ॥१४६॥[N
ऋषयः पितरो देवाः के-चिद् भूता हुताऽशनाः[3] ।
यतन्ते राक्षसाः सर्वे देवा भूत्वा महा-बलाः ।
N] आ-वृत्य गगनं तस्थुर् हनू-मान् येन गच्छति ॥१४७॥[N
हनू-मान् अपि तेजस्वी गृहीत्वा शिखरं गिरेः ।
N] आ-जगाम महा-तेजा लीलया स हरीऽऽश्वरः ॥१४८॥[N
स तैर् बहुभिर् आ-वृत्य शक्ति-शूल-धरैस् तथा ।
N] नि-रुद्धः स महा-वीर्यः पद्म-गैर् इव पर्वतः ॥१४९॥[N

---

१. प्र-०कांक्षिणः । २. अ-अत आरभ्य १४७-शश्लोकस्य पंचमपादपर्यंतं नास्ति ॥ ३. रा, ल, प्र-०शनः ॥

N] वि-ज्ञातास् ते ततः सर्वे हनू-मता महौजसा ।
१९उ] अब्रवीद् राक्षसान् सर्वान् वि-हस्य पवनाऽऽत्मजः ॥१५०॥[N
यदि रुद्र-गणाः सर्वे युद्धाऽर्थम् इह चाऽऽगताः ।
N] तथाऽपि तान् हनिष्येऽहं राक्षसाऽर्थे समुद्-यतान् ॥१५१॥[N
यदि प्राऽऽप्तास् त्रयो लोकाः स-देवाऽसुरपन्नगाः ।
२०] सह सर्वान् हनिष्यामि का शङ्का मम राक्षसैः ॥१५२॥[N
तच् छ्रुत्वा वचनं ते तु हनू-मन्तं समन्त-तः ।
N] पूरयन्[1] छर-वर्षेण राक्षसाः पवनाऽऽत्मजम् ॥१५३॥[N
N] स हन्यमानो बहुभिर् न चकम्पे महा-बलः ।
२२पू] बाहुभ्यां पर्वतं गृह्य पङ्क्याम् एव स युध्यति ॥१५४॥[N
२४उ] बद्ध-लाङ्गूल-पाशेन पङ्क्यां प्र-हरते कपिः ।
N] कस्य-चिद् बल-वद् वक्त्रं कांश्-चित् कर्णाद् अगृह्णत ॥१५५॥[N
कांश्-चिज् जग्राह चरणे जानुभ्यां निष्-पिपेष च ।
२३] बभञ्ज बाहु-वक्षांसि कांश्-चिन् नेत्रैर् व्य्-अयोजयत् ॥१५६॥[N
एवं ते राक्षसाः सर्वे स-विद्याधरचारणाः ।
२८] साधु साध्व् इति तं वीरं पुष्प-वर्षैर् अवाऽकिरन् ॥१५७॥[N
तस्मिन् वि-मर्दे तुमुले स्थूल-जङ्घो महा-जवः[2] ।
एक एव प्र-दुद्राव निः-श्वसन् उर-गो यथा ॥१५८॥[N
३१] स गत्वा रावणे सर्वं स्व-सैन्यस्य न्य्-अवेदयत् ।
हताः सर्वे महा-वीरा ये बलिष्ठा निशा-चराः ।
३२] एकेन कपि-मुख्येन लीलया रण-मूर्धनि ॥१५९॥[N
अहम् एको महद् युद्धं तदा तस्य महा-प्रभो ।
३३] कथं-चिद् एव सम्प्राऽऽप्तस् तव राजन् नि-वेदितुम् ॥१६०॥[N
तस्य तद् भाषितं श्रुत्वा राक्षसस्य महाऽऽत्मनः ।
३४] दीर्घम् उष्णं च निः-श्वस्य न किं-चिद् इति चाऽब्रवीत् ॥१६१॥[N
दैवम् एव परं मन्ये पौरुषं तु निर्-अर्थकम् ।
३५] यत्र वानर-मात्रेण राक्षसा बहवो हताः ॥१६२॥[N
हनू-मांश् च महा-तेजा नि-हत्य रजनी-चरान् ।
N] आ-जगामाऽचलं गृह्य जगर्ज च महा-बलः ॥१६३[3]॥[N

१. टि० आर्षोऽडभावः ॥ २. ल$_1$ ल$_2$ प्र–महाबलः ॥ ३. अ–नास्ति ॥

तस्य नादं ततः श्रुत्वा सर्वे ते हरि-यूथपाः ।[1]
N] हनू-मान् इह सम्प्राऽऽप्त इति हर्षम् उपा-गताः ॥१६४॥[N
राघवोऽपि रवं श्रुत्वा हनू-मतो महाऽऽत्मनः ।
N] बाष्प-पर्याकुले नेत्रे प्र-मृज्य मुदितोऽभवत्[2] ॥१६५॥[N
स-विद्युद् इव जीमूतस् तोय-पूर्णो नभस्-तले ।
N] आ-जगाम गृहीत्वाऽथ हनू-मान् सौषधिं गिरिम् ॥१६६॥[N
वं-८३] स चाऽऽगम्य महा-तेजा भूमौ न्य्-अस्य महो-धरम् ।
४०] वि-नीतश् चाऽञ्जलिं कृत्वा हनू-मान् वाक्यम् अब्रवीत् ॥१६७[3]॥[३७
४१पू] उपाऽऽगम्य ततो रामं वि-ज्ञापयति बुद्धि-मान् ।
N] वि-ज्ञाप्य[4] राम-सुग्रीवौ किं तु राजन् नि-बोध मे ॥१६८[5]॥[N
४१उ] ताम् ओषधिं न जानामि गृहीत्वा शैलम् आ-गतः ।[6]
४५पू] व्यतिक्रम-कृतं दोषं तन् मम क्षन्तुम् अर्हथ (?ः) ॥[7]१६९॥[३८
बहु-विघ्नानि मार्गे मे तन् नाऽहं शीघ्रम् आ-गतः ।
४४] विघ्न-करा दुर्-आत्मानो नि-हताः कूट-राक्षसाः ॥१७०॥[N
एवं कथयमानं तं प्र-गृह्य पवनाऽऽत्मजम् ।
N] सु-षेणो वानर-श्रेष्ठो रामः सु-ग्रीव एव च ॥१७१॥[३९
४९उ] साधु वीर महाऽर्होऽसि यस्य चेदृक् पराऽऽक्रमः ।
N] तस्मिन् बभूवुर् हृष्टाश् च रणे वानर-पुङ्गवाः ॥१७२॥[N
N] दृष्ट्वा हनु-मतः कर्म वि-स्मयं जग्मुर् उत्-तमम् ।[8]
स प्र-शस्य हनू-मन्तं सु-षेणं राघवोऽब्रवीत् ॥[8]१७३॥[N
५०] मृगयस्व महा-प्राज्ञ ओषधीः पर्वते शुभे ।
५१पू] रम्यं गिरिं तम् आ-रूढः सु-षेणो वानराऽधिपः ॥[9]१७४॥[N
५२] नाना-ना(?न)ग-समाकीर्णं[9] नाना-धातु-विचित्रितम् ।
५१उ] पश्यमानो महा-शैलं दिव्यौषधि-विभूषितम् ॥१७५[10]॥[N
ताम्[11] ओषधिं ततो गृह्य अव-तीर्णो मही-तले । [N
५४] शिलायां जर्जरी-कृत्य सु-षेणो वानरोत्तमः ।[11]

---

१. अ–नास्ति ॥ २. ल₁–०तोऽब्रवीत् ॥ ३. म–च्यानीय च महावेगात्तच्छैल-शिखरं हरिः। विश्रवबाहू हनुमान्सुषेणमिदमब्रवीत् ॥ ४. प्र–विज्ञाप्यौ । ५. म–नास्ति । ६. म–ओषधीं नावगच्छामि तामिह हरिपुंगव । तदिदं शिखरं सर्वं गिरेस्तस्य मयाहृतम् ॥ ७. म–नास्ति ॥ ८. म–एवं कथयमानं तं प्रशस्य पवनात्मजम् ॥ ९. म–नास्ति ॥ १०. अ म–नास्ति ॥ ११. म–सुषेणो वानरश्रेष्ठस्तामुत्पाट्य महौषधीम् ।

लक्ष्मणाय ददौ नस्यं[1] शल्येषु च महा-द्युतिः[1] ॥१७६॥[४१
५५] वि-शल्यां[2] च[2] समा-घ्राय लक्ष्मणः पर-वीर-हा ।
५६पू]वि-शल्यो वि-रुजः श्री-मान्[3] उद्-अतिष्ठन् मही-तलात् ॥१७७॥[४२
५९उ] समुत्थि (दु-स्थि)तं[4] तु हरयो भू-तलात् प्रेक्ष्य लक्ष्मणम् । [४३पू
N] वि-स्मिताश् च बभूवुस् ते सर्वे वानर-राक्षसाः ॥[5]१७८॥
N] दृष्ट्वा हनु-मतः कर्म तत् सुरैर् अपि दुष्-करम्[7] ।[7] [४०उ
६०पू] साधु साध्व् इति ते[7] प्रीता हनू-मन्तम् अपूजयन्[7] ॥१७९॥[४३उ
राघवः परम-प्रीतः प्र-शस्य पवनाऽऽत्मजम् ।
N] भ्रातरं चैव धर्माऽऽत्मा प्रीताऽऽत्मा रघु-नन्दनः ॥१८०[8]॥[N
एह्य् एह्योऽत्य् अब्रवीत् प्रीतो[9] लक्ष्मणं शुभ-लक्षणम् ।
५७] स-स्रजं[10] सस्वजे गाढं[10] वाष्पपर्याकुलेक्षणः ॥१८१[४४
५८उ] अब्रवीच् च परि-ष्वज्य सौमित्रिं राघवस्[11] तदा[11] ।
५९उ]दिष्ट्या त्वां वीर पश्यामि मरणात् पुनर् उत्थि(दु-स्थि)तम्।[11] १८२।[४५
न मे वीर जयेनाऽर्थः सीतया जीवितेन वा ।[12]
N] कश्[13] च मे जीवितेनाऽर्थस्[13] त्वयि पञ्च-त्वम् आ-गते ॥१८३॥[४६
एवम् आ-भाष्य सौमित्रिं रामो मारुतिम् अब्रवीत् ।
६१] त्वत्-प्रसादेन पश्यामि लक्ष्मणं शुभ-लक्षणम् ॥१८४[14]॥[N
वं-८५] पञ्च-त्त्वं यद्य् अयं यातो लक्ष्मणो मारुते मम ।
६] नैव मे वि-जयेनाऽर्थो न मैथिल्या न चाऽऽत्मना ॥१८५[14]॥[N
७पू] इत्य् एवं वदतस् तस्य राघवस्य[15] महाऽऽत्मनः । [४७पू
N] लक्ष्मणोऽपि समुत्था(दु-स्था)य पर्य्-अष्वजत मारुतिम् ॥१८६॥[N
१३] सर्वे ते हर्षम् आ-पन्ना वानराः काम-रूपिणः ।
वं-८४] अ-पूर्वं पर्वतं दृष्ट्वा कौतूहल-समन्विताः ॥१८७॥ [N
२] ततस् ते वानराः सर्वे राघवं वाक्यम् अब्रुवन् ।
३पू] कौतूहलं महा-राज अस्माकं पर्वतं प्रति ॥१८८॥ [N

---

१. म—नस्तः शल्ये च सुम० ॥ २. म—तां विशल्यां । ३. म—शीघ्रं ॥ ४. म—तमुत्थितं । ५. म—नास्ति ॥ ६. रा,—वीरहा । ७. म—दृष्टास्ते सुषेणं प्रत्यपू० ॥ ८. म—नास्ति ॥ ९. म—रामो । १०. म—सस्वजे स्नेहगाढं च ॥ ११. म—रघुनन्दनः । १२. म—नास्ति ॥ १३. म—को हि मे जीवितस्यार्थस् ॥ १४. म—नास्ति ॥ १५. म—अत आरभ्य १९७-तमश्लोकं यावन्नास्ति ॥

N] अनु-ज्ञां देहि राजेन्द्र पर्वताऽऽरोहणे प्र-भो ।
३उ] दत्ताऽनुज्ञास् तु रामेण सु-ग्रीवेण च वानराः ।
N] ते तु हृष्ट-तमा भूत्वा आ-रोहन्ति समन्त-तः ।।[1]१८९।।[N
भक्षयन्तः पिबन्तश् च लोरयन्तश् च पर्वते ।
५] क्षणेन वानरास् तृप्ता[2] मधु-मत्ताश् च सर्व-शः ।।१९०।।[N
भक्षयित्वा फलान्[3] दिव्यान् पीत्वा पानीयम् उत्-तमम् ।
६] अव-तीर्णाः समन्ताच् च वानराः काम-रूपिणः ।।१९१।।[N
अव-तीर्णेषु तृप्तेषु वानरेषु महाऽऽत्मसु ।
७] रामोऽब्रवीच् च सु-ग्रीवं हनू-मान् उच्यतां कपिः ।
८पू] नीयतां पर्वतस् तत्र त्वयाऽऽनीतो यतो ह्य् अयम् ।।१९२।।[N
९पू] राघवस्य वचः श्रुत्वा हनू-मान् वानरेश्वरः ।
१०पू] बाहुभ्यां पर्वतं गृह्य जगाम वि-मलेऽम्बरे ।।१९३।।[N
वं-८५] दैवतैः स्तूयमानस् तु तथा तुम्बुरु-नारदैः ।
२] अप्सरो(१रैर्)[3] गीयमानस् तु तथा किन्नर-चारणैः ।।१९४।।[N
१पू] स्व-स्थाने स्थापयित्वा तं न-गं नग-सत्तमम्[4] ।
३उ] पुनर् आऽयाज् जवेनाऽऽशु शापाज् ज्वर इव च्युतः ।।१९५।।[N
रामस्य त्वरितं गत्वा वि-नयेन कृताऽञ्जलिः ।
N] ननाम शिरसा पादौ सु-ग्रीवस्य च धी-मतः ।।१९६।।[N
तं प्र-शस्य हनू-मन्तं सु-ग्रीवं स-विभीषणम् ।
N] ते सर्वे हर्षम् आ-पन्ना दृष्ट्वा लक्ष्मणम् उत्थि(द्-स्थि)तम् ।।१९७।। [N
N] ततोऽब्रवीन् महा-तेजा लक्ष्मणो राघवं तदा । [N
७उ] भिन्न-शिथिलया वाचा स-क्रोधो रावणं प्रति ।।१९८[5]।।[४७उ
प्रति-ज्ञातं प्रति-ज्ञाय पुनः सत्य-पराऽऽक्रम ।
८] लघुः कश्-चिद् इवाऽतेजास् तेनैवं वक्तुम् अर्हसि ।।१९९[6]।।[४८
न प्रति-ज्ञां तु कुर्वन्ति वि-तथां साधवोऽन्-अघ ।
९] लक्षणं तु महत्-त्वस्य[6] प्रतिज्ञा-प्रतिपालनम् ।।२००।। [४९
तद् अलं मत्-कृते नैवं[7] नैराश्यम् उप-गम्यते[8] ।

---

१. प्र–नास्ति ॥ २. रा, ल, ल₂ ब अ–सुप्ता । प्र फ–सर्वे ॥ ३. टि. आर्षः पुं. प्र. ॥ ४. ल₂–नगमुत्त० ॥ ५. म–स्खलत्वा शिथिलया वाचा लक्ष्मणो वाक्यमब्रवीत् ॥ ६. म–नास्ति ॥ ७. म–नेदं । ८. म–उपपद्यते ।

१०] वधेन रावणस्याऽथ[1] प्रतिज्ञा-प्रतिपालनम्[1] ॥[2]२०१॥[५०
नहि जीविष्यते राम तव चाप-पथं[3] गतः ।
११] नदतस्[4] तीक्ष्ण-दंष्ट्रस्य सिंहस्येव महा-गजः ॥२०२॥[५१
अहं तु वधम् इच्छामि शीघ्रं तस्य[5] दुर्-आत्मनः ।
१२] यावद् अस्तं न यात्य् एष कृत-कर्मा दिवा-करः ॥२०३॥[५२
तम इव किरणैः सहस्र-रश्मिः
शर-किरणैर् जहि रावणं सु-तीक्ष्णैः ।
रण-शिरसि नि-पातितस्य[6] वक्त्रं
१३] मुदित-मनाः समवेक्षितुं त्वरेऽहम् ॥२०४[7]॥[N

इत्यार्षे रामायणे युद्ध-काण्डे लक्ष्मण-सञ्जीवनं
नामैकाशीतितमः सर्गः ॥ ८१ ॥

---

१. म—०स्याद्य प्रतिज्ञां परिपालय । २. अ—नास्ति ॥ ३. म—बाणपथं । ४. म—नर्दतस् ॥ ५. म—अस्य ॥ ६. म—पाति० ॥ ७. अतः परमधिको विपर्यस्तश्च पाठः—रा₂ फ—असंगृह्य यदि गच्छेयमुपहासो भविष्यति । सर्वं तु पर्वतं हृत्वा प्रयास्ये मा विलम्बितः ॥ तत्र ज्ञास्यति वैद्योऽसौ सुषेणः परमौषधिम् । यस्मिन् हि शैले संजाता ओषधी च सुखावहा ॥ प्रागर्कादवगच्छेति सुषेणो मां यथाऽब्रवीत् । इति संचिन्त्य बलवानवतीर्य गिरेस्तदा । उत्पाटने तु शैलस्य चकार मतिमान्मतिम् ॥ ततो द्रुमलताकीर्णं नानारत्नोपशोभितम् । सिंहव्याघ्रगजाकीर्णमुज्जहार महागिरिम् ॥ न्यपतन् गिरिशृंगाणि द्रुमवल्लीगणास्तथा । पक्षिणो विप्लुताः सर्वे पर्वतास्फोटनेन तु ॥ दशयोजनविस्तीर्णं पञ्चयोजनमायतम् । दोर्भ्यामुद्गृह्य तं शैलमुत्पपात विहायसा ॥ ततस्तं पर्वतं हृत्वा शीघ्रं स प्लवगोत्तमः । जगामाकाशमाविश्य लीलया वायुनन्दनः ॥ अथ देवगणाः सर्वे पुरन्दरपुरोगमाः । पुष्पवर्षैरभ्यकिरन् गच्छन्तं कपिकुञ्जरम् । गीयमानोऽप्सरोगणैः स्तूयमानो महर्षिभिः ॥ इत्यार्षे रामायणे कालनेमिवध ओषधीहनुमत्प्रत्यागमनं नाम सर्गः ॥ एतस्मिन्नन्तरे वायुः प्रववौ सुखशीतलः । क्षीणाकारास्तथा ताराः प्रत्यूषः समपद्यत ॥ अस्तं प्रयातो भगवान् सोमः प्रक्षीणमण्डलः । हा लक्ष्मण प्रियभ्रातः क्व प्रयासि विहाय माम् ॥ हा हतोस्मि क्व गच्छामि कं पृच्छामि महाभुज । किं मे राज्येन भोगैर्वा किं प्राणैः सीतयाऽपि वा ॥ यत् प्रयातुं महाबाहो दीर्घमध्वानमुद्यतः । कौशल्यां किन्नु वक्ष्यामि सुमित्रां वा परंतप ॥ भरतं चाऽपि शत्रुघ्नं त्वया वीर्यवता विना । हा वीर सुमहाबाहो प्रतिवाक्यं प्रयच्छ मे ॥ न त्वमर्हसि सौमित्रे

त्यक्तुं दुःखार्दितं हि माम् । त्वद्वियोगसमुत्थेन शोकेन समुदीरितः ।
करोम्यराक्षसामुर्वी त्रैलोक्यं च दहाम्यहम् ॥ एवमुक्त्वा महाबाहुः प्रगृही-
ताऽग्र्यकार्मुकः । युगाऽन्तकाले भगवान् पिनाकीऽव व्यरोचत ॥ ततः
सन्त्रस्तमनसो वानरा भीमविक्रमाः । किमेतद् इति भाषंतः ससुग्रीव-
विभीषणाः । प्रणिपत्याग्रतः स्थित्वा सर्वे प्राञ्जलयोऽब्रुवन् ॥ एकस्यार्थे
महाबाहो त्रैलोक्यं मा विनाशय । त्वामेवं क्रुद्धमालोक्य रौद्रास्त्रो-
द्यतपाणिनम् ॥ दृष्ट्वा देवाः सगन्धर्वाः प्रद्रवन्ति दिशो दशः । स्फुरते गगने
विद्युज्ज्वालैर्दीप्तमिवाम्बरम् ॥ चलन्ति वसु(?ह्ु)धा वा (?) तोद्धू (?) ता उन्नदन्ति
महार्णवाः । प्रलम्बन्ति शिलाः शैला जाता नष्टा दिशो दशः ॥ किमिद-
मिति भाषन्तो दिविस्थाः स्थिरचारिणः । एवं विज्ञापितस्याथ सुग्री-
वाद्यैः प्लवंगमैः ॥ प्रशान्तिमगमत् कोपो राघवस्य महात्मनः ।
भूयः शोकसमाविष्टो रामो दशरथात्मजः ॥ लक्ष्मणं पतितं दृष्ट्वा निशां
च क्षयमेयुषीम् । अब्रवीद्राघवो दीनः सुग्रीवं वानरेश्वरम् ॥ सुग्रीव
गच्छ किष्किन्धां सह वानरसेनया । कृतं मित्रप्रदानं ते यदन्यैर्भुवि
दुष्करम् ॥ अहं वाद्य महाबाहो यत्करिष्यामि तच्छृणु । आत्मानं प्रद-
हिष्यामि प्रदीप्ते हव्यवाहने ॥ सहानेन गमिष्यामि लक्ष्मणेन महाबल ।
प्रेतराजपुरं दिव्यं नोत्सहे कर्तुमन्यथा ॥ विभीषणस्य कर्तव्यं न कृतं भाषितं
मया । एतद्दहति मे चेतः शुष्कं काष्ठमिवानलः ॥ एवमुक्तस्तु रामेण
सुग्रीवो वाक्यमब्रवीत् । किमर्थं मुह्यसे देव त्वादृशो नैव मुह्यति ॥
त्रियामा शर्वरी याता पश्चिमेयं प्रवर्तते । नियतं पश्चिमे यामे हनूमाना-
गमिष्यति ॥ इति तेषां ब्रुवाणानां हनूमान् समदृश्यत । प्रदीप्त इव
शैलेन्द्रो गगने प्रपलायितः ॥ किमेतदिति संभ्रान्ताः कपयो जात-
विस्मयाः । केचिद् द्रुमान्समारूढाः केचिद्भीताः प्रदुद्रुवुः ॥ केचिद्
गृहान् प्रविविशुः सेतुमन्ये प्रपेदिरे । केचित् सज्जीकृतास्तस्थुः केचिद्
धावन्ति दर्पिताः ॥ केचिच्छैलाग्रमारूढाः केचिद्वक्त्राणि रक्षसाम् ।
प्रगृह्याभ्यद्रवन् केचिन्नादं मुञ्चन्ति चाऽपरे ॥ अधावन्तं प्रधावन्ति ह्यू-
र्ध्वपुच्छास्ततस्ततः । मायावी राक्षसः कोयमस्मान् हन्तुमु-
पागतः ॥ इति तं संभ्रमं दृष्ट्वा रामः सुग्रीवमब्रवीत् । वानराधिप
मा भैषीरियं रक्षोविभीषिका । निर्भीर्भव महाबाहो निहन्म्येनं
पतत्रिभिः ॥ एतस्मिन्नन्तरे वीरः सोवतीर्य नभस्तलात् । निक्षिप्य पर्वतं
भूमौ नानारत्नविभूषितम् । विनीतः प्राञ्जलिर्भूत्वा राघवं वाक्यम-
ब्रवीत् ॥ विज्ञाप्यं श्रूयतां देव ससुग्रीवविभीषणः । ओषधीर्नाधि-
गच्छामि विदित्वापि नरेश्वर ॥ ततोऽयं ते मयानीतः कृत्स्न-
श्चौषधिपर्वतः । व्यतिक्रमं ममैतत्त्वं क्षन्तुमर्हसि सुव्रत ॥ बहुविघ्नाश्च
तत्रासन् येनाऽहं च विलम्बितः । हनूमतो वचः श्रुत्वा रामो वचनम-
ब्रवीत् ॥ साधु वीर महाबाहो यस्येदृक् ते पराक्रमः । देवानां सदृशं कर्म

१. रा,—हनुमान् ॥

कृतमेवं परंतप ॥ सुग्रीवस्त्वब्रवीत्तत्र सुषेणं वैद्यमुत्तमम् । आरोहैनं गिरिं रम्यं यत्र जाता महौषधी । तामौषधीं विजानीहि येन जीवति लक्ष्मणः ॥ सुग्रीवस्य वचः श्रुत्वा सुषेणोऽन्ये च वानराः । गिरिमारुह्य तं रम्यं नानाधातुविभूषितम् ॥ गिरिकूटानि दिव्यानि बहुपक्षिसत्त्वानि च । पद्मषण्डानि पश्यन्तश्चन्दनान्यगुरूणि च ॥ चम्पकैर्नागपुन्नागैः कर्णिकारैश्च शोभितम् । अन्विष्यन्ति गिरिं तं तु ओषध्यर्थं प्लवंगमाः ॥ सुषेणोऽभ्यवदत्तांस्तु पूर्ववृत्तानि सूचयन् । इह विष्णुश्च ब्रह्मा च शक्रोऽग्निर्वरुणो यमः । लोकपालश्च भगवान् कुबेरः सह राक्षसैः ॥ इदं तदमृतस्थानं यत्र देवैः समागतैः । संपीतमप्सरोभिश्च ऋषिभिश्च महाव्रतैः ॥ अत्र राहोः शिरश्छिन्नं विष्णुना प्रभविष्णुना । जाता चात्रौषधिर्दिव्या विशल्यकरणी शुभा ॥ इयं सा चेति हृष्टात्मा ददर्श परमौषधिम् । उत्थाय च स संभ्रान्तः सुषेणो भिषजां वरः । तामोषधीं गृहीत्वाऽसौ ह्यवतीर्य महीतले ॥ समुत्थितं ते हरयो भूतलात्प्रेक्ष्य लक्ष्मणम् । साधु साध्विति सुप्रीताः सुषेणं प्रत्यपूजयन् ॥ उत्थितं भ्रातरं दृष्ट्वा रामो हर्षसमन्वितः । परिष्वज्य च सौमित्रिं सबाष्पश्चेदमब्रवीत् । दिष्ट्या पश्यामि सौमित्रे त्वां विरोगिणमव्रणम् ॥ नीरुजं निर्विकारं जीवन्तं पुनरुत्थितम् । ततः प्रीतमना रामः सुषेणं वाक्यमब्रवीत् ॥ त्वत्प्रसादान्महाबाहो लक्ष्मणं शुभलक्षणम् । पश्यामि परिपूर्णोयं पौर्णमास्यां यथा शशी ॥ हनूमतोपि सुप्रीतो राघवो वाक्यमब्रवीत् । एहि वत्स कपिश्रेष्ठ मत्प्राणद महाबल ॥ परिष्वंगं प्रयच्छामि ममावस्थेयमीदृशी । ममैवांगविशीर्णे तु यत्त्वयोपकृतं मम ॥ नरः प्रत्युपकाराणामापत्सु लभते फलम् । एवमुक्त्वा तु सौमित्रिं राघवस्तु महायशाः ॥ पर्यस्वजत सौमित्रिस्तं हरिं पवनात्मजम् । सर्वे ते वानरा हृष्टाः समर्थाः कामरूपिणः ॥ अपूर्वं तं गिरिं दृष्ट्वा कौतूहलसमन्विताः । विज्ञापयन्ति सुग्रीवं राघवं सहलक्ष्मणम् ॥ कौतूहलसमाऽऽविष्टाः पर्वतारोहणं प्रति । दत्तानुज्ञा राघवेण सुग्रीवेणांगदेन च ॥ तं समारुरुहुः शैलं नानारत्नोपशोभितम् । पश्यन्ति गिरिकूटानि भक्षयन्ति फलानि च ॥ दिव्यानि मधुजालानि पिबन्ति मधुपिंगलाः । संभक्ष्य फलमूलानि पीत्वा पानीयमुत्तमम् ॥ अवतीर्णास्ततः सर्वे वानरा हृष्टमानसाः । अथोवाच हनूमन्तं रामः सुग्रीवसन्निधौ ॥ पर्वतो नीयतां वीर मर्यादा वार्णवस्य तु । एवमुक्तस्तु हनूमान् कृतरंहा महाकपिः ॥ दोर्भ्यामुद्यम्य तं शैलं प्रयातुमुपचक्रमे । अथोदतिष्ठत् तीक्ष्णांशुर्लंघयित्वा महार्णवम् ॥ दिशश्च विमलाः सर्वा जाताश्च हिमपाण्डुराः । हनूमन्तं स विक्रान्तमुत्पत्य गगने स्थितम् ॥ अपश्यन् राक्षसाः सर्वे व्रजन्तं सागरोपरि । रावणस्त्वब्रवीद् दृष्ट्वा समीपस्थान् निशाचरान् ॥ स्थूलजंघं महानादं महावक्त्रं महोरसम् । उल्कामुखं महावीर्यं चतुर्वक्त्रं च राक्षसम् ॥ हस्तिकर्णं शंकुकर्णं

मेघचित्रं च राक्षसम् । एते चाऽन्ये च बहव आज्ञप्ता रावणेन तु ॥ शीघ्रं मायाप्रभावेण हनूमान् गृह्यतामिति । यो निगृह्यानयेत्तूर्णं तस्य राज्यं ददाम्यहम् ॥ श्रुत्वा तु राक्षसेन्द्रस्य वचस्ते त्वरयान्विताः । विचित्रकवचाः सर्वे नानाप्रहरणोद्यताः ॥ विहायसमगुः क्षिप्रं कृत्वा देववरं वपुः । वेष्टयन्ति हनूमन्तं मेघा इव दिवाकरम् ॥ कस्त्वं वानररूपेण गिरिं संगृह्य गच्छसि । न त्वं बिभेषि देवानां दैत्यानां च महात्मनाम् ॥ एवं तैर्निगृहीतस्तु विचिन्त्येदं वचोऽब्रवीत् । यदि प्राप्तास्त्रयो लोका भवद्भिः सहिताः सुराः । ब्रह्माणमग्रतः कृत्वा न समो मम केनचित् ॥ इत्येवं ब्रुवतस्तस्य कपिसिंहस्य तत्क्षणे । ततोऽवर्धत लांगूलं कालपाशोपमं द्विषाम् ॥ अयं वायुसुतस्तस्मिन् प्रव्रजमानो विहायसा । बाहुभ्यां पर्वतव्यग्रो लांगूलेनाभ्ययुध्यत ॥ ततस्तु तस्य लांगूलं वज्रप्रतिमगौरवम् । कालचक्रमिवाविद्धं भ्रमते सर्वतो दिशाम् । प्राहरन् राक्षसाः सर्वे शिलाशक्तिपरश्वधैः । लांगूले तस्य ते कर्तुं स्वल्पं वाऽनर्थं न (?वै) क्षणम् ॥ एकं द्वौ त्रिचतुरो विंशत्त्रिंशत्तथा शतम् । लांगूलाऽग्रेण तान्वेष्ट्य भ्रामयित्वा भुव्यक्षिपत् ॥ अन्यांस्तु बलिनः शूरान् राक्षसान् भीमविक्रमान् । बद्ध्वा लांगूलपाशेन पद्भ्यां सम्प्राहरत् कपिः ॥ केचिद् दृष्ट्यास्य संत्रस्ताः केचिन् नादेन भीषिताः । केचित् पुच्छाभिघातेन पातिता धरणीतले ॥ एवं स कदनं कुर्वन् रक्षसां मेघवर्चसाम् । दिवाकर इव व्योम्नि सोऽगच्छद्वायुनन्दनः ॥ अतिदैवं कृतं कर्म दृष्ट्वा तत्तस्य देवताः । साधु साध्विति भाषन्तः पुष्पवर्षैरवाकिरन् ॥ हत्वा रक्षःसहस्राणि लांगूलचरणायुधः । स्वस्थाने पर्वतं स्थाप्य रामस्याग्रे समागतः ॥ प्रणिपत्य ततो रामं ससुग्रीवं सलक्ष्मणम् । आचचक्षे यथावृत्तं यत्पूर्वं यच्च साम्प्रतम् ॥ तच्छ्रुत्वा वचनं तस्य रामसुग्रीवलक्ष्मणाः । पर्यस्वजन्त संहृष्टा भुजैस्तं वायुनन्दनम् ॥ वानरास्तु ततः सर्वे हर्षसम्पूर्णमानसाः । पर्यस्वजन्त चान्योन्यं भुजैरास्फोटयन्ति च ॥ साधु वीर सुषेण त्वं साधु मारुतनन्दन । इत्येवं प्रवदन्तस्ते सिंहनादैर्नदन्ति च ॥ पुनरेव महाबाहुः सौमित्रिं भ्रातृवत्सलः । एह्येहीत्यब्रवीद्रामो लक्ष्मणं लक्ष्मिवर्धनम् ॥ अब्रवीच्च सुसंहृष्टः सौमित्रिं मित्रवर्धनः । दिष्ट्या त्वां वीर पश्यामि मरणात्पुनरागतम् ॥ न मे वीर अवेक्षार्थः सीतया जीवितेन च । को हि मे विषयेनार्थस्त्वयि पञ्चत्वमागते ॥ इत्येवं वदतस्तस्य राघवस्य महात्मनः ॥ भिन्नशिथिलया वाचा लक्ष्मणो वाक्यमब्रवीत् ॥ तां प्रतिज्ञां प्रतिज्ञाय पुराऽसह्यपराक्रमः । लघुः कश्चिदिवाऽसत्त्वो नैवं त्वं वक्तुमर्हसि ॥ इत्यार्षे हनूमदोषधिपर्वतस्वस्थाने आपनं नाम सर्गः ॥ द. प्र—लंकाकाण्डे ॥

[1]लक्ष्मणस्य तु तद् वाक्यम् उक्तं[2] श्रुत्वा तु राघवः[2] ।
उवाच हितम् अत्य्-अर्थं राघवं[3] रघु-नन्दनम्[3] ॥१ ॥
एवम् एतन् महा-बाहो यथा वदसि लक्ष्मण ।
न प्रति-ज्ञां प्र-कुर्वन्ति वि-तथां साधवो जनाः ॥२ ॥
प्रति-ज्ञातं[4] मया[5] तस्य[6] रावणस्य[7] दुर्-आत्मनः[7] ।
अहम् एनं वधिष्यामि सत्यम् एतद् ब्रवीमि[8] वः[8] ॥३ ॥
वि-ध्वंसय[9] शरैस् तीक्ष्णैर् दिवसो[10] ह्य् अति-वर्तते[11] ।
प्रति-ज्ञां रघु-शार्दूल[12] स-फलां कर्तुम् अर्हसि[12] ॥४ ॥
एवम् उक्त्वा ततो राम इक्ष्वाकु-कुल-नन्दनम्[13] ।
वि-भीषणम् इदं वाक्यं प्रत्य्-उवाच महा-बलः[14] ॥५ ॥
क्वाऽसौ लङ्केश्वरः क्षुद्रो रावणो युद्ध-दुर्मदः ।
रण-भूमिं परि-त्यज्य क्वाऽऽस्ते किं चाऽस्य चेष्टितम् ॥६ ॥
मयि छिद्र-प्रहर्ता[15] च कृत-पापश्[16] च राक्षसः[16] ।
बोद्धव्यं च[17] त्वया वीर शीघ्रम्[18] एव ममाऽऽज्ञया ॥[19]७ ॥
रामस्य वचनं श्रुत्वा तत्-कालाऽर्थ-समन्वितम् ।[20]
उवाच वचनं धी-मान् रामम् एतद् वि-भीषणः ॥८[20] ॥
प्र-विवेश पुरीं तूर्णं लङ्काम् एव सहाऽनुगः ।
सोऽव-तीर्य रथात् तत्र वधम् इच्छंस् तवाऽन्-अघ ॥९ ॥
चिन्तयामास काकुत्स्थ[21] वर-दानम् अथाऽद्भुतम्[22] ।
यद्[23] दत्तं शम्भुना[23] पूर्वं सर्व-शत्रु-विनाशनम् ॥१०॥
अ-जेयं[24] सप्तभिर् लोकैः स-सुराऽसुरमानवैः[25] ।

---

१. म—नास्त्ययं सर्गः । २. फ—श्रुत्वा राजा विभीषणः । भ—श्रुत्वा तत्र स रा० । ३. रा$_2$—०वो रघु० । रा$_2$—०वं रघुनंदनः । भ—लक्ष्मणं समितिंजयः ॥ ४. रा$_2$—०तस् ५. रा$_2$ फ—त्वया । ६. रा$_2$ फ—तावद् । भ—यत्तु । ७. रा$_2$ फ—०स्य वधो नृप । भ—०णं लोकरावणं । ८. रा$_1$ ल$_1$ ल$_2$ ब—वदामि वः । रा$_2$ फ—०म्यहं ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—०यं । भ—०यन् । १०. भ—०से । ११. भ—ह्यनिवर्तिते । १२. रा$_2$ फ—०लां कुरु मानद । भ—सफलामद्य करिष्ये नात्र संशयः ॥ १३. रा$_2$—रघूणां कुलवर्द्धनः । भ—०न्दनः ॥ १४. अ प्र भ—महायशाः ॥ १५. भ—छिद्रे प्र० । १६. रा$_2$ फ—कर्ता पापस्य कर्मणः । १७. भ—तु । १८. फ—क्षिप्रं । १९. रा$_2$—नास्ति ॥ २०. फ—राघवस्य वचः श्रुत्वा चारैरन्विष्य सर्वतः ॥ २१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—स तदा । भ—दुष्टात्मा । २२. रा$_2$ फ—महात्मनः । २३. रा$_2$ फ—दत्तं स्वयंभुवो । भ—यत्त सृष्टं च० ॥ २४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—अमेयं । २५. भ—०मानुषैः ॥

रथं सर्वाऽऽयुधोपेतं दिव्यम् अद्भुत-दर्शनम् ॥११॥
युक्तम् अश्वैर् महा-वेगैः काम-गैः काम-रूपिभिः ।
अ-भेद्यं कवचं चाऽपि सर्वाऽस्त्रैर् अभि-संवृतम्[1] ॥१२॥
तस्य होमस्य कालोऽयं देवाऽऽयतनम् आ-स्थितः ।
जुहोत्य् अग्निं समाधि-स्थो रौद्र-मन्त्रैर्[2] महा-यशाः ॥१३॥
तस्य यावत् तु तत् कर्म न[3] सिद्ध्यति[3] दुर्-आत्मनः ।
तस्य[4] तावत् त्वया राम[4] विघ्नः कार्यो बलीयसः ॥१४॥
अ-वध्यः सम्-अरे तस्मिन् कृते कर्मणि रावणः[5] ।
चारैर् मम समा-ख्यातं यत्राऽसौ[6] परि-वर्तते[6] ॥१५॥
वि-भीषणस्य तद् वाक्यम् अति-घोरं भयाऽऽवहम् ।
श्रुत्वा रामो महा-तेजाः स्व-बलं[7] चाऽभिवीऽऽक्ष्य[7] च ॥१६॥
आ-ज्ञापयामास तदा विघ्नाऽर्थं[8] दश यूथ-पान्[8] ।
माल्य-वन्तं सु-षेणं च गवाऽक्षं गवयं तथा ॥[9]१७॥
अङ्ग-दं च हनू-मन्तं शर-भं गन्ध-मादनम् ।
ऋक्ष-सेना-पतिं चैव नीलं चाऽपि[10] महा-बलम् ॥१८[10]॥
लब्ध्व् आज्ञास् ते महा-वीर्या यूथ-पाः कृत-निश्चयाः ।
उत्-तस्थुस् ते[11] बलैः[12] सार्धं गर्जन्त इव तोय-दाः ॥१९॥
ते शिला-पादप-धरा महा-काया महा-बलाः ।
गर्जन्तो रेजिरे[13] सर्वे जङ्गमा इव पर्वताः ॥२०॥
क्षणात् सम्प्राऽऽप्य नगरीं लङ्कां रावण-पालिताम् ।
प्राकारम् अभि[14] चाऽऽप्लुत्य[14] विविशुस् ते प्लवं-गमाः ॥२१॥
ददृशुर् देवताऽऽगारे रावणं रक्षि-रक्षितम्[15] ।
स्रुव-हस्तं सम्-आसीनं प्राङ्-मुखं रक्त-वाससम् ॥२२॥
रक्तोष्णीष-धरं वीरं[16] पुरा[17] ज्वालित-पावकम्[17] ।

---

१. रा$_1$, ल$_1$, ल$_2$ ब अ प्र फ—अपिसं० । रा$_2$—अभिसंगतैः ॥ २. रा$_2$ फ—रौद्रैर्मन्त्रैर् ॥ ३. रा$_1$, ल$_1$, ल$_2$ ब अ—संसि० । ४. रा$_2$ फ—०या वीर । भ—तावत्त्वया महावीर ॥ ५. प्र रा$_2$ फ—राक्षसः । ६. रा$_1$, ल$_1$, ल$_2$ ब अ प्र—यत्र संपरि० ॥ ७. भ—सुग्रीवमभि० ॥ ८. रा$_1$, ल$_1$, ल$_2$ ब अ प्र—विघ्नंकरभयंकरान् । भ—विघ्नं कुरु भयंकरं । ९. रा$_2$ फ—वर्जं—सुषेणं च गवाक्षं च गवयं च महाबलम् ॥ १०. रा$_1$ ल$_1$, ल$_2$ ब अ—चैव । ११. प्र—नास्ति ॥ १२. भ—हरिभिः ॥ १३. भ—भेजिरे ॥ १४. रा$_2$ फ—अथ चोत्पत्य ॥ १५. रा$_2$ फ—बलरक्षितं ॥ १६. रा$_2$ फ—देवं । १७. रा$_2$ फ—पुरोज्ज्व० । रा$_1$, ल$_1$, ल$_2$ ब प्र—अत आरभ्य २४-शश्लोकस्य प्रथमपादं यावन्नास्ति ।

विद्युद्-भास्वर-संयुक्तं सन्ध्यायाम् इव तोय-दम् ॥२३[1]॥
तं बाहु-पादप-धरं किरीटोच्छ्रित-शृङ्गिणम्[2] ।
हार-निर्झर-तोयाऽऽढ्यं महा-वदन-कन्दरम् ।
वासो-मनःशिल-धरं गिरिं नीलम् इव स्थितम् ॥[3]२४[3]॥
दृष्ट्वा तस्याऽद्भुतं[4] कर्म[4] वानराः कृत-निश्चयाः ।
हनू-मन्तं पुरस्-कृत्य सर्वे युद्धाय तस्थिरे ॥२५॥
राक्षसाश् च[5] महा-वीर्याः प्राऽऽसाऽसिपरिघाऽऽयुधाः ।
दंशितास्[6] तस्थिरे सर्वे युद्धायाऽमित-विक्रमाः ॥२६[7]॥
ते बलेऽन्योऽन्यम्[8] आ-साद्य रणे[9] वानर-रक्षसाम्[10] ।
चक्राते क्रन्दनं घोरम् अद्भुतं लोम-हर्षणम्[11] ॥२७॥
पाद-पैः शैल-शृङ्गैश् च शिलाभिर् दशनैर् नखैः ।
वानरा राक्षसाञ् जघ्नुस् तलैर् मुष्टिभिर् एव च ॥२८[7]॥
राक्षसाः क्रोध-रक्ताऽक्षास् तथा वानरपुङ्गवान् ।
नाराचैर् बिभिदुस् तीक्ष्णैश् चिच्छिदुश् च महाऽसिभिः ॥२९॥
ते छिन्न-भिन्न-सर्वाऽङ्गा[12] वानरास् त्यक्त-जीविताः ।
नि-पेतुर् भू-तले भिन्ना[13] केचिद्[14] रुधिर-कर्दमे[15] ॥३०॥
रक्षांसि च तथा पेतुर् वानरैर् भीम-विक्रमैः ।
चूर्णिता वि-विधैः[16] शैलैः[16] पाद-पैर् मुष्टिभिस् तथा[17] ॥३१॥
दारिताश् च नखैस् तीक्ष्णैर्[18] दन्तैर् अपि सु-दारुणैः ।
तत् प्र-वृत्तं महद् युद्धं कबन्ध-शत-सङ्कुलम् ॥३२॥
शूराणां हर्ष-जननं भीरूणां भय-वर्धनम्[19] ।[20]

१. अ–नास्ति ॥ २. रा$_2$ फ–॰तभूषणं । ३. रा$_1$ ल$_1$ ल$_2$ ब प्र–वासो मनःशिलाघोरं रौद्रं रौद्रपराक्रमम् । रा$_2$–नास्ति । अतः परमधिकः पाठः—फ–स्रवंतमद्भुताकारं रुद्रं रौद्रपराक्रमम् ॥ ४. भ–तमद्भुताकारं ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब प्र–तु । ६. रा$_1$ ल$_1$ ल$_2$ ब प्र–दंसितास् । ७. अ–नास्ति ॥ ८. भ–च तेभ्यो॰ । ९. रा$_2$–घोरे । १०. रा$_1$ ल$_1$ ल$_2$ ब प्र–॰राक्षसे । भ–॰राक्षसाः । ११. रा$_2$ फ–रोम॰ ॥ १२. रा$_2$ फ–वर्ज—छिन्ना भि॰ । १३. ब भ–भग्ना । १४. भ–बमंतो । १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–॰रमुद्वमन् । भ–रं बहु ॥ १६. रा$_2$ फ–भिन्नेषु–निशितैः शैलैः । भ–॰धैः शूलैः । १७. रा$_1$–तदा ॥ १८. रा$_2$ फ–भिन्नेषु–चैव ॥ १९. रा$_2$ फ–च भयावहं । २०. अतः परमधिकः पाठः–ल$_1$ ल$_2$ ब अ प्र–युद्धं पौरुषशिष्याणां निष्कर्षार्थं मनस्विनाम् । यशःपताकहर्षाणां स्वर्गे द्वारमपावृतम् ॥

हर्षणं सुर-नारीणां सर्व-दुःख-विमोक्षणम्[1] ॥३३[2]॥
तस्मिन् युद्धे महा-घोरे रक्षो-वानर-संक्षये ।
प्राऽवर्तत नदी घोरा शोणितोदक-वाहिनी ॥[3]३४॥
शूर-प्रमोद-जननी भीरूणां भय-वर्धिनी ।
क्रव्याऽदाऽऽनन्द-जननी गृध्रकङ्कोत्सवा[4] तदा[4] ॥३५॥
दुर्-गमा ह्य् अल्प-सत्त्वानां सेव्या तेजस्विनां तथा ।
उत्-तेरुस् तां नदीं सर्वे यूथ-पास् ते महौजसः ॥३६[5]॥
दृष्ट्वाऽपि[6] स्व-बलं[6] भग्नं हत-वीरं[7] गत-प्रभम् ।[8]
राक्षसेन्द्रो न चुक्रोध जुहावाऽग्निं समा-हितः ॥३७॥
वानरैस् तद् बलं भग्नं[7] दृष्ट्वा संहृष्ट-मानसाः ।
अङ्गद-प्रमुखाः सर्वे विविशुर् देवताऽऽलयम् ॥३८॥
आ-स्फोटयामास तदा समीपे तस्य रक्षसः ।
हनू-मान् वाक्यम् एतच् च स-रोषं[9] प्राऽऽह रावणम्[10] ॥३९॥
किम् आस्सेऽद्य[11] नयं[12] त्यज्य[12] शूरस् त्वं राक्षसेश्वर[13] ।
न हि[14] सत्त्व-वताम्[14] एवं चरितं तिष्ठसे[15] यथा ॥[16]४०॥
क्व त(?त्व)न् नयः क्व शान्तिस् ते सा सिद्धिः क्व च रावण ।[17]
न त्वं(?त्व् अ)धर्म-कृतं(?तां) कर्म तादृशं[18] धर्मम्[18] आप्नुयाः(?यात्) ॥४१[19]॥

---

१. रा$_1$, ल$_1$, ल$_2$ ब अ प्र—०दुष्टवि० । २. भ—नास्ति ॥ ३. अतः परमधिकः पाठः—रा$_2$ फ भ—नानापताकासंवृत्ता द्विपदेह शिलातटा । विकोशासिचरन्मीना मांसक्लेदककर्दमा ॥ रथचक्रमहाग्राहा पाशपट्टिशभोगिनी । शीर्णाभरणरत्नाढ्या हतशूरमुखांबुजा ॥ चर्मकच्छपसंबाधा वस्त्रफेनावगाहिनी ॥ ४. भ—०रसर्वांभसा ॥ ५. अतः परमधिकः पाठः—रा$_2$ फ भ—नरा विच्छिन्नपाप्मानो नदीं वैतरणीमिव । राक्षसा हतभूयिष्ठा विरथा हतचेतसः ॥ त्यक्तसंभ्रमसत्त्वास्ते भेजिरे सर्वतो दिशः ॥ ६. रा$_1$, ल$_1$, ल$_2$ ब अ—वानराश्च बलं । रा$_2$—०पि सबलं । ७. ब—नास्ति । ८. फ—अत आरभ्य ५४—शश्लोकपूर्वार्धं यावन्नास्ति ॥ ९. भ—०षः । १०. रा$_2$—राक्षसं ॥ ११. रा$_1$—आसने । १२. भ—भयं त्यक्त्वा । १३. रा$_2$ भ—०साधम । १४. रा$_1$, ल$_1$, ल$_2$ ब अ प्र—निहतं निहतां । १५. भ—वर्ज—तिष्ठते । १६. रा$_2$—अत आरभ्य ४३—शश्लोकस्य द्वितीयपादं यावन्नास्ति ॥ १७. भ—क्व ते रूपं क्व सोऽसिस्ते सा सिद्धिः क्वाथ रावण । १८. भ—यादृशीं सिद्धिं । १९. अतः परमधिकः पाठः—भ—त्वं रावण न शूरो वा न योद्धा मेऽसि सम्मतः ॥

न चाऽप्य् औशनसं (?सो) मन्त्रं (?न्त्रश्) चेष्टतां[1] राक्षसाऽधम ।
राम-वीर्य-विषं यस्य चरत्य् अङ्गेषु साऽऽयुधम्[2] ॥४२॥
नैव ते वर-दानानि न तथा तव[3] शिक्षितम्[3] ।
भवेद्[4] यथा न[4] लङ्केश नैव[5] सिद्धिर् नराऽन्तक[6] ॥४३॥
उत्-तिष्ठोत्-तिष्ठ युध्यस्व न मे जीवन् वि-मोक्ष्यसे[7] ।
अ-गृहीताऽऽयुधं भीमं न हन्मि त्वद्-विधं रणे ॥४४॥
हनू-मतैवम् उक्तोऽपि रथम् इच्छन् हुताऽशनात् ।
जुहावाऽऽहुतिम् एवाऽथ न चुकोप कथं-चन ॥४५॥
ततो वायु-सुतः श्री-मान् सर्वान् वानर-यूथपान् ।
उवाच वाक्यं[8] काल-ज्ञः शृण्वतस्[9] तस्य रक्षसः ॥४६॥
यथा मन्दोदरीं शीघ्रम् आ-नयध्वं प्लवं-गमाः ।
नाऽन्यथा शक्यते कर्तुं मन्युर् अस्य दुर्-आत्मनः ॥४७॥
वि-जानात्व् एष पापाऽऽत्मा यत् फलं पाप-कर्मणाम्[10] ।
यद् अनेनाऽवशा[11] सीता जन-स्थानाद् धृता बलात् ॥४८॥
न ह्य् अ-धर्मोऽत्र युष्माकं माऽभूत् सिद्धिर्[12](?काचिद्)विच(?चा)क्ष(?र)णा[12]
न हि दुष्यति लोकेऽस्मिन् पापे पापं समा-चरन् ॥४९॥
इति तस्य वचः श्रुत्वा वालि-पुत्रोऽब्रवीद् इदम् ।
आ-नयेयम् अहं यूयं सर्वे तिष्ठत वानराः ॥५०॥
भार्याम् अस्य प्रियां त्व् अद्य[13] पश्यतां वः प्लवं-गमाः ।
भवन्तोऽस्याऽग्नि-कार्यं[14] वै[14] वि-ध्वंसयत मा चिरम् ॥५१॥
इत्य् उक्त्वा प्र-विवेशाऽथ रावणस्य नि-वेशनम् ।
अङ्ग-दः प्लवग-श्रेष्ठः सिंहो गिरि-गुहाम् इव ॥५२॥
ततोऽन्तःपुर-मध्यात् तां केशेष्व् आ-दाय वीर्य-वान् ।
निर्-जगाम मृगी-मध्याद् व्याघ्रो मृग-वधूम् इव ॥५३॥

---

१. प्र—चेष्टितं । २. भ—तेऽयुध ॥ ३. भ—रक्षिता शिवः । ४. भ—न भवाम्यथा । ५. भ—न ते । ६. भ—न ते जयः ॥ ७. ल१ ल२ ब रा२—०क्षसे ॥ ८. भ—वाचं । ९. रा१ ल१ ल२ ब अ प्र—शृणुतस् ॥ १०. भ—०र्मणः । ११. रा१ ल१ ल२ ब अ प्र—०न च सा ॥ १२. रा१ ल१ ल२ ब अ प्र—कश्चिद्विचक्षणः । भ—०णाः ॥ १३. रा१ ल१ ल२ ब अ प्र—अस्य । १४. रा१ ल१ ल२ ब अ प्र—हतवंतोऽग्निकार्यं वो । भु—०र्यं हिं ॥

तां विकीर्ण-शिरो-मालां प्रभ्रष्टोत्तरवाससम् ।
आ-नीय रावणस्याऽन्तम् इदम् आहाऽङ्ग-दो वचः ॥५४॥
इमां मन्दोदरीं पार्श्वान् नयामि तव पश्यतः ।
नहि मुञ्चाम्य् अहं शूर मैथिलीं त्वं यथा पुरा ॥५५॥
या[1] ते[1] शक्तिर् बलं वीर्यं तेन तिष्ठ[2] त्वम् अग्र-त[2]ः ।
कृत्वा शिरसि ते पादं नयाम्य् एनां प्रियां तव ॥५६॥
तच् छ्रुत्वा रावणः क्रुद्धो दृष्ट्वा नीतां प्रियां तदा ।
उत्था (दु-स्था) य सहसा क्रोधात् त्यक्त्वा होमं दशाऽऽननः ॥[3]५७॥
अङ्ग-दं मुष्टिना जघ्ने मूर्च्छितः स पपात ह ।
ताम् आ-दाय भुजाभ्यां तु ताडयित्वा[4] च[4] रावणम् ।[5]
लांगूलेनाऽञ्जना-पुत्रस् तं नि-हत्योत्-पपात ह ॥५८॥
तथा[6] तस्योदकं स्रुच्यं[7] दर्भान् पावकम् एव च ।
बलि-कर्म च वि-ध्वस्य स्वम्[8] उत्-पेतुर्[8] महा-जवाः[9] ॥५९॥
ततो मन्दोदरी दीना रावणं वाक्यम् अब्रवीत् ।
किं न पश्यसि मां राजन्न् अ-नाथां त्वयि जीवति ॥६०॥
वानरैः परि-क्लिश्यन्तीम् इतश् चेतश् च धावतीम् ।
पतितां च निर्-आशां च भार्यां[10] दृष्ट्वाऽथ रक्षसः[10] ॥६१[11]॥

---

१. भ–यथा । २. रा₂ फ–तिष्ठस्व मेग्रतः ॥ ३. रा₂ फ–नास्ति ॥ ४. रा₂ फ–॰त्वा तु । भ–ताडयामास । ५. प्र–नास्ति ॥ ६. भ–तदा । ७. रा₂ फ म–हव्यं । ८. भ–समुत्॰ । ९. रा₂ फ–प्लवंगमाः ॥ १०. भ-वर्जं–नास्ति ॥ ११. अतः परमधिकः पाठः—रा₂ फ–शोकातुरपरिभ्रष्टां रूढामिव जले लताम् । विज्ञानबलसंपन्नैः पुरुषैर्लोकवर्तिभिः । पुत्रदारसुखार्थं हि जीवितव्यमिति स्थितिः ॥ त्वं पुनः पुत्रदारस्य सुहृद्बन्धुजनस्य च ॥ कृत्वा विनाशं लब्धाशीः किं सुखं तद् ब्रवीहि मे ॥ न श्रुतं धर्मशीलस्य भ्रातुर्वाक्यं त्वया हितम् । मद्वचनं न कृतं राजन्न श्रुतं सुहृदां तथा ॥ अर्थशास्त्रविदां सम्यक्कृतं न च हितैषिणाम् । शिष्येणौशनसः साक्षात्कथमात्मा निवेशितः । कथं लोकापवादात्ते भयाल्लज्जा न विद्यते । अपवादभयात्संतस्त्यजंति सुखमागतम् । धर्ममूलं सुखं सर्वं यशो धर्मात्प्रवर्तते । अयशो यस्य लोकेऽस्मिन् यं सञ्चरति शाश्वतम् । तस्य लोकावुभौ नष्टौ सुखं चैव न कुत्रचित् ॥ जहि राक्षसराजेंद्र शत्रूनुत्तिष्ठ मा चिरम् । श्रेयो हि मरणं पुंसां नापवादान्मनस्विनाम् ॥ इति तस्या वचः श्रुत्वा करुणं परिदेवितम् । दृष्ट्वा तस्याः परामर्शं रावणः क्रोधमूर्छितः । साभिमानैर्वचोभिस्तां सांत्वयन्निदमब्रवीत् ॥

तस्य[1] निष्-क्रममाणस्य[1] दग्धु-कामस्य रोदसी ।
रूपम् आसीन् महा-घोरम् अर्कस्येव[2] युग-क्षये ।।६२।।
निमित्तानि च तत्राऽऽसन् भय-शंसीनि सर्व-तः[3] ।[4]
प्रति-लोमं[5] ववौ वायुर् मन्द-रश्मिश् च भास्-करः ।।[6]६३।।
सागरश् चुक्षुभे चैव चकम्पे च वसुं-धरा ।
जानुभिः पेतुर् अश्वाश् च मुमुचुर् बाष्पम् एव च ।।६४।।
तान् उत्-पातान् अ-चिन्त्यैव रावणः क्रोध-मूर्च्छितः ।[7]
शरान्[8] आ-दाय वेगेन[8] रण-भूमिं विवेश ह[9] ।।६५।।

इत्यार्षे रामायणे युद्ध-काण्डे[10] मन्दोदरी-केश-ग्रहणं[11] नाम

द्व्यशीतितमः सर्गः ॥ ८२ ॥

[वं-८६]= [त्र्यशीतितमः सर्गः] =[दा-१०३]

राघवोऽपि च तं दृष्ट्वा क्रोध-पर्याकुलेक्षणः[12] ।[13] [N

निर्धापयन्निव परैर्दह्यमानां वनस्थलीम् । किं रोदिषि शुभे दीना मयि जीवति मानिनि ॥ न मे कश्चित्समो युद्धे त्रिषु लोकेषु भामिनि । सेंद्राः सुरगणाः सर्वे तिष्ठन्ति हि वशे मम ॥ किमल्पसारैः शक्योऽहं जेतुं मानुषवानरैः । मयाद्य चूर्णितं तेषां बलं सर्वं वनौकसाम् ॥ न तु शक्ष्यामि तन्वंगि न्यक्कारं सोढुमीदृशम् । चिरप्रमादमलिनां विद्यां गुरुकुलादिव ॥ तीव्रक्रोधस्य पश्यामि संग्रामे युध्यतः परैः । न मे दृष्टिपथं गच्छेन्मम वीर्यं दुरासदम् ॥ मा भैः शत्रुशिरांस्यद्य निकृत्याहं यशस्विनि । मन्दोदरि करिष्यामि तवाद्याश्रुप्रमार्जनम् ॥ इति तां शोकसंतप्तां शमयित्वा तु रावणः । रथमारुह्य वेगेन निर्जगाम रणं प्रति ॥ संक्रुद्धः कवची खड्गी शरी धन्वी तथैव च ।

१. रा, ल, ल, ब अ प्र म—नास्ति । भ-कोपेन परिपूर्णस्य । २. रा, फ—कालस्येव ॥ ३. भ—रक्षसः । ४. रा, फ भ—वर्जं—नास्ति । ५. भ—०लोमो । ६. रा, फ भ—वर्जं—तेऽपि मंदोदरीं त्यक्त्वा स्वमगुस्तत्र वानराः ॥ ७. अतः परमधिकः पाठः—भ—रथस्थः सोऽब्रवीच्च शीघ्रं रणार्थं लोकरावणः । ८. रा, फ—सशरं धनुरादाय । ९. भ—च ॥ १०. प्र भ—लंकाकांडे । ११. म—रावणप्रधर्षणो ॥ १२. रा,—०णम् । १३. रा, फ—नास्ति ।

N] [1]रावणस्य[2] शरान् घोरान् वि-ससर्ज चमू-मुखे ॥१[3] ॥[१उ
दश-ग्रीवो रथ-स्थस्[4] तु[4] रामं वज्रोपमैः शरैः ।
N] आ-जघान[5] महा-घोरो[5] धाराभिर् इव तोय-दः ॥२[6] ॥[३
ततः[7] पावक-संकाशैः शरैः काञ्चन-भूषणैः[8] ।
N] अभ्य्-अवर्षद्[9] रणे रामो दश-ग्रीवं समा-हितः ॥[10]३ ॥[४
भूमौ[11] स्थितस्य[11] रामस्य रथ-स्थस्य च रक्षसः ।
६] न समं युद्धम् इत्य् आहुर् देव-गन्धर्व-दानवाः ॥[12]४ ॥[५

---

१. इतः पूर्वमधिकः पाठः—रा₂ फ–ततः संस्मृत्य पुत्रं तु शक्रजेतारमाहवे । कुम्भकर्णं महावीर्यं भ्रातरं विपुलौजसम् ॥ प्रहस्तादीनमात्यांश्च सर्वान्संस्मृत्य पातितान् । राजाशां जीविताशां च त्यक्तवैश्वर्यस्पृहां तथा । बन्धुशोकसमाविष्टः क्रोधात्मा क्रोधमाहरन् ॥ यथा मध्यगतो भानुर्दुर्निरीक्ष्यो जनस्य तु । तथा क्रोधतनुर्दीप्तो रावणः स बभूव ह ॥ आत्मनात्मानमुद्यम्य रावणः क्रोधमूर्छितः । संग्रामाभिमुखो राममब्रवीत् परुषं वचः ॥ राम त्वं तु समाश्वस्तः समाश्वस्तस्तथाप्यहम् । स्थितस्त्वया समं योद्धुं तिष्ठेदानीं स्थिरो भव ॥ विरथश्चास्मि संवृत्तस्त्वत्सकाशादरिंदम । क्रमेण परिनष्टाश्वस्तेनाहमपयातवान् ॥ नाहं बिभ्ये सुराणां हि समस्तानामपि प्रभो । किं पुनर्वानराणां तु येषामाश्रयिता भवान् ॥ यत्ते वीर्यं बलं तेजः सर्वशस्त्रेषु या प्रभा । तद्दर्शय ममाद्य त्वं पुरुषो भव राघव ॥ काकुत्स्थोपि महातेजाः श्रुत्वा रावणभाषितम् । न किंचिदुक्त्वा धर्मात्मा तस्थौ संग्राममूर्धनि ॥ लक्ष्मणस्य वचः श्रुत्वा स व्रीडितमनास्तदा । २. भ–रावणाय । ३. अतः परमधिकः पाठः—रा फ–विवृत्य नयने धीरो रावणो लोकरावणः । अभ्यद्रवत काकुत्स्थं स्वर्भानुरिव भास्करम् ॥ म भ–दशग्रीवस्त्वपक्रम्य मायया राक्षसर्षभः । कल्पयामास रुचिरं रथं पावकसन्निभम् ॥ युक्तं मनुष्यभयदैर्हयैः परमशीघ्रगैः । सर्वशस्त्रायुधोपेतं कालाग्निसमदर्शनम् ॥ मनसस्तुल्यगं दिव्यं सुचक्रं सुवरूथिनम् । प्राज्ञसूतयुतम् श्रीमत् सर्वगं हेमभूषितम् ॥ ४. भ–तमारुह्य । ५. म–अभ्यवर्षत्पुनर्भीमो । भ–०घोरैः । ६. रा₁ ल₁ ल₂ ब अ प्र–नास्ति । अतः परमधिकः पाठः—म–राघवाय शरान्घोरान्विससर्ज महाबलः । दशग्रीवो रणश्लाघी प्रमुखे हरियूथपान् ॥ ७ रा₂ फ–अथ । ८. भ–कनकभू० । ९. भ–अभ्यद्रवद् । १०. म भ–वर्जं—नास्ति ॥ ११. रा₂ फ–भूमिस्थस्य च । १२. अतः परमधिकः पाठः—रा₂ फ–ततो देववरः श्रीमाञ्छ्रुत्वा तेषां वचोऽर्थवत् । आहूय मातलिं शक्रो वचनं चेदमब्रवीत् ॥ रथेन मम भूमिस्थं शीघ्रं याहि रघूत्तमम् । रामाय मातले यन्तः कुरु देवहितं महत् ॥ इत्युक्तो देवराजेन मातलिः शक्रसारथिः । प्रणम्य शिरसा देवं ततो वचनमब्रवीत् ॥ ततो हयांश्च संयोज्य हरिभिः स्यंदनोत्तमम् । स्वर्गाज्जयार्थं रामाय परिचक्राम मातलिः ॥ भ–देवतानां वचः श्रुत्वा शतक्रतुरनंतरम् । प्रेषयामास रामाय रथं मातलिसारथिम् ॥

ततो रत्न-विचित्राऽङ्गः[1] किङ्किणी-जाल-भूषितः[2] ।
८] तरुणाऽऽदित्य-सङ्काशो वैडूर्य-मय-कूबरः[3] ॥५ ॥[१०
सद्-अश्वैः काञ्चनाऽऽपीडैर् युक्तः[4] श्वेत-प्रकीर्णकैः[5] ।
९] हरिभिः सूर्य-सङ्काशैर्[3] हेम-जाल-विभूषितैः ॥६ ॥[११
रुक्म-दण्ड-ध्वजः[6] श्रीमान् देवराज-रथोत्तमः[7] ।[8]
१०] अभ्य्-अवर्तत काकुत्स्थम् अव-तीर्य त्रि-विष्टपात् ॥[9]७ ॥[१२
अब्रवीच् च तदा[10] रामं स-प्रतोदो रथे स्थितः ।[11]
१९] प्राऽञ्जलिर् मातलिर् वाक्यं सहस्राऽक्षस्य सारथिः ॥८ ॥[१३॥
सहस्राऽक्षेण काकुत्स्थ रथोऽयं वि-जयाय वै[12] ।
२०] प्रेषितस्[13] ते[13] महेन्द्रेण श्री-मान्[14] छत्रु-निबर्हण: ॥९ ॥[१४
इदम् ऐन्द्रं महच् चापं कवचं चाऽपि[15] सु-प्रभम्[15] ।
२१] शराश् चाऽऽदित्य-सङ्काशाः[16] शक्त्यश् च वि-मलाः शिताः[16] ॥१०॥[१५
आ-रुह्यैनं[17] रथं वीर[18] राक्षसं जहि[18] रावणम् ।

---

१. रा$_2$ फ म—कांचनचि० । भ—कनकचि० । २. रा$_2$ फ—०णीकृतभूषणः । भ—०लसंवृतः । ३. फ—नास्ति ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—युक्तैः । ५. रा$_2$—श्वेतैः प्र० ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—०ध्वरः । भ—रुक्मवेणुध्वजः । ७. ल$_1$—०थो स्थितः । रा$_2$ फ—०थो महान् । भ—०थो वरः । ८. अतः परमधिकः पाठः—रा$_2$ फ—तं रथं समुपादाय मातलिः शक्रसारथिः । ९. ल$_1$—नास्ति । अतः परमधिकः पाठः—भ—रामलक्ष्मणसुग्रीवा हनूमान् सविभीषणः । अवतीर्णं रथं दृष्ट्वा सर्वे विस्मयमागताः ॥ विस्मितौ रामसुग्रीवौ लक्ष्मणः सविभीषणः । अंगदो जांबवांश्चैव केशरी पनसस्तथा ॥ मंत्रयंति स्म तेऽन्योऽन्यं कारणं हि भविष्यति । उपायेनेदृशेनायं छलितुं नूनमिच्छति ॥ बहुमायाधरः क्रूरो रावणो राक्षसाधिपः । रामस्य वचनं श्रुत्वा सुग्रीवो वाक्यमब्रवीत् ॥ वयं सर्वे परीक्षामो रथमश्वं ससारथिम् । अश्वान् संस्थितान्भूमौ युद्धसज्जान्मनोजवान् ॥ विभीषणो महाप्राज्ञो दृष्ट्वा वचनमब्रवीत् । सुविश्रब्धं रथं वीर आरोह त्वमशंकितः ॥ अहं सर्वां विजानामि मायां वै रक्षसामिह । अभिगम्य च काकुत्स्थं दशग्रीवस्य पश्यतः ॥ १०. रा$_1$ ल$_2$ ब अ प्र—तथा । रा$_2$ फ—ततो । ११. ल—नास्ति ॥ १२. ल$_1$ ल—च । रा फ—ते । १३. रा$_2$ फ म—दृत्तस्तव । १४. म—शीघ्रं ॥ १५. रा$_2$ फ भ—चाग्निसन्निभं । १६. म—०काशाः शक्तिश्च विपुलाः शिलाः ॥ १७. रा फ म भ—आरुह्येमं । १८. म—त्रुटितः पाठः । भ—राम राक्ष० ।

मया सारथिना युक्तं[1] महेन्द्र इव दानवान् ॥११[2]॥[१६
२३पू] इत्य् उक्तः स.परि-क्रम्य जयाय[3] रथम् अस्त्र-वित्[3] ।[4]
२४उ] आ-रुरोह रथं रामो लोकं[5] लक्ष्म्या वि-राजयन्[6] ॥१२[6]॥[१७ —
ततोऽभवन्[7] महा-युद्धं[7] द्वैरथं रोम-हर्षणम्[8] ।
२७] रामस्य च महा-बाहोर् बलिनो[9] रावणस्य च[9] ॥१३॥ [१८
गान्धर्वेण तु गान्धर्वं दैवं दैवेन राघवः ।
२८] अस्त्रं राक्षस-राजस्य जघान परमाऽस्त्र-वित् ॥१४॥ [१९
अस्त्र-युद्धे च परमे रावणो राक्षसेश्वरः ।[10]
२९] ससर्ज परम-क्रुद्धः पुनर् एव स[11] राघवे[11] ॥१५॥ [२०
ते रावण-धनुर्-मुक्ताः शराः काञ्चन-भूषणाः[12] ।
३०] अभ्य्-अवर्तन्त काकुत्स्थं सर्पा[13] भूत्वा महा-विषाः ॥१६॥ [२१
ते सर्प-वदना[14] घोरा वमन्तो ज्वलनं मुखैः ।
३१] रामम् एवाऽभ्य्-अवर्तन्त[15] व्यादिताऽऽस्या भयाऽऽवहाः[16] ।१७[२२

---

१. रा₂ फ—राजन् । भ—राम । २. अतः परमधिकः पाठः—भ—एवमुक्तस्तदा तेन दृष्ट्वा दिव्यं च तं रथम् । विभीषणमथोवाच राघवो बुद्धिसम्मतम् ॥ सुग्रीवं चैव दुर्धर्षं लक्ष्मणं च महारथम् । हनूमंतं सुषेणं च प्रधानांश्च हरींस्तथा ॥ परीक्षध्वं रथं सर्वे रक्षसा निर्मितं भवेत् । परीक्षितं यथातत्त्वमारोक्ष्यामि ततो रथम् ॥ तस्य तद्वचनं श्रुत्वा वानराः सविभीषणाः । परीक्ष्य सुचिरं बुद्ध्या रथं तस्य न्यवेदयन् ॥ इन्द्रदत्तमिमं वीर आरोह त्वमशंकितः । रावणं च दुराधर्षं राक्षसं जहि राघव ॥ भ—वर्जं—विभीषणमतेनैव परीक्ष्य च यथाबलम् । रा₂ फ—यथाबलं यथावीर्यं रथस्थो रथिनां वरः । हन त्वं राक्षसान्राजन् महेंद्र इव शम्बरम् ॥ ३. रा₂ फ भ—रथं तमभिवाद्य च । ४. अतः परमधिकः पाठः—भ—प्रदक्षिणं तथा कृत्वा मातलिं वाजिनस्तथा । ५. भ—विभीषणपरीक्षितं । ६. रा₂ फ—अतः परं सर्गसमाप्तिः—इत्यार्षे रामायणे युद्धकांडे महेन्द्ररथावतरणो नाम सर्गः । अधिकः पाठः—भ—कवचं च समाबद्ध्य माहेंद्रं राघवस्तदा । श्रियाभिरुरुचे रामो लोकपालाधिराजवत् ॥ ते तु दिव्या हरिहया जानुभ्यामगमन्महीम् । सन्नियाम्य तु तानश्वान् मातलिर्वरसारथिः । मनसादेशयामास यथेप्सितमरिंदमः ॥ ७. रा, ल, ल₂ ब अ प्र म—तद्बभूवाद्भुतं युद्धं । भ—अथाभूदद्भुतं । ८. म भ—लोम० । ९. रा₂—०नो राक्षसस्य च । भ—रावणस्य च रक्षसः ॥ १०. भ—अस्त्रं तत्परमं घोरं राक्षसो राक्षसाधिपः । ११. म—च रा । भ—निशाचरः ॥ १२. रा₂ भ—०भूषिताः । १३. प्र—शरा ॥ १४. भ—दीप्त० । १५. भ—एवाभ्यधावंत । १६. म—महाभयाः ॥

तैर् वासुकि-सम-स्पर्शैर् दीप्त-भोगैर्[1] महा-विषैः ।
३२] दिशश् च वि-दिशश् चैव समन्ताद् आ-वृता बभुः ॥[2]१८॥[२३
रामः[3] सं-पततो दृष्ट्वा पन्न-गांस् तान्[3] सहस्र-शः ।
३३] सौपर्णाऽस्त्रं[4] तदा[4] घोरं पुनः[5] प्राऽवर्तयद् रणे[5] ॥१९॥[२४
रामेण तु शरा मुक्ता रुक्म-पुङ्खाः शिला-शिताः ।[6]
३४] सु-पर्णाः काञ्चना भूत्वा वि-रेजुः[7] सर्प-शत्रवः ॥२०॥[२५
ते तान् सर्वाञ् छराञ् जघ्नुः[8] सर्प-भूतान्[9] महा-विषान् ।
N] सुपर्ण-रूपा रामस्य वि-शिखाः काम-चारिणः[10] ॥२१॥[२६
अस्त्रे प्रति-हते क्रुद्धो[11] रावणो राक्षसेश्वरः[12] ।
३५] अभ्य्-अवर्षत् तदा रामं घोराभिः शर-वृष्टिभिः ॥२२॥[२७
ततः शर-सहस्रेण रामम् अ-क्लिष्टकारिणम् ।[13]
३६] अर्दयित्वा[14] शरौघेण मातलिं प्रत्य्-अविध्यत ॥[15]२३॥[२८
पातयित्वा रथोपस्थे रामम् अ-क्लिष्टकारिणम् ।[16]
३७] ऐन्द्रान् अश्वान् अभ्य्-अहनद्[17] घोराभिः शर-वृष्टिभिः[17] ॥२४॥[२९
वि-षेदुर्[18] देव-गन्धर्वाश् चारणाः[19] पितरस् तथा[19] ।
३८] रामम् आर्तं तदा[20] दृष्ट्वा सिद्धाश्[21] च परमर्षयः[21] ॥२५॥ [३०उ
व्यथिता वानरेन्द्राश् च व्यथितश्[22] च वि-भीषणः[22] ।
३९] रामं चन्द्र-समं दृष्ट्वा ग्रस्तं रावण-राहुणा ॥[23]२६॥[३१
प्राजापत्यं तु नक्ष-त्रं[24] रोहिणीं शशिनः प्रियाम्[25] ।
४०] समा-क्रम्य बुधस् तस्थे प्र-जानाम् अ-हिते रतः ॥२७॥[३२

---

१. भ–दीप्तजिह्वैर् । २. भ–दिशश्च संवृताः सर्वाः प्रदिशश्च समावृताः ॥ ३. भ–तान् दृष्ट्वा पन्नगान् रामः पततोऽथ । ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र म–०र्णमस्त्रं तद् । ५. भ–प्रादुश्चक्रे भयानकं ॥ ६. भ–राघवेण ततो मुक्ता रुक्मपुंखाः शिखि-प्रभाः । ७. रा$_2$ फ म भ–विचेरुः । ८. रा ल$_1$ ल$_2$ ब अ प्र–भित्वा । ९. रा$_2$ फ म भ–सर्परूपान् । १०. प्र रा$_2$ फ म भ–कामरूपिणः ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–क्रूरे । १२. भ–०साधिपः ॥ १३. ब–अत आरभ्य २४-शश्लोकं यावन्नास्ति । १४. भ–पूरयित्वा । १५. रा$_1$ ल$_1$ ल$_2$ अ प्र–नास्ति ॥ १६. भ–सूदयित्वा रथोपस्थे रथकेतुं च कांचनं । रा$_1$ ल$_1$ ल$_2$ अ प्र–नास्ति । १७. भ–जघानाशु शरैरानतपर्वभिः ॥ १८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–विनेशुर् । भ–ऋषयो । १९. भ–णाश्च सवासवाः । २०. भ–तथा । २१. प्र–ग्रस्तं रावणराहुणा । म–तौ समेतौ जलदाविव ॥ २२. भ–बभूवुः सविभीषणाः । २३. म–अत आरभ्य सर्गान्तं यावन्नास्ति ॥ २४. टि. वैतु. पाप्र. = न-क्षत्रं-इति ॥ २५. रा, फ–प्रभां ॥

स-धूमः परिवृत्तोर्मिः[1] प्र-ज्वलन्न् इव सागरः[2] ।
४१] उत्-पपात तदा क्रुद्धः स्पृशन्न् इव दिवा-करम् ॥[3]२८॥[३३
शस्त्र-वर्णः[4] स-परुषो मन्द-रश्मिर् दिवा-करः ।[3]
४२] अदृश्यत[5] कबन्धाऽङ्कः सं-सक्तो धूम-केतुना ॥२९॥[३४
कोशलानां[6] तु न-क्षत्रं[6] ज्येष्ठाम्[7] इन्द्राऽग्नि-दैवतम् ।
४३] आ-क्रम्याऽङ्गारकस्[8] तस्थौ वि-शाखाम् अपि चाऽम्बरे ॥[9]३०॥[३५
दश-ग्रीवो विंश-भुजः प्रगृहीत-शराऽऽसनः ।[10]
४४] अदृश्यत तदाऽकम्पो[11] मैनाक इव पर्वतः ॥३१॥[३६
निर्-अस्यमानो रामस् तु दश-ग्रीवेण रक्षसा ।
४५] नैवाऽशक्नोत्[12] सं-धर्षयितुं[13] सायकान् रण-मूर्धनि ॥३२[14]॥[३७
स कृत्वा भ्रूकुटीं[15] वक्त्रे क्रोध-संरक्त-लोचनः[16] ।
४६] क्रोधं[17] चकार सु-भृशं[17] निर्-दहन्न् इव पावकः[18] ॥३३॥[३८
सुरपति-धनुर्-आकृतिं ललाटे
भय-जननीं भ्रूकुटीं[19] वि-तत्य[20] रामः[20] ।
हुत-वह इव सर्पिषाऽव-सिक्तो
N] द्विगुण-तरं बल-वांश्[21](?मा-)चकार वीरः[21]॥३४॥[N
स्व-तेजसा प्र-ज्वलितः परं-तपः
प्र-चक्रमे दर्शयितुं पराऽऽक्रमम् ।
नि-शम्य रामं[22] परमं व्यव-स्थितं[22]
N] परं[25] प्र-हर्षं परमर्षयो[23] गताः ॥३५॥[N

इत्यार्षे रामायणे युद्ध-काण्डे[24] द्वैरथ-युद्धं[25] नाम त्र्यशीतितमः सर्गः ॥८३॥

---

१. रा$_1$, ल$_1$, ल$_2$ ब अ–०त्तोऽग्निः । २. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–सागरं । ३. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–नास्ति ॥ ४. भ–प्रस्तवर्णः । ५. भ–प्राह० ॥ ६. भ–कौशल्याजन्मन० । ७. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–श्रेष्ठं । ८. भ–आहत्यांगा० । ९. रा$_2$–नास्ति ॥ १०. भ–विंशद्बाहुर्दशग्रीवो दशशीर्षो दशाननः । ११. प्र–०कंप्यो । भ–महातेजा ॥ १२. भ–भशक्नुवन् । १३. रा$_1$, ल$_1$, ल$_2$ ब अ–धर्षयितु । भ–वारयितुं । १४. अतः परमधिकः पाठः—भ–किंचिदागतसंत्रासस्तस्थौ तत्र रणाजिरे । आविध्यमानः काकुत्स्थस्तीव्राभिः शरवृष्टिभिः ॥ अभवत्स तदा रामो रोषरक्तांतलोचनः । प्रदहन्निव कोपेन युगांते पावको यथा ॥ १५. प्र रा$_2$ फ–भृकुटी । ब अ–भ्रु० । १६. भ–किंचिदारक्त० । १७. भ–जगाम सुमहाकोपं । १८. रा$_2$ फ भ–राक्षसः ॥ १९. प्र रा$_2$ फ–भृकुटीं । ब अ–भ्रु० । २०. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–विभज्यमानः । २१. रा$_1$, ल$_1$, ल$_2$ ब अ–भगवांश्च० । रा$_2$ फ–०वांश्चुकोप वीरः । भ–बलमादधत्सुघोरः ॥ २२. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–रामः परमास्थितः परं । २३. भ–वर्ज –हर्ष परं ते तु महर्षयो ॥ २४. ब प्र भ–लंकाकाण्डे । रा$_2$–युद्धपर्वणि । २५. भ–देवरथागमनं ॥

[1]तस्य क्रुद्धस्य वदनं दृष्ट्वा रामस्य धी-मतः ।
१] सर्व-भूतानि वि-त्रेसुः प्राऽकम्पत मही तदा[2] ॥१ ॥[१
सिंहशार्दूल-वान् शैलः स-सर्पो मलय-द्रुमः ।
२] बभूव चाऽपि[3] क्षुभितः[3] सम्-उद्र इव पर्वसु ॥२ ॥[२
खराश् च खर-निर्घोषा गगने परुषा घनाः ।
३] औत्पातिका[4] वि-नर्दन्तः[4] सम्-अन्तात् परि-चक्रमुः ॥३ ॥[३
रामं दृष्ट्वाऽथ[5] सं-रब्धम्[5] उत्-पातांश् च सु-दारुणान् ।
४] त्रस्तानि सर्व-भूतानि रावणं चाऽविशद्[6] भयम् ॥४ ॥[४
विमान-स्थास् ततो देवा गन्धर्वाः[7] स-महोरगाः[7] ।
५] तदा[8] दानव-दैत्याश् च गरुत्-मन्तश्[9] च खे-चराः ॥५ ॥[५
ददृशुस् ते ततो युद्धं लोक-संवर्तकं[10] स्थिरम्[10] ।
६] नाना-प्रहरणैर् भीमैः शूरयोः सम्प्र-वृद्धयोः ॥६[11]॥[६
ऊचुस् तदाऽसुराः सर्वे सुरैर् वि-ग्रहम् आ-गताः ।
७] प्रेक्षमाणा महा-भागा वाक्यं भक्त्या प्रहृष्ट-वत् ॥७[11] ॥[७
दश-ग्रीवं जयेत्य् आहुर्[12] अ-सुराः समव-स्थिताः ।
८] देवा रामम् अथोचुश् च जयस्वेति[13] पुनः पुनः ॥८ ॥[८
एतस्मिन्न् अन्तरे क्रुद्धो[14] राघवाय स रावणः ।
९] प्रहर्तु-कामो दुष्टाऽऽत्मा स्पृष्ट्वा[15] प्र-हरणं महत् ॥९ ॥[९
१०पू] वज्र-धारं[16] महा-नाभं[17] सर्व-शत्रु-निबर्हणम् ।
N] शैल-शृङ्ग-निभैः कूटैश् चितं[18] दृष्टिभयाऽऽवहम् ॥१०॥[१०
N] स-धूमम् इव तीक्ष्णाऽग्रं युगाऽन्ताऽग्निचयोपमम्[19] ।
१०उ] अन्-औपम्यम् अन्-आसाद्यं[20] कालेनाऽपि सु-दुःसहम्[21]॥११॥ [११

---

१. भ–नास्त्ययं सर्गः । २. रा₂ फ–तथा ॥ ३. रा₁ ल₁ ल₂ ब अ प्र–चाभिक्षु० । भ–चातिक्षु० ॥ ४. रा₂ फ भ–वर्जं—०तिकं निनादं च ॥ ५. प्र रा₂ फ–दृ/व । सुसं० । भ–च वीक्ष्य सं० । ६. भ–चागमद् ॥ ७. भ–सगंधर्वम० । ८. रा₂ फ–तथा । ९. रा₂ भ–वर्जं—गुरुमं० । भ–मरुत्वंतश् ॥ १०. भ–०तसंस्थितं । ११. भ–नास्ति ॥ १२. भ–ऊचुर् । १३. भ–त्वं जयेति ॥ १४. भ–कोपाद् । १५. रा₂ फ भ–स्पृशन् ॥ १६. ल₁–वज्रनाभं । १७. रा₂–०नादं । १८. भ–वर्जं—चित्रं ॥ १९. भ–०ग्निसमप्रभं । २०. रा₁ ल₁ ल₂ ब अ प्र–अनासद्यं । भ–अनाधृष्यं । २१. भ–दुरासदं ॥

आसनं सर्व-भूतानां दारुणं नि-नदंस्[1] तथा(?दा)[1] ।
११] प्र-दीप्त इव रोषेण शूलं जग्राह रावणः ॥१२॥ [१२
तच् छूलं रावणः[2] क्रुद्धः[2] प्र-गृह्य[3] युधि वीर्य-वान् ।
१२] अन्-एकैः सम्-अरे शूरै रावणः[4] परि-वारितः ॥१३॥ [१३
१३पू] समुन्-नद्य[5] महा-नादं ननाद[6] युधि भैरवम् ।
N] संरक्त-नयनो रोषात्[6] स्व-सैन्यम् अभि-हर्षयन् ॥१४॥ [१४
१३उ] पृथिवीं चाऽन्तरिक्षं च दिशोऽथ वि-दिशस् तथा ।
प्राऽकम्पयत शब्देन राक्षसेन्द्रः सु-दारुणम् ॥[7]१५॥ [१५
१४] अति-नादेन तेनाऽस्य घोरेणाऽत्युग्र-कर्मणा ।[8]
१५पू] सर्व-भूतानि वि-त्रेसुः सागरश् चाऽपि[9] चुक्षुभे ॥१६॥ [१६
स गृहीत्वा महा-वीर्यः[10] शूलं तद्[10] रावणो महत् ।
१६] वि-नद्य सु-महानादं परुषं[11] वाक्यम्[11] अब्रवीत् ॥१७॥ [१७
शूलस्[12] ते वज्र-धारोऽयं[12] राम रोषान् मयोद्-यतः ।[13]
१७] घोरो[14] भ्रातृ-सहायस्य सद्यः प्राणान् हरिष्यति[15] ॥१८॥ [१८
राक्षसानां[16] च[16] शूराणां निहतानां चमू-मुखे ।
१८] त्वां नि-हत्य रण-श्लाघिन् करिष्येऽस्तु-प्रमार्जनम्[17] ॥१९॥ [१९
तिष्ठेदानीं नि-हन्मि त्वाम् एष[18] शूलेन[18] राघव ।
१९] एवम् उक्त्वा च[19] चिक्षेप तच्[20] छूलं[20] राक्षसाऽधिपः ॥२०[21]॥ [२०
आ-पतन्तं शरौघैस् तं युगाऽन्ताऽग्निसमप्रभम्[22] ।
२१] निर्-बिभेद तदा रामो वि-रामो रिपु-सम्पदाम् ॥[23]२१॥ [२३

---

१. रा$_2$ फ–दारणं तथा । भ–चातकोपमं ॥ २. भ–परमक्रुद्धः । ३. भ–संगृह्य । ४. रा$_2$–राक्षसैः ॥ ५. भ–वर्जं—समुद्यम्य । ६. भ–नास्ति ॥ ७ भ–प्राकम्पयत्तदा शब्दो राक्षसेन्द्रस्य दारुणः ॥ ८. भ–अतीव तेन नादेन तानि तस्यांतकात्मनः । ९. भ–च प्रचु० ॥ १०. भ–महाबाहुस्तच्छूलं । ११. भ–रामं परुषं ॥ १२. रा$_1$ ल$_1$ ब भ प्र–शूलहस्तो वज्रधारो । १३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–समुद्यतः । १४. रा$_1$ ल$_1$ ल ब अ प्र–घोरान् । भ–तव । १५. रा$_1$ ल$_1$ ल$_2$ ब–हनिष्यति ॥ १६. भ–रक्षसामद्य । १७. भ–करोम्यश्रुप्र० ॥ १८. भ–शूलेनानेन । १९. भ–स । २०. भ–तं शूलं । २१. अतः परमधिकः पाठः—भ–तं चापि राघवो दृष्ट्वा ज्वलंतं घोरदर्शनम् । ससर्ज निशितान्बाणान् चापमुद्यम्य वीर्यवान् ॥ २२. रा फ–वारयामास राघवः । २३. प्र भ–नास्ति । रा$_2$ फ–उत्पतंतं युगांताग्निं जलौघैरिव सागरः ॥

निर्-ददाह तदा[1] बाणान् राम-कार्मुक-निःसृतान् ।
२२] रावणस्य महा-शूलः[2] पतंगान् इव पावकः ॥२२॥ [२४
दृष्ट्वा तान् भस्मसाद्-भूतान् शूल-स्पर्श-विचूर्णितान्[3] ।
२३] सायकान् अन्तरिक्ष-स्थान् राघवं[4] क्रोधं[4] आऽविशत् ॥२३॥ [२५
स तां मातलिना दत्तां[5] शक्तिं वासव-सम्मताम्[6] ।
२४] जग्राह परम-क्रुद्धो राघवो रघु-नन्दनः ॥२४[7]॥ [२६
सा तोलिता बल-वता शक्तिर् घण्टाऽट्टहासिनी ।[8]
२५] नभः[9] प्र-ज्वालयामास[10] युगाऽन्तोल्केव दीप्यती[11] ॥२५॥ [२७
तोलयित्वा जवाच् छक्तिं घण्टा-शत-कृत-स्वनाम् ।
N] चिक्षेप परम-क्रुद्धस् तरसा रघु-नन्दनः ॥२६[12]॥ [N
सा क्षिप्ता राक्षसेन्द्रस्य शूले[13] शक्तिः[13] पपात ह ।
२६] स[14] भिन्नो[14] बहु-धा शूलो[15] नि-पपात महा-द्युतिः[15] ॥[16]२७॥ [२९
निर्-बिभेद ततस् तस्य[17] बाणैर्[18] अश्वान् महा-जवान्[18] ।
२७] रामस्[19] तीक्ष्णैर् महा-वेगैर्[19] वज्र-स्पर्श-समैः शितैः[20] ॥२८॥ [२१
निर्- बिभेदोरसि च[21] तं[21] रावणं नि-शितैस् त्रिभिः[22] ।
२८] राघवः परमाऽऽयस्तो ललाटे[23] च त्रिभिः शरैः[23] ॥२९॥ [३०
स शरैर् भिन्न-सर्वाऽङ्गो[24] गात्रात् प्रस्रुत-शोणितः ।
२९] राक्षसेन्द्रः समूह-स्थः[25] फुल्लाऽशोक इवाऽऽबभौ ॥३०॥ [३१

---

१. भ–स तान् । २. रा$_1$, ल$_1$, ल$_2$ ब अ–तदा शूलं ॥ ३. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–०विघूर्णि० । भ–शूलसंस्पर्श० । ४. भ–०वः क्रोधं ॥ ५. भ–नीतां । ६. भ–०वनिर्मिता । ७. अतः परमधिकः पाठः—भ–वर्जं—तोलयामास तां शक्तिं समरे लघुविक्रमः ॥ ८ भ–सा शक्तिस्तोलिता तेन चंडघंटामहास्वना । ९. रा$_2$ फ भ–वर्जं—ततः । १०. रा$_1$, ल$_1$, ल$_2$ ब–प्रजज्वाल च सा । ११. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–दीप्यते ॥ १२. भ–नास्ति ॥ १३. भ–तस्मिन् शूले । १४. अ प्र फ–तद् भित्वा । रा$_2$–तच्छित्वं । १५. अ प्र फ–०लं भूमौ सा निपपात ह । रा$_2$–०लं निपपात गतद्युति । १६. रा$_1$, ल$_1$, ल$_2$ ब–नास्ति ॥ १७. भ–बाणैर् । १८. रा$_1$, ल$_1$, ल$_2$ ब अ–०हयान्महाबलान् । प्र–नास्ति । भ–हयानस्य म० । १९. रा$_2$ फ भ–वर्जं–०क्ष्णैस्ततस्तस्य । प्र–नास्ति । २०. भ–वर्जं—शरैः ॥ २१. भ–क्रुद्धो । २२. भ–शरैः । २३. भ–०टे पत्रिभिस्त्रिभिः ॥ २४. भ–कीर्णस० । २५ रा$_1$, ल$_1$, ल$_2$ ब अ प्र–गिरींद्रस्थः ॥

स राम-बाणैर् अति-विद्ध-गात्रो[1]
निशाचरेन्द्रः क्षतजाऽऽर्द्र-गात्रः[2] ।
जगाम खेदं च समूह-मध्ये
N] क्रोधं च चक्रे द्वि-गुणं[3] तदानीम्[3] ॥३१॥[३२

इत्यार्षे रामायणे युद्ध-काण्डे[4] रावण-धर्षणं[5] नाम
चतुरशीतितमः सर्गः ॥ ८४ ॥

[वं-८८]= [पञ्चाऽशीतितमः सर्गः] =[दा-१०५]

स तु तेन तदा युद्धे राघवेण[6] प्र-धर्षितः ।
१] रावणः परमाऽमर्षी भृशं क्रोधं[7] समाऽविशत्[7] ॥१ ॥[१
स दीप्त-नयनः क्रुद्धश्[8] चापम् उद्-यम्य वीर्य-वान् ।
२] प्रत्य्-अर्दयत[9] सं-क्रुद्धो राघवं पुनर् आ-हवे ॥२ ॥[२
बाण-धारा-सहस्रैस् तं[10] स तोय-द इवाऽम्बरे ।
३] राघवं रावणो वीरस्[11] तडाग-वद्[12] अपूरयत्[13] ॥३ ॥[३
पूरितः शर-जालेन धनुर्-मुक्तेन[14] सं-युगे ।
४] महा-गिरिर् इवाऽकम्पो[15] राघवो[15] न प्र-कम्पितः[16] ॥४ ॥[४
शरांस् तान् नर-शार्दूलो रामः[17] परम-दारुणान्[17] ।[18] [N
५] गभस्तीन्[19] इव चाऽर्कस्य[19] प्रति-जग्राह वीर्य-वान् ॥५ ॥
शरैस् तु शर-जालानि व्य्-अधमत्[20] सम्-अरे स्थितः । [५
N] जीमूत इव घर्माऽन्ते[21] शर-वर्षं[21][22] ववर्ष ह[22] ॥६ ॥[N

---

१. म–अभिवि० । २. म–०जावसिक्तः । ३. भ–स तदा महान्तम् ॥ ४. ब प्र भ–लंकाकांडे । ५. ल₂–०णदर्शनं । रा₂ फ–रामरावणयुद्धं ॥ ६. भ–काकुत्स्थेन । ७. रा₁ ल₁ ल₂ ब–कोप इवाविशत् । रा₂ फ म भ–क्रोधमुपागमत् ॥ ८. भ–कोपात् । ९. भ–प्रत्यार्द० ॥ १०. भ–तु । ११. भ–बाणैस् । १२. प्र रा₂ फ म भ–०गमिव । १३.प्र रा₂ फ–पूर० । म भ–पूरयन् ॥ १४. रा₁ ल₁ ल₂ ब अ प्र–मुहुर्मु० । १५. भ–०कम्प्यः काकुत्स्थो । १६. रा₂ फ म भ–व्यकंपत ॥ १७. रा₂ फ म–रक्षसः परवारणान् । १८. भ–नास्ति । १९. भ–स गभस्तीनिवार्कस्य ॥ २०. रा₁ ल₁ ल₂ ब अ–निवार्य । प्र–विषमं । २१. ल₁ ल₂ अ–नर्दंश्च । प्र–मर्दन् स । रा₂ फ म–नर्दंश्च । २२. रा₁ ल₁ ल₂ ब अ प्र–०वर्षी व्यव० । रा₂ फ म–शरवृष्टिं व्यव० ॥

ततः शर-सहस्राणि क्षिप्र-हस्तो निशा-चरः ।
६] नि-चखानोरसि क्रुद्धो राघवस्य महाऽऽत्मनः ॥७ ॥ [६
स शोणित-समादिग्धः[१] सम्-अरे लक्ष्मणाऽग्रजः ।
७] बभौ[२] फुल्ल[२] इवाऽरण्ये सु-महान् किंशुक-द्रुमः ॥८ ॥ [७
शराऽभिघात-संक्रुद्धः[३] सोऽपि जग्राह सायकान्[४] ।
८] काकुत्स्थः सु-महावेगो युगाऽन्ताऽग्नि-सम-प्रभः[५] ॥९ ॥ [८
ततोऽन्योऽन्यं सु-संरब्धाव्[६] उभौ राघव-रावणौ[७] ।
९] शराऽन्धकारे महति[८] नोप-लक्षयतां(?तस्) तदा ॥१०[९]॥ [९
ततः क्रोध-समाविष्टो रामो दशरथाऽऽत्मजः ।
१०] उवाच रावणं वीरः[१०] प्र-हस्य परुषं वचः ॥११॥ [१०
मम भार्या जन-स्थानाद्[११] यत्[१२] त्वया राक्षसाऽधम[१२] ।
११] हृताऽत्र[१३] वि-वशा[१३] यस्मात् तस्मात् त्वं न भविष्यसि ॥१२॥ [११
मया वि-रहितां दीनां वर्तमानां महा-वने ।
१२] वैदेहीं वि-वशां[१४] हृत्वा[१५] शूरोऽहम् इति मन्यसे ॥१३॥ [१२
स्त्रीषु चौर्यम्[१६] अ-नाथासु[१६] पर-दार-प्रधर्षक[१७] ।
१३] कृत्वा का-पुरुषं कर्म शूरोऽहम् इति मन्यसे ॥१४[१८]॥ [१३
भिन्न-मर्याद निर्-लज्ज चारित्रेष्व् अन्-अवस्थितः ।
१४] दर्पान् मृत्युम् उप-स्थाय[१९] शूरोऽहम्[२०] इति मन्यसे[२०] ॥१५॥ [१४
शूरेण धनद-भ्रात्रा बलैः[२१] समुद्-इतेन च ।

---

१. रा$_{२}$ भ म-वर्जं—०तमहादिग्धः । २. भ-स पुष्पित ॥ ३. भ-०घातास्सं० । ४. रा$_{१}$ ल$_{१}$ ल$_{२}$ अ फ-सायकं । भ-कार्मुकं । ५. भ-०न्तादित्यवस्थितः ॥ ६. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब अ प्र-तु सं० । ७. भ-तौ रामरा० । ८. भ-समरे । ९. अतः परमधिकः पाठः—भ-संच्छन्नः शरजालेन रावणेन स राघवः । निष्पपात स तं भित्त्वा मेघादिव दिवाकरः ॥ १०. भ-क्रुद्धः ॥ ११. म-व्यसनात् । १२. रा$_{२}$-रहिते रा० । भ-इह ते रा० । म-नास्ति । १३. प्र-हृता च वि० । रा$_{२}$ फ-हृता त्वयावशा । भ-आनीता वि० । म-नास्ति ॥ १४. भ-विजने । १५. रा$_{२}$ म-वर्जं—कृत्वा ॥ १६. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब अ प्र रा$_{२}$-शूर विना० । १७. रा$_{१}$ ल$_{१}$ अ रा$_{२}$ फ-०र्षकः । भ-०दाराभिमर्षणं । १८. अतः परमधिकः पाठः—भ-ब्राह्मणेषु च ये शूराः स्त्रीषु गोषु तपस्विषु । वृंतादिव फलं पक्वं रक्षोऽधम पतंति ते ॥ १९. रा$_{२}$ फ म भ-उपादाय । २०. भ-कथं जीवितुमिच्छसि ॥ २१. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब अ प्र-वर्गैः । म-गुणैः ।

१५] श्लाघनीयं यशस्यं च कृतं कर्म महत् त्वया ॥१६॥ [१५
अ-नाथैश् चैव भीतैश् च पूज्यमानः[1] स्व[1]-राक्षसैः ।
१६] उत्-सेकाच् चैव दर्पाच् च शूरोऽहम् इति मन्यसे ॥१७॥ [N
मायया[2] मृग-रूपेण[2] मद्-भार्याऽप-हृता त्वया ।
१७] सर्व-था दर्शितं वीर्यं[3] कृतं कर्म सु-दुष्करम् ॥१८॥ [N
नि-कृतस्[4] त्वं[4] सदाऽनृ-आर्यं[5] गर्हितश्[6] चैव[6] कर्मणा ।
१८] श्लाघसे[7] त्वं कथं नाम यस्य ते वृत्तम् ईदृशम् ॥१९॥ [N
निशि[8] नैव स्वपिम्य्[9] अद्य[9] दिवा वा रजनी-चर ।[10]
१९] राक्षसाऽधम[11] दुर्-बुद्धे[11] त्वाम् अनृ-उत्पाट्य मूल-तः ॥२०॥ [N
इमे मासास् त्व् अति-क्रान्तास् त्वद्-वधं ध्यायता[12] सदा[12] ।[13]
२०] वधाऽर्हस्य वधाऽर्थं[14] ते[14] मृत्यु-द्वारम् अपाऽऽवृतम् ॥२१॥ [N
उत्-सेकाद् अभि-पन्नस्[15] त्वं गर्हितं चाऽहितं च यत्[15] ।
२१] कर्मणः[15] प्राऽऽप्नुहीऽदानीं तस्याऽद्य सु-महत् फलम् ॥२२॥ [१६
शूरोऽहम् इति चाऽऽत्मानम् अव-गच्छसि दुर्-मते ।
२२] न[17] चैव लज्जसे[17] सीतां चौर-वत् त्वं[18] प्र-कर्षयन्[18] ॥२३॥ [१७
यदि मत्-सन्निधौ सीता धर्षिता स्यात् त्वया बलात् ।
२३] भ्रातरं[19] त्वं खरं पश्येस्[19] तदा मत्-सायकैर् हतम् ॥२४॥ [१८
दिष्ट्याऽसि मम दुष्टाऽऽत्मंश्[20] चक्षुर्-विषयम् आ-गतः ।
२४] अद्य त्वा सायकैस् तीक्ष्णैर् नयामि यम-सादनम् ॥२५[21]॥ [१९
अद्य ते मच्-छरैश् छिन्नं शिरो ज्वलित-कुण्डलम् ।

---

१. भ-०नोथ रा० । रा$_1$ ल$_1$ ल$_2$ ब प्र म-०नश्च रा० । अ-०मानैश्च रा० ॥ २. रा$_1$ ल$_1$ ल$_2$ ब प्र-०यानृतरू० । ३. म-चार्थं ॥ ४. रा$_2$ फ-विकृ० । म भ-धिकृ० । ५. भ-चाप्यनार्यश्च । ६. रा$_1$ ल$_1$ ल ब अ प्र-स्वं च । ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-श्लाघ्यसे ॥ ८. रा$_2$ फ म-निशासु । ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-०स्वपाम्यद्य । रा$_2$ फ म-स्वपिमि । १०. भ-शये नाहं दिवारात्रौ रौद्रकर्म निशाचर । ११. रा$_2$ फ म-न रावण शमं लप्स्ये । भ-न रावण लभे शांतिं ॥ १२. रा$_1$-वर्ज—०ध्नं परिचिंतता । १३. भ-अत्यक्राममिमान्मासांस्त्वद्वधं परिचिंतयन् । १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-वधं तेऽद्य ॥ १५. भ-अभिमानस्य गर्हितस्य च कर्मणः । १६. भ-संग्रामे ॥ १७. ल$_1$ ल$_2$ ब-नापि लज्जयसे । रा$_2$ फ म भ-नास्ति लज्जा च ते । १८. भ-व्यपकर्षतः ॥ १९. भ-खरं तं भ्रातरं पश्य ॥ २०. भ-दुर्बुद्धे । २१. अतः परमधिकः पाठः—भ-पश्यतां सर्वयोधानां प्रसह्य रणमूर्धनि ॥

२५] क्रव्याऽदा व्यप-कर्षन्तु वि-कीर्णं भूमि-पांसुषु[१] ॥२६॥ [२०
नि-पत्योरसि ते गृध्राः[२] क्षितौ क्षिप्तस्य रावण ।
२६] पिबन्तु रुधिरं गात्राद्[३] बाणशल्याऽन्तरोत्थि(द्-स्थि)तम्[४] ।२७।[२१
अद्य मद्-बाण-भिन्नस्य गताऽसोः स्वपतस्[५] तव[५] ।
२७] कर्षन्त्व् अन्त्राणि विह-गा गरुत्-मन्त[६] इवोरगान्[६] ॥२८॥ [२२
इत्य्[७] एवं सं-वदन् वीरो रामः[७] शत्रु-निबर्हणः ।
२८] राक्षसेन्द्रं संयुग-स्थं[८] शर-वर्षैर् अवाऽकिरत् ॥२९॥ [२४
तस्य क्रुद्धस्य सम्-अरे रामस्याऽक्लिष्ट-कर्मणः । [N
२९] बभूव द्वि-गुणं वीर्यं बलं हर्षश् च सं-युगे ॥३०[९]॥
रामस्याऽस्त्र-बलं चैव शत्रोर् निधन-काङ्क्षिणः[१०] । [२५
३०] प्रादुर्-बभूवुर् अस्त्राणि सर्वाणि विदिताऽऽत्मनः ।
३१पू] प्र-हरंश् च महा-तेजा लघुहस्त-तरोऽभवत्[११] ॥३१[१२]॥ [२६
शुभान्य् एतानि चिन्हानि वि-ज्ञायाऽऽत्म-हितानि[१३] सः[१४] ।
३२] भूय एवाऽद्रवद् रामो रावणं राक्षसाऽन्तकः[१५] ॥३२॥ [२७
N] जवनैः पत्रिभिस् तीक्ष्णैः शरै राघव-नोदितैः ।[१६]
३३उ] वध्यमानो दश-ग्रीवो विघूर्ण-हृदयोऽभवत्[१७] ॥३३॥ [२८
यथा-वन् नाऽस्त्रम् आ-रेभे न व्य्-अकर्षच् छराऽऽसनम् ।
३४] नाऽस्य प्रत्य्-अकरोद् वीर्यं वि-क्लवेनाऽन्तर्-आत्मना ॥३४॥ [२९
क्षिप्ता ह्य् अपि शरास् तेन शस्त्राणि वि-विधानि च ।
३५] न रणाऽर्थम्[१८] अकल्पन्त[१८] मृत्युकालाऽभिवर्तिनः ॥३५॥ [३०

---

१. रा$_2$ फ म-रणपां० । भ-रणपांशुभिः ॥ २. रा$_1$-क्रुद्धाः । ३. भ-हृष्टा । ४. भ-वर्जं-०तरे स्थिताः ॥ ५. भ-पतितस्य ते । ६. भ-०रमानिव पन्नगान् ॥ ७. प्र-०दन् धीरो रामः । भ-इत्युक्त्वा स तदा रामो वीरः । ८. प्र रा$_2$ फ म भ-समूहस्थं ॥ ९. अतः परमधिकः पाठः—भ-वित्रेसुः सर्वभूतानि कालस्येव दिधक्षतः ॥ १०. रा$_1$ ल$_1$ ल ब अ प्र-च वधकां० । भ-विजयकां० । ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-शीघ्रं हस्त० । म भ-०स्तस्ततोऽभ० । १२. अत: परमधिकः पाठ:—भ-दृढप्रहारता चैव दूरपातस्तथैव च ॥ १३. ल$_2$-०ताय । १४. रा$_2$ म-वर्जं—च । १५. भ-०साधिपं ॥ १६. रा$_2$ फ म-हरिभिः सोश्मविकिरैः शरै रामेण चाहवे । भ-रामेण शरवर्षैश्च वानरैश्चाश्मवृष्टिभिः । १७. भ-विभ्रांतहृ० ॥ १८. रा$_2$ फ-चैवार्थाय कल्पंते ॥ भ-नाकल्पन्त रणार्थाय ॥

सूतस् तु व्यथितस्[1] तस्य[1] तद्-अवस्थं नि-शम्य तम् ।
३६] तस्माद् रणाद् अपाऽवहद् रावणं लोक-रावणम् ॥[2]३६॥[३१
रथं तु तस्याऽथ जवेन सारथिर्
नि-वर्त्य भीमं[3] जलद-स्वनं तथा[3] ।
जगाम शीघ्रं सम्-अरात् स-संभ्रमः[4]
N] परिश्रमाऽधोमुखम्[5] ईक्ष्य[5] तं स्थितम्[6] ॥३७॥ [३४

इत्यार्षे रामायणे युद्ध-काण्डे[7] रावणाऽऽक्षेपो[8] नाम
पञ्चाऽशीतितमः सर्गः ॥ ८५ ॥

[वं–८६]= [षडशीतितमः सर्गः] =[दा–१०६]

स तु मोहात् सु-संरब्धः कृताऽन्त-बल-नोदितः ।
१] क्रोध-संरक्त-नयनो[9] रावणः सूतम् अब्रवीत्[10] ॥१ ॥[१
हीन-वीर्यम् इवाऽशक्तं पौरुषेण[11] वि-वर्जितम् ।
२] भीतं लघुम् इवाऽसत्त्वं[12] वि-हीनम् इव तेजसा ॥२ ॥[२
वि-मुक्तम्[13] इव मायाभिर् अस्त्रैर् इव बहिष्-कृतम् ।
N] माम् अव-ज्ञाय दुर्-बुद्धे स्व-बुद्ध्या किं वि-चेष्टसे ॥३ ॥[३
किम्-अर्थं माम् अव-ज्ञाय मच्-छन्दम्[14] अन्-अवेक्ष्य[15] च ।
३] त्वयाऽद्य शत्रु-मध्यान् मे रथोऽयम् अप-वाहितः ॥४ ॥[४
त्वयाऽद्य हि ममाऽन्-आर्य चिर-काल-समर्जितम्[16] ।
४] यशो वीर्यं च तेजश् च प्रत्य्-अयश् च नि-पातितः[17] ॥५ ॥[५
शत्रोर् विख्यात-वीर्यस्य रञ्जनीयस्य वि-क्रमैः ।

---

१. रा$_1$, ल$_1$, ल$_2$ ब अ प्र–०तस्तेन । भ–रथनेतास्य । २. भ–शनैर्युद्धात्सुसंभ्रांतो रथं तस्यापवाहयत् ॥ ३. भ–तस्माज्जलवाहनिस्वनं । ४. भ-वर्ज—महात्मा । रा$_2$ फ म–महामतिः । ५. भ–वर्ज—पराक्रमा० । ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–अव्यवस्थं । म–अव्यवस्थितं । भ–रावणोक्षितः ॥ ७. ब अ भ–लंकाकाण्डे । ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–द्वैरथेनाक्षेपो । भ–रथपर्यावर्तनं ॥ ९. भ–क्रोधेन महताविष्टो । १०. रा$_1$–नास्ति ॥ ११. म–'पौरु' इत्यादि '०सत्त्वं' इत्यन्तः पाठो नास्ति । १२. रा$_2$ फ भ–वर्ज—इवाशक्तं ॥ १३. म भ–वियुक्तं ॥ १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ–स्वच्छन्दम् । म–मद्वीर्यम् । १५. भ–अनपेक्ष्य ॥ १६. म–०कालार्जितं मया । १७. भ–विनाशितः ॥

५] पश्यतो युद्ध-लुब्धोऽहं कृतः का-पुरुषस् त्वया ॥६[1]॥ [६
कस्माद् रथम् इमं युद्धान्[2] नयस्य् अन्यत्र दुर्-मते ।
६] परेणोप-कृतो[3] व्यक्तं तेन वध्योऽसि मे मतः ॥७ ॥ [७
नहीऽदं[4] विद्यते कर्म सु-हृदः श्रेय[5] इच्छतः[5] ।
७] रिपूणां सदृशं यच्[6] च तत् त्वयेदम् अनु-ष्ठितम्[6] ॥८ ॥ [८
नि-वर्तय रथं शीघ्रं यावन् नाऽपैति[7] मे रिपुः ।
८] यदि न व्यथितः स्यास्[8] त्वं[8] स्मर्यन्ते यदि वा गुणाः ॥[9]९ ॥ [९
एवम् उक्तः स[10] परुषं हत-बुद्धिर्[10] अ-बुद्धिना ।
९] अब्रवीद् रावणं सूतो हितं साऽनुनयं वचः ॥१०॥ [१०
न भीतोऽस्मि न मूढोऽस्मि नोप-जप्तोऽस्मि शत्रुणा ।
१०] न प्र-मत्तो न वि-स्नेहो वि-स्मृता न च ते गुणाः ॥११॥ [११
मया तु[11] हित-कामेन[11] यशश्[12] च[12] परि-रक्षता[13] ।
११] स्नेह-प्रस्कन्न-मनसा हितम् इत्य् एव ते कृतम् ॥[14]१२॥ [१२
उप-देशो हि सूतानाम् आपत्सु रथिनां-वर ।
N] रक्षितव्यो रथी यस्मात् तस्माद् इदम् अनु-ष्ठितम् ॥१३॥ [N
नाऽस्मिन्न् अर्थे महा-राज त्वं[15] मां प्रिय-हिते रतम् ।
१२] किं-चिल्[16] लघुम् इवाऽसत्त्वं[16] दोष-तो गन्तुम् अर्हसि ॥१४॥ [१३
श्रूयताम् अभि-धास्यामि[17] यन्-निमित्तं मया रथः ।
१३] नदी-वेग इवाऽम्भोधेः सं-युगाद् विनि-वर्तितः ॥१५॥ [१४
श्रमं[18] तेऽद्याऽव-गच्छामि[19] महता रण-कर्मणा ।
१४] न हि ते वीर[20] सौमुख्यं[20] प्र-हर्षम् उप-लक्ष्यते[21] ॥१६॥ [१५

---

१. अतः परमधिकः पाठः—भ-यस्त्वं रथमिमं मोहादपवाहितवानसि । सुव्यक्तोऽयं प्रतर्को मे परेण त्वमुपस्कृतः ॥ २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-बुद्ध्या । ३. भ-०पस्कृतो ॥ ४. भ-नहि तद् । ५. भ-शुभकांक्षिणः । ६. रा$_2$ फ म-ह्यद्य यत्त्वयैतदनु० । भ-ह्येतद्यत्त्वया समनु० ॥ ७. रा$_2$ फ भ-नाभ्येति । ८. रा$_2$ फ-वासि । ९. रा$_2$ फ भ-वर्जं—नास्ति ॥ १०. रा$_2$ फ भ-परुषमुक्तस्तु हित० ॥ ११. भ-वर्जं—स्वद्धित० । १२. भ-जयं तु । १३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-०रक्षितम् । भ-परिमार्गता । १४. भ-स्वत्स्नेहेन च भक्त्या च प्रियमित्यप्रियं कृतं ॥ १५. रा$_1$-त्वां । १६. अ ल$_1$ ल$_2$ ब अ प्र म-लघुमिवाशक्तं । भ-लघुः कश्चिदिवानार्यं ॥ १७. भ-चाभिधास्यामि ॥ १८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-शमं । १९. भ-तवाव० । २०. रा$_1$ अ-वीर्यसौ० । ल$_1$ ल$_2$ ब-वीर्यसामुख्यं । प्र-वीर्यमायुष्यं । २१. भ-वोप० ॥

रथोऽयं[1] शर-भिन्नाऽङ्गः खिन्नाश् च[1] रथ-वाजिनः ।
१५] दीना[2] घर्म-परिश्रान्ताः[2] कु-वर्षेणेव[3] कर्षकाः[3] ॥१७॥ [१६
देश-कालौ च वि-ज्ञेयौ लक्षणैश्[4] चेङ्गितानि[4] च ।
१७] दैन्यं हर्षश्[5] च तेजश्[5] च रथिनश् च बलाऽबलम्[6] ॥१८॥ [१८
निमित्तानि च भूयिष्ठं प्रति-कूलानि लक्षये ।
१६] नूनं तेषु निमित्तेषु लक्षयाम्य् अ-प्रदक्षिणम् ॥१९[7]॥ [१७
स्थूल-निम्नानि भूमेश्[8] च समानि वि-षमाणि च ।
१८] युद्ध-कालश्[9] च[9] वि-ज्ञेयः परस्याऽन्तर-दर्शिना[10] ॥२०॥ [१९
अपयानाऽभियाने[11] च स्थान-प्रत्युपसर्पणे[12] ।
१९] सर्वम् एतद् रथ-स्थेन ज्ञेयं रथ-कुटुम्बिना ॥२१॥ [२०
तव विश्राम-हेतोश् च[13] तथैव[13] रथ-वाजिनाम्[14] ।
२०] रौद्रं[15] वि-जानता चैव[15] क्षणात्[16] कृतम् इदं मया ॥२२॥
न मयाऽऽत्मेच्छया[17] देव[17] रथोऽयम् अप-वाहितः । [२१
२१] भर्तृ-स्नेह-परीऽतेन[18] मयैतत् त्वत्-कृते[19] कृतम् ॥२३॥ [२२
आ-ज्ञापयस्व मां वीर यच् च वक्ष्यसि मान-द ।
२२] तत् करिष्याम्य् अहं सर्वं त्वद्-गतेनैव चेतसा ॥२४[20]॥ [२३
तुष्टस् तेन[21] तु[21] वाक्येन रावणस् तस्य सारथेः ।
२३] विश्वास्यैनं[22] बहु-विधं युद्ध-लुब्धोऽब्रवीद् वचः ॥२५॥ [२४
शीघ्रं रथम् इमं सूत राघवाऽभिमुखं[23] कुरु ।[24]

---

१. रा$_2$ फ म–धुरोवहनखिन्नाश्च तव ये । भ–भारोद्वहनखिन्नाश्च इमे ते । २. भ–वर्ज—विना कर्म० । ३. ल$_1$ ल$_2$ ब अ–०व कर्षकः । रा$_2$ फ भ–कुवर्षाभिहता इव ॥ ४. भ–निमित्तानींगि० । ५. म–खेदश्च हर्षश्च । भ–०श् च रोषश् । ६. ल$_1$ ल$_2$ ब–यथाबलम् ॥ ७. भ–नास्ति ॥ ८. भ–भूमौ । ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०लः स । १०. ल$_1$ ल$_2$ ब–०र्शितः ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–अपायं नाभिजाने । भ–उपयानापयाने । १२. रा$_1$ ल$_1$ ल$_2$ ब अ–०र्पतः । भ–०प्रत्यवसर्पणं ॥ १३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–च रथोयं । भ–तु रथिनो । १४. भ–०जिनः । १५. ल$_1$ ल$_2$ ब प्र–रौद्रं च जा० । रा$_1$ फ–रौद्रं वर्जयता । भ–परस्य च विघातार्थं । १६. भ–क्षेमं ॥ १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०या चैव । रा$_2$ फ म–मया स्वेच्छया राजन् । १८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–भर्तुःस्ने० । १९. भ–दुष्कृतं ॥ २०. भ–आज्ञापय यथा शत्रुं त्वं धक्षस्यरिसूदन । करिष्येहं तथा वीर गतानृण्येन चेतसा ॥ २१. ल$_1$ ल$_2$ ब प्र–तेनैव । रा$_2$ फ म–तेन च ॥ २२. भ–प्रशस्यैनं ॥ २३. रा$_1$ फ म– रामायाभि० । २४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–नास्ति ।

२४] नाऽहत्वा सम्-अरे शत्रु[१] नि-वर्तिष्यामि राघवम्[१] ॥२६[२]॥[२५
ततो द्रुतं रावण-वाक्य-देशितः[३]
प्र-णोदयामास[४] हयान्[५] स सारथिः ।
स[६] राक्षसेन्द्रस्य रथो महा-ध्वजः[६]
२५] क्षणेन रामस्य तदाऽग्र-तोऽभवत्[७] ॥२७॥[२८

इत्यार्षे रामायणे युद्ध-काण्डे[८] सूतोपालम्भो[९] नाम
षडशीतितमः सर्गः ॥ ८६ ॥

[वं-९०]= [सप्ताऽशीतितमः सर्गः] =[दा-१०८]

तम् आ-पतन्तं सहसा वेग-वन्तं[१०] महा-स्वनम्[१०] ।
१] रथं राक्षस-राजस्य नर-राजो ददर्श ह ॥१ ॥[४
कृष्ट(ष्ण)-वाजि-समायुक्तं[११] युक्तं रौद्रेण वर्चसा[१२] ।
२] उह्यमानम् इवाऽऽकाशे वि-मानं स-जलैर् घनैः ॥२ ॥[५
तडित्-पताका-गहनं दर्शितेन्द्राऽऽयुधोपमम् ।
N] शर-धारा वि-मुञ्चन्तं धारा-सारम् इवाऽम्बु-दम् ॥३ ॥[५
तं दृष्ट्वा मेघ-सङ्काशम् आ-पतन्तं रथं रिपोः । [६पू
३] अब्रवीन् मातलिं रामो महेन्द्र-रथ-सारथिम् ॥[१३]४ ॥[७उ
मातले पश्य सं-रब्धम् आ-पतन्तं रथं रिपोः ।[१४] [८
४] गिरेर् वज्र-विभिन्नस्य[१५] दीर्यतः सदृश-स्वनम् ॥५ ॥[६उ
यथाऽप-सृत्याऽऽपतितो[१६] वेगेन महता पुनः ।
५] सम्-अरे हन्तुम् आत्मानं कृता[१७] तेन मतिर् ध्रुवम्[१७] ॥६ ॥[९
तद् अ-प्रमादम् आ-तिष्ठ प्रत्युद्-गच्छ[१८] रथं रिपोः ।
६] वि-ध्वंसयितुम् इच्छामि वायुर् मेघम् इवाऽऽयतम्[१९] ॥७ ॥[१०

---

१. म-शत्रून्निवर्तिष्यति रावणः । २. अतः परमधिकः पाठः—भ-एवमुक्त्वा ततस्तुष्टो रावणो राक्षसेश्वरः । ददौ स सारथेः श्रीमान्हस्ताभरणमुत्तमम् ॥ ३. रा$_2$ फ म-०क्यनोदितः । भ-०क्यचोदितः । ४. भ-प्रचोद० । ५. भ-रथं । ६. भ-निशाचरेन्द्रश्च ततो महारथः । ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ-तथाग्र० । रा$_2$-पथाग्र० । म-रथाग्र० ॥ ८. ब प्र भ-लंकाकांडे । ९. भ-सूतोपदेशः ॥ १०. भ-महामेघौघनिःस्वनं ॥ ११. रा$_2$ वर्जं—क्लृसवा० । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-वीर्यवान् । म-कर्मणा ॥ १३. रा$_1$ ल$_1$ ब अ-उवाच च रामो मतिमान् मातलिं शक्रसारथिं । ल$_2$ प्र-नास्ति ॥ १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-नास्ति । १५. भ-वज्रोपसृष्टस्य ॥ १६. रा$_1$ ब-०पततो । १७. भ-अनेन तु कृता मतिः ॥ १८. भ-०गम्य । १९. भ-इवोत्थितम् ॥

अ-विक्लवम्[1] अ-सम्भ्रान्तम् अ-व्यग्रहृदयेक्षणः[2] ।
७] रश्मि-संचार-नियतः[3] प्र-णोदय[4] रथं द्रुतम् ॥८ ॥ [११
कामं न त्वं समा-धेयः पुरन्दररथोचितः ।
८] युयुत्सुस् त्व् अहम् एकाऽग्रः[5] स्मारये त्वां न शिक्षये ॥९ ॥ [१२
परि-तुष्टस् तु रामस्य तेन वाक्येन मातलिः ।
९] प्र-णोदयामास ततो हयान् सारथि-सत्तमः ॥१०॥ [१३
अप-सव्यं ततः कुर्वन्[6] रावणस्य महा-रथम्[7] ।
१०] चक्रोत्-क्षिप्तेन रजसा रावणं स व्य्-अपूरयत्[8] ॥११॥ [१४
ततः क्रुद्धो दश-ग्रीवः क्रोधविस्फारितेक्षणः[9] ।
११] रथ-प्रतिमुखं रामं सायकैः सम्-अपूरयत्[10] ॥१२॥ [१५
धर्षणाऽमर्षितो रामो धैर्यं रोषेण लङ्घयन् ।
१२] जग्राह सु-महावीर्यम्[11] ऐन्द्रं युधि शराऽऽसनम् ॥१३॥
शरांश् च सु-महावेगान् सूर्य-रश्मि-निभाञ् छितान् । [१६
१३] जग्राह सम्-अरे रामः सर्पान् इव महा-विषान् ॥१४॥ [N
१४पू] त उ (?भ्र) पौ(?प्रौ) ढौ(?ढे)[12] महा-युद्धे[13] लघु-चित्रं[14] च स-स्वनम्[14] ।[15]
N] विजयाऽऽकांक्षिणौ वीराव्[16] अन्योऽन्यं तौ ततक्षतुः ॥१५॥ [N
१४उ] परस्पराऽभिमुखयोर् मत्त-मातङ्गयोर् इव ।[17]
N] राम-रावणयोर् युद्धं तद् अभूत् तुमुलं तदा ॥[18] १६॥ [N
ततो देवाः स-गन्धर्वाः सिद्धाश् च परमर्षयः ।
१५] सम्-ईयुर् द्वैरथं द्रष्टुं[19] तयोर् विजय-कांक्षिणोः[19] ॥१७॥ [१८
अस्त्रैर् अस्त्राणि नि-घ्नन्तौ दर्शयन्तौ च लाघवम् ।
१७] शरैर् आशीविषाऽऽकारैर् अन्तरिक्षं ववर्षतुः ॥१८॥ [N
समुत्-पेतुर् अथोत्पाता दारुणा रोम-हर्षणाः ।

---

१. म–आतिष्ठ त्वं । २. भ–०क्षणं । ३. भ–०यतं ॥ ४. रा$_{2}$ फ म भ–प्रचोदय । ५. रा$_{1}$ ब प्र म–एवाग्रः ॥ ६. भ–कृत्वा । ७. भ–रथं तदा । ८. म–व्यधूमयत् ॥ ९. रा$_{2}$ फ–तीव्रवि० । म भ–ताम्रवि० । १०. प्र–अवपू० । रा$_{2}$ फ–अन्वपू० । म–अन्वधूनयत् । भ–तं व्यधूनयत् ॥ ११. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र–०वीर्यो ॥ १२. ल$_{1}$ रा$_{2}$ फ–तदुपोढं । म–शतयुद्धं । भ–तदसोढं । १३. रा$_{1}$ ल$_{2}$ ब अ रा$_{2}$ फ भ–महद्युद्धं । १४. रा$_{2}$ फ म भ–अन्योऽन्यवधकांक्षिणोः । १५. अतः परमधिकः पाठः—भ–तयोः समभवद् युद्धं लघुचित्रं च सुष्ठु च । १६. रा$_{2}$ फ म भ–शूराव् ॥ १७. भ–निवातवातोद्धूतयोर्गगने मेघयोरिव । १८. रा$_{2}$ फ म–नास्ति । भ–विजयाकांक्षिणोस्तत्र रामरावणोस्तदा ॥ १९. रा$_{2}$ फ म–युद्धं राक्षसक्षयकांक्षिणः ॥

१८] रावणस्य वि-नाशाय राघवस्य जयाय च ।।[1]१९।। [१९
ववर्ष रुधिरं देवो रावणस्य रथं प्रति ।
१९] वाता मण्डलिनश् चैनम् अप-सव्यं प्र-चक्रमुः ।।२०।। [२०
महद् गृध्र-कुलं चाऽस्य भ्रममाणं नभस्-तले ।
२०] येन येन रथो याति तेन तेन[2] स्म धावति[2] ।।२१।। [२१
सन्ध्यया चाऽऽवृता लङ्का जपा-पुष्प-निकाशया ।
२१] दृश्यते सम्प्र-दीप्तेव दिवा-रात्रं प्र-वृद्धया ।।[3]२२।। [२२
२२उ] स-निर्घाता महोल्काश् च सम्प्र-पेतुर् महा-स्वनाः ।
N] वि-षादयन्त्यो रक्षांसि रावणस्य रथोपरि ।।२३।। [२३
२२पू] रावणश् चाऽभवत्[4] त्रस्तश् चचाल च[4] वसुं-धरा ।
रक्षसां[5] च[5] प्र-हरतां गृहीता इव बाहवः ।।२४।। [२४
२३] ताम्राः पीताः सिताः श्वेताः पतिताः[6] सूर्य-रश्मयः ।[7]
दृश्यन्ते[8] रावणस्याऽङ्गे[9] पर्वतस्येव धातवः[10] ।।२५।। [२५
२४] गृध्रैर् व्यनु-सृताश् चैव वमन्त्यो ज्वलनं मुखैः ।
प्र-णेदुर्[11] मुखम् ईक्षन्त्यः[11] सं-रब्धम् अ-शिवं शिवाः ।।२६।। [२६
२५] गृध्रा बलाकाः कङ्काश् च कुर्वन्तो दृष्टि-लोपनम् ।
N] अनु-इष्टं भैरवं नेदुः सं-हृष्टा[12] वि-कृतैः स्वरैः[12] ।।[13]२७।। [N
२६उ] प्रति-कूलं ववौ वायुर् उत्-किरन् स रजो महत् ।
तस्य रावण-सैन्यस्य कुर्वन् दृष्टि-निवारणम् ।।[14]२८।। [२७
२७] नि-पेतुर् इन्द्राऽशनयः सैन्ये चाऽपि[15] समन्ततः[16] ।
दुर्विषह्य-स्वना[17] घोरा[17] विना जल-धरैस्[18] तथा[18] ।।[19]२९।। [२८
२८] दिशश् च वि-दिशश् चैव[20] बभूवुस् तमसाऽऽवृताः[21] ।[22]

---

१. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–नास्ति ॥ २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–तेनास्य धा० । भ–तेन प्रधा० ॥ ३. भ–ददृशे सम्प्रदीप्ता च दिवसे परिल्लुया ॥ ४. भ–च यतस्तत्र प्रचचाल । ५. म भ–राक्षसानां ॥ ६. भ–प्रकीर्णाः । ७. म–शिवाश्चाशिववादिन्यो भ्रांताः सर्वा रथं प्रति । ८. भ–ऐक्ष्यंत । ९. रा$_2$ फ–०स्यांते । म भ–०स्यांगे । १०. प्र–तिष्ठतः ॥ ११. ल$_1$ ब अ प्र–०दुर्मुखमीक्ष्यंत्यः । भ–वीक्षमाणा मुखं नेदुः ॥ १२. ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ म–संरब्धमशिवं शिवाः । १३. रा$_1$–नास्ति । १४. भ–तस्य राक्षसराजस्य कर्तुं दृष्टिविलोपनं । १५. रा$_2$ फ म भ–चास्य । १६. भ–महात्मनः ॥ १७. भ–दुर्विसह्या महा० । १८. भ–जलदनिस्वनैः ॥ १९. रा$_2$ फ–नास्ति ॥ २०. भ–सर्वा । ११. भ–तिमिरावृताः । २२. रा$_2$ फ–नास्ति ।

पांसु-वर्षेण[1] सु-महद् दुर्-दिनं च नभोऽभवत् ॥३०॥ [२९
२९] कुर्वन्तः[2] कलहं घोरं पक्षिणोऽस्य[3] रथाऽग्र-तः ।
नि-पेतुः शत-शस् तत्र दारुणा[4] दारुण[4]-स्वनाः ॥३१॥ [३०
३०] जघनैर्[5] वि-स्फुलिङ्गाश् च नेत्राभ्यां[6] चाऽस्नु-सन्ततिम्[6] ।
मुमुचुस् तस्य तुर-गाः खुरेभ्य्[7] अग्निश् चचार[7] च[8] ॥३२॥ [३१
३१] एवं[9] प्रकारा बहवः[9] समुत्-पाता[10] भयाऽऽवहाः ।
रावणस्य वि-नाशाय दारुणाः सम्प्र-जज्ञिरे ॥३३॥ [३२
३२] रामस्याऽपि[11] निमित्तानि सौम्यानि च शिवानि[12] च ।
जय-शंसीनि दृश्यन्ते प्रादुर्-भूतानि सर्व-तः ॥[13]३४॥ [३३
ततो नि-शम्याऽथ हिताय[14] राघवो
रणे निमित्तानि निमित्त-कोविदः ।
जगाम हर्षं[15] च परां[15] च निर्-वृतिं
३३] चकार युद्धेऽभ्य्-अधिकं परा-ऽऽक्रमम्[16] ॥३५॥ [३५

इत्यार्षे रामायणे युद्ध-काण्डे[17] औत्पातिकदर्शनं[18] नाम
सप्ताऽशीतितमः सर्गः ॥ ८७ ॥

[वं-९१]= [अष्टाऽशीतितमः] =[दा-१०६]

ततः प्र-वृत्तं तुमुलं राम-रावणयोस् तदा ।
१] महद् द्वैरथं युद्धं तत् सर्व-लोक-भयाऽऽवहम् ॥[19]१ ॥ [१
ततो राक्षस-सैन्यं च हरीणां च महद् बलम्[20] ।
२] प्रगृहीत-प्रहरणं[21] निश्-चेष्टम् अभवत्[22] तदा[22] ॥२ ॥ [२
सम्प्र-वृत्तौ[23] ततो[24] दृष्ट्वा सं-रब्धौ[25] नर-राक्षसौ[25] ।

---

१. रा$_2$ फ भ–पांशुव० ॥ २. भ–कुर्वाणाः । ३. रा$_1$ ल$_1$ ल$_1$ ल$_2$ ब अ प्र–०णोऽथ । ४. रा$_1$ ल$_1$ ल$_2$ ब अ–०णाः पर्वतस्वनाः ॥ ५. रा$_2$ फ भ–गात्रेभ्यो । ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$ फ–०भ्यां चाश्रुसंततम् । भ–नेत्रेभ्यश्चाश्रुर्विद्रवः । ७. भ–तुल्यमग्निं च वारि । ८. रा$_1$–ह ॥ ९. भ–ईदृशा बहवस्तस्य । १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०पेतुर् ॥ ११. भ–राघवस्य । १२. भ–शुभानि । १३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र म–नास्ति ॥ १४. भ–शुभानि । १५. भ–हर्षं परमां । १६. भ–च विक्र० ॥ १७. प्र भ–लंकाकाण्डे । १८. भ–निमित्तदर्शनं ॥ १९. रा$_1$–नास्ति । म–सुमहद्द्वैरथं युद्धं संभूतं भूतमानसः ॥ २०. ल$_1$–भयं ॥ २१. भ–०हीतायुधं सर्वं । २२. भ–ऽप्यवतिष्ठत ॥ २३. ल$_1$ ल$_2$ ब प्र–०वृद्धौ । रा$_1$–०वृद्धौ । फ म भ–०युद्धौ । २४. रा$_2$ फ–हि तौ । म–हतौ । भ–तु तौ । २५. भ–बलिनौ रामरावणौ ।

३] व्याक्षिप्त-हृदयाः सर्वे परं वि-स्मयम्[1] आ-गताः ॥३ ॥[३
नाना-प्रहरण-व्यग्रैर्[2] भुजैर् विस्मित-बुद्धयः ।
४] तस्थुस् ते[3] प्रेक्षकाः सर्वे नाऽभि-जघ्नुः[3] परस्परम् ॥[4]४ ॥[४
रक्षसां राक्षसेन्द्रं च वानराणां च राघवम् ।[4]
५] पश्यतां विस्मिताऽक्षाणां सैन्यं चित्रम् इवाऽऽबभौ ॥५ ॥[५
ततस् तानि निमित्तानि दृष्ट्वा तौ[5] राम-रावणौ[5] ।
६] कृत-बुद्धी कृताऽमर्षौ चक्रतुर्[6] युद्धम् उत्-तमम्[6] ॥६ ॥[६
जेतव्यम् इति काकुत्स्थो मर्तव्यम् इति रावणः ।
७] वृत्तैः[7] स्व-वीर्य-सर्वस्वं[7] दर्शयेते[8] परस्परम् ॥७ ॥[७
ततः क्रोधाद् दश-ग्रीवः शरान् सं-धाय वीर्य-वान् ।
८] मुमोच ध्वजम् उद्-दिश्य राघवस्य रथ-स्थितम्[9] ॥८ ॥[८
ते शरास् तम् अनु-आसाद्य पुरन्दर-रथ-ध्वजम् ।
९] रथ-शक्तिं पराऽऽमृश्य नि-पेतुर् धरणी-तले ॥९ ॥[९
ततो रामोऽपि[10] सं-क्रुद्धश्[10] चापम् आ-सज्य वीर्य-वान् ।
१०] कृते प्रति-कृतिं कर्तुं तदै (?दे) व[11] च प्र-चक्रमे[11] ॥१०॥[१०
रावण-ध्वजम् उद्-दिश्य प्र-मुमोच[12] ततः शरम्[12] ।
११] महा-सर्पम् इवाऽसह्यं ज्वलन्तम् इव[13] तेजसा ॥११॥[११
दशग्रीव-ध्वजं छित्त्वा जगाम स महीं शरः ।
१२] स नि-कृत्तोऽपतद् भूमौ रावणस्य रथ-ध्वजः ॥१२[14]॥[१२
१३उ] ध्वजस्योन्-मथनं दृष्ट्वा रावणः सु-महाबलः[15] ।
क्रोध-जेनाऽग्निना संख्ये सं-दीप्त इव चाऽभवत्[16] ॥[17]१३॥[१३
१४] स रोष-वशम् आ-पन्नः शर-वर्षं मुमोच[18] ह[18] ।

---

१. फ—अत आरभ्य ४-र्थश्लोकस्य तृतीयपादं यावन्नास्ति ॥ २. ल$_{२}$ रा$_{२}$—०गैर्व्यग्रैर् । ३. भ—संप्रेक्षमाणास्तेऽजिघांसन्त: । ४. म—नास्ति ॥ ५. भ—राघवरावणौ । ६. भ—तदा स्थिरमयुद्ध्यताम् ॥ ७. रा$_{१}$ रा$_{२}$ फ—वृत्तौ स्व० । भ—उभौ तौ वी० । ८. रा$_{१}$ रा$_{२}$—०यंतौ । भ—युद्धेऽदर्शयतां ॥ ९. रा$_{२}$—परस्परं । फ—रथं प्रति । म भ—रथे स्थितं । १०. रा$_{२}$ फ म भ—रामोऽभिसं० । ११. रा$_{२}$ फ म भ—मनसा संप्र० ॥ १२. रा$_{१}$—०च ततः शरान् । भ—मुमोच स तु सायकम् । १३. भ—स्वेन ॥ १४. अतः परमधिकः पाठः—भ—शक्रवज्राभिनिहतः पर्वतान् (?त्) तृण (?वृत्त)राडिव ॥ १५. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब अ प्र—तु म० । म—स म० । १६. म—०चाबभौ । १७. भ—सम्प्रदीप्तोऽभवत्क्रोधादमर्षप्रभवाग्निना ॥ १८. रा$_{२}$ फ भ—ववर्ष च ।

रामस्य तुर्-गांश्[1] चैव[2] शरैर् विव्याध दारुणैः[3] ॥१४॥ [१४
१५] ते हता[3] हरयस्[3] तस्य नाऽस्खलन् नाऽपि बभ्रमुः[4] ।
वि-चेरुः[5] स्वच्छ-हृदयाः[5] पद्म-नालैर् इवाऽऽहताः ॥१५॥ [१५
१६] तेषाम् अ-सम्भ्रमं दृष्ट्वा वाजिनां रावणस् ततः ।
भूय एव सु-संरब्धः शर-वर्षम् अवाऽसृजत्[6] ॥१६॥ [१६
१७] गदाश् च परि-घांश् चैव चक्राणि मुसलानि[7] च ।
१८पू] गिरि-शृङ्गाणि वृक्षांश् च तथा शूल-परश्वधान् ॥१७[8]॥ [१७
१९पू] माया-विहितम्[9] एतद् धि शस्त्र-वर्षम्[9] अपातयत्[10] । [१८पू
वि-मुच्य राघव-रथं न्य्-अपतद्[11] वानरे बले ॥१८॥
२०] ततः सम्-अभवद् युद्धं नैकशस्त्र-मयं महत् । [१९
२१उ] तुमुलं त्रास-जननं भीमं भीम-प्रतिस्वनम् ॥१९[12]॥ [१८उ
सहस्र-शस् ततो[13] बाणान्[13] अश्रान्त-हृदयोद्यमः ।
२२] स मुमोच दश-ग्रीवो निः-शङ्केनाऽन्तर्-आत्मना ॥२०[14]॥ [२०
२३उ] व्या-यच्छमानं दृष्ट्वा तं तत्-परं रावणं रणे ।
प्र-हसन् इव काकुत्स्थः सं-दधे सायकाञ् छितान् ॥२१॥ [२१
२४] स मुमोच ततो[15] बाणांस्[16] तीक्ष्णाञ् छत-सहस्र-शः[16] ।
सायकैर् अन्तरिक्षं च चकार स निर्-अन्तरम् ॥२२॥ [२२
२५] ततस् तस्य[17] प्र-युक्तेन शर-वर्षेण भास्वता ।[18]
नभ-स्थलम् इवाऽऽभाति द्वितीयं[19] (?य-)भास्वद्-अम्बरम्[19] ॥[20] २३॥ [२३
२६] नाऽनिमित्तोऽभवद् बाणो नाऽनिर्भेत्ता न[21] निष्-क्रियः[21] । [२४

---

१. भ–०गान्धीसैः ॥ २. भ–रावणः ॥ ३. भ–हयास्तु रथात् । ४. म–चक्रमुः । ५. भ–बभूवुः स्वस्थहृ० । रा$_2$ भ–०रुः स्वस्थहृ० ॥ ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–स चास्॰ । भ–ववर्ष ह ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–मुसुलानि । ८. अतः परमधिकः पाठः—भ–तोमरानर्धचन्द्रांश्च प्रासासिकुणपांस्तथा । मुद्गरानंकुशान्भल्लान् भुशुंडी श्चृष्टिनस्तथा ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०हितमेवैतच्छस्त्र० । म–धनुर्ज्याविहितान्येव श० । १०. म भ–अपासृजत् । ११. भ–समंताद् ॥ १२. भ–तान् दृष्ट्वा निष्फलांस्तत्र रावणो राक्षसाधिपः । राघवस्य वधार्थाय शरानाशीविषोपमान् ॥ १३. भ–ततश्चान्यान् । १४. अतः परमधिकः पाठः—भ–रथे ध्वजे शरीरे च शीघ्रहस्तो निशाचरः ॥ १५. भ–तदा । १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ–बाणानथो श० । भ–बाणान् रणे शत० ॥ १७. भ–ताभ्यां । १८. रा$_2$–ततस्तु सृजतो बाणान्राघवस्य महात्मनः । १९. फ म भ–वर्ज –०यो वाम्बुदोम्बरे । २०. रा$_2$ नास्ति ॥ २१. फ–विनि० । भ–न निष्फलः ।

२७पू] तथा वि-सृजतो[1] ध्यानाद् राघवस्य महाऽऽत्मनः ॥२४॥ [२५उ
प्र-युध्यन्ताव्[2] अव-विच्छिन्नम् अस्यन्तौ सव्य-दक्षिणम्[3] ।
N] चक्रतुस् तौ शरौघेण निर्-उच्छ्वासौ परस्परम् ॥२५॥ [२६
२७उ] रावणस्य हयान् रामो हयान् रामस्य रावणः ।
२८पू] जघ्नतुस् तौ तदाऽन्योऽन्यं कृताऽनुकृत-कारिणौ[4] ॥२६॥ [२८
न बाण-जालस्य गतिर् न वाऽऽगतिः
प्र-बुध्यते[5] रुध्यत[6] एव खं[7] शरैः ।
हता[8] अदृश्यन्त तथा न राक्षसाः[8]
N] शराऽभिसंच्छन्न-तले[9] मही-तले[10] ॥२७॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे[11] रावण-ध्वज-प्रमथनो[12]
नामाऽष्टाऽशीतितमः सर्गः ॥ ८८ ॥

[बं-९२]= [एकोननवतितमः सर्गः] =[दा-११०]

तौ तथा युध्यमानौ तु सम्-अरे राम-रावणौ ।
१] ददृशुः सर्व-भूतानि वि-स्मितेनाऽन्तर्-आत्मना ॥१ ॥ [१
अर्दयन्तौ हि सम्-अरे ततस्[13] तौ स्यन्दनोत्तमौ[13] ।
२] परस्परम् अभि-क्रुद्धाव्[14] एक-रूपौ[14] बभूवतुः ॥[15]२ ॥ [२
मण्डलानि च[16] वीथीश् च[16] गत-प्रत्यागतानि च ।
३] दर्शयन्तौ बहु-विधां[17] सूत-सामर्थ्य-जां गतिम्[17] ॥३ ॥ [३
अर्दयन् रावणं रामो राघवं चाऽपि रावणः ।
४] अ-प्रवर्षणम्[18] आ-पन्नौ[18] निवर्तन-विवर्तनैः ॥४ ॥ [४
क्षिपन्तौ शर-जालानि गृहीत-स्यन्दनोत्तमौ[19] ।

---

१. ल१ अ फ—त्रिसृष्यतो ॥ २. रा१ अ—प्रविध्यंताव् । फ म भ—प्रयुद्धौ ताव् ॥ ३. भ—लघुविक्रमौ । ४. ल१ ल२ ब—०नुकृतिका० ॥ ५. भ—प्राद्दश्यते । ६. रा१ ल१ ल२ ब अ प्र-बुध्यत । म—दश्यत । ७. ल१ ल२ ब—तैः । ८. रा१ ल१ ल२ ब—सूताः प्राद्दश्यंत च तत्र ये हताः । म—न दृश्यते किंचिदपि प्रमर्दे । ९. म—रामस्य संग्रामतले । भ—शरौघसं० । १०. भ—नभस्तले ॥ ११. ब प्र भ—लंकाकाण्डे । १२. भ—०ध्वजोन्मथनं ॥ १३. भ—स्थितौ तौ रथयोस्तदा । १४. भ—०द्धौ क्रूररूपौ ।.१५. फ—नास्ति ॥ १६. रा२ भ—विचित्राणि । १७. म—०थान्सूतसामर्थ्यजान् गुणान् ॥ १८. रा१—तव दर्शनमा० । ब अ—तावदर्शनमा० । रा२—गतीर्दर्शनमा० । भ—गतिवेगसमापन्नैः ॥ १९. रा१ ल२—किरंतौ स्यं० । अ—अन्योऽन्यं स्यं० । भ—तावुभौ तु रणे स्थितौ ।

५] रेजतुस्[1] तौ[1] रण-गतौ[2] साऽऽसारौ[3] जल-दाव् इव ॥५ ॥[५
दर्शयित्वा ततस् तौ तु गतीर् बहु-विधा रणे ।[4]
६] परस्परस्याऽभि-मुखौ[5] पुनर् एव स्थितौ[6] रणे[6] ॥[7]६ ॥[६
धुर्यौ[8] धुर्येण[8] रथयोर् योक्ता[9] योक्तरि[9] वाजिनाम् ।
७] पताकाश् च पताकाभिः सम्-ईयुः स्थितयोस्[10] तयोः ॥७[10] ॥[७
रावणस्य[11] ततो रामो धनुर्-मुक्तैः शितैः शरैः ।
८] चतुर्भिश् चतुरो दीप्तैर् हयान्[12] सम्प्रत्य् अमर्षयत्[12] ॥८ ॥[८
स क्रोध-वशम् आ-पन्नो हयानां प्रत्य्-अमर्षणात्[13] ।
९] मुमोच नि-शितान् बाणान् राघवाय निशा-चरः ॥९ ॥[९
सोऽति-विद्धो बल-वता[14] दश-ग्रीवेण राघवः ।
१०] चकार[15] न वि-कारं च[16] नाऽपि च[16] व्यथितोऽभवत् ॥१०॥[१०
चिक्षेपाऽथ[17] पुनर् बाणान् वज्र-पात-सम-स्वनान् ।
११] सारथिं वज्र-पाणेश्[18] च[18] समुद्-दिश्य निशा-चरः ॥११॥[११
मातलेस् तु महा-वेगाः[19] शरीरे पतिताः शराः[19] ।
१२] न सूक्ष्मम् अपि सं-मोहं[20] व्यथां[21] वाऽजनयन् युधि[21] ॥१२॥[१२
१३पू] तया[22] धर्षणया[22] क्रुद्धो मातलेश् च तथाऽऽत्मनः ।
N] चकार शर-वर्षेण राघवो[23] वि-मुखं रिपुम् ॥१३[24]॥[१३
विंशतिं विंशतिं[25] चाऽथ शत-शोऽथ सहस्र-शः ।
N] मुमोच सायकान् वीरो राघवः[26] स्यन्दने[26] स्थितः[27] ॥१४॥[१४

---

१. म-वर्जं—चेरतुस्तौ । म-दर्शयंतौ । २. भ-रणे रूपं । ३. रा१ ल१ ल२ ब अ प्र-सञ्चरौ ॥ ४. भ-दर्शयंतौ तु तौ तत्र गतिं बहुविधां रणे । म-अत आरभ्य सर्गान्तं यावन्नास्ति । ५. भ-अन्योऽन्यं चाप्यभिमुखौ । ६. रा२ फ-व्यवस्थितौ । भ-व्यतिष्ठतां । ७. अ-नास्ति ॥ ८. भ-धुरं धुरेण । ९. रा२ फ-वक्त्रैर्वक्त्राणि । भ-वक्त्रं वक्त्रेण । १०. रा१ ल१ ल२ ब प्र-स्थिरयोस् ॥ ११. अ-परस्परं । १२. भ-प्रत्यवासर्पयद्धयान् । १३. रा२-अथ सर्पणात् । फ-अपसर्पणात् ॥ १४. भ-तदा तेन । १५. भ-जगाम । १६. रा२ फ-स न चापि ॥ १७. रा१-विक्षेपेऽथ । भ-चिक्षेप च । १८. म-०णेस्तु ॥ १९. रा१ ल१ ल२ ब अ प्र-०गाञ्छरीरे पातयञ्छरान् । २०. रा१ ल१ ल२ ब अ-समरे । २१. रा१ ल१ ल२ ब प्र-०थामज० ॥ भ-वा चकुराहवे । २२. रा१ ल१ ल२ ब अ प्र-ततः प्रधर्षयन् । २३. रा१ ल१ ल२ ब अ प्र-सयत्न । २४. अतः परमधिकः पाठः—भ-अग्नेराज्याहुतस्येव तस्य कोपो व्यजायत । स विनाम्य धनुर्भूयः पूरयित्वा महाहवे ॥ २५. भ-विंशतं ॥ २६. रा२-रावणस्यन्द० । २७. रा२ फ भ-रिपोः ॥

प्र-गृह्य राघवस् तस्य वि-कृष्य च महद् धनुः ।
१४] क्षुरेण पृथु-धारेण चकर्त्त स[1] शराऽऽसनम् ॥१५॥ [N
द्वितीयेनाऽस्य बाणेन हस्ताऽऽवापं न्य्-अपातयत् ।
१५] ततोऽस्य कवचं बाणैर् व्य्-अधमत् सर्व-तः शितैः[2] ॥१६॥ [N
स छिन्न-धन्वा[3] पौलस्त्यो रथाद् आ-दाय कार्मुकम् ।
१६] ववर्ष शर-वर्षेण स-रथं राघवं पुनः ॥१७॥ [N
मायां च वि-षमां[4] चक्रे प्र-यत्नाद् धनदाऽनुजः ।
N] सृजञ्[5] छर-सहस्राणि[5] बहूनि कृतहस्त-वत् ॥१८॥ [N
गदानां मुसलानां[6] च वज्राणां चैव[6] निः-स्वनः[7] । [१७पू
१७] बभूव तस्मिन् सम्-अरे पततां राघवं[8] प्रति[8] ॥१९॥ [N
राघवश् चाऽपि दुर्-धर्षो घोरम् अस्त्र-मयं[9] महत् ।
१८] शर-वर्षेण[10] मेधावी प्रत्य्-अवारयद् आशु[11] तत्[11] ॥२०[12]॥ [N
ततो देवाः स-गन्धर्वाः सिद्धाश् च परमर्षयः ।
१९] चिन्ताम् आ-पेदिरे[13] सर्वे समं[14] युद्धं निर्-ईक्ष्य तत्[14] ॥२१॥ [२०
स्वस्त्य् अस्तु राघवायेति देवाः सर्षि-गणा (ऽ)ब्रुवन् ।[15]
२०] लोकेभ्यश् चैव सर्वेभ्यस् तदाऽशंसन्त[16] सर्व-शः ॥[17]२२॥ [२१
२१पू] जहीऽमं पाप-कर्माणम् इति देवास् तम् अब्रुवन् ।[18]
N] विमान-स्था महाऽऽत्मानं रामम् अक्लिष्ट-कारिणम् ॥[19]२३॥ [N
रामो वि-जयतां राजा धर्मोत्तरम्[20] इदं जगत् ।

---

१. फ–च ॥ २ रा१ ल१ ल२ ब अ प्र–स्थितैः ॥ ३. भ–छिन्नवर्मा ॥ ४. रा१ ब अ प्र–विक्रमी । ल१ ल२–विक्रमे । ५. रा२ फ–व्यसृजच्छरवर्षाणि ॥ ६. भ–परिघानां च मुसलानां च । ७. ल१–०नैः । ८. रा१ ल१ ल२ ब अ प्र–राघवोपरि ॥ ९. रा१ ल१ ल२ ब अ प्र भ–शस्त्र० । १०. ल१ ल२ ब अ प्र–शरवर्ष० । ११. रा१ ल१ ल२ ब अ प्र–आशुगैः ॥ १२. अतः परमधिकः पाठः—भ–शराणां पुंखघातैश्च क्षुभिताः सप्तसागराः । क्षुब्धानां सागराणां च पातालतलवासिनः ॥ व्यथिताः पन्नगाः सर्वे दानवाश्च चकंपिरे । चकंपे मेदिनी सर्वा सशैलवनकानना ॥ भास्करो निष्प्रभश्चासीत् प्रववौ न च मारुतः ॥ १३. भ–अभ्यगमन् । १४. भ–सकिन्नरमहोरगाः । रा१ अ–०क्ष्य ह । ल१ ल२ ब–०क्ष्य च ॥ १५. टि.–आर्षः सन्धिः । भ–स्वस्ति गोब्राह्मणेभ्योऽस्तु लोकास्तिष्ठंतु शाश्वताः । १६. रा१ ल१ ल२ ब अ प्र–तदा स्वस्त्यस्तु । १७. भ–जयतां राघवः संख्ये रावणं राक्षसेश्वरं । १८. भ–एवमूचुर्हि पश्यंतस्तद्युद्धं रामरक्षसोः । १९. भ–नास्ति ॥ २०. रा१ ल१ ल२ ब प्र–धर्मोत्तरं ॥

N] भवत्व् इति महर्षीणां वाचोऽश्रूयन्त सर्व-शः ॥२४॥ [२२पू
मुमुचुः पुष्प-वर्षं च गन्धर्वाऽप्सरसो महत् ।[1]
N] दिव्यं मूर्धनि[2] रामस्य पूजयन्तोऽस्य[3] कर्म तत् ॥[4]२५॥ [N
लक्ष्मणस् त्व्[5] अब्रवीद्[5] रामं सु-ग्रीवश् च हरीऽऽश्वरः ।
N] हर्षयन्तौ स्तुवन्तौ च स च राजा वि-भीषणः ॥२६॥ [N
किम् इहोपेक्षसे वीर शत्रुं हस्तम् उपाऽऽगतम् ।
N] नैष शक्य इहाऽन्येन जेतुं[6] शत्रु-भयङ्करः[7] ॥२७॥ [N
त्वम् अस्य हन्ता नाऽन्योऽस्ति सर्व-लोकेषु मान-द ।
N] तत् कुरुष्व महा-बाहो कर्मौपयिकम्[8] आत्मनः ॥२८॥ [N
भवन्त्व् अद्य निरा-बाधाः सर्वे लोका नरेश्वर ।
N] सुर-शत्रौ नि-पतिते रावणे लोक-रावणे ॥२९॥ [N
लीलायसे किम् अद्य त्वं जहीऽमं पापम् ओजसा ।
N] प्रति-ज्ञां स-फलाम् अद्य कुरु हत्वा दशाऽऽननम् ॥३०॥ [N
इत्य् उक्तः स[9] नर-श्रेष्ठो रामस्[9] तान् प्रत्य्-अपूजयत् ।[10]
N] बाढम् इत्य् अब्रवीच् चैतास् छरान् आ-दाय षोडश ॥[11]३१॥ [N
शरेणैकेन रामस तु रावणस्याऽथ लाघवात् ।
धनुषो ज्यां दृढां दूराच् चिच्छेद कृतहस्त-वत् ।[11]
N] तस्य तद् दारुण-रवं छिन्न-ज्यं चाऽस्फुटद् धनुः ॥३२॥ [N
सोऽन्यत् कार्मुकम् आ-दाय स-ज्यं चक्रे त्वराऽन्वितः ।
कोसलेन्द्रश् चतुर्भिश् च रिपोस् तस्याऽभि-धावतः[12] ।
N] जघान चतुरो वाहांस् ते हताः सहसाऽपतन्[13] ॥३३॥ [N
षष्ठेनाऽथ[14] स बाणेन सूतम् अस्य न्य्-अपातयत् ।
N] हृदि भित्त्वाऽर्ध-चन्द्रेण[15] ततः सं-धाय सप्तमम् ॥३४॥ [N
ततोऽस्य रथ-शक्तिं च[16] मुकुटं च महर्द्धि-मत् ।

---

१. अ—मुमुचुर्युधि वर्षं च बाणानां पतिताः शराः । २. रा₁ ल₁ ल₂ ब भ—च मूर्ध्नि । ३. भ—वर्जे—०न्तोऽपि । ४. अ—नास्ति ॥ ५. रा₂ फ—चाब्र० ॥ ६. रा₁ अ—हंतुं । ७. रा₁—शत्रुभं० । फ—०र ॥ ८. ल₁ ल₂ प्र रा₂—कर्मौपा० ॥ ९. रा₂ फ भ—समरे श्रेष्ठः सर्वांस् । १०. अ—अत आरभ्य "चक्रे त्वरान्वितः" इति ३३-शश्लोकपूर्वार्धं यावन्नास्ति । ११. रा₁ ल₁ ल₂ ब प्र—नास्ति ॥ १२. भ—तस्याऽथ धा० । १३. अ—राक्षसोऽभवत् । रा₁ ल₁ ल₂ ब प्र रा₂ फ—राक्षसाभवन् ॥ १४. रा₁ ल₁ ल₂ ब अ प्र—सज्जेनाथ । १५. भ—विद्धार्ध० ॥ १६. ल₁ ल₂ ब प्र—स ।

N] चिच्छेद परमाऽऽयस्तो राघवः शत्रु-कर्षणः ॥३५[1]॥ [N
अष्टमेनाऽथ[2] बाणेन रथात् तस्य[3] पतिष्यतः[3] ।
जहार पृथु-धारेण[4] शिरो ज्वलित-कुण्डलम् ।
N] शिरस्य् अप-हृते तस्मिंस् ततो नव-शिरा बभौ ॥३६॥ [N
ततो भूयस् त्रिभिर् बाणैः शिरांसि त्रीणि राघवः ।
पातयामास सं-क्रुद्धः स बभूवाऽथ षड्-शिराः ॥[5]३७॥[N
N] तेषां षण्णां शरैस् तीक्ष्णैः पञ्च चिच्छेद राघवः ।[6] [N
२४पू] शिरांसि परम-क्रुद्धः सोऽभूद् एक-शिरास् ततः ॥[7]३८॥
तद् अप्य् अशनि-संकाशं छिन्नं रामेण दृश्यते ।[8] [२७
२५] छिद्यते जायते चैव[8] रावणस्य पुनः पुनः ॥३९॥
रामेण सम्-अरे रोषात् राक्षसस्य दुर्-आत्मनः ।[8]
शतम् एकोत्तरं छिन्नं शिरसां तुल्य-वर्चसाम् ॥४०॥ [२९
२६] न चैव राक्षसेन्द्रस्य दृश्यते जीवित-क्षयः[9] ।
ततः सर्वाऽस्त्र-विच्[10] छूरः[10] कौसल्याऽऽनन्द-वर्धनः ।
२८] वि-षमैर्[11] बहुभिर् युक्तं[11] चिन्तयामास राघवः ॥४१॥ [३१
रावणो हत-सूतश्[12] च हताऽश्वश् छिन्न-कार्मुकः ।
N] र (१अ)थ-(१थ)शक्तिं महा-घोराम् आ-दायाऽवाऽतरद् रथात् ॥४२[N
स तां मुक्ताम् इवाऽऽकाशे भीमां सौदामिनीं यथा ।
N] काल-रात्रिम् इवाऽत्य्-उग्राम् उद्-यम्याऽभ्य्-अद्रवद् रणे[13] ॥४३॥[N
तम् आ-द्रवन्तं भीमाऽक्षं रुधिरौघ-परिप्लुतम्[14] ।
N] शक्ति-हस्तं कृताऽन्ताऽऽभं सौमित्रिः प्रत्य्-अपद्यत ॥४४॥ [N
शरैर् आशीविषाऽऽकारैर् अथैनं हृदि लक्ष्मणः ।
N] बिभेद पृथु-धारैश् च दशभिर् हेम-भूषितैः[15] ॥४५॥ [N

---

१. भ—नास्ति ॥ २. रा$_2$ फ—तथाष्टमेन । ३. रा$_2$ फ—तस्योत्प० । भ—तस्मात्प० । ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—क्षुरधा० ॥ ५. फ—नास्ति । ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—नास्ति ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—शीघ्रं ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—एवमेव रणे तस्मिञ्छिरो नैवाप संक्षयं ॥ ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—०क्षये । १०. रा$_2$—०विद् वीरः । ११. रा$_2$ फ—वर्ज—मार्गणैर्बहुभिर्युक्तं । भ—विमर्शैर्ब० ॥ १२. रा$_2$ फ भ—हतयंता ॥ १३. रा$_2$ फ भ—बली ॥ १४. भ—०घप्रवर्षितं ॥ १५. रा$_1$ अ—वर्ज—०भूषणैः ॥

स भिन्न-वर्मा रुधिरं वमन् वक्त्रेण रावणः ।
N] ततः क्रुद्धो दश-ग्रीवस् तां शक्तिं हेम-भूषणाम् ॥४६॥ [N
लक्ष्मणाय प्र-चिक्षेप जिह्वां वैवस्वतीम् इव ।
N] अ-प्राऽऽप्ताम् एव तां शक्तिं चिच्छेद रघु-नन्दनः ॥४७॥ [N
तां शक्तिं शत-धा[1] कृत्वा[2] लक्ष्मणः पर-वीर-हा ।
चक्रे सु-तुमुलं युद्धं वानरैः परि-वारितः ।
N] वि-संज्ञं[3] रावणं कृत्वा स ननाद च हर्षितः ॥४८॥ [N
मुहूर्ताल् लब्ध-संज्ञस् तु रावणः क्रोध-मूर्च्छितः ।
N] रामम् अभ्य्-अद्रवत् प्रेक्ष्य स्रवन् गिरिर् इवाऽपरः ॥४९[4]॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे[5] राम-रावण-युद्धं[6] नामै-
कोननवतितमः सर्गः ॥ ८९ ॥

---

१. रा, ल, ल२ ब अ प्र—च द्विधा । २. भ—भित्त्वा । ३. भ—वर्ज-निःसंज्ञं ॥
४. अतः परमधिकः पाठः—रा, ल, ल२ ब अ प्र—ततोऽभवत्पुनर्युद्धं वृत्रवासवयोरिव । रामरावणयोर्युद्धं सुघोरं रोमहर्षणम् ॥ गन्धर्वाप्सरसश्चैव सिद्धाश्च सह चारणैः । द्रष्टुमभ्याययुः सर्वे तद्युद्धं रोमहर्षणम् ॥ ततः क्रुद्धो महाबाहुर्वानराणां कीर्तिवर्धनः ॥ रा, ल, ल२ ब अ प्र भ—संधाय रामो धनुषि शरमाशीविषोपमम् ॥ मारीचो निहतो यैस्तु दूषणश्च खरस्तथा । त्रिशिराश्च विराधश्च हतो वाली च संयुगे ॥ त इमे सायका युद्धे सर्वे प्रत्यर्पिता मया । किं नु तत्कारणं येन रावणे मंदतेजसः ॥ इति संचिंतयन्सर्वं सोऽप्रमत्ततरोऽभवत् । ववर्ष शरवर्षाणि राघवो रावणोरसि ॥ रावणोऽपि ततः क्रुद्धो रथाऽधो राक्षसेश्वरः । गदामुसलवर्षेण रामं प्रत्यर्दयद्रणे*[1] ॥ तत्प्रवृत्तं महारौद्रं तुमुलं रोमहर्षणम् *[2] । रा, ल१, ल२ ब अ प्र—उभयोः सृजतोर्बाणान्रामरावणयोर्मृधे ॥ ५. प्र भ—लंकाकांडे । ६. भ—रावणशिरश्छेदो ॥

---

*१ अतः परं भ—गगनं गगनाकारं सागरः सागरोपमः । रामरावणयोर्युद्धं रामरावणयोरिव ॥

*२ अतः परं भ—अंतरिक्षे च भूमौ च पुनश्च गिरिमूर्धनि । देवदानवयक्षाणां पिशाचोरगरक्षसाम् ॥ पश्यतां तन्महद्युद्धं सर्वरात्रमवर्तत । नैव रात्रिं न दिवसं न मुहूर्तं न च क्षणम् ॥ रामरावणयोर्युद्धं विश्राममगमत्तदा ॥

[1]अथ संस्मारयामास मातली राघवं तदा ।
३९] अ-जानन् इव वीर त्वं किम् एवम्[2] अभि-वर्तसे[2] ॥[3]१ ॥ [१
वि-सृजाऽस्मै वधायेदम्[4] अस्त्रं पैतामहं वि-भो ।
४०] विनाश-कालः प्रथितो यत् सुरैः सोऽभि-वर्तते[5] ॥[6]२ ॥ [२
ततः[7] सं-स्मारितो रामस्[7] तेन वाक्येन मातलेः ।
४२] जग्राह स शरं दीप्तं निः-श्वसन्तम् इवोरगम् ॥३ ॥ [३
यम् अस्मै प्रथमं प्राऽदाद् अगस्त्यो भग-वान् ऋषिः ।
४३] ब्रह्म-दत्तं महा-बाणं जग्राह युधि तद्-वधे[8] ॥४ ॥ [४
ब्रह्मणा निर्-मितं पूर्वम् इन्द्राऽर्थम्[9] अ-मितौजसा[9] ।
४४] दत्तं सुर-पतेः पूर्वं त्रैलोक्य-जय-कांक्षिणः[10] ॥५ ॥ [५
यस्य[11] वाजेषु पवनः[11] फले पावक-भास्करौ ।
४५] शरीरम् आकाश-मयं गौरवे मेरु-मन्दरौ ॥६ ॥ [६
पर्वस्व् अपि च वि-न्यस्ता लोक-पालाः महौजसः ।[12]
४६] धन-दो वरुणश् चैव पाश-हस्तस् तथाऽन्तकः ॥७ ॥ [N
जाज्वल्यमानं वपुषा सु-पुङ्खं हेम-भूषितम् ।
४७] तेजसा सर्व-भूतानां कृतं[13] भास्कर-तेजसा[13] ॥८ ॥ [७
स-धूमम् इव कालाऽग्निं दीप्यमानं[14] रविं यथा[14] ।

---

१. इतः पूर्वमधिकः पाठः—भ-ततो युद्धपरिश्रांतं समरे चिंतया स्थितम् । रावणश्चाग्रतो दृष्ट्वा युद्धाय समुपस्थितः ॥ २. भ-एनमनुव० । ३. अतः परमधिकः पाठः—भ-अद्य जन्म यथार्थं ते भविष्यति महाबल । राक्षसेन्द्रं दुरात्मानं हत्वैनं रावणं रणे ॥ अद्य वीर सुयुद्धं ते दृष्ट्वा दिव्येन चक्षुषा । वृतो देवर्षिभिः श्रीमान् सुप्रीतोऽस्तु पितामहः ॥ अद्य देवाः सगंधर्वाः सिद्धाश्च परमर्षयः । निर्भया विचरिष्यंति त्वत्कृतेन नरोत्तम ॥ ४. भ-वधाय त्वं । ५. रा, ल, ल₂ ब अ प्र-०रभि० । फ म-सौम्य व० । ६. भ-विनाशो निर्मितो ह्यस्य स्वयमेव स्वयंभुवा ॥ अतः परमधिकश्च पाठः—उत्तमांगं न चैतस्य छेतव्यं राघव त्वया । नैष मूर्ध्नि प्रभो वध्यो वध्य एष हि मर्मसु ॥ ७. रा, ल, ल₂ ब अ प्र-स्मारितस्तेन रामोसौ ॥ ८. रा₁ ल₁ ल₂ ब अ प्र-विधिवद्धनुः । भ-परवीरहा ॥ ९. भ-०न्द्रस्यार्थेऽमितौजसः । १०. रा₂ म-त्रिलोकज० ॥ ११. भ-पवनो यत्र पुंखे तु ॥ १२. भ-प्रति पर्व च विन्यस्ता भगवंतो जयावहाः । १३. रा, अ-भास्करस्य च ते० । रा₂ फ म भ-कृतं भास्वरवर्चसम् ॥ १४. भ-लेलिहानमिवोरगम् ।

४८] रथनागाऽश्व-वृन्दानां[1] भेदनं क्षिप्र-कारिणम् ।।[2]९ ।। [८
N] वारणं[3] परि-घाणां च गिरीणां चैव भेदनम् ।[2]
४९पू] नाना-रुधिर-दिग्धाऽङ्गं[4] मेदो-दिग्धं[5] सु-दारुणम् ।।१०।। [९
N] वज्र-नाभं महा-नादं नानाऽशनि-विदारणम् ।[6]
४९उ] सर्व-वित्रासनं भीमं श्वसन्तम् इव पन्न-गम् ।।११[7]।। [१०
काक-गृध्र-बलाकानां[8] गोमायु-वृक-रक्षसाम्[9] ।
५०] नित्यं भक्ष-प्रदं[10] युद्धे यम-रूपं भयाऽऽवहम् ।।१२।। [११
नन्दनं वानरेन्द्राणां रक्षसाम् अव-सादनम् ।[11] [१२पू
५१] द्विषतां कीर्ति-हरणं प्रकर्ष-करम्[12] आत्मनः ।।१३।। [१३उ
अभि-मन्त्र्य ततो रामस् तं महेषुं महा-भुजः ।
५२] वेद-प्रोक्तेन[13] विधिना[13] सं-दधे कार्मुके बली ।।१४[14]।। [१४
स रावणाय वेगेन[15] चिक्षेप शरम् उत्-तमम् । [१६पू
५४] महा-वेगं महा-घोषं[16] गिरीणाम् अपि दारणम्[17] ।।१५[18]।। [N
५५पू] स शक्र-धनुषो[19] मुक्तो हन्तुं रामेण[20] रावणम्[20] ।[21]
धूम-पूर्वं प्र-जज्वाल प्राऽऽप्य[22] वायु-पथं महत्[23] ।।१६।। [N
५६] स वज्र इव दुर्-धर्षो[24] वज्र-पाणि-विसर्जितः[24] ।
५७पू] कृताऽन्तक[25] इवाऽवार्यो[25] न्य्-अपतद् रावणोरसि[26] ।।१७।। [१७

---

१. भ—वरनागाश्ववृक्षाणां । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—नास्ति ॥ ३. रा$_2$ फ म—द्वाराणां । ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—०रसिक्तांगं । ५. भ—मेदःसिक्तं ॥ ६. रा$_1$ ल ल ब अ प्र भ—नास्ति । ७. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब अ प्र म—दुराधर्षं दुर्विषहं सर्वदुष्टविनाशनम् । आशीविषसमस्पर्शं वेगसंपन्नमूर्जितम् ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—०विहंगानां । रा$_2$ फ म—०बकानां च । ९. ल$_1$ ल$_2$ ब प्र—०युमृगर० । भ—०युगणर० । अ—"०रक्षसाम्" इत्यारभ्य "द्विषतां कीर्तिह०" इत्यन्तो नास्ति । १०. रा$_1$—भक्ष्यप्रदं । ११. म—नास्ति । अतः परमधिकः पाठः—भ—राजितं विविधैः पत्रैश्चारुचित्रैर्गरुत्मतः । तमुत्तमेषुं लोकानामिक्ष्वाकुभयनाशनम् ॥ १२. रा$_2$ फ—कीर्तिप्रक० । म भ—प्रहर्ष० ॥ १३. म—०प्रयुक्तवि० । १४. अतः परमधिकः पाठः—भ—तस्मिन्संधायमाने तु राघवेण शरोत्तमे । वित्रेसुः सर्वभूतानि चचाल च वसुंधरा ॥ १५. रा$_2$ फ म—तं वेगात् । १६. म—०घोरं । १७. रा$_1$ प्र—वर्जं—०दारुणं । १८. भ—स रावणाय संक्रुद्धो भृशमायम्य कार्मुकम् । चिक्षेप परमामर्षी तं शरं मर्मघातिनम् ॥ १९. रा$_2$ फ म भ—०नुषा । २०. भ—शत्रुं महात्मना । २१. भ्र—नास्ति । अतः परमधिकः पाठः—भ—सहितः परमास्त्रेण वियोज्य विसृतः शरः । २२. ल$_1$ ल$_2$ ब प्र—नास्ति । २३. भ—तदा । २४. भ—वज्रबाहु० । २५. रा$_2$ फ म—०न्त इव चावार्यो । भ—०न्त इव दुर्वार्यो । २६. रा$_2$ अ भ—राक्षसोरसि ॥

N] स नि-मग्नो[1] महा-घोरः[1] शरीराऽन्त-करः शरः ।
५७उ] बिभेद हृदयं तूर्णं रावणस्य दुर्-आत्मनः[2] ॥[3]१८॥[१८
रुधिराऽक्तः स वेगेन रावणाऽन्त-करः शरः ।[3]
५८] रावणस्य हरन् प्राणान् विवेश[4] धरणी-तले[4] ॥१९॥ [१९
स शरो रावणं हत्वा[5] लोहिताऽऽर्द्री-कृत-च्छविः[5] ।
५९] कृत-कर्मा निभृत-वत्[6] स्व-तूणं[6] पुनर् आऽविशत् ॥२०॥ [२०
तस्य[7] हस्ताद् धतस्याऽऽशु[7] कार्मुकं तत् स-सायकम् ।[8]
६०] प्राऽभ्रश्यत सह प्राणैर् भ्रश्यमानस्य जीवितम्[9] ॥२१॥ [२१
गताऽसुर् भीम-वेगस् तु राक्षसेन्द्रो हत-द्युतिः ।
६१] पपात सहसा भूमौ पुरा[10] वृत्रो हतो[10] यथा ॥२२[8]॥[२२
तं दृष्ट्वा[11] पतितं भूमौ हत-शेषा निशा-चराः ।
६३] हत-नाथा भय-त्रस्ता दुद्रुवुः सर्व-तो दिशम् ॥२३[12]॥[२३
नन्दन्तश्[13] चाऽभि-पेतुस् ते[14] वानरा द्रुम-योधिनः[15] ।[16] [२४पू
N] दशग्रीव-वधाद्[17] धृष्टा[17] राघवस्य जयैषिणः ॥[18]२४॥
तेऽर्दिता वानरैर् हृष्टैर् लङ्काम् अभि-ययुर् भयात् ।
६४] हताऽऽश्रयत्वात् करुणैर्[19] बाष्प-प्रस्रवणैर् मुखैः ॥२५॥[२५
ततो वि-नेदुः सं-हृष्टा वानरा जित-काशिनः ।
६५] वदन्तो राघव-जयं[20] रावणस्य वधं[21] तथा[21] ॥२६॥ [२६
६६पू] अथाऽन्तरिक्षे व्य्-अनदत् सौम्यस्[22] त्रिदश-दुन्दुभिः ।[23]
६७उ] दिव्य-गन्ध-वहश् चैव मारुतः स-सुखो[24] ववौ ॥२७॥ [२७

---

१. भ–विसृष्टो महावेगः । २. रा₂ फ–महास्वनः । म–महात्मनः । ३. भ–नास्ति ॥ ४. भ–भित्त्वा चैव क्षितिं गतः ॥ ५. भ–भित्त्वा रुधिरार्द्रांकि० । ६. भ–निववृते स तू० । ७. म–ततो हस्ताद्रक्षःपतेः । ८. भ–समुद्रं समुपस्पृश्य वसुधायां व्यशीर्यत । रावणस्य शरीरं तु पंचनल्वानुविस्तृतं । ९. म–जीवितात् ॥ १०. रा₂ फ म–वृत्रो वज्रह० । ११. रा₂ फ–तथा । १२. भ–व्यद्रवंत दिशः सर्वा वानरैरर्दिता रणे ॥ १३. म भ–नर्दंतश् । १४. रा₂ फ भ–वर्जं—च । १५. रा₁ ल₁ ल₂ ब अ प्र–द्रुतयो० । १६. अतः परमधिकः पाठः—भ–हतेश्वरा रजोध्वस्ता हतभूयिष्ठ-वाहनाः । १७. रा₁ ल₁ ल₂ ब अ प्र–०वधं दृष्ट्वा । १८. भ–दशग्रीवं हतं दृष्ट्वा विजयं राघवस्य च ॥ १९. भ–वर्जं—करुणं ॥ २०. भ–रामविजयं । २१ रा₂ फ–च ते वधम् । म–कृतं वधम् ॥ २२. भ–भृशं । २३. अतः परमधिकः पाठः—भ–निहते राक्षसे तस्मिन् रावणे देवकंटके । जये तु सुमहान्नाद आकाशे समजायत । २४. रा₁ अ–सुसुखो ॥

नि-पपाताऽन्तरिक्षाच्[1] च[1] पुष्प-वृष्टिस् तदा भुवि ।
६८] किरन्ती राघव-रथं दुर्-आपा[2] याऽल्प-चेतसाम्[2] ॥२८॥ [२८
राघव-स्तुति-संयुक्ता[3] गगने[4] च वि-चुक्रुशुः ।
६९] साधु साध्व् इति हृष्टानां[5] देवतानां शुभा[6] गिरः[6] ॥[7]२९॥[२९
आ-विवेश महा-हर्षो देवानां सह चारणैः ।
७२] रावणे नि-हते घोरे सर्वलोक-भयाऽऽवहे ॥३०॥ [३०
N] प्र-शशंस च तान् सर्वान् कुलगोत्रोपचारतः[8] ।[9]
७४पू] ऋक्ष-वानर-गोपुच्छान् राक्षसं[10] च वि-भीषणम्[10] ॥[11]३१॥[N
भवतां बाहु-वीर्येण वि-क्रमेण बलेन च ।
७५] हतो राक्षस-राजोऽयं रावणो लोक-रावणः ॥३२॥ [N
अत्य्-अद्भुतम् इदं कर्म भवतां कीर्ति-वर्धनम् ।
७६] कथयिष्यन्ति पुरुषा[12] यावद् भूमिर् धरिष्यति ॥३३॥ [N
एतच् चाऽन्यच् च वि-विधं युक्तम् अर्थ-वद्[13] उत्-तमम्[13] ।
७७] पुनः पुनर् उवाचैनान्[14] रामः सं-हर्षयन् गिरा ॥३४[15]॥[N
स[16] च[16] तैः पृथिवी-पालः शस्यमानः[17] समन्त-तः ।
८०] सु-हृद्भिः शुशुभे धी-मान्[18] देवैर् इव मरुत्-पतिः[19] ॥३५॥ [N

---

१. भ-ततोऽतरिक्षात्पतिता । २. रा$_{2}$ फ भ-वर्जं—०पा चाल्प० । भ-दिव्यैः पुष्पैः सुगन्धिभिः ॥ ३. भ-०वस्तवसं० । ४. म-अपि चक्रुर्मिथः कथां । भ-०ने चापि शुश्रुवुः । ५. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-निष्ठानां । भ-वाचश्च । ६. भ-महात्मनां । ७. अतः परमधिकः पाठः—भ-नारदस्तुंबुरुर्गार्ग्यः सुदामाथ हाहा हुहूः । एते गंधर्वराजानो राघवस्याग्रतो जगुः ॥ ऊर्वशी मेनका रम्भा पंचचूडा तिलोत्तमा । उपानृत्यंत काकुत्स्थं प्रहृष्टा रक्षसो वधात् ॥ ८. रा$_{2}$ फ-०गोत्राभिधानतः । ९. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-वर्जं—प्रशशंसुश्च सचिवाः कुलं गोत्रोपचारतः । म-प्रशशंसुश्च तान्सर्वान्देवदानवसंभवान् । भ-ततः सकामं सुग्रीवमंगद सुहृदस्तथा । प्रीत्या परमया युक्तो हत्वा राक्षसपुंगवं ॥ १०. रा$_{1}$-वानरं च वि० । भ-लक्ष्मणं सवि० । ११. अतः परमधिकः पाठः—म-उवाचेदं तदा सर्वान् रामः सुमधुरं वचः ॥ १२. ल$_{1}$ ल$_{2}$ ब प्र-भूतानि ॥ १३. भ-अर्थमनुत्तमं । १४. रा$_{2}$ फ-वर्जं—०चैनं । म-०चेदं । भ-०चैतान् । १५. अतः परमधिकः पाठः—भ-एवमुक्ताश्च ते तेन हृष्टा राघवमब्रुवन् । तवैव तेजसा दग्धः पापोऽयं सपुरःसरः ॥ अस्माकमल्पवीर्याणां शक्तिः का रघुनन्दन । कर्तुमेतद्रणे कर्म यत्त्वया सुमहत्कृतम् ॥ १६. भ-एवं । १७. रा$_{2}$ फ म भ-पूज्यमानः । १८. भ- श्रीमान् । १९. म-शतक्रतुः ॥

ततः स रामः सु-ग्रीवम् अङ्ग-दं च वि-भीषणम्[1] ।
७३] सस्वजे लक्ष्मणं प्रीतो हत्वा राक्षस-पुङ्गवम् ॥३६॥ [३१

ततो जगाम प्र-शमं च मारुतो
दिशः प्र-सेदुर् वि-मलं नभोऽभवत् ।
मही[2] चकम्पे न तदाऽशुभाऽऽवहा[2]
८१] शुभ-प्रभश्[3] चैव ततापं भास्-करः[3] ॥३७॥ [३२

ततस् तु सुग्रीवविभीषणाऽऽदयः[4]
सुहृद्-गणास्[5] ते[6] सह-लक्ष्मणास् तदा ।
सम्-एत्य हृष्टा वि-जयाय[7] राघवं
८२] रणेऽभ्य्-अनन्दन् विधिनाऽभ्य्-अपूजयन्[8] ॥३८॥[३३

स तु निहत-रिपुः स्थिर-प्रतिज्ञः
स्वजनबलाऽभिवृतो रणेऽभ्य्-अराजत्[9] ।
रघु-कुल-नृप-नन्दनो महौजास्
८३] त्रिदश-गणैर् इव[10] पूजितो महेन्द्रः[10] ॥३९॥ [३४

इति समर-जयाय[11] कोशलेन्द्रो
वि-जयम् अवाऽऽप्य स तैश् च पूज्यमानः ।
रण-शिरसि जनेन्द्र[12] इन्द्र-कर्मा
N] व्यपहृत-शल्य[13] इवाऽऽस[14] वीत-शोकः ॥४०[15]॥[N

इत्यार्षे रामायणे युद्ध-काण्डे[16] रावण-वधो नाम
नवतितमः सर्गः ॥ ९० ॥[17]

---

१. रा$_१$ ल$_१$-महाबलः । ल$_२$ ब अ प्र रा$_२$ फ म-महाबलम् ॥ २. रा$_२$ फ म-०दा भयावहं । भ-स्थिता महेंद्रप्रमुखाश्च देवताः । ३. रा$_१$ ल$_१$ ल$_२$ ब अ प्र-०प्रदश् चैव तता० । भ-स्थिरप्रभश्चाप्यभवद्दिवाकरः ॥ ४. रा$_१$ ल$_१$ ल$_२$ ब अ प्र-०णौ च । ५. रा$_२$ फ म भ-०द्विशेषाः । ६. भ-०येन । ७. रा$_२$ फ-वर्जं—विजयादपू० । भ-विधिवद् व्यपू० ॥ ८. भ-विराजमानः । ९. म-नास्ति । १०. भ-अभिपूजितो यथेन्द्रः ॥ ११. रा$_१$ ल$_१$ ल$_२$ ब अ प्र-परविजयाय । १२. रा$_२$ फ म-यथेंद्र । १३. रा$_२$-व्यपहत० । १४. ल$_१$ ल$_२$ ब म-इव स । १५. भ-नास्ति ॥ १६. ब अ भ-लंकाकांडे । रा$_२$ म-महर्षिवाल्मीकिविरचिते युद्धपर्वणि । १७. अतः परं सर्गोऽयमधिकः पठितः—भ-रावणं निहतं दृष्ट्वा राघवेण

महात्मना । राक्षसा (? सा) श्चि (? नि) हतान्स (? ताः स) र्वे नादान्मुंचंति वानराः ॥ रावणं पतितं दृष्ट्वा ससारथिपुरोगमम् । रामस्य भयसंत्रस्ता दिग्विदिग्भ्यो विदुद्रुवुः ॥ सागरांतर्गताः केचित्केचित्पर्वतमाश्रिताः । याता रसातलं केचित्केचिद्वनमुपाश्रिताः ॥ प्रविष्टाश्चापरे लंकां पुत्रस्नेहेन राक्षसाः । समुद्रे पतिताः केचिद्राक्षसा विद्रुता रणे ॥ हाहाभूतास्तदा सर्वे बालवृद्धजनाकुला । लंका प्रचलिता सर्वा राक्षसानां च विद्रवात् ॥ वानराश्च महात्मानो लंकां गच्छन्ति चापरे । प्रविशंति ततो गत्वा वानराः सिंहविक्रमाः ॥ पश्यंतो हर्षिताः सर्वे सर्वरत्नोपशोभिताम् । द्वारा मणिमयास्तत्र तपनीयेन रंजिताः ॥ तोरणानि च सर्वाणि शक्रचापनिभानि च । मुक्तादामैश्च सर्वत्र माल्यदामविभूषितम् ॥ द्वारं दृष्ट्वा महात्मानो विस्मयं परमं गताः । प्राकाराणि च सर्वाणि तथाट्टपरिखाणि च ॥ देशे देशे च तत्रैव प्राकारवरशोभिताम् । पूर्णकुंभैश्च सर्वत्र द्वारि द्वारि च निष्ठिताम् ॥ दशयोजनविस्तीर्णां त्रिंशद्योयजनमायताम् । अष्टद्वारां पुरीं लंकामष्टप्राकारवेष्टिताम् ॥ शारदाभ्रप्रतीकाशां निर्मितां विश्वकर्मणा । सुवर्णरचितां दिव्यामुद्यानैरुपशोभिताम् ॥ मणिमुक्ताप्रवालैश्च पताकाभिश्च शोभिताम् । दृष्ट्वा विभूषितां लंकां वानरा विस्मयं गताः ॥ भ्रातरं निहतं दृष्ट्वा शयानं रणपांशुषु । शोकवेगपरीतात्मा विललाप विभीषणः ॥ वीर विक्रांत विख्यात विनीत नयकोविद । महार्हशयनो भूत्वा किं शेषेऽद्य हतो भुवि ॥ विक्षिप्य दीर्घौ निश्चेष्टौ भुजावंगदभूषणौ । मुकुटेनापविद्धेन भास्कराकारवर्चसा ॥ तदिदं वीर संप्राप्तं यन्मया पूर्वमीरितम् । काममोहपरीतस्य तद्वै न रुचितं तव ॥ यद्दर्पान्न प्रहस्तो वा नेंद्रजिच्चापरे जनाः । मद्वाक्यमन्ववर्तंत तस्यैतत्कार्यमागतम् ॥ त्वमेतत्सुनीतानां गतो धर्मविपर्ययः । गतः सत्यस्य संक्षेपः प्रसवानां गतिर्गता ॥ आदित्यः पतितो भूमौ मग्नस्तमसि चंद्रमाः । चित्रभानुः प्रशांतार्चिः सिक्तो घटशतैरिव ॥ रावणाग्निः प्रशांतोऽद्य राममेघशरांबुभिः । तस्मिन्निपतिते भूमौ वीरे शस्त्रभृतां वरे ॥ किं शेषमिह लोकस्य हतवीर्यस्य सांप्रतम् । धृतिप्रवालः प्रसराभिपुष्पस्तपःफलः शौर्यविवृद्धमूलः । रणे महान् राक्षसराजवृक्ष उन्मूलितो राघवमारुतेन ॥ तेजोविषाणः कुलवंशवंशो मदप्रसेकाकुलचंडहस्तः । इक्ष्वाकुसिंहेन गृहीतदेहः सुप्तः क्षितौ रावणगंधहस्ती ॥ पराक्रमोत्साहविजृंभितार्चिर्निश्वासधूमः स्वबलप्रतापः । प्रतापयन्संप्रति रावणाग्निर्निर्वापितो रामपयोधरेण ॥ प्रतापलांगूलककुद्विषाणः पराभियोगोद्धतगात्रशाली । रक्षोवृषश्चापि विकीर्णचक्षुः क्षितीश्वरव्याघ्रहतोऽवसन्नः ॥ ततस्तद्धेतुमद्वाक्यं परं दृष्टार्थनिश्चयम् । रामः शोकसमाविष्टं प्रत्युवाच विभीषणम् ॥ नायं विनष्टो निश्चेष्टः समरे चंडविक्रमः । अनिवृत्तमहोत्साहः पतितोऽयमशंकितः ॥ नैवं विनष्टं शोचंति क्षत्रधर्मे व्यवस्थिताः । बुद्धिमंतोऽविघाताय निपतंति रणाजिरे ॥ येन सेंद्रास्त्रयो लोकास्त्रासिता युधि धीमता । तस्मिन्कालसमायुक्ते न कालः परिशोचितुम् ॥ नैकांतं विजयो

[वं–९४]= [एकनवतितमः सर्गः] =[दा–११३]

रावणं नि-हतं श्रुत्वा राघवेण महाऽऽत्मना ।
१] अन्तः-पुराद् विनिष्-क्रम्य[1] राक्षस्यः शोक-कर्षिताः[2] ॥१ ॥[१
बहु-शो वाष्पमाणाश्[3] च प्र-दिग्धाः क्षिति-पांसुभिः ।[4]
२] विमुक्त-केशा दुःखाऽऽर्ता गावो हत-वृषा[5] इव ॥२[6] ॥[२
३उ] उत्तरेण विनिष्-पत्य द्वारेण सह[7] राक्षसैः[7] ।
प्र-विश्याऽऽयोधनं[8] घोरं[8] वि-चिन्वन्त्यो[9] हतं पतिम् ॥३[10]॥[३
४] हाऽऽर्य-पुत्रेति वादिन्यो हा नाथेति च सर्व-शः ।
५पू] परि-पेतुः कबन्धाऽङ्कां महीं शोणित-कर्दमाम् ॥४[11] ॥[४
ता वाष्प-परिरुद्धाऽक्ष्यो[12] भर्तृ-शोक-समाहिताः[13] ।[10]
६] करेणव इव त्रस्ता[14] न रेजुर् हत-यूथपाः ॥५ ॥[५
ददृशुस् तं महा-कायं वीर्य-वन्तं महा-बलम् ।[15]

युद्धे भूतपूर्वः कदाचन । परैर्वा हन्यते वीरः परान्वा हंति संयुगे ॥ इयं हि पूर्वनिर्दिष्टा गतिः क्षत्रियशाश्वती । क्षत्रियो हि हतः संख्ये न शोच्य इति निश्चयः ॥ तदेवं निश्चयं ज्ञात्वा स त्वमाज्ञाय विज्वरः । यदिहानंतरं कार्यं कार्यं तत्त्वं विचिंतय ॥ तमुक्तवंतं विक्रांतं राजपुत्रं विभीषणः । उवाच शोकसंतप्तो भ्रातृहीनो ह्यनंतरम् ॥ योऽयं विमर्देषु न भग्नपूर्वः समेत्य देवैः सह वासवेन । भवंतमासाद्य रणे स भग्नो वेलां समासाद्य यथा समुद्रः ॥ एतेन मित्राणि सुरक्षितानि भुक्ताश्च भोगाः सुभृताश्च भृत्याः । धनानि विप्रेषु समर्पितानि वैराण्यमित्रेषु सुपातितानि ॥ अग्न्याहितश्चैव महातपाश्च वेदांतगः कर्मसु चाग्रशूरः । एतस्य यत्प्रेतगतस्य कृत्यं क्रियेत तद्राम तव प्रसादात् ॥ स तेन वाक्यैः करुणैर्महात्मा संबोधितः साधु विभीषणेन । आज्ञापयामास नरेन्द्रसूनुः स्वर्ग्यं समाधानमदीनसत्त्वः ॥ विजयांतानि वैराणि निवृत्ते शांतिरिष्यते । क्रियतामस्य सत्कारो ममाप्येष यथा तव ॥ इत्यार्षे रामायणे लंकाकांडे विभीषणविलापो नाम षडशीतितमः सर्गः ॥

१. रा२ भ–विनिष्पेतु । २. रा२ फ म भ–शोकमूर्छिताः ॥ ३. रा२ फ–वेपमानाश् । ४. भ–वार्यमाणाः सुबहुशश्चेष्टंत्यः क्षितिपांशुषु । ५. भ–नष्टर्षभा । ६. अतः परमधिकः पाठ—भ–उरःशिरांसि निघ्नंत्यो बाहुभिः कनकोज्ज्वलैः ॥ ७. भ–हतभर्तृकाः । ८. रा१ ल१ ल२ ग्र अ प्र–०श्यास्य महाघोरं । ९. भ–०न्वंति । १०. म–नास्ति ॥ ११. अतः परमधिकः पाठः—भ–गृध्रगोमायुसंकीर्णां कंकवायसनादिताम् ॥ १२. भ–०रिपूर्णाक्ष्यो । १३. भ–०कपरायणाः । १४. भ–नर्दंत्यो ॥ १५. रा२–महाकायं वीर्यवंतं रावणं च महाद्युतिं ॥ भ–ददृशुस्ता महावीर्यं महाकायं महाद्युतिं ।

७] रावणं नि-हतं भूमौ नीलाऽञ्जन-चयोपमम् ॥६ ॥ [६
ताः पतिं सहसा दृष्ट्वा शयानं रण-पांशुषु ।
८] नि-पेतुस् तस्य गात्रेषु छिन्ना[1] वन-लता[1] इव ॥७ ॥ [७
बहु-मानात् परि-ष्वज्य का-चिद् एनं रुरोद ह ।
९] चरणौ का-चिद् आ-लिङ्ग्य का-चित् कण्ठे वि-लम्ब्य[2] च ॥८॥ [८
उद्-धृत्य[3] च[4] भुजौ का-चिद् भूमौ विपरि-वर्तते[5] ।
१०] हतस्य वदनं दृष्ट्वा का-चिन्[6] मोहम् उपाऽऽगता ॥९ ॥ [९
का-चिद् अङ्के शिरः कृत्वा रुरोद[7] भृश-दुःखिता[7] ।
११] स्नपयन्ती मुखं बाष्पैस्[8] तुषारैर् इव पङ्क-जम् ॥१०॥ [१०
एवम्[9] आर्ताः पतिं[9] दृष्ट्वा रावणं नि-हतं रणे[10] ।
१२] चक्रुर्[11] बहु-विधं शोकं भूयस् ताः पर्य्-अदेवयन् ॥[12]११॥ [११
येन वि-द्रावितः[13] शक्रो येन वि-द्रावितो[13] यमः ।
१३] येन वैश्रवणो राजा[14] पुष्प-केन वि-योजितः ॥१२॥ [१२
गन्धर्वाणाम्[15] ऋषीणां[15] च सुराणाम् अपि चाऽऽहवे ।
१४] भयं यो नाऽभि-जानाति तस्येदं मानुषाद् भयम् ॥[16]१३॥ [१३पू
असुरेभ्यः सुरेभ्यो[17] वा[17] पन्न-गेभ्योऽपि चाऽऽहवे[18] ।
१५] भयं येन महद् दत्तं सोऽयं शेते रणे हतः ॥१४॥ [१३उ
अ-वध्यो देवतानां यस् तथा दानव-रक्षसाम् । [१४
१६] हतः[19] सोऽयं रणे[19] शेते मानुषेण पदातिना ॥१५[20]॥ [१५
यो न शक्यः सुरैर् हन्तुं न शक्यश्[21] चाऽसुरैस् तथा[21] ।
१७] सोऽयं कश्-चिद्[22] इवाऽसत्त्वो[22] मृत्युं मर्त्येन लम्भितः ॥१६॥ [१६

---

१. भ-शस्त्रछिन्ना लता ॥ २. भ-प्रलंब्य ॥ ३. रा₂ भ-उत्क्षिप्य । म-उत्सृज्य । ४. रा₂ फ-तु । ५ रा₂ फ-संपरि० । म-च प० । ६. म-अत आरभ्य ११-शश्लोकस्य प्रथमपादं यावन्नास्ति ॥ ७. भ-पश्यंती प्रारुदन्मुखं । ८. रा₁ ल₁ ल₂ ब अ प्र-काचित् । रा₂ फ-चाश्रैस् ॥ ९. रा₁ ल₁ ल₂ ब अ प्र-सर्वास्ताः पतितं । १०. भ-भुवि । ११. रा₁ ल₁ ल₂ ब अ प्र-कृत्वा । १२. भ-चुक्रुशुर्बहुधा शोकाद्भूयिष्ठं पर्यदेवयन् ॥ १३. म-वित्रासितः शक्रो येन वित्रासितो । १४. भ-भ्राता ॥ १५. भ-०र्वकिन्नराणां । १६. भ-नास्ति ॥ १७. भ-०भ्यश्च । १८. फ म भ-वा तथा ॥ १९. भ-सोयमद्य हतः । २०. अ म-नास्ति । अतः परमधिकः पाठः—अ म-वर्जं—सर्वदा च सुराणां हि यक्षाणामपि चासकृत् ॥ २१. रा₂ फ-०रैस्तदा । भ-यक्षैर्नासुरैस्तथा । २२. रा₁-०दिवा सुप्तो म-वा त्रिदशशत्रुः । भ-०दिवाशक्तो ।

एवं ब्रुवन्त्यो[1] बहु-धा[2] रुरुदुस् तस्य[3] ताः[3] स्त्रियः ।[4]
१८] भूय एव च[5] दुःखाऽऽर्ता[6] वि-लेपुस्[7] ताः पुनः पुनः[7] ॥१७॥ [१७
अ-शृण्वता[8] तु सु-हृदां[8] सततं[9] हित-वादिनाम्[9] । [१८पू
१९] ऐश्वर्य-मद-मत्तेन वयम् आत्मा च घातिताः ॥[10]१८॥
ब्रुवाणोऽपि[11] हितं वाक्यं स्निग्धो[11] भ्राता विभीषणः ।
२०] दृढं[13] परुषितो मोहात् त्वयाऽऽत्म-वध-कांक्षया[14] ॥१९॥ [१९
यदि निर्-यातिता चेत्[15] स्यात् सीता रामाय[15] मैथिली ।
२१] न तु[16] स्याद् व्यसनं घोरम् इदं मूल-हरं हि[17] नः[17] ॥२०॥ [२०
कृत-कामो[18] भवेद्[19] भ्राता रामो मित्र-कुलं[20] भवेत्[20] ।
२२] वयं चाऽविधवाः स्याम स-कामा[21] न च[21] शत्रवः ॥२१॥ [२१
त्वया पुनर् नृ-शंसेन सीतां सं-रुन्धता[22] बलात् ।
२३] राक्षसा वयम् आत्मा च त्रय[23] एव नि-पातिताः[23] ॥२२॥ [२२
काम-कारोऽस्ति[24] यन् नित्यं[24] तव राक्षस-पुङ्गव ।
२४] दैवं चेष्टयते सर्वं ततो दैवेन हन्यते ॥२३॥ [२३
वानराणां वि-नाशोऽयं[25] राक्षसानां च स-युगे ।
२५] तव चैव महा-बाहो दैव-योगाद् उप-स्थितः ॥[26]२४॥ [२४
न वि-क्रमेण नाऽर्थेन न मानेन न सं-ज्ञया ।[27]

---

१. रा१ अ–वदन्त्यो । २. रा२ फ म–०बहुशो । ३. रा१–तास्तदा । ४. भ–एवं रुदंत्यो नार्यस्ता रावणं करुणं बहु । ५. ल१ ल२ ब–हि । म भ–तु । ६. भ–शोकार्ताः । ७. रा२ फ म–०पुस्तास्ततस्ततः ॥ भ–परलोकस्थमब्रुवन् ॥ ८. म–०ता वचस्तेषां । भ–आश्रितानां च सु० ॥ ९. ल१ ल२ ब–वचनं हित० । म–सुहृदां प्रियवा० । १०. भ–मरणाय हृता सीता घातिताश्च निशाचराः ॥ ११. भ–०णो हि । १२. भ–दृष्टो । १३. रा२–धृष्टं । म–भृशं । भ–नित्यं । १४. भ–०कांक्षिणा ॥ १५. भ–नाथ भवेद्रामस्य । १६ भ–हि । १७. म भ–महत् ॥ १८. रा१ अ–भूमिकामो । ल१ ल२ ब प्र–भूतिकामो । १९. रा१ ब अ प्र–ऽभवत् । २०. रा१ ल१ ल२ ब अ प्र–मित्राकुलोऽभवत् । २१. रा२ फ म–०वर्जं—०श्चैव ॥ २२. भ–संहरता । २३. भ–युगपद्विनि० ॥ २४. भ–न कामकारः कामो वा ॥ २५. अ भ–०शाय । २६. भ–आत्मनश्च विनाशाय दैवान्मोहमुपागतः ॥ २७. भ–नैवार्थेन न मानेन विक्रमेण न मायया ।

२६] शक्या दैव-गतिर् लोके नि-वारयितुम् एव[१] हि[१] ॥२५[२]॥ [२५
वि-लेपुर् एवं दीनास् ता राक्षसाऽधिप-योषितः ।
२७] कुरर्य इव दुःखाऽऽर्ता बाष्प-पर्याकुलेक्षणाः[३] ॥२६॥ [२६

इत्यार्षे रामायणे युद्ध-काण्डे[४] ऽन्तःपुर-विलापो[५]
नामैकनवतितमः सर्गः ॥ ९१ ॥

[वं–९५]= [द्विनवतितमः सर्गः] =[दा–११४]

१पू] एवं[६] वि-लपमानानां तदा[७] राक्षस-योषिताम्[७] । [१पू
N] नि-शम्य करुणं तासां[८] दुःखितानां[८] समन्त-तः । [N
१उ] ज्येष्ठा पत्नी प्रिया दीना भर्तारं समुद्-ऐक्षत ॥१ ॥ [१उ
दश-ग्रीवं हतं दृष्ट्वा रामेणाऽक्लिष्ट-कर्मणा ।
२] पतिं मन्दोदरी तत्र करुणं[९] पर्य्-अदेवयत् ॥२ ॥ [२
ननु नाम महा-बाहो तव वैश्रवणाऽनुज ।
३] क्रुद्धस्य प्र-मुखे[१०] स्थातुं न स्याद्[११] अपि शत-क्रतुः[११] ॥३ ॥
ऋषयश् चाऽपि[१२] देवाश् च गन्धर्वाश् च यशस्विनः[१३] । [३
४] यक्षाश् चाऽपि[१४] तवौघेन[१५] चारणाश्[१६] च दिशो गताः[१६] ॥४ ॥
स त्वं मानुष-मात्रेण रामेण युधि पातितः[१७] ।
५] न ह्य् अप-त्रपसे भूमौ[१८] शयानो राक्षसेश्वर[१८] ॥५ ॥ [४
N] कथम् इन्दीवर-श्यामः शेषे भुवि नि-पातितः[१९] ।[२०] [N
कथं त्रैलोक्यम् आ-क्रम्य श्रिया वीर्येण चाऽन्व्-इतम्[२१] ।

---

१. रा$_१$–एव ह । भ–ओजसा । २. अतः परमधिकः पाठः—भ–इति दानवयक्षाणां कन्यास्ताश्चारुलोचनाः । रक्षसां पन्नगानां च चुक्रुशुर्निहतेश्वराः ॥ तासां रुदितशब्देन राक्षसाधिपयोषिताम् । प्रगीतेव पुरी लंका बभूव च रणाजिरे ॥ ३. रा$_२$ फ म–बाष्पव्याकुलितेक्षणाः । भ–बाष्पव्याकुललोचनाः ॥ ४. ब प्र भ–लंकाकांडे । फ–आभ्युदयिके । ५. म–रावणान्तःपुरविलापो । भ–राक्षसीविलापः ॥ ६. रा$_२$ फ म भ–तासां । ७. भ–राक्षसाधिपयो० । ८. रा$_२$ फ म भ–तत्र दुःखार्तानां ॥ ९. रा$_१$ अ रा$_२$ फ म भ–कृपणं ॥ १०. रा$_१$ रा$_२$ म–संमुखे । ११. भ–समर्थः पुरंदरः ॥ १२. भ–च हि । १३. भ–दिवौकसः । १४. भ–चैव । १५. रा$_२$–तवोद्वेगाच् । भ–पिशाचाश्च । १६. रा$_२$–वर्जं—वानराश्च दि० । भ–देवदानवगुह्यकाः ॥ १७. रा$_१$ ल$_१$ ल$_२$ ब अ प्र–निर्जितः । १८. भ–स्वप्तुं किमिदं राक्षसाधिप ॥ १९. रा$_१$–०तितैः । २०. भ–नास्ति । २१. रा$_१$ ल$_१$ ल$_२$ ब अ–चार्चितम् ।

६] अ-विषह्यं जघान त्वां मानुषो वानराऽनुगः ॥६ ॥ [५
मानुषाणाम् अ-विषये चरतः कामरूपिणः ।
७] वि-नाशस् तव रामेण सं-युगे नोपपद्यते ॥७ ॥ [७
न चैतत् कर्म रामस्य श्रद्-दधामि चमू-मुखे ।
८] सर्वैः[1] समुद्-इतैर् देवैस्[1] तव तेनाऽभि-मर्दनम्[2] ॥८ ॥ [८
अथवा राम-रूपेण वासवः स्वयम् आ-गतः ।
९] मायया तव नाशाऽर्थं[3] प्र-विश्याऽनुप-उपलक्षितः[3] ॥९ ॥ [१२
यदैव वानरैः सर्वैः[4] सेतुर् बद्धो महाऽर्णवे ।
१३] तदैव हृदयेनाऽहं शङ्के रामम् अ-मानुषम् ॥१०॥ [११
यदैव हि जन-स्थाने राक्षसैर् बहुभिर् वृतः ।
१०] खरस् तव हतो भ्राता तदा रामो न मानुषः ॥११॥ [९
यदैव नगरीं लङ्कां दुष्-प्रवेशां सुरैर् अपि ।
१२] प्र-विष्टो हनु-मान् वीरस् तदा[5] रामो न मानुषः[5] ॥१२[6]॥[१०
यदैव हि महा-बाहुर्[7] नि-हतः कपि-कुञ्जरः[7] ।
११] एकेन[8] चेषुणा वीरस्[8] तदा रामो न मानुषः ॥१३[9]॥ [N
क्रियताम् अ-विरोधश्[10] च[10] राघवेणेति यन् मया ।
१४] उच्यमानो न गृह्णीथास्[11] तस्येदं कर्मणः फलम्[11] ॥१४॥ [१९
अ-कामाम् अभि-कामोऽसि[12] सीतां राक्षस-पुङ्गव ।
१५] ऐश्वर्यस्य वि-नाशाय शरीरस्य ममैव[13] च[13] ॥१५[14]॥[२०
अरुन्धत्या वि-शिष्टां[15] तां[15] रोहिण्याश् चाऽपि रावण[16] ।
N] सीताम् आ-नयता[17] साध्वीं[18] त्वया मृत्युः[19] प्र-कोपितः[19] ॥१६[20]॥[२१

---

१. भ-सर्वतः समुदीर्णस्य । २. रा१ ल१ ल२ ब अ प्र-सेना हि मर्दिता ॥ ३. भ-नाशाय विधिना संप्रचोदितः ॥ ४. भ-वीरैः ॥ ५. भ-तदैव व्यथिता ह्यहम् । ६. रा१ प्र फ-नास्ति ॥ ७. भ-रणे वाली त्वत्तः शतगुणो बले । ८. भ-रामेण निहतः संख्ये । ९. रा१ प्र-नास्ति । अतः परमधिकः पाठः—भ-शूर्पणख्या यदा रामः कर्णनासामशातयत् । तदैव हृदयेनाहं शंके राममानुषम् ॥ १०. भ-०धस्तु । ११. भ-गृह्णीषे तस्यैषा व्युष्टिरागता ॥ १२. रा२ फ-घातिका० । १३. भ-च दुर्मते । १४. अतः परमधिकः पाठः—भ-सीतायाः कोपजेन त्वं नूनं दग्धोऽसि वह्निना ॥ १५. रा२ फ म — वर्ज-वसिष्ठस्य । भ-विशिष्टा या । १६. भ-मानद । १७ भ-धर्षयता । १८. म-नूनं । भ-राजन् । १९. म-न सदृशं कृतं । २०. अतः परमधिकः पाठः—भ-संत्यन्याः प्रमदास्तुभ्यं रूपेणाभ्यधिकास्तु याः । अनंगवशमापन्नस्त्वं मोहान्नावबुध्यसे ॥

न कुलेन न रूपेण[1] न दाक्षिण्येन[1] मैथिली ।
१७] मयाऽधिका[2] वा तुल्या वा त्वं तु मोहान् न बुध्यसे ॥१७[3]॥[२८
सर्व-था सर्व-सत्त्वानां[4] नास्ति मृत्युर्[5] अ-लक्षणः[5] ।
१९] तव तावद् अयं मृत्युर् मैथिली-कृत-लक्षणः[6] ॥[7]१८॥[२९
मैथिली सह रामेण वि-शोका वि-हरिष्यति ।
२०] अल्प-पुण्या त्व् अहं घोरे पातिता शोक-सागरे ॥१९॥ [३१
कैलासे[8] मन्दरे मेरौ[8] तथा चैत्र-रथे वने ।
२१] देवोद्यानेषु सर्वेषु वि-हृत्य सहिता त्वया ॥२०॥ [३२
२२पू] वि-मानेनाऽनु-रूपेण प्र-याता[10] स्वेच्छया पुरा ।[11]
२३पू] साऽद्य-प्रभृति कामेभ्यः[12] स्पृहयिष्यामि दुःखिता[12] ॥२१[13]॥[३३

---

१. भ–शीलेन न रूपेण च । २. भ–ममाधि० । ३. ९तः परमधिकः पाठः—भ–साग्रं तु स्त्रीसहस्रं वै रूपयौवनशालि च । न तेऽभिरुचितं वीर कालेन हतचेतसः ॥ ४. रा२ फ भ–सर्वभूतानां । ५. रा२–०त्युः प्रकोपितः । म भ–०रलक्षितः । ६. म–०कृतनिश्चयः । ७. रा२ फ–नास्ति । भ–सीतानिमित्तजो मृत्युस्तव रामादुपागतः ॥ ८. म–कैलाशे मंदरे नगे ॥ ९. म–विहरामि त्वया सार्धं ॥ १०. रा१–प्रयासि । ११. भ–विमानेनार्कवर्णेन श्रिया परमया युता । अतः परमधिकश्च पाठः—पश्यंती विविधान् देशांस्तांस्तांश्चित्रस्रगंबरा । १२. भ–०कामानां स्पृहयामि सुदुर्गता । १३. अतः परमधिकः पाठः—भ–भ्रंशिता कामभोगेभ्यः सास्मि वीर वधात्तव । वैधव्येनास्मि संवृत्ता धिग्राज्यं चपलाः श्रियः ॥ हा राजन्सुकुमारं ते मुखं सुव्यक्तलोचनम् । कान्तिश्रीद्युतिभिस्तुल्यमिन्दुपद्मदिवाकरैः ॥ किरीटमुकुटोदग्रं शृङ्गारोद्दीप्तकुण्डलम् । मदव्याकुलदीप्ताक्षं भवतः पानभूमिषु ॥ विविधस्रग्धरं चारुकर्णं स्मितकथं शुभम् । तदेवाद्य शरीरे ते वक्त्रं न भ्राजते प्रभो ॥ रामसायकनिर्भिन्नं पतितं रणभूमिषु । विकीर्णमेदसा सिक्तं रूक्षं स्यंदनरेणुभिः ॥ हा पश्चिमा मे संवृत्ता वैधव्यकरणी दशा । या मयार्तिर्न संबुद्धा कदाचिदपि मंदया ॥ पिता दानवराजो मे भर्ता मे राक्षसेश्वरः । पुत्रो मे शक्रनिर्जेता इत्येवं गर्विताऽभवम् ॥ दृप्ता विमथनाः शूराः प्रख्यातबलपौरुषाः । न-कुतश्चिद्-भया नाथा ममेत्यासीन्मतिस्तदा ॥ तेषामेवं प्रभावानां युष्माकं राक्षसर्षभाः । कथं भयं समुत्पन्नं मानुषादिदमागतम् ॥ स्निग्धेन्द्रनीलं कायं ते प्रांशु शैलोपमं महत् । केयूराङ्गदवैदूर्यमुक्ताहारसमुज्ज्वलम् ॥ कांतं विहारेष्वधिकं दीप्तं संग्रामभूमिषु । भात्याभरणशोभाभिर्विद्युद्भिरिव तोयदः ॥ तदेवाद्य शरीरं ते तीक्ष्णैकाग्रैः शरैश्चितम् । पुनर्दुर्लभसंस्पर्शं परिष्वक्तुं न शक्यते ॥ श्वाविद्धं शललैर्यद्वल्लग्नैर्बाणैर्निरंतरम् । स्वर्पितैर्मर्मसु भृशं सुच्छिन्नस्नायुबंधनम् ॥ क्षितौ निपतितं

सत्यं[1] तच् च महा-बाहो[1] देवरो मे यद् अब्रवीत् ।
३०] सर्व-राक्षस-मुख्यानां[2] वि-नाशः[3] समुप-स्थितः[3] ॥२२॥ [N

राजन् पश्यामि रुधिरच्छविम् । शत्रुप्रहारोन्मथितं विकीर्णमिव पर्वतम् ॥
हा स्वप्नं सत्यमेवेद् त्वं रामेण कथं हतः । त्वां मृत्युरूपिणं संख्ये प्रत्युद्या-
स्यति को रिपुः ॥ त्रैलोक्यस्यावभोक्तारं त्रैलोक्योद्वेगदं सदा । जेतारं
लोकपालानां क्षेप्तारं शंकरस्य च ॥ दृप्तानां निग्रहीतारमविगाह्यपरा-
क्रमम् । हंतारं दानवेंद्राणां यक्षाणां च सहस्रशः ॥ निवातकवचानां च
संग्रामे तारकस्य च । नैकयज्ञविलोप्तारं त्रातारं स्वजनस्य च ॥ लंकाद्वी-
पस्य गोप्तारं रक्षसां भीमकर्मणाम् । धर्मव्यवस्थाभेत्तारं मायास्रष्टारमेव
च ॥ लोकक्षोभयितारं वै सर्वप्राणिभयंकरम् । तेजसा दृप्तवाक्यानां वक्तारं
मन्त्रिसन्निधौ ॥ स्वभृत्ययूथत्रातारं हंतारममितौजसाम् । देवासुरेन्द्रक-
न्यानामाहर्तारं ततस्ततः ॥ शत्रूणां शोककर्तारं गोप्तारं स्वजनस्य च ।
अस्माकं मानभोगानां दातारं रथिनां वरम् ॥ एवं प्रभावं भर्तारं दृष्ट्वा
रामेण पातितम् । स्थिरास्मि या देहमिमं धारयामि विना प्रभुम् ॥ शयनेषु
महार्हेषु शयित्वा राक्षसेश्वर । इह कस्मात्प्रसुप्तोऽसि धरण्यां रेणुगुंठितः ॥
यदा मे तनयः शस्तो लक्ष्मणेनेन्द्रजिद्युधि । तदैवास्मि हता वीर किं त्वद्य
विधवा कृता ॥ साहं बंधुशतैर्हीना त्वया नाथेन रावण । विहीना कामभो-
गैश्च शोचिष्ये शाश्वतीः समाः ॥ प्रपन्नो दीर्घमध्वानं राजन् त्वं यासि
दुर्गमम् । नय मामपि नह्यार्ता वर्तयिष्ये त्वया विना ॥ कस्य वा मां प्रदाय
त्वं कृपणां गंतुमर्हसि । दीनां विलपंतीं मंदां किं च मां नाभिभाषसे ॥ दृष्ट्वा
न खल्वसि क्रुद्धो मामिह स्वयमागताम् । न चैवमाश्वासयसि मां त्वं किं
नावबुध्यसे । निर्गता नगरीतोऽद्य पद्भ्यामेव हि यत्प्रभो ॥ यस्येष्टदाराः
सर्वास्ते भ्रष्टलज्जावगुंठिताः । बहिर्निपातिताः सर्वा नेर्ष्यां त्वं कुरुषे
कथम् ॥ क्रीडासहायस्ते नाथ अयं लालप्यते जनः । न चैनमाश्वासयसि
किंवा न प्रतिबुध्यसे ॥ यास्त्वया विधवा राजन् कृता नैककुलस्त्रियः ।
पतिव्रताधर्मपरा गुरुशुश्रूषणे रताः ॥ ताभिः शोकपरीताभिर्दृष्ट्वा वंशपराभ-
वम् । त्वया विप्रकृताभिर्नो यदा शस्तं तदा गतम् ॥ आहि शोकाभिभूतास्मि
नूनं दग्धास्मि हि प्रभो । प्रवादः सत्य एवायं चरति प्रायशो जने । पति-
व्रतानां नाकस्मात्पतन्त्यश्रूणि भूतले ॥ कथं च नाम ते राजन् लोकानाक्रम्य
तेजसा । नारीचौर्यमिदं कृत्वा क्रूरं शौंडीर्यमाश्रितम् ॥ अपनीयाश्रमा-
द्रामं यत्नेन मृगच्छद्मना । आनीता रामपत्नी ते तत्ते कातरलक्षणम् ॥
कातर्यं न च ते युद्धे कदाचित्संस्मराम्यहम् । तव शीलविपर्यासं नूनं ते
क्षयलक्षणम् ॥ अतीतानागतार्थज्ञो वर्तमाने विचक्षणः । मैथिलीमाहृतां
दृष्ट्वा ध्यात्वा निश्वस्य चागतः ॥

१. भ-सत्यवादी महाभागो ॥ २. भ-इदं राक्षस० । ३. रा$_2$ फ भ-
०शं समुपस्थितम् ॥

काम-क्रोध-प्रवृत्तेन[1] व्यसनेषु प्र-सङ्गिना ।
३१] त्वया कृतम् इदं सर्वम् अ-नाथं रक्षसां[2] बलम् ।।२३।। [N
इन्द्रियाणि पुरा[3] जित्वा[3] त्वया[4] त्रि-भुवनं जितम्[4] ।
N] स्मरद्भिर् इव तद् वैरम् इन्द्रियैस् त्वं पुनर्[5] जितः[5] ।।२४।। [N
शोचितव्यो मया न त्वम् आत्म-दोषैर् नि-पातितः ।[6]
३२] स्त्री-स्वभावात् तु[7] मे बुद्धिः कारुण्यात्[8] परि-वर्तते ।।२५।। [N
सु-कृतं दुष्-कृतं च[9] त्वम् आ-दायाऽऽत्म-गतिं[9] गतः ।
३३] आत्मानं ननु[10] शोचामि[10] न[11] त्वां दुष्कृत-कारिणम्[11] ।।२६।। [N
अ-प्रहृष्टास्[12] त्व्[13] अ-मुदिताः[13] पत्न्यस् ते रजनी-चर ।[14]
३४] सर्वास् तव वि-योगेन प्र-क्षिप्ताः शोक-सागरे[15] ।।[16]२७।।[N }
नील-जीमूत-संकाशः[17] पीताऽम्बर-सुसंवृतः[17] ।
३५] सर्व-गात्राणि सं-क्षिप्य[18] किं शेषे रुधिरोक्षितः ।।२८[15]।।[N
प्र-सुप्त इव शोकाऽऽर्ता[19] किं मां न प्रति-भाषसे ।
३६] वि-रोचनस्य दौहित्रीं यमस्य तनयां प्र-भो[20] ।।२९[21]।।[N
येन सूदयसे शत्रून् सम्-अरे सूर्य-वर्चसा[22] ।
३८] वज्रो वज्र-धरस्येव सोऽयं ते[23] सतताऽर्चितः[23] ।।३०।। [N
N] रणे बहु-प्रहरणो[24] हेम-जाल-परिष्कृतः ।

---

१. ल$_{१}$ ल$_{२}$ ब प्र–०प्रयुक्तेन । भ–०भसमुत्थेन । २. ल$_{१}$ ल$_{२}$ ब प्र–राक्षसं ॥ ३. भ–पराजित्य । ४. रा$_{२}$ म भ–जितं त्रिभुवनं त्वया । ५. भ–पराजितः ॥ ६. भ–नापि त्वं शोचितव्यो मे प्रख्यातबलपौरुषः । ७. भ–च । ८. भ–कारुण्ये ॥ ९. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब अ–नाथ (?नाथाऽ) पूर्वमादाय त्वं । भ–चैव गृहीत्वा स्वां गतिं । १०. अ रा$_{२}$ फ म भ–नानुशो० । प्र–अनुशो० । ११. रा$_{२}$–फ म–त्वां च दु० । भ–वियोगात्सुदुःखिताम् ॥ १२. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब–अपहृष्टास् । १३. भ–प्ररुदिताः । १४. अतः परमधिकः पाठः—भ–आत्मानं नानुशोचंति त्वां तु दुष्कृतकारिणम् । वैधव्यं स्त्रीसहस्राणां त्वत्कृते समुपस्थितम् ॥ स त्वमेवं महासत्त्व किमर्थं नाभिभाषसे । १५. म–नास्ति । १६. भ–नास्ति ॥ १७. भ–०शपीताम्बरशुभानन । १८. भ–विक्षिप्य ॥ १९. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब अ प्र फ–शोकार्तः । २०. भ–विभो ॥ २१. अतः परमधिकः पाठः—भ–उत्तिष्ठ राजन् किं शेषे किं च मां नाभिभाषसे । इमे ते निर्भया लोकाः प्रविष्टाः सूर्यरश्मयः ॥ प्रियां पत्नीं महाबाहो भज मां पुत्रमातरम् । अद्यप्रभृति कामानां स्पृहयिष्यामि दुर्भगा ॥ २२. भ–सूर्य-तेजसा । २३. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब अ प्र–ते सततोर्जितः । भ–शूलोऽवमर्दितः ॥ २४. ल$_{१}$ ल$_{२}$ ब अ म–बाहुप्र० ।

परि-घो विप्र-कीर्णोऽद्य[1] बाणैश्[2] छिन्नः समन्त-तः[2] ।
३९] शेते प्रिय-सखः[3] श्री-मान् अमात्य इव लज्जितः[4] ॥[5]३१॥[N
धिग् अस्तु मम[6] रौद्राया हृदयं वज्र-सन्निभम्[6] ।
४०] त्वयि पञ्च-त्वम् आ-पन्ने शत-धा[7] यन् न दीर्यते[7] ॥३२[8]॥[८५

प्रियाम् इवोप-गुह्य त्वं शेषे समर-मेदिनीम्[9] ।
N] अ-प्रियाम् इव कस्मात् त्वं[10] न माम् इच्छसि भाषितुम्[10] ॥३३॥ [८४
इत्य् एवं वि-लपन्ती[11] सा[11] बाष्प-व्याकुल-लोचना ।
४१] स्नेहाऽवस्कन्न-हृदया[12] देवी मोहम् उपा-गता ॥३४॥ [८६
कश्मलाऽभिहता दीना पतिता रावणोरसि ।
N] सन्ध्याऽनुरक्त-जलदे दीप्ता वि-द्युद् इवाऽभवत् ॥३५॥ [८७
तथा गतां समुत्था (द्-स्था)प्य स-पत्न्यस् ता भृशाऽऽकुलाः[13] ।
४२] पर्यव-स्थापयामासू रुदन्त्यो रुदतीं भृशम् ॥३६॥ [८८
न ते न विदिता देवि लोकानां गतिर् अ-ध्रुवा ।
४३] दशा-विभागे पर्य्-आप्ते राज्ञां च चपलाः श्रियः ॥३७॥ [८९
इत्य्[14] एवम् उक्त्वा[14] सा ताभिः स-शब्दं[15] प्र-रुरोद ह ।
४४] अधो-मुखी स्नापयन्ती स्तनौ नेत्राऽम्बु-बिन्दुभिः ॥३८॥ [९०

एतस्मिन्न् अन्तरे रामो वि-भीषणम् उवाच ह ।[16]
४५] सत्-कारः[17] क्रियतां भ्रातुः स्त्री-जनः[18] परि-सान्त्व्यताम्[18] ।३९।[९१
तम् उवाच ततो रामं[19] वि-भीषण इदं वचः[19] ।
४६] वि-मृश्य बुद्ध्या तत्त्व-ज्ञो धर्माऽर्थ-संहितं हितम्[20] ॥४०[21]॥[९२

---

१. रा१ अ प्र–०र्णो वै । ल१ ल२ ब–०र्णोऽयं । भ–०कीर्णस्ते । २. म–छिन्नः स पतितो भुवि । भ–०न्नः सहस्रधा । ३. ल१ ल२ ब श्र-प्रिय : सखा । ४. रा१ ल१ ल२ ब अ प्र–दुःखितः । रा२–ताडितः । ५. भ–येन त्वं शोभसे वीर पतितेन समीपतः । निकृत्तेनेव हस्तेन पतितो गजयूथपः ॥ ६. भ–हृदयस्यास्य यन्न दीर्येत्सहस्रधा । ७. भ–नाथेऽस्माकं सुखप्रदे । ८. अतः परं सर्गसमाप्तिर्दृश्यते—रा१ ल१ ल२ ब अ प्र–इत्यार्षे रामायणे युद्धकांडे मंदोदरीविलापो नाम सर्गः ॥ ९. रा२–रणमे० । १०. रा२–च न त्वं मामभिभाषसे ॥ ११. रा२–०लपन्त्येव । १२. रा२–स्नेहाद्वाक्रांतहृ० ॥ १३. रा२–भृशातुराः ॥ १४. रा२–इत्युच्यमाना । १५. रा२–दुःशब्दं ॥ १६. म–नास्ति । १७. भ–संस्कारः । १८. रा१ ल१ ल२ ब प्र म–स्त्रीगणः परि० । भ–स्त्रिय-श्चैव निवर्त्तय ॥ १९. रा२ फ म–धीमान् श्रुतवाक्यो विभीषणः । २०. रा१–तदा । भ–वचः । २१. अतः परमधिकः पाठः—भ–रामस्यैवानुवृत्त्यर्थमुत्तरं प्रत्यपद्यत ॥

लुप्त-धर्म-पथं[1] क्रूरं नृ-शंसं पाप-निश्चयम्[2] ।
४७] नाऽहम् अर्हामि सत्-कर्तुं[3] परदाराऽभिमर्शिनम्[4] ॥४१[5]॥[९३
भ्रातृ-रूपस्[6] तु[6] मे शत्रुर् एष सर्वाऽहिते रतः ।
४८] रावणो नाऽर्हते पूजां गुरुः[7] पूज्यस्[7] तु गौरवात्[7] ॥४२॥ [९४
नृ-शंस[8] इति[8] मां कामं वक्ष्यन्ति[9] भुवि[10] राक्षसाः[10] । [९५पू
४९] इतरे सर्व-लोका मां वक्ष्यन्ति गुण-वान् इति ॥[11]४३॥[N
५१पू] कृ (?कु) च्छ्र्[12] (?त्से)ण[12] (?न) परम-प्रीतो रामः प्राऽऽह[13] वि-भीषणम्[13] ।
N] सं-स्पृशन्[14] पाणिना धी-मान्[14] वाक्य-ज्ञो वाक्य-कोविदः ॥४४॥ [९६
५१उ] उच्-छ्रितश् चाऽविनीतश्[15] च शत्रुश् च रण-मूर्धनि ।
५२पू] गुरुर् एव पुनर्[16] वीर विग्रहाऽन्ते वि-धीयते ॥४५॥ [N
गुण-वान् निर्-गुणश्[17] चाऽपि[17] ज्ञातिर् व्यसनम् आ-गतः ।
N] पूज्यो भवति मान्यश् च लोकेष्व्[18] एषा[18] गतिः परा[19] ॥४६॥ [N
५२उ] तद्[20] अयं नि-हतः[21] शेते तव भ्राता वि-भीषण ।
वि-जिते त्यज्यतां[22] रोषो[23] विजयाऽन्तो[24] हि वि-ग्रहः[25] ॥४७॥ [N
५३] अथवा यः[26] समुद्-इतो यथा[26] यस्य[27] तु बुध्यते[27] ।
तथा[28] हि[28] न परोक्षं ते[29] धर्मं[29] पश्यामि बुद्धि-तः[30] ॥४८॥ [N
५४] मम[31] चाऽपि वचः[31] कार्यं[31,32] त्वत्-प्रसादाद् धि मे जयः[32] ।[33]

---

१. भ-०र्मव्रतं । २. भ-अनृजुं तथा । ३. भ-संस्कर्तुं । ४. भ-०भिगाभिनम् । ५. अतः परमधिकः पाठः—भ-वर्जे-दग्धं ह्ययशसा लोके न वै धक्ष्यति पावकः । अहं श्लाघ्यो सतां भ्राता न मम क्रोष्टुमर्हति ॥* ६. भ-०रूपेण । ७. रा$_{1}$ फ-गुरुः पूज्योऽस्ति गौ० । भ-पूज्योऽपि गुरुर्गौ० ॥ ८. ल$_{1}$ ल$_{2}$ ब रा$_{2}$ फ भ-०समिति । रा$_{1}$ प्र-०स इव । ९. म-वक्षंतु । भ-वदंतु । १०. भ-मनुजा भुवि । ११. भ-स्मृत्वा सर्वंगुणांस्तस्य वक्ष्यंति सुकृतं पुनः ॥ १२. भ-तच्छ्रुत्वा । १३. भ-वाक्यं विभीषणात् । १४. भ-विभीषणमुवाचेदं ॥ १५. रा$_{2}$ फ भ-वर्जे—च वि० । भ-चैव दीनश् । १६. रा$_{2}$ फ म भ-गुरोर् ॥ १७. रा$_{2}$ फ म भ-०णो वापि । १८. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-०ष्वेका । रा$_{2}$ फ-लोकेप्येषा । म-लोकश्चैका । १९. रा$_{1}$ ल$_{1}$ ल$_{2}$ अ प्र-पुरा ॥ २०. भ-यद् । २१. भ-विजितः । २२. भ-दीर्यते । २३. रा$_{1}$-दोषो । २४. भ-मरणांता । २५. रा$_{2}$ फ भ-०हाः ॥ २६. म-यं सुचरितः पंथा । भ-यत्समुचितं यथा । २७. रा$_{1}$ अ प्र-०ध्यसे । भ-त्वमनुमन्यसे । २८. भ-क्रियतां । २९. भ-वैधर्म्यं । ३०. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-बुद्धिमान् ॥ ३१. रा$_{2}$ फ-तवापि मत्प्रियं । ३२. म-त्वया राक्षसपुंगव । ३३. भ-त्वयापि मे प्रियं कार्यं कार्यं ते च प्रियं मया ।

---

*रा$_{2}$-अश्लाघ्यो न सतां भ्राता संस्कर्तुं राम युज्यते ।
अस्मिन् पापसमाचारे न ममाक्रोष्टुमर्हति ॥

एवं कुरुष्व[1] धर्म-ज्ञ स्त्रियश् चैता वि-सर्जय ॥[2]४९॥[N

हेतु-मात्रं[3] वयं ह्य् अद्य[3] त्वन्-मूलो हि जयो मम ।[4]
५५] अवश्यं तु क्षमो वाच्यं (?च्यो) मया त्वं राक्षसोत्तम ॥[5]५०॥[९७
अधर्माऽनृत-संयुक्तः कामं त्व् एष निशा-चरः ।
५६] तेजस्वी बल-वाञ् छूरः सं-ग्रामेषु च सर्व-दा ॥५१[5]॥[९८
यो[6] न शक्र-मुखैर्[6] देवैः श्रूयते हि[7] परा-जितः[7] ।
५७] महाबल-समुत्पन्नो[8] रावणो लोक-रावणः ॥५२॥ [९९
विजयाऽन्तानि[9] वैराणि[9] नि-वृत्तं[10] तत्-प्रयोजनम्[11] ।
N] क्रियताम् अस्य संस्कारो रावणस्य यथा-विधि ॥[11]५३॥[१००
त्वत्-सकाशान् महा-बाहो संस्कारं[12] रावणोऽर्हति[12] । [१०१पू
N] जाति(?त)रोषां[13] महा-बाहो दीर्घ-निद्रां प्र-वेशितः[14] ॥[15]५४[15]॥[N
पश्चिमा सत्-क्रिया चाऽस्य क्रियतां सु-विशेषतः ।[17]
५८] एतद् दत्तम् अहं मन्ये यशो वाऽयं भविष्यति ॥[18]५५॥
असौ हि शूरो नि-हतो महा-बलो
रणे मया दानव-दर्प-हा च ।
एतस्य यत् प्रेत-गतस्य कृत्यं
N] कुरुष्व लङ्केश्वर मत्-प्रसादात् ॥५६[19]॥ [N

इत्य् उक्तो[20] राम-वचनाद् विधि-दृष्टेन कर्मणा ।[21]
५९] प्रेत-कार्याणि सर्वेषां[22] ज्ञातीनां सम्-अकारयत्[23] ॥५७॥ [N
वि-भीषणस् तु विन्ध्याऽऽदीन्[24] वृद्धाऽमात्यान् बहु-श्रुतान् ।

---

१. रा१ ल१ ल२ ब अ प्र—कुरु च । २. भ—नास्ति ॥ ३. रा१ ल१ ल२ अ प्र—हेतुमप्युत्तावयन् ह्ययं । भ—०यंस्तव । ४. रा२ फ—अत आरभ्य ५६—श्लोकांतं यावन्नास्ति । ५. भ—वर्जं—नास्ति ॥ ६. भ—शतक्रतुमुखैर् । ७. भ—ह्यप० । ८. म भ—महात्मा बलसंपन्नो ॥ ९. रा१ ल१ ल२ ब अ प्र—अ(? आ)मृतांतानि चैतानि । भ—जीवितांतानि वै० । १०. म भ—ममाप्येष यथा तव । ११. म भ—नास्ति ॥ १२. भ—सत्कारं विधिपूर्वकं । १३. ल१ अ—एति रोषां । १४. रा१ अ—०ता । १५. भ—नास्ति । १६. म—नास्ति ॥ १७. म—क्रियतां पश्चिमे द्वारे सत्कारः कुलनंदन । भ—नास्ति । १८. म—नास्ति । भ—क्षिप्रमर्हति धर्मज्ञ त्वद्यशः प्रथयिष्यति । अतः परमधिकश्च पाठः—राघवस्य वचः श्रुत्वा त्वरमाणो विभीषणः ॥ १९. म भ—नास्ति ॥ २०. फ म—वर्जं—०त्काद् । २१. भ—नास्ति । २२. भ—सर्वाणि । २३. भ—समरोचयत् ॥ २४. भ—तान्वीक्ष्य ।

६०] आ-ज्ञापयामास तदा राजा सत्-क्रियताम् इति ।।५८।। [N
भ्रातृ-दारांश् च तान्[1] सर्वान्[1] सान्त्वयामास काल-वित् ।[2]
६१] चक्रे स सलिलं भ्रातुर् ज्ञातीनां चाऽनुपूर्व-शः ।।५९[2]।। [N
राम-वाक्येन विधि-वत् सर्वशास्त्रोपबृंहितः (?म्)।[3] [N
६२] स्त्रियः[4] प्र-वेशयामास[4] सान्त्वयित्वा पुनः पुनः ।।६०।[१२०उ
प्र-विष्टासु च सर्वासु राक्षसीषु वि-भीषणः ।
६३] राम-पार्श्वम् उपाऽऽगम्य सम्-अतिष्ठद् विनीत-वत्[5] ।।६१।[१२१
रामोऽपि सह सैन्येन स-सुग्रीवः स-लक्ष्मणः ।
६४] हर्षं लेभे रिपुं हत्वा वृत्रं[6] वज्र-धरो यथा[6] ।।६२।।[१२२
ततः स मुक्त्वा स-शरं शराऽऽसनम्[7]
महेन्द्र-दत्तं कवचं च तनुं[8] महत्[8] ।
वि-मुच्य रोषं रिपु-निग्रहे कृतं[9]
६५] शशीऽव सौम्य-त्वम् उपाऽगमत्[10] पुनः[10] ।।६३।।[१२३

इत्यार्षे रामायणे युद्ध-काण्डे[11] मन्दोदरीविलाप-रावणसत्कारो[12]
नाम द्विनवतितमः सर्गः ॥ ९२ ॥

[वं-९७]= [त्रिनवतितमः सर्गः] =[दा-११५]

तं राक्षस-वधं[13] दृष्ट्वा देव-गन्धर्व-दानवाः ।
१] जग्मुः स्वैः स्वैर् वि-मानैस् ते कथयन्तः कथाः शुभाः ।।१ ।। [१
२पू] रावणस्य[14] वधं[14] घोरं राघवस्य[15] पराऽऽक्रमम् । [२पू
अनु-रागं च वीर्यं च लक्ष्मणस्य[16] च धी-मतः[16] ।।२[17] ।।
३] पतिव्रता-त्वं[18] सीताया हनू-मति पराऽऽक्रमम् ।[19] [३

---

१. रा₂-ताः सर्वाः । २. अतः परं म-१०१-तमसर्गस्य ११६-तमश्लोकं यावन्नास्ति । ३. भ-नास्ति ॥ ४. भ-ताः स्त्रियः स्नापया० ॥ ५. भ-अभीत० ॥ ६. भ-यथा वृत्रं शतक्रतुः ॥ ७. भ-महद्धनुर् । ८. भ-कांचनम् । ९. ल१ ल₂ प्र-धृतः । भ-तदा । १०. भ-असावुपागमत् ॥ ११. ब प्र भ-लंकाकाण्डे । रा₂ फ-आभ्युदयिके । १२. रा१ ल१ ल₂ ब अ प्र-रावणसत्कारो । रा₂ फ-रावणसत्क्रिया । भ-मंददोरीविलापो । १३. भ-रावणवधं ॥ १४. रा₂ फ-ते रावणवधं । १५. भ-रामस्य च । १६. भ-सौमित्रेर्लक्ष्मणस्य च । १७. अतः परमधिकः पाठः— भ-कथयंतो महाभागा जग्मुर्हृष्टा यथाक्रमम् ॥ १८. प्र-पातिव्रतत्वं । १९. भ-नास्ति ।

२३] सु-युद्धं वानराणां च सु-ग्रीवस्य च मित्र-ताम्[1] ॥३ ॥ [२३
राघवस् तु रथं दिव्यम् इन्द्र-दत्तं शिव-प्रदम्[2] ।
४] आ-ज्ञापयामास[3] तदा[3] मातलिं शक्र-सारथिम्[4] ॥४[5]॥ [४
राघवेणाऽभ्यनु-ज्ञातो[6] मातलिः शक्र-सारथिः ।
६] दिव्यं तम्[7] आ-स्थाय रथं दिवम् एवोत्-पपात[8] ह[8] ॥५[9] ॥ [५
७पू] तस्मिंस् तु दिवम् आ-रूढे सारथौ[10] जयतां वरः[10] ।
८पू] राघवः परम-प्रीतः सु-ग्रीवं परि-षष्वजे ॥[11]६ ॥[६
N] परि-ष्वज्य च सु-ग्रीवं लक्ष्मणेनाऽभि-वादितः ।
१०उ] पूज्य-मानो हरि-गणैर्[12] आ-जगाम स्वम्[13] आ-लयम्[13] ॥७ ॥ [७
अथोवाच[14] स काकुत्स्थः[14] समीप-परिवर्तिनम्[15] ।
११] सौमित्रिं सत्त्व-सम्पन्नं लक्ष्मणं शुभ-लक्षणम्[16] ॥८ ॥ [८
वि-भीषणम् इमं सौम्य लङ्कायाम् अभि-षेचय[17] ।
१२] अनु-रक्तं च भक्तं च तथा[18] पूर्वोपकारिणम्[18] ॥९ ॥ [९
एष मे परमः कामो यद् अहं रावणाऽनुजम् ।
१३] लङ्कायां सौम्य पश्येयम्[19] अभि-षिक्तं वि-भीषणम् ॥१०॥ [१०
एवम् उक्तस् तु सौमित्री राघवेण[19] महाऽऽत्मना ।
१४] तथेत्य् उक्त्वा[20] स[20] सं-हृष्टः सौवर्णं[9] घटम् आ-ददे ॥११॥ [११
शुभेन[21] तेन सौमित्रिर्[19] अभ्य्-अषिञ्चद् वि-भीषणम् । [१४

---

१. ल२ रा फ भ—मंत्रितम् ॥ २. भ—रविप्रभम् । ३. रा२—अनुज्ञाय महाबाहुर् । भ—अनुज्ञाप्य महाभागो । ४. रा२ फ—प्रत्यपूजयत् । ५. अतः परमधिकः पाठः—भ—प्रणामो वासवे कार्यो मातले भद्रमस्तु ते । दर्शिता महती शक्तिः कृतं मे प्रियमुत्तमम् ॥ गच्छेदानीमनुज्ञातो मया त्वं त्रिदशालयम् । वधमावेदयस्वेमं शत्रोस्त्रिदिववासिनाम् ॥ ६. भ—इति रामाभ्यनु० । ७. भ—स । ८. भ—एवारुरोह सः । ९. रा१ ल१ ल२ ब अ प्र—नास्ति ॥ १०. भ—रथे भास्करवर्चसि । ११. भ—राघवः परमप्रीतो हरीन्द्रमिदमब्रवीत् । अतः परमधिकश्च पाठः—दिष्ट्या तव प्रसादेन प्राप्तं हि मनसेप्सितम् । प्रतिज्ञाया गतः पारं हत्वा वै देवकंटकम् ॥ शेषमद्यापरं मन्ये मनस्तुष्टिकरं परम् । लंकायां यत्तु पश्येयमभिषिक्तं विभीषणम् ॥ १२. भ—हरिश्रेष्ठैर् । १३. भ—सहानुजः ॥ १४. भ—अब्रवीच्च तदा रामः । १५. रा२ भ—वर्जं—सेनायाः परिवर्तनं । १६. भ—दीप्ततेजसम् ॥ १७. अ—नास्ति । १८. भ—मम चैवोप० ॥ १९. रा१ ल१ ल२ ब अ प्र—नास्ति । २०. भ—उवाच ॥ २१. भ—घटेन ।

१५] लङ्कायां रक्षसां मध्ये राजानं[1] राम-शासनात् ॥१२॥ [१५पू
अभि-षिच्यमाने तु तदा सर्वे वानर-राक्षसाः ।
१६] प्र-हर्षम् अ-तुलं गत्वा तुष्टुवू रामम् एव हि[2] ॥१३[3]॥ [१६
तस्य मित्राणि तुतुषुर्[4] भक्ता ये चाऽपि[4] राक्षसाः ।
१७] दृष्ट्वाऽभि-षिक्तं लङ्कायां राक्षसेन्द्रं वि-भीषणम् ॥१४॥ [१७
स तद् राज्यं महत् प्राऽऽप्य राम-दत्तं वि-भीषणः ।
१८] प्र-कृतीः[5] सान्त्वयित्वा च[5] ततो रामम् उपाऽगमत् ॥१५॥ [१८
दध्य्[6] अक्षतान् मोदकांश् च लाजाः[6] सु-मनसस् तथा[7] ।
१९] आ-जह्रुर् अथ सं-हृष्टाः पौरास् तस्य निशा-चराः ॥[8]१६॥ [१९
तद्[9] गृहीत्वा तु[9] दुर्-धर्षो राघवाय न्य्-अवेदयत् ।
२०] मङ्गलं[10] सर्वम् आ-नीतं[10] लक्ष्मणाय च वीर्य-वान् ॥१७॥ [२०
कृत-कार्यं समृद्धाऽर्थं[11] दृष्ट्वा रामो वि-भीषणम् ।
२१] प्रति-जग्राह तत् सर्वं तस्यैव[12] प्रिय-काम्यया[13] ॥१८॥ [२१
महाशैलोपमं वीरं प्राऽञ्जलिं[14] पुर-तः[15] स्थितम् ।
२२] उवाचेदं[16] वचो रामो[16] हनू-मन्तं प्लवं-गमम् ॥१९॥ [२२
अनु-मान्य महा-राजम् इमं सौम्य वि-भीषणम् ।
२३] प्र-विश्य नगरीं लङ्कां कौशल्यं[17] ब्रूहि मैथिलीम् ॥२०[18]॥ [२३
वैदेह्या मां कुशलिनं स-सुग्रीवं स-लक्ष्मणम् ।
२४] आ-चक्ष्व वदतां श्रेष्ठ रावणं च[19] हतं रणे[19] ॥२१[18]॥ [२५
प्रियम् एतद् उपाऽऽख्याहि[20] वैदेह्यास्[20] त्वं हरीऽऽश्वर ।
२५] प्रति-गृह्य च सं-देशम् उपाऽऽवर्तितुम् अर्हसि ॥२२॥ [२६

इत्यार्षे रामायणे युद्ध-काण्डे[21] विभीषणाऽभिषेको नाम त्रिनवतितमः सर्गः ॥९३॥

---

१. ल$_1$ ब प्र भ–लंकायां ॥ २. रा$_2$–च । ३. भ–विधिना मंत्रदृष्टेन प्रहर्षेण समन्वितः । अभ्यषिंचत्स धर्मात्मा धर्मात्मानं विभीषणम् ॥ ४. भ–हृष्टानि भक्ताः सर्वे च ॥ ५. भ–ताः सान्त्वयित्वा प्रकृतीस् ॥ ६. भ–अक्षतान्मोदकान्दिव्याँ-ल्लाजान् । ७. रा$_2$ फ–तवा । ८. भ–आजह्रुस्ते तदा हृष्टा रामार्थं रजनीचराः ॥ ९. भ–स तान्गृहीत्वा । १०. रा भ–मांगल्यं मंगलं सर्वं ॥ ११. अ प्र रा–समृद्ध्यर्थं । १२. रा$_2$ फ–तस्य च । १३. रा$_1$–प्रीतिका० । भ–हितका० ॥ १४. रा$_1$ ल$_2$ ब रा$_2$ फ–०लिः । १५. रा$_2$ फ–पार्श्वतः । १६. भ–अब्रवीच्च वचो धर्म्यं ॥ १७. ल$_1$ ब–कुशलं । ल–कौशलं । अ प्र–कोमलं । १८. भ–नास्ति ॥ १९. रा–निहतं युधि ॥ २०. भ–इहाख्याहि मैथिल्यास् ॥ २१. ब प्र–लंकाकांडे । रा$_2$–आभ्युदयिके । भ–वाल्मीकीये लंकाकांडे ॥

इति प्रतिसमा-दिष्टो हनू-मान् मारुताऽऽत्मजः ।
१] प्र-विवेश पुरीं लङ्कां पूज्यमानो[1] निशा-चरैः ॥१ ॥[१
प्र-विश्य च पुरीं लङ्कां[1] सम्-एत्य च वि-भीषणम् ।
N] प्र-विवेशाऽभ्यनु-ज्ञातो हनू-मान् वृक्ष-वाटिकाम् ॥२ ॥[२
स प्र-विश्य यथा-न्यायं सीताया विदितो हरिः ।[2]
२] स[2] ददर्श तदा सीतां[3] राम-पत्नीम्[4] अ-निन्दिताम्[4] ॥३ ॥[३
नि-भृतः प्र-यतः प्र-ह्वः[5] सोऽभि-गम्याऽभि-वाद्य च । [४
३] रामस्य वचनं सर्वम् आ-ख्यातुम् उप-चक्रमे ॥४ ॥[६उ
वैदेहि कुशली रामः स-सुग्रीवः[6] स-लक्ष्मणः[6] । [७पू
४] कुशलं त्वाऽऽह[7] सिद्धाऽर्थो हत-शत्रुर् अमित्र-जित्[8] ॥५ ॥[८
विभीषण-सहायेन रामेण हरिभिः सह ।
५] नि-हतो रावणो देवि[9] लक्ष्मणेन[10] च धी-मता[10] ॥६[11]॥ [९
प्रियम् आ-ख्याति[12] ते वीरो[12] भूयस् त्वां च सभाजये[13] ।
६] दिष्ट्या जीवसि[14] धर्म-ज्ञे जयो रामस्य सं-युगे ॥७ ॥[११
दिष्ट्याऽत्र कुशलं वीरो रामस् त्वां रघु-नन्दनः । [१२पू
N] अब्रवीत् परम-प्रीतः[15] स-सुग्रीवः स-लक्ष्मणः ॥८ ॥[N
प्राऽऽप्तो[16] मे वि-जयः सीते स्व-स्था भव गत-व्यथा ।
७] रावणश्[17] च[17] हतः शत्रुर् लङ्का चेयं वशी-कृता[18] ॥९ ॥[१२उ
मया ह्य्[19] अलब्ध-निद्रेण वृतेन[20] रिपु-निग्रहे[20] ।
८] प्रति-ज्ञेयं समुत्-तीर्णा तीर्णश् च वरुणाऽऽलयः ॥[21]१०॥[१३

---

१. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब अ प्र—नास्ति ॥ २. भ—प्रविश्य च महातेजा रावणाक्रीडमृद्धिमत् । ३. रा$_{२}$—ददर्श पूजया हीनां । भ—ददर्श मृजया हीनां । ४. भ—निष्प्रभामिव रोहिणीम् ॥ ५. रा$_{२}$ फ भ—प्राह ॥ ६. रा$_{१}$—सुग्रीवः सहल० । ७. ल$_{१}$—त्वा हि । ८. भ—अरिंदमः ॥ ९. भ—संख्ये । १०. ल$_{१}$ ब प्र रा$_{२}$ फ—०णेन च वीर्यवान् । भ—०णेनानुजेन च । ११. अतः परमधिकः पाठः—भ—पृष्ट्वा च कुशलं वीरो रामस्त्वां रघुनंदनः । अब्रवीत्परमप्रीतः कृतार्थेनांतरात्मना ॥ १२. रा$_{२}$ फ भ—०ख्यामि ते देवि । १३. रा$_{२}$ फ भ—वर्जे—०येत् । १४. रा$_{२}$ फ—जयसि । भ—वर्द्धसि ॥ १५. रा$_{२}$ फ भ—०मः प्रीतः ॥ १६. भ—लब्धो । १७. भ—०णोऽयं । १८. भ—वशे स्थिता ॥ १९. रा$_{२}$ फ भ—स्व् । २०. भ—छता या तव निर्जये । २१. भ—प्रतिज्ञैषा मया तीर्णा तरता भीममर्णवम् ॥

सं-भ्रमश् च न कर्तव्यो वसन्त्या[1] रावणाऽऽलये[1] ।
९] विभीषण-विधेयं हि लङ्कैश्वर्यं कृतं[2] मया[2] ॥११ ॥[१४
तद् आ-श्वसिहि वि-स्रब्धा[3] स्व-गृहे परि-वर्तसे ।
१०] अहम् अप्य्[4] अद्य[4] सं-हृष्टस् त्वद्-दर्शन-समुत्सुकः ॥१२॥ [१५
एवम् उक्ता[5] समुत्-पत्य सीता[6] शशिनिभाऽऽनना[6] ।
११] प्र-हर्षेणाऽव-रुद्धेन व्या-हर्तुं न शशाक ह ॥[7]१३[8]॥[१६
१२पू] ततोऽब्रवीद्[9] हरि-वरः[9] सीताम् अ-प्रतिजल्पतीम् ।[8] [१७पू
N] निवृत्त-हर्षां सहसा वाक्यम्[10] आकार-सूचिताम् ॥[11]१४॥[N
N] हर्षाद् एव समुत्था (द्-स्था) य सहसा व्रीडिताऽऽननाम् ।[11] [N
१२उ] किं त्वं चिन्तयसे देवि किं च मां नाऽभि-भाषसे ॥१५[12]॥[१७उ
एवम् उक्ता[13] हनु-मता सीता धर्म-पथे[14] स्थिता[14] ।
१३] अब्रवीत् परम-प्रीता[15] बाष्प-गद्गदया[16] गिरा[16] ॥१६॥ [१८
प्रियम् एतद् उप-श्रुत्य भर्तुर् वि-जयम्[17] उत्-तमम्[17] ।
१४] प्रहर्ष-वशम् आ-पन्ना निर्-वाक्याऽहं त्वया कृता ॥१७॥ [१९
न[18] हि पश्यामि सदृशं[18] चिन्तयन्ती प्लवं-गम ।
१५] मत्प्रियाऽऽख्यानकस्येह तव प्रत्यभि-नन्दनम् ॥[19]१८॥ [२०
न हिरण्यं न वासांसि न रत्नानि प्लवं-गम ।[19]
१६] अतोऽहं हर्षम् आ-पन्ना पुनर् दैन्यम् उपाऽऽगता ॥१९[20]॥[२२
न च[21] पश्यामि तत् सौम्य पृथिव्याम् अपि[22] किं-चन[22] ।
N] सदृशं यत् प्रियाऽऽख्याने तव दत्त्वा[23] भवेत् समम्[23] ॥२०॥ [२१
एवम् उक्तस् तु वैदेह्या प्रत्य्-उवाच प्लवं-गमः ।
१७] प्रगृहीताऽञ्जलिर्[24] हर्षात् सीतायाः प्र-मुखे स्थितः ॥२१॥ [२३

---

१. भ–वर्तत्या राक्षसालये । २. भ–इदं कृतम् ॥ ३. भ–विश्वस्ता । ४. भ–चाभ्येमि ॥ ५. भ–उक्त्वा । ६. भ–भर्तुर्विजयसंहिताम् । ७. भ–प्रहर्षेणाभिसंरब्धा व्याजहार न किंचन । ८. अ–नास्ति ॥ ९. भ–अब्रवीच्च हरिश्रेष्ठः । १०. रा₂ फ–वर्जं—हरिर् । ११. भ–नास्ति ॥ १२. अ–नास्ति ॥ १३. रा१ ब प्र रा₂ भ–उक्त्वा । १४. भ–शशिनिभानना । १५. रा₂–०प्रीत्या । १६. रा₂ फ–हर्षग० । भ–हर्षगद्गदभाषिणी ॥ १७. भ–०यसंभवम् ॥ १८. भ–सदृशं न च पश्यामि । १९. फ–नास्ति ॥ २०. भ–हिरण्यं वा सुवर्णं वा रत्नानि विविधानि च । राज्यं वा त्रिषु लोकेषु नैतदर्हसि तान्यपि ॥ २१. भ–तु । २२. भ–वानराधिप । २३. भ–दातुं भवेन्मम ॥ २४. भ–कृतांजलिपुटो ॥

भर्तुः प्रिय-हिते युक्ता[1] भर्तुर् विजय-काङ्क्षिणी[2] ।
१८] भर्तुर्[3] एवं-विधं योग्यं[4] त्वम् एवाऽर्हस्य्[5] अ-निन्दिते[5] ॥२२॥ [२४
न[6] चैतद्[6] वचनं देवि[7] सार-वत् स्निग्धम्[7] एव च ।
१९] न[8] रत्नैर् हेम-दानेन[8] देव-राज्येन वा[9] पुनः[9] ॥२३॥ [२५
अर्थ-तश्[10] च मया प्राऽऽप्ता देवराज्याऽऽदयो गुणाः ।
२०] हत-शत्रुं[10] वि-जयिनं रामं पश्यामि यत् स्थितः ॥२४[11]॥ [२६
अहं त्व् एकं वरं देवि त्वत्-तोऽर्हामि[12] प्रियं महत् । [N
२१] तन्[13] मे प्रीता प्र-यच्छस्व[14] रामश् चाऽप्य् अनु-मंस्यते[15] ॥२५॥ [३२पू
इह श्रुता मया देवि राक्षस्यो[16] विकृताऽऽननाः ।[17]
२२] अ-सकृत् परुषैर्[18] वाक्यैर्[18] वदन्त्यो रावणाऽऽज्ञया ॥२६॥ [N
तास् त्वं परुष-वादिन्यो दारुणास् तर्जने रताः ।
N] वि-कृता विकृताऽऽचारा ममाऽनु-ज्ञातुम् अर्हसि ॥२७[19]॥ [N
शोकाऽऽर्ता त्वां परि-क्लिष्टा श्रावितं (?ता) परुषं वचः । [N
N] हन्तुम् इच्छाम्य् अहं देवि[19] सर्वाः[20] पादतलाऽऽदिभिः[20] ॥२८॥ [३२उ
N] क्लेशयन्ति यदा(?त् ता)[21] हि त्वाम् अशोक-वनिका-गताम् ।[21]
घोरा[22] घोर-समाचाराः[22] क्रूराः क्रूरतरेक्षणाः ॥२९॥ [३३पू
२३] इच्छामि वि-विधैर् घातैर् हन्तुम् एताः सु-दारुणाः[23] । [३४उ
N] राक्षसीर्[24] दारुण-कथा[24] वरम् एतं प्र-यच्छ मे ॥३०॥ [३३उ
मुष्टिपार्ष्णितलाऽऽघातैर् वि-शालैश्[25] चैव बाहुभिः[25] । [३४पू
२४] घोरैर् जानु-प्रहारैश् च नयनानां[26] च पीडनैः ॥३१॥
छेदनैः कर्ण-नासानां केशानां च[27] प्र-पातनैः[27] । [३५

---

१. भ—रक्ते । २. भ—०यनंदिनी । ३. भ—स्निग्धं । ४. भ—वाक्यं । ५. भ—०र्हसि भाषितुं ॥ ६. रा$_2$ फ भ—तवैतद् । ७. भ—सौम्यं सादरं हितम् । ८. रा$_2$—रत्नौघवरदा० । भ—रत्नौघपरिदा० । ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—चापरम् । भ—वासमम् ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—तथैते । ११. अतः परमधिकः पाठः—भ—सीता ह्यसि नृणां देवि सर्वलोकेष्वरुंधती ॥ १२. भ—त्वत्तो याचे । १३. भ—तं । १४. भ—०च्छ त्वं । १५. भ—०नुमन्यते ॥ १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—नास्ति । १७. भ—नास्ति । १८. भ—०षं वाक्यं ॥ १९. भ—नास्ति ॥ २०. रा$_1$ ल$_1$ ल$_2$ ब—भूयः पादतलैरिव । अ प्र—भूयः पादतलैरिह ॥ २१. भ—अथेमा राक्षसीर्घोराः॥ २२. भ—कुरूपिणीः । २३. भ—वर्ज—राक्षस्यो । २४. भ—मानुषाहारा ॥ २५. भ—विकृतैश्चापि शोभनैः । २६. फ—वदनानां ॥ २७. भ—अवलुंचनैः ।

२५] भृशं शुष्क-नदीनां च तारणैर्[1] लंघनैस् तथा ॥३२॥ [३६पू
एवं-प्रकारैर्[2] बहुभिः सम्प्र-हारैर्[2] यशस्विनि ।
२६] योजयेयम् अन्-अर्थेन याभिस् त्वं तर्जिता पुरा ॥[3]३३॥[३७
इत्य्[4] उक्त्वा सा[5] हनु-मता देवी[5] कृपण-वत्सला[5] ।
२७] हनू-मन्तम् उवाचेदं चिन्तयित्वा वि-मृश्य च ॥[6] ३४॥[३८
राज-संश्रय-वश्यानां प्रेष्यतां[7] चाऽपि कुर्वताम्[7] ।
२८] दूतानां चाऽऽप्त-वाक्यानां नाऽत्र दोषः प्र-कल्प्यते ॥[8]३५॥ [३९
भाग्य-वैषम्य-दोषेण पुरस्-ताद् दुष्-कृतेन च ।
२९] मयैतत्[9] प्राक् कृतं[9] सर्वं[9] स्व-कृतं ह्य् उप-भुज्यते ॥३६॥ [४०
नै(?मै)वं भव(?मैवं) महा-बाहो दैवस्यैषा परा गतिः ।[10]
अ-नाथानां नि-युक्तानां भर्तुः कार्येषु वानर ।[10]
N] ईदृग्-विधो वि-धेयानां न क्रोधो धर्म-दर्शिनाम् ॥[11]३७॥[N
प्राऽऽप्तव्येयं दशाऽवश्यं पूर्व-देह-कृता मया ।[12]
३०] दासीनां रावणस्याऽहं यद् एका[13] वशम् आ-गता[13] ॥३८॥ [४१
आ-ज्ञप्ता रावणेनेमा राक्षस्यस् तर्जयन्ति माम् ।
३१] हते तस्मिन् इमा हन्याः कथं वै मारुताऽऽत्मज ॥[14]३९॥ [४२
इमौ ब्रह्म-समाजे[15] तु पुराणे धर्म-संहितौ ।
३२] ऋषि-गीतौ[16] शुभौ श्लोकौ तौ[16] नि-बोध प्लवं-गम ॥४०॥ [४३
न[17] परः[17] पापम् आ-दत्ते परेषां पाप-कर्मणाम्[18] ।[19]
३३] समये[20] रक्षितव्याश् च[20] सन्तश् चारित्र-लक्षणाः ॥४१[21]॥[४४

---

१. भ–कर्षणैर् ॥ २. भ–विप्रकारैर् । ३. भ–निहत्य गंतुमिच्छामि तवेमाः कृतविप्रियाः ॥ ४. भ–एवमुक्ता । ५. भ–वैदेही जनकात्मजा । ६. भ–प्रत्युवाच हनूमन्तं चिन्तयित्वा प्रहस्य च ॥ ७. रा₂ फ–प्रेषणं चा० । भ–वर्ततीनां पराज्ञया । ८. भ–नास्ति ॥ ९. भ–प्राप्तमेतन्मया ॥ १०. भ–नास्ति । ११. रा₂ फ–विधेयानां च दासानां न क्रुद्धो धर्मदर्शिवान् । भ–विधेयानां च दासीनां न क्रुद्ध्यः पवनात्मज ॥ १२. भ–प्राप्तव्यो वा दशायोगो मयाऽयमभिनिश्चितः । १३. भ–मर्षयामि सुदुर्वचः ॥ १४. भ–हते तस्मिन्न कुर्वंति जडांधवधिरा इव ॥ १५. ल₁ ल₂ ब अ प्र–०सकाशे । रा₂ फ भ–व्याघ्रसकाशे । १६. भ–ऋक्षेण गीतो यः श्लोकस्तं ॥ १७. भ–नापरः । १८. भ–पापकारिणाम् । १९. अतः परमधिकः पाठः—भ–वर्ज—कुर्वतामपि पापानि नैव कार्यमशोभनम् । २०. भ–०यो रक्षितव्यस्तु । २१. रा₂–अत आरभ्य ४३-शश्लोकं यावन्नास्ति ॥

पापानाम् वाऽशुभानां वा वधाऽर्हाणाम्[1] अथाऽपि वा[1] ।
३४] कार्यं[2] कारुण्यम् आर्येण कश्-चिन् नैवाऽप-राध्यति ।।[2]४२।। [४५
लोके हिंसा-विहाराणां पापानां[3] पाप-कर्मणाम्[3] ।
३५] कुर्वताम् अपि पापानि नैव[4] कार्यम् अ-शोभनम्[4] ।।४३।। [४६
एवम् उक्तस् तु हनु-मान् सीतया वाक्य-कोविदः ।
३६] प्रत्य्-उवाच ततः सीतां राम-पत्नीं यशस्विनीम् ।।४४।। [४७
युक्ता[5] रामस्य भवती[6] धर्म-पत्नी यशस्विनी[6] ।
३७] प्रति-संदिश माम् आर्ये[7] गमिष्ये यत्र राघवः ।।४५।। [४८
एवम् उक्ता हनु-मता वैदेही जनकाऽऽत्मजा ।
३८] अब्रवीद् द्रष्टुम् इच्छामि भर्तारं भर्तृ-वत्सल[8] ।।४६।। [४९
तस्यास् तद् वचनं श्रुत्वा हनू-मान्[9] प्लवगर्षभः[10] ।
३९] हर्षयन्[11] मैथिलीं वाक्यम् उवाचेदं[12] महा-यशाः[12] ।।४७।। [५०
पूर्ण-चन्द्र-मुखं[13] रामं द्रक्ष्यस्य् आर्ये स-लक्ष्मणम् ।
४०] स्थिर-मित्रं हताऽमित्रं शचीऽवेन्द्रं सुरेश्वरम् ।।४८।। [५१
ताम् एवम् उक्त्वा भ्राजन्तीं सीतां स्फीताम्[14] इव श्रियम्[14] ।
४१] आ-जगाम महा-तेजा[15] हनू-मान् यत्र राघवः[16] ।।४९।। [५२

हरि-वर-सचिवस् ततो हनू-मान्
प्रति-वचनं जनकेश्वराऽऽत्मजायाः ।
कथितम् अकथयद् यथा-क्रमेण
N] नर-पतये[17] प्रणि-पत्य[17] राघवाय ।।५०।। [५३

इत्यार्षे रामायणे युद्ध-काण्डे[18] सीता-प्रमोदो नाम
चतुर्नवतितमः सर्गः ॥ ९४ ॥

---

१. अ—अत आरभ्य४३-शश्लोकस्य तृतीयपादं यावन्नास्ति । भ—परिज्ञाय प्लवंगम । २. प्र—०र्येण कश्चिद्वै नापराध्यति । भ—कार्यकारणकर्तृत्वे न कश्चिदपराध्यति ॥ ३. भ—रक्षसां कामरूपिणां । ४. भ—प्रतिकुर्वन्न शोभते ॥ ५. भ—युक्तं । ६. रा₂ फ—वर्ज—०पत्नी यशस्विनः । भ—महिषी सीता प्रोवाच यद्वचः । ७. भ—देवि ॥ ८. रा₂ फ—०त्सलम् । भ—वानरर्षभ ॥ ९. रा₂ फ भ—हनु० । १०. भ—वानरोत्तमः । ११. भ—प्रहर्षन्मै० । १२. भ—इदमाह स मारुतिः ॥ १३. भ—०भ्रनिभं ॥ १४. भ—श्रियमिवापरां । १५. भ—महाभागो । १६. रा₁—०वौ ॥ १७. रा₂ फ भ—त्रिदशवरप्रतिमाय ॥ १८. प्र भ—लंकाकांडे । रा₂ फ—आभ्युदयिके ॥

तम् उवाच महा-प्राज्ञः[१] सोऽभि-वाद्य[१] प्लवं-गमः ।
१] रामं वचनम् अ-क्षुद्रं[२] वरं सर्व-धनुष्मताम् ॥१ ॥[१
यन्-निमित्तोऽयम्[३] आ-रम्भः[३] कर्मणां यः[४] फलोदयः ।
२] तां साध्वीं[५] शोक-सन्तप्तां द्रष्टुम् अर्हसि मैथिलीम् ॥२ ॥[२
सा हि शोक-समाविष्टा बाष्प-पर्याकुलेक्षणा ।[६]
३] मैथिली वि-जयं श्रुत्वा त्वां द्रष्टुम् अभि-कांक्षति ।।[७]३ ॥[३
माम् उवाचाऽथ वैदेही त्वद्-दर्शन-समुत्सुका[८] ।
N] द्रष्टुम् इच्छामि भर्तारम् इति पर्याकुलेक्षणा ॥[९]४[९]॥[४
एवम् उक्तो हनु-मता रामो धर्म-भृतां वरः ।
४] अगच्छत्[१०] सहसा ध्यानम् ईषद्-बाष्प-परिप्लुतः ॥५ ॥[५
स दीर्घम् उष्णं नि-श्वस्य जगतीम् अव-लोकयन् ।[११]
५] अ-काम इव तत् कर्तुम् इत्य् उवाचाऽञ्जना-सुतम्[१२] ॥६ ॥[६
N] गच्छ[१३] गत्वा[१३] पुनर् लङ्कां पुरीं ब्रूहि वि-भीषणम् । [N
निवृत्त-शौचः पश्येथाः सीताम् आ-दाय माम् इति ॥७ ॥
६] द्रष्टुम् इच्छामि वैदेहीं प्रकृति-स्थाम्[१४] अ-निन्दिताम्[१४] । [७

---

१. रा$_2$ फ भ–०ज्ञमभि० । २. भ–अर्थज्ञो ॥ ३. भ–०त्तं समारंभः । ४. भ–च । ५. भ–देवीं ॥ ६. प्र–नास्ति । ७. रा$_1$–नास्ति ॥ ८. फ–नास्ति । ९. फ–नास्ति । भ–पूर्वस्मात्प्रत्ययाच्चाहमुक्तो विश्वस्तया तया ॥ १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र फ भ–आग० ॥ ११. अतः परं ३९श्लोकं यावत् संक्षिप्तः पाठः— भ–उवाच मेघसंकाशं राक्षसेंद्रं विभीषणम् । मम सीतां शिरःस्नातामुपस्थापय मैथिलीम् । दिव्यांगरागां वैदेहीं दिव्याभरणभूषिताम् ॥ एवमुक्तस्तु रामेण त्वरमाणो विभीषणः । प्रविश्यांतःपुरं सीतां प्रांजलिः प्रत्युवाच ताम् ॥ शिरःस्नाता तु वैदेही दिव्याभरणभूषिता । यानमारोह भद्रं ते भर्ता त्वां द्रष्टुमिच्छति ॥ एवमुक्त्वा तु वैदेही प्रत्युवाच विभीषणम् । अस्नाता द्रष्टुमिच्छामि भर्तारं राक्षसाधिप ॥ तस्यास्तद्वचनं श्रुत्वा प्रत्युवाच विभीषणः । यथाह भर्ता राजा च तथा त्वं कर्तुमर्हसि ॥ तस्य तद्वचनं श्रुत्वा मैथिली पतिदेवता । भर्तृभक्तिपरा साध्वी तथेति प्रत्युवाच ह ॥ ततः सीतां शिरःस्नातां युवतिभिरलंकृताम् । महार्हाभरणोपेतां महार्हांबरधारिणीम् ॥ आरोप्य शिबिकां दिव्यां परार्घ्यास्तरणावृताम् । राक्षसैर्बहुभिर्युक्त आजगाम विभीषणः ॥ १२. प्र रा$_2$ फ–०नीसुतं ॥ १३. रा$_2$ फ–गच्छस्वाशु । १४. प्र–'प्रकृति०' इत्यत आरभ्य 'तथाकृता' इत्यन्तं नास्ति । फ–अलंकृताम् ॥

प्रतिकर्म-समायुक्तां[1] वासोभिर् भूषणैस् तथा ॥८ ॥
निर्-यात्यतां च वैदेही[2] तथा-रूपा[3] तथा-कृता[3] ।
N] पुरस्-कृत्य स्वयं[4] चैनां भवान्[5] निर्-यातुम् अर्हति ॥९ ॥ [N
इत्य् उक्त्वा स[6] हनू-मन्तं प्र-स्थाप्य च पुरीं प्रति ।
N] गिरेः सु-वेलस्य तदा[8] न्य्-अवसच् छिखरे ततः[7] ॥१०॥ [N
सान्त्वयन्[9] वानरान् सर्वान्[9] कुलगोत्राऽवधान-तः[10] ।
N] ऋक्षांश् च[11] सु-महाकायान्[11] गो-लाङ्गूलांश् च सर्व-शः ॥११॥ [N
अथाऽऽगत्य महा-तेजा हनू-मान् मारुताऽऽत्मजः ।
N] वि-भीषणाय च तदा राम-वाक्यं न्य्-अवेदयत् ॥१२[12]॥ [N
७पू] कृत-शौचस् ततो धी-मांस् त्वरमाणो वि-भीषणः । [८पू
N] कृत्वौर्ध्वदैहिकं भ्रातुः[13] कृत-कृत्यः सुहृद्-वृतः[13] ॥१३॥ [N
N] श्रुत्वा हनु-मतो वाक्यं सीता निर्-यात्यताम् इति । [N
७उ] भ्रातुर् अन्तःपुराऽध्यक्षान् विन्ध्याऽऽदीन् स तथाऽब्रवीत्[14] ॥१४॥ [८उ
विनयाऽवनतां भूत्वा शिरसाऽभि-प्रणम्य च ।
N] आऽज्ञापयत वैदेहीम् अभि-वाद्य[15] प्र-साद्य[15] च ॥१५॥ [९
द्रष्टुम् इच्छति भर्ता त्वां रामो धर्म-भृतां वरः ।
८] स्नाताम् अलं-कृतां चैव[17] सं-युतां प्रति-कर्मणा ॥१६॥ [१०
इत्य् उक्तास् ते तथा[18] चक्रुः स्त्र्य्-अध्यक्षा विनयाऽन्विताः[19] ।
N] सा तद् भर्तृ-वचः[20] श्रुत्वा बभूव व्रीडिताऽऽनना ॥१७॥ [N
अचिन्तयच्[21] च[21] वैदेही किं नु राजा चिकीर्षति ।
N] यन् माम् अलं-कृतां देवो द्रष्टुम् इच्छति राघवः ॥१८॥ [११
प्रति-कर्म कथं[22] कुर्यां विना[23] तेन महाऽऽत्मना[23] ।

---

१. रा१ फ–०क्ता । २. ल१ ल२ ब अ प्र रा२–०हीं । ३. रा१ ल१ ल२ ब अ प्र रा२–०पां तथाकृताम् । ४. रा२ फ–यथा । ५. रा१ फ–भयान् ॥ ६. रा२ फ–वर्ज—च । ७. रा२ फ–ततो । ८. रा२ फ–तदा ॥ ९. रा२ फ–वानराम्सांत्वयित्वा च । १०. रा१ ल१ ल२ ब अ प्र–०त्रपदानुगः । रा२–०त्रप्रधा० । ११. रा२ फ–चैव म० ॥ १२. रा२–वर्ज –नास्ति ॥ १३. ल१ ल२ ब प्र–स्नातः ॥ १४. ल१ ल२ ब प्र–०द्वचः ॥ १५. रा१ अ फ–तदाम० ॥ १६. रा१–शिरसाभिप्रणम्य ॥ १७. रा२ फ–एवं ॥ १८. रा२ फ–वर्ज—तदा । १९. फ–विनतानना: । २०. फ–भर्तुर्वचः ॥ २१. रा२ फ–वर्ज—सा चिंतयित्वा ॥ २२. फ–तथा । २३. रा२–शुभं वा यदि वाशुभम् ।

यथैतद् वचनं घोरं नि-स्तीर्णम्[1] अ-शुभं मया ।
N] दुःखेन सहिताम् एव किम् अलं-कर्तुम् अर्हति ॥[2]१९॥ [N
किं तु भर्तृ-वचः[3] कार्यं[4] शुभं वा यदि वाऽशुभम् ।
N] तथेति[5] वचनं रूढं[6] हृदये मे निर्-अन्तरम् ॥२०॥ [N
N] इति निश्-चित्य वैदेही स्त्र्य्-अध्यक्षांस् तान् उवाच ह ।
१०३] यद् आ-ज्ञापयति स्वामी तत् कार्यम् अ-विशङ्कया ॥२१॥ [N
स्त्र्य-अध्यक्षास् ते[7] ततः सर्वे समा-वेद्य वि-भीषणे ।
N] विभीषणाऽऽज्ञया तस्यास्[8] तद् उक्तम् उप-कल्पितम्[8] ॥२२॥ [N
भूषणान्य् अथ वस्त्राणि यद् अन्यद् अपि ते यथा ।
N] स्त्रियश् च कुल-वृद्धाश् च प्रति-कर्मणि[9] नि-ष्ठिताः ॥२३॥ [N
ततः सीता[10] शिरः-स्नाता सं-युक्ता[10] प्रति-कर्मणा ।
१२] तां[11] महाऽऽभरणोपेतां[11] भर्तृ-दर्शन-लालसा ॥२४॥ [१४
मणि-काञ्चन-चित्राऽङ्गीं सम्-अन्ताद् वस्त्र-संयुताम् ।
N] शिविकाम्[12] उह्यमाना(?नां)[12] सा राक्षसैर् वहनोचितैः ॥२५॥ [N
वि-भीषणस्य वचनात् सीता सुरसुतोपमा ।
N] आ-रुरोह सु-संवीता गमने धृत-मानसा ॥२६॥ [N
वृद्धाऽमात्यैः परि-वृतो विनीताऽऽत्मा वि-भीषणः ।
१३] आ-रोप्य शिविकां सीताम् अगमद् यत्र राघवः ॥२७॥ [१५
ततो वानर-मुख्यास् ते कौतूहल-समन्विताः ।
१४] वैदेहीं द्रष्टुम् इच्छन्तस तस्थुः शतसहस्र-शः ॥२८॥ [N
विदितं ह्य् अभवत् तेषां राम-शासन-चोदनात्[13] ।
N] सीताऽभ्यागमनं तत्र पुनर्-जन्म-समं तदा ॥२९॥ [N
ये चाऽन्ये व्य्-आर्तिकास्[14] तत्र सम्प्राऽऽप्तास् तद्-दिदृक्षवः[15] ।
N] तेषाम् अप्य् अभवत् सर्वं रामस्य न भयं तदा ॥३०॥ [N

---

१. अ-विस्ती० । २. रा₂ फ-नास्ति ॥ ३. फ-भर्तुर्वचः । ४. रा₂-कुर्याम् । ५. रा₂ फ-ममेति । ६. रा१ ल१ ल₂ ब अ-रूढे ॥ ७. रा१-तु । ८. रा₂ फ-चाथ ततस्ते समकल्पयन् ॥ ९. रा१ ल१ फ-०र्माणि ॥ १०. रा₂ फ-वर्जे—सीतां शिरः-स्नातां संयुक्तां । ११. रा₂ फ-महार्हाभरणोपेता ॥ १२. ल१ ल₂ ब प्र-०कां चोह्य० ॥ १३. रा₂ फ-०ननोद० ॥ १४. रा₂ फ-वर्जे—वादिकास् । १५. रा-तु वि० ॥

निर्-यास्यत्य् अद्य वैदेहीं रामो[1] राक्षस-वेश्मनः[1] ।[2]
N] चिरोषितां प्रियां भार्याम् इति तेऽन्योऽन्यम् अब्रुवन् ॥३१॥ [N
अलं-कृतायाः सीताया भूषितायाश् च दर्शने ।
N] को हेतुः किम् अभि-प्रेतम् इति चैव वि-शङ्किताः ॥३२॥ [N
तेषाम् एवम् अभि-प्रायम् वि-ज्ञाय रघु-नन्दनः ।
N] सुवेल-शिखरात् तस्माद् अव-तीर्य स्थितोऽभवत् ॥३३॥ [N
तं वानर-सहस्राणि प्रयुतान्य् अर्बुदानि च ।
N] परि-वव्रुर् महाऽऽत्मानं राघवं लक्ष्मणं तथा[3] ॥३४॥ [N
१७पू] ततो वि-भीषणो धी-मान् अमात्य-गण-संवृतः ।
N] अनु-यातश्च[4] पादातैः[4] सु-वेशः शुचिर् आत्म-वान् ॥३५॥ [N
N] शिविकां तां पुरस्-कृत्य रामम् एवाऽभ्य्-अगच्छत ।
१७उ] कथं-चिद् इव सं-मर्दाद् वीराणां द्रष्टुम् इच्छताम् ॥[5]३६॥ [N
सोऽभि-गम्य महाऽऽत्मानं प्राऽऽप्त-ध्यानम्[6] अनु-उत्तमम्[6] ।
१८] प्र-णतश् च प्र-हृष्टश् च प्राऽऽप्तां सीतां न्य्-अवेदयत् ॥३७[7]॥[१६
ताम्[8] आ-गताम् उप-श्रुत्य[8] रक्षो-गृह-चिरोषिताम् ।[7]
१९] रोषो हर्षश् च दैन्यं च राघवं वै[9] समाऽऽविशत्[9] ॥[10]३८॥ [१७
ततो[11] युग्य-गतां[11] सीतां[12] सु-विमर्श[12] वि-चारयन् ।
२०] वि-भीषणम् इदं वाक्यं वि-मना[13] राघवोऽब्रवीत् ॥३९॥ [१८
राक्षसाऽधिपते सौम्य नित्यं मद्-विजये रत ।
२१] वैदेही सन्नि-कर्षं मे[14] शीघ्रं[15] समुप-गच्छतु[16] ॥[17]४०॥[१९
तस्य[18] तद् वचनं श्रुत्वा[18] राघवस्य वि-भीषणः ।
२२] तूर्णम् उत्-सारणं तत्र[19] कारयामास धर्म-वित्[19] ॥४१॥[२०

---

१. ल१ ल२ ब प्र—०श्मनि । रा२ फ—सीतेत्युत्सुकतां गताः । २. अतः परमधिकः पाठः—रा२—किं नु वक्ष्यति वैदेहीं रामो राक्षसवेश्मनि । ३. रा२ फ—तदा ॥ ४. रा१ ल१ ल२ ब अ प्र—पदातिभि ॥ ५. रा२ फ—नास्ति ॥ ६. भ—जितारिं ध्यानमागतम् । ७ प्र—नास्ति ॥ ८. रा२ फ—नाज्ञा तामुपश्रुत्याथ । भ—तामागतां प्रतिश्रुत्य । ९. रा२ फ—समुपाविशत् । १०. भ—हर्षो दैन्यं च शोकश्च त्रयो राममथाविशन् ॥ ११. रा२—ततो यानगतां । भ—कृत्वा पार्श्वगतां । १२. भ—हृष्टिं सविमर्शो । १३. भ—प्रहृष्टो ॥ १४. ल१ ल२ ब अ प्र—तु । १५. रा२ फ—क्षिप्रं । १६. भ—समनुतिष्ठतु । १७. अत आरभ्य रा१—सर्गान्तं यावन्नास्ति ॥ १८. भ—श्रुत्वा तु वचनं राजा । १९. भ—यत्नात्कारयामास सर्वतः ॥

कञ्चुकोष्णीषिणस्[1] तत्र वेत्र-कर्कर-पाणयः[2] ।
२३] उत्-सारयन्तस् तान्[3] योधान् सम-अन्तात् परि-बभ्रमुः[3] ॥४२॥ [२१
ऋक्षाणां वानराणां च राक्षसानां समन्त-तः[4] ।[5]
२४] बृन्दान्य् उत्-सार्यमाणानि दूरम्[6] उत्-ससृजुस्[7] ततः ॥४३॥ [२२
तेषाम् उत्-सार्यमाणानां निः-स्वनः[8] सु-महान् अभूत्[8] ।
२५] वायुना वर्तमानानां सागराणाम् इव स्वनः ॥[8]४४॥ [२३
उत्-सार्यमाणांस् तान् दृष्ट्वा जनान्[9] संजात-सम्भ्रमान् ।[10]
२६] दाक्षिण्याच् चाऽनु-रागाच्[11] वारयामास राघवः ॥४५॥ [२४
वानरांश् चाऽपि तान् दृष्ट्वा कौतूहल-समन्वितान् ।[12]
N] प्रत्य्-अपेधत रामोऽपि ज्ञात्वा तेषां मनो-गतम् ॥४६॥ [N
कथं-रूपा तु वैदेही स्त्री-रत्नं कीदृशं तु तत् ।
१५] तस्या वानर-लोकोऽयं कृते सं-शयम् आ-गतः ॥४७॥ [N
यस्या[13] हेतोर् हतो राजा रावणो राक्षसाऽधिपः ।
१६] सेतुश् च योजन-शतं जले बद्धो महोदधेः ॥४८॥ [N
१७पू] इति तेषां मनो[14] ज्ञात्वा वचनं वदताम् अपि ।
N] प्रेषयामास वैदेही प्र-काशम् उप-यात्व् इति ॥४९[12]॥ [N
सं-रब्धश् चाऽब्रवीद् रामश् चक्षुषा निर्-दहन्[16] इव ।[15]
२७] वि-भीषणं महा-प्राज्ञं सोपालम्भम् इदं वचः ॥५०॥ [२५
किम्-अर्थं माम् अन्-आदृत्य क्लेशयतेऽयं[17] महा-जनः[17] ।
२८] नि-वर्तयैषाम्[18] उद्-वेगं[18] जनोऽयं स्व-जनो मम ॥५१[19]॥ [२६

---

१. ल१ ल२-कांचु० । २. भ-वेत्रझर्झरपा० । ३. ल१ ल२ ब अ प्र-सर्वांस्ताम्परि० । रा२-०तात्परिचक्रमुः । भ-सहसा समंतात्परिचक्रमुः ॥ ४. रा२ फ-०नांच सर्वशः । ५. भ-वानराणामथर्क्षाणां राक्षसानां च सर्वतः । ६. भ-सद्भुर्दूरतरं ॥ ७. भ-हरीणां रूपमाबभौ ॥ ८. रा१ ल१ ल२ ब अ प्र-नास्ति । भ-वायुना धूयमानस्य सागरस्येव पर्वसु । अतः परमधिकश्च पाठः—पद्मगर्भनिभास्ते वै बालाऽर्कसदृशाननाः । एकांतमाश्रिता रेजुस्तडाग इव सर्वतः ॥ ९ भ-समंताज्जातसं० । १०. रा२ फ भ-वर्ज—नास्ति । ११. भ-तदमर्षाच् ॥ १२. भ-अत आरभ्य ४९-शश्लोकं यावन्नास्ति ॥ १३. ल१ ल२ ब प्र फ-तस्या । १४. अ प्र-मतं । १५. रा२-नास्ति ॥ १६. भ-प्रद० ॥ १७. भ-स्वयायं क्लिश्यते जनः । १८. भ-उद्वेगं मा कृथा ह्येषां । १९. अतः परमधिकः पाठः—भ-विभीषणस्तथा श्रुत्वा व्यथितात्मा तथाकरोत् । विवृतां शिबिकां कृत्वा ततो राघवमन्वयात् ॥

सीता त्व् अन्तर्-गतं रोषं तदा[1] विप्र-कृता सती ।
२९] धारयामास दुर्-धर्षा[2] भर्तृ-वाक्य-समाहिता[3] ॥५२॥ [N
ततो राघवम् आ-लोक्य व्रीडिता[4] जनकाऽऽत्मजा[4] ।
३०] हर्षम् अन्तर्-गतं रोषान्[5] नि-जग्राह वराऽऽनना ॥५३॥ [N
ततः स्वरेण महता महामेघौघनादिना ।
३१] उवाच राघवो धी-मान् वि-भीषणम् इदं वचः ॥५४॥ [N
पुत्र-पक्षे प्र-जा राज्ञां[6] तवाऽपि विदितं ध्रुवम् ।
३२] पश्यन्तु मातरं तस्माद् इमे[7] कौतूहलाऽन्विताः ॥५५॥ [N
न गृहाणि न वस्त्राणि न प्र-काशो न सत्-क्रिया ।
३३] न चाऽन्यो राज-सत्कारः[8] शीलम् आ-वरणं[9] स्त्रियः[10] ॥५६॥ [२७
व्य्-असनेषु न[11] युद्धेषु न कृच्छ्रेषु[11] स्वयं-वरे ।
३४] न क्रतौ वा विवाहे वा दर्शनं दुष्यति स्त्रियः ॥[12]५७॥[२८
सैषा युद्ध-गता चैव कृच्छ्रे महति च स्थिता ।
३५] दर्शने नाऽस्ति दोषोऽस्या मत्-समीपे विशेष-तः ॥५८॥ [२९
वि-सृज्य शिविकां तस्माद् पद्भ्याम् एवोप-सर्पतु[13] ।
३६] समीपे मम वैदेहीं पश्यन्त्व् एतां[14] वनौकसः ॥५९॥ [३०
एवम् उक्तस् तु रामेण स-विमर्शो[15] वि-भीषणः ।
३७] रामस्योपाऽनयत् सीतां सन्नि-कर्षं[16] विनीत-वत् ॥६०॥ [३२
तच् छ्रुत्वा राघव-वचः सीतां तत्र वनौकसः ।
३८] विभीषण-प्रभृतयः[17] सर्वाः प्र-कृतयस् तथा ॥६१॥ [N
वीऽऽक्षांचक्रुस् तदाऽन्योऽन्यं किं नु रामः करिष्यति ।
३९] दृश्यतेऽन्तर्-हितो ह्य् अस्य क्रोधो दृष्ट्या वि-भाव्यते[18] ॥६२॥ [N
इत्थं[19] वि-शङ्किताः[19] सर्वे दृष्ट्वा रामस्य चेष्टितम् ।
४०] अपूर्वाऽऽकार-सन्त्रस्ताः सहसैव[20] वि-सर्जने[20] ॥६३॥ [N

---

१. भ-तथा । २. भ-दुर्वारं । ३. ल$_1$-०क्यं स० ॥ ४. भ-विहृता जनकजया । ५. रा$_2$ फ-क्रोधान् । भ-कृत्वा ॥ ६. रा$_2$ भ-राज्ञस् । ७. भ-इमां ॥ ८. ल$_1$-०संस्कारः ॥ ९. भ-वर्जं—आभरणं । १०. भ-स्त्रियाः ॥ ११. भ-विवाहेषु कन्यानां च । १२. भ-क्रतौ च संयुगे स्त्रीणां दर्शनं सार्वलौकिकम् ॥ १३. भ-एव समानय । १४. रा$_2$ फ-एते । भ-एनां ॥ १५. ल$_1$ ल$_2$ ब अ प्र-वर्जं—स विस्मृत्य । १६. भ-समीपं स ॥ १७. रा$_2$ फ भ-०णपुरोगाश्च ॥ १८. रा$_2$ फ भ-विभावितः ॥ १९. भ-इति ते विव्यथुः । २०. रा$_2$ फ-०सैव विरेमिरे । भ-जातशंकास्तदाभवन् ॥

लक्ष्मणोऽपि[1] स-सुग्रीवस् ते[2] च सर्वे प्लवं-गमाः[2] ।
४१] आसन् सु-व्रीडितास्[3] तत्र[3] मृत-कल्पास्[4] त्व् अचिन्तयन्[4] ।।६४।।[३३
कलत्र-निरपेक्षैश् च चेष्टितैर् अस्य[5] दारुणैः ।
४२] अ-प्रीतिम्[6] इव सीतायास् तर्कयन्ति स्म राघवे[6] ।।६५।।[३४
लज्जया त्व्[7] अथ लीयन्ती स्वेषु गात्रेषु जानकी[7] ।
४३] वि-भीषणेनाऽनु-गता[8] भर्तारं साऽभ्य्-अवर्तत[8] ।।६६।। [३५
४४पू] ते तां ददृशुर् आ-यान्तीं श्रियं देह-वतीम् इव ।[9]
सीतां दृष्ट्वा वराऽऽरोहां सर्वे वानर-पुङ्गवाः ।[10]
४५] वि-स्मयं परमं जग्मुस् तस्या रूप-श्रियौजसा[11] ।।६७।। [N
सा वस्त्र-संवीत-मुखी[12] लज्जया जन-संसदि ।
४६] तस्थाव् आ-साद्य भर्तारं श्रीर्[13] विष्णुम् इव रूपिणी ।।६८।। [३६
N] अस्रु-सम्पूर्ण-वदना सा सीता जनकाऽऽत्मजा ।[14]
५२उ] रुरोदाऽऽसाद्य भर्तारं[15] हाऽऽर्य-पुत्रेति जल्पती[16] ।।६९।। [N
वि-स्मयाच् च प्र-हर्षाच् च स्नेहाच् च पति-देवता[15] ।
N] उद्वीऽऽक्षन्ती[17] मुखं भर्तुः सौम्यं सौम्यतराऽऽनना ।।[18]७०।।[३७
४७पू] राघवश् चाऽपि तां दृष्ट्वा दिव्य-रूप-वपुर्-धराम्[19] ।[20]
विवर्ण-वदनो रामः क्रोध-स्नेह-विमध्य-गः[21] ।
४८] बभूवाऽधिक-ताम्राऽक्षो बाष्प-निग्रह-तापितः[22] ।।७१।।[N
ताम् अग्र-तः स्थितां देवीं व्रीडोपहत-चेतनाम्[23] ।
४९] बहु-चिन्तां[24] सु-दुःखाऽऽर्तां चिन्तयन्तीम् अनाथ-वत् ।।७२।। [N

---

१. भ-०णस्तु । २. भ-स च तारासुतोंगदः । ३. भ-च व्रीडिताः सर्वे । ४. भ-०श्च चिंतया ॥ ५. ल१ ब अ प्र-०तं । ६. ल१ ल२ ब अ प्र-राघवं । भ-मेनिरे तां परित्यक्तामपविद्धामिव स्रजं ॥ ७. भ-विलयं यांतीं स्वेष्वंगेषु च मैथिलीं । ८. प्र-०ता भर्तारमभिवर्तते । भ-तां सामान्यामिव योषितं ॥ ९. अतः परमधिकः पाठः—भ-देवतामिव लंकायाः प्रभां वैवस्वतीमिव । १०. रा२ फ-तां च दृष्ट्वा व० । भ-दृष्ट्वा ते हरयः सर्वे सीतां परमया श्रिया ॥ ११. रा१ ल१ ब अ-रूपौजसो श्रिया ॥ १२. भ-बाष्पसंरुद्धमुखी । १३. प्र-नास्ति । १४. भ-नास्ति । १५. भ-वर्जं—सा भृशम् ॥ १६. भ-परिदेविता । १७. रा२-उदीक्षंती । १८. भ-नास्ति ॥ १९. भ-सीतां दिव्यवपुर्धरां । २०. अतः परमधिकः पाठः—रा२ फ भ-जातशंकेन मनसा बाष्पेण रुद्धलोचनः । २१. भ-स्नेहक्रोधार्धम० । २२. भ-०निग्रहणे रतः ॥ २३. ल१ ल२ ब प्र-क्रोधोप० । २४. भ-समालोक्य ॥

राक्षसाऽपहृतां[1] बालां बलात् संरोध-कर्षिताम् ।
५०] कथं-चिद् एव जीवन्तीं मृत्यु-लोकाद्[2] इवाऽऽगताम् ॥७३॥ [N
प्र-मथ्याऽप-हृतां[3] शून्याद् आ-श्रमात् पाप-चेतसा ।
५१] अ-पापां निर्-अवद्याऽङ्गीं नाऽभ्य्-अभाषत राघवः[4] ॥७४॥ [N
५२पू] इति[5] तां[5] बाष्प-रुद्धाऽक्षीम् उपप्रैक्षत[6] राघवः[6] ।
N] बाष्प-व्याकुल-ताम्राऽक्षो मध्ये तेषां महाऽऽत्मनाम् ॥७५॥ [N
तस्या वि-लपितं श्रुत्वा सर्वे ते हरि-यूथपाः ।
५३] रुरुदुर् जात-सन्तापाः शोक-व्याकुल-चेतसः[7] ॥७६॥ [N
मुखं वस्त्रेण सं-च्छाद्य सौमित्रिर् जात-सम्भ्रमः[8] ।
५४] बाष्प-निग्रहणे यत्नम् अकरोद् धैर्यम्[9] आ-स्थितः ॥७७॥ [N
ततः सीता वराऽऽरोहा भर्तुर्[10] वैकारिकं महत् ।
५५] व्रीडाम् उत्-सृज्य तं(?तद्)दृष्ट्वा तस्थौ तस्य[11] तदाऽग्र-तः ॥७८॥[N
शोकम् उत्-सृज्य वैदेही सत्त्वम् आ-लम्ब्य भामिनी ।
५६] प्र-गृह्य[12] मनसा भावं[12] वि-शुद्धेनाऽन्तर्-आत्मना ॥७९॥ [N
वि-स्मयाच् च प्र-हर्षाच् च भयात्[13] स्नेहात् तथा स्थिता[13] ।
५७] बहु-रूपं[14] च[14] ददृशे भर्तुर् वक्त्रम्[15] अ-निन्दिता[15] ॥८०॥ [N
आऽविशद् अनु-उपमं मनः-क्लमं सा
तद् अभिसम्-ईक्ष्य पुनः प्रियस्य वक्त्रम् ।
व्रीडितकुपितविस्मिताऽऽत्मवक्त्रा
N] विविध-वपुर् जनकाऽऽत्मजा बभूव ॥८१[16]॥[३८

इत्यार्षे रामायणे युद्ध-काण्डे[17] सीतादर्शनं नाम
पञ्चनवतितमः सर्गः ॥ ९५ ॥

---

१. अ रा$_2$–रक्ष० । २. भ–पुनर्जातां ॥ ३. भ–बलादप० । ४. भ–किंचन ॥ ५. भ–इत्येवं । ६. ल$_1$ ल$_2$ ब अ प्र–उपप्रेक्ष्य च रा० । भ–लज्जया जनसंसदि ॥ ७. भ–बाष्पव्याकुललोचनाः ॥ ८. भ–जातसाध्वसः । ९. फ–भिक्षेषु-दैन्यम् ॥ १०. भ–दृष्ट्वा । ११. भ–भर्तुस् ॥ १२. भ–निगृह्य मनसा बाष्पं ॥ १३. भ–स्नेहात्क्रोधात्क्लमादपि । १४. भ–०रूपेव । १५. भ–वदनमीक्षती ॥ १६. भ–अथ समरकृतात्मनःक्लमं सा सुचिरमदृष्टमुदीक्ष्य च प्रियस्य । वदनमुदितचन्द्रकांतं विमलशशांकनिभानना ननन्द ॥ १७. ब प्र भ–लंकाकांडे । रा$_2$ फ–आभ्युदयिके ॥

स[1] तां[1] देवीं तदा दृष्ट्वा रामः शङ्का-समन्वितः[2] ।[3]
१] हृदयाऽन्तर्गतं भावं[4] व्या-हर्तुम् उप-चक्रमे ॥१ ॥[१
एषाऽसि[5] वि-जिता[6] भद्रे शत्रुं[7] हत्वा[7] मया रणे ।
२] पौरुषाद् यद् अनु-ष्ठेयं मयैतद्[8] उप-पादितम् ॥२ ॥[२
गतोऽस्म्य् अन्तम् अ-मर्षस्य यशश्[9] च स्व-कम् अर्जितम्[9] ।
३] अव-मानश् च शत्रुश् च युगपन्[10] नि-हतौ मया[10] ॥३ ॥[३
अद्य मे पौरुषे[11] तुष्टिर्[11] अद्य मे स-फलः श्रमः ।
४] अद्य तीर्ण-प्रतिज्ञोऽहं प्रभावाऽऽदि(?दति) कर्म-तः(?णः)॥[12]४ ॥[४
यत् त्वं वि-रहिता[13] नीता छल-च्छिद्रेण[13] रक्षसा ।
५] दैवाद् यः[14] पतितो[14] दोषः स[15] मया तु समी-कृतः[15] ॥५ ॥[५
सम्प्राऽऽप्तम्[16] अव-मानं[17] यत्[18] तेजसा तत्[19] प्र-मार्जिताम्[19] ।
६] कस् तेन पुरुषेणाऽर्थो महताऽप्य् अल्प-तेजसा ।[20] [६
N] यो न शत्रौ न मित्रे च वर्तते हि यथोचितम् ॥[21]६ ॥[N
लङ्घनं च[22] सम्-उद्रस्य लङ्कायाश् चाऽव-मर्दनम् ।
७] स-फलं तद्[23] यशः प्राऽऽप्तं वि-क्रमं[23](?माच्)च हनू-मतः ॥७ ॥[७
युद्धे[24] वि-क्रमतश्[24] चैव[25] हितं मन्त्रयतस्[26] तथा[26] ।
८] सु-ग्रीवस्य स-सैन्यस्य[27] कृतोऽद्य[28] स-फलः श्रमः[28] ॥८ ॥[८
वि-गुणं[29] भ्रातरं त्यक्त्वा[30] यो मां स्वयम् उप-स्थितः ।
९] वि-भीषणस्य च[31] तथा स-फलोऽयं परि-श्रमः[31] ॥९ ॥[९

---

१. ल१ ल२ ब रा२–सीतां । फ–तां तु । २. ब–शोकस० । ३. भ–तां तु पार्श्वस्थितां प्रह्वां रामः संप्रेक्ष्य मैथिलीम् । ४. भ–क्रोधं ॥ ५. प्र–एषापि । ६. ल१ ल२ ब प्र–विदिता । ७. भ–शत्रुहस्तान् । ८. भ–तदेतद् ॥ ९. ल२ ब प्र–यशश्चोर्जि-तमर्जि० । भ–श्रमश्चैव ममार्जितः । १०. भ–मया युगपदुद्धृतौ ॥ ११. भ–पौरुषं दृष्टम् । १२. रा२ फ–वर्जं—नास्ति । भ–अद्य तीर्णप्रतिज्ञत्वात्प्रभवामीह चात्मनः ॥ १३. रा१–०ता तेन छ० । ल१ ल२ ब प्र–प्राप्ता हृता तेन बहुच्छि० । अ–०तानेन बहुच्छि० । १४. भ–संपादितो । १५. भ–पौरुषेणापमार्जितः ॥ १६. भ–०प्तश् । १७. रा१ रा२–स तु मानं । ल१ ल२ ब प्र–यदमानं । भ–चापमानो । १८. भ–यस् । १९. भ–स प्रमार्जितः ॥ २०. रा२ फ–वर्जं—यस्तस्य पौरुषस्यार्थः सह तेनाल्पचेतसा । भ–कस्तस्य पुरुषार्थो हि पुरुषस्याल्पतेजसः । २१. भ–वर्जं—नास्ति ॥ २२. भ–हि । २३. भ–सर्वमेवाद्य महत्कर्म ॥ २४. भ–आदौ विक्रम० । २५. रा१–चाथ । २६. भ–०तश्चनः । २७. ल१ ल२ ब प्र–च सै० । २८. भ–सफलोयं परिश्रमः ॥ २९. रा२ फ–निर्गुणं । ३०. भ–हित्वा । ३१. भ–सफलस्य कृतोद्य सफलः श्रमः ॥

इत्य् एवं ब्रुवतः सीता[1] श्रुत्वा[1] रामस्य तद् वचः ।
१०] क्षणं[2] चोत्फुल्ल-नयना[2] बभूवाऽस्रु-परिप्लुता ॥१०॥ [१०
पश्यतस् तां तु रामस्य समीपे[3] हृदय-प्रियाम् ।
N] जन-वाद-भयाद् राज्ञो बभूव हृदयं द्वि-धा ॥११॥ [N
सीताम् असितपद्माऽक्षीं नील-कुञ्चित-मूर्धजाम् ।
N] अपश्यत् तां[4] वराऽऽरोहां मध्ये वानर-रक्षसाम् ॥१२॥ [N
११पू] पश्यतस् तां[5] तु[5] रामस्य भूयः[6] क्रोधोऽभ्य्-अवर्धत[7] ।
N] प्रभूताऽऽज्याऽवसिक्तस्य पावकस्येव दीप्यतः ॥१३॥ [११
११उ] स बद्ध्वा भ्रुकुटीं[8] वक्त्रे[9] तिर्यक् सम्प्रेक्ष्य[10] राघवः[10] ।
अब्रवीत् परुषं सीतां मध्ये वानर-रक्षसाम् ॥१४॥ [१२
१२] यत् कर्तव्यं मनुष्येण धर्षणां परि-मार्जता[11] ।
तत् कृतं रावणं[12] हत्वा मयेदं मान-कांक्षिणा[12] ॥१५॥ [१३
१३] विदितश् चाऽस्तु ते भद्रे योऽयं मम[13] परि-श्रमः[13] ।
तीर्णश् च[14] सम्-उद्रो यस् त्व् अ-त्वदर्थे तत् कृतं[14] मया ॥१६॥ [१५
१४] रक्षता ननु[15] यद् व्य्-अक्तम्[15] अप-वादं सु-दुःसहम्[16] ।
प्र-ख्यातस्याऽऽत्म-वीर्यस्य त्वां गां च परि-रक्षता ॥[17]१७॥ [१६
१५] निर्-जिताऽसि मया सीते शत्रु-हस्ताद् अ-मर्षिणा ।
अगस्त्येन दुरा-धर्षा मुनिना दक्षिणेव दिक् ॥१८॥ [१४
१६] प्राऽऽप्त-चारित्र-सन्देहा मम प्रति-मुखे स्थिता । [१७पू
N] पराऽनुकूला भवती तथाऽपि दयिता मम ।[18] [N
दीपो नेत्राऽऽतुरस्येव[19] प्रति-कूलाऽसि मे दृढम् ॥१९॥ [१७उ
१७] तद् गच्छस्वाऽनु-जाने[20] त्वां[21] यथेष्टं जनकाऽऽत्मजे ।

---

१. भ–तस्य सीता । २. रा$_2$ फ भ–मृगीवोत्फु० ॥ ३. अत आरभ्य भ–१३-शश्लोकस्य प्रथमपादं यावन्नास्ति ॥ ४. रा$_2$ फ–वै ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब–तस्य । ६. रा$_1$–पुनः । ७. भ–भ्यवर्धत ॥ ८. प्र भ–भ्रू० । ९. रा$_1$ अ–क्रूरां । १०. भ–प्रेरितलोचनः ॥ ११. भ–परिरक्षता । १२. भ–त्वां विनिर्जित्य मयैतन्मानरक्षणम् ॥ १३. रा$_2$ फ भ–रणप० । १४. रा$_2$ फ–वर्जं—समुद्रोऽमर्षो बान्धव० । भ–स सुहृद्रामर्षाच्च त्वदर्थं कृतो ॥ १५. प्र–०द् व्यर्थं । रा$_2$ फ–तु महद्वृत्तं । भ–तु मया वृत्तं । १६. भ–च सर्वतः । १७. रा$_2$ फ–वर्जं–०स्य त्यागं च प० । भ–०त्मवंशस्य निंदां च परिमार्जता ॥ १८. भ–नास्ति । १९. रा$_2$ फ भ–वर्जं–नेत्रांतरस्येव ॥ २०. भ–०च्छाम्यनु० । २१. ल$_1$ ल$_2$ ब रा$_2$–ऽहं ।

एता दश दिशो भद्रे कार्यम् अस्ति न मे त्वया ॥२०॥ [१८
१८] कः पुमान् हि कुले जातः स्त्रियं परगृहोषिताम् ।
तेजस्वी पुनर् आ-दद्यात् सुहृल्-लेखेन[1] चेतसा ॥२१॥ [१९
१९] रावणाऽङ्क-परिक्लिष्टां दृष्टां दुष्टेन चक्षुषा[2] ।
कथं पुनर्[3] उपाऽऽदद्यां[3] कुलं व्यप-दिशन् स्वकम्[4] ॥२२॥ [२०
२०] यद्-अर्थं नि-जिता मे त्वं यशः प्रत्या-हृतं मया ।
नास्ति मे त्वय्य्[5] अभि-ष्वङ्गो यथेष्टं गम्यताम् इति[6] ॥२३॥ [२१
२१] इत्य् अभिव्या-हृतं भद्रे मयैतत् कृत-बुद्धिना[7] ।
लक्ष्मणे भरते चाऽऽपि[6] कुरु बुद्धिं[6] यथा-सुखम् ॥२४॥ [२२
२२] शत्रु-घ्ने वाऽथ सु-ग्रीवे हनू-मति वि-भीषणे ।[8]
नि-वेशय मनः सीते यथा वा सुखम् आत्मनः ॥२५॥ [२३
न हि त्वां रावणो दृष्ट्वा दिव्य-रूपां मनो-रमाम्[9] ।
२३] मर्षयेत[10] चिरं[10] सीते स्व-गृहे पर्यव-स्थिताम्[11] ॥२६॥ [२४
ततः[12] प्रियस्य श्रवणाऽप्रियं वचः[12]
सीताऽपि[13] सं-श्रुत्य[13] चिरस्य[14] मैथिली ।
मुमोच बाष्पं रुदती[15] तदा भृशं[15]
N] गजेन्द्रदन्ताऽभिहतेव शल्लकी[16] ॥२७॥ [२५

इत्यार्षे रामायणे युद्ध-काण्डे[17] सीता-परित्यागो नाम
षण्णवतितमः सर्गः ॥ ९६ ॥

---

१. भ—स्वाभिमुख्येन ॥ २. रा फ—चेतसा । ३. त्वां पुनराददयां । ४. भ—महत् ॥ ५. भ—त्वया ॥ ६. रा$_{२}$ फ भ—वा त्वं । ७. फ—बुद्धिं ॥ ८. भ—सुग्रीवे वानरेंद्रे वा शत्रुघ्ने वा महाबले । अतः परमधिकश्च पाठः—नीले नले हनूमति अंगदे वा महाबले । शरभे पनसे चैव कुमुदे गंधमादने ॥ केशरि-द्विविदे मैंदे ऋक्षराजे महात्मनि । वीरे शतबलौ चैव राक्षसे वा विभीषणे ॥ ९. भ—मनोहरां । १०. रा$_{१}$ ल$_{१}$ ल$_{२}$ ब भ—०येद्धुचिरां । ११. भ—परिवर्ततीम् ॥ १२. रा$_{८}$—०योक्तं श्रवणस्य चाप्रियं वचः । भ—प्रियार्हश्रवणा तद-प्रियं । १३. रा$_{२}$ फ भ—प्रियादुपश्रुत्य । १४. ल$_{१}$ ल$_{२}$ ब प्र—चिराय । १५. भ—सहसा प्रवेपती । १६. भ—वर्ज—सल्लकी ॥ १७. ब भ—लंकाकांडे । रा$_{२}$ फ—आभ्युदयिके ॥

[वं-१०१]= [सप्तनवतितमः सर्गः]= [दा-११६]

एवम् उक्ता तु वैदेही परुषं लोम-हर्षणम् ।
१] राघवेणाऽति-रोषेण भृशं प्र-व्यथिताऽभवत्[1] ॥१ ॥[१
सा तदाऽश्रुत-पूर्वं हि जने महति मैथिली ।
२] श्रुत्वा भर्तुर् वचो घोरं[2] लज्जयाऽव-नता[3]ऽभवत् ॥२ ॥[२
प्र-विशन्तीऽव[4] गात्राणि स्वानि[5] सा[4] जनकाऽऽत्मजा ।
३] वाक्-शरैस् तैः स-शल्येव भृशम् अश्रूण्य् अवर्तयत् ॥३ ॥[३
ततो बाष्प-परिक्लिन्नं प्र-मार्जन्ती स्वम् आननम् ।
४] शनैस्[6] त्यक्त-गृहीताऽर्थं[6] भर्तारम् इदम् अब्रवीत् ॥४ [7]॥[४
किं माम् अ-सदृशं वाक्यम् ईदृशं श्रोत्र-दारुणम् ।
५] रूक्षं श्रावयसे वीर प्राकृतः प्राकृताम् इव ॥५ ॥[५
न तथाऽस्मि[8] महा-बाहो यथा माम् अव-गच्छसि ।
६] प्रत्य्-अयं गच्छ मे स्वेन चारित्रेण[9] च तेजसा[9] ॥६ ॥[६
वि-शङ्कया हि[10] स्त्रियो नाम स्थाने तु[11] परि-शङ्कसे ।
७] परि-त्यजैनां शङ्कां त्वं यद्य् अपीऽयं[12] परोक्ष-ता[12] ॥७ ॥[७
यद् अहं गात्र-संस्पर्शं शत्रोर्[13] हस्त-गता[13] प्र-भो ।
८] काम-कारो न मे तत्र दैवं[14] तु बलवत्-तरम्[14] ॥८ ॥[८
मद्-अधीनं तु यत्[15] तन् मे हृदयं[15] त्वयि वर्तते ।
९] पराऽधीनेषु गात्रेषु[16] किं करिष्याम्य् अन्-ईश्वरी[16] ॥९ [17]॥[९
सह[18] सम्बद्ध-भावाच् च[18] सं-सर्गेण च मान-द ।

---

१. रा₂ फ—०ताऽस्खलत् ॥ २. भ—रूक्षं । ३. भ—०या पीडिता० ॥ ४. ल₁ ल₂ ब अ—०न्ती च । ५. भ—स्वान्येव ॥ ६. रा₂ फ—शनैरनुगृ० । भ—शनैर्गद्गदया वाचा । ७. अतः परमधिकः पाठः—भ—कुले महति जातां च दत्तां चैव महाकुले । शैलूषीमिव राजेन्द्र परेभ्यो दातुमिच्छसि ॥ ८. फ भ—वर्जं—तथास्मि । ९. रा₁—०त्रेणैव ते० । रा₂ फ भ—०णैव ते शपे ॥ १०. रा₁ ल₁ ल₂ ब अ प्र—तु । भ—च । ११. रा₁ ल₁ ल₂ ब अ प्र—च । भ—त्वं । १२. भ—मह ते परीक्षिता ॥ १३. भ—तव शत्रोर्गता । १४. रा₂ फ—दैवतं बल० । भ—दैवं तत्रापराध्यति ॥ १५. भ—हृदयं तव मे । १६. रा₁ ल₁ ल₂ ब अ प्र—करिष्याम्यहमीश्वरी । भ—०म्यनीश्वरा । १७. अतः परमधिकः पाठः—भ—त्वामहं न व्यभिचरे मनसापि कदाचन । तेन सत्येन मे देवा दिशंत्वभयमीश्वराः ॥ १८. रा₂ फ—वर्जं—सहसा बद्धभावा च । भ—मनसा शुद्धभावेन ।

१२] यदि तेऽहम् अ-विज्ञाता[1] हता[2] तेनाऽस्मि[3] साम्प्रतम्[4] ॥१०॥ [१०
प्रेषितस् ते तदा वीरो हनू-मान् अव-लोकितुम्[5] ।
१३] लंकायाम् अभि-[6]वर्तन्त्या(ः)किं तदा न[7] वि-वर्जिता[7] ॥११॥ [११
प्रत्ययं[8] (?याद्) वानरस्यैव[9] तद् वचः सम्-अनन्तरम् ।
१४] त्वया सं-त्यक्तया वीर त्यक्तं स्याज्[10] जीवितं मया ॥१२॥ [१२
न व्यथा न श्रमोऽभूत् ते सं-शये न्य्-अस्य जीवितम्[11] ।
१५] सुहृज्जन-परिक्लेशो न चाऽयं[12] वि-फलो भवेत्[13] ॥१३॥ [१३
त्वया तु नर-शार्दूल[14] क्रोधम्[15] एवाऽनु-वर्तता[15] ।
१६] लघुनेव[16] मनुष्येण स्त्री-तत्त्वं[17] नोप-धारितम्[17] ॥१४॥ [१४
व्यप-देशो न जानक्या नोत्-पत्तिर् वसुधा-तलात् ।[18]
१७] मम शीलं च भक्तिश् च सर्वं ते न सम्-अर्थितम् ॥[18]१५॥ [१५
न प्रमाणी-कृतः पाणिर् बाल्ये बालेन पीडितः ।
१८] मम वृत्तं च शीलं च सर्वं ते पृष्ठ-तः कृतम् ॥१६॥ [१६
एवं[20] ब्रुवाणा[20] रुदती बाष्प-गद्गदया[21] गिरा[21] ।
१९] उवाच[22] लक्ष्मणं दीना सीता ध्यान-परायणा[23] ॥१७॥ [१७
चितां मे कुरु[24] सौमित्रे व्य्-असनस्याऽस्य भेषजम् ।
२०] मिथ्याऽभिशापाऽभि-हता[25] नाऽहं जीवितुम् उत्-सहे ॥१८॥ [१८
अ-प्रतीतैर्[26] गुणैर् भर्त्रा त्यक्ताऽहं[26] जन-संसदि ।
२१] या क्षमा मे[27] तां तु गतिं पतिष्ये[27] हव्य-वाहनम् ॥१९॥ [१९

---

१. भ-न वि० । २. प्र-हृता । ३. प्र रा₂ फ भ-वर्जं—नीतास्मि । ४. भ-शाश्वतं । ५. रा₂ फ भ-अवलोककः । ६. रा₂ फ-०र्तत्यां । भ-मयि तिष्ठंत्यां । ७. भ-ऽस्मि न वर्जिता ॥ ८. रा₂ फ-वर्जं—प्रत्युक्तं । भ-प्रत्यक्षं । ९. रा₁-०रसत्य । प्र-०रस्यास्य । भ-०रेंद्रस्य । १०. रा₁ ल₁ ल₂ ब अ-मा ॥ ११. रा₂ फ-वर्जं—वृथा ते श्रमोऽभूच्च संशयो यस्य जीविते । भ-०मोऽयं स्यात्संशयश्चैव जीविते । १२. फ-चाऽपि । १३. भ-निष्फलो ॥ १४. रा₂ फ-नृपशा० । १५. रा₁ ल₁ ल₂ ब अ प्र-क्रोधेनैवा० । रा₂ फ-रोषमेवा० । १६. रा₂ फ भ-वर्जं—०नैवं । १७. रा₁-०र्त्वं नैव धा० । रा₂ फ-स्त्रीत्वं नैवोपधा० । भ-स्त्रीत्वमेव पुरस्कृतं ॥ १८. अत आरभ्य रा₁ ल₁ ल₂ ब अ प्र-२८-शश्लोकं यावन्नास्ति ॥ १९. भ-मम वृत्तं च वृत्तज्ञ बहुधैव परीक्षितम् । २०. रा₂ फ-इति ब्रुवती । २१. भ-०दभाषिणी । २२. भ-अब्रवील् । २३. भ-०नमुपागता । २४. भ-देहि । २५. भ-०शापनिहिता । २६. भ-अप्रीतस्य च मे भर्तुस्त्यक्तया । २७. भ-वै गतिं गन्तुं गमिष्ये ।

एवम् उक्तस् तु वैदेह्या लक्ष्मणः पर-वीर-हा ।
२२] विमर्श-वशम् आ-पन्नो राघवं[1] समुद्-ऐक्षत[2] ॥२०॥ [२०
स वि-ज्ञाय ततश् छन्दं रामस्याऽऽकार-सूचितम् ।
२३] चितां चकार सौमित्रिर् मते रामस्य वीर्य-वान् ॥२१॥ [२१
न हि रामं तदा कश्-चित् क्रुद्धाऽन्तक-समं तदा ।
२४] अनु-नेतुम् अथो वक्तुं द्रष्टुं वाऽप्य् अशकत् सु-हृत् ॥२२॥ [२२
अधो-मुखं स्थितं रामं ततः कृत्वा प्र-दक्षिणम् ।
२५] उपाऽसर्पत वैदेही दीप्यमानं विभावसुम् ॥२३॥ [२३
प्र-णम्य दैवतेभ्यश्[3] च ब्राह्मणेभ्यश् च मैथिली ।
२६] बद्धाऽञ्जलिपुटा[4] चेदम् उवाचाऽग्नि-समीप-तः ॥२४॥ [२४
यथाऽहं कर्मणा वाचा शरीरेण च राघवम्[5] । [२७पू
२७] मनसा[6] नाऽति-वर्तेयं[6] प्र-काशं वा रहोऽपि वा ॥२५॥ [N
यथा मे हृदयान्[7] नित्यं नाऽप-सर्पति राघवः[8] ।
२८] तथा लोकस्य साक्षी मां सर्व-तः पातु पावकः ॥२६॥ [२५
एवम् उक्त्वा तु वैदेही परि-क्रम्य हुताऽशनम् । [२१पू
२९] प्रवेष्टु-कामा ज्वलनं वाक्यं चैवेदम् अब्रवीत् ॥२७[9]॥ [N
त्वम् अग्ने सर्व-भूतानां शरीराऽन्तर-गोचरः[10] ।
३०] त्वं साक्षी मम देह-स्थः पाहि मां देव-सत्तम ॥२८[11]॥ [N
इत्य् उक्त्वाऽश्रूणि मुञ्चन्ती भर्तृ-प्रणिहितेक्षणा ।[12] N
३२] विवेश ज्वलनं देवी[13] निः-शंकेनाऽन्तर्-आत्मना ॥२९॥ [२९उ
जनः[14] स[14] सु-महांस् तत्र बाल-वृद्ध-पुरःसरः[15] ।
३३] ददर्श मैथिलीं देवीं[16] प्र-विशन्तीं हुताऽशनम् ॥३०॥ [३०
तस्याम् अग्नि-प्रविष्टायां[17] हा हेति च[18] महा-स्वनः[18] ।
३४] रक्षसां वानराणां च सं-बभूवाऽद्भुतोपमः[19] ॥३१॥ [३१

---

१. भ—रामाननमुदै० ॥ २. भ—नास्ति । ३. भ—सा देवताश् । ४. भ—कृताञ्ज० । ५. भ—रावणं । ६. भ—सततं नाभिवर्तामि । ७. भ—हृदयं । ८. भ—राघवात् । ९. भ—नास्ति । १०. भ—अन्तश्चरसि गो० । ११. अतः परमधिकः पाठः—रा₂ फ—तस्यास्तद् वचनं श्रुत्वा सर्वे ते हरियूथपाः । बाष्परुद्धमुखाश्चासन् रुरुदुश्च शनैर्भयात् ॥ १२. रा₂ फ—ततः सा राघवं सीता नमस्कृत्यायतेक्षणा । भ—एवमुक्त्वा वैदेही परिक्रम्य हुताशनं । १३. भ—दीप्तं ॥ १४. रा₁ ल₁ ल₂ ब अ प्र—ततस्तु । १५. भ—०द्धः समागतः । १६. रा₂ फ—दीनां । भ—तत्र ॥ १७. भ—अग्निं विशंत्यां तु । १८. भ—विपुलः स्वनः । १९. प्र—०भूव घनोपमः ।

नि-शम्य सीतां तु[1] तदा वि-शङ्कां[1]
हुताऽशनं दीप्तम् अनुप्र-विष्टाम् ।
स-राक्षसा वानरा-पुङ्गवास् ते
N] सु-दुःखिता ध्यान-परा बभूवुः ॥३२॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे[2] सीताऽग्नि-प्रवेशो नाम
सप्तनवतितमः सर्गः ॥ ९७ ॥

[वं–१०२]= [अष्टानवतितमः सर्गः] =[दा–११६,२०]

स तथा हव्यकव्याऽऽशी[3] सं-स्तुतः[4] सीतया[4] तदा ।
N] बभूवाऽऽकृति-सम्पन्नो हूयमान इवाऽध्वरे ॥१[5] ॥ [N
बभूव चाऽस्य तद्[6] रूपं स्तूयमानस्य सीतया ।
N] गङ्गा-ह्रदस्य[7] च यथा[7] वातोद्धूतस्य शीतलम् ॥२ ॥ [N
ये च तस्य समीप-स्था वानरा दीप्यतस् तदा ।
N] ते[8] चाऽस्य शीत-भावं तं स्पृष्ट्वा[8] वि-स्मयम् आ-गताः ॥३ ॥ [N
शुद्धां च मेनिरे सीतां सम्प्र-विष्टां हुताऽशनम् ।
N] अरुन्धतीं वसिष्ठस्य पार्वतीम्[9] इव[9] शूलिनः ॥४ ॥ [N
अभवत् सर्व-सैन्यानां दिदृक्षूणां समा-गमः ।
N] सा रामं मनसा कृत्वा हुताऽशनम् उपाऽऽगता ॥५ [N
संवि-गाह्य ततो देवी दिव्य-भूषण-भूषिता ।[10]
N] हुताऽशनं प्र-विष्टा सा सर्वेषाम् एव पश्यताम् ॥६ ॥ [N
सा तप्तनवहेमाऽऽभा[11] तप्त-काञ्चन-भूषणा ।
N] विवेश मैथिली दीप्तम्[12] अग्निम्[12] अग्नि-शिखा यथा ॥[13]७ ॥ [३१
ददृशुस् ते विशालाऽक्षीं पतन्तीं हव्य-वाहनम् ।[14] [३२पू

---

१. रा$_2$ फ–०दा विसंज्ञां । भ–हृदतीमशंकां ॥ २. ब प्र भ–लंकाकांडे । रा$_2$ फ–आभ्युदयिके ॥ ३. रा$_1$ फ–०व्यवेशः । ४. रा$_2$ फ–वर्ज—सीतया संस्कृतस् । ५. अत आरभ्य भ–६-श्लोकं यावन्नास्ति । ६. प्र–यद् । ७. रा$_2$–वर्ज—०स्य शिशिरे । फ–०दस्येव यथा ॥ ८. प्र–ते चाथ शीत० । रा$_2$ फ–तथास्य तच्छीतलत्वं दृष्ट्वा ॥ ९. रा$_2$ फ–सतीमिव च । १०. प्र–नास्ति ॥ ११. भ–वर्ज—रक्तनव० । १२. रा$_2$–देवी दीप्तम् । १३. भ–पपात ज्वलने दीप्ते हुताहुतिरिवाध्वरे ॥ १४. भ–ददृशुस्तां महाभागां प्रविशंतीं हुताशनं ।

N] सीतां सर्वाणि भूतानि रुक्म-वेदीम्[1] इवोत्तमाम् ॥८ ॥ [३२
ताम् अपश्यन् सु-मनसः प्र-विशन्तीं हुताऽशनम् ।
N] ऋषयो देव-गन्धर्वा[1] यज्ञे पूर्णाऽऽहुतीम्[2] इव[2] ॥[3]९ ॥ [N
प्र-चुक्रुशुः[4] स्त्रियः सर्वास् तां दृष्ट्वा हव्य-वाहने[5] ।
N] पतन्तीं सं-स्कृतां मन्त्रैर् वसोर् धाराम् इवाऽध्वरे ॥१०॥ [३३
त्रैलोक्य-वासिनः सर्वे सिद्धाः[6] स्व-च्छन्द-चारिणः[6] ।
ते ताम् अभ्य्-एत्य ददृशुः प्र-विष्टां हव्य-वाहनम् ।
N] शास्त्रेण[8] विधिना यज्ञे मन्त्र-युक्ताम् इवाऽऽहुतिम् ॥११[7]॥[N
ततो वैश्रवणो राजा यमस्[9] च पितृभिः सह[9] ।
२] सहस्राऽक्षस् च देवेशो वरुणस् च जलेश्वरः[10] ।१२।[१२०,१२
त्रिशूल-पाणिर्[11] विश्वेशो[11] महा-देवो वृष-ध्वजः ।
३] कर्ता च सर्वस्य लोकस्य[12] ब्रह्मा च[13] भग-वान् प्र-भुः[13] ॥१३॥[३
स च राजा दश-रथो वि-मानेनाऽन्तरिक्ष-गः ।
४] आ-जगामाऽथ[14] तं देशं देवराज-सम-द्युतिः ॥१४॥ [N
ते[15] सर्वे च[15] समा-गम्य वि-मानैः सूर्य-सन्निभैः[16] ।
N] अभ्य्-अभाषंत काकुत्स्थं मधुरं नामगोत्र-तः[17] ॥[18]१५॥[N
स-हस्ताऽऽभरणं[19] बाहुं[19] प्र-गृह्य परिघोपमम् ।
६] अब्रवीत् त्रिदश-श्रेष्ठो राघवं प्राऽञ्जलिं स्थितम् ॥१६॥ [५
भर्ता[21] त्वं सव-लोकस्य[20] श्रेष्ठो ज्ञान-वतां वरः ।

---

१. भ-नास्ति । २. ब ल१ ल२-०र्तिं यथा । ३. अत आरभ्य प्र-११-शश्लोकं यावन्नास्ति । भ-शस्तां पतंतीं धरणीं त्रिदिवाद्देवतामिव ॥ ४. भ-प्रशशंसुः । ५. रा१ अ-प्रविशंतीं हुताशनं । ल१ ल२ ब-नास्ति ॥ ६. ब ल१-ये सिद्धाः स्वैरचा० । रा२ फ-ये सिद्धाश्छन्दचा० । ७. अतः परमधिकः पाठः—ल१ ल२ ब अ फ-ददृशुस्तां त्रयो लोका देवगंधर्वदानवाः । मैथिलीं तु विशालाऽक्षीं प्रविशन्तीं हुताशनम् ॥ भ-नास्ति । ८. रा२ फ-वर्ज—सांख्येन । ९. फ-वर्ज—धर्मश्च पि० । रा२-यमः स्वपि० । भ-यमश्चामित्रकर्षणः ॥ १०. भ-सहस्राक्षो महेन्द्रश्च वरुणश्चांभसां पतिः । ११. भ-स च त्रिनयनः श्रीमान् । १२. रा२ फ-जगतो । १३. रा२ फ-चैव महाप्रभुः । भ-च ज्ञानिनां वरः ॥ १४. रा२ फ भ-अभ्याजगाम ॥ १५. रा२ फ-एते सर्वे । भ-ते तु सर्वे । १६. भ-सूर्यवर्चसैः । १७. रा२ फ-पितृगो० । १८. भ-आगत्य नगरीं लंकाममिगम्य च राघवम् ॥ १९. भ-०णान् बाहून् । २०. भ-अनुवंस्त्रिदशश्रेष्ठा । २१. रा१ ल१ ल२ प्र ब अ-भर्ता सर्वस्य लो० । रा२-भर्तारं सर्वः० । भ-कर्ता सर्वस्य लो० ।

७] उपेक्षसे कथं सीतां पतन्तीं हव्य-वाहनम्[1] ।।१७।। [६
कथं देव-गण-श्रेष्ठम् आत्मानं नाऽव-बुध्यसे ।
८] उपेक्षसे च वैदेहीं प्राकृतः प्राकृताम्[2] इव ।।[3]१८[4]।।[९
इत्य् उक्तो देव-राजेन[5] स्वामी लोकस्य राघवः ।
९] अब्रवीत् त्रिदश-श्रेष्ठं रामो धर्म-भृतां वरः ।।[6]१९।।[१०
आत्मानं मानुषं मन्ये रामं दशरथाऽऽत्मजम् ।
१०] योऽहं जातो यथा चाऽहं भग-वांस् तद् ब्रवीतु मे ।।[7]२०।।[११
तम् उवाच सहस्राऽक्षः श्रेष्ठोऽस्माकं पिता-महः ।[8]
N] स्वयं-भूर् भग-वान् ब्रह्मा वक्ष्यत्य्[9] एष यथा[10] भवान् ।।२१[11]।।[N
तम् उवाच ततो देवः स्वयं-भूर् अमित-द्युतिः ।
११] प्र-गृह्य रुचिरं बाहुं स्मारयन् पूर्व-दैहिकम् ।।२२[12]।।[१२
भवान् नारायणः श्री-मान् देवश् चक्राऽऽयुधः प्र-भुः । [१३पू
१२] शार्ङ्ग-धन्वा हृषी-केशः पुराणः[13] पुरुषोत्तमः ।।२३।।
अ-जितः खड्ग-भृद्[14] विष्णुः कृष्णश् चैव सनातनः[14] । [१५
१३] एक-शृङ्गो वराहस् त्वं भूत-भव्य-भवाऽन्तकः[15] ।।२४।। [१३उ
अ-क्षरं ब्रह्म सत्यं[16] च[16] मध्ये चाऽन्ते च राघव ।
१४] लोकानां त्वं परो धर्मो विष्वक्-सेनश् चतुर्-भुजः ।।२५[17]।।[१४
सेनानीर् अग्रणीश् च त्वं वैकुण्ठश्[18] च महा-भुजः[18] ।[19]
१५] प्र-भवश् चाऽप्य्-अयश् च त्वम् उपेन्द्रो मधु-सूदनः ।।[20]२६।।[१६
वृष्णि-गर्भो[21] धृताऽऽर्तिस्[22] त्वं[22] पद्म-नाभो भवाऽन्तकृत्[23] ।

---

१. भ–०हने ॥ २. रा१ अ–०तीमिव । ३. भ–शंकसे चैव वैदेहीमदृष्ट्वा प्राकृतो यथा । ४. प्र–नास्ति ॥ ५. भ–लोकपालैस्तु । ६. प्र–अथ देवगणश्रेष्ठं रामो ध० । भ–०शश्रेष्ठान्राघवः प्रांजलिः स्थितः ॥ ७. भ–योहं देवो यतश्चैव तद्भवान्वक्तुमर्हति ॥ ८. प्र–नास्ति । ९. रा२–वर्जं—वक्षत्य् । १०. ल१ ल२ ब अ प्र–यतो । रा२–ततो । ११. भ–नास्ति ॥ १२. भ–इति ब्रुवाणं काकुत्स्थं ब्रह्मा ब्रह्मविदां वरः । अब्रवीच्छृणु काकुत्स्थ सत्यं सत्यपराक्रम ॥ १३. भ–पुरुषः । १४. रा२ फ–शंखभ्राजिष्णुः कृ० । भ–खड्गधृक् जिष्णुर्विष्णुः कृष्णो महाबलः । १५. रा१ ल१ ल२ ब अ–यज्ञनाभो रणाकृतिः । प्र–यज्ञनाभो रणान्तकृत् । रा२–देवदेवो महाभुजः । भ–भूतो भव्यः सपत्नजित् ॥ १६. रा१ ल१ ल२ ब अ प्र–संपन्नं । फ–सत्यं ते । १७. रा२–नास्ति ॥ १८. भ–बुद्धिश्चिता क्षमा दमः । १९. ल१ रा२–नास्ति । २०. फ–नास्ति ॥ २१. रा१ ल१ ल२ ब अ–विष्णुगर्भो । भ–कृतकर्मा । २२. प्र–पदातिस्त्वं । भ–महेंद्रश्च । २३. रा१ ब–नरांतकृत् । ल१ ल२ अ भ–रणांत० ।

१६] शरण्यं शरणं च त्वाम् आहुः सेन्द्राः[1] सुरर्षयः[2] ॥२७॥ [१७
ऋक्-साम-शृङ्गो वेदाऽऽत्मा शत-जिह्वोऽमरर्षभः । [१८पू
१७] त्वं यज्ञस् त्वं वषट्-कारस् त्वम् ओं-कारः परं-तपः ॥२८॥ [१९पू
ऋत-धामा वसुः पूर्वो वसूनां च प्रजा-पतिः ।[3] [N
१८] त्रयाणाम् अपि लोकानाम् आदि-कर्ता स्वयं-प्रभुः ॥२९॥
रुद्राणाम् अष्टमो रुद्रः साध्यानाम् अपि पञ्चमः । [१८उ
१९] अश्विनौ चाऽपि कर्णौ ते चन्द्र-सूर्यौ[4] च चक्षुषी ॥३०॥ [N
अन्ते चाऽऽदौ च मध्ये च दृश्यसे त्वं परं-तप । [N
२०] प्र-भवं नि-धनं चाऽपि न विद्मः[5] को भवान् इति ॥३१॥[१९उ
दृश्यसे[6] सर्व-भूतेषु गोषु च ब्राह्मणेषु च ।
२१] दिक्षु सर्वासु गगने पर्वतेषु[7] वनेषु[7] च ॥३२॥ [२०
सहस्र-चरणः श्री-माञ् छत-शीर्षः सहस्र-दृक्[8] ।
२२] त्वं धारयसि भूतानि वसु-धां च[9] स-पर्वताम्[9] ॥३३॥ [२१
अन्तः पृथिव्यां[10] सलिले दृश्यसे त्वं महोरगः ।
२३] त्रींल् लोकान् धारयन्[11] राम देव-गन्धर्व-दानवान्[12] ॥३४॥ [२२
अहं ते हृदयं राम जिह्वा देवी सरस्वती ।
२४] देवा रोमाणि गात्रेषु निर्-मितास्[13] ते स्व-मायया[13] ॥[14]३५॥[२३
नि-मेषस् ते[15] स्मृतो[15] रात्रिर् उन्-मेषो दिवसः स्मृतः[16] ।[14]
२५] संस्-कारस् तेऽभवद् रहो न तद् अस्ति त्वया विना ॥३६॥ [२४
जगत् सर्वं शरीरं ते स्थैर्यं ते वसुधा-तलम्[17] ।
२६] अग्निः कोपः प्र-सादस् ते सोमः श्रीवत्स-लक्षणः[18] ॥३७॥ [२५
त्वया लोकास् त्रयः क्रान्ताः पुराणैर् वि-क्रमैस् त्रिभिः ।
२७] महेन्द्रश् च[19] कृतो राजा[19] बलिं बद्ध्वा महाऽसुरम् ॥३८॥ [२६

---

१. भ-देवाः । २. रा१ ल१ ल२ रा२-महर्षयः । भ-सवासवाः ॥ ३. ल१ प्र-ऋतपूर्वं वसूनां च पावकश्च प्र० ॥ ४. भ-चंद्रादित्यौ ॥ ५. भ-वर्जं—विदुः ॥ ६. रा१ ल१ अ रा२-दृश्यते । ७. भ-सागरेषु नगेषु ॥ ८. रा फ-०त्रपात् । ९. रा२-चैव पर्वतात् ॥ १०. रा२ फ भ-०व्याः । ११. रा१ ल१ ल२ ब अ-चार० । १२. भ-देवमानुषपन्नगान् ॥ १३. भ-०तानि स्वयंभुवा । १४. अ-नास्ति ॥ १५. भ-तेऽभवद् । १६. ल१ ल२ प्र रा२-तथा । फ-त्वया ॥ १७. रा२ फ-०ले । १८. रा१ ल१ ल२ अ प्र-०लक्ष्मणः । रा२-०लांछनः ॥ १९. रा२ फ-तु कृतो वीर ॥

लोकान् सं-हृत्य काले त्वं नि-वेश्याऽऽत्मनि निश्-चलम् ।
N] कुर्वन् नैकाऽर्णवं घोरं दृश्याऽदृश्येन वर्त्मना ॥३९[1]॥ [N
त्वया सिंह-वपुः कृत्वा हिरण्य-कशिपुर् हतः ।
N] नमस् तुभ्यं भग-वते पुरुषाय महाऽऽत्मने ॥४०॥ [N
सर्व-भूत-निवासाय वासुदेवाय[2] साक्षिणे ।
N] नमस् त आदि-देवाय[2] साक्षि-भूताय ते नमः ॥४१॥ [N
नारायणाय ऋषये[3] नराय हरये नमः ।
N] त्वम् अश्व-वदनो भूत्वा पाताल-तलम् आ-स्थितः ॥४२॥ [N
N] सं-भूतं[4] परमं दिव्यं[5] दहस्य् अम्भः पुनः पुनः ।
यत् परं श्रूयते ज्योतिर् यत् परं श्रूयते तपः ॥४३॥ [N
२८] यत् परं परमश्[6] चैव[7] परमाऽऽत्मेति कथ्यते ।
२९पू] परो मोक्षः परं यच्[8] च तत् त्वम् एव[9] नि-गद्यसे ॥४४॥ [N
N] हव्यं[10] कव्यं पवित्रं च प्राऽऽप्तिं[10] स्वर्गाऽपवर्गयोः ।
२९उ] स्थित्य्-उत्पत्ति-विनाशानां त्वाम्[11] आहुः प्र-कृतिं पराम्[11] ॥४५॥ [N
यज्ञश् च यजमानश् च होता चाऽध्वर्युर् एव च ।
N] भोक्ता यज्ञ-फलानां च त्वम् एव परि-गीयसे ॥४६॥ [N
सीता लक्ष्मीर् भवान् विष्णुर् देवश्[12] चक्राऽऽयुधः प्र-भुः[12] ।
३०] वधाऽर्थं रावणस्येह प्र-विष्टो मानुषीं तनुम् ॥४७॥ [२७
तद् इदं नस् त्वया कार्यं कृतं धर्म-भृतां वर ।
३१] नि-हतो रावणो राम प्र-हृष्टो[13] दिवम्[14] आऽक्रमत्[14] ॥४८॥ [२८
३२पू] अ-मोघं देव वीर्यं ते न ते मोघः परि-श्रमः[15] ।[16] [२९पू
अ-मोघास् ते भविष्यन्ति भक्ति-मन्तो नरा भुवि ॥४९॥ [३०

---

१. रा$_2$ फ भ–अत आरभ्य ४२-शश्लोकपूर्वार्धं यावन्नास्ति ॥ २. अ–नास्ति ॥ ३. ल$_1$ ब प्र–हरये ॥ ४. फ–संभूतो । ५. फ–हर्षं ॥ ६. रा$_2$ फ–वर्जे—परतश् ॥ ७. ल$_1$ ल$_2$ ब प्र–चापि । ८. रा$_2$ फ–वर्जे—यश् । ९. रा$_1$ ल$_1$ ल$_2$–एतन् ॥ १०. रा$_2$ फ–हव्यकव्यप्रवृत्तिं च शक्तिः । ११. रा$_2$ फ–त्वमेव प्रकृतिः परा ॥ १२. रा$_2$ फ–देवः कृष्णः प्रजापतिः ॥ १३. रा$_2$ फ–वर्जे—प्रविष्टो । १४. रा$_1$–दिवमाकृतात् । प्र ब–दिवसां क्रमात् । ल$_1$ ल$_2$ अ भ–दिवमाक्रमात् ॥ १५. रा$_1$ ब अ फ–शमस्तव । ल$_1$ ल$_2$–श्रमस्तव । प्र–च संस्तवः । १६. अतः परमधिकः पाठः—रा$_2$ फ–अमोघं दर्शनं राम न च मोघस्तवस्तथा ॥

३३] देवं[1] त्वां देवतां[1] भक्ताः पुराणं[2] पुरुषोत्तमम्[2] ।[3] [३१पू
३४उ] मृताः स्वर्गं[4] गमिष्यन्ति कीर्तित्वा नाऽत्र सं-शयः ॥५०[4]॥[३२उ

इत्यार्षे रामायणे युद्ध-काण्डे[5] ब्रह्म-प्रोक्तो राम-स्तवो[5]
नामाष्टानवतितमः सर्गः ॥ ९८ ॥

[व-१०३]= [एकोनशततमः सर्गः]= [दा-१२१]

N] ततः प्रीत-मना रामः श्रुत्वा तां ब्रह्मणो गिरम् ।[6]
दध्यौ[7] मुहूर्तं[8] धर्माऽऽत्मा हर्ष-व्याकुल-लोचनः[8] ॥१[9]॥ [N
१] एवं[10] श्रुत्वा शुभं वाक्यं पितामह-मुखोद्गतम्[11] ।
N] अङ्केनाऽऽदाय वैदेहीम् उत्-पपात[12] विभावसुः[13] ॥२ ॥ [१
तरुणाऽऽदित्य-संकाशां तप्त-काञ्चन-भूषणाम् ।
३] रक्ताऽम्बर-धरां बालां नील-कुञ्चित-मूर्धजाम्[14] ॥३ ॥ [३
अक्लिष्ट-माल्याऽऽभरणां तथा-रूपाम् अ-निन्दिताम् ।
४] ततो[15] रामाय वैदेहीम् अङ्के कृत्वा विभावसुः ॥४ ॥ [४
अब्रवीत् तु[16] तदा रामं[17] साक्षी[18] लोकस्य[19] पावकः[19] । [५
५] एषा ते राम वैदेही पापम् अस्या न विद्यते ॥५[20]॥ [६
नैव वाचा न मनसा नैव[21] बुद्ध्या न चक्षुषा[21] ।
६] सु-वृत्ता वृत्त-शौण्डीर त्वां सीताऽभ्य्-अचरच् छुभा ॥[22]६ ॥ [७

---

१. रा$_{2}$ फ-ये त्वां देववरं । २. रा$_{1}$ फ-०णपु० । ३. अतः परमधिकः पाठः—रा$_{2}$ फ भ-इदमार्षं स्तवं दिव्यमितिहासं पुरातनम् । ४. रा$_{2}$ फ भ-ये नराः कीर्तयिष्यंति नास्ति तेषां पराभवं । अतः परमधिकश्च पाठः—कथमिव पराभवं व्रजेयुः पुरुषाश्रयेण युक्ताः । नहि जगति चतुर्भुजाश्रयाणां त्रिदश इहास्ति वरप्रदो बलिष्ठः ॥ ५. प्र-लंकाकांडे ब्रह्म० । रा$_{2}$ फ-आभ्युदयिके पर्वणि महापुरुषस्तवो ॥ भ-लंकाकांडेऽमोघस्तवदेवसमागमो ॥ ६. भ-नास्ति । ७. रा$_{2}$ फ-वर्जं—ध्यात्वा । भ-अभून् । ८. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-गृहीत्वा जनकात्मजाम् । भ-रामो बाष्पाकुलेक्षणः । ९. अतः परमधिकः पाठः—रा$_{2}$ फ भ-विधूयाग्निचितां तां तु जानकीमन्ववेक्ष्य च । उत्तस्थौ मूर्तिमानाशु गृहीत्वा जनकात्मजाम् ॥ १०. भ-एतद् । ११. भ-०हसमीरितं । १२. रा$_{2}$ फ-स्वसुतेव । १३. भ-ससंभ्रमः ॥ १४. ल$_{1}$ ल$_{2}$ ब-नीलां कु० ॥ १५. भ-ददौ ॥ १६. भ-च । १७. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ-रामः । १८. रा$_{1}$ अ-पावकं । ल$_{1}$ ल$_{2}$ ब-साक्षिणं । १९. रा$_{2}$ फ भ-वर्जं—लोकपावनं ॥ २०. रा$_{1}$ ल$_{1}$ ल$_{2}$ ब अ प्र-अत आरभ्य २०-शश्लोकपूर्वार्धं यावन्नास्ति ॥ २१. भ-न बुद्ध्या न च च० । २२. भ-सुवृत्ता वृत्तसंपन्ना न त्वामभिचरत्यसौ ॥

रावणेनाऽपि नीतैषा वीर्योत्सिक्तेन रक्षसा ।
७] त्वया वि-रहिता सीता[1] वि-वशा जनकाऽऽत्मजा[2] ॥७ ॥ [८
रुद्धा चाऽन्तः-पुरे दीना त्वच्-चित्ता त्वत्-परायणा ।
८] रक्षिता राक्षसीभिश् च घोराभिर्[3] घोर-बुद्धिभिः[3] ॥८ ॥ [९
प्र-लोभ्यमाना वि-विधं भर्त्स्यमाना च मैथिली ।
९] तन्[4] न चिन्तयते[4] रक्षस् त्वद्-गतेनाऽन्तर्-आत्मना ॥९ ॥ [१०
वि-शुद्धां[5] वि-रजस्कां त्वं[5] प्रति-गृह्णीष्व मैथिलीम्[6] ।
१०] न किं-चिद् अपि वक्तव्यम् अहम् आ-ज्ञापयामि ते ॥१०॥ [११
प्र-च्छन्नं वा प्र-काशं वा सर्वम् अग्निर् अवेक्षते[7] ।
११] तस्मान्[8] मे[8] विदिता सीता प्रत्य्-अक्षम् अनु-पश्यतः ॥११॥ [N
एवम् उक्तो महा-तेजा धृति-मान् उरु-विक्रमः ।
१२] उवाच[9] त्रिदश-श्रेष्ठं रामो धर्म-भृतां वरः[10] ॥१२॥ [१३
भग-वन् हव्यकव्येश लोक-पावन पावक ।
N] शृणु मेऽस्याः परि-त्यागे कारणं त्वं विभावसो ॥१३॥ [N
जानाम्य् एताम् अहं साध्वीम् अनु-रक्तां जितेन्द्रियाम् ।
N] दृढ-व्रत-समाचारां वाङ्-मनः-कर्म-संयताम्[11] ॥१४॥ [N
यस् तु मायां समा-रुह्य जिह्म-मार्गेण रक्षसा ।
N] मया वि-रहिता बाला प्र-सह्याऽप-हृता[12] बलात् ॥१५॥ [N
न ते शङ्का भवेल् लोके स्त्री-त्वं प्रति ममैव[13] हि[13] ।
N] अवश्यम् अपि दुर्-वृत्ता राक्षसाश् च वि-धर्मिणः ॥१६॥ [N
अवश्यं त्रिषु[14] लोकेषु न[15] सीता पापम्[15] अर्हति ।
१३] दीर्घकालोषिता हीऽयं रावणाऽन्तःपुरे शुभा ॥१७॥ [१४
बालिशो बत[16] कामाऽऽत्मा रामो दशरथाऽऽत्मजः ।
१४] इति वक्ष्यति मां लोको जानक्या ह्य् अ-विशोधने ॥[17]१८॥ [१५
सीतायाश् चाऽप्य् उप-क्रोशश् चारित्र-प्रतिगर्हितः[18] ।

---

१. भ–दीना । २ भ–निर्जनाद्वनात् ॥ ३. भ–विकृताभिः समंततः ॥ ४. भ–न चाथाचिंतयद् ॥ ५. भ–विशुद्धभावां निष्पापां । ६. भ–राघव ॥ ७. भ–उदीक्षते । ८. रा₂ फ–तस्मात्ते ॥ ९. भ–अब्रवीत् । १०. फ–वरम् ॥ ११. भ–आत्मनो धर्मसंयुताम् ॥ १२. रा फ–प्रमथ्याप० ॥ १३. भ–हुताशन ॥ १४. रा₂ फ–चापि । १५. रा₂ फ–सीता पावनम् ॥ १६. भ–खलु । १७. भ–इति वक्ष्यंति मां संतो जानकीमविशोध्य वै ॥ १८. भ–०र्हितम् ।

१५] आत्मनश् चाऽयशो लोके युगपत् सम्प्र-मार्जितम् ॥१९॥ [N
अनन्य-हृदयां भक्तां मम[1] चित्ताऽनुवर्तिनीम्[1] ।
१६] अहम् अप्य् अव-गच्छामि मैथिलीं जनकाऽऽत्मजाम् ॥२०॥ [१६
सम्प्रत्ययाऽर्थं[2] लोकानां त्रयाणां तेन[2] हेतुना[2] ।
१७] हुताऽशनम्[3] इयं सीता[3] प्र-विशन्ती न[4] वारिता[4] ॥२१॥ [१७
इमाम् अपि विशालाऽक्षीं रक्षितां स्वेन तेजसा ।
१८] रावणो नाऽति-वर्तेत[5] वेलाम् इव महोदधिः ॥२२॥ [१८
न हि शक्तः सु-दुष्टाऽऽत्मा मनसाऽपीऽह मैथिलीम् ।
१९] सं-स्पर्शयितुम्[6] अ-प्राऽऽप्यां दीप्ताम् अग्नि-शिखाम् इव[7] ॥२३[8]॥ [१९
नेयम् अर्हति चैश्वर्यं[9] रावणाऽन्तःपुरे शुभा ।
२०] अ-त्याज्या[10] हि मया सीता भास्-करेण[11] प्र-भा यथा ॥२४॥ [२०
वि-शुद्धा त्रिषु लोकेषु मैथिली जनकाऽऽत्मजा ।
२१] न हि[12] हातुं[12] मया शक्या कीर्तिर् आत्म-वता[13] यथा ॥२५॥ [२१
अवश्यं च वचः कार्यं सर्वेषां भवतां मया ।
२२] स्निग्धानां लोक-नाथानाम्[14] एवं[15] हि वदतां हितम्[15] ॥२६॥ [२२

इत्य् एवम् उक्त्वा वि-जयी महा-बलः
प्र-शस्यमानः सु-कृतेन[16] कर्मणा ।
सम्-एत्य रामः प्रियया महा-यशाः
२३] सुखी सुखाऽर्हः स[17] बभूव राघवः[17] ॥२७॥ [२३

इत्यार्षे रामायणे युद्ध-काण्डे[18] सीता-शुद्धि[19] र्नामैकोन-शततमः सर्गः ॥ ९९ ॥

---

१. भ-मच्चित्तपरिव० । २. रा₂ फ-यत्र हे० । भ-अत्र संसदि । ३. भ-उपेक्षिता हि वैदेही । ४. रा₂ फ-न रक्षिता । भ-हुताशनं ॥ ५. भ-नाभिव० ॥ ६. रा₁ ल₁ ल ब अ प्र-संदूषयितुम् । भ-प्रमोहयितुम् । ७. रा. फ-यथा । ८. अतः परमधिकः पाठः—रा₂ फ भ-लक्ष्मणस्य हि शापेन हता हीयं न संशयः । पर्णशालागता बाला परुषं यद्वचोचत ॥ ९. भ-दौश्वर्यं । १०. रा₂ फ भ-अनन्या । ११. रा₂ फ-०रस्य ॥ १२. रा₂ फ भ-विहातुं । १३. ल₁ ल ब प्र-०वतो ॥ १४. भ-लोकपालानाम् । १५. रा₁ अ-चैव हि निखिलं मतम् । ल₁ ल₂ ब-दैवं निखिलं मतम् । प्र-दैवं निखिलं महत् । भ-एवं विब्रुवतां हितं ॥ १६. रा₁ ल₁-स्वकृ० । १७. भ-सुसुखं मुमोद ॥ १८. प्र भ-लंकाकांडे । रा₂ फ-आभ्युदयिके । १९. रा₂ फ-अग्निदर्शनं ॥

एतच् छ्रुत्वा शुभं वाक्यं राघवस्य महाऽऽत्मनः ।
१] ततो रामं शुभं[1] वाक्यं व्या-जहार महेश्वरः[2] ॥१ ॥[१
सं-मतं[3] मधुरं श्लक्ष्णम् अर्थ-वद् धर्म-संहितम् ।[4]
२] स्वयं-भूश् चाऽपि भग-वान् प्र-हृष्टेनाऽन्तर्-आत्मना[5] ॥२ ॥[N
पुष्कराऽक्ष महा-बाहो कृतं[6] कर्म महत् त्वया[7] ।
३] दिष्टया शत्रुस् त्वया पापः सुराणां रावणो हतः ॥[8]३ ॥[२
दिष्टया सर्वस्य लोकस्य प्र-वृद्धं दारुणं तमः ।
४] समुद्-[8]धूतं त्वया सं-ख्ये[8] राम रावण-जं महत् ॥४ ॥[३
आ-श्वास्य भरतं[9] दीनं कौसल्यां च तपस्विनीम्[9] ।
५] कैकेयीं च सु-मित्रां च दृष्ट्वा[10] लक्ष्मण-मातरम् ॥५ ॥[४
प्राऽऽप्य राज्यम्[11] अयोध्यायां[11] नन्दयित्वा सुहृज्-जनम्[12] ।
६] इक्ष्वाकूणां कुले वंशं स्थापयित्वा महा-बल[13] ॥६ ॥[५
इष्ट्वा तुरग-मेधेन[14] प्राऽऽप्य चाऽनु-उत्तमं[15] यशः ।
७] ब्राह्मणेभ्यो धनं दत्त्वा त्रि-दिवं गन्तुम् अर्हसि ॥७ ॥[६
एष राजा विमान-स्थः[16] पिता दश-रथस् तव ।
८] काकुत्स्थ मानुषे लोके गुरुस् तव महा-यशाः ॥८ ॥[७
इन्द्र-लोकं[17] गतः[17] श्री-मांस् त्वया पुत्रेण तारितः[18] ।
९] लक्ष्मणेन सह भ्रात्रा[19] त्वम्[20] एनम् अभि-वादय[20] ॥९ ॥[८
महादेव-वचः[21] श्रुत्वा काकुत्स्थः सह-लक्ष्मणः ।
१०] विमान-शिखर-स्थस्य पितुः पादौ सम्-अस्पृशत् ॥[22]१०॥[९

---

१. रा$_2$ फ भ–प्रियं । २. भ–पितामहः ॥ ३. फ–हृद्गतं । भ–संस्कृतं । ४. अतः परमधिकः पाठः–भ–रामं तत्र महातेजा प्रहृष्टो वाक्यमब्रवीत् ॥ ५. ल$_2$ अ प्र–सुहृ० । ६. भ–शृणु वाक्यं परंतप । ७. भ–दिष्ट्या कृतमिदं कर्म त्वया धर्मभृतां वर ॥ ८. रा$_2$ फ–त्वत्तेजसा विनिहतं । भ–समुद्धृतं त्व० ॥ ९. रा$_2$ फ–भरतादींस्त्वं कौसल्यामभिवाद्य च । १०. रा$_2$ फ–देवीं ॥ ११. रा$_2$ फ–राज्यश्रियं दीप्तां । १२. रा$_1$–०नान् । १३. रा$_2$ फ–०ली । भ–वर्ज–०लः ॥ १४. रा$_2$ फ–वर्ज–०धैश्च । १५. प्र–चानन्तरं ॥ १६. भ–महातेजाः ॥ १७. रा$_1$ ल$_1$ ल$_2$ अ–०लोकगतः । १८. भ–भावितः । १९. रा$_1$ ल$_1$ ल$_2$ प्र–भ्राता । २०. रा$_1$–दृष्ट्वा स पितरं तदा । ल$_1$–त्वमेवमभि० ॥ २१. रा$_1$ ल$_1$ ल$_2$ ब अ–महेश्वरवचः । प्र भ–पितामहवचः । २२. रा$_2$ फ भ–विमानस्थस्य सहसा प्रणाममकरोत्पितुः ॥

दीप्यमानं स्वया[1] लक्ष्म्या विरजोऽम्बर-धारिणम्[2] ।
११] लक्ष्मणेन सह भ्रात्रा ददर्श[3] पितरं तदा [१०
N] आसीनम् आसने दिव्ये दिव्याऽऽभरण-भूषितम् ॥११॥ [N
हर्षेण महताऽऽविष्टो विमान-स्थो मही-पतिः
१२] प्राणैः प्रिय-तरौ दृष्ट्वा पुत्रौ दश-रथस् तदा । [११
स्नुषां च सीतां सं-पश्यन् परं[4] वि-स्मयम् आ-गतः[4] ॥१२॥ [N
१३] आ-रोप्याऽङ्के महा-बाहुर् वराऽऽसन-गतः प्र-भुः ।
बाहुभ्यां सम्परि-ष्वज्य ततो वाक्यम् उवाच[5] ह[5] ॥१३[6]॥ [१२
१४] न मे बहु-मतः स्वर्गः सं-वासो[7] वा सुरर्षभैः[7] ।[8]
१५पू] त्वया राम[9] वि-हीनस्य सत्यं प्रति-शृणोमि[10] ते[10] ॥१४॥ [१३
पश्यतस् त्वां वन-गतं क्लिश्यन्तं चीर-वाससम् ।
N] स्वर्गो बहु-मतो नाऽयं सम-त्वं च सुरैर् इदम् ॥[11]१५॥ [N
अद्य त्वां निहताऽमित्रं दृष्ट्वा सम्पूर्ण-मानसम् ।[12]
N] निस्तीर्ण-वनवासं च प्रीतिर् अस्ति परा मम ॥१६[13]॥ [१४
१५उ] कैकेय्या यानि चोक्तानि वाक्यानि वदतां वर ।
तदा[14] प्रव्रजनाऽर्थं ते[14] स्थितानि हृदये मम ॥[15]१७॥ [१५
१६] त्वां च दृष्ट्वा कुशलिनं परि-ष्वज्य च राघव ।
अद्य दुःखाद् वि-मुक्तोऽहं नी-हाराद् इव भास्करः ॥१८[15]॥ [१६
१७] तारितोऽहं त्वया पुत्र सु-पुत्रेण महाऽऽत्मना ।
अष्टा-वक्रेण धर्माऽऽत्मा पिता[16] वै तारितो यथा ॥१९॥ [१७
१८] इदानीम् अव-गच्छामि[17] यथा सौम्य सुराऽसुरैः ।
वधाऽर्थं रावणस्य त्वम् इह[18] चैवाऽव-तारितः[18] ॥२०॥ [१८
१९] सिद्धाऽर्था खलु कौसल्या[19] या त्वां राम गृहं गतम्[19] ।

---

१. रा$_2$ फ भ-वर्जं—स्वयं । २. रा$_2$ फ भ-दिवाकरमिवोदितं । ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-दृष्ट्वा स ॥ ४. फ-प्रहर्षं परमं गतः ॥ ५. भ-समाददे । ६. रा$_2$ फ-नात्युच्चैः स्थितः काकुत्स्थो भूमिमस्पृश्य पार्थिवः । पुत्रं दशरथो राजा सांत्वयन्निदमब्रवीत् ॥ ७. रा$_2$ फ-संग्रामो वा सुरर्षिभिः । ८. अतः परमधिकः पाठः—भ-तदा ते प्रोष्यतः पुत्र वनं प्राणा गता मम । ९. भ-पुत्र । १०. भ-मे वचनं शृणु ॥ ११. रा$_2$-वर्जं—नास्ति । १२. फ-नास्ति । १३. भ-नास्ति ॥ १४. भ-तव प्रव्रजनार्थं वै । रा$_2$-तथा प्रवर्तनार्थं ते । १५. रा$_2$ फ भ-वर्जं—नास्ति ॥ १६. रा$_2$ फ-शिविर् ॥ १७. रा$_2$ फ-वर्जं—चैव जानामि । १८. रा$_2$-वनवासाय दीक्षितः । भ-इतो गामवतारितः ॥ १९. ल$_1$ रा$_2$-नास्ति ।

वनान्[1] नि-वृत्तं[1] सं-हृष्टा ईक्षते शत्रु-भेदनम्[2] ॥[3]२१॥ [१९
२०] सिद्धाऽर्थाः खलु ते राम नरा ये त्वां पुरीं गतम् ।[4]
राज्ये[4] चैवाऽभि-षिक्तं[4] वै[5] द्रक्ष्यन्ति पुरुषोत्तमम्[5] ॥२२॥ [२०
२१] धन्योऽयं लक्ष्मणो भ्राता तव धर्म-परायणः ।
यस्य[6] कीर्तिर् दिवं खं च[6] महीं चाऽऽवृत्य तिष्ठति ॥२३[7]॥ [N
२२] अ-पापा पुत्र वैदेही धर्म-ज्ञा धर्म-दर्शिनी[8] ।
देवाः सर्वस्य मर्त्यस्य कुशलाऽकुशलं विदुः ॥२४॥ [N
२३] अहं च त्वां वदाम्य्[9] एष[9] पिता दश-रथः स्वयम् ।
निः-शङ्को[10] गत-हृल्-लेखः प्रति-गृह्णीष्व जानकीम् ॥२५॥ [N
२४] अनु-रक्तेन विदुषा[11] शुचिना धर्म-चारिणा ।
इच्छेयम् त्वाम् अहं द्रष्टुं भरतेन समा-गतम् ॥[12]२६॥ [२१
२५] कुमारो लालनीयस् ते शत्रु-घ्नो दयितो मम ।
यथा पिता तथा भ्राता ज्येष्ठो भवति धर्म-तः ॥२७॥ [N
२६] चतुर्दश समाः सौम्य[13] वने[14] निर्-यातितास् त्वया[14] ।
वसता सीतया[15] सार्धं[15] सत्-प्रीत्या[16] लक्ष्मणेन च[16] ॥२८॥ [२२
२७] विमुक्त-वनवासेन[17] प्रति-ज्ञा पूरिता[18] त्वया[19] ।
सत्य-वादी त्व्[20] अहं[20] पुत्र सत्-पुत्रेण[21] कृतोऽद्य[22] वै[22] ॥२९॥ [२३
२८] रावणं च रणे हत्वा देवास्[23] ते[23] परि-तोषिताः ।
N] मत्-प्रसादाद् यशः प्राऽऽप्य दीर्घम् आयुर् अवाऽऽप्नुहि ॥[24]३०॥ [N
कृतं[25] कर्म यशः-श्लाघ्यम् अनु-रक्ता[25] वयं गुणैः ।

---

१. रा$_2$ फ—व्रताद्विमुक्तं । २. भ—शत्रुसूदनं । ३. ल$_1$ ल$_2$ ब—नास्ति ॥ ४. रा$_2$ फ—जलार्द्रमभि० । ५. रा$_2$—च द्रक्षंति वसुधाधिपं ॥ ६. रा$_2$—अस्य कीर्तिर्दिवं याता । ७. फ—नास्ति ॥ ८. रा$_2$ फ—धर्मवत्सला ॥ ९. रा$_2$ फ—ब्रवीम्येवं । १०. फ भ—वर्जं—निःशोको ॥ ११. रा$_2$ फ—वर्जं—बालेन । १२. रा$_2$ फ—भरतेन यथान्याय्यं समागच्छस्व तले महान् ॥ १३. रा$_2$ फ भ—वर्जं—वीर । १४. रा$_2$ फ—त्वया निर्यातिताः स्वयम् । १५. भ—वर्जं—मद्वियोगेन । ल$_1$—सद्वियोगेन । १६. रा$_1$ ल$_2$ ब अ—मत्प्रीत्या ल० । ल$_1$—मत्प्रीत्या तं च लक्ष्मणे । प्र—मत्प्रीत्या चैव लक्ष्मण । रा$_2$ फ—येनाऽहं पूजितो ह्यसि ॥ १७. रा$_2$ फ—निवृत्तव० । १८. रा$_2$ फ—सफला । १९. ल$_1$ ल$_2$ ब—मम । रा$_2$ फ—कृता । २०. रा$_2$—वर्जं—त्वया । २१. रा$_2$—वर्जं—सत्यपु० । २२. रा$_2$—वर्जं—०तो ह्यहं ॥ २३. रा$_2$ भ—देवताः । २४. अतः परमधिकः पाठः—रा$_2$ भ—वर्जं—स्वच्छंदतस्ते वैदेह्या वियोगो भविता पुनः ॥ २५. फ भ—वर्जं—कृतकर्मा यशःश्लाघ्यः स त्वं रक्ता ।

२९] भ्रातृभिः सह राज्य-स्थो दीर्घम् आयुर् अवाऽऽप्नुहि ॥३१[1]॥ [२४उ
ईदृशो हि सुतो यस्य कीर्ति-मान् अमित-द्युतिः ।
३०] मृतोऽपि जीवति व्यक्तं यथाऽहं तारितस् त्वया ॥३२[2]॥ [N
इति ब्रुवाणं राजानं[3] रामः प्राञ्जलिर् अब्रवीत् । [२४उ
३१] भोस् तातानु-गृहीतोऽस्मि यत् प्रीतोऽसि भवान् गुरुः ॥[4]३३॥ [N
३२पू] इदम् एकं त्व् इहेच्छामि भवत्-प्रीत्या[5] वरं हितम् ।
N] दीयमानम् अभि-प्रेतं ममाऽनुग्रह-कारणात्[6] ॥३४[7]॥ [N
३२उ] कुरु प्र-सादं धर्म-ज्ञ कैकेय्या भरतस्य च ।
स-पुत्रां त्वां त्यजामीऽति यद् उक्ता कैकयी तदा[8] ॥३५॥ [२५
३३] स शापः कैकयीं घोरः स-पुत्रां न स्पृशेत् प्र-भो । [२६
N] तत् तस्याः कुरु धर्म-ज्ञ प्र-सादं भरतस्य च ॥[9]३६॥ [N
तथेति स महा-बाहुर् उक्त्वा चैनं कृताञ्जलिम् ।[10] [२७
३४] किम् अन्यत् करवाणीऽति मति-मांश् चेदम् अब्रवीत् ॥[11]३७॥ [N
कृतम् इत्य् अब्रवीद् रामः शिवेनेच्छस्व माम् इति ।[12] [N
३५] लक्ष्मणं च परि-ष्वज्य पुनर् वाक्यम् उवाच ह ॥[12]३८॥ [२७उ
भ्रातृ-शुश्रूषया युक्त एवम् एव सदा भव ।
N] अस्य प्र-सादाद् विपुलां कीर्तिं त्वं समवाऽऽप्स्यसि ॥३९[13]॥ [N
धर्मं प्राऽऽप्स्यसि धर्म-ज्ञ यशश् च विपुलं भुवि ।[14]
३६] रामे प्र-सन्ने स्वर्गं च[15] महिमानं तथोत्तमम्[15] ॥४०॥ [२९
रामं शुश्रूष भद्रं ते सुमित्राऽऽनन्द-वर्धन ।
३७] रामः[16] सर्वस्य[16] लोकस्य हितेषु[17] नि-रतः[17] सदा ॥४१॥ [३०
एते सेन्द्रास् त्रयो लोकाः सिद्धाश् च परमर्षयः ।
३८] अभि-वाद्य[18] महाऽऽत्मानः स्तुवन्ति[18] पुरुषोत्तमम् ॥४२॥ [३१
एतावद् उक्तम् अ-मृतम् अ-क्षरं ब्रह्म शाश्वतम् ।[19]

---

१. रा$_2$-नास्ति ॥ २. रा$_2$ फ-नास्ति ॥ ३. रा$_2$ फ-नृपतिं । ४. रा$_2$-नास्ति ॥ ५. फ भ-वर्ज—०प्राप्त्या । ६. रा१ अ-०हकाम्यया ॥ ७. भ-त्वया । ८. अ रा$_2$ फ-नास्ति ॥ ९. अ रा$_2$ फ-नास्ति ॥ १०. रा$_2$ फ-तथेत्येव पिता पुत्रं रामं दशरथोऽब्रवीत् । ११. रा$_2$ भ-नास्ति ॥ १२. रा$_2$-नास्ति । फ-ततो लक्ष्मणमामंत्र्य पिता दशरथोऽब्रवीत् ॥ १३. भ-नास्ति ॥ १४. रा$_2$ फ-नास्ति । १५. रा$_2$ फ-वाप्यतुलं समवाप्स्यसि ॥ १६. रा$_2$ फ भ-रामो हि सर्वलो० । १७. ल१ल$_2$ ब-०ते च नि० । रा$_2$ फ-प्रियेष्वभिरतः । भ-हितेष्वभिरतः ॥ १८. रा फ-अर्चयंति महात्मानं शाश्वतं ॥ १९. रा$_2$ फ-एतत्तदुक्तमव्यग्रमक्षरं ब्रह्मनिर्मितम् ।

३९] देवानां हृदयं सौम्यं[1] गुह्यं रामः[2] सनातनम्[3] ॥४३॥ [३२
४०पू] अवाऽऽप्तं धर्म-चरणं यशश् च विपुलं त्वया ।
N] रामं शुश्रूषता[3] भक्त्या[3] वैदेह्या सह सीतया । [३३
४०उ] सौभ्रात्रम् एतल् लोकेषु कथयिष्यन्ति मानवाः ॥४४॥ [N
इत्य् उक्त्वा लक्ष्मणं राजा स्नुषां बद्धाऽञ्जलिं स्थिताम् ।
४१] पुत्रीऽत्य्[6] आ-भाष्य[4] मधुरं[5] शनैर् एताम्[5] उवाच ह ॥४५॥ [३४
कर्तव्यो[7] न तु वैदेहि[6] मन्यू राम-समाश्रितः[7] ।
४२] रामेणेदं विशुद्ध्य्-अर्थं[8] कृतं वै त्वद्-धितैषिणा ॥[8]४६॥ [३५
सु-दुष्करम् इदं पुत्रि तव[9] चारित्र-लक्षणम् ।
४३] कृतं यत्नेन नारीणां[10] यशो ह्य् अभि-भविष्यसि[10] ॥४७॥ [३६
कामम् एवाऽसि[11] सं-देश्या[11] भर्तृ-शुश्रूषणं[12] प्रति ।
४४] अवश्यं तु मया वाच्यम् एष ते दैवतं पतिः[13] ॥४८॥ [३७
इति चैव समा-दिश्य पुत्रौ सीतां तथा[14] स्नुषाम्[14] ।
४५] इन्द्र-लोकं वि-मानेन ययौ दश-रथो नृपः[15] ॥४९॥ [३८
वि-मानम् आ-स्थाय महाऽनुभावः
श्रिया च सन्दीप्त-तनुर् नृपोत्तमः ।
आ-मन्त्र्य पुत्रौ सह सीतया च
N] स्वर्गं[16] जगाम प्र-वरांश्[16] च लोकान् ॥५०॥ [३९
स्व-गतिम्[17] अनु-सरन् सुराऽभिदृष्टां[18]
विबुध-निशाकर-वद्[19] वि-राजमानः ।
क्षिति-तलम् अव-लोकयन् प्र-यातः
४६] सुत-वदनं[20] शशि-वन् निर्-ईक्षमाणः ॥५१॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे[21] दशरथ-राम-संवादो नाम शततमः सर्गः ॥१००॥

---

१. रा$_1$ अ—सोम्य । रा फ भ—तात । २. रा$_2$ फ—वर्जं—राम परंतप ॥ ३. रा$_2$ फ—वर्जं—०श्रूषणं व्यक्तं ॥ ४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—सुप्रीतो भाष्य । ५. रा$_2$ फ—दीर्घेण स्वरेणेदम् ॥ ६. रा$_2$ फ—पुत्री । ७. रा$_2$ फ—मन्युस्ते कार्यस्त्यागकारितः । ८. रा$_2$ फ—विशुद्धिरेषा विहिता सर्वलोकेषु दैवतैः ॥ ९. रा$_2$ फ—त्वया । १०. रा$_2$ फ—नारीस्त्वं यशसाभि० ॥ ११. भ—एव त्वया कार्यं । १२. रा$_2$—वर्जं—भर्तुः शु० । १३. रा$_2$ फ—वर्जं—परम् ॥ १४. रा$_2$ फ—वर्जं—च राघवः । १५. रा फ—ज्वलन् ॥ १६. भ—जगाम देव प्र० ॥ १७. रा$_2$—स गतिं । १८. भ—वर्जं—पुराभि० । रा$_2$—०भिजुष्टां । १९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—०शाचरवद् । २०. रा$_2$ फ—शुभव० ॥ २१. ब प्र भ—लंकाकांडे । रा$_2$ फ—आभ्युदयिके ॥

[बं-१०५]= [एकोत्तरशततमः सर्गः] =[दा-१२३]

प्रति-प्रयाते[1] काकुत्स्थे[1] महेन्द्रः पाक-शासनः ।
१] अब्रवीत् परम-प्रीतो राघवं प्राऽञ्जलिं स्थितम् ॥१ ॥[१
कौसल्या सु-प्रजा राम त्वया पुत्रेण धी-मता ।
N] प्रीतोऽस्मि वद किं कार्यं करोमि त्वत्-प्रिये[2] स्थितः[2] ॥२ ॥[N
N] पुष्कराक्ष महा-बाहो शृणु मे रघु-नन्दन । [N
अ-मोघं दर्शनं राम त्व् अस्माकं[3] नरर्षभ[3] ।
२] प्रीति-युक्ताः[4] स्म ते सर्वे ब्रूहि[5] राजन् यथेच्छसि[5] ॥३ ॥[२
एवम् उक्तो महेन्द्रेण प्र-सन्नेन महाऽऽत्मना ।
३] सुप्रसन्न-मना हृष्टो वचनं प्राऽऽह राघवः ॥४ [6]॥ [३
यदि प्रीतिः समुत्-पन्ना मयि ते विबुधेश्वर ।[7]
४] वक्ष्यामि च[8] वरं किं-चित् तन् मे त्वं दातुम् अर्हसि[8] ॥५ ॥[४
मम हेतोः पराऽऽक्रान्ता गता ये यम-सादनम् ।
५] ते सर्वे जीवितं प्राऽऽप्य समुत्-तिष्ठन्तु वानराः ॥६ ॥[५
वि-क्रान्ताश् चाऽपि शूराश् च न मृत्युं गणयन्ति च[9] । [६उ
६] कृत्वा[10] कर्म[10] वि-पन्नाश् च जीवयैतान्[11] पुरं-दर[11] ॥७ ॥[N
७पू] मत्-कृते नि-हताः शूरा मत्-प्रिये सततं स्थिताः । [N
N] ऋक्ष-वानर-गोपुच्छा ये[12] च स्युः परमेश्वर[12] ॥८ ॥[११उ
N] मत्-प्रियेष्व् अभि-युक्ता[13] ये मित्रैर् भृत्यैश्[13] च वानराः ।
७उ] तव[14] प्र-सादाज् जीवन्तु वरम् एनम्[14] अहं वृणे ॥९ ॥[६
नी-रुजो निर्-व्रणांश् चैव सम्पन्न-बल-पौरुषान् ।
८] गो-लाङ्गूलांस् तथैवर्क्षान्[15] द्रष्टुम् इच्छे[16] सुरेश्वर[16] ॥१०॥[७

---

१. भ–प्रतियाते दशरथे ॥ २. भ–त्वत्प्रियमास्थितः ॥ ३. रा$_2$ फ–तवास्माकं नरर्षभ । भ–अस्माकं वै नरर्षभ । ४. भ–परितुष्टाः । ५. रा$_2$ फ–वद यन्मनसि स्थितम् । भ–ब्रूहि यन्मनसेप्सितम् ॥ ६. रा$_2$ फ–एवमुक्तः स काकुत्स्थः प्रत्युवाच पुरंदरम् । लक्ष्मणेन सह भ्रात्रा रामः सत्त्वहिते रतः ॥ ७. रा$_2$ फ–यदि प्रीतोऽसि मे देव सर्वामरजगत्पते । ८. भ–कुरु मे सत्यं वचनं वदतां वरम् ॥ ९. रा$_2$ भ–ये । १०. रा$_2$ फ–कृतकृत्या । ११. रा$_2$ फ–०युस्तेमराधिप ॥ १२. रा$_2$–जीवेयुः पर० । फ भ–जीवेयुरमरेश्वर ॥ १३. रा$_2$ फ–अनुरक्ता हि भृत्यैर्दारैश् । १४. रा$_2$–मत्प्रसादाद्गमेयुस्ते वरमेतम् । फ–त्वत्प्रसादाद्गमेयुस्ते वरमेतम् ॥ १५. रा$_2$ फ–वर्जं—तथर्क्षांश्च । १६. रा$_2$ फ–वर्जं—इच्छामि मानद ॥

अ-काले चाऽपि पुष्पाणि[1] मूलानि च फलानि च ।
९] नद्यश् च वि-मलास् तत्र तिष्ठेयुर् यत्र वानराः ॥११॥ [८
बहु-मूल-फलाः स्वाद्याः सु-शीता विमलोदकाः ।
N] भवेयुस् ते वनोद्देशास् तिष्ठेयुर् यत्र वानराः ॥१२॥ [N
श्रुत्वा तु वचनं तस्य राघवस्य महाऽऽत्मनः ।
१०] महेन्द्रः प्रत्य्-उवाचेदं वचनं प्रीति-संयुतम्[2] ॥१३॥ [N
तद्[3] युक्तम् अनु-रूपं च कौसल्याऽऽनन्द-वर्धन ।
११] यत् त्वं कृतोपकाराणां सु-हृदां हितम् इच्छसि ॥१४॥ [N
N] यस्मात् त्रैलोक्य-शत्रुः स रावणो लोक-रावणः ।
आ-हतः स त्वया राम तस्माद् देयो वरस् तव ॥१५॥ [N
१२] साऽमरेष्व्[4] अपि लोकेषु न त्वद्-अन्यः करिष्यति ।
१३पू] ऋते[5] त्वया महा-बाहो हतानां[6] दर्शनं कुतः[7] ॥१६॥ [N
N] महान् अयं वरस् तात यस् त्वयोक्तो रघूऽत्तम[8] ।
१३उ] यत् त्वयोक्तं[9] वचः पूर्वं[9] तस्माद् एवं भविष्यति ॥१७॥ [१०
त्वत्-प्रियाऽर्थम् अहं सत्यम्[10] इदं कर्म महाऽद्भुतम्[11] ।
N] हत-सञ्जीवनं[11] त्व् अद्य कर्ताऽस्मि तव कारणात् ॥१८[13]॥ [N
समुत्था (द्-स्था) स्यन्ति[14] हरयः सुप्ता[15] निद्रा-क्षये यथा[15] । [१२उ
१४] गो-लाङ्गूलास् तथर्क्षाश् च वानराश् च स-यूथपाः ॥[16]१९॥ [N
१५पू] सम्पूर्ण-बल-वीर्यास् ते रूढ-व्रण-शरीरिणः ।[17] [N
N] राक्षसैर् नि-हता ये तु सर्वे प्राऽऽप्स्यन्ति[18] जीवितम् ।[19]२०[20]॥ [११पू
सु-हृद्भिः सह[21] मित्रैश् च बान्धवैः स्व-जनेन च[21] ।
१६] सर्व एव समेष्यन्ति युक्ताः[22] परमया मुदा[22] ॥२१॥ [१३

---

१. रा$_2$ फ-मुख्यानि । २. रा$_2$ फ-प्रीतमानसः ॥ ३. रा$_2$ फ-स्वद्० ॥ ४. रा$_1$ ल$_1$ ब अ प्र-सासुरेष्व् । ल$_2$-ससुरेष्व् । भ-सकलेष्व् । ५. रा$_2$-कृते । ६. फ भ-ज्ञातीनां । ७. रा$_2$ फ भ-पुनः ॥ ८. रा$_2$ फ म-नरेश्वर । ९. रा$_2$ फ म-मया नोक्तपूर्वं चेत् ॥ १०. रा$_2$-कर्म । म-सर्वम् । ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-त्विहा० । १२. रा$_2$ फ-वर्जं—हतान्संजीवयाम्य् । १३. भ-नास्ति ॥ १४. ल$_2$ ब-०स्यंतु । १५. रा$_2$ फ-ये गता यमसादनम् । म-ये हतास्मिन्रणाजिरे । १६. रा$_2$ फ-ऋक्षाश्च सह गोपुच्छैः सर्वे सुप्तोत्थिता इव । म-नास्ति ॥ १७. भ-नास्ति । १८. ल$_1$ ब अ प्र-०तु । १९. रा$_2$ फ-समुत्थास्यंति हरयो निहता ये रणाजिरे । २०. म-नास्ति ॥ २१. रा$_2$ फ म-बांधवैर्मित्रैर्ज्ञातिभिः स्वजनैस्तथा । २२. रा$_2$ फ म-समप्रबलपौरुषाः ॥

अ-काले फल-वन्तश्[1] च पुष्प-वन्तश्[1] च पाद-पाः ।
१७] भविष्यन्ति महेष्वास नद्यश् च सलिलैर् युताः ॥[2]२२॥[१४
एवम् उक्त्वा स[3] शक्रस् तु[3] देव-राजो महा-यशाः ।
१८] वर्षेणाऽमृत-युक्तेन ववर्षाऽऽयोधनं प्रति ॥२३[4]॥[N
ततोऽमृत-संस्पर्शात् सर्वे ते लब्ध-जीविताः ।
१९] ऋक्ष-वानर-गोपुच्छाः समुत्-तस्थुः सहस्र-शः ॥२४[5]॥ [१६
ते वीर-शयनाद् वीराः समुत्था (द्-स्था)य मुदाऽन्विताः[6] । [N
२०] अन्योऽन्यं सम्परि-ष्वज्य राघवं चाऽभ्य्-अवादयन्[7] ॥२५॥ [१७
स-व्रणैः प्रथमं गात्रैर् इदानीं निर्-व्रणैः समैः ।
२१] अब्रुवन् वानराः सर्वे किम् एतद् इति वि-स्मिताः ॥२६[8]॥ [१५
२२पू] काकुत्स्थं परिपूर्णाऽर्थं दृष्ट्वा[9] रामं[9] सुरोत्तमाः ।[10]
N] स्वयं-भुवं[11] पुरस्-कृत्य[12] सं-देशायोप-चक्रमुः ॥[12]२७॥ [N
पिता-महस् तु भग-वान् सहितः शूल-पाणिना ।
N] राघवं सर्वसिद्धाऽर्थम् इदं वचनम् अब्रवीत् ॥२८[13]॥[N
गच्छाऽयोध्याम्[14] इतो राम[15] वि-सर्जय च[16] वानरान् ।
२३] मैथिलीं सान्त्वयस्वैनाम् अनु-रक्तां यशस्विनीम् ॥[17]२९॥[१९
२४पू] भ्रातरं भरतं पश्य[18] त्वद्-अर्थं व्रत-कर्षितम्[18] । [२०पू
N] सम्-एत्य पितृ-वद् बालं शत्रु-घ्नं[19] लाडय प्र-भो[19] ॥[20]३०॥ [N

---

१. रा$_2$ फ म-वर्जे—पुष्पशबलाः फलवंतश् । २. रा$_2$ फ म-भविष्यति जलं चैव यत्र तिष्ठन्ति वानराः ॥ ३. म-ततः शक्रो । ४. अतः परमधिकः पाठः-रा$_2$ फ म-वर्जे—प्रादाच्च जीवितं तेषां वानराणां सहस्रशः ॥ ५. भ-ततस्तेऽमृत-संस्पर्शात्तत्क्षणाल्लब्धजीविताः । समुत्तस्थुर्महात्मानः सर्वे स्वप्नक्षयादिव ॥ ६. भ-सहस्रशः । ७. म-स्वभ्यनंद० ॥ ८. रा$_2$ फ म-सव्रणैः पतिता गात्रैर्निर्व्रणाः पुनरुत्थिताः । बभूवुर्वानराः सर्वे विस्मयोत्फुल्ललोचनाः ॥ ९. रा$_2$ फ-सर्वे दृष्ट्वा । १०. म-नास्ति । अतः परमधिकः पाठः—रा$_2$ फ म-वर्जे—अब्रुवन्परमप्रीताः स्तुत्वा रामं सलक्ष्मणम् । ११. ल$_1$ ल$_2$ ब-०वे । १२. फ-वर्जे—नमस्कृत्य । १३. भ-नास्ति ॥ १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र म-गतोऽयो० । १५. रा$_2$ फ म-वीर । भ-राजन् । १६. रा$_2$ फ भ म-वर्जे—तु । १७. अतः परमधिकः पाठः—फ-लक्ष्मणेन सहायेन नित्यवाक्ये त्वमर्हसि ॥ १८. रा$_2$ फ म-प्राज्ञं शत्रुघ्नं च यशस्विनम् । १९. रा-त्वं बोधयितुमर्हसि । फ-त्वं लाडयितुमर्हसि । म-तं ताडयितुमर्हसि । २०. भ-नास्ति ॥

N] कृत-कर्मा परि-श्रान्तः सुखम् आप्नोतु लक्ष्मणः ।[1] [N
२४उ] अभि-षेचय चाऽऽत्मानं पौरान् अपि हर्षय ॥[2]३१॥ [२०उ
एवम् उक्त्वा तम्[3] आ-मन्त्र्य[3] रामं सौमित्रिणा सह ।
२५] वि-मानैः सूर्य-सङ्काशैर् जग्मुर्[4] हृष्टाः सुरा दिवम्[4] ॥३२॥ [२१
अभि-वाद्य च काकुत्स्थः सर्वांस् तांस् त्रिदशोत्तमान्[5] ।
२६] लक्ष्मणेन सह भ्रात्रा वासम् आऽज्ञापयत् तदा ॥३३॥ [२२
ततस् तु सा राघव-बाहु-पालिता[6]
महा-चमूर् हृष्ट-जना[7] यशस्विनी ।
श्रिया ज्वलन्ती वि-रराज सर्व-तो
N] निशा प्र-णीतेव[8] हि[8] शीत-रश्मिना ॥३४॥ [२३

इत्यार्षे रामायणे[9] युद्ध-काण्डेऽमृत-वृष्ट्या वानरसंजीवनं[9]
नामैकोत्तरशततमः सर्गः ॥ १०१ ॥

[वं-१०६]= [द्व्युत्तरशततमः सर्गः] =[दा-१२४]

तां रात्रिम् उषितं रामं तथैव[10] व्रतम् आ-स्थितम्[10] ।
१] अब्रवीत् प्राऽञ्जलिर्[11] वाक्यं वाक्य-ज्ञः स[11] वि-भीषणः ॥१ ॥ [१
स्नानानि[12] चाऽङ्ग-रागाणि माल्यानि[13] वि-विधानि[13] च ।
२] चन्दनानि[14] च मुख्यानि[14] वासांसि वि-विधानि[15] च ॥२ ॥ [२
अलङ्कार-विधौ युक्तास् तान्य् आ-दाय वर-स्त्रियः ।[16]

---

१. रा१ ल१ ल२ ब अ प्र भ–नास्ति । २. रा फ म–समाप्तवनवासश्च आत्मानमभिषेचय । भ–०नं पौरान्गत्वा प्रहर्षय ॥ ३. रा१ ल१ ल२ ब अ प्र भ–सहस्राक्षो । ४. रा१ ल१ ल२ ब अ प्र भ–ययौ हृष्टः सुरैः सह ॥ ५. भ–त्रिदिवौकसः ॥ ६. रा२ फ म–वर्जं—लक्ष्मणरामपा० । ७. रा२ फ म–हृष्टमना । ८. रा२ फ–निशेव याता सह । रा१ ल१ ल२ ब अ प्र–०तेन ॥ ९. ब–०णे लंकाकाण्डेऽमृ० । रा२ फ–०णे आभ्युदयिके वानरोपस्थापनं । म–सुंदरकांडे आभ्युदयिके वानरोपस्थापनं । भ–लंकाकांडे वानरजीवनं ॥ १०. रा२ फ–वर्जं—सुखमासीनमरिंदमं । म–तत्रैव समुपस्थितः । ११. रा१ ल१ ल२ ब अ प्र–०क्यं वाक्यज्ञं । रा२ फ–०लिः काले जयं पृष्ट्वा । म–०लिर्वाक्यं जयं दृष्ट्वा ॥ १२. म–शीतानि । १३. रा२ फ म भ–वस्त्राण्याभरणानि । १४. फ–चन्दनागरुयुक्तानि । १५. रा फ म भ–माल्यानि ॥ १६. रा१ ल१ ल२ ब अ प्र–अलंकारविदश्चेमा रामं पद्मदलेक्षणाः । भ–अंगरागं च संगृह्य नार्यः पद्मनिभेक्षणाः ।

३] उप-स्थितास् त्वां विधिना[1] स्नापयिष्यन्ति राघव ॥३ ॥[३
स्व-वृत्त-कोविदां[2] देवीं वैदेहीं[2] लक्ष्मणं तथा ।
प्रति-गृह्णीष्व तत् सर्वं मद्-अनुग्रह-काम्यया[3] ।
N] मुनि-वेशं समुत्-सृज्य राज्यर्द्धिर् अनु-भूयताम् ॥४[4] ॥[N
४पू] एवम् उक्तस् तु काकुत्स्थः प्रत्य्-उवाच वि-भीषणम् ।
N] धर्म-ज्ञो[5] धर्म-विद्[5] वाक्यं न्याय-तो[6] न्याय-कोविदम् ॥५ ॥[N
हरीन् सुग्रीव-मुख्यांस तु स्नानेनोपनि-मन्त्रय ।[7] [४उ
N] उप-पन्नम् इदं राजंस्[8] त्वयि[8] कल्याण-चेतसि ॥६ ॥[N
सौहार्दे वर्तमानस्य ग्राह्यश्[9] च प्र-णयो मया[9] ।
N] समान-व्रत-चारी च भरतः कैकयी-सुतः ॥७[10] ॥[N
N] शत्रुघ्न-सहितः श्री-मान्[11] ममाऽऽगमन-लालसः ।[10]
४उ] स तपस्वी तपो-युक्तो महा-तेजाः सु-दुःखितः ॥[12]८ ॥[N
सु-कुमारो महा-बाहुर् भरतः सत्य-सङ्गरः ।
५] तं विना कैकयी-पुत्रं धर्म-ज्ञं[13] धर्म-वत्सलम्[13] ।
N] न मे स्नानं[14] बहु-मतं[14] वस्त्राण्य् आ-भरणानि च ॥[15]९ ॥[६
राज्य-श्रियं परि-त्यज्य मुनि-वेश-धरः किल ।
N] तपस् तप्यति मे भ्राता नन्दि-ग्रामे[16] कृताऽऽलयः[16] ॥१०[17]॥[N
N] शत्रुघ्न-सहितो धी-मान् स मां नूनं प्रतीऽऽक्षते ।[17]
६उ] एतत् पश्य यथा क्षिप्रं प्रति-गच्छाम्य्[18] अहं पुरीम्[18] । [N
अयोध्या-गमिको[19] ह्य् एष पन्थाः परम-दुर्गमः[20] ॥११॥ [७
७] एवम् उक्तस् तु[21] काकुत्स्थं[22] प्रत्य्-उवाच वि-भीषणः ।
अहं[23] त्वा प्राऽऽपयिष्यामि तां पुरीं पुरुषर्षभ[24] ॥१२॥ [८

---

१. रा$_2$ फ म–नास्ति ॥ २. फ–वैदेह्यां । ३. म–०कांक्षया । ४. भ–नास्ति ॥ ५. म–०ज्ञं ध० । रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–०ज्ञो धर्मभृद् । ६. म–न्यायज्ञं । भ–धर्मज्ञं ॥ ७. रा$_2$ फ म–नास्ति । ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–वाक्यं तव ॥ ९. फ–ग्राह्यं वचनं मया । म–ग्राह्यमेव वचस्तव । १०. रा$_2$ भ–नास्ति ॥ ११. फ–विद्वान् । म–वीर । १२. रा$_2$ फ म–नास्ति ॥ १३. रा$_2$ फ म भ–भरतं धर्मचारिणं । १४. रा$_2$ फ म–बहुमतं रत्नं । १५. प्र–नास्ति ॥ १६. ल$_1$–वर्जं—०मक्र० । १७. भ–नास्ति ॥ १८. म–गच्छेम महापुरीम् । १९. रा$_2$ फ म–०ध्यामागतो । भ–०ध्यां गच्छतो । २०. प्र–०दुर्जयः ॥ २१. रा$_2$ फ–स । २२. भ–रामेण । २३. प्र–अहो । रा म–अहा । भ–अथ । २४. रा$_2$ फ म भ–पार्थिवात्मज ॥

८] पुष्प-कं नाम भद्रं ते वि-मानं सूर्य-वर्चसम्[1] ।
मम भ्रातुः कुबेरस्य रावणेन बलीयसा ॥[2]१३॥[९
९] हृतं निर्-जित्य सं-ग्रामे काम-गं दिव्यम् उत्-तमम् ।
N] त्वद्-अर्थं पालितं चैव तिष्ठत्य् अमित-विक्रम[3] ॥१४[4]॥[१०
तद् इदं सूर्य-सङ्काशं[5] वि-मानम् इह तिष्ठति[5] ।
१०] तेन[6] प्राऽऽप्स्यसि[7] यानेन त्वम्[8] अयोध्यां गत-ज्वरः[8] ॥१५॥[११
अहं[9] ते यद्य् अनु-ग्राह्यो[9] यदि[10] स्मरसि मे गुणान्[10] ।[11]
११] वस तावद् इह प्राज्ञ यद्य्[12] अस्ति मम सौहृदम्[12] ॥१६॥[१२
लक्ष्मणेन सह भ्रात्रा वैदेह्या भार्यया सह ।[13]
१२] अर्चितः सर्व-कामैश्[14] च ततो राम[15] गमिष्यसि ॥१७॥[१३
प्रीति-युक्तस्य मे राम स-सैन्यः स-सुहृद्गणः[16] ।
१३] सत्-कारं[17] विधि-वत् त्वं च[17] प्रति-गृह्णीष्व राघव[18] ॥१८॥[१४
प्र-णयाद् बहु-मानाच् च सौहार्देन[19] च राघव ।[20]
१४] प्र-सादयामि प्रेष्योऽहं[21] न खल्व् आ-ज्ञापयामि ते ॥१९॥[१५
एवम् उक्तस् ततो रामः प्रत्य्-उवाच वि-भीषणम् ।
१५] रक्षसां वानराणां च सर्वेषाम् एव शृण्वताम् ॥२०॥[१६
१६पू] पूजितोऽस्मि त्वया वीर साचिव्येन[22] परेण हि[22] ।
N] सर्वाऽऽत्मना च वसुभिः[23] सौहार्देन परेण च ॥२१ ।[24] [१७
१६उ] न खल्व् एतन् न कुर्यां ते वचनं राक्षसेश्वर[25] ।

---

१. रा$_2$ फ म–सूर्यसन्निभं । २. रा$_2$ फ म–पुरा वैश्रवणस्यासीद्रावणेनाहृतं बलात् ॥ ३. भ–अतुलवि० । ४. रा$_2$ फ म–नास्ति ॥ ५. भ–मेघसंकाशं नानारत्नं समुज्ज्वलं । रा$_2$ फ म–०शं विमानमधिति० । ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–येन । ७. रा$_2$ फ म भ–यास्यसि । ८. रा$_2$ फ म–वोढुं त्वां च तदर्हति ॥ ९. फ–यदि तेहमनुग्राह्यो । म–यदि ते हनूमान्ग्राह्यो । १०. फ म–धारणीयोऽस्मि ते यदि । ११. रा$_2$–नास्ति । १२. रा$_2$ फ म–मया त्वमभिपूजितः । भ–०स्ति मयि सौ० ॥ १३. रा$_2$ फ म–सदारो भ्रातृसहितः सहैभिर्हरियूथपैः । १४. रा$_1$ ल$_1$ ल ब–सह का० । १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–राजन् ॥ १६. रा$_2$ फ म–०हृज्जनः । १७. रा फ म–०वत्तात । भ–सत्क्रियां विपुलां तावत् । १८. रा$_2$ फ म–चोद्यतं ॥ १९. म–सौभ्रेण । २०. रा$_1$ प्र भ–नास्ति । २१. रा$_2$ फ म–भृत्योहं ॥ २२. रा$_1$ ल$_1$ ल$_2$ ब–पांडित्येन प० । अ प्र–पांडित्येन परेण हि । भ–०व्येन परेण च । २३. प्र–कर्मभिः । भ–चेष्टाभिः । २४. रा$_2$ फ म–नास्ति ॥ २५. रा$_2$ फ म–नैर्ऋताधिप ।

सोत्कण्ठं[1] भ्रातरं द्रष्टुं भरतं त्वरते[2] मनः ॥२२॥ [१८
१७] मां नि-वर्तयितुं[3] योऽसौ चित्र-कूटम् उपाऽऽगतः ।
शिरसा याचमानस्य न कृतं वचनं मया ॥२३॥ [१६
१८] कौसल्यां च सु-मित्रां च कैकेयीं चाऽपि[4] मातरम्[4] ।
दिदृक्षुं[5] सु-हृदश् चैव गुरून्[6] पौरांस् तथैव च[6] ॥२४॥ [२०
१९] अनु-जानीहि मां सौम्य[7] पूजितोऽस्मि वि-भीषण ।
मन्युर् न[8] मयि[8] कर्तव्यः सखि-त्वं[9] चाऽनु-मानय[10] ॥२५॥ [२२
२०] उप-स्थापय मे शीघ्रं[11] वि-मानं राक्षसेश्वर[12] ।
२१पू] कृत-कार्यस्य मे वासः कथं स्याद् इह[13] सं-गतः[13] ॥२६॥ [२१
इमम्[14] अर्चय[14] सु-ग्रीवं साऽमात्यं स-पुरःसरम् ।
N] पूजिते वानरेन्द्रेऽस्मिन् पूजितो वै[15] भवाम्य् अहम् ॥[16]२७॥ [N
यम् एव दिवसं वीर त्वम् अस्मान् समुपाऽऽगतः[17] ।
N] तस्मिन्न् अहनि लङ्कायां मया त्वम्[18] अभि-षेचितः[18] ॥२८॥ [N
अवश्यं[19] तु प्र-कृतिभिर्[19] महा-राज्येन रक्षसाम्[20] ।[21]
N] अभि-षेक्तव्यम्[22] आत्मानं[22] तस्मात् त्वम् अभि-षेचय ॥२९॥ [N
सुग्रीव-प्रमुखैर्[23] वीरैः सहितो[24] हरि-यूथपैः ।
N] लक्ष्मणेन सह भ्रात्रा लङ्काम् आ-विश[25] मा चिरम् ॥३०॥ [N
तत्र त्वाम् अभि-षिञ्चन्तु सर्वाः प्र-कृतयो[26] मुदा[26] ।
N] ततो माम् अभि-गच्छस्व प्र-स्थापय[27] च माम् इतः[27] ॥३१॥ [N

---

१. रा$_1$ अ प्र—उक्तं मे । रा$_2$ फ म भ—तं तु मे ॥ २. रा$_2$ फ म—वर्जं—त्वरितं ॥ ३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—निवारयितुं ॥ ४. रा$_1$ अ प्र भ—च यशस्विनीं । ल$_1$ ल$_2$ ब—च तपस्विनीं । म भ—चैव मा० । ५. ल$_1$ ल$_2$ ब अ प्र—०क्षुः । रा फ म भ—गुरूंश्च । ६. रा$_2$ फ म—द्रष्टुमिच्छति मे मनः । भ—पौरान् जानपदैः सह ॥ ७. रा$_1$ ल$_1$ ल$_2$ ब—सोऽद्य । ८. रा$_2$ फ म भ—खलु न । ९. रा$_2$ फ—त्वरितं । भ—सखे त्वां । १०. रा$_2$ फ म—वर्जं—०नये ॥ ११. रा$_2$ फ म भ—तूर्णं । १२. रा$_2$ फ म भ—नैर्ऋताधिप । १३. रा$_2$ फ म—इति मे मतिः ॥ १४. रा$_2$ फ म—वर्जं—अनुमर्षय । १५. रा$_2$ फ म—वर्जं—हि । १६. भ—एवमुक्त्वा पुनः प्राह विभीषणममित्रहा ॥ १७. रा$_2$ फ म भ—समुपस्थितः । १८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—चैवाभि० ॥ १९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—तव संति प्रकृतयो । २०. रा$_2$ फ म—वर्जं—०सा । २१. भ—नास्ति । २२. रा$_1$ ल$_1$ ल$_2$ ब प्र—०षेचंतु ते च त्वां ॥ २३. म—०वसहितैर् । २४. म—प्रमुखैर् । २५. ल$_1$ ल$_2$ ब अ प्र—०श्य ॥ २६. भ—०यस्तथा । २७. भ—मानितः सर्वराक्षसैः ॥

वैदेह्या[1] या[1] सखी तत्र त्रि-जटा नाम राक्षसी ।
N] अस्यास् तु प्रिय-हेतोस् त्वं ताम्[2] अनु-ज्ञातुम् अर्हसि ॥३२[3]॥ [N
अ-विन्ध्यो नाम मेधावी मान्यश्[4] च सततं त्वया[4] ।
N] मत्-प्रियाऽर्थं त्वम् अद्यैनं[5] पूजयेथा[6] यथैव माम्[6] ॥३३॥ [N
वैदेह्या[7] कथिताव् एतौ[7] प्रीयमाणौ यथा[8] भृशम् ।
N] उभौ कृतोपकारौ तौ पूजनीयौ सदा त्वया ॥३४[9]॥ [N
प्रति-गृह्य तु रामस्य वचनं[10] स[10] वि-भीषणः ।
N] सम्प्र-तस्थे ततो[11] रक्षो यत्र[12] लङ्का महा-पुरी ॥[13]३५॥ [N
स[14] प्र-विश्य[14] पुरीं लङ्कां स-सुग्रीवः स-लक्ष्मणः[15] ।
N] आभि-षेचनिकं सर्वं स्वयम् आऽज्ञापयत् तदा ॥३६॥ [N
ततोऽभ्य्-अषिञ्चन् विधि-वत्[16] सर्वाः प्र-कृतयस् तदा ।[17]
N] तौ च लक्ष्मण-सुग्रीवौ सहितौ राघवाऽऽज्ञया ॥[18]३७॥ [N
ततो वाद्यानि[19] लङ्कायां शङ्ख-भेरी-विमिश्रितैः[20] ।
N] सं-नादैः[21] पूरयामासुर्[21] लङ्कां स-वनकाननाम्[22] ॥३८॥ [N
अभि-षिक्तः स धर्माऽऽत्मा सर्व-राक्षस-पार्थिवः[23] ।
N] शुशुभेऽभ्य्-अधिकं लक्ष्म्या कुबेर इव यक्ष-राट्[24] ॥३९॥ [N
सोऽभि-षिक्तो वचः कुर्वन्[25] रामस्य विदिताऽऽत्मनः ।
N] अर्चयामास सु-ग्रीवं पाद्याऽऽदिभिर्[26] अन्-उत्तमैः ॥४०॥ [N
लक्ष्मणं च महाऽऽत्मानं विधि-दृष्टेन कर्मणा ।

---

१. भ–०ह्याश्च । २. म भ–वर्जं—माम् । ३. अ–नास्ति ॥ ४. रा$_2$–स्त्यध्यक्षस्तव सांप्रतं । फ–अध्यक्षस्तव सांप्रतं । म–स्त्यध्यक्ष इव सांप्रतं । भ–तत्रास्ते राक्षसेश्वर । ५. रा$_2$ फ म भ–अप्यद्य । ६. रा$_2$ फ–०व हि । भ–पूजयाशु महाबलं ॥ ७. प्र–०ह्याः । ८. रा$_2$ फ–वर्जं—मया । ९. अतः परमधिकः पाठः—भ–सरमां च मम प्रीत्या वैदेह्याः प्रीतिहेतवे । पश्येथास्त्वं यथा सीतां पूजार्हां च सर्वदा ॥ १०. रा$_2$–वचस्तस्य । फ–वचस्तच्च । म–वचस्तत्तु । भ–वचः पथ्यं । ११. रा$_2$ फ–तदा । भ–तथा । १२. प्र–येयं । फ म भ–येन । १३. म–अभिषेक्तुं स धर्मात्मा सर्वैर्हरिगणैर्वृतः ॥ १४. रा$_2$ फ भ–प्रविश्य च । म–महाबाहुः । १५. प्र–सुग्रीवः सहल० ॥ १६. रा$_1$ ल$_2$ ब अ प्र–विविधैः । १७. ल$_1$–नास्ति । १८. रा$_2$–नास्ति ॥ १९. फ म भ–जयाशीर् । २०. फ म–०श्रिता । भ–०विचित्रिता । २१. रा$_2$ फ भ–नादेन पूरयामास । म–वाद्येन पूरयामास । २२. भ–चाऽपि सका० ॥ २३. ल$_1$ ल$_2$ ब अ प्र म–०सपुंगवः । २४. अ प्र रा$_2$ फ म–राजराट् ॥ २५. म–श्रुत्वा । २६. रा$_2$ फ भ–अर्घ्यादि० । म–अर्घ्यादि० ।

N] रत्नैश् च वि-विधैर् दिव्यैर् महेन्द्र-भवनाऽऽहृतैः ॥४१॥ [N
त्रैलोक्यम् अभिनिर्-मथ्य रावणो यान्य्[1] उपाऽऽहरत्[1] ।
N] तैः सर्वैः पूजयामास[2] वानरेन्द्रं[2] वि-भीषणः ॥४२॥ [N
ततः सुवेल-शैल-स्थं[3] रामं प्र-हरतां वरम् ।
N] अभ्य्-अगच्छद् अ-दीनाऽऽत्मा सोऽभि-षिक्तो वि-भीषणः॥४३[4]॥[N
N] वि-मानं सूर्य-सङ्काशम् आ-जहार त्वराऽन्वितः ।[5]
दिव्यम्[6] अत्य्-अद्भुताऽऽकारं[6] मनः-काम-गम् अ-व्ययम् ॥४४॥[N
२२] मणि-काञ्चन-चित्राऽङ्गं वैडूर्य-मणि-वेदिकम्[7] ।[8]
N] क्रीडाऽऽगारैः[9] परि-क्षिप्तं तप्त-काञ्चन-भूषणैः[10] ॥४५॥[२४
पाण्डुराभिः पताकाभिर् ध्वजैश्[11] च बहुभिर् वृतम्[11] ।
२३] शोभितं हर्म्य-वृन्दैश्[12] च हेम-कुड्य-विभूषितम्[13] ।[14] [२५
N] मण्डितं[15] जलजाऽऽकारैः[16] पुण्डरीकैश् च काञ्चनैः ॥[17]४६॥[N
N] रुचिरैः किङ्किणी-जालैर् मुक्ता-मणि-गवाऽक्षकम्[18] ।[19]
२४पू] हेम-जालैः परि-क्षिप्तं सर्व-तो मधुर-स्वनम् ॥[20]४७॥[२६
तन्[21] मेरुशिखराऽऽकारं निर्-मितं विश्व-कर्मणा ।
२५] बहुभिर्[22] भूषितं चित्रैर्[22] मुक्ता-रजत-शोभितम्[23] ॥[24]४८॥[२७
२४उ] दन्त-स्फटिक-चित्राऽङ्गैर्[25] वैडूर्यैश्[26] च वराऽऽसनैः[26] ।

---

१. म–यथदाह० । २. रा२ फ म भ–अर्चया० ॥ ३. रा२ फ–०लभ्रंगस्थं । भ–सुवेले संप्राप्य । ४. प्र–नास्ति ॥ ५. रा२ फ म–विमानमादाय महन्महाभ्रशिखरोपमम् । भ–दिव्यमादाय च महन्महेंद्रशिखरोपमं । ६. भ–विमानमद्भुता० ॥ ७. रा२ फ म–तप्तकांचनवे० । भ–मुक्तामणिवरांकितं । ८. अतः परमधिकः पाठः— भ–घंटाजालनिनादितं प्रगीतमिव सर्वतः । एवमुक्तस्तु रामेण राक्षसेन्द्रो विभीषणः ॥ विमानं सूर्यसंकाशमाजुहाव त्वरान्वितः । ततः कांचनचित्रांगं वैडूर्यमणिवेदिकम् ॥ ९. रा२–कूटाकारप० । फ–कूटागारप० । म–कूटागमप० । भ–कूटागारैः प० । १०. रा२ फ म–सर्वतो मधुरस्वरं ॥ ११. रा२ फ–समंतादवभासितं । म–समंतात्परिशोभितम् । भ–ध्वजैश्च विविधैस्तथा । १२. भ–हर्म्यकैठेश् । १३. भ–हेमपादा० । १४. रा२ फ म–नास्ति । १५. रा२ फ म–शोभितं । १६. प्र रा२ फ म–०जलदाका० । १७. भ–नास्ति ॥ १८. फ–०क्षकैः । म–०गणाचितैः ॥ १९. भ–नास्ति । २०. रा फ म–घंटाजालप्रणादितं प्रगीतमिव सर्वशः ॥ २१. भ–तं ॥ २२. भ–बृहद्भिर्भूषितं हर्म्यैर् । २३. भ–०भितैः । २४. रा२ फ म–कामगं रुचिरं दिव्यं मनोऽभिप्रेतमव्ययं ॥ २५. प्र रा२ फ–दंताःस्फा० । भ–धातुस्फटि० ॥ २६. रा१ ल१ ल२ ब अ प्र–०र्यस्य वरा० । म–०र्यपरमासनैः ।

N] महाऽर्हाऽऽस्तरणोपेतम्[1] उप-पन्नं महा-धनैः ॥[1]४९॥[२८
उप-स्थितम् अनु-आधृष्यं तद् विमानं मनो-जवम् ।
२६] ततो[2] नि-वेद्य[2] रामाय तस्थौ तत्र वि-भीषणः ॥५०॥ [२९
तत् पुष्प-कं काम-गमं वि-मानम्[3]
उप-स्थितं[4] प्रेक्ष्य हि दिव्य-रूपम्[4] ।
रामः प्र-हृष्टः सह लक्ष्मणेन
N] पुरा यथा वृत्र-वधे शत-क्रतुः ॥[5]५१॥ [३०

इत्यार्षे रामायणे युद्ध-काण्डे[6] पुष्पकोपस्थानं[7] नाम
द्व्युत्तरशततमः सर्गः ॥ १०२ ॥

[वं-१०६]= [त्र्युत्तरशततमः सर्गः] =[दा-१२५]

१पू] उप-स्थितं तु तं दृष्ट्वा वि-मानं[8] पुष्प-कं ततः[8] ।
N] अ-विदूरे[9] स्थितं रामम्[10] इत्य् उवाच वि-भीषणः[10] ॥१[11]॥ [१
N] स तु बद्धाऽञ्जलिपुटो वि-नीतो राक्षसेश्वरः[12] ।
१उ] अब्रवीत्[13] त्वरयोपेतः किं करोमीऽति राघवम् ॥२[14]॥ [२
तम् अब्रवीन्[15] महा-तेजा लक्ष्मणस्योप-शृण्वतः ।
२] वि-मृश्य[16] राघवो वाक्यम् इदं स्नेहोपबृंहितम्[17] ॥३ ॥ [३
३पू] इमे तु कृत-कर्माणः सर्वे एव वनौकसः ।[18] [४पू
N] सहैभिर् भवता लङ्का जिता मम नि-वेदिता ॥[19]४॥ [N

---

१. भ—नास्ति ॥ २. रा$_2$ फ म—निवेदयित्वा ॥ ३. म—ह्युपस्थितं । ४. म—तदा तु संप्रेक्ष्य च दि० । भ—०तं भूधरसन्निकाशं । ५. भ—दृष्ट्वा तदा विस्मयमाजगाम रामः ससौमित्रिरुदारसत्त्वः ॥ ६. ब प्र भ—लंकाकाण्डे । रा$_2$ फ—आभ्युदयिके । ७. प्र म—०कोत्थापनं । भ—विभीषणाभ्युदयिके पु० ॥ ८. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ—पुष्पकं पुष्पभूषितं । ९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—नातिदूरे । १०. रा$_2$-वर्जं—रामः प्रत्युवाच विभीषणम् । ११. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब—कृतं साध्विव्युवाचैनं रामः सम्यग्विभीषणम् ॥ १२. रा$_2$ फ म—०साधिपः । १३. रा$_2$ फ म—उवाच । १४. अ—नास्ति ॥ १५. रा$_2$ म—उवाच । १६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—विस्पष्टं । १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ—०हपुरस्कृतं । रा$_2$ फ—०पगुंठितं ॥ १८. रा$_2$ फ म—कृतप्रत्युपकर्माणो विभीषणवनौकसः । १९. भ—नास्ति ॥

त्यक्त्वा प्राणान् परं शक्त्या तोषितोऽस्मि वि-भीषण ।[1]
N] एभिः सं-पूजितैः वीरैः पूजितोऽहं त्वया ध्रुवम् ॥५ ॥ [N
ममाऽर्थे[2] ये पराऽऽक्रान्ताश् चिरं[2] वानर-पुङ्गवाः ।
N] सर्व-शः[3] पूजनीयास् तु[4] ऋक्ष-वानर-संहताः[4] ॥६ ॥ [N
३उ] रत्नैर् अर्थैश् च वि-विधैः सं-पूज्यन्तां वि-भीषण ।[5] [४उ
सहाऽमीभिर्[6] जिता लङ्का निर्-जितो[6] राक्षसेश्वरः ॥७ ॥
४] दूरे प्राण-भयं त्यक्त्वा सं-ग्रामेष्व् अभि-वर्तिनः ।[7] [५
एवं सु-सम्मताश्[8] चैव मानाऽर्हा मानितास् त्वया ।
५] भविष्यन्ति कृत-ज्ञेन निर्-वृत्ता हरि-यूथपाः ॥८ ॥ [७
त्यागिनं सं-ग्रहीतारं साऽनुक्रोशं यशस्विनम्[9] ।
६] यतस् त्वाम् अव-गच्छामि ततः सं-बोधयाम्य्[10] अहम् ॥९ ॥ [८
हीनं क्लीब-गुणैः[11] सर्वैर् अरि-हन्तारम् आ-हवे ।
N] सेना भजति राजानम् एतद् भूमि-पतेर्[12] व्रतम्[12] ॥१०[13]॥ [९
धर्माऽर्थ-विदुषं[14] वीरम्[14] अति-दातारम् आर्जवम् ।
७] योधा भजन्ति राजानम् एतद् भूमि-पतेर् व्रतम् ॥११[15]॥ [N
एवम् उक्तस् तु रामेण वानरांस् तान् वि-भीषणः ।
८] धन-रत्न-प्रदानेन सर्वान् एवाऽभ्य्-अपूजयत् ॥[16]१२॥ [१०
९पू] ततस् तान् वानरान्[17] दृष्ट्वा धन-रत्नैश्[18] च पूजितान्[18] । [११पू
N] सान्त्वयित्वा यथा-न्यायम्[19] इदं वचनम् अब्रवीत् ।१३[20]॥ [N
परि-तुष्टोऽस्मि[21] भद्रं ते कृतं साह्यं महन् मम ।
N] लब्धा सीता हतः शत्रुः कुलम् अत्युद्-धृतं[22] च मे ॥१४॥ [N

---

१. अतः परमधिकः पाठः—प्र रा$_2$ फ म-रत्नैः समभिपूज्यंतामपि प्रत्यवराश्च ये । यो यदिच्छति यावच्च तत्तद्देयं विभीषण ॥ २. म-सुसमर्थाः पराक्रान्ताः सर्वे । ३. रा$_2$ फ-सर्वथा । ४. रा$_2$ फ म-ते रक्ष्याश्च सुतवत्सदा ॥ ५. रा$_2$ फ म-नास्ति । ६. भ-०भिस्त्वया लंका निर्जिता ॥ ७. अतः परमधिकः पाठः—भ-त इमे कृतकर्माणः सर्व एव वनौकसः । धनरत्नप्रदानैश्च कोशैश्च सफलान्कुरु ॥ ८. भ-सम्मानिताश् ॥ ९. रा$_2$ म-मनस्विनं । भ-जितेंद्रियं । १०. रा$_2$ फ म-त्वां प्रब्रवीम्य् ॥ ११. भ-ह्यपि गुणैः । १२. भ-०ते श्रुतम् । १३. रा$_2$ फ म-नास्ति ॥ १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-श्रुतं धर्मार्थविदुषं । १५. भ-नास्ति ॥ १६. रा$_2$ फ म-ववर्ष रत्नवर्षेण वर्षेण मघवानिव ॥ १७. फ म-पूजितान् । १८. रा$_2$ फ म-रामः संपूर्णमानसः । १९. रा$_1$ ल$_1$ प्र-०न्याय्यं । म-इदं वाक्यं । २०. भ-अत आरभ्य-२०-शश्लोकं यावन्नास्ति ॥ २१. फ-वर्ज—परिपुष्टो० । २२. रा$_2$-अभ्यु० ।

अ-शून्या मे दिशः सर्वा भवद्भिर् देव-विक्रमैः ।
N] नास्त्य् अ-देयं हि मे किं-चिद् देव-राज्यम् अपि ध्रुवम् ॥१५॥ [N
अनु-जानामि वः सर्वान् यथेष्टं गम्यताम् इति ।
N] तेनैव सेतुना तीर्त्वा मकराऽऽलयम् अ-व्ययम् ॥१६॥ [N
सु-ग्रीवस् तु मया सार्धं वि-मानेन गमिष्यति ।
N] साऽमात्यो युव-राजश् च[1] यथा मुख्याश् च[2] वानराः ॥१७॥ [N
इत्य् उक्तास् ते महा-काया वानराः काम-रूपिणः ।
N] प्र-दक्षिणम् अवर्तन्त[3] दृष्ट्वा रामं स-लक्ष्मणम् ॥१८॥ [N
सु-ग्रीवम् अङ्ग-दं चैव राजानं चैव वि-भीषणम् ।[4]
N] प्र-णम्य च शिरोभिस् ते[5] प्र-ययुर् हरि-यूथपाः ॥१९॥ [N
यथोत्-साहं यथा-प्रीति यथाऽऽगतम् अरिं-दमाः ।
N] के-चिद्[6] रवान्[6] वि-मुञ्चन्तः सिंह-नादांश् च पुष्कलान् ॥२०॥ [N
९उ] आ-रुरोह तदा रामस् तद्[7] वि-मानं मनो-जवम्[7] । [११उ
अङ्केनाऽऽदाय[8] वैदेहीं लज्जमानां[9] यशस्विनीम्[9] ।
१०] लक्ष्मणेन सह भ्रात्रा वि-क्रान्तेन धनुष्-मता ॥[10]२१॥[१२
अब्रवीच् च विमान-स्थः काकुत्स्थः सर्व-वानरान् ।
११] सु-ग्रीवं च महा-वीर्यं राक्षसं च वि-भीषणम् ॥२२[11]॥[१३
N] सर्वेषां वः प्र-भावेन दुर्-आत्मा रावणो हतः ।[12] [N
मित्र-कार्यं कृतम् इदं भवद्भिर् वानरर्षभाः ।[13]
१२] अनु-ज्ञाता मया सर्वे यथेष्टं गन्तुम्[14] अर्हथ[14] ॥२३॥ [१४
यत् तु कार्यं वयस्येन स्निग्धेन च हितेन च ।
१३] कृतं सु-ग्रीव तत् सर्वं भवता धर्म-चारिणा ।[15]
१४पू] किष्किन्धां गच्छ सु-ग्रीव स्व-राज्यम् अनु-पालय ॥२४[15]॥[१५

---

१. फ म—वर्जं—तु । अ—ते । २. ल१—तु ॥ ३. म—अकुर्वन्त ॥ ४. प्र रा२ फ—नास्ति । ५. रा२ फ—तान् । म—तं । ६. म—कलर० । प्र—केचिद्वाचा ॥ ७. रा२ फ म—विमानमभिपूज्य च । ८. रा२ फ—अंके चादाय । रा१ ल१ ल२ ब अ प्र—०नात्मा । ९. रा२ फ म—श्रियं नारायणो यथा । १०. रा२ फ म—अथारुरोह तं राजा सुग्रीवः सह मंत्रिभिः ॥ ११. रा२ फ म—लक्ष्मणश्च महाधन्वी युवराजोंगदस्तथा । सुग्रीवानुमता ये च विद्वांसो हरियूथपाः ॥ १२. रा२ फ म—ऋक्षराजो गवाक्षश्च सुषेणश्च हरीश्वरः । १३. रा२ फ म—नास्ति । १४. भ—प्रतिगच्छथ । १५. भ—अत आरभ्य २७-शश्लोकस्य पूर्वार्धं यावन्नास्ति ॥

अब्रवीद् च विमान-स्थो राघवो राक्षसेश्वरम् ।[1]
N] वि-भीषणम् अमित्र-घ्नम् इदं वचनम् अर्थ-वत् ॥२५॥ [N
मित्र-कार्यं महद् इदं भवता पुष्कलं कृतम् ।
N] स्व-पक्षं पृष्ठ-तः कृत्वा धर्मम् आ-लम्ब्य केवलम् ॥२६॥ [N
लङ्काम् आ-वस भद्रं ते मया दत्तां वि-भीषण ।[1]
N] वि-भीषण महा-बाहो कुल-धर्म-भृतां वर ॥[1]२७॥ [N
स्व-राज्यं ते मया दत्तं लङ्कायां राक्षसेश्वर ।[2]
१५] न त्व्[3] आ-धर्षयितुं[3] शक्ताः सेन्द्रा अपि सुराऽसुराः[4] ॥२८॥ [१६
अयोध्याम् अभि-गच्छामि[5] राज-धानीम् अहं[6] पितुः[6] ।
१६] अभ्यनु-ज्ञातुम् इच्छामि सर्वांश्[7] चाऽऽमन्त्रयामि[7] वः ॥२९॥ [१७
एवम् उक्तास्[8] तु रामेण हरीऽन्द्रा[9] हरयस् तथा[9] ।[10]
१७] ऊचुः प्राऽञ्जलयः सर्वे राक्षसश् च वि-भीषणः ॥[11]३०॥ [१८
१८पू] अयोध्याम् अभि-गच्छामः सर्वान् नयतु नो भवान् ।[12]
N] ऊर्जिता वि-चरिष्यामो वनान्य् उप-वनानि च ॥[13]३१॥ [१९
१९पू] दृष्ट्वा तवाऽभि-षेकं च कौसल्याम् अभि-वाद्य च ।[14] [२०पू
N] दृष्ट्वा भरत-शत्रुघ्नौ सु-मित्रां[15] कैकयीं तथा[15] ॥३२॥ [N
N] अयोध्यां नगरीं दृष्ट्वा रम्योद्यानवनाऽन्तराम्[16] ।
१९उ] न चिराद् आ-गमिष्यामः स्व-गृहान् रघु-सत्तम ॥[17]३३॥ [२०उ
एवम् उक्तस् तु धर्माऽऽत्मा वानरैः[18] स-विभीषणैः[18] ।
२०] अब्रवीद् वानरान् रामः स-सुग्रीवविभीषणान् ॥[19]३४॥ [२१
प्रियात् प्रिय-तरं लब्धम् अद्य[20] यद्य् आ-गमिष्यथ[20] ।

---

१. भ–नास्ति । २. रा$_2$ फ म–नास्ति ॥ ३. रा$_2$ फ म भ–त्वां ध० । ४. रा$_2$ फ म–दिवौकसः ॥ ५. रा$_2$ फ म–प्रतियास्यामि । ६. रा$_2$ फ म–पितुर्मम । ७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ–सर्वानामं० ॥ ८. रा$_2$ फ म भ–उक्तस्त । ९. रा$_2$ फ म–स राजा रावणानुजः । १०. भ–अत आरभ्य ३३-शश्लोकं यावन्नास्ति । ११. रा$_2$ फ म–उवाच रामं प्रणतः प्रस्तुतं हेतुमद्वचः ॥ १२. रा$_2$ फ म–अयोध्यां नगरीं गंतुमिच्छामि सहितस्त्वया । १३. रा$_2$ फ म–नास्ति ॥ १४. भ–तवाभिषेकमिच्छामि द्रष्टुं हृदयकांक्षितं । कौशल्यामभिवाद्याहं सुमित्रां कैकयीं तथा । १५. रा$_2$ फ म–भविष्याम्यात्मनोऽनृणः ॥ १६. म–नानोद्या० । १७. रा फ म–पुनरेष्याम्यनुज्ञातो भवता यदि मन्यसे ॥ १८. रा फ म–रामस्तेन महात्मना । १९. रा$_2$ फ म–बभूव प्रीतिमान्रामस्तस्य भक्त्याभिजातया ॥ २०. भ–मया यदि ग० ।

२१] सर्वैर् भवद्भिः सहितः प्रीतिं लप्स्ये पुरीं गतः ॥३५[1]॥[२२
क्षिप्रम् आ-रुह सु-ग्रीव वि-मानं सह वानरैः ।
२२] त्वम् अप्य् आ-रुह साऽमात्यो राक्षसेन्द्र वि-भीषण ॥३६[2]॥ [२३
आ-रुरोह ततो राजा सु-ग्रीवः सह मन्त्रिभिः ।[3] [२४पू
२३] अथाऽऽजग्मुस् तथा हृष्टाः सर्वे ते हरि-यूथपाः ॥[4]३७[5]॥[N
ततो वि-भीषणो राजा वि-धाय नगरे विधिम् ।
N] आ-मन्त्र्य मातरं धी-मान् सं-दिश्य[6] च[6] सुहृज्-जनम् ॥३८॥ [N
वि-मानं पुष्प-कं श्री-मांश् चतुर्भिः सचिवैः सह ।[4]
N] धर्माऽर्थ-कुशलैर् वीरैर्[7] आ-रुरोह[8] यथा-विधि[8] ॥[9]३९॥ [N
तेष्व् आ-रूढेषु सर्वेषु कौबेरं[10] यानम् उत्-तमम्[10] ।
२४] राघवेणाऽभ्यनु-ज्ञातम् उत्-पपात[11] ततो नभः[11] ॥४०॥ [२५
ख-गमेन[12] वि-मानेन काम-गेन च[13] भास्-वता[13] ।
२५] सुहृद्-वृतस्[14] तथा हृष्टो[14] ययौ[15] रामः कुबेर-वत् ॥४१॥ [२६
स तु पवन-पथं गते[16] वि-माने[16]
दशरथ-वंश-विवर्धनः[17] प्रतीऽतः ।
क्षिति-तलम् अव-लोकयन् प्र-हृष्टो
N] नगर-शतैर् उप-शोभितं सम्-ऋद्धैः[18] ॥४२॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे[19] पुष्पकाऽऽरोहणं[20] नाम
त्र्युत्तरशततमः सर्गः ॥ १०३ ॥

---

१. रा$_2$ फ म–उवाच चैनं काकुत्स्थः प्रियं मे राक्षसेश्वर । यत्त्वमेवं गतो विद्वन्कार्यनिश्चयतत्त्ववित् ॥ २. रा$_2$ फ म–क्षिप्रमारोहतु भवान्सामात्यः सपुरःसरः । पुरे प्रतिविधिं कृत्वा कर्तव्यमिति चेति च ॥ ३. भ–स ततो पुष्पकं दिव्यं सुग्रीवः सह वानरैः । ४. भ–नास्ति । ५. रा$_2$ फ म–नास्ति ॥ ६. म–संदिदेश ॥ ७. रा$_2$ फ म–शूरैर् । ८. रा$_2$ फ–०रोहाथ पुष्पकं । ९. भ–आरुरोह मुदा युक्तः सामात्यश्च विभीषणः ॥ १०. रा$_2$ फ म–सुखासीनेषु सर्वशः । ११. रा$_2$ फ म–विमानं दिवमुत्पतत् ॥ १२. रा$_2$ फ म–खेचरेण । १३. रा$_2$ फ म–विराजता । १४. रा$_2$ फ–सुप्रीतश्च प्रहृष्टश्च । १५. रा$_2$ फ म–वर्जं—बभौ ॥ १६. म–०थविमानशाली । १७. रा$_2$ फ म–०विभूषणः । १८. रा$_1$ अ भ–प्रहृष्टैः ॥ म भ–वर्जं—समृद्धं ॥ १९. ब प्र भ–लंकाकांडे । रा$_2$ फ म–आभ्युदयिके । २०. ल$_1$–पुष्पकविमानं । रा$_2$–०कावरोहणो ॥

[वं–१०८]= [चतुरुत्तरशततमः सर्गः]= [दा–१२६]

अनु-ज्ञातं[1] तु रामेण[1] तद् वि-मानं मनो-जवम् ।
१] उत्-पपात महा-मेघः[2] श्वसनेनोद्-धतो[2] यथा ॥१ ॥ [१
N] देशान् बहु-विधान् पश्यंल् लङ्कायां बहु-पादपान् ।[3]
पातयित्वा ततश् चक्षुः सर्व-तो रघु-नन्दनः ।[4] [N
२] अब्रवीन् मैथिलीं सीतां रामः शशिनिभाऽऽननाम्[5] ॥२ ॥ [२
कैलासशिखराऽऽकारे त्रिकूट-शिखरे स्थिताम् ।
३] पश्य[6] लङ्कां तु[6] वैदेहि निर्-मितां विश्व-कर्मणा ॥३ ॥ [३
एतद् आ-योधनं पश्य[7] मांस-शोणित-कर्दमम् ।
४] हरीणां राक्षसानां[8] च सीते वि-शसनं[9] महत्[9] ॥४ ॥ [४
N] अत्राऽसौ रावणो दग्धः पूर्व-दग्धः शरैर् मम ।[10]
कुम्भ-कर्णोऽत्र[11] नि-हतः[11] प्र-हस्तश्[12] च निशा-चरः[12] ॥५ ॥ [६ पू
५] इन्द्र-जिच् चाऽत्र मायावी हतः सौमित्रिणा बली ।[13] [८ पू
तव हेतोर् विशालाऽक्षि नि-कुम्भश्[14] च नि-पातितः[14] ॥[15] ६ ॥ [N
६] विरूपाऽक्षश् च दुर्-धर्षो महापार्श्व-महोदरौ ।[16]
अ-कम्पनश् च नि-हतो धूम्राऽक्षश् च महा-बलः ॥[17] ७ ॥ [९
७] विद्युज्-जिह्वश् च सं-पातिर् देवाऽन्तक-नराऽन्तकौ[18] । [१०
८पू] अन्ये च बहवः शूरा राक्षसेन्द्रपदाऽनुगाः ॥[19] ८ ॥ [N
एष लब्ध-वरः सीते प्र-माथी राक्षसाऽधिपः ।[20]

---

१. रा$_2$ फ म–राघवेणाभ्यनुज्ञातं । २. म–महावेगः श्वसनेन हतो ॥ ३. टि–हतोऽग्रे श्लोकार्धं त्रुटितमिव स्यात्? । ४. रा$_2$ फ म–नास्ति । ५. रा$_2$ फ म–चंद्रनि० ॥ ६. रा$_2$ फ म–अवेक्ष्य लंकां ॥ ७. रा$_2$ फ म–घोरं । ८. रा$_2$ फ–नैर्ऋतानां । ९. रा$_2$ फ म–पश्य विनाशनं ॥ १०. भ–नास्ति । ११. रा१ ल१ ल$_2$ ब अ प्र–०णश्च नि० । म–०र्णो विनि० । १२. रा$_2$ फ म–महाकायो महाबलः ॥ १३. रा फ म–अत्रेन्द्रजिन्महावीर्यो लक्ष्मणेन हतो रणे । १४. रा फ–विरूपाक्षश्च राक्षसः । भ–वर्जं—कुम्भकर्णश्च पातितः । १५. म–अत आरभ्य १४-शश्लोकस्य पूर्वार्धं यावन्नास्ति । १६. रा$_2$ फ–महापार्श्वः सुदुर्धर्षस्तथैव च महोदरः । अतः परमधिकः पाठः—भ–अतिकायश्च तेजस्वी देवांतकनरांतकौ । १७. रा$_2$ फ–धूम्राक्षो निहतोऽत्रैव निकुंभश्च वरानने ॥ १८. भ–मकराक्षश्च दुर्जयः । १९. रा$_2$ फ–अंकपनश्च निहतो बहवोऽन्ये च नैर्ऋताः । २०. रा$_2$ फ–यज्ञकोपप्रभृतयश्चात्रैव शतशो हताः ।

११] तव हेतोर् विशालाऽक्षि रावणो[1] नि-हतो मया[1] ॥९ ॥[५
अत्राऽऽवां मेघ-नादेन बद्धौ मैथिलि मायया ।
९] निर्-आशा वानराश् चैव स-सुग्रीवविभीषणाः ॥१०[2]॥[N
तारा-पित्रा च सम्प्रोक्तो[3] हनू-मान् मारुताऽऽत्मजः ।
N] जीवनीम् आ-नयस्वेति रामस्य प्रिय-काम्यया ॥११[4]॥ [N
पद्म-गन्धिश् (?न्धि) च सूक्ष्मा(?क्ष्मां)च सूक्ष्म-पत्रा(?त्रां) तथैव च ।
N] महौषधीः(?धीं)कपि-श्रेष्ठ राजपुत्रे(त्र-इ[4]) सु-कांक्षिताः(?ताम्) १२।[4][N
१०पू] रुरुदुर् वानराः सर्वे रामे[6] नि-धनम् आ-गते[6] ।
N] कथं पारं[7] गमिष्यामस् तं विना पार्थिवाऽऽत्मजम् ॥१३॥ [N
१०उ] वैनतेयो मुहूर्ताच् च वि-मुच्य[8] शर-बन्धनात्[8] ।
N] परि-ष्वज्य प्र-यातोऽभूत् सुर-लोकं महा-यशाः ॥१४॥ [N
अत्र मन्दोदरी नाम करुणं पर्य्-अदेवयत् ।
१२] पत्नी राक्षस-राजस्य रावणस्य दुर्-आत्मनः ।[9]
N] स-पत्नीनां सहस्रेण साऽग्रेण परि-वारिता[10] ॥१५॥[१५पू
अत्राऽयं लक्ष्मणो वीरः शक्त्या परमया[11] तया[11] ।
N] अ-मोघया रावणेन भृशं वक्षसि ताडितः ॥१६[12]॥[N
पतितं लक्ष्मणं दृष्ट्वा मां विषण्ण-मुखं तदा[13] ।
N] सु-षेणो वानर-श्रेष्ठः प्रेषयामास वानरम् ॥१७॥[N
हनू-मन्तं महा-वीर्यम् ओषध्य्-अर्थं[6] महा-जवम् ।
N] जम्बू-द्वीपम् अति-क्रम्य वि-शल्याम् आऽऽनयत् कपिः ॥१८॥ [N
चन्द्रस्य च[14] गिरेः पादे सा च जाता महौषधी ।
N] ताम् आऽऽनयन् महा-बाहुर् जीवयामास लक्ष्मणम् ॥१९[12]॥ [N
एष[15] सं-दृश्यते देवि[15] सम्-उद्रः सरितां पतिः[16] ।

---

१. रा$_2$ फ म-राक्षसाः क्रूरबुद्धयः ॥ २. रा$_2$ फ -अत आरभ्य १४-शश्लोकं यावन्नास्ति । ३. ल$_1$ ल$_2$ ब अ प्र-संदिष्टो । ४. भ-नास्ति ॥ ५. टि.-मध्यपदलोपः कर्मधारयसमासः द्र. ॥ ६. भ-मयि मृत्युमुपागते । ७ भ-वयं । ८. भ-विदार्य शरबंधनं ॥ ९. रा$_2$ फ-नास्ति । म-अत आरभ्य २०-शश्लोक-पूर्वार्धं यावन्नास्ति । १०. रा$_2$-पतिता भुवि ॥ ११. रा$_1$ अ-०या तदा । भ-०मभीमया । १२. रा$_2$ फ-नास्ति । १३. भ-तथा । १४. भ-हि ॥ १५. रा$_2$ फ-वर्ज—दृश्यते चैव वैदेहि । १६. रा$_1$ ल$_2$ ब अ प्र-गतिः ।

१३] पूर्व-जो[1] ज्ञातिर्[1] अस्माकं येन साह्यं महत्[2] कृतम्[2] ॥२०॥ [N
एतत् तु दृश्यते तीरं[3] सु-वेलस्य वराऽऽनने[3] ।[4]
१४] सु-वेलोऽयं महा-शैलः सुखं यत्रोषिता वयम् ॥२१॥ [N
लङ्कां प्रत्यर्थि-भूतोऽसौ[5] दृश्यते काल-पर्वतः ।[5]
N] यत्र सागरम् उत्-तीर्य तां[7] रात्रिम्[7] उषिता वयम् ॥२२॥ [N
एष सेतुर् मया बद्धः सागरे मकराऽऽलये[8] ।
१५] तव हेतोर् विशालाऽक्षि नल-सेतुर्[9] इति[10] स्मृतः[10] ॥२३॥ [१७
यावत् स्थास्यन्ति गिरयो यावत् स्थास्यन्ति सागराः ।
१६] तावत्[11] सेतुर् अयं स्थाता[11] यावच् च पृथिवी ध्रुवम् ॥२४[12]॥ [N
नलेन वि-हितः सेतुस् त्वद्-अर्थं[13] वै[13] समा-हितः ।
N] एष देवि[14] मनुष्येषु[14] कीर्ति-भूतो[15] भविष्यति[15] ॥२५[15]॥ [N
दश-योजन-विस्तीर्णं[16](?र्णः) शत-योजनम् आ-यतम् (?तः) ।
N] सागरेऽत्र[16] वि(?नि)-बद्धोऽयं नलेन सु-महाऽऽत्मना ॥२६[17]॥ [N
पश्य सागरम् अ-क्षोभ्यं वैदेहि वरुणाऽऽलयम् । [१८पू
१७] अ-पारम् इव गर्जन्तं शङ्ख-शुक्ति-समाकुलम्[18] ॥२७॥ [N
आकाश-सदृशं पश्य चलं तिमि-समाकुलम् ।[19]
N] जलं वैदेहि राजन्तं यादो-गण-निषेवितम् ॥[20]२८॥ [१८
सु-रसा[21] राक्षसी चाऽत्र दूतस्य किल[21] मैथिलि ।
१८] विघ्नं हनु-मतश् चक्रे क्रम-तः किल मारुतेः ॥२९[22]॥ [N
ताम्[23] एव हरि-शार्दूलः[23] सं-क्षिप्याऽऽत्मानम् आत्मना ।

---

१. भ–पूर्वज्ञातिभिर् । २. रा₂ फ म–कृतं मम ॥ ३. भ–पृष्ठं सु० । रा फ–देवि तीरे नदनदीपतेः । ४. म–नास्ति । ५. रा₂ फ–लंकाप्रत्यद्रिभू० । ६. अतः परमधिकः पाठः— रा फ–वर्ज—एष संदृश्यते देवि समुद्रः सरितां पतिः । ७. रा₂ फ म–रजनीम् । ८. रा₂ फ म–सलिलार्णवे । भ–सलिलाकरे । ९. भ–कीर्तिरेषा । १०. रा₁ अ म–०ति श्रुतः । भ–भविष्यति । ११. म–नलसेतुरिति ख्यातो । १२. भ–नास्ति ॥ १३. फ म–च । १४. रा –वर्ज—देवम० । १५. म–कथाभूतो भ० । रा₂ फ–नैतदन्यः करिष्यति । १६. भ–वर्ज—०रोऽत्र० । १७. म–पश्य सागरमक्षोभ्यं धर्षितं नलसेतुना । देवदैत्यमनुष्येषु नैतदन्यः करिष्यति । रा₂ फ–नास्ति । १८. रा₂ फ म–वर्ज—शंखमीनस० ॥ १९. ल₁ ल₂ ब–नास्ति । रा₂ फ म–जलमाकाशसदृशं तिमिमत्स्यसमाचितं । २०. रा₂–अपारमिव गर्जतं यादो० । प्र म भ–नास्ति ॥ २१. अ–सिंहिका राहुमाता च दू० । फ–०सा चागमद्यऽत्र दू० । भ–०सा नागमाता च तत्र दूतस्य । रा₂–०सा ग्वागमचात्र दू० । २२. म–नास्ति ॥ २३. म–पश्य वैदेहि शार्दूलं ।

N] वञ्चयामास मेधावी काम-रूपी मनो-जवः ॥३०[1]॥ [N
हिरण्य-नाभं शैलेन्द्रं काञ्चनं पश्य मैथिलि ।[2]
१९] विश्रमाऽर्थं हनु-मतो भित्त्वा[3] सागरम् उत्थि(द्-स्थि)तम्[3] ॥३१॥ [१९
एतद् वेला-वनं देवि तमाल-वन-शोभितम् ।
२०] हिन्ताल-ताल-गहनं रक्त-माल-समाकुलम् ॥३२॥ [N
एष तीरे सम्-उद्रस्य नि-वासो[4] मम जानकि[4] । [N
२१] यत्र राक्षस-राजोऽयम् आ-जगाम वि-भीषणः ॥३३॥ [२३
अत्राऽस्मि शयितो देवि कुशाऽऽस्तीर्णे मही-तले ।
२२] दर्शनाऽर्थें[5] सम्-उद्रस्य त्रि-रात्रं नर-रूपिणः ॥३४॥ [N
दुर्-धरश् चाऽपि शैलोऽयं महामेघौघ-सन्निभः[6] ।
२३] महेन्द्रस्य[7] गिरेः पादौ यत्र[8] क्रान्तं हनू-मता ॥३५[9]॥ [N
एषा सा दृश्यते सीते किष्किन्धा चित्र-कानना ।
२४] सुग्रीव-नगरी रम्या यत्र वाली हतो मया[10] ॥३६[11]॥ [२४
एतन् माल्य-वतः शृङ्गं किष्किन्धा-धारि[12] भास्वरम् ।
२५] चत्वारो वार्षिका मासा यत्र देव्य्[13] उषिता[13] मया ॥[14]३७॥ [N
त्वया विना विशालाऽक्षि दुःखं यत्र धृतं[15] मया ।
२६] नि-हत्य वालिनं[16] वीरं[17] सु-ग्रीवम् अभ्य्-अषेचयम्[18] ॥३८॥ [N
N] मयाऽनुज-द्वितीयेन क्षिप्तः कालस् त्वया विना ।[19]
एषोऽत्र[20] दृश्यते देवि[20] स-विद्युद् इव तोय-दः ।

---

१. भ—नास्ति ॥ २. रा$_2$ फ म—अत्रैव च सुरवौघः सुनाभो नाम शैलराट् । ३. रा$_2$ फ म—समुद्रादुत्थितोऽभवत् ॥ ४. भ—स्कंधावारो यशस्विनि ॥ ५. फ रा$_2$ फ म भ—०नार्थं । ६. रा$_2$ फ म—महाजलदस० । ७. म भ—मलयस्य । ८. म—यतः । ९. अतः परमधिकः पाठः—रा$_2$ फ भ—एष विंध्यो महाशैलो नदीनदशतान्वितः ॥ १०. रा$_2$—महान् । ११. अतः परमधिकः पाठः—रा$_2$—वैदेहि वानरेंद्रस्य शुद्धांतमधिरोहय । विमानं तं समाहूय सभाजय सखीरिमाः ॥ श्रुत्वा भर्तुर्वचः सीता राममेवान्वमोदयत् । त्वमाज्ञापय राजेंद्र वानरेंद्रस्य योषितः । यथा नयति साकेतं वानरीर्मम कारणात् ॥ राघवेणाभ्यनुज्ञातः सुग्रीवो वानरेश्वरः । सर्वाः समारोपयत वानरीस्तु स्वलंकृताः ॥ १२. रा$_2$ फ म—०न्ध्योपरि । १३. रा फ—देवि धृता । १४. प्र—नास्ति ॥ १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—श्रितं । म—कृतं । १६. प्र—वानरं । १७. रा$_2$ फ भ—घोरं । १८. रा फ—अभिषिच्य च ॥ १९. टि.-इत उपरि श्लोकार्धच्योतः स्यात् ! । भ—नास्ति । २०. रा$_1$ ल$_1$ ल$_2$ ब अ भ—वीक्ष्यते सुमहान्सीते ।

२७] ऋष्य-मूको गिरि-वरः सुग्रीवभवनाऽङ्कितः[1] ॥३९॥ [३९
अत्राऽहं वानरेन्द्रेण सु-ग्रीवेण समा-गतः[2] ।
२८] समयश् च[3] कृतः सीते[3] वधाऽर्थं वालिनो[4] मया[4] ॥४०[5]॥[४०
एषा सा दृश्यते पम्पा नलिनी चित्र-कानना[6] ।
२९] त्वया वि-हीनो यत्राऽहम् उन्-मादेन[7] प्र-धर्षितः[7] ॥४१॥ [४१
पम्पा-तीरे[8] मया दृष्टा शवरी धर्म-चारिणी ।
३०] अत्र[9] योजन-बाहुश् च कबन्धो नि-हतो मया ॥[10]४२॥[४२
एष देशः स यत्राऽऽस्ते गृध्र-राजो महा-बलः ।[11] [N
३१] जटायुस् तव[12] स त्राता[12] रावणेन नि-पातितः ॥[13]४३॥[४३उ
दृश्यतेऽसौ जन-स्थाने श्री-मान् सीते वनस्पतिः । [N
३२] यत्र युद्धं महद् भूतं तव हेतोर् विलासिनि ।४४[14]।[४३उ
खरश् च नि-हतः संख्ये दूषणस् त्रि-शिरास्[15] तथा[15] । [४४पू
३३] रक्षसां च सहस्राणि हतानि च चतुर्-दश ।
N] अन्ये च बहवो[16] वीरा[16] निर्-अस्ता वै निशा-चराः ॥४५[17]॥[N
एषा च पर्ण-शाला सा दृश्यते जनकाऽऽत्मजे ।[18]
३४] यतस् त्वं राक्षसेन्द्रेण रावणेन[19] हृता छलात्[19] ॥४६॥ [४५

---

१. रा१ ल१ ल२ ब अ प्र–दृश्यते धातुभिर्वृतः । भ–धातुभिर्बहुभिर्वृतः । २. रा२ फ म–महात्मना । ३. फ म–चाप्युपगतः । ४. रा२ फ म–०नः कपेः ॥ ५. अतः परमधिकः पाठः—रा१ ल१ ल२ ब अ प्र–प्रत्युवाच ततः सीता रामं दशरथात्मजम् । स्वामिन्सुग्रीवरमणीं द्रष्टुमिच्छामि राघव ॥ तया सहैव यास्यामि त्वयोध्यां नगरीं प्रभो । विहस्य रामः सुग्रीवं प्रत्युवाच कपीश्वरम् ॥ सखे त्वद् गृहिणीं तारां द्रष्टुमिच्छति जानकी । तया सहैव याहि त्वमयोध्यां नगरीं मम ॥ राघवाज्ञां स्वशिरसा निधायाथाब्रवीद्वचः । यद्रोचते बहुमतं स्वामिने चास्तु तत्तथा ॥ आनाययामास स तदा तारां तां राघवाज्ञया । आरोप्य पुष्पके तां तु जानकीमभ्यवादयत् ॥ पुनराह ततो सीतां रामो राजीवलोचनः ॥ ६. भ–०कांचना । ७. प्र–प्रमादेन प्र० । भ–तद्बहुविप्लवान् ॥ ८. रा२ फ म भ–अस्यास्तीरे । ९. रा१ ल१ ल२ ब अ–यत्र० । १०. रा२ फ म–कबंधो राक्षसश्चापि दारुणो नि० ॥ ११. रा२ फ म–नास्ति । १२. भ–ते परित्राता । १३. रा२ फ म–युयुधे राक्षसेंद्रेण त्वदर्थे यत्र गृध्रराट् ॥ १४. रा२ फ म–नास्ति ॥ १५. रा२ फ म–च महाबलः । १६. अ प्र भ–०वः शूरा । १७. रा२ फ म–चतुर्दश सहस्राणि रक्षसां भीमकर्मणां । त्रिशिराश्च महावीर्यो यत्र बाणैरजिह्मगैः ॥ १८. रा२ फ म–पर्णशाला तथैवैषा दृश्यते चारुलोचने । १९. रा२ फ म–प्रमथ्यापहृता पुरा ॥

अत्र शूर्प-णखा[1] रौद्री[1] राक्षसी समुपाऽऽगमत्[2] ।
३५] यत्राऽस्याः कर्णनासौष्ठं छिन्नवान् देवि लक्ष्मणः ॥[3]४७॥[N
३६पू] एषा गोदावरी रम्या प्रसन्न-सलिला[4] शुभा[4] ।
N] एष प्र-स्रवणः शैलो बहु-कन्दर-निर्झरः ॥[5]४८॥[N
३६उ] अ-गस्त्यस्याऽऽश्रमश् चैव दृश्यते[6] कदली-वृतः ।[7] [४६उ
दृश्यते[8] चैव वैदेहि[8] शरभङ्गाऽऽश्रमो महान् ।[6]
३७] उपाऽऽयातः सहस्राऽक्षो यत्र शक्रः पुरं-दरः ॥४९॥ [४८
एते ते तापसाऽऽवासा[9] दृश्यन्ते तनु-मध्यमे ।
३८] अत्रिः कुल-पतिर् अत्र सूर्यवैश्वानरोपमः[10] ॥५०॥
अन्-असूया त्वया दृष्टा पत्नी तस्य महाऽऽत्मनः । [५०
N] यस्याः सकाशात् प्राऽऽप्तं तद् दिव्यं गात्र-विभूषणम् ॥५१[11]॥[N
३९पू] अस्मिन् देशे महा-कायो वि-राधो नि-हतो मया ।
N] असौ सु-तनु शैलेन्द्रश् चित्र-कूटः प्र-काशते ॥[12]५२॥[५१पू
एषा मन्दाकिनी पुण्या नदीऽयं विमलोदका । [४९
४२] पितुर् निर्-वापणं यत्र मया मूल-फलैः कृतम् ॥५३।[13][N
दृश्यते चैव वैदेहि चित्रकूटशिलोच्चयः[14] ।[15] [N
४१] अत्र मां कैकयी-पुत्रः प्र-सादयितुम् आ-गतः ॥५४[16]॥[५१उ
पुरो-हितो वसिष्ठश् च वाम-देवश् च कश्य-पः[17] । [N
N] नागरश् च जनः सर्वः प्र-सादयितुम् आ-गतः ॥५५[18]॥[५५उ
४३पू] एषा सा यमुना रम्या दृश्यते यत्र[19] काननम्[19] ।[18] [५२
N] दृश्यते ह्य् अत्र[20] वैदेहि वाल्मीकेर् आ-श्रमो महान् ॥५६[21]॥[N
४३उ] भरद्वाजाऽऽश्रमः श्री-मान्[22] दृश्यते चैव मैथिलि[22] । [५३

---

१. भ-०खा रौद्रा । रा२ फ म-शूर्पणखी रौद्री । २. रा२ फ म-मामु० । ३. रा२ फ म-यस्याः कर्णौ च नासां च चकर्त भुवि लक्ष्मणः ॥ ४. रा२ फ म-नदी पंचवटीं प्रति । ५. भ-नास्ति ॥ ६. रा२-नास्ति । ७. अतः परमधिकः पाठः—फ म-अगस्त्यभ्रातुरपरस्त्वाश्रमः प्रतिदृश्यते । ८. फ म-वैदेहि दृश्यते चासौ ॥ ९. रा२ फ भ-तापसा देवि । १०. रा२ फ-०नरप्रभः । म-वैश्वानरसमप्रभः । ११. भ-नास्ति । १२. भ-अत्र सीते त्वया दृष्टा तापसी धर्मचारिणी । १३. भ-दृश्यते चैव वैदेहि मुनेरत्रेर्महाश्रमः । यस्यासीदंगरागस्ते दत्तः पत्न्याऽनसूयया ॥ १४. रा१ ल१ ल२ ब अ रा२-विंध्यकू० । १५. फ म-नास्ति । १६. प्र-नास्ति ॥ १७. भ-काश्यपः । १८. प्र फ म-नास्ति ॥ १९. भ-चित्रकानना ॥ २०. फ म-एष । २१. भ-नास्ति ॥ २२. फ म-ह्येष प्रयागमभितः शिवः ।

इयं च दृश्यते सीते गङ्गा त्रि-पथ-गा नदी ॥[1]५७॥[५४पू
४४] शृङ्गवेर-पुरं रम्यं[2] गुहो[3] यत्र सखा मम[3] । [५५उ
N] द्वितीयां यत्र रात्रिं[4] वै[4] सु-मन्त्रेण[5] सहाऽवसम्[6] ॥[7]५८॥[N
इङ्गुदी-मूलम् एतच् च दृश्यते तनु-मध्यमे ।
४५] एकरात्रोषिता यत्र तीर्त्वा भागीरथीं वयम् ॥५९[8]॥[N
एषा सा दृश्यते सीते सरयूर् यूप-मालिनी[9] ।
N] नाना-तरु-लताऽऽकीर्णा सम्प्रपुष्पित-पादपा ॥६०[10]॥[५६
एषा सा दृश्यते सीते राज-धानी पितुर् मम ।
४६] अयोध्यां कुरु वैदेहि प्र-णामं पुनर् आ-गता । [५७
N] जनन्यो मे स्थिता यत्र पौराश् च वश-वर्तिनः ॥[11]६१॥[N
ततस् ते वानराः सर्वे राक्षसाः स-विभीषणाः ।
४७] उत्-पत्योत्-पत्य सं-हृष्टास[12] तां पुरीं ददृशुस् तदा[12] ॥६२॥[५८
ततस् तु तां पाण्डुर-हर्म्य-मालिनीं[13]
विशाल-रथ्याऽऽपणगोपुरैर्[14] वृताम्[14] ।
पुरीम् अपश्यन्[15] प्लव-गाः स-राक्षसाः[15]
N] पुरन्दरस्येव[16] यथाऽमरावतीम्[16] ॥६३॥ [५९

इत्यार्षे रामायणे युद्ध-काण्डे[17] रामाऽऽख्यापिको[17] नाम
चतुरुत्तरशततमः सर्गः ॥ १०४ ॥

---

१. फ म—दृश्यते देवि गंगैषा नदी त्रिपथगा शुभा । अतः परमधिकश्च पाठः—यमुना च महाभागा सान्निध्यं च तदुत्तमम् ॥ २. फ म भ—चैव । ३. फ म—गुहस्य भवनं शुभं । ४. रा२—तां रात्रिं । ५. फ म—वर्जं—सौमित्रेण । ६. प्र—यथाव० । ७. भ—नास्ति ॥ ८. फ म—नास्ति ॥ ९. रा१ ल१ ल२ रा२ फ—यूथमा० ।१०. ब भ—नास्ति ॥ ११ फ म—नास्ति ॥ १२. फ म—ददृशुस्तां पुरीं शुभकाननां ॥ १३. रा२—पांडर० । १४. फ म—वर्जं—०ध्वजां गजवाजिभिर् । फ—०गोपुरायुतां । १५. फ म—अयोध्यां ददृशुः प्लवंगमाः । १६. फ म भ—पुरीं महेंद्रस्य यथामरावतीं ॥ १७. प्र—लंकाकांडे रा० । रा१ ल१ ल२ ब अ—आभ्युदयिके रामप्राप्तिर् । भ—लंकाकाण्डे अयोध्याप्रत्यागमनं ॥

अथैवं [१]कथयन्न् एव सीतायै रघु-नन्दनः । [N]
१] भरद्वाजस्य सम्प्राऽऽपद् आ-श्रमं स महा-मुनेः ॥१ [१]॥
२पू] पूर्णे चतुर्-दशे वर्षे पञ्चम्यां[२] भरताऽग्रजः[२] । [१
N] फाल्गुनस्य सिते पक्षे राघवः पुनर् आ-गतः ।[३] [N
२उ] भरद्वाजम् उपाऽऽगम्य प्र-णम्योवाच राघवः ॥[४]२ ॥ [२पू
३पू] श्रुतं भग-वता किं-स्विन्[५] मत्-प्रजानाम् अन्-आमयम् ।[६] [N
N] शृणोषि कच्-चिद्[७] भग-वन् सु-भिक्षं वि-षये मम ।[८]
३उ] कच्-चिच्[९] च भरतो युक्तो[९] जीवन्त्य् अपि च मातरः ॥३ ॥ [२उ
एवम् उक्तो भरद्वाजो राघवं प्रत्य्-अभाषत ।
४] शृणु वत्स यथा-तत्त्वं भरतस्य वि-चेष्टितम् ॥४ ॥ [३
जटिलो[१०] मल-दिग्धाऽङ्गो[१०] भरतस् त्वाम् उद्-ईक्षते[११] ।
५] पादुके ते[१२] पुरस्-कृत्य सर्वत्र कुशलं गृहे ॥५ ॥ [४
६पू] यत्[१३] पुरा चीर-वसनं त्वां[१४] दृष्ट्वा वन-वासिनम्[१४] ।
N] स्त्री-तृतीयं च्युतं राज्याद् अभि-षेकाच् च केवलात् ॥६ ॥ [५
पदातिनम् अ-पेताऽर्थं पितुर् वचन-कारिणम्[१५] ।
N] सर्वान्[१६] भोगान् परि-त्यज्य[१६] स्वर्ग-च्युतम् इवाऽमरम् ॥७ ॥ [६
६उ] कारुण्यम्[१७] अभवद् भूयो ममेह[१७] समितिं-जय ।
N] कैकेय्या बाधितं[१८] वीऽऽक्ष्य वन्यमूलफलाऽऽशिनम्[१९] ॥८ ॥ [७
तत् सम्प्रति समृद्धाऽर्थं सम्-इद्धम् इव पावकम् ।
७] सम्-ईक्ष्य[२०] विजिताऽरिं[२१] त्वां मम प्रीतिर् अन्-उत्तमा ॥९ ॥ [८

---

१. फ म–नास्ति ॥ २. म–पंचदश्यां रघूत्तमः । भ–०म्यां लक्ष्मणाग्रजः । ३. फ–वर्जं—नास्ति । ४. फ म–भरद्वाजाश्रमं प्रेक्ष्य ववंदे नियतो मुनिं ॥ ५. रा२–किंचिन् । भ–कच्चित् । ६. फ–सत्कृतो विधिवत्तेन भरद्वाजमथाब्रवीत् । म–नास्ति । ७. फ–वर्जं—कश्चिद् । ८. भ–नास्ति । ९. रा१ ल१ ल२ ब अ प्र–कश्चिच्च भरतो राज्ये ॥ १०. फ म–मलपंकजटाधारी । ११. फ म–अवेक्षते । १२. रा१ ल१ ल२ ब अ प्र रा२ भ–स ॥ १३. फ म–त्वां । १४. फ म–महारण्यनिवा० ॥ १५. फ–०कारकं । १६. फ म–सर्वभोगैः परित्यक्तं । भ–सर्वभोगान्परित्यज्य ॥ १७. रा१–०वद् भूयो मुमोह । फ–बभूवाकारणं राज्यं भवतः । म–बभूव कारणं पूर्वं मत्स्वैहि । १८. रा१ ल१ ल२ ब अ प्र रा२–याचितं । म–वासितं । भ–यापितं । १९. फ म–वर्जं--वने मूल० ॥ २०. रा२–सांप्रतं । २१. फ म–निहता० ॥

तव[1] सर्वं सुखं दुःखं[1] विदितं मम राघव[1] । [९
८] यत्[2] त्वया वि-मलं प्राऽऽप्तं[3] जन-स्थाने[4] महद् यशः[4] ।।[5]१०।।
ब्राह्मणाऽर्थे नि-युक्तेन रक्षता सर्व-तापसान् ।[6] [१०
९] मारीच-दर्शनं[7] चैव सीताया[8] हरणं तथा[8] ।।११[9]।[११उ
कबन्ध-दर्शनं चैव पम्पाया दर्शनं तथा ।[9]
१०] सु-ग्रीवेण[10] च[10] सख्यं च यत्र[11] वाली हतस्[11] त्वया ।।१२।। [१२
मार्गणं चाऽपि[12] वैदेह्याः कर्म वाताऽऽत्मजस्य च ।
११] विदितायां च सीतायां[13] नल-सेतुर् यथा कृतः ।।[14]१३।।[१३
यथा च दीपिता लङ्का प्र-हृष्टैर् हरि-यूथपैः । [१४पू
१२] यथा च नि-हते तस्मिन् रावणे लोक-कण्टके[15] ।।१४[15]।[१५पू
विभीषणाऽभिषेकं[15] च सत्-कारं[16] रावणस्य च ।[17] [N
१३] समा-गमश् च त्रि-दशैर् यथा[18] दत्तो वरश् च तैः[18] ।।१५।। [१५उ
अहम् अप्य् एष ते राम ददामि वरम् ईप्सितम् ।[19]
१४] वसाऽर्घं[20] प्रति-गृह्णीष्व[20] श्वश् चाऽयोध्यां गमिष्यसि ।।१६।। [१७
तस्य तच् छिरसा वाक्यं प्रति-गृह्य च[21] राघवः ।
१५] बाढम्[22] इत्य् एव सं-हृष्ट[23] इमं[23] वरम् अयाचत ।।१७।।[१८
अ-काले फलिता वृक्षाः सर्व-तश्[24] च मधु-च्युतः[24] ।
१६] भवन्तु भग-वन् नित्यं वानराणां वरो[25] मम ।।[26]१८।।[१९

---

१. रा१-तत्सर्वं सु० । फ म-सर्वं च सुखं दुःखं ते । भ-सर्वं हि सु० ॥ २. प्र-नास्ति । ३. म-यशस्ते विपुलं प्राप्तं । भ-०य। विपुलं प्राप्तं । ४. म-०स्थानवधात्कृतं। भ-०ने वधाद्यशः । ५. फ-नास्ति ॥ ६. म-०र्थेन युक्तस्य निघ्नतः सर्वराक्षसान् । अतः परमधिकः पाठः—भ-रावणेन हृता सीता बभूवेयमनिन्दिता। ७. रा१ ल१ ब अ प्र-०चेर्द० । ल२ रा२-०ची द० । म-०चधर्षणं । ८. भ-सीताप० । म-सीतार्थे तद्वने तदा ॥ ९. ल१ ल२ ब-नास्ति । १०. प्र-०वेणापि । फ-०ण तथा। ११. फ म-स च वालिवधस् । भ-यथा वा० ॥ १२. प्र-चैव । १३.म-वैदेह्यां । १४. प्र-नास्ति ॥ १५. फ म भ-देवकं० ॥ १६. भ-०कश्च सत्कारो । १७. प्र म-नास्ति । १८. म-सर्वैर्दत्तो वरश्च ते । भ-तथा दत्तवराश्च ते ॥ १९. फ-ददामि तेऽहमप्यद्य वरं सत्यपराक्रम । म-प्रददामि तेऽहमपि वरं सत्यपराक्रम । भ-अहमप्यद्य ते राम द० । २०. रा१-त्वत्सकाशं प्र० । ल१ ल२ ब अ प्र रा२-तत्साक्षं प्र० । फ म-अर्घं च प्रतिगृह्णीष्व ॥ २१. भ-तु । २२. ल२-धाराम् । २३. भ-तत्सर्वमिदं ॥ २४. प्र-पर्वताश्च म० । फ म-सर्वे चापि मधुच्यवाः । २५. भ-कृते । २६. फ म भ-भवन्तु मार्गे भगवन्नयोध्यां प्रतिगच्छतः ॥

निष्-फलाः सन्तु स-फला अ-पुष्पाः[1] पुष्प-शोभिताः[1] ।
१७] शुष्काश् चैव स-पत्राश् च[2] स्रवन्तु मधु चोत्-तमम्[2] ॥१९॥ [२१
रामेणोद्-ईरितं[3] श्रुत्वा भरद्वाजो महा-तपाः ।
१८] एवम् अस्त्व् इति चोवाच वरस् ते भुवि दुर्-लभः ॥२०॥ [N
मत्-प्रसादाद्[4] रघु-श्रेष्ठ भविष्यति न सं-शयः ।
१९] वरं लब्ध्वा तु सु-प्रीतो निशां तां सुखम् आऽवसत् ॥२१[5]॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे[6] भरद्वाजाऽऽश्रम-निवासो[7] नाम
पञ्चोत्तरशततमः सर्गः ॥ १०५ ॥

[वं-१०६]= [षडुत्तरशततमः सर्गः] =[दा-१२८]

२०पू] अथ[8] रात्र्यां[9] व्य्-अतीतायां[9] सूर्यस्योद्-अयनं प्रति । [N
N] अयोध्यां स्वां पुरीं दृष्ट्वा चिन्तयामास राघवः ॥[10]१ ॥ [१पू
N] काल-तत्त्व-प्रभाव-ज्ञो[11] भ्रातरं भरतं प्रति ।
२०उ] चिन्तयित्वा ततो दृष्टिं वानरेषु न्य्-अपातयत् ॥२ ॥ [N
प्रिय-कामं हितं[12] रामस् ततस् त्वरित-विक्रमम्[13] । [N
२१] मति-मन्तं हनू-मन्तम् इदं वचनम् अब्रवीत् ॥३ ॥ [१उ
एहि मत्-प्रहितो याहि त्वम् अयोध्यां वने-चर ।[14] [N
२२] कुशलं भरतं ब्रूहि राज-पुत्रं यशस्विनम् ।[15] [N
जानीहि कुशलं कच्-चिद्[16] इक्ष्वाकु-कुल-मन्दिरे ॥४ ॥ [२
२३] शृङ्गबेर-पुरं प्राऽऽप्य[17] गुहं गहन-चारिणम्[18] ।
ब्रूया निषादाऽधिपतिं कौशल्यं[19] वचनान् मम ॥५ ॥ [३

---

१. फ-ह्यपुष्पाः पुष्पशालिनः । म-०ष्पशालिनः । ल१ प्र भ-०भिनः । २. फ म-स्युः स्र० । भ-ते स्रवेयुश्च मधूत्तमं ॥ ३. फ भ-०णोदाहृतं ॥ ४. फ-वरदानाद् । ५. म-नास्ति ॥ ६. ब प्र भ-लंकाकांडे । फ म-आभ्युदयिके । ७. रा१ ल१ ल२ ब अ प्र रा२-०द्वाजसमागमो । फ-आभ्युदयिके भरद्वाजाश्रमगमनं । म-०श्रमदर्शनो ॥ ८. रा१ ल१ ल२ ब अ प्र भ-तस्यां निशि । ९. भ-प्रभातायां । १०. भ-नास्ति ॥ ११. रा१ ल१ ल२ ब अ प्र-०त्रयविभावज्ञो । म-कालतत्त्ववि० । भ-०त्रयविभागज्ञो ॥ १२. रा२ फ-प्रियं । १३. म-०क्रमः ॥ १४. रा२ फ-अयोध्यां त्वरितो गच्छ त्वरितं वनगोचर । म-अयोध्यां त्वरितो गच्छ त्वमितो वनगोचर । १५. रा२ फ म-नास्ति । १६. भ-वर्जे—किंचिद् ॥ १७. रा१ ल१ ल२ ब अ प्र-रम्यं । १८. रा२ फ-०नगोचरं । म-गगनगोचरम् । १९. रा१ ल१ ल२ ब अ प्र भ-कुशलं ॥

२४] श्रुत्वा हि मां कुशलिनं स्वस्ति-मन्तं[१] गत-ज्वरम्[१] ।
भविष्यति गुहः प्रीतः स ममाऽऽत्म-समः सखा ॥६ ॥ [४
२५] पश्य[२] हि त्वम्[२] अयोध्यायाः प्र-वृत्तिं भरतस्य च । [५पू
वेदयिष्यति ते प्रीतो वाच्यश् च भरतस् त्वया ॥७ ॥
२६] कुशली[३] सर्वसिद्धाऽर्थः स-भार्यः सह-लक्ष्मणः । [६
सह राक्षस-राजेन हरीणाम् ईश्वरेण च ॥[४]८॥ [११उ
२७] जित्वा शत्रु-गणं रामः प्राऽऽप्य चाऽन्-उत्तमं यशः ।
उपाऽऽयातः[५] समृद्धाऽर्थो राघवः[६] स[६] महा-बलः ॥६[७]॥ [१२
२८] हरणं चाऽपि[८] वैदेह्या रावणेन बलीयसा ।
सुग्रीव-समवायं च वालिनश्[९] च रणे वधम्[९] ॥१०॥ [७
२९] सीताया[१०] मार्गणं[१०] चैव यथा चाऽधि-गता[११] त्वया ।
लङ्घयित्वा महा-वेगम्[१२] आपगा-पतिम्[१३] अ-व्ययम्[१२] ॥११॥ [८
३०] उपाऽयनं सम्-उद्रस्य[१४] सागरस्य च[१५] लङ्घनम्[१५] ।
यथा तत्र[१६] कृतः[१६] सेतू रावणश् च यथा हतः ॥१२॥ [९
३१] वर-दानं महेन्द्रेण ब्रह्मणा वरुणेन च ।
वैवस्वत-प्रसादेन[१७] पित्रा च[१८] मम सं-गमम्[१८] ॥१३॥ [१०
३२] एतच् छ्रुत्वा समा-चारं[१९] भरतो यद् वदेन्[१९] मयि[२०] ।
तच्[२१] च(?चाऽऽ)वेदयितव्यं[२१] स्यात्[२२] समा-गत्य महा-मते[२२] ।१४[१२
२३] ज्ञेयाः सर्वे च वृत्ताऽन्ता[२३] भरतस्येङ्गितानि च ।

---

१. रा१ ल१ ल२ ब अ प्र-अरोगं विग० । २. रा२ फ म-पंथानं चाप्य् ॥ ३. रा२ फ म-कौशल्यं । ४. रा२ फ-परिपृच्छति रामस्त्वां पश्चाद्वाक्यं यथार्थकम् । म-नास्ति ॥ ५. म भ-०याति । ६. म-सह भृत्यैर् । ७. फ-नास्ति ॥ ८. रा२ फ-चैव । ९. रा१ ल१ ल२ ब अ प्र-०नोऽरण्यके वधः ॥ १०. रा२ फ म-सीतामन्वेषणं । ११. भ-वर्जं—वाधि० । १२. रा१ ल१ ल२ ब अ प्र-महातोयं । १३. भ-०गाधिपतिं तदा ॥ १४. रा२ फ म-च सैन्यस्य । रा१ अ प्र-समृद्धस्य । १५. रा२-विभीमतां । फ म-च भीमतां । १६. रा२ फ म-च कारितः ॥ १७. रा२ फ म-०सादाच्च । भ-०दं च । १८. रा१ ल१ ल२ ब अ-च मम संगमः । रा२ फ-मम समागमः । म-सह समागमः । भ-मम च संगतिः ॥ १९. रा१ अ प्र भ-०रं भरतो यद्वदेत् । म-यथावाचं चरेत न कुतो । २०. रा१ ल१ ल२ ब अ प्र भ-त्वयि । २१. रा२ फ म भ-तथावे० । २२. रा२ फ म-वर्जं—तु मम चात्र महद्यशः । भ-ते मम प्रति महायशः ॥ २३. रा१ ल१ ल२ ब अ प्र-तृप्यन्ता ।

सत्त्वेन[1] मुख-वर्णेन दृष्ट्या चाऽऽभाषितेन च ॥१५॥ [१४
३४] सर्व-काम-समृद्धं हि हस्त्य्-अश्व-रथ-सङ्कुलम् ।
पितृ-पैतामहं राज्यं कस्य नाऽऽवर्तयेन् मनः ॥१६॥ [१५
३५] सं-भूत्या भरतः श्री-मान् राज्येनाऽर्थी[2] भवेद्[2] यदि ।
प्र-शास्तु वसु-धां[3] सर्वां चिराय[4] रघु-नन्दनः ॥१७॥ [१६
३६] तस्य बुद्धिं च वि-ज्ञाय व्यव-सायं च वानर ।
यावन् न दूर-याताः स्म क्षिप्रम् आ-गन्तुम् अर्हसि ॥[5]१८॥ [१७
३७] न तस्यैवं-विधं चित्तं[6] भूत-पूर्वं[6] कदा-चन ।
प्र-कृतिर् नीति-शास्त्राणां येनैव[7] क्रियते मया[7] ॥१९[8]॥ [N
३८] कामान्[9] न स[10] नर-व्याघ्रः कृतां सं-स्थाम् अति-क्रमेत् ।
न स्व-मार्गात्[11] तु वि-चलेद् धर्मो मानुष-विग्रहः ॥२०॥ [N
३९] हृदयेनाऽभि-जानामि भरतस्य तु[12] हृद्-गतम्[12] ।
मन्-निमित्तम् अपि प्राणांस् त्यजेन् नाऽस्त्य् अत्र सं-शयः ॥२१॥ [N
४०] न चाऽस्ति सु-कृते[13] दोषः[14] कृते चैव[14] गवेषणे । [N
४१पू] इति प्रतिसमा-दिष्टो हनू-मान् मारुताऽऽत्मजः ॥२२॥ [१८पू
अथोत्-पपात वेगेन बल-वान् कपि-कुञ्जरः ।
N] गरुत्-मान्[15] वेग-सम्पन्नो जिघृक्षुर् इव पन्न-गम् ॥२३[16]॥ [१९
४१उ] गङ्गा-यमुनयोः सं-गं[17] नमस्-कृत्य[18] महा-बलः[18] ।
लङ्घयित्वा त्रि-पथ-गां भुजगेन्द्राऽऽलयां शुभाम् । [२०
४२] मानुषेणाऽथ[19] रूपेण[19] शृङ्गबेर-पुरं ययौ ॥[20]२४॥ [१८उ
शृङ्गबेर-पुरं प्राऽऽप्य गुहम् आ-साद्य वीर्य-वान् ।[21]
४३] वाचा च शुभया हृष्टो[22] हनू-मान् इदम् अब्रवीत् ॥२५॥ [२१

---

१. भ—शांतेन ॥ २. रा१ ल१ ल२ ब अ प्र—०नार्थे पतेद् । ३. रा२ म—पृथिवीं । ४. रा२ फ म—अखिलां ॥ ५. रा२ फ म—०रमायातास्तावत्तूर्णमुपाव्रज ॥ ६. रा१ ल१ ल२ ब अ प्र—छिद्रं । ७. रा१ ल१ ल२ ब अ प्र—येनांधीक्रियते नृणां । ८. रा२ फ म—नास्ति ॥ ९. भ—कामं । १०. भ—वर्ज—तां । ११. भ—वर्ज—स मा० ॥ १२. भ—वर्ज—सुहृद्० ॥ १३. रा१ ल१ ल२ भ—स्वकृतो । ल२ ब—सुकृतो । १४. भ—दोषोऽदोष एव ॥ १५. रा२ फ म—गरुडो । १६. भ—नास्ति ॥ १७. रा१ ल१ ल२ ब अ प्र—संगे । रा२ फ म—भीमं । १८. रा२ फ म—सन्निपातं महार्णवं । १९. भ—०नुषं धारयन्रूपं । २०. रा२ फ म—नास्ति ॥ २१. म—नास्ति । २२. रा२ फ म—वीरो ॥

सखा यस्[1] तव काकुत्स्थो रामः सत्य-पराऽऽक्रमः ।
४४] सह-सीतः स-सौमित्रिः स त्वां कौशल्यम् अब्रवीत् ॥[2]२६॥[२२
गुहस् तद्[3] वचनं श्रुत्वा[4] दृष्ट्वा[4] परम-हर्षितः ।
४५] हर्ष-गद्गदया[5] वाचा पप्रच्छ गत-सम्भ्रमः ॥२७[6]॥ [N
क्व स रामः क्व वैदेही धृति-मान् क्व च लक्ष्मणः ।
४६] ह्लादितोऽस्मि[7] त्वयाऽत्य्-अर्थं घनौघेनेव[8] मेदिनी[9] ॥[10]२८॥[N
४७पू] ततस् तु[11] हनू-मांस् तस्य यथा-तथ्यं[12] न्य्-अवेदयत् ।
N] भरद्वाजाऽऽश्रमे रामः स-सीतः सह-लक्ष्मणः ॥२९[10]॥[N
४७उ] स ह्यऽमां रजनीम् अद्य उषितो[13] वचनान् मुनेः ।[14]
भरद्वाजाऽभ्यनुज्ञात इहाऽऽगन्ता न संशयः ॥[15]३०॥[२३
४८] एवम् उक्त्वा महा-तेजा हनू-मान् मारुताऽऽत्मजः ।
अथोत्-पपात वेगेन वेग-वान्[16] अ-विचारयन्[16] ॥३१॥ [२४
४९] सोऽपश्यद्[17] राम-तीर्थं[17] च नदीं शालूकिनीं[18] तथा ।
पौरुषीं[19] गो-मतीं चैव भीमं साल-वनं तथा ॥[20]३२॥[२५
५०] स गत्वा दूरम्[21] अध्वानं महाऽऽत्मा कपि-कुञ्जरः ।
आ-ससाद द्रुमान् फुल्लान् नन्दिग्राम-समीपगान्[22] ॥३३॥ [२६
५१] क्रोश-मात्रे त्व् अयोध्यायाश् चीर-कृष्णाऽजिनाऽम्बरम्[23] ।
ददर्श[24] भरतं दीनं कृशम् आश्रम-वासिनम् ॥३४॥ [२८
५२] जटिलं मल-दिग्धाऽङ्गं भ्रातृ-व्यसन-कर्षितम्[25] ।

---

१. रा२ फ म भ–वै । २. रा१ ल१ ल२ ब अ प्र भ–अब्रवीत्कुशलं वीरः ससीतस्सहलक्ष्मणः ॥ ३. भ–तु । ४. भ–तस्य श्रुत्वा । ५. रा१ ल१ ल२ ब अ प्र–हर्षगद्ग० । ६. रा२ फ म–एवमुक्तस्तु सुप्रीतः संपरिष्वज्य तं कपिं । हर्षेण महताविष्टः सस्वरः पर्यपृच्छत ॥ ७. रा२ फ–आह्ला० । ८. रा२ फ–जलौघे० । म–जलौघेन च । ९. म–पर्वतः । १०. रा१–नास्ति ॥ ११. रा२ फ म–स । १२. रा२ फ–०तत्त्वं । म–यथासंख्यं ॥ १३. रा१ ल१ ल२ ब अ प्र–उषित्वा । १४. म–नास्ति । १५. रा२ फ म–वर्जं—०ज्ञातं द्रक्ष्यस्यद्यैव राघवं ॥ १६. रा२ फ–बलवानवि० । म–बलवानवधारयन् ॥ १७. रा२ फ म–पश्यन्रामस्य तीर्थं । १८. म–साफल्निीं । भ–शालु० । १९. अ प्र–पारुषीं । रा२ फ म–जाह्नवीं । भ–पौरुधिं । २०. अतः परमधिकः पाठः—रा२ फ–तमसां च व्यतिक्रम्य ययौ वायुसुतो बली ॥ २१. म–दीर्घम् । २२. रा२ फ भ–०पतः ॥ २३. रा२ फ म–कृतचीराजिनांबरं । २४. प्र–ददृशे ॥ २५. रा२ फ म–०कर्शितं ।

N] फलमूलाऽऽशिनं दान्तं[1] तापसं धर्म-चारिणम् ॥[2]३५॥[२९
समुन्नद्ध-जटाभारं चीर-वल्कल-धारिणम्[3] ।
N] नि-यतं भाविताऽऽत्मानं देवब्रह्मर्षि-सम्मतम् ॥३६॥[३०
पादुके तु[4] पुरस्-कृत्य पालयन्तं[4] वसुं-धराम् ।
५३] चातुर्वर्ण्यस्य लोकस्य[5] त्रातारं सर्व-तो भयात् ॥३७॥[३१
उप-स्थितम् अमात्यैश् च शुचिभिश्[6] च पुरो-हितैः ।
५४] बल-मुख्यैः[7] सु-युक्तैश्[7] च काषायाऽम्बर-धारिभिः[8] ॥३८॥[३२
न हि ते राज-पुत्रं तं चीर-कृष्णाऽजिनाऽम्बरम्[9] ।
५५] परि-त्यक्तुं व्यव-स्यन्ति पौरा वै पौर-वत्सलम् ॥३९॥[३३
तं धर्मम् इव धर्म-ज्ञं दहन्तम्[10] इव पावकम्[10] ।[11] [३४पू
५६] राम-चिन्ता-परिद्यूनं[12] पितृ-दुःख-समाकुलम्[12] ॥४०॥[N
उपाऽऽगम्य[13] हनू-मांस् तु भरतं धर्म-चारिणम् । [N
५७] अब्रवीत् प्राऽञ्जलिर् वाक्यम् इदं[14] प्लवग-सत्तमः[14] ॥४१॥[३४उ
वसन्तं दण्डकाऽरण्ये यं त्वं चीर-जटा-धरम्[15] ।
५८] अनु-शोचसि काकुत्स्थं स त्वां कौशल्यम्[16] अब्रवीत् ॥४२॥[३५
प्रियम् आ-ख्यामि ते देव शोकं[17] त्यक्ष्यसि दारुणम्[17] ।
N] अस्मिन् मुहूर्ते रामेण भ्रात्रा ज्येष्ठेन[18] सं-गतः ॥४३॥[३६
नि-हत्य रावणं रामः प्रति-लभ्य च मैथिलीम् ।
५९] उपाऽऽयातः समृद्धाऽर्थः सह मित्रैर् महा-बलैः । [३७
६०पू] लक्ष्मणश् च महा-तेजा वैदेही च यशस्विनी[19] ॥४४॥
N] सीता समेता रामेण महेन्द्रेण यथा शची । [३८

---

१. फ-श्रांतं ॥ २. म-अत आरभ्य ४१-शश्लोकस्य पूर्वार्धं यावन्नास्ति ॥ ३. भ-०ल्कवाससं ॥ ४. रा$_2$ फ-ते पुरस्कृत्य प्रशासंतं । ५. रा$_2$ फ-सर्वस्य ॥ ६. रा$_2$फ-बहुभिश् । ७. रा$_2$ फ भ-०ख्यैश्च यु० । ८. फ-कृपाणवर० ॥ ९. रा$_2$ फ-वर्जं—काषायांबरधारिणं ॥ १०. रा$_2$ फ-देहवन्तमिवामरं । ११. अतः परमधिकः पाठः—भ-वर्जं—न हि ते नगरे पौराः सुखानि परिभुंजते । १२. रा$_2$ फ-०धूतं पितुर्व्यसनकर्शितं । भ-०परिक्लांतं पितृ० ॥ १३. रा$_2$ फ भ-उपगम्य । १४. रा१ ल१ ल$_2$ ब अ प्र-इति ह्ल० । रा$_2$ फ-हनुमान्पवनात्मजः । म-हनुमान्मारुतात्मजः ॥ १५. रा$_2$-वर्जं—वीर ज० । १६. रा१ ल१ ल$_2$ ब अ प्र-कुशलम् ॥ १७. रा$_2$ फ म-जहि शोकं सु० । १८. रा$_2$ फ म-नाथेन ॥ १९. रा१ ल१ ल$_2$ ब अ प्र-तपस्विनी ॥

६०उ] नन्दिष्यसे[1] महा-बाहो सु-वर्षेणेव[2] कर्षकः ॥[3]४५॥[N
स[4] त्वम्[4] उत्-तिष्ठ भद्रं ते पश्य भ्रातरम् आ-गतम् ।
६१] वि-जित्य[5] लोकांस् त्रीन् विष्णुः सहस्राऽक्षम् इवाऽऽगतम् ॥[6]४६॥[N
एतत् तु दृश्यते दूराद् धर्म्य-युक्तं मनो-जवम् ।
६२] तरुणाऽऽदित्य-सङ्काशं वि-मानं राम-वाहनम् ॥४७[7]॥[N
एवम् उक्तो हनू-मता[8] भरतः कैकयी-सुतः ।
६३] उत्-पपाताऽऽसनात्[9] तूर्णं[9] हर्षान् मोहं जगाम च ॥४८[10]॥[३९
ततो मुहूर्ताद् उत्था(द्-स्था)य प्रत्या-श्वस्य[11] च राघवः[11]।
६४] प्रत्य्-उवाच[12] हनू-मन्तं भरतः प्रिय-वादिनम् ॥४९॥ [४०
अशोक-जैः प्रीति-मयैः[13] प्रियं[14] प्राऽऽप्य स-सम्भ्रमम्[14] ।
६५] सिषेच[15] कपि-मुख्यस्य गात्रम् एवाऽस्रु-बिन्दुभिः ॥५०॥ [४१
देवो वा मानुषो[16] वा त्वम् अनु-क्रोशाद्[16] इहाऽऽगतः ।
६६] प्रियाऽऽख्यानस्य[17] ते सौम्य[17] ददामि वद[18] किं प्रियम्[18] ॥५१॥ [४२
गवां शत-सहस्राणि[19] ग्रामाणां च शतानि[20] वै[20] ।
६७] स-कुण्डलाः[21] शुभाऽऽचारा[21] भार्या[22] धन्याश् च[22] षोडश॥५२॥ [४३
दासी-शत-परीवाराः शशि-सौम्याऽऽननाः स्त्रियः ।
६८] सर्व-लक्षण-सम्पन्नाः सं-पन्नाः कुल-जातिभिः ॥५३[23]॥[४४
६९पू] सु-वर्णस्य सहस्रे द्वे दासीनां च शतं तथा ।[23]
N] हिरण्य-कोट्यो रत्नानि वस्त्राणि वि-विधानि च ।[24]
६९उ] यद् वाऽन्यन् मन्यसे सौम्य तच् च सर्वं ददानि[25] ते ॥[26]५४॥ [N

---

१. प्र–निर्दिश्यसे । भ–नंदिष्यसि । २. भ–सुवृष्टेनेव । ३. रा₂ फ म–नास्ति ॥ ४. रा१ ल१ ल₂ ब अ प्र भ–क्षिप्रम् । ५. रा₂ फ–निर्जित्य । ६. ब म–नास्ति ॥ ७. रा₂ फ म–नास्ति ॥ ८. रा२ फ–हनु० । ९. रा२ फ–वर्ज–०पात तदा हृष्टो । १०. म–नास्ति ॥ ११. रा१ ल१ ल₂ ब अ प्र भ–भरतो भ्रातृवत्सलः । १२. म–उवाच तं ॥ १३. रा२ फ म–प्रीतिकरैः । १४. रा१ ल१ ल₂ ब अ प्र–प्रीतिमावेद्य संभ्रमैः । भ–प्रियमासाद्य संभ्रमैः । १५. रा१ ल१ ल₂ ब अ–सखेव । प्र–सख्ये च ॥ १६. रा₂ फ म–यदि वा यक्षो ह्यनु० । १७. रा₂ फ म–०ख्यानाच्च ते वीर । १८. म–च मनः प्रि० । भ–ब्रुवतः प्रि० ॥ १९. रा₂ फ म–०हस्रं च । म–०हस्राणां । २०. रा₂ फ म–शतं वरं । २१. रा₂ फ–सकुटुंबाः सहचाराः । म–सकुटुम्बाः शु० । २२. रा₂ फ म–पत्नीश्चैव हि ॥ २३. फ म–नास्ति ॥ २४. भ–नास्ति ॥ २५. रा₂ म–ददामि ॥ २६. फ म–नास्ति ॥

नि-शम्य रम्यं[१] वचनं हनू-मतः
सु-शोभनं[२] शोक-विनाशनं च[२] ॥ [४५पू
उवाच हृष्टो[३] भरतः पृथु-श्रीर्[४]
N] द्रक्ष्येऽचिरस्याऽऽगतम्[५] आयतेक्षणम्[६] ॥५५॥ [N

इत्यार्षे रामायणे युद्ध-काण्डे[७] भरत-विशोकीकरणं[८] नाम
षडुत्तरशततमः सर्गः ॥ १०६ ॥

[वं-११०]= [सप्तोत्तरशततमः सर्गः] =[दा-१२६]

यो बहूनि तु[९] वर्षाणि सुखं हित्वा गतो वनम् ।[१०]
१] तस्याऽद्य[११] प्रीति-जननं[११] श्रुतं[१२] रामस्य कीर्तनम्[१२] ॥[१३]१ ॥[१
२३] कल्याणी बत[१४] गाथेयं लौकिकी[१५] प्रति-भाति मे ।
एति[१६] जीवन्तम् आ-नन्दो नरं[१६] वर्ष-शताद् अपि ॥२ ॥[२
३] एवम् उक्त्वा महा-बाहुर्[१७] भरतः स[१८] महा-यशाः[१८] ।
४पू] पप्रच्छ तं हनू-मन्तं महाऽऽत्मानं प्लवं-गमम्[१९] ॥३ ॥[N
राघवस्य[२०] हरीणां च कथं वृत्तः[२१] समा-गमः ।
N] कस्मिन् देशे किम् आ-श्रित्य[२२] तन् ममाऽऽचक्ष्व तत्त्व-तः[२३] ॥४॥[६
४उ] यच्[२४] च सं-श्रुतवान्[२४] अस्मि वि-ग्रहं रावणं प्रति ।
चारेण सम्प्र-युक्तेन[२५] कृतोद्योगं[२६] रणं प्रति[२७] ॥५ ॥[N

---

१. रा$_2$ फ म-काम्यं । २ रा$_2$ फ म-तदा स शोकापनुदं सुखावहं। ३. रा$_2$ फ-तुष्टो । म-पूर्वं । ४. रा$_2$ फ म-कपिप्रियं। ५. रा$_2$ फ म-चिरस्य द्रक्ष्याम्यहम् । ६. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-०ताक्षं ॥ ७. प्र भ-लंकाकांडे । म-भाभ्युदयिके । ८. रा$_2$ फ-भरतहनुमत्समागमो ॥ ९. म-हि । १०. रा$_2$ फ म-वर्जं—बहूनामपि वर्षाणामिदं श्रुतिरसायनं । ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ-शृणोम्यहं प्रीतिकरं । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-मम नाथस्य कीर्तनम् । भ-यन्नाथस्याद्य दर्शनं । १३. अतः परमधिकः पाठः—भ-अद्य श्रुतिप्रीतिकरं मम नाथस्य कीर्तनम् ॥ १४. फ-वर्जं—तव । १५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र रा$_2$-लौकिका ॥ १६. प्र रा$_2$ भ-वर्जं—पतिं जी० । म-पुनर्जीवन्तमात्मानं न च । १७. रा$_2$ फ म-महातेजा । १८. रा$_2$ फ म-वर्जं—च म० । भ-सुम० । १९. रा$_2$ फ-हरीश्वरं । म-यतः स्वयं ॥ २०. रा$_2$ फ म-रामस्य च । २१. रा$_2$ फ म-आसीत् । २२. रा$_1$ ल$_1$ ल$_2$ ब-आवृत्य । २३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ-पृच्छतः ॥ २४. भ-यद्यपि श्रु० । २५. रा$_1$ ल$_1$ ल$_2$ ब अ-सुप्र० । २६. भ-०द्योगो । २७. प्र-नास्ति ॥

५] त्वयि मे प्रत्य-अयः सौम्य[1] यस् त्वं[1] रामाद् उपाऽऽगतः ।
N] कथं कृताऽर्थः स श्री-मान् राघवः पुनर् आ-गतः ॥[2]६ ॥[N
स पृष्टो राज-पुत्रेण वि-मृश्य[3] कपि-कुञ्जरः[3] ।
६] आ-चचक्षे ततः[4] सर्वं रामस्य चरितं महत्[5] ॥७ ॥[४
यथा प्र-व्रजितो रामो मातुर्[6] दत्ते वरे तव[6] ।
७] यथा च पुत्र-शोकेन राजा दश-रथो मृतः[7] ॥८ ॥[५
यथा दूतैस् त्वम् आ-नीतस् तूर्णं राज-गृहात् प्र-भो ।
८] त्वयाऽयोध्यां[8] प्र-विष्टेन यथा राज्यं च नेप्सितम् ॥९ ॥[६
चित्र-कूटं गिरिं गत्वा राज्येनाऽमित्र-कर्षणः[9] ।
९] नि-मन्त्रितस् त्वया भ्राता धर्मम् आ-चरता सता ॥१०॥[७
स्थितेन वचने राज्ञो न[10] च ते वचनं कृतम्[10] ।
१०] तत्-पादुके त्वम् आ-दाय यथा च पुनर् आ-गतः ॥११॥[८
सर्वम् एतन् महा-बाहो यथा-वद् विदितं[11] तव[11] ।
११] त्वयि प्रति-प्रयाते[12] तु[12] यद् वृतं[13] तन् नि-बोध मे ॥१२॥[९
१२पू] अप-याते त्वयि तदा राघवः[14] सह-लक्ष्मणः[14] ।
N] परि-द्यूनम् अरण्यं तु तद् वनं सम्-अपद्यत ॥[15]१३॥[१०
N] तद्[16] घस्ति-चरितं[16] वीर सिंह-व्याघ्र-मृगाऽऽयुतम् ।
१२उ] निर्-जनं व्याल-सम्पन्नं[17] प्राऽविशद् गहनं[18] वनम् ॥१४॥[११
तेषां पुरस्-ताद् बल-वान् गच्छतां गहने वने ।[19]
१३] राक्षसः[20] सु-महावीर्यो[20] वि-राधः प्रत्य-अदृश्यत ॥१५॥[१२
तं नि-हत्य महा-कायम् ऊर्ध्व-पाश(?द)म्[21] अवाङ्-मुखम्[22] ।

---

१. रा१ ल१ ल२ ब अ प्र–तात कथं । भ–तात यस्त्वं । २. प्र भ–नास्ति ॥ ३. रा१ ल१ ल२ ब अ प्र भ–वृस्यां समुपवेशितः । म–पृष्टा स कथयंति मां । ४. रा२ फ म–वर्ज—तदा । ५. रा२ फ म–वने ॥ ६. रा२ फ म–मात्रे दत्तौ वरौ च तौ । ७. रा१ ल१ ल२ ब अ प्र–हतः ॥ ८. रा२ फ म–अयोध्यायां ॥ ९. रा२–०र्षितः । फ–०कर्मणा ॥ १०. रा२ फ म–यथा राज्यं च नेप्सितं । भ–न ते तेन वचः कृतं ॥ ११ म–वेत्सि तत्त्वतः । १२. रा२ फ–प्रयाते तु तदा ॥ १३. रा१ ल१ ल२ ब अ भ–कृतं ॥ १४. फ म–समुद्विग्नमृगद्विजः । १५. म–परिगम्यमरण्यं स तत्सर्वं समपद्यत । भ–नास्ति ॥ १६. म–स हस्ति० । १७. फ म–०संकीर्णं ॥ १८. भ–दंडके ॥ १९. रा२–नास्ति । २०. रा२ फ म–नर्दमानो महानादान् ॥ २१. रा१ भ–वर्ज—ऊर्ध्वकेशं । म–ऊर्ध्वकायं । २२. रा२ फ म–महाबलं ।

१४] अवटे प्राऽक्षिपद् रामो नदन्तम् इव कुञ्जरम् ॥[1]१६॥[१३
तत् कृत्वा दुष्-करं[2] कर्म भ्रातरौ राम-लक्ष्मणौ ।
१५] सायाऽन्हे शर-भङ्गस्य सम्प्राऽऽप्तौ[3] रम्यम् आ-श्रमम्[3] ॥[4]१७॥[१४
शर-भङ्गे दिवं याते[5] रामः सत्य-पराऽऽक्रमः ।
१६] तांस् तापसान्[6] अर्चयित्वा[6] जन-स्थानम् उपाऽऽगतः[7] ॥१८[8]॥[१५
अगस्त्यम् अभि-वाद्याऽथ परमर्षिम् अरिं-दमः ।
१७] ततः पञ्च-वटीं[9] यातो सीतया सह राघवः ॥१९[10] ॥१९॥[N
ततः शूर्प-णखा[11] नाम भ्रातरौ[12] राम-लक्ष्मणौ[12] ।[13] [१६
१८] आत्म-प्रदान-लोभेन न्य्-अमन्त्रयत राक्षसी ॥[14]२०[15]॥[N
सु-स्मितौ ताव् उभौ कृत्वा ताम् अधर्षयतां[16] तदा ।
१९] कर्णनासाऽपहारेण वि-कृतां विकृताऽऽननाम् ॥२१[17]॥[N
खरं भ्रातरम् आ-साद्य कथयामास[18] राघवौ[18] ।[19] [N
२०] चतुर्दश-सहस्राणि जन-स्थान-निवासिनाम् ।
२१पू] हतानि रक्षसां तत्र हतौ च खर-दूषणौ ॥[19]२२॥[१८
एकेन सह सं-गम्य रणे रामेण राघव ।
अह्नश् चतुर्थ-भागेन निः-शेषा राक्षसाः कृताः[20] । [१९
N] महा-बला महा-वीर्यास् तापसानां भयं-कराः ॥२३[21]॥[२०पू
२१उ] शूर्प-णखा च सा गत्वा रावणं लोक-रावणम् ।[22]
वधस् तेषां समा-ख्यातः सीता चाऽप्रतिमा भुवि ॥२४[23]॥ [N
२२] श्रुत्वा तद् अ-प्रियं घोरं रक्षस् त्रैलोक्य-रावणम् ।
मारीचम् अगमच् छीघ्रं मदनेन समा-हतः ॥२५॥ [N
२३] कथं सीताम् अहं रामात् प्राऽऽमुयां सुहृदां वर ।

---

१. रा$_2$ फ म–संप्राक्षिपेतामवटे नर्दंतमिव कुंजरं ॥ २. म–दुष्कृतं । ३. रा$_2$ फ–रम्यमाश्रममागतौ । म–शुभमाश्रममागतौ । ४. अ–नास्ति ॥ ५. भ–प्राप्ते । ६. रा$_2$–तापसांस्तु पुरस्कृत्य । म–०स्तान् पुरस्कृत्य । ७. रा$_2$ म भ-०गमत् । ८. अ फ–नास्ति ॥ ९. प्र–०टे । १०. अ रा$_2$ फ म–नास्ति ॥ ११. रा$_2$ फ–०णखा । १२. रा फ–राक्षसी घोरदर्शना । १३. अ–नास्ति । १४. रा$_2$ फ–कामरागाभिसंतप्ता लक्ष्मणेन विरूपिता । १५. म–नास्ति ॥ १६. भ–अबोधयतां । १७. रा$_2$ फ म–नास्ति ॥ १८. भ–राघवौतौन्यवेदयत् । १९. रा$_2$ फ म–राममासाद्य नष्टानि खरश्च निहतोऽप्रतः ॥ २०. ल$_1$ ल$_2$–हताः । २१. रा$_2$ फ म भ–नास्ति ॥ २२. भ–शूर्पणख्या तदा गत्वा रावणे लोकरावणे । २३. रा$_2$ फ म–अत आरभ्य ३०-शश्लोकं यावन्नास्ति ॥

त्वयि सं-भावना मेऽस्ति सर्व-कार्येषु राक्षस ॥२६॥ [N
२४] स त्वम् अद्यैव गच्छस्व मृग-रूपी भवाऽग्र-तः ।
सीतायाः काञ्चनो भूत्वा रूप्य-बिन्दु-चितश् चर ॥२७॥ [N
२५] लोभिता सा त्वया व्य्-अक्तं रामं वक्ष्यति भामिनी ।
अहोऽद्भुतम् इदं रूपं मृगस्य भुवि दुर्-लभम् ॥२८॥ [२४
२६] प्राऽऽप्नुयाम् अपि चर्माऽस्य चित्र-रूपं मनो-हरम्[1] ।
सीतायास् तु वचः श्रुत्वा रामस् त्वाम्[2] अभि-यास्यति[2] ॥२९॥ [N
२७] ततोऽप-वाहिते रामे लक्ष्मणे चाऽप-वाहिते ।
२८पू] सुखं सीतां हरिष्यामि एवं प्रति-कृतं भवेत् ॥३०॥ [N
ततो रावण-मारीचौ वि-मानम् इव तं रथम् ।
N] समा-रुह्य गतौ शीघ्रं यत्र[3] रामः स-लक्ष्मणः[3] ॥३१[4]॥ [N
N] आ-साद्य दण्डकाऽरण्यं रामाऽऽश्रम-पदं महत् ।[5]
२८उ] ददर्श सह-मारीचो रावणो राक्षसेश्वरः ॥३२॥ [N
अव-तीर्य रथात् तस्मात् तप्त-काञ्चन-भूषणात् ।
N] हस्ते गृहीत्वा मारीचं रावणो वाक्यम् अब्रवीत् ॥३३॥ [N
एतद् रामाऽऽश्रम-पदं दृश्यते कदली-वृतम् ।
N] क्रियतां तत् स-शीघ्रं यद्-अर्थं वयम् आ-गताः ॥३४[4]॥ [N
स[6] रावण-वचः[6] श्रुत्वा मारीचो राक्षसेश्वरः ।[7]
N] मृगो भूत्वाऽऽश्रमे चैव रामस्य वि-चचार ह ॥[8]३५[9]॥ [N
रुक्म-बिन्दु-शतैश् चित्रैः प्रवाल-मणि-भूषितैः ।
मुक्ता-जाल-परिच्छन्नः सर्व-भूत-मनो-हरः ।
N] सवैडूर्य-मयैः शृङ्गैश् चतुर्भिर् हेम-भूषितैः ॥३६॥ [N
स रामं पर्ण-शालायाम् उप-विष्टं[10] महा-रथम्[11] ।
N] मृगो[12] जगाम[12] सौवर्णः सर्व-गात्राणि दर्शयन् ॥३७॥ [N

---

१. भ–मनोरमम् । २. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–त्वाभिभविष्यति ॥ ३. रा$_2$ फ म–रामाश्रमपदं प्रति । ४. भ–नास्ति ॥ ५. रा$_2$ फ म–वर्जं—नास्ति । ६. रा$_1$ ल$_1$ ल$_2$ ब प्र–रावणस्य वचः । ७. अतः परमधिकः पाठः—रा$_2$ फ म–वर्जं—बलश्चापि रामस्य मारीचस्तु तदाकरोत् । ८. ल$_1$ ल$_2$ ब–रामस्य त्वाश्रमे रक्षो मृगरूपी चचार ह । ९. भ–अत आरभ्य ४६-शश्लोकं यावन्नास्ति । १०. रा$_1$ अ प्र फ–उपतिष्ठन् । ११. रा$_1$ फ–महाबलं । १२. रा$_2$ फ–मृगराजः स ॥

तं मृगं काञ्चनं दृष्ट्वा दिव्यं मृगम् इवाऽम्बरे ।
N] उवाच राघवं सीता स्मितपूर्वाऽभिभाषिणी[1] ॥३८॥ [N
इमं मणि-विचित्राऽङ्गं पश्य हेम-मयं मृगम् ।
N] त्वचा सनाथा(?थां) माम् अस्य[2] कुरु शीघ्रं महा-भुज ॥३९॥ [N
स[3] सीताया[3] वचः श्रुत्वा रामः सत्य-पराऽऽक्रमः ।
उवाच संहृष्ट-मनाः सौमित्रिम् अथ राघवः ।
N] पश्य लक्ष्मण वैदेह्या मृग-त्वचि गता स्पृहा ॥४०॥ [N
अ-प्रमत्तेन ते भाव्यं राज-पुत्र्यां नृपाऽऽत्मज[4] ।
N] यावत् पृषतम् एकेन सायकेन नि-हन्म्य्[4] अहम् ॥[5]४१॥ [N
तेन मर्मणि निर्-भिन्नः शरेणाऽप्रतिमेन सः ।
N] हा लक्ष्मणेति वि-क्रुश्य जहौ रूपं मृगस्य[6] तत् ॥४२॥ [N
आर्तं[7] स्वरं तु तं[8] भर्तुर् वि-ज्ञाय सदृशं वने ।
N] उवाच लक्ष्मणं सीता गच्छ जानीहि राघवम् ॥४३॥ [N
स सीतां प्रत्य्-उवाचाऽथ केनाऽप्य् एतद् उदा-हृतम् ।
एवम् उक्ता लक्ष्मणेन सीता शोक-परायणा[8] ।
N] परि-देवमाना[9] रूक्षां वाचम्[9] अश्रावयत्[10] तदा ॥४४॥ [N
एवम् उक्तस् तु सौमित्रिः सीतया परुषं[11] वचः ।
N] पिधाय कर्णौ दुःखाऽऽर्तो मैथिलीं पुनर् अब्रवीत् ॥४५॥ [N
यास्यामि यत्र काकुत्स्थः स्वस्ति तेऽस्तु वराऽऽनने ।
N] रक्षन्तु त्वां विशालाऽक्षि सम्-अग्रा वन-देवताः ॥४६॥ [N
२९पू] अप-नीते[12] तदा रामे लक्ष्मणे च महा-बले ।[13]
एतद् अन्तरम् आ-साद्य दश-ग्रीवः प्रताप-वान् ।[14]
N] परिव्राजक-रूपेण[15] वैदेहीं ताम् उपाऽगमत् ॥४७॥ [N
ताम् आ-ससादाऽति-बलो भर्त्रा वि-रहितां वने ।[16]

---

१. म-०षणं ॥ २. रा$_2$ फ-वर्जे—त्वगासनस्थां मां त्वस्य ॥ ३. म-सीतायाश्च ॥ ४. म-परंतप । ५. म-हिरण्मयम् ॥ ६. रा$_2$ म-वर्जे—तु तस्य ॥ ७. रा$_2$-वर्जे—तद् ॥ ८. म-भर्तृप० । ९. रा$_2$ फ म-परिदेवयमाना तं रूक्षम् । १०. ल$_2$ अ-आश्रा० ॥ ११. ल$_1$ल -सीतायाः परमं ॥ १२. भ-च्युते तेन । १३. रा$_2$ फ म-नास्ति । १४. भ-अत आरभ्य ४९-शश्लोकपूर्वार्धं यावन्नास्ति । १५. म-०कवेषेन ॥ १६. म-तामासाद्य स बलेन भ्रातृभ्यां रहितां वेन ।

N] रोहिणीं शशिना हीनां दिवि घोर इव ग्रहः ॥४८॥ [N
N] स पापः साधु-रूपेण[1] तृणैः कूप इवाऽऽवृतः ।
२९उ] आ-दाय रावणः सीताम् उत्-पपात ततो नभः ॥[2]४९॥[N
रोरुद्यमानाम् अ-सकृद् रामरामेति-वादिनीम् ।
३०] लक्ष्मणेति च क्रोशन्तीं गृध्र-राजो ददर्श ताम् ॥५०[3]॥[N
पितुस् ते स सखि-त्वं च पालयन् गृध्र-राट् तदा ।
३१] सहायम् अकरोत् तस्या देव्याः स सु-महाबलः ।
३२पू] अ-भयं च स दत्त्वाऽस्या युयुधे तेन रक्षसा ॥[4]५१॥ [N
ततः पर्वत-सङ्काशस् तीक्ष्ण-तुण्डः खगोत्तमः ।[5]
N] वनस्पति-गतः श्री-मान् व्या-जहार शुभां गिरम् ॥५२॥ [N
जटाऽऽयुर् नाम नाम्नाऽहं पक्षि-राजो महा-बलः ।[4]
N] इत्य् एवम् उक्त्वा दुद्राव पतगेन्द्रो दशाऽऽननम् ॥५३॥ [N
स सम्प्र-हारस् तुमुलस् तयोस् तस्मिन् महाऽऽहवे[6] ।
N] बभूव वातोद्धूतयोर् मेघयोर् गगने यथा ॥५४[7]॥[N
३२उ] युद्धं तु सु-महत् कृत्वा[8] परि-श्रान्तो बभूव ह ।
उच्-छ्वसन्तं[8] समा-लक्ष्य रावणो लोक-रावणः[9] ।
३३] त्वरमाणो दश-ग्रीवश् छित्त्वा पक्षौ जटाऽऽयुषः ॥५५[10]॥[N
स छिन्न-पक्षः सहसा रावणेन दुर्-आत्मना ।
N] नि-पपात तदा गृध्रो जटाऽऽयुः क्षीण-जीवितः ॥५६[11]॥[N
गृध्र-राजं तु तं हत्वा दश-ग्रीवो महा-बलः ।
N] जगामाऽऽकाशम् आ-दाय वैदेहीं राक्षसेश्वरः ॥५७[11]॥[२८
वृक्ष-गुल्मेषु धावन्तीम् अ-नाथां नाथम् इच्छतीम् ।
३४] जग्राह तरसा सीतां ग्रहः खे रोहिणीम् इव ।५८[12]॥[२७उ
३५पू] सा हेम-वर्णा ललना नीलाऽङ्गेनाऽथ रक्षसा ।[13]

---

१. अ प्र रा₂-साधुवेशेन । २. रा₂ फ म-अंकेनादाय वैदेहीं रथमारोपयत्तदा ॥ ३. रा₂ फ म-नास्ति ॥ ४. प्र-नास्ति ॥ ५. भ-नास्ति ॥ ६. म-महावने ॥ ७. भ-दत्त्वा । ८. भ-तदैवं तं । ९. भ-लोककंटकः । १०. रा₂ फ म-नास्ति ॥ ११. भ-नास्ति ॥ १२. रा₂ फ म-नास्ति ॥ १३. भ-ततस्तां नवहेमाभां स्थितां पर्वतमूर्धनि ।

ह्रियमाणा ह्य् अ-पश्यन्ती कं-चिन् नाथं सु-मध्यमा ।[1] [N
N] ददर्श गिरि-शृङ्ग-स्थान् पञ्च वानर-पुङ्गवान् ॥५९॥[२९पू
तेषां मध्ये विशालाऽक्षी कौशेयं कनक-प्रभम् ।
N] उत्तरीयं वराऽऽरोहा शुभान्य् आ-भरणानि च ॥६०॥ [N
वि-सृज्य सा वि-चुक्रोश रामं च प्र-शशंस ह ।
N] नेत्राभ्यां वारि मुञ्चन्ती पश्यन्ती च वसुं-धराम् ॥६१॥ [N
पिङ्गाऽक्षास्[2] ते[3] विशालाऽक्षा नेत्रैर् अ-निमिषैर् अपि ।
N] वि-क्रोशन्तीं तदा सीतां ददृशुर् वानरर्षभाः ॥६२॥[२९उ
स तु पम्पाम् अति-क्रम्य लङ्काम् अभि-मुखं पुरीम् ।
N] जगाम रुदतीं गृह्य मैथिलीं राक्षसेश्वरः ॥६३॥ [N
तां जहार सु-संहृष्टो मैथिलीं[5] मृत्युम् आत्मनः ।
N] वैदेह्यां ह्रियमाणायां चुक्षुभे वरुणाऽऽलयः ॥६४॥ [N
अन्तरिक्ष-गता वाचः ससृजुर् दारुणास् तथा[4] ।
N] एतद्-अन्तो दश-ग्रीव इति सिद्धा महर्षयः ॥६५॥ [N
N] स तु सीतां वि-चेष्टन्तीम् अङ्केनाऽऽदाय रावणः ।
३५उ] प्राऽवेशयत् पुरीं लङ्कां रावणो[3] राक्षसाऽधिपः[5] ॥६६॥[३०उ
N] सोऽभि-गम्य पुरीं लङ्कां सुविभक्त-महापथाम् ।[6]
प्र-वेश्य मैथिलीं वाक्यैः सान्त्वयामास निष्-फलम् ॥[7]६७॥[N
३६] तां सुवर्ण-परिक्रान्ते[8] शुभे महति वेश्मनि ।
N] नि-दध्यौ रावणः सीतां मयो मायाम् इवाऽसुरीम् ॥[9]६८॥ [N
राक्षसं मृग-रूपेण चरन्तं काम-रूपिणम् । [N
N] नि-हत्य रामो मारीचं न्य्-अवर्तत पुनर् बली ॥६९॥[३३पू
स वै[10] सं-त्वरमाणोहि द्रष्टु-कामोऽथ[10] मैथिलीम् ।
N] स[11] त्व् एकस्याऽथ गोमायोः[11] स्वरेण परि-शङ्कितः ॥७०॥ [N
स्वस्ति स्याद् अथ वैदेह्या रक्षोभ्यो लक्ष्मणं विना ।

---

१. अत आरभ्य भ-६६-शश्लोकपूर्वार्धं यावन्नास्ति ॥ २. म-पिंगलाक्षा ॥ ३. रा२ फ म-रावणो । ४. अ-तदा । रा२ फ म-ततः ॥ ५. रा२ फ-रूपिणीं मृत्युमात्मनः । म-नास्ति ॥ ६. रा२ फ-वर्जं—नास्ति । ७. रा२ फ म-नास्ति ॥ ८. म-स्वर्णपरिकान्तेव । भ-०रिक्षिते । ९. अत आरभ्य ८०-तितमश्लोकं यावन्नास्ति ॥ १०. म-चैव त्वरमाणोऽभूद् द्रष्टुकामश्च । ११. प्र रा२ फ म-एकः प्रोवाच गोमायुः ॥

N] मारीचेन हि वि-ज्ञाय स्वरम् आ-लम्ब्य मामकम् ॥[1]७१॥ [N
इत्य् एवं चिन्तयन् रामः श्रुत्वा गोमायु-तो[2] रवम्[2] ।
नि-वर्तमानस् त्वरितो जवेनाऽऽश्रमम् आत्मनः ।
N] आ-जगाम जन-स्थानं राघवः[3] परि-शङ्कितः[3] ॥[4]७२॥ [N
ततो लक्ष्मणम् आ-यान्तं ददर्श विगत-प्रभम् ।
N] तम् उवाच किम्-अर्थं त्वं त्यक्त्वा सीताम् उपाऽऽगतः[5] ॥७३॥ [N
नूनं वै भक्षिता सीता राक्षसैः सा मनस्विनी ।
N] धिक् त्वां लक्ष्मण वैदेहीं यो हित्वा त्वम् उपाऽऽगतः[6] ॥७४[7]॥[N
राज्य-भ्रष्टस्य दीनस्य दण्डकान् परि-धावतः ।
N] क्व सा दुःख-सहाया मे वैदेही तनु-मध्यमा ॥[8]७५॥[७६
यां विना नोत्-सहे सौम्य मुहूर्तम् अपि जीवितुम्[9] ।
N] क्व सा[10] प्राण-सहाया मे[10] सीता सुर-सुतोपमा ॥७६॥ [N
यक्ष-त्वम् अमर-त्वं वा पृथिवीं चाऽपि[11] लक्ष्मण ।
N] विना तां नव-हेमाऽऽभां नेच्छेयं जनकाऽऽत्मजाम् ॥७७॥ [N
कच्-चिज्[12] जीवति वैदेही प्राणैः प्रिय-तरा मम ।
N] कच्-चित् प्र-व्रजनं सौम्य न मे मिथ्या भविष्यति ॥[13]७८॥[N
ब्रूहि लक्ष्मण वैदेही यदि जीवति मां विना ।
त्वयि प्र-मत्ते रक्षोभिर् भक्षिता वा तपस्विनी ।
N] सु-कुमारा च बाला च नित्यं सा दुःख-भागिनी ॥७९॥ [N
इति सीतां वराऽऽरोहां चिन्तयन्[14] एव[14] राघवः ।
N] आ-जगाम जन-स्थानं शून्यं सं-दृश्य राघवः ॥८०॥ [N
रावणेन हृतां सीतां वैदेहीं[15] रहितां[16] वनात्[16] । [N
३७] तौ मार्गमाणौ काकुत्स्थौ हतं गृध्रम् अपश्यताम् ॥[17]८१॥[३३उ

---

१. टि.–'स्वर आलम्बितो मम' इति पाठः ? । २. म–०युभाषितं । ३. रा$_2$ फ–जगाम मनसा प्रियां । ४. अतः परमधिकः पाठः—रा$_2$ फ–वर्जं—सीतामेव जनस्थाने जगाम मनसा प्रियाम् ॥ ५. रा$_2$ फ म–इहागतः ॥ ६. प्र–इहागतः । ७. ल$_2$ फ म–नास्ति ॥ ८. प्र म–नास्ति । ९. प्र–नास्ति । १०. रा$_2$ फ–वर्जं—०समा सा मे । म–मत्प्राणसमा देवी ॥ ११. रा$_2$–वापि ॥ १२. रा$_2$–कच्चिज् । १३. प्र म–नास्ति ॥ १४. म–चिंतयानः स ॥ १५. रा$_2$ फ–वर्जं—स श्रुत्वा । म–भ्रातृभ्यां । १६. रा$_2$ फ–रहिते वने । म–रहितां वने । १७. रा फ म–वर्जं—निवर्तमानः काकुत्स्थो विव्यथे गृध्रराजतः । भ–निवर्तमानः काकुत्स्थो गृध्रं दृष्ट्वा तु विव्यथे ॥

गृध्र-राजं तु[1] सत्-कृत्य[1] पितुः प्रिय-सखं हतम्[2] ।
३८] मन्दाकिनीं व्य्-अचरतां[3] वनोद्देशांश्[4] च पुष्पितान्[4] ॥८२॥
ततस् तौ सु-महावीरौ भ्रातरौ राम-लक्ष्मणौ ।[5] [३४
३९] आ-सेदतुर् महाऽरण्ये कबन्धं रोम-हर्षणम्[6] । [३५
तं हत्वा चैव खड्गाभ्यां महा-बल-पराऽऽक्रमौ ॥[7]८३॥[N
४०] ततः कबन्ध-वचनाद् रामः सत्य-पराऽऽक्रमः ।
ऋष्य-मूकं गिरिं गत्वा सु-ग्रीवेण समा-गतः ॥८४॥[३६
४१] ततस् तं मनसा गत्वा सखि-त्वम् अकरोत् तदा ।[8] [३७पू
इतरेतरम् अब्रूतां कुरुष्व[9] करवाणि च ॥८५॥ [३८
४२] तं रामो बाहु-वीर्येण स्वं राज्यं प्रत्य्-अपादयत् ।
वालिनं सम्-अरे हत्वा महा-कायं महा-बलम् ॥८६॥ [३९
४३] ततोऽभि-षिक्तः सु-ग्रीवो वानरेन्द्रो महा-बलः ।
प्रत्य्-अजानीत[10] रामस्य स सीताऽन्वेषणं[10] प्रति ॥८७॥ [४०
४४] आ-दिष्टा वानरेन्द्रेण[11] सु-ग्रीवेण महाऽऽत्मना ।
दश कोटयः प्लवं-गानां दिशः[12] सर्वाः प्र-तस्थिरे[12] ॥८८॥ [४१
४५] अस्माकं[13] चोप-विष्टानां[13] विन्ध्ये पर्वत-सत्तमे[14] ।
भृशं[15] शोकाऽभितप्तानां[15] पर्य्-अदेवयद् अङ्ग-दः[16] ॥८९॥ [४२
४६] भ्राता तु गृध्र-राजस्य सं-पातिर् नाम वीर्य-वान् ।
सीताम् आऽचष्ट[17] सर्वेषां[17] वसन्तीं रावणाऽऽलये ॥९०॥ [४३
४७] सोऽहं दुःख-परीऽतानां ज्ञातीनां दुःखम्[18] उद्-वहन्[18] ।
आत्म-वीर्य[19] समा-साद्य[20] प्लुतवाञ्[21] छत-योजनम् ॥९१॥ [४४

---

१. रा$_2$ फ–ततो दृष्ट्वा । भ–तु तं दृष्ट्वा । २. रा$_2$ फ–हि तं । ३. फ-वर्जं—अनुचरन् । म–विचिन्वातां । ४. रा$_2$ फ म भ–वर्जं—द्रुमान्पश्यन् सुपु० ॥ ५. रा$_2$ फ म–नास्ति । ६. रा$_1$ म–लोम० । ७. रा$_2$ फ म–नास्ति ॥ ८. रा$_2$ फ–तयोः सह समागम्य प्रीत्या हार्दमयाचत । भ–ततस्ते समागम्य प्रीतिहार्दमजायत । म–नास्ति । ९. रा$_2$ फ म–किं तेऽहं ॥ १०. प्र–प्रत्ययार्थं तु रा० । रा$_2$ फ म–रामस्य प्रत्यजानात्स सीताया मार्गणं । म–रामस्य प्रतिज्ञातं सीताया मार्गणं ॥ ११. रा$_2$ फ म–वर्जं—०नराः सर्वे । १२. रा$_2$ फ म–सर्वाः प्रस्थापिता दिशः । १३. रा$_1$ ल$_1$ ल$_2$ ब अ भ–०कं वोप० । रा$_2$ फ म–तेषां समुप० । १४. म–०तमस्तके । १५. रा$_2$ फ म–महात्मा वालिसूनुर्वै ॥ १६. भ–वर्जं—आगतः ॥ १७. रा$_2$ फ–आख्यातवांस्तेषां ॥ म–आख्यापयत्तेषां ॥ १८. रा$_2$ फ म–दुःखशांतये । १९. रा$_2$ फ–आत्मधैर्यं । २०. रा$_2$ फ म–विकुर्वाणः । भ–समाश्रित्य ॥ २१. रा$_2$ फ–संतीर्णः ॥

४८] तत्राऽहम् एकाम्[1] अद्राक्षम् अशोकवनिका-गताम्[2] ।
४९पू] कौशेय-वस्त्रां मलिनां निर्-आनन्दां धृत-व्रताम् ॥९२॥ [४५
तया समेत्य त्वरितो[3] दृष्ट्वा सीताम्[3] अ-निन्दिताम् । [४६पू
N] राक्षसोभी रक्ष्यमाणां सीतां सुरसुतोपमाम् ॥[4]९३॥[N
N] सु-भ्रू सु-केशीं सु-श्रोणीं सु-कुचां[5] सु-द्विजाऽऽननाम् ।[4] [N
४९उ] अभिज्ञान-मणिं गृह्य[6] चरिताऽर्थोऽहम्[7] आ-गतः[7] ॥९४॥[४९उ
हत्वा घोराणि रक्षांसि कृत्वा च कदनं महत् । [४८उ
५०] दग्ध्वा वाऽशेष-तो लङ्कां ततोऽस्मि पुनर् आ-गतः ॥९५[8]॥[४९पू
मया च पुनर् आ-गत्य रामस्याऽक्लिष्ट-कर्मणः ।
५१] अभि-ज्ञानं शुभं[9] दत्तम् अर्चिष्-मान् स महा-मणिः ॥९६॥[५०
श्रुत्वा[10] तु मैथिलीं दृष्ट्वा (?ष्टां) मया संहृष्ट-मानसः[11] ।
५२] जीविताऽऽशाम्[12] अनु-प्राऽऽप्तः[12] पीत्वाऽमृतम् इवाऽऽतुरः ॥९७॥[५१
अयोजयद् बलोद्योगं[13] दधौ[14] लङ्का-वधे मनः[14] ।
५३] जिघांसुर् इव लोकांस् त्रीन् अनन्ताऽऽख्यो विभावसुः ॥[15]९८॥[५२
ततः[16] सम्-उद्रम् आ-साद्य नल-सेतुम्[16] अकारयत् ।
५४] सा मुहूर्तेन सं-तीर्णा वाहिनी तेन सेतुना ॥९९॥ [५३
प्र-हस्तम् अवधीन् नीलः कुम्भ-कर्णं च राघवः ।
५५] लक्ष्मणो रावण-सुतं[17] स्वयं रामस् तु रावणम् ॥१००॥[५४
स[18] शक्रेण[18] समा-गम्य यमेन वरुणेन च । [५५पू
५६] सुरर्षिभिश्[19] च काकुत्स्थो वरं लेभे ततस्[20] तु स[20] ।१०१।[५६उ
स तु दत्त-वरः पित्रा मुनिभिश् च परं-तपः[21] ।
५७] पुष्प-केन वि-मानेन किष्किन्धां समुपाऽगमत्[22] ॥१०२॥ [५७

---

१. ल२-सीतां । २. रा२ फ म-०निकांतरे ॥ ३. रा२ म-संजल्प्य पृष्ट्वा सर्वम् । फ-संपूज्य पृष्ट्वा सर्वम् । ४. भ-नास्ति ॥ ५. रा१ ल१ व प्र-सुकर्णां । ६. रा२ फ म-प्राप्य । ७. रा२ फ-त्वरितार्थोऽहमा० । म-त्वरितार्थं समागतः ॥ ८. प्र रा२ फ म-नास्ति ॥ ९. रा२ फ म-वर्जं—महद् ॥ १०. रा२ फ म-वर्जं—ज्ञात्वा । ११. रा२ फ म-वर्जं—संहृतमा० । १२. रा२ फ-जीवितस्तं मणिं दृष्ट्वा ॥ १३. रा-बलं घोरं । १४. रा२ फ म-दध्रे लं० । भ-वानराणां स राघवः । १५. भ-सुग्रीवांगदमुख्यैश्च जगाम मकरालयं ॥ १६. भ-तत्रोदधौ तदा रामो शैलैः सेतुम् ॥ १७. रा२ फ-शक्रजयिनं । म-शक्रजेतारं ॥ १८. रा२ फ म-इन्द्रेण तु । १९. रा२ फ म-महर्षिभिश् । २०. रा२ फ म-परंतपः ॥ २१. रा२ फ म-समागतः ॥ २२. रा२ फ-अभ्युपा० ॥

भरद्वाजाऽऽश्रमं प्राऽऽप्तः स-सीतः सह-लक्ष्मणः ।[1]
५८] अ-विघ्नं पुष्य-योगेन श्वो रामं द्रष्टुम् अर्हसि ॥१०३॥ [५८
ततः स सम्यग्[2] घनुमद्-वचो भृशं[2]
नि-शम्य हृष्टो भरतः कृताऽञ्जलिः ।
उवाच वाक्यं मनसः प्र-हर्षणं
N] कुतश्[3] चिराद् राम-कथा प्र-वृत्ता[3] ॥१०४॥ [५९
इत्य् एवम् उक्त्वा वचनं प्रतीतः[4] [दा-१२८
कपि-प्रवीरस्य वचो नि-शम्य[5] ।
प्र-हर्षितो राम-दिदृक्षयाऽभवत्
N] पुनश् च हर्षाद् इदम् अब्रवीद् वचः ।१०५[6]॥ [४५

इत्यार्षे रामायणे युद्ध-काण्डे[7] भरत-प्रहर्षणं[8] नाम
सप्तोत्तरशततमः सर्गः ॥ १०७ ॥

[वं-१११]= [अष्टोत्तरशततमः सर्गः] =[दा-१३०]

स श्रुत्वा परमाऽऽनन्दं भरतः सत्य-सङ्गरः ।[9]
१] हृष्ट[10] आ-ज्ञापयामास शत्रु-घ्नं पर-वीर-हा ॥१ ॥ [१
दैवतानि च सर्वाणि चैत्या ये नगरस्य च ।
२] वि-चित्रैर्[11] गन्ध-माल्यैश् च[11] पूज्यताम्[12] इति[13] सर्व-शः[13] ॥२ ॥ [२
सूताः स्तुति-पराऽर्थ-ज्ञाः सर्वे वैतालिकास् तथा । [३पू
३] ब्राह्मणा वेद-विद्वांसश् चाऽभि-गच्छन्तु[14] राघवम् । [९पू
४पू] कुशलाः सर्व-वाद्यैश्[15] च[15] गणिकाश् चैव सर्व-शः ॥३[16] ॥ [३उ
N] प्रेष्यैः[17] शिल्पि-सहस्राणि[17] नोदयामास वीर्य-वान् ।[18] [४उ
४उ] समी-क्रियतां[19] निम्नानि वि-षमाणि समानि[20] च[20] ।

---

१. भ-स गंगां क्षिप्रमासाद्य न्यवसन्मुनिसन्निधौ ॥ २. रा$_2$ फ म-त्वाक्यं मधुरं ह्यनूपमं । ३. म-श्रुत्वा शिवा रा० ॥ भ-कुतश्चिरस्याद्य कथा समागता ॥ ४. रा$_1$ अ भ-नृपात्मजः । ५. रा$_1$ अ-०म्य सः । भ-निधार्य । ६. रा$_2$ फ म-नास्ति ॥ ७. प्र भ-लंकाकांडे । फ म-आभ्युदयिके ॥ ८. रा$_2$ फ म-हनूमद्वाक्यं । भ-भरतप्रहर्षः ॥ ९. रा$_0$ फ म-श्रुत्वा भ्रातरमायान्तं भरतः सत्यविक्रमः । १०. रा$_2$ फ म-क्षिप्रम् ॥ ११. भ-वादित्रैर् । १२. रा$_2$ फ-चाप्यर्च्यन्ताम् । १३. रा$_2$ फ-अथ स० । भ-शुचिभिर्जलैः ॥ १४. भ-स्त्वभिग० । १५. रा$_1$ ल$_2$ ब अ-वादिकाश्चैव । ल$_1$ प्र-च सवा० । १६. फ म-नास्ति ॥ १७. म-वर्जं—प्रेष्यशि० । १८. भ-नास्ति । १९. भ-वर्जं—समीकुरुत । २०. फ-च भागशः । म-विभागशः ।

५पू] स्थलानि[1] च वि-रच्यतां[1] नन्दि-ग्रामाद् इतः परम् ॥४ ॥[५
N] सिञ्चन्तु पृथिवीं सर्वे[2] हिम-शीतेन[2] वारिणा ।[3]
५उ] ततोऽभ्यव-किरन्त्व् अन्ये पुष्प-लाजैश्[4] च सर्व-शः[4] ॥५ ॥[६
समुच्छ्रित-पताकाश्[5] च[6] रथ्याः पुरवरोत्तमे ।
६] शोभयन्तु स्व-वेश्मानि सूर्यस्योद्-अयनं प्रति ॥६ ॥[७
अपरे मुक्त-पुष्पैश् च सु-गन्धैः पञ्च-वर्णकैः ।
७] राज-मार्गं सु-सम्बाधं[7] किरन्तु[7] शत-शो नराः ॥७ ॥[८
राज्ञो[8] दारास्[8] तथाऽमात्याः सैन्य-श्रेण्यस् तथाऽङ्गनाः[9] । [९पू
८] अभि-क्रामन्तु रामस्य द्रष्टुं शशि-निभं मुखम् ॥[10]८ ॥[३उ
धृष्टिर् जयन्तो वि-जयः सिद्धाऽर्थो राज्य-वर्धनः[11] ।
N] अ-शोको धर्म-पालश् च सु-मन्त्रश्[12] चाऽपि यान्तु[12] ते ॥९[13] ॥[१०पू
भरतस्य वचः श्रुत्वा शत्रु-घ्नः पर-वीर-हा[14] । [४पू
९] सर्वं तत् कारयामास वि-शेषेण[15] नरोत्तमः ॥[16]१०॥[N
मत्तैर् नाग-सहस्रैश् च शातकुम्भ-विभूषितैः[17] । [१०उ
१०] अपरे[18] हेम-कक्ष्याभिः स-घण्टाभिः[19] करेणुभिः[19] ॥११।
निर्-ययुश्[20] च गजाऽध्यक्षा[20] मुख्यैश् च सु-महारथाः । [११
११] तुर-गाणां सहस्रैश् च मुख्यैर्[21] मुख्यतराऽन्वितैः[21] ॥१२॥
शक्त्य-ऋष्टि-पाश-हस्तानां स-ध्वजानां महा-यशाः[22] ।
१२] पदातीनां सहस्रैश् च वीरः परि-वृतस्[23] तदा[23] ॥१३॥[१२
द्विजाति-मुख्यैर् धर्माऽऽत्मा श्रेणी-मुख्यैश् च[24] नैगमैः[25]।

---

१. रा$_2$ फ–स्थूलानि च त्रिरूप्यन्तां । म–०नि कुरुतां चैव । भ–स्थानानि च विरज्यंतां ॥ २. रा$_2$ फ म–चान्ये सुखशी० । ३. भ–नास्ति । ४. रा$_2$ फ म–फलैः पुष्पैश्च सर्वतः ॥ भ–०जैश्च सर्वतः ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–समुद्गतप० । ६. भ–तु ॥ ७. म–०धैः कुर्वंतु ॥ ८. रा$_2$ फ म भ–राजदा० । ९. रा$_2$ फ म–च सर्वशः । भ–तथा गणाः । १०. रा$_2$ फ म–त्वरमाणा हि निर्यांतु रामदर्शनकांक्षिणः ॥ भ–०निभाननं । ११. रा$_2$ फ म–राष्ट्रव० । १२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–०न्त्रोऽथाभियांतु । १३. भ–नास्ति ॥ १४. रा$_2$ फ म–स महामतिः । १५. ल$_1$ ल$_2$ ब प्र–०शेषात्स । १६. रा$_2$ फ म–नास्ति ॥ १७. रा$_1$ अ फ म–०तकौंभ० । १८. म–अन्ये च । १९. रा$_2$ फ म–करेणुभिस्तथा गजैः ॥ २०. रा$_2$ फ म–त्वरमाणा हि निर्यांतु । भ–०युस्त्वरया युक्ता । २१. प्र म–अत आरभ्य १३-शश्लोकस्य तृतीयपादं यावन्नास्ति । भ–मंत्रिभिर्भरतो वृतः ॥ २२. रा$_2$ फ–पताकिनां । २३. फ–परिवारितस्तथा ॥ २४. भ–महायशाः ।

१३] माल्य-मोदक-हस्तैश् च नागरैर्[1] भरतो वृतः ॥१४॥ [१७
शङ्ख-भेरी-निनादेन[2] वन्दिभिश् चाऽभि-नन्दितः[3] ।
१४] पादुके ते[4] गृहीत्वा च[4] शिरसा धर्म-कोविदः ॥१५॥ [१८
पाण्डुरं छत्रम् आ-दाय शुक्ल-माल्य-विभूषितम्[5] ।
१५] शुक्ले च बाल-व्यजने रामाऽर्हे-(?र्हे) हेम-भूषिते ॥१६॥ [१९
N] उपवास-कृशो दीनश् चीर-कृष्णाऽजिनाम्बरः ।
N] भ्रातुर् आ-गमनं श्रुत्वा तत् पूर्वं[6] हर्षम् आ-गतः ।
प्रत्युद्-ययौ तदा रामं महाऽऽत्मा मन्त्रिभिर् वृतः[1] ॥[6]१७॥ [२०
१६] ततो यानान्य् उपाऽऽरूढाः सर्वा दशरथ-स्त्रियः ।
कौसल्यां प्र-मुखे[8] कृत्वा सु-मित्रां चैव[7] निर्-ययुः[7] ॥१८॥ [१३
१७] अश्वानां खुर-शब्देन रथ-नेमि-स्वनेन च ।
शङ्ख-दुन्दुभि-नादेन[10] सं-चचाल च[11] मेदिनी[11] ॥१९॥ [१६
१८] कृत्स्नं च नगरं तत्र नन्दि-ग्रामम् उपाऽऽगतम्[12] । [१५
सम्-ईक्ष्य भरतो वाक्यम् उवाच कपि-कुञ्जरम् ॥२०॥ [२१
१९] कच्-चिद्[13] वानर कापेयी[14] नैव[14] ते चल-चित्तता ।
न हि पश्यामि काकुत्स्थं रामम् आर्यं[6] परं-तपम् ॥२१॥ [२२
२०] अथैवम् उक्तो वचनं हनु-मान् इदम्[15] अब्रवीत्[15] ।
N] अर्थं[6] वि-ज्ञापयन्न् एव भरतं सत्य-विक्रमम् ॥२२॥ [२३
सदा-फलान्[16] कुसुमितान् पश्य[17] वृक्षान् मधु-च्युतः[17] ।
२१] मुनेः[18] प्र-सादात्[18] सिद्धस्य भरद्वाजस्य धी-मतः ॥२३॥ [२४
तेन ह्य् एष वरो दत्तो वने येन परं-तप ।[19]

---

१. फ म—मंत्रिभिर् ॥ २. फ म—०नादैश्च । ३. फ—चैव वदि० । म—चापि नं० । ४. रा१ ल१ श्र प्र—द्वे गृ० । रा२ फ म—तेऽथ संगृह्य । भ—०त्वा तु । ५. रा१ ल१ ल२ ब अ प्र—शुभ्रं मा० । रा२ फ—०ल्योपशोभितं । म—पुष्पमालोपशोभितं ॥ ६. भ—सह । ७. रा२ फ म—नास्ति । ८. रा२ फ म—पुरतः । ९. रा२ फ—चाभिनि० । म—चापि नि० । १०. रा२ फ—०भिनिर्घोषैः । म—०भिशब्देन । ११. रा१ अ—०ल वसुंधरा । प्र—०चालेव मे० ॥ १२. रा१ ल१ ल२ ब भ—०गमत् ॥ १३. ल१ ल२ ब अ प्र—ननु । रा२ फ म—किं तु । १४. रा१ भ—कार्येपि नैव । ल१ ल२ ब अ प्र—काये या सैव । म—काये या सेयं ॥ १५. रा१ ल१ ल२ ब अ प्र—मारुतात्मजः ॥ १६. रा२ फ—सद्यः फुल्लान् । १७. रा२ फ—०क्षान्मधुस्रवान् । म—कंदमूलानि सर्वशः । १८. रा१ भ—वरप्रदानात् । म—पश्य वृक्षान् ॥ १९. रा२ फ म—नास्ति ।

२२] आतिथ्यं[1] तेससैन्यस्य[2] कृतं सर्वगुणाऽन्वितम् ॥[3]२४॥ [२५
निस्वनः श्रूयते चाऽसौ[3] हृष्टानां च[3] वनौकसाम् ।
२३] मन्ये वानर-सेना सा नदीं तरति गो-मतीम् ॥२५॥ [२६
रजो-वर्ष-समुद्भूतं[4] पश्य शाल्लूकिनीं[5] प्रति ।
२४] मन्ये साल-वनं रम्यं[6] लोडयन्ति[7] प्लवं-गमाः ॥२६॥ [२७
तद् एतद् आकाश-तले[8] भाति चन्द्र इवोदितः[8] ।
२५] वि-मानं पुष्प-कं दिव्यं[9] मनसा[9] ब्रह्म-निर्मितम् ॥२७॥ [२८
रावणं बान्धवैः[10] सार्धं हत्वा लब्धं महाऽऽत्मना[11] ।
२६] धन-दस्य प्र-सादेन दिव्यम्[12] एतन् मनो-जवम्[12] ॥२८॥ [२९
एतस्मिन् भ्रातरौ[13] वीरौ वैदेह्या[14] सह राघवौ ।
२७] सु-ग्रीवश् च महा-तेजा[15] ऋक्ष-वानर-संवृतः[16] ।
रावणस्याऽनु-जो वीरो[14] राजा चैव वि-भीषणः ॥[17]२९॥ [३०
२८] तं दृष्ट्वा तूर्णम् आ-यान्तं द्वितीयम् इव भास्-करम् ।[17] [N
हर्षेणाऽभिसमुत्-कृष्टो[18] नि-स्वनो दिवम् अस्पृशत् ।
२९] बाल-स्त्री-वृद्ध-सङ्घानां[19] रामोऽयम् इति शंसताम्[20] ॥३०॥ [३१
रथ-कुञ्जर-वाजिभ्यस् तेऽव-तीर्य महीं गताः ।
३०] ददृशुस् तं विमान-स्थं नराः सोमम् इवाऽम्बरे ॥३१[21]॥ [३२
प्राऽञ्जलिर् भरतो भूत्वा[22] हृष्टो[22] रामम् उप-स्थितः[23] ।
३१] स्व्-आगतेन[24] यथाऽर्हेण तदा रामम् अपूजयत् ॥[25]३२॥ [३३
मनसा ब्रह्मणा सृष्टे वि-माने लक्ष्मणाऽग्रजः ।[26]

---

१. ल१ ल२ ब अ-०ध्यार्थेन सै० । २. रा२ फ म-ससैन्यस्य तवातिथ्यं कृतं तेन महर्षिणा ॥ ३. रा२ फ म-भीमः प्रहृष्टानां । ४. रा२ फ म-रजश्चैतस्स० । ५. रा२ फ-वर्जे—शालु० । ६. म-सर्वे । ७. रा१ ल१ भ-लोलयंति ॥ ८. रा२ फ म-भरताकाशे विमलं चंद्रसन्निभं । ९. रा२-ह्येतन्मानसं ॥ १०. ल१ ल२ अ प्र-वानरैः । ११. फ म-इदं शुभं । १२. रा२ फ म-रामस्य मनसा गतं ॥ १३. ल१ ल२ ब अ-मन्तरे । १४. ल२-नास्ति । १५. ल१ ब अ प्र-महाबाहुर् । १६. फ म-०संमतः । १७. फ म-नास्ति ॥ १८. रा२ फ म-०ण महताविष्टो । १९. रा२-स्त्रीबालप्रवृद्धानां । फ-स्त्रीबालयुववृद्धानां । म-स्त्रीबालपुरवृद्धानां ॥ २०. रा२ फ म-कीर्तंतां । २१. रा२ फ म-अवतीर्णं ततः क्षिप्रं रथहस्तितुरंगमम् । तं विमानगतं दृष्ट्वा यतो रिपुनिषूदनम् ॥ २२. रा२ फ म-हृष्टो दृष्ट्वा । २३. रा फ म-०तं । २४. ल१ ल२ ब अ-स्वगाग्रेण । प्र-सुगाग्रेण । २५. रा२ फ म-स्वागतं ते महाबाहो कौशल्यानंदवर्धन ॥ २६. रा२ फ-ददृशुर्ब्राह्मणाश्चैनं विमाने लक्ष्मणाग्रजं ।

३२] रराज[1] पृथुताम्राऽक्षो[1] वज्र-पाणिर्[2] इवाऽचले[3] ॥३३॥ [३४
ततो विमानाऽग्र-गतं भरतो भ्रातरं मुदा[4] ।
३३] ववन्दे[5] प्र-णतो भूत्वा[5] मेरु-स्थम् इव भास्-करम् ॥३४॥ [३५
आ-रोपितो[7] वि-मानं तु[7] भरतः सत्य-विक्रमः[8] ।
३४] रामम् आ-साद्य मुदितो भूय[9] एवाऽभ्य्-अवादयत्[9] ॥३५॥ [३७
तं समुत्था(द्-स्था) प्य काकुत्स्थश् चिरस्याऽक्षि-पथं गतम् ।
३५] अङ्के भरतम् आ-रोप्य मुदितः परि-षस्वजे ॥३६[10]॥ [३८
न्याय-तश् च समेत्याऽथ भरतेन महाऽऽत्मना ।
३६] वन्दितौ चरणौ देव्याः सीतायाः प्रयताऽऽत्मना[11] ॥३७[12]॥ [३९
सु-ग्रीवं[13] कैकयी-पुत्रो जाम्ब-वन्तं तथाऽङ्ग-दम्[14] ।
३७] मैन्द-द्विविद-नीलांश् च ऋषभं चैव[15] सस्वजे । [४०
N] सुमित्रा-तनयं चैव सस्वजे भरतो मुदा ॥[16]३८॥ [४१उ
ते कृत्वा मानुषं रूपं[17] वानराः काम-रूपिणः ।
३८] कुशलं परि-पप्रच्छुर्[18] भरतं हृष्ट-वत्[18] तदा ॥३९॥ [४२
वि-भीषणं च भरतः सान्त्वं वचनम् अब्रवीत् ।[19]
३९] दिष्ट्या त्वया सहायेन[20] कृतं कर्म सु-दुष्करम् ॥४०॥ [४५
शत्रु-घ्नश् च तदा रामम् अभि-वाद्य स-लक्ष्मणम् ।
४०] सीतायाश् चरणौ[21] पश्चाद् वि-नयेनाऽभ्य्-अवादयत्[21] ॥४१[22]॥ [४६
४१उ] रामो मातरम् आ-साद्य वि-वर्णां[23] शोक-कर्षिताम्[23] ।

---

१. रा$_2$ फ म–आसीनं पृथुदीर्घाक्षं । २. ल$_1$ ल$_2$ ब अ प्र म–चक्रपाणिर् । ३. रा$_2$ फ म–इवामराः ॥ ४. ल$_2$ अ प्र रा$_2$ म–तदा । ५. रा$_2$ फ–प्रांजलिर् । म–शिरसा । ६. म–रामं । ७. रा$_1$ ल$_2$ अ भ–०पितविमानं तं । रा$_2$ फ म–ततो विमानमारुह्य । ८. रा$_2$ फ–शत्रुकर्षणः । ९. रा$_2$ फ म–हर्षादश्रूण्यवर्तयत् ॥ १०. रा$_2$ फ म–नास्ति ॥ ११. अ–संयता० । १२. रा$_1$ ल$_1$ ल$_2$ ब प्र–नास्ति । रा$_2$ फ म–ततो लक्ष्मणमासाद्य वैदेहीं च परंतपः । अभ्यवादयच्छ्रीमान्भरतो नाम चाब्रवीत् ॥ १३. रा$_2$ फ म–ततः स । १४. रा फ म–अथा० । १५. रा$_2$ फ म–चापि । १६. रा फ म–नास्ति । १७. रा$_1$ भ–देहं ॥ १८. रा$_2$ फ म–पर्यपृच्छन्त प्रहृष्टा भरतं । १९. रा$_2$ फ म–सुग्रीवं च पुनः प्राह स्मितपूर्वं महाद्युतिं । भ–सुग्रीवं भरतः प्राह नमस्कृत्याग्रतः स्थितः । २०. रा$_1$ भ–सहायेन ॥ २१. रा$_2$ फ म–च शुभौ पादौ सहसा योभ्यवा० । २२. अतः परमधिकः पाठः –भ–अथ बाष्पपरीताक्षीं कृशां नियममास्थिताम् ॥ २३. रा$_1$ अ–०र्णवदनां कृशां ।

जग्राह[1] प्र-णतः[1] पादौ मनो मातुः प्र-हर्षयन्[2] ॥४२॥ [४७
४२] अभि-वाद्य सु-मित्रां च कैकेयीं च यशस्विनीम्[3] ।
N] स मातॄश्[4] च[5] ततः[5] सर्वाः[6] पुरो-हितम् उपाऽगमत्[6] ॥४३॥ [४८
अभि-गम्य ततो रामो वसिष्ठं सचिवैर् वृतम् ।
४३] तम् अभ्य्-अवादयन् मूर्ध्ना ब्रह्माणम् इव शाश्वतम् ॥४४[7]॥ [N
ददृशुस् तं तदा पौराः सङ्घ-शः समुप-स्थिताः ।
४४] धरणी-स्था विमान-स्थम् उद्-यन्तम् इव भास्-करम् ॥४५[9]॥ [N
स्व्-आगतं ते महा-बाहो कौसल्याऽऽनन्द-वर्धन ।
४५] इति प्राऽञ्जलयः सर्वे नागरा रामम् अब्रुवन् ॥४६॥ [४९
तान्य् अञ्जलि-सहस्राणि समा-नीतानि[8] नागरैः ।
४६] अ-क्रोशानीऽव[9] पद्मानि ददर्श भरताऽग्रजः ॥४७॥ [५०
ततो रामाऽभ्यनुज्ञातं तद् विमानं मनो-जवम् ।
४७] हंस-युक्तं महा-वेगं नि-पपात मही-तले ॥४८[10]॥ [३६
स[11] पादुके तु रामस्य[11] गृहीत्वा भरतः स्वयम्[12] ।
४८] चरणेषु[13] नरेन्द्रस्य योजयामास धर्म-वित्[14] ॥४९॥ [५१
अब्रवीच् च तदा रामं भरतः संहताऽञ्जलिः[15] ।
४९] दिष्ट्याऽस्मान् स्मरसे नित्यम् अ-नाथान् नाथ सर्व-दा ॥[16]५०॥ [५१
भवद्-भयान् नि-योगाच् च न गृहीतं फलाऽर्थिना ।[16] [N
५०] एतत् ते सकलं राज्यं न्य्-आसो निर्-यातितो मया[17] ॥५१॥
अद्य जन्म[18] यथाऽर्थं मे[18] स-फलश् च[19] मनो-रथः । [५२
५१] यस् त्वां पश्यामि राजानम्[20] अयोध्यां[20] पुनर् आ-गतम् ॥५२॥
अवेक्ष्यतां भवान् कोशं[21] कोशाऽऽगारं[22] बलं पुरम् ।

---

१. रा$_2$ फ म-०हाभिमतः । २. रा$_2$ फ म-प्रसादयन् ॥ ३. रा$_2$ फ म-तपस्विनीं । ४. रा१ ल१ ल$_2$ ब अ प्र-मातरस् । ५. रा$_2$ फ म-तथा । ६. रा$_2$-सर्वे अभ्यगच्छन् पुरोहिताः । भ-सर्वाः संप्रणम्याभ्यवादयत् ॥ ७. रा$_2$ फ म-नास्ति ॥ ८. रा$_2$ फ म-संगृहीतानि ॥ ९. रा१ ल१ ल$_2$ ब अ प्र-अकालेनेव । रा$_2$ फ म-०शानि च ॥ १०. रा$_2$ फ म-नास्ति ॥ ११. रा$_2$ फ म-ततो रामस्य चरणौ । भ-पादुके ते च रा० । १२. रा$_2$ फ म-तदा । १३. रा$_2$ फ म-ते पादुके । भ-०णाभ्यां । रा$_2$ फ म-स मर्धात्मा । १४. रा$_2$ फ म-पादयोः ॥ १५. रा$_2$ फ म-वर्जं—स कृतां० । १६. रा$_2$ फ म-नास्ति ॥ १७. रा$_2$ फ-वर्जं—निष्पादितो । म-०तितं । १८. रा$_2$ फ म-मे सफलं जन्म । १९. रा$_2$ फ-संवृत्तश् । म-संपूर्णश् । २०. रा$_2$ फ-काकुत्स्थं स्वां पुरीं ॥ २१. भ-कोषं । २२. रा फ म-कोषागारं ॥

५२] भवतस् तेजसा सर्वं[1] कृतं बहु-गुणं मया ॥५४॥ [५३
तथा ब्रुवाणं भरतं[2] दृष्ट्वा तं[2] भ्रातृ-वत्सलम् ।
५३] मुमुचुर् वानरा बाष्पं राक्षसश्[3] च वि-भीषणः[3] ॥५५॥ [५४
ततः प्र-हर्षाद् भरतम् अङ्कम् आ-रोप्य राघवः ।
५४] ययौ तेन वि-मानेन स-सैन्यो भरताऽऽश्रमम् ॥५६॥ [५५
भरताऽऽश्रमम् आ-साद्य स-सैन्यो[4] भरताऽग्रजः[4] ।
५५] अव-तीर्य विमानाऽग्रात् ततस्[5] तस्थौ[5] मही-तले ॥[6]५७॥ [५६
अब्रवीच् च तदा रामस् तद् वि-मानं मनो-जवम् ।
५६] वह वैश्रवणं देवम् अहम्[7] आ-ज्ञापयामि ते[7] ॥५८[6]॥ [५७
अथ[8] रामाऽभ्यनुज्ञातं[8] तद् वि-मानं मनो-जवम् ।
५७] उत्-तरां दिशम् आ-स्थाय जगाम धनदाऽऽलयम् ॥५९॥ [५८
वि-मानं पुष्प-कं दिव्यं सर्वर्तुकम् अन्-उत्तमम् ।
N] राम-वाक्य-प्रमुदितं जवेन धन-दं ययौ ॥६०[9]॥ [५९
तत् तु वैश्रवणो दृष्ट्वा स्व-विमानम् उवाच ह ।
५८] रामम् एव वहस्व त्वम् उप-तिष्ठंश् (?ष्ठ) च मां स्मृतः(म्) ॥६१॥ [N
तत्[10] तु[10] वैश्रवणाऽऽज्ञप्तम् उपाऽतिष्ठच् च राघवम् ।
५९] उप-लभ्य च वृत्ताऽन्तं पूजयामास राघवः ॥[9]६२॥ [N
गते तु तस्मिन् कृत-सम्प्रणामो[11]
बद्धाऽञ्जलिर् भ्रातृजनाऽनुयातः ।
प्र-चक्रमे धर्म-विधान-गोप्ता
N] ततो गुरूणाम् अभि-वादनाय ॥६३[12]॥ [N
पुरो-हितस्याऽथ[13] समेत्य[13] राघवो
बृहस्पतेः शक्र इवाऽमराऽधिपः ।
नि-पीडय पादौ पृथग्[14] आसने शुभे[14] ।
N] सहैव तेनोप-विवेश वीर्य-वान् ॥६४॥ [६०

इत्यार्षे रामायणे युद्ध-काण्डे[15] भरत-समागमो[16] नामाऽष्टोत्तरशततमः सर्गः ॥ १०८ ॥

---

१. ल₂-पूर्वं ॥ २. भ-रामेण भरतं । ३. रा२ फ-नागरश्च जनस्तथा । म-रक्षसां स्वजनास्तथा ॥ ४. रा२ फ म-राघवः सत्यविक्रमः । ५. फ म-अवतस्थे । ६. अ-नास्ति ॥ ७. रा२ फ म-अनुजानामि गम्यतां ॥ ८. म-ततो राममनु० ॥ ९. रा२ फ म-नास्ति ॥ १०. रा१ प्र भ-तत्र ॥ ११. रा१ ल१ ल२ ब अ प्र-सकृत्प्र० । १२. म भ-नास्ति ॥ .१३ रा२ फ म-०स्यात्मसमस्य । १४. रा२ फ म-ज्वलनार्कसन्निभौ ॥ १५. ब-त्रुटितः । प्र भ-लंकाकांडे । १६. आभ्युदयिके भरत० ॥

सु-षेणं जाम्ब-वन्तं च केसरिं[1] च महा-बलम्[1] ।
१] अभि-वाद्य[2] च सु-ग्रीवं वि-नयेन परं-तपः ॥१ ॥[N
N] अभ्य्-अवादयत प्रीतो भरतः प्लवगर्षभान् ।[3]
अथाऽब्रवीद् राज-पुत्रः सु-ग्रीवं प्लवगेश्वरम् ॥[4]२ ॥[N
२] परि-ष्वज्य महा-तेजा भरतो[5] धर्म-वत्सलः[5] ।
त्वम्[6] अस्माकं चतुर्णां च[6] भ्राता सु-ग्रीव पञ्चमः ।
३] सौहार्दाज् जायते मित्रम् अप-कारोऽरि-लक्षणम् ॥३ ॥[N
शिरस्य् अञ्जलिम् आ-दाय कैकेय्य्-आनन्द-वर्धनः ।
४] बभाषे भ्रातरं ज्येष्ठं रामं सत्य-पराऽऽक्रमम् ॥४ ॥[१
पूजिता मामकी[7] माता दत्तं राज्यम् अरिं-दम[8] ।
५] तथैवाऽहं प्रति-ददे यथैव त्वं स(?च)माऽददः ॥[9]५ ॥[२
धुरम् एकाकिना[10] न्य्-अस्तं[10] वृषभेण बलीयसा ।
६] कु-गौर्[11] इव[11] गुरु-भारं न वोढुम् अहम् उत्-सहे ॥६ ॥[३
वारि-वेगेन महता भिन्नः सेतुर्[12] इव क्षरन्[12] ।
७] वार्य्-ओघम्[13] इव मन्येऽहं राज्यं छिद्रम्[14] अ-संवृतम्[14] ॥७ ॥[४
खरो वा गतिम् अश्वस्य मर्त्यो वा शकुनेर् गतिम् ।[15]
८] नाऽन्वेष्टुम्[16] उत्-सहे देव तव मार्गम् अरिं-दम ॥८ ॥[५
यथा चाऽऽरोपितो[17] वृक्षो जातश्[18] चाऽन्तर्-निवेशने[18] ।
९] महांश् चैव दुरा-रोहो महा-स्कन्धः[19] प्रशाख-वान्[19] ॥[20]९ ॥[६

---

१. रा२ फ म–कपिं केशरिणं तथा । २. रा२ फ म–अभिगम्य ॥ ३. भ–नास्ति । अतः परमधिकः पाठः—रा२ फ म–तं परिष्वज्य सुग्रीवश्चिराद्भ्रातृसमागमे । अंके भरतमारोप्य परिष्वज्य च पीडितम् । ४. रा२ फ म–ततोऽब्रवीत्तं भरतः प्रीतेनाऽन्तरात्मना ॥ ५. रा२ फ म–सुग्रीवं प्लवगोत्तमं । ६. रा२ फ म–भवांश्चतुर्णामस्माकं ॥ ७. रा२ फ म–मेऽधिकं । ८. रा२ फ म–इदं त्वया । ९. रा२ फ म–वर्जं—तद्ददामि पुनस्तुभ्यं यथा मह्यं भवान्ददौ ॥ १०. रा२ फ म–एतां समभ्यूढाम् । ११. म–पृथिव्यास्तु ॥ १२. म–सेतुमिवाक्षतम् । १३. रा२ फ म–दुर्वोढुम् । भ–दुर्धर्षम् । १४. रा१ ल१ ल२ ब अ प्र–छिन्नमसं० ॥ भ–छिद्रसमन्वितं ॥ १५. रा१ ल१ ल२ ब अ प्र भ–गतिं खर इवाश्वस्य हंसस्येव च वायसः । १६. भ–नान्वेतुम् ॥ १७. भ–तु रो० । १८. भ–वर्जं—जनैः श्रान्तनि० । १९. भ–वर्जं—महांश्चैव प्रतापवान् । २०. रा२ फ म–नास्ति ॥

यश् चाऽपि पुष्पितो भूत्वा फलानि न वि-दर्शयेत्[1] ।
१०] तस्य नाऽर्थो(ऽऽप्यो)भवेद् अर्थो यस्य हेतोः स रोप्यते ॥[2]१०॥[७
उपमैषा महा-बाहो तवाऽर्थे रघु-नन्दन ।[3]
११] तद् अस्मान्[4] वत्सलो[4] भूत्वा भृत्यान् भक्तांश् च पोषय ॥११॥ [८
अद्य त्वाम् अनु-पश्यन्तु अभि-षिक्तं नराऽधिपाः[5] ।
१२] प्र-तपन्तम् इवाऽऽदित्यं मध्याऽह्ने दीप्त-तेजसम् ॥१२॥ [९
तूर्य-सङ्घात-निर्घोषैः काञ्ची-नूपुर-निःस्वनैः ।
१३] मधुरैर् गीत-शब्दैश् च प्र-तुष्यस्व[6] नराऽधिप[6] ॥१३॥ [१०
यावद् आ-वर्तते चक्रं तावती ते वसुं-धरा ।
१४] तस्यास् त्वम् अपि सर्वस्याः स्वामि-त्वम् अनु-चिन्तय[7] ॥१४॥ [११
भरतस्य वचः श्रुत्वा रामः सत्य-पराऽऽक्रमः[8] ।
१५] तथेति सम्प्रति-श्रुत्य आ-सने समुपाऽविशत् ॥१५॥ [१२
ततः शत्रुघ्न-वचनात्[9] निपुणाः श्मश्रु-वर्धकाः[10] ।
१६] सुख-हस्ताश् च शीघ्राश्[11] च राघवं पर्युपाऽऽसते[12] ॥१६[13]॥[१३
पूर्वं च भरते स्नाते लक्ष्मणे च महा-बले ।
१७] सु-ग्रीवे वानरेन्द्रे च राक्षसे च वि-भीषणे ॥[14]१७॥[१४
विशोधित-जटः स्नातश् चित्रमाल्याऽनुलेपनः[15] ।

१. रा$_2$ फ म-प्रदर्श० । २. रा$_2$ फ म-अर्थं नानुभवे यस्तु यैर्येदर्थं प्ररोपितः । ल$_2$-४-र्थपादादारभ्य ११-शश्लोकस्य तृतीयपादं यावत् नास्ति ॥ ३. रा$_1$ ल$_1$ ब अ प्र-एषोपमा महाराजस्त्वदर्थं कल्पिता मया । भ-एषोपमा महाराजस्त्वदर्थं संहिता मया । ४. रा$_2$ फ-०स्मान्वृषभो । म-०स्माकं पतिर् । भ-०स्मान्नृपतिर् ॥ ५. रा$_2$ फ-अरिंदम ॥ ६. फ-०स्व जयस्व च । म-प्रतिबुध्यस्व राघव । भ-तोषयन्त्विह वंदिनः ॥ ७. रा$_2$ फ म भ-अभिवर्तय ॥ ८. रा$_2$ फ म-परपुरंजयः ॥ ९. रा$_2$ फ म-०ज्ञनिर्दिष्टा । १०. रा$_1$ ल$_1$ भ-०र्धनाः । ११. रा$_1$ ल$_1$ ल$_2$ ब प्र-श्लाघ्याश् । १२. ल$_2$ ब-०सत । म-पर्युपस्थिताः । १३. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब अ प्र-उपतस्थुर्जलस्नानकर्मदैवविदो जना । *वासांसि चांगरागाणि द्रव्याणि सुरभीणि च ॥ माल्यानि च विचित्राणि दिव्यान्याभरणानि च । *तान् दृष्ट्वा राघवो वीरो यथाक्रममुपस्थितान् ॥ उवाच परमप्रीतः सर्वानेवानुजीविनः । भरतं लक्ष्मणं चैव सुग्रीवं सविभीषणम् ॥ तांस्तानिच्छाम्यहं द्रष्टुं पृथक् पृथगुपस्थितान् । *वानरान्नृक्षरक्षांसि स्नापयामासुरंतरे ॥ १४. म-नास्ति ॥ १५. रा$_2$-०लेपिनः ।

*अ-नास्ति ।

१८] दिव्याऽऽभरण-पुष्टाऽङ्गः श्री-मान् ज्वलित-कुण्डलः ।[1]
१९पू] महाऽर्ह-वसनो रामस् तस्थौ देव-श्रिया ज्वलन् ॥[2]१८॥[१५
सु-ग्रीवो हनु-मांश् चैव महेन्द्रोपेन्द्र-संनिभौ ।
N] स्नातौ दिव्याऽम्बर-धरौ रेजतुः शुभ-कुण्डलौ[3] ॥१९[4]॥[N
१९उ] नन्दि-ग्रामे जटाश्[5] छित्वा[6] भ्रातृभिः सह राघवः ।
N] स्नातो[7] वि-पाप्मा[7] बल-वान् इक्ष्वाकु-कुल-वर्धनः[8] ॥२०॥ [N
प्रति-कर्म च रामाय कारयामास वीर्य-वान् ।
N] लक्ष्मणाय च लक्ष्मी-वान् भरतः सत्य-विक्रमः ॥२१[9]॥[१६
प्रति-कर्म च सीतायाः सर्वा[10] दशरथ-स्त्रियः ।
२०] आत्मनैव[11] तदा चक्रुर्[11] मनस्विन्यो मनो-हरम्[12] ॥२२॥ [१७
ततो राघव-पत्नीनां[13] सर्वासाम् एव शोभनम्[14] ।
२१] चकार यत्नात् कौसल्या प्र-हृष्टेनान्तर्-आत्मना ॥[15]२३॥[१८
ततः शत्रुघ्न-वचनात्[16] सु-मन्त्रो नाम सारथिः ।
२२] योजयित्वाऽति-चक्राम[17] रथं सर्वाऽङ्ग-भूषितम्[18] ॥२४॥ [१९
अर्क-मण्डल-सङ्काशं दिव्यं दृष्ट्वा रथोत्तमम्[19] ।
२३] आ-रुरोह महा-बाहू[20] रामः सत्य-पराऽऽक्रमः ॥२५[4]॥ [२०
N] हरि-युक्तं सहस्राऽक्षो रथम् इन्द्र[21] इवाऽन्-अघः[22] ।
२४उ] प्रययौ तैः[23] सहाऽऽस्थाय[23] राघवो ज्वलितः श्रिया ॥२६॥ [२७

---

१. रा$_2$ फ—नास्ति ॥ २. म—नास्ति ॥ ३. रा$_2$ फ—शुभलक्षणौ । ४. भ—नास्ति ॥ ५. रा$_2$—वर्जं—जटां । ६. रा$_2$ म भ—हित्वा । ७. म—महावीर्यश्च । ८. म—॰कुलनंदनः ॥ ९. रा$_1$ भ—नास्ति ॥ १०. म—चक्रुः ॥ ११. फ—आसनेन ततस्तस्या । १२. रा$_2$ फ म—महाप्रभाः ॥ १३. रा$_2$ फ म—वानरप॰ । १४. म भ—वर्जं—॰ना । १५. रा$_2$ फ म—अलंकारं चकाराथ कौशल्या पुत्रगर्धिनी । अतः परमधिकः पाठः—भ—वर्जं—तरुण्यः शौचसंपन्ना एकतः शुभलक्षणाः । सुग्रीवपत्नीं सीतां च द्रष्टुं नार्यः समागताः ॥ १६. रा$_2$ फ म—॰प्रनिर्दिष्टः । १७. रा$_2$ फ म—॰स्त्वाभ्युपागच्छद् । १८. रा$_2$ फ—॰ङ्गसुंदरं । म—॰ङ्गशोभनं । १९. रा$_2$ फ म—महारथम् । २०. म—महातेजा ॥ २१. अतः परमधिकः पाठः—रा$_1$ ल$_1$ ल$_2$ ब अ प्र भ—सुग्रीवो हनुमांश्चैव राक्षसश्च विभीषणः । स्नाता दिव्यांबरधराः श्लक्ष्णाः कुण्डलधारिणः ॥ वराभरणसंपन्नाः सर्वतस्ते वनौकसः । आरोहत रथं शीघ्रमिति राम उवाच तान् ॥ लक्ष्मणादींस्थितान्दृष्ट्वा आरूढो रथिनां वरः । सुग्रीवो राक्षसेन्द्रश्च द्रष्टुं नगरमुत्सुकौ ॥ २२. ल$_2$—॰वानुगः । म—इंद्रविमानवत् । २३. रा$_2$ फ म—रथमास्थाय । भ—तैः समास्थाय ॥

जग्राह भरतो रश्मीन्[1] शत्रु-घ्नश् छत्रम् आ-दधे[2] ।
२५] लक्ष्मणो[3] व्यजनं गृह्य राघवं[4] पर्य्-अवीजयत् ।[5] [२८
N] श्वेतं च वाल-व्यजनं सु-ग्रीवो वानरेश्वरः ॥२७॥
अपरं चन्द्र-सङ्काशं दिव्यं[6] दृष्ट्वा महा-रथम् ।
N] आ-रुरोह महा-बाहू[6] राक्षसेन्द्रो वि-भीषणः ॥२८॥ [२९
ऋषि-सङ्घैस् तदाऽऽकाशे देवैश् च स-मरुद्गणैः ।
२६] स्तूयमानस्य रामस्य शुश्रुवे मधुरो ध्वनिः[7] ॥[8]२९॥ [३०
नव-नाग-सहस्राणि ययुर्[9] आ-स्थाय वानराः[9] ।
२८] मानुषं वि-ग्रहं कृत्वा सर्वाऽऽभरण-भूषिताः ॥३०॥ [३२
शङ्ख-भेरी-निनादैश् च दुन्दुभीनां[10] च निः-स्वनैः ।
२९] प्र-ययौ[11] पुरुष-व्याघ्रः[11] स्वां पुरीं सम्प्र-हर्षयन्[12] ॥३१॥ [३२
३०पू] अयोध्यायां तु[13] सचिवा राज्ञो दश-रथस्य ये[14] ।
N] शत्रु-घ्नं तु पुरस्-कृत्य मन्त्रयित्वा सु-निश्चितम् ॥[15]३२॥ [२३
N] मति-मन्तौ महात्मानाव् अशोक-विजयौ तथा ।[16] [२४पू
३०उ] पुरो-हितं समा-नीय इदं वचनम् अब्रुवन् ॥[17]३३॥ [N
भवन्तो[18] राम-तुष्ट्य्-अर्थं[18] वृद्ध्य्-अर्थं नगरस्य च । [२४उ
३१] यथा-वद् द्रव्य-सम्भारं विधि-दृष्टम् अशेष-तः ॥[19]३४॥ [N
सर्वम् एवाऽभि-षेकाऽर्थं राज्याऽर्हस्य[20] महाऽऽत्मनः ।
३२] कर्तुम् अर्हथ रामस्य सर्व-मङ्गल-पूर्वकम् ॥३५॥ [२५
इति[21] ते[21] मन्त्रिणः सर्वे सं-दिश्याऽथ[22] पुरो-हितम्[22] ।

---

१. भ—धीमान् । २. प्र रा२ फ—आदधे । ३. भ—राघवं । ४. भ—लक्ष्मणो । ५. रा२ फ म—गृहीत्वा व्यजनं मूर्ध्नि लक्ष्मणः परवीरहा ॥ ६. रा२ फ म—नास्ति ॥ ७. रा२ फ—स्वरः । भ—स्वनः । ८. अतः परमधिकः पाठः—रा२ फ—वर्ज—पश्चात् शत्रुंजयं नाम कुंजरं पर्वतोपमम् । आरुरोह महाबाहुः सुग्रीवो वानरेश्वरः ॥ ९. रा फ म—आरूढा वानरेश्वराः । भ—आरूढाः शेषवानराः ॥ १०. म—कुंजराणां । ११. रा२ फ म—संप्रयातो नरव्याघ्रः । १२. रा२ फ म—पुरुषर्षभः ॥ १३. रा२ फ—च । १४. रा२ फ म—वर्ज—तु । भ—ते । १५. रा२ फ म—शत्रुघ्नं पुरतः कृत्वामंत्रयन्मंत्रकोविदाः । भ—नास्ति ॥ १६. रा१ ल१ ल२ ब अ प्र—अशोको विजयश्चैव शत्रुघ्नविजयावुभौ । भ—नास्ति । १७. रा२ फ म—नास्ति । भ—शत्रुघ्नश्च महातेजाः पुरोहितमथाब्रुवन् ॥ १८. रा२ फ—ततो रामस्य वृद्ध्यर्थं । म—क्षिप्रं रामस्य वृद्ध्यर्थं । भ—०मवृद्ध्यर्थं ॥ १९. रा२ फ म—नास्ति ॥ २०. रा२ फ म—तदर्हस्य । २१. रा२ फ म—इत्येवं । २२. रा२ फ म—नास्ति ।

३३] नगरान्[१] निर्-ययुर् द्रष्टुं[१] राम-दर्शन-बुद्धयः[२] ॥३६॥ [२६
दद्दशुस् ते समा-यान्तं राघवं स-पुरःसरम् ।
३४] भ्राजमानं च वपुषा ज्वलन्तम् इव पावकम् ॥[३]३७॥[३४
ते[४] वर्धयित्वा[४] राजानं[५] रामेण प्रति-नन्दिताः ।
३५] अनु-जग्मुर् महाऽऽत्मानं भ्रातृभिः परि-वारितम् ॥३८॥ [३५
अमात्यैर्[६] ब्राह्मणैश्[६] चैव[६] तथा[७] प्र-कृतिभिर् वृतः[७] ।
३६] श्रिया[८] वि-रुरुचे[८] रामो न-क्षत्रैर् इव चन्द्रमाः ॥३९॥ [३६
आशाभिर्[९] मधुराभिश् च[९] तथा स्वस्तिक-पाणिभिः[१०] ।
३७] प्रत्या-हरद्भिर् मुदितैर् मङ्गलाऽर्थम् अभि-ष्टुतः[११] ॥४०॥ [३७
अ-क्षता जात-रूपं च गावः कन्यास् तथा द्वि-जाः ।
३८] नरा मोदक-हस्ताश् च रामस्य[१२] पुर-तः स्थिताः[१२] ॥४१॥ [३८
रामः सख्यं च सु-ग्रीवे प्र-भावं[१३] च[१३] हनू-मतः ।
३९] वानराणां च तत् कर्म व्या-चचक्षेऽथ मन्त्रिषु ॥[१४]४२[१५]॥[३९पू
श्रुत्वा च वि-स्मयं जग्मुर् अयोध्या-पुर-वासिनः ।[१६] [४०
४०] वानराणां च तत् कर्म राक्षसानां च तद् बलम् ॥४३[१७]॥[३९उ
एवं[१८] सं-कथयन्न् एव[१८] रामो वानर-संवृतः ।[१९]
४१] हृष्ट-पुष्ट-जनाऽऽकीर्णाम्[२०] अयोध्यां प्र-विवेश[२१] ह[२१] ॥४४॥ [४१
पताक-मालाऽऽभरणां सिक्त-रथ्यां[२२] स-तोरणाम्[२२] ।
४२] पुष्पाऽऽचित-पथां[२३] रम्यां बाल-वृद्ध-निरन्तराम् ॥४५॥[२४][N

---

१. रा$_2$ फ म–नास्ति । २. रा$_2$ फ–राममंगलकांक्षिणः । म–रामदर्शनकांक्षिणः ॥ ३. रा$_2$ फ–विराजमानं वपुषा रथेनादित्यवर्चसा । म–विराजमानं वपुषा रथेनातिरथः स्वयम् । भ–विराजमानं वपुषा ज्व० ॥ ४. भ–वर्ज–ते वंदयित्वा । रा$_2$ फ–तमर्चयित्वा ॥ ५. रा$_2$ फ म–रामं तु । ६. रा$_2$ फ म–वर्जं–०णौघैश्च । भ–०णैः सर्वैर् । ७. रा$_2$ फ म–वर्जं–जातिभिः स्वजनस्तथा । ८. रा$_2$ फ म–वर्जं–पूजितो रु० ॥ ९. रा$_2$ फ म–मधुराभाषितः पौरैस् । १०. रा$_2$ फ–शक्तिकपा० । म–०कवादिभिः । ११. म भ–वर्जं–अभिप्लुतैः ॥ १२. म–राघवं प्रत्युपस्थिताः । भ–०स्य पुरवासिनः ॥ १३. रा$_2$–०वेति विक्रांतं । फ–विक्रांतश्च । म–०वे प्रभावश्च । १४. प्र–नास्ति । १५. भ–नास्ति ॥ १६. प्र भ–नास्ति । १७. रा$_2$ फ म–नास्ति ॥ १८. रा$_2$ फ म–द्युतिमानेतदाख्याय । १९. भ–नास्ति । २०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–हर्षपु० । २१. रा$_2$ फ म–अन्वपद्यत । भ–पुनरागतः ॥ २२. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–तथा सिक्तांतरापथां । २३. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–पुष्पचित्रस्थां । २४. रा$_2$ फ म–अत आरभ्य ५२-शश्लोकं यावन्नास्ति ॥

हर्म्य-प्रासाद-विधृतां रत्नौघैश्[1] च सु-पूजिताम्[1] ।
४३] ऊचुस् तदा तु वै रामम् इदम् अभ्य्-अन्तराः स्त्रियः ॥४६॥ [N
स-भर्तृणां[2] स-पुत्राणां तव दर्शन-काङ्क्षिणाम् ।
४४] दिष्ट्या हि[3] नः[3] कृतो देवैः प्र-सादः पुर-वासिनाम् ॥४७॥ [N
भृशं काकुत्स्थ कौसल्या त्वद्-अर्थं परि-तप्यते[4] ।
४५] निर्-विशेषं तदा सर्वे पुरे पुर-निवासिनः ॥४८॥ [N
अ-सूर्यम् इव खं राम हृत-रत्न इवोदधिः ।
४६] त्वया पुरम् इदं हीनं वि-चन्द्रा शर्वरी[5] यथा ॥४९॥ [N
अद्याऽयोध्या महा-बाहो अयोध्या प्रति-भाति नः ।
४७] परेषां प्रार्थमानानां त्वयि सन्नि-हिते हिते ॥५०॥ [N
चतुर्दश समा ह्य्[6] एताः शतानीऽव चतुर्-दश[6] ।
४८] वर्षा हि नो व्यति-क्रान्तास् त्वयि राम वनं गते ॥५१॥ [N
ईदृश-मधुराः[7] स्निग्धाः पथि[8] शुश्राव[8] राघवः ।
४९] नर-नारी-प्रयुक्तास् तु वाचः प्रीति-निदर्शनाः ॥५२॥ [N
आ-विद्धान्य् उत्तरीयाणि नरैस्[9] तत्-पुर-वासिभिः[9] ।
नि-हत्य राघवः[10] शत्रुम् अयोध्यां पुनर् आ-गतः ।
N] इत्य् एवं वदतां तत्र नराणां श्रूयते[11] ध्वनिः ॥५३॥ [N
इक्ष्वाक्व्-अध्युषितां रम्यां प्र-विष्टो[12] मनुजर्षभः[13] ।[14] [४३
५०] पितुर् भवनम् आ-साद्य प्र-विवेश[15] महा-यशाः[15] ।
N] कौसल्यां च सु-मित्रां च कैकेयीं चाऽभ्य्-अवादयत् ॥५४॥ [४५
मूर्ध्न्य्[16] उपाऽऽघ्राय[16] कौसल्या ताव् उभौ राम-लक्ष्मणौ ।
५१] अङ्के सीतां समा-रोप्य[17] शोकम्[18] आत्म-गतं जहौ[18] ॥५५[19]॥[N

---

१. भ—नानास्तम्भसमुच्छ्रितां ॥ २. भ—वर्जं—सभ्रातॄणां । ३. भ—वर्जं—राजन् ॥ ४. भ—अभित० ॥ ५ भ—रजनी ॥ ६. भ—वर्जं—हीमाश्चतुर्दश शतानि च ॥ ७. ल१ ल२ ब भ—ईदृशा म० । ८. भ—वर्जं—विशुश्राव स ॥ ९. रा१ ल१ ल२ ब अ प्र—निर्गत्य पु० । १०. म—वर्जं—रावणं । ११. म—शुश्रुवे ॥ १२. भ—प्रयाते । १३. रा२ फ—०जेश्वरः । भ—०जर्षभे । १४. भ—अतः परं सर्गसमाप्तिर्दृश्यते—इत्यार्षे लंकाकांडे अयोध्याप्रवेशः ॥ १५. रा२ फ—०विश्य सुम० ॥ १६. रा२ फ भ—मूर्धन्याघ्राय । १७. रा२—समारोह्य । १८. रा२ फ म—बाष्पमानन्दहर्षजम् । १९. अतः परमधिकः पाठः—रा२ फ म—मुमोच परमप्रीता प्रहृष्टेनांतरात्मना ॥

अथाऽब्रवीत् तदा[1] रामो[1] भरतं धर्म-चारिणम्[2] ।
५२] अर्थ-संहितया[3] वाचा धर्म-हेत्वर्थ-युक्तया[4] ॥५६॥ [४४
यद् एतद् भवनं[5] श्रेष्ठं[5] साऽशोकवनिकं महत् ।
५३] वैडूर्यकनकाऽऽकीर्णं[6] सु-ग्रीवस् तत्र मोदताम् ॥५७॥ [४६
यश् चैतत् सु-महद् दिव्यम् उप-स्थानं गतं महत् ।[7]
५४] वि-भीषणाय तत् सौम्य दीयतां सुधया सितम् ॥५८[8]॥ [N
५५पू] तथैव वानरेन्द्राणां यथा-क्रम-विहारिणाम् ।
N] भृङ्गार-वाटिकां दिव्यां फल-पुष्पैश् च शोभिताम् ॥[9]५९[10]॥[N
N] अङ्गदप्रमुखाऽऽदीनां शुभान्य् आ-यतनानि च ।[10]
५५उ] दीयतां क्षिप्रम् आ-वासो यथोचितम् अरिं-दम ॥६०[11]॥[N
तस्य तद् वचनं श्रुत्वा भरतः सत्य-विक्रमः ।
५६] पाणौ गृहीत्वा सु-ग्रीवं प्र-विवेश[12] महद् गृहम्[12] । [४७
वि-भीषणं तथा वीरो वानरान् अपरांस् तथा ॥[13]६१॥[N
५७] ततस् तैल-प्रदीपांश् च पर्यङ्काऽऽस्तरणानि च ।
गृहीत्वा प्राऽविशंस्[14] तत्र स्त्रियो भरत-नोदिताः[14] ॥६२॥ [४८
५८] तम्[15] उवाच महा-तेजा[15] सु-ग्रीवं राघवाऽनुजः[16] ।
अभि-षेकाय रामस्य दूतान् आ-ज्ञापय स्वयम् ।[17] [४९
५९] प्र-भाते पुष्य-योगेन राघवः श्वोऽभि-षिच्यताम्[18] ॥[19]६३॥[N
ततः[20] स वानर-श्रेष्ठः[20] सौवर्णांश् चतुरो घटान् ।
६०] चतुर्णां कपि-मुख्यानां ददौ रत्न-विभूषितान् ॥६४॥[५०

---

१. रा$_1$ ब अ प्र रा$_2$ फ भ-राजपुत्रं । ल$_1$ ल$_2$-राजपुत्रो । २. रा$_2$ फ म-धर्मिणां वरं । ३. रा$_2$ फ म-अर्थोपहि० । ४. रा$_2$ फ-वचनमिदमर्थवत् । म-वचनं चेदमुत्तमं ॥ ५. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-त्कमश्रेष्ठं मे । रा$_2$ फ म-०नं मुख्यं । ६. फ म-मुक्तावैडूर्यसंकीर्णं ॥ ७. म-अत आरभ्य ६०-तमश्लोकं यावन्नास्ति । ८. रा$_2$ फ-मैन्द्रद्विविदाय परमं जाम्बवत्प्रमुखाः कपिः । हरिवृंदाय सर्वेभ्यो वानरेभ्यः पृथक् पृथक् ॥ ९. भ-नास्ति । १०. रा$_2$ फ-शयनासनपानादियुक्तानि भवनानि च । वृक्षोदकविबोपेता धर्मावर्जितवसूनि च ॥ ११. रा$_2$ फ-दिव्यजनहस्ताश्च दासा दास्यश्च संगताः । गायका नर्तकाश्चैव कुर्वते तेषु संमदम् ॥ १२. रा$_2$ फ म-प्रावेशयत तद् । १३. रा$_2$ फ म-नास्ति ॥ १४. रा$_2$ फ म-वर्ज—०सच्छीघ्रं शत्रुघ्नं (? घ्नः) संप्रचोदितः ॥ १५. रा$_2$ फ म-तत्रोपविष्टं प्रोवाच । १६. रा$_1$-रावणानुगः । १७. रा$_1$ ल$_1$ ल$_2$ ब अ प्र-अभिषेचनार्थं देवस्य दूतमाज्ञापय प्रभो । १८. भ-०षेक्ष्यते । १९. रा$_2$ फ म-नास्ति ॥ २०. रा$_2$ फ म-तच्छ्रुत्वा वानरेन्द्रस्तु ॥

यथा प्रत्यूष-समये चतुर्णां सागराऽम्भसाम् ।
६१] पूर्णैर् घटैर् अनु-उदिते[1] शीघ्रम्[2] आ-गम्यताम्[3] इति[3] ॥६५॥ [५१
एवम् उक्त्वा महाऽऽत्मानो वानराः पर्वतोपमाः[4] ।
६२] उत्-पेतुर् गगनं शीघ्रं गरुडा[5] इव वेगिनः[5] ॥६६॥ [५२
जाम्ब-वांश् च सु-षेणश् च वेग-दर्शी च वानरः ।
६३] ऋषभश् च महा-बाहुश् चत्वारोऽपि वनौकसः ॥[6]६७॥ [५३
नदी-पतिभ्यश्[7] चतुर्भ्यो[7] जलं कुम्भैर् उपाऽहरन्[8] । [५४
६४] मैन्द-प्रभृतयस् तत्र वानरेन्द्र-प्रचोदिताः ॥[9]६८॥ [N
ऋषभो दक्षिणात् तूर्णं सम्-उद्राज् जलम् आऽहरत्[10] ।
६५] रक्त-चन्दन-शाखाभिः सं-वृते[11] काञ्चने[12] घटे[12] ॥६९॥ [५६
जाम्ब-वान् पश्चिमात् तोयम् आ-जहार स सागरात् ।[13]
६६] रत्न-कुम्भेन[14] महताऽगुरु-पल्लव-शोभिना[15] ॥७०॥ [५७
वेग-दर्शी[16] व्यति-क्रान्त[16] उत्-तराद् उदधेर् जलम् ।[17] [५८पू
६७] शोभितं फुल्ल-शाखाभिर् अ-चिराद् आनयच् छिवम् ॥[18]७१॥ [N
सु-षेणोऽङ्गद-केयूरैर् मण्डिते[19] कलशे तथा ।[20]
६८] पानीयम् आऽनयत् तत्र सम्-उद्राद् इतरात् त्वरन् ॥[20]७२॥ [५५
एवम् आभिषेचनिकं शत्रु-घ्नः सचिवैर् वृतः ।[21]
६९] पुरो-हिताय श्रेष्ठाय गुरवे स न्य्-अवेदयत् ॥[22]७३॥ [५९उ
ततः प्र-भाते वि-मले मुहूर्तेऽभि-जिति प्र-भुः ।[23] [N
७०] वसिष्ठः पुण्य-योगेन ब्राह्मणैः परि-वारितः ॥[24]७४॥

---

१. रा$_1$ ल$_1$ प्र म–०दितैः । २. म–तूर्णं । ३. रा$_2$ फ म–आगंतुमर्हथ ॥ ४. रा$_2$ फ म–नगसन्निभाः । ५. भ–पवना इव वेगिताः ॥ ६. रा$_2$ फ म–नास्ति ॥ ७. रा$_2$ फ म–वर्जं—नदीशतानां पंचानां । ८. रा$_2$ फ म–उपस्थिताः । ९. रा$_2$ फ म–नास्ति ॥ १०. रा$_2$ फ म–आनयत् । ११. म भ–०तैः । १२. ल$_1$ म–०नैर्घटैः ॥ १३. रा$_2$ फ–नलश्च पश्चिमात्तूर्णं समुद्राज्जलमानयत् । म–नलस्तु पश्चिमात्तूर्णमाज० । १४. रा$_1$ रा$_2$ फ म भ–रक्तकुं० । १५. रा$_2$ फ म–०ता शिवं मारुतविक्रमः ॥ १६. र$_1$ ल$_1$ ल$_2$ अ प्र–०दर्श्यप्रतिक्रान्ताद् । १७. रा$_2$ फ म–हनुमानथ पूर्वात्तु समुद्राज्जलमानयत् । १८. रा$_2$ फ म–नास्ति ॥ १९. ल$_1$ ल$_2$ ब प्र–भूषिते । २०. रा$_2$–नास्ति । फ म–समुद्रादुत्तरात्तूर्णमंगदो जलमानयत् ॥ २१. रा$_2$–राघवस्याभिषेकार्थमृत्विग्भ्यश्च न्यवेदयत् । फ म–अभिषेकं तु रामस्य शत्रु० । २२. रा$_2$–नास्ति ॥ २३. रा$_2$ फ म–नास्ति । २४. रा$_2$ फ म–ततः पुरोहितो वृद्धो वसिष्ठो ब्राह्मणैः सह ॥

रामं रत्न-मये पीठे प्राङ्-मुखं[१] सह सीतया[१] । [६०
७१] उप-वेश्य महाऽऽत्मानं महर्षि-विदितेन[२] च[२] ॥[३]७५॥[N
शास्त्र-दृष्टेन च तदा विधिना विधि-वद् वि-भुः[४] ।[३]
७२] राघवस्याऽभि-षेकाऽर्थं[६] मन्त्रिभ्यः[५] स[५] न्य्-अवेदयत् ॥[६]७६॥
वसिष्ठो वाम-देवश् च जाबालिः कश्यपस्[७] तथा[७] ।
७३] कात्यायनो भरद्वाजो वि-जयश् च महा-यशाः ॥[८]७७॥[६१
७४उ] अभ्य्-अषिञ्चन् नर-वरं प्र-सन्नेन सु-गन्धिना ।
सलिलेन सहस्राऽक्षं वसवो वासवं यथा ॥७८[९]॥[६२
७५] ऋत्विग्भिर् ब्राह्मणैः पूर्वं[९] कन्याभिर् मन्त्रिभिस् तथा ।[९]
बल-मुखैः प्र-हृष्टैश् च अभि-षिक्तः[१०] स राघवः[१०] ॥७९॥ [६३
७६] सर्वौषधि-रसैश् चैव दैवतैर्[११] नभसि[११] स्थितैः ।
N] चतुर्भिर् लोक-पालैश् च समेतैर् भूत-भावनैः ।[११] [६४
अभि-षिक्तो रराजाऽथ श्रिया परमया युतः ॥[१२]८०॥[N
७७] छत्रं तस्य[१४] तु जग्राह[१४] शत्रु-घ्नः पाण्डुरं शुभम्[१५] ।
शुक्लं[१६] च वाल-व्यजनं सु-ग्रीवो वानरेश्वरः ॥८१॥
७८] अपरं चन्द्र-सङ्काशं वाल-व्यजनम् उत्-तमम् ।
हृष्टो रामस्य जग्राह राक्षसेन्द्रो वि-भीषणः ॥८२॥ [६८
७९] मालां ज्वलन्तीं वपुषा काञ्चनीं शातपुष्कराम् ।[१७]
राघवाय ददौ वायुर् वासवेन प्र-चोदितः ॥८३॥ [६९

---

१. रा$_2$ फ म—ससीतमुपवेशयत् । २. भ—०विहितेन तु । ३. रा$_2$ फ म—शास्त्रदृष्टेन विधिना महर्षिविदितेन च ॥ ४. ल$_1$ ल$_2$ ब—प्रभुः । ५. भ—सद्विप्रेभ्यो । ६. रा$_2$ फ म—नास्ति । अतः परमधिकः पाठः—भ—अभिषेकाय रामस्य शतक्रतुपुरोगमाः । आगच्छन्देवताः सर्वा गगनाद्रथसंस्थिताः ॥ घृताची-प्रमुखास्तत्र आगच्छन्नप्सरोगणाः । विश्वावसुमुखाः सर्वे गन्धर्वा यक्ष-किन्नराः ॥ दिलीपप्रमुखास्तस्य पितरः समुपागताः । ब्रह्मा शम्भुश्च भगवान् बृहस्पतिपुरोगमाः ॥ विश्वेदेवाः समरुतो रामाभ्युदयलालसाः ॥ ७. रा$_2$ फ म—अथ कश्यपः । ८. रा$_2$ म भ—वर्जं—नास्ति ॥ ९. भ—नास्ति । १०. रा$_2$ फ म—सोऽभिक्तः सनैगमैः । भ—०क्तः शनैः शनैः ॥ ११. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—०तैश् च भुवि । १२. भ—नास्ति । १३. रा$_2$ फ म—नास्ति ॥ १४. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—जग्राह तस्यैव । १५. रा$_2$ फ म—महत् । १६. रा$_2$ फ म—श्वेतं ॥ १७. रा$_2$ फ म—विभ्राजमानो वपुषा मालां कांचनपुष्पिताम् ॥

८०] यक्षाऽध्यक्षः[1] समा-गम्य मणि-रत्नं महा-द्युतिम्[2] ।[3]
मुक्ता-हारं तु[4] रामाय[4] ददौ शक्र-प्रचोदितः[5] ॥८४॥ [७०

८१] ऋषि-सङ्घैस् तदाऽऽकाशे देवैश् च स-मरुद्गणैः ।[6] [N
स्तूयमानस्य रामस्य शुश्रुवे मधुरो ध्वनिः[7] । [N

८२] प्र-गीतं[8] चाऽपि गन्धर्वैः प्र-नृत्तं[8] चाऽप्सरो-गणैः[9] ॥८५[10]॥
अभि-षेके प्र-वृत्ते[11] तु[11] तदा रामस्य धी-मतः । [७१

८३] मही सस्य-वती चैव[12] रस-वन्ति फलानि च[12] ।
गन्ध-वन्ति च माल्यानि तदा रामाऽभि-षेचने ॥८६॥ [७२

८४] ददौ[13] सहस्रम्[13] अश्वानां[14] धेनूनां च शतं शतम्[14] ।
शतं शत-गुणं चैव वृषाणां ब्राह्मणेषु च ॥[15]८७॥ [७३

८५] त्रिंशत् कोटी[16](?टीर्)हिरण्यस्य ब्राह्मणेभ्यो[16] ददौ पुनः[17] ।
यानाऽऽभरणवस्त्राणि शयनान्य्[18] आ-सनानि च[18] । [७४

८६] ब्राह्मणेभ्यो ददौ हृष्टो ग्रामांश् च बहु-शो वरान्[19] ॥[20]८८॥ [N
अर्क-रश्मि-प्रतीकाशां काञ्चनीं मणि-भूषिताम् ।

८७] सु-ग्रीवाय स्रजं दिव्यां प्राऽयच्छत्[21] स महा-रथः[21] ॥८९॥ [७५
वैडूर्य-मणि-चित्रे च वज्र-रत्न-परिष्कृते ।

८८] प्राऽयच्छद् वालि-पुत्राय सोऽङ्ग-दायाऽङ्ग-दे शुभे ॥९०॥ [७६
तथैव राक्षसेन्द्राय दिव्यान्य् आ-भरणानि च ।

N] ददौ प्रेम-युतान्य् अष्टौ तदा प्रीति-कराणि च ॥९१[22]॥ [N

---

१. भ–धनाध्यक्षः । २. भ–समायुतम् । ३. रा$_2$ फ म–रत्नाध्यक्षः समुद्रस्तु मणिरत्नं पुरस्कृतं । ४. रा$_2$–स रा० । फ म–समादाय । ५. रा$_2$ म–०प्रणोदितः ॥ ६. म–ऋषिसंघैस्तथा सिद्धैर्दैवतैः स० । भ–ऋषयस्तुष्टुवुश्चैनं वर्धयंतो जयाशिषा । ७. भ–स्वनः । ८. म–प्रगीताश्चापि गंधर्वाः प्रनृत्ताश् । भ–प्रजगुर्देवगंधर्वा ननृतुश् । ९. म भ–०गणाः । १०. रा$_1$ ल$_1$ ल$_2$ ब अ प्र–नास्ति ॥ ११. रा$_2$ फ म–तदर्हस्य । १२. रा$_2$ फ म–चापि फलवंतश्च पादपाः ॥ १३. रा$_2$ फ म–सहस्रशतं । १४. रा$_2$ फ–०नां च शतायुतं । म–इष्टानां धेनूनां च गवां शतम् । भ–धेनूनां सहस्रगुणितं तथा । १५. रा$_2$ फ म–ददौ दशवृषं पूर्णं द्विजेभ्यो मनुजर्षभः ॥ १६. रा$_1$–०टी सुवर्णस्य ब्राह्म० । रा$_2$ फ म–कोटीनां विंशतिं चैव हिरणस्य । भ–कोटिं हि । १७. रा$_2$ फ म–तदा । १८. रा$_2$ फ म–महार्हाणि च राघवः । १९. भ–बहून् । २०. रा$_2$ फ म–नास्ति ॥ २१. रा$_2$ फ म–०च्छत रघूत्तमः । भ–०च्छत्स महायशाः ॥ २२. रा$_2$ फ भ–नास्ति । म–पुष्पैर्मणिभिराबद्धं कांचनं हेमनिर्मितम् । विभीषणाय च ददौ रामः केयूरमुत्तमम् ॥

मणि-प्रवर-जुष्टं[1] च मुक्ता-हारम्[2] अनु-उत्तमम्[3]।
८९] ददौ रामोऽथ वैदेह्यै चन्द्र-रश्मि-सम-प्रभम् ॥[3]९२[4]॥[७७
हरीणां[5] चाऽपि मुख्याय[6] शुभान्य् आ-भरणानि च।
९०] अवेक्ष्य (?क्ष) माणो वैदेहीं प्र-ददौ वायु-सूनवे ॥[7]९३[8]॥[७८
अव-मुच्याऽऽत्मनः कण्ठाद् धारं जनक-नन्दिनी।
९१] वानरान्[9] वीऽक्ष्य तान्[9] (?०स्ते) सर्वान् भर्तारं च मुहुर्[10] मुहुः[10] ९४[७९
ताम् इङ्गित-ज्ञः सम्प्रेक्ष्य बभाषे रघु-नन्दनः[11]।
९२] प्र-यच्छ[12] सु-भगे हारं यस्य तुष्टाऽसि मैथिलि[13] ॥९५॥
पौरुषं वि-क्रमो बुद्धिर् यस्मिन्न् एतानि सर्व-दा[14]। [८०
९३] सा[15] ददौ[15] वायु-पुत्राय तं हारम् अ-सितेक्षणा ॥९६॥
हनू-मांस् तेन हारेण शुशुभे वानरर्षभः[16]।
९४] चण्डांऽशूऽत्कट-विद्धेन[17] श्वेताऽभ्रेण यथाऽचलः ॥९७॥ [८१
ततो द्विविद-मैन्दाभ्यां नीलाय पनसाय च।
९५] सर्वान् काम-गुणान् हारान् प्र-ददौ वसुधाऽधिपः ॥[18]९८॥[८२
सर्व-वानर-वृन्देभ्यो ये चाऽन्ये[19] वानरेश्वराः[19]।
९६] स[20] तेभ्यः[20] प्र-ददौ रामो भूषणानि यथाऽर्ह-तः[21] ॥९९[22]॥[८३
वि-भीषणोऽथ सु-ग्रीवो हनू-माञ् जाम्ब-वांस् तथा।[23]
N] सर्वे वानर-मुख्याश् च रामेणाऽक्लिष्ट-कर्मणा ॥१००॥[८४
एवं ते पूजिताः सर्वे कामैर्[24] अर्थैश् च[24] पुष्कलैः। · [८५पू
९७] उषित्वा[25] वानरा मासान् राक्षसर्क्षास् तथैव च ॥१०१॥[N

---

१. म—मणिरत्नजुष्टं। २. रा$_2$ फ—०हारभूषितं। ३. रा$_1$ ल$_1$ ल$_2$ ब—विभीषणसहायानां वासांस्याभरणानि च। ४. अ प्र—नास्ति ॥ ५. ल$_1$ ल$_2$—हारीणां। ब—हराणां। भ—वासांसि। ६. म—मुख्यानां। ७. रा$_1$—वर्ज—अवेक्ष्य मैथिली चैव हनूमंतं प्लवंगमं। ८. रा$_1$—नास्ति ॥ ९. रा$_2$ फ म—वर्ज—अवेक्ष्य वानरान्। भ—ऐक्षिष्ट वा०। १०. रा$_2$ फ म—पुनः पुनः ॥ ११. रा$_2$ फ म—जनकात्मजां। भ—राघवः प्रियां। १२. रा$_2$ फ म—वदस्व। १३. रा$_2$ फ म—भामिनि ॥ १४. रा$_2$ फ म—नित्यशः। १५. रा$_2$ फ म—प्रददौ ॥ १६. रा$_2$ फ—०रोत्तमः। १७. भ—चंद्रांशुराशिगौरेण ॥ १८. म—नास्ति। भ—सर्वकामगुणाम्भक्तान्प्र० ॥ १९. रा$_1$ ल$_1$ ल$_2$ ब अ प्र—चान्ये वानरोत्तमाः। म—चन्द्ररश्मिसमप्रभं। २०. फ म—सर्वेभ्यः। २१. फ—यथादितः। २२. अतः परमधिकः पाठः—भ—वर्ज—वासोभिर्भूषणैश्चैव यथार्हमतिपुष्कलैः ॥ २३. फ म—अत आरभ्य १११-तमश्लोकस्य पूर्वार्धं यावन्नास्ति ॥ २४. रा$_1$ ल$_1$ अ प्र—कामरत्नैश्। ल$_2$ ब—कामै रत्नैश्। २५. ल$_2$—उषिता ॥

आ-सनैः शयनैश् चैव वि-मानैश् चाऽपि पूजिताः ।[1]
९८] वियोगाऽऽकुलितैः[2] सर्वे[3] चेतोभिः सम्प्र-तस्थिरे ॥१०२॥[N
प्र-स्थितं तं हनू-मन्तम् उवाच रघु-नन्दनः ।
९९] हनू-मंस् त्वं मया[4] नाऽस्ति-सत्कृतो[4] हरि-पुङ्गव ॥१०३॥[N
तस्माद् वरं वृणीष्वेह[5] महत् कर्म कृतं त्वया ।
१००] एवम् उक्तोऽब्रवीद् रामं हर्षबाष्पाऽऽकुलेक्षणः[6] ॥१०४॥[N
यावद् राम-कथा[7] देव[7] पृथिव्यां प्र-चरेद् इह ।
१०१] तावद् देहे मम प्राणास् तिष्ठन्तु वर-दोऽसि चेत् ॥१०५॥[N
ततस् तु राघवोऽवोचत्[8] परि-ष्वज्याऽञ्जना-सुतम् ।
१०२] एवं भवतु भद्रं ते यावद् भूमिर् धरिष्यति ॥१०६॥[N
पर्वताश् च समु-उद्राश् च तावद् आयुर् अवाऽऽप्नुहि ।
१०३] बल-वान् अ-जरश् चैव तरुणो न जराऽन्वितः ॥१०७॥[N
मैथिल्य् अपि तदा चैनम् उवाच वरम् उत्-तमम् ।
१०४] उप-स्थास्यन्ति भोगास् त्वां स्वयम् एव हि मारुते ॥१०८॥[N
देव-दानव-गन्धर्वास् तथैवाऽप्सरसां गणाः ।
१०५] यत्र तिष्ठसि तत्र त्वां सेविष्यन्ते यथा-सुखम्[9] ॥१०९॥[N
फलान्य् अमृत-कल्पानि तोयानि वि-मलानि च ।
१०६] उत्-पत्स्यन्ते यथा-कामं स्मरणेन तवाऽन्-अघ ॥११०॥[N
एवम् अस्त्व् इति चैवोक्त्वा प्र-ययौऽसाव् अञ्जना-सुतः[10] । [N
१०७] ततो यथाऽऽगतं सर्वे यथाऽऽवासं ययुस् तदा ।१११।[८५उ
१०८पू] राम-चन्द्रस्य[11] रम्याश्[11] च कथयन्तः कथाः शुभाः । [१०१पू
N] तुष्टाः[12] सर्वे महाऽऽत्मानस्[13] ततस्[13] ते वानरर्षभाः ॥[14]११२॥
वि-सृष्टाः पार्थिवेन्द्रेण किष्किन्धां पुनर् आ-गताः । [८६
N] वि-भीषणस् तु रामेण प्रेषितः स्वां पुरीं ययौ ॥[15]११३[15]॥[८८उ

---

१. रा$_2$ भ-स्वन्नाः सुशयनाश्चैव मानार्थैश्चाभिपूजिताः । २. रा$_2$-०लिताः । ३. रा$_1$ ल$_1$ प्र भ-सर्वैश् ॥ ४. रा$_2$ भ-वर्जं—न जानासि प्रभावं ॥ ५. रा$_2$ भ-०णीष्वाद्य । ६. अ प्र रा$_2$-वर्जं—हर्षात्तं व्याकु० ॥ ७. रा$_2$ भ-राम कथा तेऽस्यां ॥ ८. रा$_2$ भ-वर्जं—०वश्चैवं ॥ ९. भ-यथामरं ॥ १०. रा$_2$-०नीसुतः । भ-०यौ साश्रुलोचनः ॥ ११. रा$_2$ भ-रामानुरागान् रम्यांश् । १२. म-वर्जं—हृष्टाः । १३. म-वर्जं—यथास्मा वै तथा । १४. भ-नास्ति ॥ १५. फ म-नास्ति ॥

ततस् तेषु प्र-यातेषु वानरेषु[1] रघूऽत्तमः[1] । [N
१०८उ] नित्याऽनुरक्तं[2] धर्म-ज्ञं[3] लक्ष्मणं वाक्यम् अब्रवीत् ॥११४॥[९०उ
आ-तिष्ठ धर्म-ज्ञ मया सहेमां[4]
गां[5] पूर्व-राजाऽध्युषितां बलेन[5] ।
तुल्यां पुरस्-तात् पितृभिर् वृतां[6] च[7]
१०९] त्वं यौवराज्ये धुरम् उद्-वहस्व ॥११५॥[९१
सर्वाऽऽत्मना पर्यनु-नीयमानो
यदा न सौमित्रिर् इयाय[7] योगम् ।
नि-युज्यमानो भुवि[8] यौवराज्ये
११०] तदाऽभ्य्-अषिञ्चद्[9] भरतं महाऽऽत्मा[9] ॥११६॥[९२

इत्यार्षे रामायणे युद्ध-काण्डे[10] रामाऽभिषेको नाम
नवोत्तरशततमः सर्गः ॥ १०९ ॥

[वं-११३]= [दशोत्तरशततमः सर्गः =[दा-१३१]

अहन्य् अहनि रामस् तु कार्याणि स्वयम् एव हि[11] ।[12]
१] प्रत्यवैक्षत[13] धर्माऽऽत्मा[13] सह भ्रातृभिर् अ-च्युतः ।
N] वेद-वेदाऽङ्ग-विद्भिश् च सम्प्र-धार्य[14] बलाऽबलम् ॥[15]१॥[N
धर्मेण रक्षतस् तस्य हृष्ट-पुष्ट-जनाऽऽकुला ।
२] बभूव पृथिवी सर्वा धनधान्यसमृद्धिनी ॥२[16]॥[N
अकाल-मृत्यु-भीर्[16] नैव[16] न च व्याल-कृतं भयम् ।
N] न च[17] व्याधि-भयं तत्र[17] रामे राज्यं प्र-शासति ॥३ ॥[९७

---

१. फ म-वर्ज—०रेष्वरिसूदनः । २. रा१ ल१ ल२ ब अ प्र-नित्यं युक्तं च । ३. फ म-मेधावी ॥ ४. रा१ ल१ ल२ ब अ प्र-समेतां । ५. रा२ भ-वर्ज—आसन्न-पूर्वां सुचितां कुलेन । ६. म-प्रवृत्तां ॥ ७. ल१ ल२ ब अ प्र-अवाप । फ म-उपैति । ८. फ म-नृप० । ९. ल१ ल२ ब अ प्र-ततोभ्य० । फ-ततस्तु पश्चाद्भरतोऽभिषिक्तः । भ-ततश्च पश्चाद्भरतोऽभिषिक्तः ॥ १०. रा१ ब प्र रा२ फ भ-लंकाकांडे ॥ ११. ल१ ल२ ब-वा । अ-तु । प्र-च । १२. फ म-नास्ति । १३. फ-ईजे यज्ञैर्बहुविधैः । म-ईजे बहुविधैर्यागैः । १४. ल२ ब प्र-सम्प्रदाय ॥ १५. फ म-नास्ति ॥ १६. रा१ भ-प्रमदा विधवा नासीत् । फ म-नापन्नयं न विधवा । १७. रा२-व्याधिभ्यो भयं किंचिद् ॥

निर्-दस्युर् अभवल् लोको नाऽन्-अर्थं[१] कश्-चिद् आऽविशत्[१] ।
३] न च[२] स्म[२] वृद्धा बालानां प्रेत-कार्याणि[३] कुर्वते ॥[४]४ ॥[९८
सर्वं[५] प्र-मुदितं चाऽऽसीत्[५] सर्वे धर्म-पराऽयणाः[६] ।
४] दृष्ट्वा धर्म-परं रामं नैवाऽहिंसन् परस्परम् ॥[७]५ ॥[९९
आसीद् वर्षसहस्राऽऽयुस् तथा पुत्रसहस्र-वान् ।
५] निर्-आमयो वि-शोकश् च रामे राज्यं प्र-शासति ॥६[८] ॥[१००
६पू] नित्य-पुष्पा नित्य-फलास् तरवस्[९] तत्र निर्-व्रणाः[९] ।　[१०२पू
N] पुष्प-वन्तस् तथा गुल्मा रामे राज्यं प्र-शासति ॥[१०]७ ॥[N
N] वीर्य-वत्यस[११] तथौषध्यः सर्वा[१२] रस-समन्विताः[१२] ।[१३]　[N
६उ] काले[१४] वर्षति[१४] पर्जन्यः सुख-स्पर्शश् च मारुतः ॥८ ॥[१०२उ
स्व-धर्मेषु[१५] प्र-वृत्ताश् च[१६] वर्णाः स्वैर् एव कर्मभिः ।[१७]　[१०३उ
७] आत्म-धर्म-परा लोका रामे राज्यं प्र-शासति ।[१८]
८पू] सर्वे[१९] लक्षण-सम्पन्नाः[१९] सर्वे[२०] धर्म-पराऽयणाः[२०] ॥९ ॥[१०४
N] दश-वर्ष-सहस्राणि दश-वर्ष-शतानि च ।[२१]
८उ] वीत-शोक-भय-क्रोधो[२२] रामो राज्यम् अकारयत्[२३] ॥१०॥[१०५

---

१. ल१ ल२ ब अ प्र–नार्थकः क० । रा१ रा२ भ–०र्थं कश्चिदस्पृशत् । फ म–नानर्थः कंचनास्पृशत् । २. रा१ रा२ भ–चापि । ३. फ–०कार्यं स्म । ४. ल२–नास्ति ॥ ५. ल१ ल२ ब अ प्र–सर्वे प्रमुदिता आसन् । फ म–सर्वं मुदितमेवासीत् । ६. रा१ रा२ फ म भ–सर्वो धर्मपरो जनः । ७. रा१ भ–वर्जं—धर्ममेवानुवर्तंत स्वाचारेण परंतपः । फ म–राममेवानुपश्यंतो न हिंसंति परस्परं ॥ ८. फ म–आसन् वर्षसहस्राणि नराः पुत्रसहस्रिणः । निरामयं वीतशोकं रामो राज्यमकारयत् । ल१ ल२ ब अ प्र–नास्ति ॥ ९. फ म–०वश्चाभवंस्तथा । म–०वश्चाभवंस्तदा । १०. ल१ ल२ ब अ प्र फ म–नास्ति ॥ ११. फ म–फलवत्यस । १२. फ–सर्वास्ता वै रसान्विताः । म–सर्वाश्च सुरसान्विताः । १३. ल१ ल२ ब अ प्र–नास्ति । १४. ल१ ल२ ब अ प्र–कालवर्षी च ॥ १५. ल१–०र्मेऽथ । ल२ ब अ प्र–०र्मे च । १६. ल१ ल२ ब अ प्र–तु । १७. फ–स्वकर्मसु च वर्तंते तुष्टाः स्वैः स्वैः स्वकर्मभिः । म–स्वकर्मस्ववर्तंत तुष्टाः स्वैः स्वैश्च कर्मभिः । १८. रा१ भ–आसन्प्रजा धर्मपरा रा० । फ म–प्रजा धर्मपराः सर्वा नावृत्तो वर्त्तते जनः । १९. रा१ म भ–सर्वेलक्षणसम्पन्नोः । २०. रा१ भ–सर्वधर्मपरायणः । फ म–धर्मकर्मरतः सदा ॥ २१. अतः परमधिकः पाठः—ल१ ल२ ब अ प्र–निरामया ह्यशोकाश्च रामे राज्यं प्रशासति । अरयाश्च विनेताश्च महासत्त्वा जितेंद्रियाः ॥ अभयाश्च तथा सत्त्वा बलवीर्यसमन्विताः । २२. रा१ रा२ भ–एवं गुणसमायुक्तो । ल१ ल२ ब–०कभयक्रोधो । म–वीतरागभ० । २३ म–चकार ह ॥

स राज्यम् अ-खिलं प्राऽऽप्य निहताऽरिर् महा-यशाः । [८९पू
९] ईजे[1] बहु-विधैर्[2] यज्ञैर् महद्भिश्[3] चाऽऽप्त-दक्षिणैः[3] ।।११।। [९६उ
दशाऽश्व-मेधान् आ-जह्रे[4] जारूथ्यान्[4] भूरि-दक्षिणान्[5] । [९४उ
१०] पुण्डरीकाऽश्वमेधाभ्यां वाजपेयेन[6] चाऽसकृत्[6] ।
N] अन्यैश्[7] च वि-विधैर्[7] यज्ञैर् अयजत् पार्थिवर्षभः[8] ।।[9]१२।।[९३
आ-जानु-बाहुः सु-मुखो महा-स्कन्धः[10] प्रताप-वान्[10] ।
११] लक्ष्मणाऽनुचरो रामः पृथिवीम् अन्व्-अपालयत् ।।[11]१३।।[९५
धन्यं[12] यशस्यम् आयुष्यं राज्ञां[12] च विजयाऽऽवहम् ।[13]
१२] आदि-काव्यं महत् त्व् एतत् पुरा वाल्मीकिना कृतम् ।[14]१४।[१०६पू
रामस्य चरितं रम्यं[15] देव-देवस्य भास्-वतः[16] ।[17] [N
१३] शृणुयाद् यः सदा लोके स वै मुच्येत किल्बिषात् ।[18]१५[19]।[१०६उ
पुत्र-कामाश्[20] च पुत्रान् वै[20] धन-कामा[21] धनानि च ।
१४] लभन्ते[22] मनु-जा[22] लोके श्रुत्वा रामस्य चेष्टितम् ।[23]१६।[१०७
लभते पति-कामा हि पतिं कन्या मनो-रमम् ।
१५] समा-गमं प्रोषितै(?ता)श्[24] च[24] लभन्ते[25] बन्धुभिः[26] प्रियैः[26] ।।१७।।[N
यथा[27] रामेण[27] कौसल्या सु-मित्रा लक्ष्मणेन च । [१०८उ
N] भरतेन च कैकेयी जीवत्-पुत्रास्[28] तथा स्त्रियः[28] ।१८।[१०९पू

---

१. फ म—रामो । २. ल१ ल२ ब अ प्र—च विविधैर् । ३. फ म—अयज-भूरिद० ॥ ४. ल१ ल२ ब अ प्र—राजेंद्र आजह्रे । रा२—राजेंद्रश्चकार । ५. रा१ भ—०क्षिणः । फ—बहुद० । म—स निरंगलान् । ६. ल१ ल२ ब अ प्र—०न सत्कृतां । फ म—तथा बहुसुवर्णकैः । ७. रा२—अन्यैर्बहुविधैर् । ८. फ—०वात्मजः । ९. रा१ भ—नास्ति । अतः परमधिकः पाठः—फ म—उषित्वा स महाबाहुश्चतुर्दश समा वने ॥ १०. फ म—सिंहस्कंधोऽरिमर्दनः । ११. ल२—नास्ति । अतः परमधिकः पाठः—फ म—ततो रामः स धर्मात्मा प्राप्य राज्यमनुत्तमम् ॥ १२. फ—इदं पुराणमायुष्यं राज्यं । १३. ल१ ल२ म—नास्ति । १४. ल१—कथितं प्रयतेनैव वाल्मीकेन महात्मना । अ—०व्यं पुरा चैतन्महद्वा० । फ—०व्यमिदं चार्षं पुरा वा० । म—०व्यमिदं त्वार्षं पुरा वा० ॥ १५. ल२ ब प्र—पश्य । १६. ल२ ब अ प्र—शाश्वतम् । १७. ल१—एवमेतत्पुरावृत्तमाख्यातं भद्रमस्तु नः । फ—नास्ति । १८. ल१ फ—यः शृणोति सतां मध्ये नरः पापात्प्रमुच्यते । १९. म—नास्ति ॥ २०. ल२ ब अ प्र रा२—०मश्च पु० । फ म—पुत्रार्थी लभते पुत्रान् । २१. रा१ भ—वर्ज—०कामो । २२. ल१ ब—लभेत मनुजो । ल२ अ प्र—लभते मनुजो । २३. फ म—नास्ति ॥ २४. फ म—प्रवासेभ्यो । २५. म—वर्ज—लभते । २६. फ—चापि बांधवे । म—बन्धुबान्धवैः ॥ २७. फ—राघवेणैव । म—राघवेण च । २८. फ म—समेता प्रियवादिना ॥

समा-गता महा-भागा सीता चाऽपि यशस्विनी[1] ।[2]
N] कथां[3] रामायणं श्रुत्वा प्राऽऽप्नोति प्रिय-सङ्गमम् ।।१९।। [N
शृण्वतः पठतश् चैव[4] सर्वं[5] पापं प्र-णश्यति ।[5] [N
महीं वि-जयते राजा शत्रुश्[6] चाऽस्य वि-नश्यति[6] । [१०८पू
N] श्रुत्वा काव्यम्[7] इदं[7] पुण्यं दीर्घम् आयुश् च विन्दति ।२०।[११०पू
श्रुत्वा रामायणं यो वै भूमि-दानं समा-चरेत् ।
N] स भवेत् पृथिवी-पालश् चक्र-वर्ती पुनः पुनः ।।२१[8]।।[N
गो-भूमि-रत्न-वासांसि भोगांश् च विपुलांस् तथा ।
N] दातव्यं श्रद्-दधानेन ह्य् अ-क्षयं स्वर्गम् इच्छता ।।२२[8]।। [N
इमं च[9] वि-जयं चित्रं[10] रामस्याऽक्लिष्ट-कर्मणः ।
N] लोक-नाथस्य कृत्स्नस्य सर्वे प्राऽञ्जलयो नराः[11] ।।[12]२३।।[N
शृण्वन्ति लोके य[13] इदम्[13] आर्षं वाल्मीकिना कृतम् ।
N] रामस्य चरितं रम्यं नाऽस्ति तेषां परा-भवः ।।२४।। [N
N] समा-गमं प्र-वासिनां[14] लभन्ते[15] चाऽपि बान्धवाः[16] ।
१६उ] प्राऽर्थितांश् च वरान् सर्वान्[17] आप्नुवन्ति[17] यथेप्सितान् ।।२५।।[११२
श्रवणेन सुराः सर्वे प्रीयन्ते[18] पठनात्[18] तथा ।
वि-नायकाश् च शाम्यन्ति गृहे तिष्ठन्ति[19] यस्य[20] वै । [११३
N] आर्तवे च[21] स्त्रियः श्रुत्वा प्र-सूयन्ते सुताञ् छुभान् ।२६।[११४उ
पूजयंश् च पठंश् चेदं[22] शृण्वञ्[23] च श्रद्-दधन्[23] नरः ।
N] सर्व-पाप-विमुक्ताऽऽत्मा[24] दीर्घम् आयुर् अवाऽऽप्नुयात् ।।२७[25]।।[११५

---

१. ल१ ल२ ब प्र-तपस्विनी । २. भ-नास्ति । ३. रा२ फ भ-तथा । म-एवं ॥ ४. ल१ ल२ ब प्र-चापि । ५. रा२ भ-नास्ति । ६. ल१ ल२ ब प्र-०श्चापि वि० । फ म-शत्रूंश्चाप्यधितिष्ठति । ७. फ म-रामायणं ॥ ८. फ म भ-नास्ति ॥ ९. रा२ फ म भ-तु । १०. फ म-श्रुत्वा । ११. रा२ भ-नृपाः । १२. फ म-अत आरभ्य २७-शश्लोकं यावन्नास्ति ॥ १३. रा२ भ-ये चेदं ॥ १४. रा२ भ-वर्ज—०सिभ्यो । १५. रा१ ल१ ल२ ब अ-लभते । प्र-लभ्यते । १६. रा१ अ-मानुषः । ल१ ल२ ब अ प्र-०वैः । १७. रा२ भ-भोगान् प्राप्नु० । १८. रा२ भ-वर्ज—प्रसन्ना वरदास् । १९. प्र रा२ भ-तिष्ठति । २०. रा२ भ-यत्र । २१. रा१ ल१ ल२ ब अ प्र-वै ॥ २२. रा२ भ-वर्ज—चेमं । २३. रा१-श्रद्धान्वितो । २४. रा१ अ-०विशुद्धात्मा । रा२ भ-०विनिर्मुक्तो । २५. अतः परमधिकः पाठः—रा२-स्वर्णस्तेयी सुरापी च गोहंता ब्राह्मणस्य च ॥

श्लोक-पादं पठेद् यस् तु विष्णु-लोकं स गच्छति ।[1]

N] श्रद्-दधानस्[2] तु सततं भक्तश् चैव[2] वि-शेषतः ॥[3]२८॥ [N

प्रीयते भग-वान् विष्णुः स हि रामो महा-यशाः ।[4] [११७उ

N] आदि-देवो महा-बाहुर् हरिर् नारायणः प्र-भुः ।२९[4]॥[११८पू

द्वि-जश्[5] च[5] वेदान् समवाऽऽप्नुयात् सुखं

राज्यं च राजन्य-वरः सुखाऽऽगतम्[6] ।

धनानि वैश्यश् च सुखेन वै लभेत्

तथैव शूद्रोऽपि[7] परां च सद्-गतिम्[8] ॥३०[9]॥ [N

कुलस्य[10] वृद्धिं[10] धन-धान्य-सङ्कुलां[11]

स्त्रियश्[12] च पुत्रान् सुखम् एव चोत्-तमम् ।

रामस्य शृण्वंश् चरितं महाऽऽत्मनः

N] प्राऽऽप्नोति सर्वाम्[13] इह चाऽर्थ-सिद्धिम् ॥३१[14]॥[११९

आरोग्यम् आयुष्यम् इदं[15] यशस्यं

धन्यं महद् बुद्धि-करं सु-पुण्यम्[16] ।[17]

श्रोतव्यम् एतन् नि-यतं[18] हि[18] सद्भिर्

N] ऊर्जस्-करं[19] वृद्धि-करं च नित्यम्[19] ॥३२॥[१२०

---

१. रा२-एतद्दानात्प्रमुच्येत स याति वैष्णवं पदम् । भ-नास्ति । अतः परमधिकः पाठः—रा२-प्रौष्ठपद्यां पौर्णमास्यां मार्गे चैव विशेषतः । एतद्दानस्य महिमा न भूतो न भविष्यति ॥ २. म-०नस्य सततं मार्गे चैव । भ-०नस्य सततं तद्भक्तस्य । ३. फ म-नास्ति ॥ ४. रा२·भ-वर्जे—प्राप्नोति स हरेर्लोकं स महात्मा महायशाः ॥ ५. रा१ ल१ ल२ ब अ प्र-द्विजोऽपि । ६. भ-कुलाग० । ७. रा१ ल१ ल२ ब अ प्र-शूद्रस्तु । ८. रा१ ल१ ल२ ब अ प्र-संगतिम् । ९. फ म-वेदविद्य भवेद्विप्रः क्षत्रियो राज्यमाप्नुयात् । धनधान्यं तथा वैश्यः शूद्रश्च सुखमाप्नुयात् ॥ १०. रा२ भ-कुटुम्बवृ० । ११. भ-०संचयं । १२. भ-श्रियश् । १३. ल१ ल२ ब-धर्मान् । रा१ अ प्र रा२-चार्थान् । १४. फ म-नास्ति । अतः परमधिकः पाठः—रा१ ल१ ल२ ब अ प्र फ म-कुटुंबवृद्धिं धनधान्यसंचयं स्त्रियश्च मुख्याः सुखमुत्तमं सदा । लभेत लक्ष्मीं विपुलां नरोत्तमो यथाभिषेकं भुवि रामलक्ष्मणौ ॥ १५. भ-०ष्यमथो । १६. ल१ ल२ ब-अत आरभ्य 'वृद्धिकरं' इति यावन्नास्ति । १७. फ-आयुष्यमारोग्यकरं यशस्यं सौभ्रातृकं बुद्धिविवर्द्धनं च । म-पुण्यं पवित्रं सुखदं यशस्यं सौभ्रातृकं बुद्धिविपर्ययं च । १८. फ-नियतैश्च । भ-नियतैर्हि । १९. भ-यशस्करं वृ० । रा१ अ प्र रा२-०स्करं बुद्धि० । फ म-आख्यानमूर्जस्करवृद्धिकामैः ॥

ऋषि-कृतम्[1] इति दिव्यं ह्य्[2] आदि-काव्यं[2] त्रि-लोके ।
नि-गदितम् इदम् आर्षं[3] राम-वृत्तं पराऽर्घ्यम्[3] ।
रघु-कुल-वर-जन्म-ख्यापनं[4] पुण्य-कीर्तेः ।
N] दनु-तनय-निहन्तुर् लोक-नाथस्य विष्णोः ॥३३[5]॥[N

इत्यार्षे रामायणे महाकवि-वाल्मीकि-विरचिते[6] युद्ध-काण्डे[7] रामाऽभि-षेको नाम दशोत्तरशततमः सर्गः[7] ॥ ११० ॥[8]

समाप्तश्चाऽयं युद्ध-काण्डः ।

---

१. भ-मुनिकृतं । २. भ-ह्यादि का० । ३. भ-आर्षं पुण्यमत्यद्भुतं च । ४. भ-वर्ज---०न्मस्थापनं । ५. फ म-नास्ति ॥ ६. ल१ ल२ अ प्र फ-महर्षिवा० । ७. ल१ ल२ ब प्र-आभ्युदयिके रा० । ब प्र-लंकाकांडे रा० । फ-आभ्युदयिके पर्वणि रामाभिषेकः समाप्तः । म-चतुर्विंशतिसाहस्र्यां संहितायां सुंदरकांडे रामराज्यवर्णनं समाप्तं । भ-वाल्मीकीये लंकाकांडं समाप्तं ॥ ८. अतः परमादर्शग्रंथानां विशिष्टा उपसंहाराः---रा१ ल१ ल२ अ प्र रा२-कांडेऽस्मिन्परिसंख्यानं कथितं तत्त्वबुद्धिना । सर्गाणां द्वे शते चैव पंचसर्गसमन्विते ॥ अष्टौ श्लोकसहस्राणि पंचश्लोकशतानि च । वृत्तांताश्च समाख्याताः सप्ततिर्द्वे च संयुताः ॥ रा१-अत्रानुक्रमणी । समाप्तोयं युद्ध-कांडो लंकापर्वगर्भः । ॐ पुराणं भारतं वापि रामायणमथापि वा । दत्त्वा यत्फलमाप्नोति पार्थ तत्केन वर्ण्यते । यत्फलं तीर्थयात्रायां यत्फलं यज्ञयाजिनाम् । कपिलानां सहस्रेण सम्यग्दत्तेन यत्फलम् ॥ तत्फलं समवाप्नोति पुस्तकैकप्रदानतः । वाजपेयसहस्रेण सम्यग्दत्तस्य यत्फलं तत्फलं समवाप्नोति विद्यादानान्न संशयं । धर्माऽधर्मौ न जानाति विद्याविरहितः पुमान् । तस्मात्सर्वधर्मार्थं विद्यादानरतो भवेत् ॥ त्रैलोक्यं चतुरो वर्णाश्चत्वारश्चाश्रमाः पृथक् । ब्रह्माद्या देवताः सर्वा विद्यादाने प्रतिष्ठिताः ॥ चतुर्युगान्न (?) स राजेन्द्र एकसप्ततिसंख्यया । कल्पं विष्णुपुरे तिष्ठन्पूज्यमानः सुरोत्तमैः ॥ क्षितिं चागम्य कल्पांते राजा भवति धार्मिकः । हस्त्यश्वरथसंयुक्तो दीर्घायुर्नीरुजो भवेत् ॥ पुत्रपौत्रैः परिवृतो जीवेच्च शरदां शतम् । इत्यार्षे रामायणे महाकवि-वाल्मीकिविरचिते युद्धकाण्डे समाप्तं संपूर्णः । श्रीरामाय नमः । ल१-समाप्तोऽयं लंकाकांडः--ॐ शुभमस्तु सर्वजगताम् । रामः श्रीसीतारामाय सलक्ष्मणाय नमो नमः । भद्रं भद्रं भद्रं ॥ ल२-समाप्तश्चायं युद्धकांडः । ॐ तत्सत् । ॐ श्रीगणेशाय नमः । शुभं शुभं । पुराणं भारतं वापि रामायणमथापि वा दत्त्वा यत्फलमाप्नोति पार्थ तत्केन वर्ण्यते ॥ यत्फलं तीर्थयात्रायां यत्फलं यज्ञयाजिनाम् । कपिलानां सहस्रेण सम्यग्दत्तेन यत्फलम् । तत्फलं समवाप्नोति पुस्तकैकं न संशयः ॥ शुभमस्तु लेखकपाठकयोः शुभं शुभं । ॐ तत्सत् ॥ ॐ श्री संवत् ९ ज्येष्ठवदीसप्तम्यां शनिवासरे इदं रामायणपुस्तकं समाप्तं शुभं । समाप्तोयं लंकाकांडः । ॐ शुभमस्तु ॥

अ–समाप्तो युद्धकांडः । शुभमस्तु । लिखितं मिश्र रामलाल वासी कोटका अलवर-मध्ये लीषी आश्रै राउजीकै ॥ प्र–समाप्तोयं लंकाकांडः । शुभमस्तु लेखकपाठकयोः । रा₂–समाप्तोऽयं युद्धकांडः । खखांकनागेंदुमिते (१८००) तु वत्सरे पौषसितस्यैक-तिथौ हि सूर्यजे । अलेषीदमीश्वर एतच्चाज्ञा शिवापतिराधनतत्परेण ॥ श्रीरामायनमः । सीतारामचंद्राभ्यां नमो नमः । पुनरपि हनुमते नमः । श्रीराम । श्रीकोशलेंद्राधिपतये नमः । श्रीराम ॥ फ–शुभमस्तु । लंकाकांडः समाप्तः । फाल्गुणस्य पूर्णिमायां गुरुवासरे तथैव च लिखितमिदं पुस्तकं रघुनाथेन धीमता ॥ म–आभ्युदयिकं पर्व सुन्दरकांडं चेति । अतः परमुत्तरकांडस्तृतीयो भविष्यति । यस्यायमादि श्लोकः प्राप्त राज्यस्य रामस्य राक्षसानां वधे कृते । आजग्मुर्ऋषयः सर्वे राघवं प्रति वंदितुं ॥ अस्मिन् कांडेपि संख्यानं कथितं तत्त्वबुद्धिना । सर्गाणां द्वे शते चैव पंचसर्गसमन्विते ॥ अष्टौ श्लोकसहस्राणि अष्टौ श्लोकशतानि च ॥ श्लोकाश्च विंशतिः प्रोक्ताः पञ्चश्लोक-समन्विताः ॥ वृत्तान्ताश्च तथा ख्याताः सप्ततिर्द्वे च संयुताः । अत्रानुक्रमणी । वाल्मीकिना कारितमप्रमेयं रामायणं पापतरोः कुठारं । समग्रिमं सुन्दरकांडमे-तत्पठेद्यदीच्छेत्सुखस्वर्गसंपदं ॥ एवं ग्रन्थ संख्या ९५३५ आदर्शशोषान्मतिविभ्रमाद्वा यदर्थहीनं लिखितं मयात्र । तत्सर्वमार्यैः परिशोधनीयं प्रायेण मुह्यंति हि ये लिखंति ॥ युद्धकांड संपूर्ण शुभमस्तु । संवत् १८१० ॥ सावनमासे सुकल पंछ सप्तम्यां सोमवासरे शुभस्थान गीरी मध्ये महाराज श्री राउ खुस्याल सिंघस्य राज्यं । लिखितं वैरागी उधोदास जी ॥ यादिसं पुस्तकं दृष्ट्वा तादिसं लिष्यतो मया । जदिपि सुधमसुधं वा मम दोक्षो न दीयते । भ–शुभमस्तु ॥ सिद्धिरस्तु ॥ संवत् १७०३ समयैवैशा० ।